KÂVYAMÂLÂ. 34.

THE

PRÂCHÎNA-LEKHA-MÂLÂ

OR

A COLLECTION OF

Ancient Historical Records.

Vol. I.

EDITED BY

MAHÂMAHOPÂDHYÂYA PANDIT DURGÂPRASÂD

AND

KÂS'ÎNÂTH PÂNDURANG PARAB.

PRINTED AND PUBLISHED

BY

TUKARAM JAVAJI

PROPRIETOR OF "JAVAJI DADAJI'S NIRNAYA-SAGARA" PRESS,

BOMBAY.

1892.

Price 1½ Rupee.

(Registered according to Act XXV of 1867.)

(All rights reserved by the publisher.)

काव्यमाला ३४.

प्राचीनलेखमाला।

(प्रथमो भागः।)

जयपुरमहाराजाश्रितेन पण्डितव्रजलालसूनुना
महामहोपाध्यायपण्डितदुर्गाप्रसादेन,
परबोपाह्वेन पाण्डुरङ्गतनूभुवा
काशीनाथशर्मणा च
संशोधिता।

सा च

मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीता।

१८९२

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा निर्णयसागरयन्त्रालयाधि-
पतेरेवाधिकारः।)

मूल्यं १।। रूप्यकः।

प्राचीनलेखमालाया अनुक्रमणी।

लेखाङ्काः। पृष्ठम्।

१. धारानगराधिपसुप्रसिद्धभोजमहीपतेः पितामहस्य वाक्पतिराजस्य दानपत्रम् १
२. धारानगराधिपतेः सुप्रसिद्धस्य भोजनरेन्द्रस्य दानपत्रम् ४
३. धारानगराधिपतिसुप्रसिद्धभोजमहीपतेर्वंश्यस्यार्जुनवर्मदेवस्य दानपत्रम् ६
४. राष्ट्रकूटोद्भवभरुकच्छाधिपतेः श्रीमदकालवर्षदेवसूनोः श्रीध्रुवराजदेवस्य दानपत्रम् ९
५. राष्ट्रकूटोद्भवलाटदेशाधीश्वरकर्कराजमहीपतेर्दानपत्रम् १७
६. राष्ट्रकूटवंशोद्भवस्य चतुर्थगोविन्दनृपतेर्दानपत्रम् २३
७. चौलुक्यवंशोद्भवस्य लाटदेशाधिपतेस्त्रिलोचनपालस्य दानपत्रम् २७
८. श्रीधरणीवराहाख्यमहीपतेर्दानपत्रम् ३२
९. राष्ट्रकूटवंशोद्भवस्य द्वितीयकर्कराजस्य दानपत्रम् ३५
१०. राणासमरसिंहस्य प्रशस्तिः ३९
११. राष्ट्रकूटवंशोद्भवस्य द्वितीयप्रभूतवर्षमहीपतेर्दानपत्रम् ४७
१२. मथनदेवमहीपतेर्दानपत्रम् ५३
१३. श्रीपृथ्वीकोङ्गणिमहाराजस्य दानपत्रम् ५५
१४. यादववंशोद्भवस्य वीरबल्लालदेवमहीपतेर्दानपत्रम् ५९
१५. गुप्तवंशोद्भवस्य श्रीमहाभवगुप्तदेवस्य दानपत्रम् ६६
१६. चालुक्यवंशोद्भवस्य श्रीपुलकेशिनः शिलालेखः ६८
१७. वलभीप्रभोर्महाराजध्रुवसेनस्य दानपत्रम् ७२
१८. शिलाहारवंशोद्भवस्य श्रीछित्तराजदेवस्य दानपत्रम् ७४
१९. श्रीविष्णुगोपवर्मणो महीपतेर्दानपत्रम् ७७
२०. अविनीतमहीपतेर्दानपत्रम् ७८

२१. ग्वाल्हेरनगरोपकण्ठस्थितगिरिदुर्गे पद्मनाभदेवालये समुत्कीर्णा प्रशस्तिः ८१
२२. कान्यकुब्जाधीशविजयचन्द्रमहीपतिसूनूयुवराजजयचन्द्रस्य दानपत्रम् ९७
२३. कान्यकुब्जेश्वरश्रीजयच्चन्द्रमहीपतेर्दानपत्रम् १००
२४. महाराजश्रीमहेन्द्रपालस्य दानपत्रम् १०४
२५. महाराजश्रीविनायकपालस्य दानपत्रम् १०५
२६. मन्दसोरनगरस्थसूर्यमन्दिरप्रशस्तिः १०७
२७. मन्दसोरनगरकूपस्थितप्रशस्तिः ११२
२८. यशोधर्ममहीपतेः प्रशस्तिः ११६
२९. श्रीनारायणपालदेवस्य दानपत्रम् ११८
३०. वलभीप्रभोः श्रीधरसेनमहीपतेर्दानपत्रम् १२२
३१. बौद्धगयामन्दिरस्थशिलालेखः १२५
३२. कोटाप्रान्तस्थविहारप्रशस्तिः १२७
३३. भरतपुरदेशान्तर्वर्तिव्यानानगरस्थप्रशस्तिः १२९
३४. सत्यवर्ममहीपतेर्दानपत्रम् १३०
३५. चालुक्यवंशोद्भूतराजराजापरनामश्रीविष्णुवर्धनमहीपतेर्दानपत्रम् १३१
३६. कुलोत्तुङ्गचोडदेवमहीपाश्रितकाटदण्डाधिनाथस्य दानपत्रम् १३८
३७. श्रीभद्रबाहुप्रशस्तिः १४३
३८. श्रीमल्लिषेणप्रशस्तिः १४४
३९. यादववंशोद्भूतकृष्ण(कह्नर)महीपालामात्यमल्लिसेहिदानपत्रम् १५५
४०. नेपालमहीपालसिद्धिनृसिंहमल्लस्य प्रशस्तिः १६१
४१. नेपालपालस्य श्रीजयदेवमहीपतेः प्रशस्तिः १६६
४२. प्रतापमल्लनृपतिप्रासादप्रशस्तिः १७१
४३. नेपालक्षितिपालवंशावलिः १७३

४४. द्रविडदेशपालविजयभूपालदानपत्रम् १७८
४५. कुमारपालकारितवडनगरप्राकारप्रशस्तिः १८१
४६. कुरुक्षेत्रप्रान्तवर्तिपृथूदकक्षेत्रस्थविष्णुमन्दिरप्रशस्तिः १८६
४७. सोमनाथक्षेत्रस्थस्य कस्यचन प्रासादस्य प्रशस्तिः १८९
४८. मालवमहीपालप्रशस्तिः १९७
४९. कम्बोजदेशस्थशिवालयप्रशस्तिः १९९
५०. कम्बोजदेशस्थशिवालयप्रशस्तिः (द्वितीया) २०२
५१. मल्लपुरस्थशिवालयप्रशस्तिः २०४
५२. चालुक्यवीरचोडमहीपतेर्दानपत्रम् २०५
५३. चालुक्यविष्णुवर्धनमहाराजदानपत्रम् २१२
५४. श्रीबदरिकाश्रमयात्रान्तर्गतपण्डकेश्वरमन्दिरोपलब्धदानपत्रम् २१६
५५. सुप्रसिद्धश्रीवीरबुक्करायसुतहरिहरमहाराजस्य दानपत्रम् २१८
५६. श्रीलक्ष्मीवर्मदेवानां शासनपत्रम् २२२
५७. श्रीमदमोघवर्षदेवापराभिधानश्रीमद्वाक्पतिराजदेवानां शासन-
पत्रम् २२४
५८. श्रीशिवसिंहदेवनृपतीनां शासनपत्रम् २२५
५९. यादववंशभूषणरामभूपतिदानपत्रम् २२७
६०. राज्ञः श्रीशिवसिंहदेवस्य दानपत्रम् २३३
६१. वलभीप्रभोः प्रथमशिलादित्यस्य दानपत्रम् २३५
६२. श्रीध्रुवराजदेवस्य शासनपत्रम् २३७

काव्यमाला।

प्राचीनलेखमाला।

भोः काव्यमालानुग्राहका विद्वन्मुकुटमणयः, अस्तु वः संविदितम्, यथा किल बहुविधविद्यापारंगमैराधुनिकैः पण्डितवरैः प्राचीनमहीपतीनां दानपत्राणि प्रशस्तयः शिलालेखाश्च नानादेशेषु भूयसा परिश्रमेण राजाश्रयेण चान्विष्यान्विष्य 'इण्डियन् आण्टिक्वेरी', 'एशियाटिक् रिसर्चिस्', 'आर्कियालॉजिकल् सर्वे', 'रॉयल् एशियाटिक् सोसायटीज् जर्नल्', 'अमेरिकन् ओरिएण्टल् सोसायटीज् जर्नल्', 'बेङ्गॉल् एशियाटिक् सोसायटीज जर्नल्', 'बॉम्बे ब्राञ्च् आव् धी रॉयल् एशियाटिक् सोसायटीज जर्नल्', इत्यादिपुस्तकेषु नानाविध'रिपोर्ट'पुस्तकेषु च प्रतिदिनं प्राकाश्यं नीयन्ते। तेषु कचित्कचिदतिरुचिरं कवित्वमुपलभ्यत इति तत्परिशीलनेन कविताचातुरी प्राचीनेतिहासज्ञानं च युगपदेव समुपजायते। अतस्तत्तत्पुस्तकेभ्यस्तादृशलेखानामयं संग्रह आरब्धः। भविष्यति चायमावयोर्यत्नो युष्माकं संतोषावह इति दृढं संभावयावः।

काव्यमालासंपादकौ

दुर्गाप्रसाद-काशिनाथौ।

(१)

धारानगराधिपसुप्रसिद्धभोजमहीपतेः पितामहस्य वाक्पतिराजस्य दानपत्रम्।

याः स्फूर्जत्फणभृद्विषानलमिलद्धूमप्रभाः प्रोल्लस-
न्मूर्धाबद्धशशाङ्ककोटिघटिता याः सैंहिकेयोपमाः।
याश्चस्वद्गिरिजाकपोलललिताः कस्तूरिकाविभ्रमा-
स्ताः श्रीकण्ठकठोरकण्ठरुचयः श्रेयांसि पुष्णन्तु वः॥

यल्लक्ष्मीवदनेन्दुना न सुखितं यन्नार्द्रितं वारिधे-
र्वारा यन्न निजेन नाभिसरसीपद्मेन शान्तिं गतम्।
यच्छेषाहिफणासहस्रमधुरश्वासैर्न चाश्वासितं
तद्राधाविरहातुरं मुररिपोर्वेल्लद्वपुः पातु वः॥

परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीकृष्णराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीवैरिसिंहदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीसीयकदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमदमोघवर्षदेवापराभिधानश्रीमद्वाक्पतिराजदेवपृथ्वीवल्लभश्रीवल्लभनरेन्द्रदेवः कुशली श्रीनर्मदातटे गर्दभपानीयभोगे गर्दभपानीयसंबन्धिनि उत्तरस्यां दिशि पिप्परिकानाम्ना तडारे समुपगतान्समस्तराजपुरुषान्ब्राह्मणोत्तरान्प्रतिवासिपट्टकिलजनपदादींश्च बोधयति—अस्तु वः संविदितम्, यथा तडारोऽयमस्माभिः आघाटाः पूर्वस्यां दिशि

१. 'विवेकात्त्यक्तराज्येन राज्ञेयं रत्नमालिका। रचितामोघवर्षेण विदुषां सदलंकृतिः ॥' इति प्रश्नोत्तररत्नमालाकर्तायमेवामोघवर्षः कश्चिदन्यो वेति संदेहः. २. वाक्पतिराज इति मुञ्जस्यैव नामान्तरं भाति. दशरूपावलोके चतुर्थपरिच्छेदे 'प्रणयकुपितां दृष्ट्वा देवीं–' इत्यादिश्लोकः श्रीवाक्पतिराजदेवनाम्ना समुद्धृतः. तत्रैव च पुनरयमेव श्लोकः श्रीमुञ्जनाम्ना समुद्धृतः. एवं पिङ्गलसूत्रवृत्तौ हलायुधेन 'ब्रह्मक्षत्रकुलीनः प्रलीनसामन्तचक्रनुतचरणः । सकलसुकृतैकपुञ्जः श्रीमान्मुञ्जश्चिरं जयति ॥', 'जयति भुवनैकवीरः सीरायुधतुलितविपुलबलविभवः । अनवरतवित्तवितरणनिर्जितचम्पाधिपो मुञ्जः ॥', 'स जयति वाक्पतिराजः सकलार्थिमनोरथैककल्पतरुः । प्रत्यर्थिभूतपार्थिवलक्ष्मीहठहरणदुर्ललितः ॥' एतासूदाहृतास्वार्यास्वार्याद्वये मुञ्ज इति, तृतीयायां च वाक्पतिराज इति नामास्ति. अथ चैतद्दानपत्रस्य संवत्सरे (१०३१), सुभाषितरत्नसंदोहाख्यग्रन्थान्ते जैनेनामितगतियतिना 'समारूढे पूतत्रिदिववसतिं विक्रमनृपे सहस्रे वर्षाणां प्रभवति हि पञ्चाशदधिके (१०५०)। समाप्तं पञ्चम्यामवति धरणिं मुञ्जनृपतौ सिते पक्षे पौषे बुधहितमिदं शास्त्रमनघम् ॥' इत्युक्ते मुञ्जमहीपतिराज्यसमये च स्वल्पमेवान्तरमास्ति, तस्मादस्ति वाक्पतिराज इति मुञ्जस्य नामान्तरमिति भाति. मुञ्जो भोजस्य पितृव्य आसीदिति भोजप्रबन्धोक्तिस्तु प्रमाणान्तराभावान्नातिश्रद्धेया. वाक्पतिराजसमये उज्जयिन्येव राजधान्यासीदित्यस्माद्दानपत्रात्, 'अस्ति क्षिताबुज्जयिनीति नाम्ना पुरी विहायस्यमरावतीव । बबन्ध यस्यां पदमिन्द्रकल्पो महीपतिर्वाक्पतिराजदेवः ॥' इत्यस्मात्परिमलकविप्रणीतनवसाहसाङ्कचरितकाव्य(१।१७)श्लोकाच्च प्रतीयते. धारानगरी तु भोजदेवेनैव राजधानीत्वं नीता. 'कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः । जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम् ॥' (४।१४५) इति राजतरङ्गिण्यां वर्णितो गौडवधाख्यप्राकृतकाव्यकर्ता श्रीकमलायुधशिष्यः कान्यकुब्जाधीशयशोवर्मनरेन्द्राश्रितो वाक्पतिराजकविः खिस्ताब्दसप्तमशतकोत्तरार्धसमुद्भूत इत्यस्माद्भिन्नः. ३. 'यथा' इत्यारभ्य 'लक्षिताभिः' एतावत्पर्यन्तमनन्वित इवायं लेखः.

अगारवाहला मर्यादा, तथोत्तरस्यां दिशि चिखिल्लिकासत्कगर्तायासमायता मर्यादा, तथा पश्चिमदिशि गर्दभनदीमर्यादा, तथा दक्षिणस्यां दिशि श्रीपिशाचदेवतीर्थमर्यादा, एवं चतुराघाटोपलक्षिताभिरेकत्रिंशसाहस्रिकसंवत्सरैरऽस्मिन् भाद्रपदशुक्लचतुर्दश्यां पवित्रकपर्वणि श्रीमदुज्जयिनीसमावासितैः शिवतडागाम्भसि स्नात्वा चराचरगुरुं भगवन्तं भवानीपतिमभ्यर्च्य संसारस्यासारतां दृष्ट्वा

'वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरो विषयोपभोगः ।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
धर्मः सखा परमहो परलोकयाने ॥
भ्रमत्संसारचक्राग्रधाराधारामिमां श्रियम् ।
प्राप्य ये न ददुस्तेषां पश्चात्तापः परं फलम् ॥'

इति जगतो विनश्वरं सकलमिदमाकलय्य उपरिलिखिततडारः स्वसीमतृणकाष्ठयूतिगोचरपर्यन्तः सवृक्षमालाकुलः सहिरण्यभागभोगः सोपरिकरः सर्वादायसमेतः अहिच्छत्रविनिर्गताय धामदक्षिणप्रपन्नाय ज्ञानविज्ञानसंपन्नाय श्रीमद्वसन्ताचार्याय श्रीधनिकपण्डितसूनवे मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये अदृष्टफलमङ्गीकृत्य आचन्द्रार्कार्णवक्षितिसमकालं परया भक्त्या शासनेनोदकपूर्वं प्रतिपादित इति मत्वा तन्निवासिजनपदैर्यथादीयमानभागभोगकरहिरण्यादिकं सर्वमाज्ञाश्रवणविधेयैर्भूत्वा सर्वदास्मै समुपनेतव्यम् । सामान्यं चैतत्पुण्यफलं बुद्ध्वास्मद्वंशजैरन्यैरपि भाविभोक्तृभिरस्मत्प्रदत्तधर्मादायोऽयमनुमन्तव्यः पालनीयश्च । उक्तं च—

'बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
अस्मत्कुलक्रममुदारमुदाहरद्भि-
रन्यैश्च दानमिदमभ्यनुमोदनीयम् ।

१. दशरूपावलोककर्ता अयमेव धनिकपण्डितः स्यादिति भाति.

लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया
दानं फलं परयशःपरिपालनं च ॥
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयोभूयो याचते रामभद्रः ।
सामान्योऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः ॥
इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
सकलमिदमुदाहृतं च बुद्ध्वा नहि पुरुषैः परकीर्तयो विलोप्याः ॥'

इति ॥ सं० १०३१ भाद्रपदसुदि १४ स्वयमाज्ञादायकश्चात्र श्रीकण्हपैकः । स्वहस्तोऽयं श्रीवाक्पतिराजदेवस्य ॥

(इण्डियन् आण्टिक्केरी ६ । ५१–५२)

---

(२)

धारानगराधिपतेः सुप्रसिद्धस्य भोजनरेन्द्रस्य दानपत्रम् ।

जयति व्योमकेशोऽसौ यः सर्गाय बिभर्ति ताम् ।
ऐन्दवीं शिरसा लेखां जगद्बीजाङ्कुराकृतिम् ॥
तन्वन्तु वः स्मरारातेः कल्याणमनिशं जटाः ।
कल्पान्तसमयोद्दामतडिद्वलयपिङ्गलाः ॥

परमभट्टारकमहाराजाधिराजपरमेश्वर**श्रीसीयकदेव**पादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वर**श्रीवाक्पतिराजदेव**पादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वर**श्रीसिन्धुराजदेव**पादानुध्यातपरमभट्टारकम-

---

१. हस्ताक्षराणि वाक्पतिराजदेवस्येति तात्पर्यम्. २. सिन्धुराजपर्यन्तमप्युज्जयिन्येव राजधान्यासीत्. 'अस्ति क्षितावुज्जयिनीति नाम्ना' इत्यादि प्रथमलेखटिप्पणलिखितश्लोकानन्तरं नवसाहसाङ्कचरिते चत्वारिंशच्छ्लोकैरुज्जयिनी वर्णिता. तदनन्तरम् 'राजास्ति तस्यां स कुलाचलेन्द्रनिकुञ्जविश्रान्तयशस्तरङ्गः । भास्वान्ग्रहाणामिव भूपतीनामवाप्तसौख्यो धुरि सिन्धुराजः ॥ (१ । ५८)', 'दोश्चन्दनानोकहमाप्य यस्य समुल्लसत्सान्द्रयशःप्रसूना । गतातिवृद्धिं लवलीलतेव निबद्धमूला परमारलक्ष्मीः ॥ (१ । ७७)' इत्युज्जयिन्यामेव सिन्धुराजोऽपि वर्णितः. सिन्धुलः, सिन्धुलकः, इति नामद्वयेनापि क्वचित्सिन्धुराजनिर्देशः. नवसाहसाङ्कचरितं च परिमलेन सिन्धुराजसमय एव निर्मितम्.

हाराजाधिराजपरमेश्वरश्रीभोजदेवः कुशली नागहृदपश्चिमपथकान्तःपाति वीराणके समुपगतान्समस्तराजपुरुषान्ब्राह्मणोत्तरान्प्रतिनिवासिपट्टकिल[1]-जनपदादींश्च समादिशति—अस्तु वः संविदितम्, यथा अतीताष्टसप्तत्यधिकसाहस्रिकसंवत्सरे माघासिततृतीयायां रवावुदगयनपर्वणि कल्पितहलानां लेख्ये श्रीमद्धारायामवस्थितैरस्माभिः स्नात्वा चराचरगुरुं भगवन्तं भवानीपतिं समभ्यर्च्य संसारस्यासारतां दृष्ट्वा

'वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरो विषयोपभोगः ।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
धर्मः सखा परमहो परलोकयाने ॥
भ्रमत्संसारचक्राग्रधाराधारामिमां श्रियम् ।
प्राप्य ये न ददुस्तेषां पश्चात्तापः परं फलम् ॥'

इति जगतो विनश्वरं स्वरूपमाकलय्य उपरिलिखितग्रामः स्वसीमातृणागोचरयूतिपर्यन्तः सहिरण्यभागभोगः सोपरिकरः सर्वादायसमेतः ब्राह्मणधनपतिभट्टाय भट्टगोविन्दसुताय बह्वृचाश्वलायनशाखाय त्रिप्रवराय वेल्लवल्लप्रतिबद्धश्रीवादाविनिर्गतराघसुरसङ्गकर्णाटाय मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये अदृष्टफलमङ्गीकृत्य आचन्द्रार्कार्णवक्षितिसमकालं यावत्परया भक्त्या शासनेनोदकपूर्वं प्रतिपादित इति मत्वा यथादीयमानभागभोगकरहिरण्यादिकमाज्ञाश्रवणविधेयैर्भूत्वा सर्वमस्मै समुपनेतव्यम् । सामान्यं चैतत्पुण्यफलं बुद्ध्वास्मद्वंशजैरन्यैरपि भाविभोक्तृभिरस्मत्प्रदत्तधर्मादायोऽयमनुमन्तव्यः पालनीयश्च । उक्तं च—

'बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥

---

१. अधुना येषां 'पटैल' इति नाम्ना व्यवहारः. २. धारानगर्याम्.

अस्मत्कुलक्रममुदारमुदाहरद्भि-
रन्यैश्च दानमिदमभ्यनुमोदनीयम् ।
लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया
दानं फलं परयशःपरिपालनं च ॥
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयोभूयो याचते रामभद्रः ।
सामान्योऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः ॥
इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
सकलमिदमुदाहृतं च बुद्ध्वा नहि पुरुषैः परकीर्तयो विलोप्याः ॥'

इति ॥ संवत् १०७८ चैत्रसुदि १४ स्वयमाज्ञामङ्गलं महाश्रीः । स्वहस्तोऽयं श्रीभोजदेवस्य ॥

(इण्डियन् आण्टिक्केरी ६ । ५३–५४)

(३)

धारानगराधिपतिसुप्रसिद्धभोजमहीपतेर्वंश्यस्यार्जुनवर्मदेवस्य दानपत्रम् ।

ॐ नमः पुरुषार्थचूडामणये धर्माय ।

प्रतिबिम्बनिभाद्भूमेः कृत्वा साक्षात्परिग्रहम् ।
जगदाह्लादयन्दिश्याद्द्विजेन्द्रो मङ्गलानि वः ॥
जीयात्परशुरामोऽसौ क्षत्रैः क्षुण्णं रणाहतैः ।
संध्यार्कबिम्बमेवोर्वीदातुर्यस्यैति ताम्रताम् ॥
येन मन्दोदरीबाष्पवारिभिः शमितो मृधे ।
प्राणेश्वरीवियोगाग्निः स रामः श्रेयसेऽस्तु वः ॥
भीमेनापि धृता मूर्ध्नि यत्पादाः स युधिष्ठिरः ।
वंशाद्येनेन्दुना जीयात्स्वतुल्य इव निर्मितः ॥

---

१. दानवीराणां परशुरामरामयुधिष्ठिराणां वर्णनं दानपत्रारम्भे समुचितमेव. प्रथमश्लोके च प्रतिग्रहीतुर्द्विजराजस्य वर्णनम्. २. ताम्रपत्रत्वम्. ३. शंभुना, वृकोदरेण च. ४. रश्मयश्चरणाश्च.

परमारकुलोत्तंसः कंसजिन्माहिमा नृपः।
श्रीभोजदेव इत्यासीन्नासीराक्रान्तभूतलः ॥
यद्यशश्चन्द्रिकोद्द्योते दिगुत्सङ्गतरङ्गिते।
द्विषन्नृपयशःपुञ्जपुण्डरीकैर्निमीलितम् ॥
ततोऽभूदुदयादित्यो नित्योत्साहैककौतुकी।
असाधारणवीरश्रीरश्रीहेतुविरोधिनाम् ॥
महाकलहकल्पान्ते यस्योद्दामभिरा[1]शुगैः।
कति नोन्मूलितास्तुङ्गा भू[2]भृतः क[3]टकोल्बणाः ॥
तस्माच्छिन्नाद्विषन्मर्मा **नरवर्मा** नराधिपः।
धर्माभ्युद्धरणे धीमानभूत्सीमा महीभुजाम् ॥
प्रतिप्रभातं विप्रेभ्यो दत्तैर्ग्रामपदैः स्वयम्।
अनेकपदतां निन्ये धर्मो येनैकपादपि ॥
तस्याजनि **यशोवर्मा** पुत्रः क्षत्रियशेखरः।
तस्मादजयवर्माभूज्जयश्रीविश्रुतः सुतः ॥
तत्सूनुर्वीरमूर्धन्यो धन्योत्पत्तिरजायत।
गुर्जरोच्छेदनिर्बन्धी **विन्ध्यवर्मा** महाभुजः ॥
धा[4]रयोद्धृतया सार्धं दधाति स्म त्रि[5]धारताम्।
सांयुगीनस्य यस्यासिस्त्रातुं लोकत्रयीमिव ॥
तस्यामु[6]ष्यायणः पुत्रः सुत्रामश्रीरथाशिषत्।
भूपः **सुभटवर्मे**ति धर्मे तिष्ठन्महीतलम् ॥
यस्य ज्वलति दिग्जेतुः प्रतापस्तपनद्युतेः।
दावाग्निच्छद्मनाद्यापि गर्जन्गुर्जरपत्तने ॥

---

१. बाणैः, पवनैश्च. २. राजानः, पर्वताश्च. ३. सैन्यम्, नितम्बश्च. ४. धारया नगर्या उद्धृतया उन्नतिं नीतया. ५. धाराद्वयं खड्गस्य, तृतीया च धारानगरी. ६. ख्यातवंशोद्भवः.

देवभूयं गते तस्मिन्नन्दनोऽर्जुन[1]भूपतिः ।
दोष्णा धत्तेऽधुना धात्रीवलयं वलयं यथा ॥
बाललीलाहवे यस्य जैयसिंहे[2] पलायिते ।
दिक्पालहासव्याजेन यशो दिक्षु विजृम्भितम् ॥
काव्यगान्धर्वसर्वस्वनिधिना येन सांप्रतम् ।
भारावतरणं देव्याश्चक्रे पुस्तक[3]वीणयोः ॥
येन त्रि[4]विधवीरेण त्रिधा पल्लवितं यशः ।
धवलत्वं दधुस्त्रीणि जगन्ति कथमन्यथा ॥

स एष नरनायकः सर्वाभ्युदयी पगाराप्रतिजागरणके नर्मदोत्तरकूले हथिणावरग्रामे पूर्वराजदत्तावशिष्टायां भूमौ समस्तराजपुरुषान्ब्राह्मणोत्तरान्प्रतिनिवासिपट्टकिलजनपदादींश्च बोधयति—अस्तु वः संविदितम्, यथा श्रीमदमरेश्वरतीर्थावस्थितैरस्माभिर्द्विसप्तत्यधिकद्वादशशतसंवत्सरे भाद्रपदपौर्णमास्यां चन्द्रोपरागपर्वणि रेवाकपिलयोः संगमे स्नात्वा भगवन्तं भवानीपतिमोंकारं लक्ष्मीपतिं चक्रस्वामिनं चाभ्यर्च्य संसारस्यासारतां दृष्ट्वा तथा हि—

'वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरो विषयोपभोगः ।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
धर्मः सखा परमहो परलोकयाने ॥'

इति सर्वं विमृश्यादृष्टफलमङ्गीकृत्य मुक्तावस्थूस्थानविनिर्गताय वाजसनेयशाखाध्यायिने काश्यपगोत्राय काश्यपावत्सारनैध्रुवेति त्रिप्रवराय आवस-

---

१. अनेनैवार्जुनभूपतिना रसिकरञ्जिनीसमाख्या अमरुशतकटीका प्रणीतास्ति. 'क्षिप्ताशुभः सुभटवर्मनरेन्द्रसूनुर्वीरव्रती जगति भोजकुलप्रदीपः । प्रज्ञानवानमरुकस्य कवेः प्रसारःश्लोकाञ्शतं (?) विवृणुतेऽर्जुनवर्मदेवः ॥' अयं श्लोकस्तत्प्रारम्भे वर्तते. २. अयं गुजरातदेशाधिपतेः सिद्धराजजयसिंहादन्य एव कश्चिद्भाति. यतः सिद्धराजजयसिंहराज्यं ११९९ विक्रमसंवत्सरपर्यन्तमासीत्. एतद्दानपत्रं त्वस्मात्संवत्सरात्त्रिसप्ततिवर्षानन्तरं लिखितम्. ३. 'वीणापुस्तकधारिणीमभयदां' इत्यादि सरस्वत्या वीणापुस्तकधारणं प्रसिद्धमेव. ४. दयावीरेण, दानवीरेण, युद्धवीरेण च.

थिकदेल्हप्रपौत्राय पण्डितसोमदेवपौत्राय पण्डितजैत्रसिंहपुत्राय पुरोहितपण्डितश्रीगोविन्दशर्मणे ब्राह्मणाय भूमिरियं चतुःकण्टकविशुद्धा सवृक्षमालाकुला सहिरण्यभागभोगा सोपरिकरघट्टादायलवणादायेत्यादिसर्वादायसमेता सनिधिनिक्षेपा मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये चन्द्रार्कार्णवक्षितिसमकालं यावत्परया भक्त्या शासनेनोदकपूर्वं प्रदत्ता। तन्मत्वा तन्निवासिपट्टकिलजनपदैर्यथादीयमानभागभोगकरहिरण्यादिकमाज्ञाविधेयैर्भूत्वा सर्वममुष्मै दातव्यम्। सामान्यं चैतत्पुण्यफलं बुद्धास्मद्वंशजैरन्यैरपि भाविभोक्तृभिरस्मत्प्रदत्तधर्मादायोऽयमनुमन्तव्यः पालनीयश्च। उक्तं च—

'बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह मज्जति॥
सर्वानेवं भाविनः पार्थिवेन्द्रान्भूयोभूयो याचते रामभद्रः।
सामान्योऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः॥
इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च।
सकलमिदमुदाहृतं च बुद्ध्वा नहि पुरुषैः परकीर्तयो विलोप्याः॥'

इति॥ संवत् १२७२ भाद्रपदसुदि १५ बुधे। दू। श्रीमु २। रचितमिदं महासांधि० राजासलखणसंमतेन राजगुरुणा मदनेन। स्वहस्तोऽयं महाराजश्रीअर्जुनवर्मदेवस्य। उत्कीर्णं प० बाप्पदेवेन॥

(अमेरिकन् ओरिएण्टल् सोसायटीज जर्नल् ७ भागे)

---

(४)

श्रीमदकालवर्षदेवसूनोः श्रीध्रुवराजदेवस्य दानपत्रम्।

ॐ स्वस्ति।

स[1] वोऽव्याद्वेधसा धाम यन्नाभिकमलं कृतम्।
हरश्च यस्य कान्तेन्दुकलया कमलंकृतम्॥

---

१. वेधसा ब्रह्मणा यन्नाभिकमलं धाम कृतं सः, अर्थाद्विष्णुः, वोऽव्यात् युष्मान् रक्षतु. हरः शिवश्च वोऽव्यात्. यस्य कान्तेन्दुकलया कं शिरः अलंकृतं भूषितम्.

आसीद्द्विषत्तिमिरमुद्यतमण्डलाग्रो
ध्वस्तिं नयन्नभिमुखो रणशर्वरीषु।
भूपः शुचिर्विधुरिवास्तदिगन्तकीर्ति-
र्गोविन्दराज इति राजसु राजसिंहः॥
दृष्ट्वा चमूमभिमुखीं सुभटाट्टहासा-
मुन्नामितं सपदि येन रणेषु नित्यम्।
दष्टाधरेण दधता भ्रुकुटीं ललाटे
खड्गं कुलं च हृदयं च निजं च सत्त्वम्॥
खड्गं कराग्रान्मुखतश्च शोभा मानो मनस्तः सममेव यस्य।
महाहवे नाम निशम्य सद्यस्त्रयं रिपूणां विगलत्यकाण्डे॥
तस्यात्मजो जगति विश्रुतशुभ्रकीर्ति-
रार्तार्त्तिहारिहरिविक्रमनामधारी।
भूपस्त्रिविष्टपनृपानुकृतिः कृतज्ञः
श्रीकक्कराज इति गोत्रमणिर्बभूव॥
तस्य प्रभिन्नकरटच्युतदानदन्ति-
दन्तप्रहाररुचिरोल्लिखितांसपीठः।
क्ष्मापः क्षितौ क्षपितशत्रुरभूत्तनूजः
सद्राष्ट्रकूटकनकाद्रिरि**वेन्द्रराजः**॥
तस्योपार्जितमहसस्तनयश्चतुरुदधिवलयमालिन्याः।
भोक्ता भुवः शतक्रतुसदृशः **श्रीदन्तिदुर्गराजो**ऽभूत्॥
काञ्चीशकेरलनराधिपचोलपाण्ड्य-
श्रीहर्षवज्रटविभेदविधानदक्षम्।
कर्णाटकं बलमचिन्त्यमजेयमन्यै-
र्भृत्यैः कियद्भिरपि यः सहसा जिगाय॥
आ सेतोर्विपुलोपलावलिलसल्लोलोर्मिमालाजला-
दा प्रालेयकलङ्कितामलशिलाजालात्तुषाराचलात्।

१. मण्डलाग्रः खड्गः; (पक्षे) बिम्बाग्रभागः.

आ पूर्वापरवारिराशिपुलिनप्रान्तप्रसिद्धावधे-
येनेयं जगती स्वविक्रमबलेनैकातपत्रीकृता ॥
तस्मिन्दिवं प्रयाते [1]वल्लभराजेऽकृतप्रजाबाधः ।
श्रीकक्कराजसूनुर्महीपतिः **कृष्णराजोऽभूत्** ॥
यस्य स्वभुजपराक्रमनिःशेषोत्सादितारिदिक्चक्रम् ।
कृष्णस्येवाकृष्णं चरितं श्रीकृष्णराजस्य ॥
[2]शुभतुङ्गतुङ्गतुरगप्रवृद्धरेणूर्ध्वरुद्धरविकिरणम् ।
ग्रीष्मेऽपि नभो निखिलं प्रावृट्कालायते स्पष्टम् ॥
[3]राहप्पमात्मभुजजातबलावलेप-
माजौ विजित्य निशितासिलताप्रहारैः ।
पालिध्वजावलिशुभामचिरेण यो हि
राजाधिराजपरमेश्वरतां ततान ॥
पाता यश्चतुरम्बुराशिरशनालंकारभाजो भुव-
स्त्रय्याश्चापि कृतद्विजामरगुरुप्राज्याज्यपूजादरः ।
दाता मानभृदग्रणीर्गुणवतां योऽसौ श्रियो वल्लभो
भोक्तुं स्वर्गफलानि भूरितपसा स्थानं जगामामरम् ॥
येन श्वेतातपत्रप्रहतरविकरव्राततापात्सलीलं
जग्मे नासीरधूलीधवलितशिरसा [4]वल्लभाख्यः सदाजौ ।
श्रीमद्गोविन्दराजो जितजगदहितस्त्रैणवैधव्यदक्ष-
स्तस्यासीत्सूनुरेकः क्षणरणदलितारातिमत्तेभकुम्भः ॥
तस्यानुजः **श्रीध्रुवराजनामा** महानुभावोऽप्रहतप्रतापः ।
प्रसाधिताशेषनरेन्द्रचक्रः क्रमेण बालार्कवपुर्बभूव ॥

---

१. वल्लभराज इति दन्तिदुर्गस्य नामान्तरम्. २. शुभतुङ्ग इति कृष्णराजस्य नामान्तरम्. ३. राहप्पो नाम कश्चिन्महीपतिरासीत्. स च कुत्रत्य इत्यधुनापि न ज्ञायत इति स्वकीये दक्षिणेतिहासे भाण्डारकरोपाह्वपण्डितवरश्रीरामकृष्णशर्माणः. ४. वल्लभ इति गोविन्दराजस्य नामान्तरम्.

जाते यत्र च राष्ट्रकूटतिलके सद्भूपचूडामणौ
गुर्वी तुष्टिरथाखिलस्य जगतः सुस्वामिनि प्रत्यहम् ।
सत्यं सत्यमिति प्रशासति सति क्ष्मामासमुद्रान्तिका-
मासीद्धर्मपरे गुणामृतनिधौ सत्यव्रताधिष्ठिते ॥
रक्षता येन निःशेषं चतुरम्भोधिसंयुतम् ।
राज्यं धर्मेण लोकानां कृता तुष्टिः परा हृदि ॥
तस्यात्मजो[1] जगति सत्प्रथितोरुकीर्ति-
र्गोविन्दराज इति गोत्रललामभूतः ।
त्यागी पराक्रमधनः प्रकटप्रताप-
संतापिताहितजनो जनवल्लभोऽभूत् ॥
पृथ्वीवल्लभ इति च प्रथितं यस्यापरं जगति नाम ।
यश्चतुरुदधिसीमामेको[2] वसुधां वशे चक्रे ॥
एकोऽनेकनरेन्द्रवृन्दसहितान्यस्तान्समस्तानपि
प्रोत्खातासिलताप्रहारविधुरान्बद्ध्वा महासंयुगे ।
लक्ष्मीमप्यचलां चकार विलसत्सच्चामरग्राहिणीं
संसीदद्गुरुविप्रसज्जनसुहृद्बन्धूपभोग्यां भुवि ॥
तत्पुत्रोऽत्र गते नाकमाकम्पितरिपुव्रजे ।
श्रीमहाराजशर्वाख्यः[3] ख्यातो राजाभवद्गुणैः ॥
अर्थिषु यथार्थतां यः समभीष्टफलाप्तिलब्धतोषेषु ।
वृद्धिं निनाय परमाममोघवर्षाभिधानस्य[4] ॥
राजाभूत्तत्पितृव्यो रिपुभवविभवोद्भूत्यभावैकहेतु-
र्लक्ष्मीवानिन्द्रराजो[5] गुणिनृपनिकरान्तश्चमत्कारकारी ।
रागादन्यान्व्युदस्य प्रकटितविषया यं नृपान्सेवमाना
राज्यश्रीरेव चक्रे सकलकविजनोद्गीततथ्यस्वभावम् ॥

---

१. ध्रुवराजस्य. २. छन्दोभङ्गदूषितोऽयं पाठः. 'यश्चतुरम्बुधिसीमा' इत्युचितः पाठः. ३. शर्वस्य वंशो दक्षिणदेशे राज्यं कृतवान्. तद्वर्णनं दक्षिणेतिहासे द्रष्टव्यम्. ४. अमोघवर्ष इति शर्वस्य नामान्तरम्. ५. अग्रे वर्ण्यमान इन्द्रराजवंशो गुजरातदेशे राज्यं लब्धवान्.

निर्वाणावाप्तिबाणासहितहितजना यस्य माना: सुवृत्तं
वृत्तं जित्वान्यराज्ञां चरितमुदयवान्सर्वतोदिक्स केभ्यः ।
एकाकी दृप्तवैरिस्खलनकृतिसहप्रातिराज्ये सशङ्को
लाटीयं मण्डलं यस्तपन इव निजस्वामिदत्तं ररक्ष ॥

सूनुर्बभूव खलु तस्य महानुभावः
शास्त्रार्थबोधसुखलालितचित्तवृत्तिः ।
यो गौणनामपरिवारमुवाह पूर्वं
श्रीकक्कराजसुभगव्यपदेशमुच्चैः ॥

श्रीकक्कराज इति रक्षितराज्यभारः
सारं कुलस्य तनयो नयशालिशौर्यः ।
तस्याभवद्विभवनन्दितबन्धुसार्थः
पार्थः सदैव धनुषि प्रथमः शुचीनाम् ॥

दानेन मानेन सदाज्ञया वा वीर्येण शौर्येण च कोऽपि भूपः ।
एतेन तुल्योऽस्ति नवेति कीर्तिः सकौतुका भ्राम्यति यस्य लोके ॥

स्वेच्छागृहीतविषयान्दृढसंघभाजः
प्रोद्वृत्तदृप्ततरशुल्किकराष्ट्रकूटान् ।
उत्खातखड्गनिजबाहुबलेन जित्वा
योऽमोघवर्ष इति राज्यपदे व्यधत्त ॥

पुत्रीयतस्तस्य महानुभावः कृती कृतज्ञः कृतवीर्यवीर्यः ।
वशीकृताशेषनरेन्द्रवृन्दो बभूव सूनुर्ध्रुवराजनामा ॥

चन्द्रो जडो हिमगिरिः सहिमः प्रकृत्या
वातश्चलश्च तपनस्तपनस्वभावः ।
क्षारः पयोधिरिति तैः सममस्य नास्ति
येनोपमा निरुपमस्तत एव गीतः ॥

---

१ अस्फुटार्थोऽयं श्लोकः. २. कक्कराजस्य सूनुरपि कक्कराजनामेति संदिग्धम्. ३. अमोघवर्ष इति कक्कराजस्य नामान्तरम्. ४. निरुपम इति ध्रुवराजस्य नामान्तरम्.

रणशिरसि खड्गघातैर्वल्लभदण्डं पराङ्मुखीकृत्य ।
शस्त्रशतशुद्धदेहः स्वर्गमगादेक एवासौ ॥
तस्याशेषनराधिपहृतयशसः स्वर्गलोकगतकीर्तेः ।
श्रीमानकालवर्षस्तनयः समभूत्कुलालम्बः ॥
वल्लभदण्डाक्रान्तं विघटितदुष्टानुजीविवर्गेण ।
पितृपर्यागतमचिरान्मण्डलमध्यासितं येन ॥
प्रियवादी सत्यधनः श्रीमाननुजीविवत्सलो मानी ।
प्रतिपक्षक्षोभकरः शुभतुङ्गः[1] शुभकरः सुहृदाम् ॥
तस्मिन्स्वर्गीभूते गुणवति गुणवान्गुणाधिकप्रीतिः ।
समभूद्ध्रुवराजसमो ध्रुवराजस्तुष्टिकृल्लोके ॥
इतोऽभिमुखमापतत्प्रबलगूर्जराणां बल-
मितो विमुखवल्लभो विकृतिमागता बान्धवाः ।
इतोऽनुजविकुर्वितं शममगात्समस्तं भया-
दहो स्फुरणमद्भुतं निरुपमेन्द्र[2] खड्गस्य ते ॥
गुर्जरबलमतिबलवत्समुद्यतं बृंहितं च कुल्येन ।
एकाकिनैव विहितं पराङ्मुखं लीलया येन ॥
यश्चाभिषिक्तमात्रः परं यशस्त्यागशौर्यतोऽवाप ।
शुभतुङ्गोऽतितुङ्गः पदं यदाप्नोति नो चित्रम् ॥
यश्च स्वभुजबलार्जितमपीह राज्यं विभज्य भृत्यानाम् ।
भयमपि विद्वेषिजने धनं ददावर्थिने कामम् ॥
धारावर्ष[3]समुन्नतिं गुरुतरामालोक्य लक्ष्म्या युतो
धामव्याप्तदिगन्तरोऽपि मिहिरः सद्दंश्यवाहान्वितः ।
यातः सोऽपि शमं पराभवतमोव्याप्ताननः किं पुन-
र्येऽतीवामलतेजसा विरहिता हीनाश्च दीना भुवि ॥

---

१. शुभतुङ्ग इत्यकालवर्षस्य नामान्तरम्. २. निरुपम इति तृतीयध्रुवराजस्यापि नामान्तरम्. ३. धारावर्ष इत्यपि तृतीयध्रुवराजस्य नामान्तरम्.

यं प्राप्य विजितपूर्वजसकलगुणं पालितापि सगराद्यैः।
प्रियनाथलाभतुष्टा वसुधापि सकामतामाप ॥
तेनेदमनिलविद्युच्चञ्चलमवलोक्य जीवितमसारम्।
क्षितिदानपरमपुण्यः प्रवर्तितो धर्मदायोऽयम् ॥

सच समधिगताशेषमहाशब्दमहासामन्ताधिपतिधारावर्षश्रीध्रुवराजदेवः सर्वानेव यथासंबध्यमानान्राष्ट्रपतिविषयपतिग्रामकूटायुक्तनियुक्तकाधिकारिकवासापकमहत्तरादीन्समनुदर्शयति—अस्तु वः संविदितम्। यथा मया मातापित्रोरात्मनश्चैहिकामुष्मिकपुण्ययशोभिवृद्धये

विप्रोऽभूद्द्रपछ्यां बहुधनजनतासंकुलायां धरायां
ख्यातः श्रीढोड्डिनामा जनितजनसुखोऽध्वर्युसब्रह्मचारी।
यस्मिन्नर्थिजना ददत्यविरतं प्राज्यं कृतान्नादिकं
निश्चिन्तोदरपूरणाः समभवन्दुर्भिक्षकालेष्वपि ॥
त्रेन्नां स लब्ध्वा ध्रुवराजदेवात्सत्त्रं ददौ सर्वजनोपकारि।
दिने दिने यस्य गृहे नरेन्द्राः सहस्रशो भुञ्जते भूसुराश्च ॥

तस्य सुतः सत्त्रपतिर्नेनप्पनामा। तत्पुत्राय लाक्षायणसगोत्राय जोजिभाअभिधानाय कर्मान्तपुरप्रतिबद्धषोडशोत्तरग्रामशतान्तःपाती पाराहणकं ग्रामः। यस्याघाटनानि—पूर्वस्यां दिशि कुण्डीरवल्लिकानाम ग्रामः। दक्षिणतः त्रेन्नाहारान्तःपाती खौराच्छकं नाम ग्रामः। तथा दक्षिणत एव जोणन्धानामग्रामः। पश्चिमतो मोत्तकाभिधानं ब्राह्मणस्थानम्। उत्तरतो मोइवासकं नाम ग्रामः। एवमयं चतुराघाटनोपलक्षितः सोद्रङ्गः सपरिकरः सवृक्षमालाकुलः ससीमापर्यन्तः सदण्डदशापराधः सोत्पद्यमानवेष्टिकः सधान्यहिरण्यादेयोऽचाटभटप्रवेश्यः सर्वराजकीयानामहस्तप्रक्षेपणीयः भूमिच्छिद्रन्यायेन आचन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनः पुत्रपौत्रान्वयक्रमोपभोग्यः पूर्वदत्तदेवदायब्रह्मदायरहितः अभ्यन्तरसिद्ध्या

---

१. अस्मिन्पद्ये स्रग्धराशार्दूलविक्रीडितच्छन्दोनिबद्धौ पूर्वोत्तरार्धौ. तेनेयमुपजातिः. नैतादृश्युपजातिः सत्कविभिः प्रयुज्यते. 'रामं लक्ष्मणपूर्वजं' इत्यादि पौराणिकश्लोकेषु क्वचिदुपलभ्यते.

शकनृपकालातीतसंवत्सरशतेषु सप्तस्वेकोननवत्यधिकेष्वङ्कतः ७८९ ज्येष्ठामावास्यायामादित्यग्रहणपर्वणि श्रीभृगुकच्छे नर्मदायां मूलस्थानतीर्थे स्नात्वा सत्रप्रवर्तनार्थं बलिचरुवैश्वदेवाग्निहोत्रादिक्रियोपसर्पणार्थं च उदकातिसर्गेण दत्तः । अतोऽस्योचितया ब्रह्मदायस्थित्या भुञ्जतो भोजयतः कृषतः कर्षापयतः प्रतिदिशतो वा न केनचित्परिपन्थना कार्या । तथागामिनृपतिभोगपतिभिरस्मद्वंश्यैरन्यैर्वा सामान्यभूदानफलमवेत्य विद्युल्लोलान्यनित्यान्यैश्वर्याणि तृणाग्रलग्नजलबिन्दुचञ्चलं च जीवितमाकलय्य स्वदायनिर्विशेषोऽयमस्मद्दायोऽनुमन्तव्यः परिपालयितव्यश्च । यश्चाज्ञानतिमिरपटलावृतमतिराच्छिन्द्यादाच्छिद्यमानं वानुमोदेत स पञ्चभिर्महापातकैरुपपातकैश्च संयुक्तः स्यादित्युक्तं भगवता वेदव्यासेन व्यासेन—

षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।
कृष्णाहयो हि जायन्ते भूमिदायं हरन्ति ये ॥
अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकत्रयं तेन भवेद्धि दत्तं यः काञ्चनं गां च महीं च दद्यात् ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
स्वदत्तां परदत्तां वा यत्नाद्रक्ष नराधिप ।
महीं महिमतां श्रेष्ठ दानाच्छ्रेयोऽनुपालनम् ॥
नायमत्यन्तसंवासः कस्यचित्केनचित्सह ।
अपि स्वेन शरीरेण किमुतान्यैः पृथग्जनैः ॥
प्राणेन धार्यते कायः स च प्राणः समीरणात् ।
समीरश्चातिचपलः कृतमप्यायुरद्भुतम् ॥

सप्तलोकैकनाथस्य विष्णोरपि महात्मनः ।
नेयं नियतवासा श्रीः किमुतान्यस्य कस्यचित् ॥
सामान्योऽयं धर्मसेतुः सर्वेषामिह भूभुजाम् ।
यतोऽतः पालनीयोऽयं काले काले महात्मभिः ॥
कोटिश्च वाजपेयानां लक्षं विश्वजितां तथा ।
सहस्रमश्वमेधानां स्वहस्तश्चैव तत्समम् ॥
इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
अतिविमलमनोभिरात्मनीनैर्नहि पुरुषैः परकीर्तयो विलोप्याः ॥
श्रीमच्छुभतुङ्गसुतो धारावर्षानुजो रणे येन ।
निर्जित्य वैरिवर्गं राज्यं विहितं स्थिरं भ्रातुः ॥
भस्मीकृत्यारिसेनां हयगजबहुलामप्यसंतुष्टभावो
ब्रह्माण्डं व्याप्तुकामः पृथुचटुलशिखाभासुरः क्रोधवह्निः ।
दृष्टः पद्मासनाद्यैर्गगनतलगतैर्यस्य गीर्वाणवृन्दैः
श्रीमद्गोविन्दराजो निरुपमविहितः शासने दूतकोऽत्र ॥
लिखितं चेदं सांधिविग्रहिकश्रीकल्याणेनेति । स्वहस्तोऽयं मम श्रीध्रुवराजदेवस्य श्रीमदकालवर्षदेवसूनोः ॥

(इण्डिअन् आण्टिक्वेरी १२।१८१)

---

(९)

राष्ट्रकूटवंशोद्भवलाटदेशाधीश्वरकर्कराजमहीपतेर्दानपत्रम् ।

स वोऽव्याद्वेधसा धाम यन्नाभिकमलं कृतम् ।
हरश्च यस्य कान्तेन्दुकलया कमलंकृतम् ॥
स्वस्ति स्वकीयान्वयवंशकर्ता श्रीराष्ट्रकूटामलवंशजन्मा ।
प्रदानशूरः समरैकवीरो **गोविन्दराजः**[1] क्षितिपो बभूव ॥
यस्याङ्गमात्रजयिनः प्रियसाहसस्य
क्ष्मापालवेषफलमेव बभूव सैन्यम् ।

---

१. अयं गोविन्दराजो दानकर्तुर्ध्रुवराजदेवस्यानुजः.

मुक्त्वा च शंकरमधीश्वरमीश्वराणां
नावन्दतान्यममरेष्वपि यो मनस्वी ॥
पुत्रीयतश्च[1] खलु तस्य भवप्रसादा-
त्सूनुर्बभूव गुणराशिरुदारकीर्तिः ।
यो गौणनामपरिवारमुवाह मुख्यं
श्रीकर्कराजसुभगव्यपदेशमुच्चैः ॥
सौराज्यजल्पे पतिते प्रसङ्गान्निदर्शनं विश्वजनीनसंपत् ।
राज्यं बलेः पूर्वमहो बभूव क्षिताविदानीं तु नृपस्य यस्य ॥
अत्यद्भुतं चेदममंस्त लोकः कलिप्रसङ्गेन यदेकपादम् ।
जातं वृषं यः कृतवानिदानीं भूयश्चतुष्पादमविघ्नचारम् ॥
चित्रं न चेदं यदसौ यथावच्चक्रे प्रजापालनमेतदेव ।
विष्णौ जगत्त्राणपरे मनःस्थे तस्योचितं तन्मयमानसस्य ॥
धर्मात्मनस्तस्य नृपस्य जज्ञे सुतः सुधर्मा खलु **कृष्णराजः** ।
यो वंश्यमुन्मूल्य विमार्गभाजं राज्यं स्वयं गोत्रहिताय चक्रे ॥
ब्रह्मण्यता तस्य च कापि साभूद्विप्रा यया केवलजातयोऽपि ।
श्रेष्ठद्विजन्मोचितदानलुब्धाः कर्माण्यनूचान[2]कृतानि चक्रुः ॥
इच्छातिरेकेण कृषीवलानां पयो यथा मुञ्चति जातु मेघे ।
भवेन्मनस्तद्विरतौ तथाभूद्यस्मिन्धनं वर्षति सेवकानाम् ॥
यो युद्धकण्डूतिगृहीतमुच्चैः शौर्योष्मसंदीपितमापतन्तम् ।
महावराहं[3] हरिणीचकार प्राज्यप्रभावः खलु राजसिंहः ॥
एैलापुराचलगताद्भुतसंनिवेशं[4]
यद्वीक्ष्य विस्मितविमानचरामरेन्द्राः ।
एतत्स्वयंभु शिवधाम न कृत्रिमे श्री-
र्दृष्टेदृशीति सततं बहु चर्चयन्ति ॥

१. आत्मनः पुत्रमिच्छतः. २. अनूचानः साङ्गवेदविचक्षणः. ३. नृपविशेषम्. ४. दक्षिणहैदराबादराज्यान्तर्गतदौलताबादनगरसमीपे 'एलोरा' नाम्नाधुना प्रसिद्धोऽयमेलापुराचलः. तत्र चातिसुन्दराणि सुरमन्दिराणि पर्वतमुत्कीर्य निर्मितान्यद्यापि विद्यन्ते.

भूयस्तथाविधकृतौ व्यवसायहानि-
रेतन्मया कथमहो कृतमित्यकस्मात्।
कर्तापि यस्य खलु विस्मयमाप शिल्पी
तन्नामकीर्तनमकार्यत येन राज्ञा॥
गङ्गाप्रवाहहिमदीधितिकालकूटै-
रत्यद्भुताभरणकैः कृतमण्डनोऽपि।
माणिक्यकाञ्चनपुरःसरसर्वभूत्या
तत्र स्थितः पुनरभूष्यत येन शंभुः॥
नृपस्य तस्य **ध्रुवराज**नामा महानुभावस्तनयो बभूव।
तृणीकृतान्[1]यस्य पराक्रमेण प्रतापवह्निर्द्विषतो ददाह॥
लक्ष्मीप्रसाधनविधावुपयोगि कृत्यं
यश्चिन्तयन्स्वयमभूदनिशं कृतार्थः।
किं वात्र चित्रमनपेक्ष्य सहायमीशः[2]
सर्वः पुमान्निजवधूं स्ववशां विधातुम्॥
यो गङ्गायमुने तरङ्गसुभगे गृह्णन्परेभ्यः समं
साक्षाच्चिह्ननिभेन चोत्तमपदं तत्प्राप्तवानैश्वरम्।
देहासंमितवैभवैरिव गुणैर्यस्य भ्रमद्भिर्दिशो
व्याप्तास्तस्य बभूव कीर्तिपुरुषो **गोविन्दराजः** सुतः॥
प्रदेशवृत्तिव्यवसायभाजं पुरातनानामपि पार्थिवानाम्।
यशांसि यो नाम जहार भूपो भग्नप्रचण्डाखिलवैरिवीरः॥
उन्मूलितोत्तुङ्गनरेन्द्रवंशो महानरेन्द्रीकृततुच्छभृत्यः।
स्वेच्छाविधायी चरितानुकारं चकार यो नाम विधेः क्षितीशः॥
हिञ्जीर[3]शिञ्जितरणच्चरणानराती-
न्कुर्वन्क्षणेन विदधेऽद्भुतकर्म यश्च।

---

१. यस्य पराक्रमेण तुच्छीकृतान्; (पक्षे) तृणत्वं प्रापितान्. २. समर्थः. ३. हिञ्जीरो लोहश्रृङ्खला. निगड इति यावत्.

चक्रे तथाहि न तथाशु वधं परेषां
पार्थोऽपि नाम भुवनत्रितयैकवीरः ॥
कल्पक्षयक्षणसमुद्धतवातहेला-
दोलायमानकुलशैलकुलानुकारम् ।
यन्मुक्तचण्डशरजालजवप्रणुन्ना
युद्धागता रिपुगजेन्द्रघटा चकार ॥
भ्राता तु तस्येन्द्रसमानवीर्यः श्रीमान्भुवि क्ष्मापतिरिन्द्रराजः ।
शास्ता बभूवाद्भुतकीर्तिसूतिस्तद्दत्तलाटेश्वरमण्डलस्य ॥
अद्यापि यस्य सुरकिंनरसिद्धसाध्य-
विद्याधराधिपतयो गुणपक्षपातात् ।
गायन्ति कुन्दकुसुमश्रि यशो यथास्वं
धामस्थिताः सहचरीकुचदत्तहस्ताः ॥
येनैकेन च गुर्जरेश्वरपतिर्योद्धुं समभ्यागतः
शौर्यप्रोद्भटकंधरो मृग इव क्षिप्रं दिशो ग्राहितः ।
भीतासंहतदक्षिणापथमहासामन्तचक्रं यतो
रक्षामाप विलुण्ठ्यमानविभवं श्रीवल्लभेनादरात् ॥
तस्यात्मजः प्रथितविक्रमवैरिवर्ग-
लक्ष्मीहठाहरणसंततलब्धकीर्तिः ।
श्रीकर्कराज इति संश्रितपूरिताशः
शास्त्रार्थबोधपरिपालितसर्वलोकः ॥
राज्ये यस्य न तस्करस्य वसतिर्व्याधेः प्रसूतिर्मृता
दुर्भिक्षं न च विभ्रमस्य महिमा नैवोपसर्गोद्भवः ।
क्षीणो दोषगणः प्रतापविनतोऽशेषोऽरिवर्गस्तथा
नो विद्वत्परिपन्थिनी प्रभवति क्रूरा खलानां मतिः ॥
गौडेन्द्रवङ्गपतिनिर्जयदुर्विदग्ध-
सद्गूर्जरेश्वरदिगर्गलतां च यस्य ।

नीत्वा भुजं विहतमालवरक्षणार्थं
स्वामी तथान्यमपि राज्यफलानि भुङ्क्ते ॥

तेनेदं विद्युच्चञ्चलमालोक्य जीवितं क्षितिदानं च परमपुण्यं प्रवर्तितोऽयं धर्मदायः। स च लाटेश्वरः समधिगताशेषमहाशब्दमहासामन्ताधिपतिसुवर्णवर्षश्रीकर्कराजदेवो यथासंबध्यमानकान्राष्ट्रपतिविषयपतिग्रामकूटाधिकारिकमहत्तरादीन्समनुबोधयति—अस्तु वः संविदितम्—यथा मया सिद्धशमीसमावासितेन मातापित्रोरात्मनश्चैहिकामुष्मिकपुण्ययशोभिवृद्धये श्रीवलभीविनिर्गततच्चातुर्विद्यसामान्यवात्स्यायनसगोत्रमाध्यंदिनसब्रह्मचारिब्राह्मणभानवे भट्टसोमादित्यपुत्राय आङ्कोट्टकचतुरशीत्यन्तर्गतवडपद्रकाभिधानग्रामः, यस्याघाटनानि—पूर्वतो जम्बूवाविकाग्रामः, तथा दक्षिणतो महासेनकाख्यं तडागम्, तथा पश्चिमतोऽङ्कोट्टकम्, तथोत्तरतो वग्घाच्छग्रामः, एवमसौ चतुराघाटनोपलक्षितः सोद्रङ्गः सोपरिकरः सभूतवातप्रत्यायः सदण्डदशापराधः सोत्पद्यमानविष्टिकः सधान्यहिरण्यादेयः सर्वराजकीयानामहस्तप्रक्षेपणीयः आ चन्द्रार्कार्णवसरित्पर्वतसमकलीनः पुत्रपौत्रान्वयभोग्यः पूर्वप्रदत्तदेवदायब्रह्मदायरहितो भूमिच्छिद्रन्यायेन शकनृपकालातीतसंवत्सरशतेषु सप्तसु चतुस्त्रिंशदधिकेषु महावैशाख्यां स्नात्वोदकातिसर्गेण बलिचरुवैश्वदेवाग्निहोत्रातिथिपञ्चमहायज्ञक्रतुक्रियाद्युत्सर्पणार्थं प्रतिपादितः। अतोऽस्योचितया ब्रह्मदायस्थित्या भुञ्जतो भोजयतः प्रतिदिशतो वा कृषतः कर्षयतश्च न केनचित्परिपन्थना कार्या। तथागामिभिरस्मद्वंश्यैरन्यैर्वा सामान्यं भूमिदानमवगच्छद्भिर्विद्युल्लोलान्यनित्यान्यैश्वर्याणि तृणाग्रलग्नजलबिन्दुचञ्चलं च जीवितमाकलय्य स्वदायनिर्विशेषोऽयमस्मद्दायोऽनुमन्तव्यः पालनीयश्च। यश्चाज्ञानतिमिरपटलावृतमतिराच्छिद्यादाच्छिद्यमानं चानुमोदेत स पञ्चभिर्महापातकैरुपपातकैश्च युक्तः स्यादिति। उक्तं च भगवता वेदव्यासेन व्यासेन—

षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥

विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।
कृष्णाहयो हि जायन्ते भूमिदायापहारिणः ॥
अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकत्रयं तेन भवेच्च दत्तं यः काञ्चनं गां च महीं च दद्यात् ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
स्वदत्तां परदत्तां वा यत्नाद्रक्ष नराधिप ।
महीं महीभृतां श्रेष्ठ दानाच्छ्रेयोऽनुपालनम् ॥
इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
अतिविमलमनोभिरात्मनीनैर्नहि पुरुषैः परकीर्तयो विलोप्याः ॥

उक्तं च भगवता रामभद्रेण—

सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ।
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥

दूतकश्चात्र राजपुत्रश्रीदन्तिवर्मा । स्वहस्तोऽयं मम श्रीकक्कराजस्य श्रीमदिन्द्रराजसुतस्य । लिखितं चैतन्मया महासंधिविग्रहाधिकृतकुलपुत्रकदुर्गभटसूनुना नेमादित्येनेति । अयं च ग्रामोऽतीतनरपतिपरीक्षणाङ्कोट्टकश्रीचातुर्विद्याय दत्तोऽभूत् । तेनापि कुराजजनितविलोपविच्छिन्नपरिभोगं विज्ञानवर्मान्यस्य वा विशिष्टस्य कस्यचिद्भवतु द्विजन्मन इति निश्चित्य सुवर्णवर्षदीयमानं वटपुरवासिने भानुभट्टायानुमोदितः । शालाताप्यं गृहीत्वा तालावारिकादिगणं चोद्दिश्य ताम्बूलप्रदानपूर्वकं यथालोभसेवनं चाभाष्य आदिश्य प्राकृतिकमपि पुरमिति । तथा त्रियागेश्वरपरमाधीशपादमूलं जानातीति ॥

(इण्डियन् आण्टिक्केरी १२ । १५८–१६२)

---

१ इत उत्तरमस्फुटार्थोऽयं लेखः.

(६)

राष्ट्रकूटवंशोद्भवस्य चतुर्थगोविन्दनृपतेर्दानपत्रम्।

ओम्॥

जयन्ति ब्रह्मणः सर्गनिष्पत्तिमुदितात्मनः।
सरस्वतीकृतानन्दा मधुराः सामगीतयः॥

ताराचक्राब्जषण्डावृतगगनसरःपद्मिनीराजहंसा-
त्त्रैलोक्यैकाधिपत्यस्थितमदनमहाराजशुभ्रातपत्रात्।
लावण्यक्षीरसिन्धोर्द्युतिरजतगिरेर्दिग्वधूदन्तपत्रा-
द्वंशः सोमादयं यस्त्रिभुवनकमलावाससौधाद्रुपेतः॥

तस्माच्छ्रियः कुलगृहं भवनं महिम्नः
क्रीडास्पदं स्थितिमहर्द्धिगभीरतानाम्।
आपन्नसत्त्वपरिपालनलब्धकीर्ति-
र्वंशो बभूव भुवि सिन्धुनिभो यदूनाम्॥

परिणतपरमण्डलः कलावान्प्रविततबहलयशोंशुपूरिताशः।
शशधर इव दन्तिदुर्गराजो यदुकुलविमलवियत्यथोदियाय[1]॥

तस्याद्यं नृपतेः पितृव्यमुदयी श्रीवीरसिंहासनं
मेरोः शृङ्गमिवाधिरुह्य रविवच्छ्रीकृष्णराजस्ततः।
ध्वस्तोद्रिक्तचलुक्यवंशतिमिरः पृथ्वीभृतां मस्तके
न्यस्तांघ्रिः सकलं जगत्प्रविततैस्तेजोभिराक्रान्तवान्॥

तस्माद्गोविन्दराजोऽभूदिन्दुबिम्बशिलातले।
यस्यारिस्त्रोषधूम्रोऽङ्कः प्रशस्तिरिव लक्ष्यते॥

तस्याभवद्भुवनपालनवीरबुद्धि-
रुद्धूतशत्रुकुलसंततिरिद्धतेजाः।
राजानुजो निरुपमापरनामधेयो
यन्मुद्रयाम्बुधिरपि प्रथितः समुद्रः॥

---

१ 'उदीतः' इति साधीयान्पाठः.

तदनु जगत्तुङ्गोऽजनि परिहृतनिजसकलमण्डलाभोगः ।
गतयौवनवनिताजनकुचसदृशा यस्य वैरिनृपाः ॥

तस्माच्चामोघवर्षोऽभवदतुलबलो येन कोपादपूर्वै-
श्चा[1]लुक्याभ्यूषखाद्यैर्जनितरतियमः प्रीणितो विङ्गवङ्ग्याम् ।
वैरिश्वाण्डोदरान्तर्बहिरुपरि तले यन्न लब्धावकाशं
तोयव्याजाद्विशुद्धं यश इव निहितं तज्जगत्तुङ्गसिन्धौ ॥

तस्मादकालवर्षो नृपतिरभूद्यत्पराक्रमत्रस्तैः ।
सद्यः सम[2]ण्डलाग्रं खेट[3]कमहितैः परित्यक्तम् ॥

सहस्रार्जुनवंशस्य भूषणं कोक्कलात्मजा ।
तस्याभवन्महादेवी जगत्तुङ्गस्ततोऽजनि ॥

गम्भीराद्रत्ननिधेर्भूभृत्प्रतिपक्षरक्षणक्षमतः ।
कोक्कलसुत[4]रणविग्रहजलधेर्लक्ष्मीः समुत्पन्ना ॥

सा जायाजायताजातशत्रोस्तस्य महीभुजः ।
भीमसेनार्जुनोपात्तयशोभूषणशालिनः ॥

तत्र जगत्तुङ्गोदयधरणीधरतः प्रतापकलितात्मा ।
लक्ष्म्या नन्दन उदितोऽजनि विजयी राजमार्तण्डः ॥

स्थितिचलितसकलभूभृत्पक्षच्छेदाभिमुक्तभुजवज्रः ।
अनिमिषदर्शनयोग्यो यः सत्यमिहेन्द्रराज इति ॥

---

१ चालुक्या एव अभ्यूषखाद्याः 'पोली' इति ख्याता भक्ष्यविशेषास्तैर्जनिता रतिः प्रीतिर्यस्य तादृशो यम इत्यर्थः. 'आपक्कं पौलिरभ्यूषः' इत्यमरः. वात्स्यायनीयकामसूत्रटीकाकारो यशोधरस्तु 'अभ्यूषखादिका, विटपस्थानामग्नौ प्लोषितानां फलानां खादनं यत्र' इति व्याख्यातवान्. इण्डियन् आण्टिक्केरीमध्ये एतल्लेखप्रकाशकः फ्लीटपण्डितस्तु 'चालुक्य-अभ्यूषख-आद्यैर्' इति पदच्छेदं विधाय भाषान्तरे 'Châlukyas, Abhyûshakhas and others' इत्याद्युक्तवान्. २. मण्डलाग्रः खड्गो मण्डलं देशश्च. ३. खेटकं चर्म, मान्यखेटनाम्ना प्रसिद्धा राष्ट्रकूटमहीपतीनां राजधानी च. ४. 'नदीनां मेकलसुता नृपाणां रणविग्रहः । कवीनां च सुरानन्दश्चेदिमण्डलमण्डनम् ॥' इति राजशेखरकविना वर्णितो रणविग्रहोऽप्ययमेव स्यात्.

यस्तस्मिन्दशकण्ठदर्पदलने श्रीहैहयानां कुले
कोक्कल्लः प्रतिपादितोऽस्य च गुणज्येष्ठोऽर्जुनोऽभूत्सुतः।
तत्पुत्रोऽम्मणदेव इत्यतिबलस्तस्माद्द्विजाम्बाभव-
त्पत्नीवाम्बुनिधेरुमेव हिमवन्नाम्नः क्ष्माभृत्प्रभोः॥
श्रीन्द्रनरेन्द्रात्तस्यां सूनुरभूद्भूपतिर्द्विजाम्बायाम्।
गोविन्दराजनामा कामाधिकरूपसौन्दर्यः॥
सामर्थ्ये सति निन्दिता प्रविहिता नैवाग्रजे क्रूरता
बन्धुस्त्रीगमनादिभिः कुचरितैरावर्जितं नायशः।
शौचाशौचपराङ्मुखं न च भिया पैशाच्यमङ्गीकृतं
त्यागेनासमसाहसैश्च भुवने यः साहसाङ्कोऽभवत्॥
वर्षन्सुवर्णवर्षः प्रभूतवर्षोऽपि कनकधाराभिः।
जगदखिलमेककाञ्चनमयमकरोदिति जनैरुक्तः॥
यदधिदिग्विजयावसरे सति प्रसभसंभ्रमभावनयेव भूः।
सपदि नृत्यति पालिमहाध्वजोच्छ्रितकरान्यकुनाथविवर्जिता॥
सहते नहि मण्डलाधिपं परमेषोऽभ्युदयी समुद्धतम्।
इति जातभिया धियाग्रतो रविचन्द्रावपि यस्य धावतः॥
अवनतपरमण्डलेश्वरं सह विजयांशुभिवेश्म शोभितम्।
समहिमकरतोरणं चिरं निजतेजस्तति यस्य राजते॥
सहते समवाहिनीमयं न परेषां सविशेषशालिनीम्।
यदनिन्दितराजमन्दिरं ननु गङ्गा यमुना च सेवते॥
यस्मिन्राजनि सौराज्यं निर्जितारि वितन्वति।
विमानस्थितिरित्यासीन्न भोगेषु कदाचन॥
यस्योद्दामप्रतापानलबहलशिखाकज्जलं नीलमेघा
विस्फूर्जत्खड्गधारास्फुरणविसरणान्येव विद्युद्विलासाः।
दुर्वारारीभकुम्भस्थलदलनगलन्मौक्तिकान्येव तारा-
श्चन्द्रक्षीराब्धिशेषा भृतभुवनयशोराशिनिष्यन्दितानि॥

१. 'विस्फूर्जन्' इति 'इण्डियन् आण्टिक्वेरी'मुद्रितः पाठः.

यस्मिन्कण्टकशोधनोत्सुकमनस्यम्भोजनालैर्भिये-
वोन्मग्नं न पयःसु कोशवसतिर्लक्ष्मीः कृतोपायनम् ।
केतक्या पवनोच्छ्वसन्निजरजःपुञ्जान्धकारोदरे
भूगर्भे पनसेन वेत्रलतया द्वार्यात्मशुद्ध्यै स्थितम् ॥

यश्च समुपहसितहरनयनदहनो विहितानित्यकंदर्परूपसौन्दर्यदर्पः श्रीनित्यकंदर्पः प्रभुमन्त्रशक्त्युपबृंहितोत्साहशक्तिसमाक्षिप्तशतमखसुखश्राणक्यचतुर्मुखः प्रथितैकविक्रमाक्रान्तवसुंधराहितकरणपरायणः श्रीविक्रान्तनारायणः स्वकरकलितहेतिहलदलितविपक्षवक्षःस्थलक्षेत्रः श्रीनृपतित्रिनेत्रः समभवत् । स च परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमन्नित्यवर्षदेवपादानुध्यातः परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमत्सुवर्णवर्षदेवपृथ्वीवल्लभश्रीमद्वल्लभनरेन्द्रदेवः कुशली सर्वानेव यथासंबध्यमानकान्राष्ट्रपतिविषयपतिग्रामकूटमहत्तरायुक्तकोपयुक्तकाधिकारिकान्समादिशति—अस्तु वः संविदितम्—यथा मान्यखेट[1]राजधानीस्थिरतरावस्थानेन मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये पूर्वलुप्तानपि देवभोगाग्रहारान्प्रतिपालयता प्रतिदिनं च निरवधिनमस्यग्रामशासनानि शतशः प्रयच्छता [मया] शकनृपकालातीतसंवत्सरशतेष्वष्टसु पञ्चपञ्चाशदधिकेष्वङ्कतोऽपि संवत्सराणां ८९९ प्रवर्तमानविजयसंवत्सरान्तर्गतश्रावणपौर्णमास्यां वारे गुरोः पूर्वाभद्रपदानक्षत्रे प्रथमकरोदकातिसर्गेण पुण्ड्रवर्धननगरविनिर्गतकौशिकगोत्रवाजिकाण्वसब्रह्मचारिदामोदरभट्टसुताय केशवदीक्षिताय रामपुरीसप्तशतान्तर्गतलोहग्रामः सवृक्षमालाकुलः सधान्यहिरण्यादेयः सदण्डदोषदशापराधः सभूतोपात्तप्रत्ययः अचाटभटप्रवेशः शतोत्तरीयो ब्रह्मदायन्यायेनाचन्द्रार्कं नमस्यो दत्तः । यस्य च आघाटाः पूर्वतः घोडेग्रामः, दक्षिणतः वञ्जुलीनामा ग्रामः, पश्चिमतः विश्वविहरङ्ग नामा ग्रामः, उत्तरतः सोन्नहीनामा ग्रामः । एवं चतुराघाटविशुद्धं लोहग्रामं केशवदीक्षितस्य कृषतः कर्षयतो भुञ्जतो भोजयतो वा न केनचिद्व्याघातः कार्यः । मन्दानिलान्दोलितजलतरङ्गतरलमैश्वर्यं श-

1. दक्षिणहैदराबादराज्यान्तर्गतोऽधुना 'मालखेड'नाम्ना प्रसिद्धो ग्राम एव मान्यखेटः.

रदभ्रविभ्रमं जीवितं सामान्यं च भूमिदानफलमवगच्छद्भिरागामिनृपतिभिरस्मद्वंश्यैरन्यैर्वायमस्मद्धर्मदायः समनुमन्तव्यः प्रतिपालनीयश्च । उक्तं च रामभद्रेण—

'सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
सर्वानेवं भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ॥'

षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
स्वदत्तां परदत्तां वा यो हरेत्तु वसुंधराम् ।
श्वविष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते ॥
प्रसृत्या संप्रदानेन दत्तस्याहरणेन च ।
जन्मप्रभृति यद्दत्तं तत्सर्वं निष्फलं भवेत् ॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
निवसेद्ब्रह्मणो लोके भूमिदानं ददाति यः ॥

शिवमस्तु सर्वजगतः । ॐ नमः शिवाय ॥

(इण्डियन् आण्टिक्वेरी १२ । २४९-२५२)

(७)

चौलुक्यवंशोद्भवस्य लाटदेशाधिपतेस्त्रिलोचनपालस्य दानपत्रम् ।

ॐ नमो विनायकाय । स्वस्ति जयोऽभ्युदयश्च ।

बाणं वीणाक्षमाले कमलमहिमथो बीजपूरं त्रिशूलं
खट्वाङ्गं दानहस्ताभयकरसहिताः पाणयो धारयन्तः ।
रक्षन्तु व्यञ्जयन्तः सकलरसमयं देवदेवस्य चित्तं
नो चेदेवं कथं वा त्रिभुवनमखिलं पालितं दानवेभ्यः ॥
दधाति पद्मामथ चक्रकौस्तुभे गदामथो शङ्खमिहैव पङ्कजम् ।
हरिः स पातु त्रिदशाधिपो भुवं रसेषु सर्वेषु निषण्णमानसः ॥

१. अस्य लेखस्य प्रणेता पण्डितस्त्वपरिणतकवित्व एव कश्चिदासीत्.

कमण्डलुं दण्डमथ स्रुचं विभुर्बिभर्ति मालां जपदत्तमानसः ।
सृजत्यजो लोकमपोहितुं रिपून्रसैश्च सर्वै रसितो विशेषतः ॥

कदाचिद्दैत्यखेदोत्थचिन्तामन्दरमन्थनात् ।
विरिञ्चेश्चुलुकाम्भोधे राजरत्नं पुमानभूत् ॥

देव किं करवाणीति नत्वा प्राह तमेव सः ।
समादिष्टार्थसंसिद्धौ तुष्टः स्रष्टाब्रवीच्च तम् ॥

कन्याकुब्जे महाराज राष्ट्रकूटस्य कन्यकाम् ।
लब्ध्वा सुखाय तस्यां त्वं चौलुक्याप्नुहि संततिम् ॥

इत्थमत्र भवेत्क्षत्रसंततिर्विततां किल ।
चौलुक्यात्प्रथिता नद्याः स्रोतांसीव महीधरात् ॥

तत्रान्वये दयितकीर्तिरकीर्तिनारीं
संस्पर्शभीत इव वर्जितवान्परस्य ।
बारप्पराज इति विश्रुतनामधेयो
राजा बभूव भुवि नाशितलोकशोकः ॥

श्रीलाटदेशमधिगम्य कृतानि येन
सत्यानि नीतिवचनानि मुदे जनानाम् ।
तत्रानुरज्य जनमाशु निहत्य शत्रू-
न्कोशस्य वृद्धिफलमाप निरन्तरं यः ॥

तस्माज्जातो विजयवसति**र्गोङ्गिराजः** क्षितीशो
यस्मादन्ये मनुजपतयः शिक्षिता राजधर्मम् ।
यो गोत्रस्य प्रथमनिलयो पालको यः प्रजानां
यः शत्रूणाममितमहसां मूर्ध्नि पादं व्यधत्त ॥

आत्मभूरुद्धृता येन विष्णुनेव महीयसा ।
बलिभिः सा समाक्रान्ता दानवैरिव वैरिभिः ॥

---

१. 'पुरंदरेण प्रतिपाद्यमानमेवं समाकर्ण्य वचो विरिञ्चिः । संध्याम्बुपूर्णे चुलके मुमोच ध्यानानुविद्धानि विलोचनानि ॥' इत्युपक्रम्य 'अथाविरासीत्सुभटस्त्रिलोकत्रासाप्रवीणश्चुलकाद्विधातुः' इत्यन्तं विक्रमाङ्कदेवचरितस्य प्रथमे सर्गे द्रष्टव्यम्. अस्फुटार्थाः श्लोकाश्चात्र कतिचन सन्ति.

प्रद्युम्नवन्मदनरूपधरोऽच्युतस्य
श्रीकीर्तिराजनृपतिः स बभूव तस्मात् ।
यो लाटभूपपदवीमधिगम्य चक्रे
धर्मेण कीर्तिधवलानि दिगन्तराणि ॥
संतानतन्तुषु प्रोताश्चौलुक्यमणयो नृपाः ।
तस्यां तु मणिमालायां नायकः कीर्तिभूपतिः ॥
गोः पिण्डे भौतिके भूरिपदार्थायतने गुरौ ।
सूते क्षीरं शिरा कापि माता स्त्रीषु तथैव तम् ॥
आजन्मदृष्ट्या(?)तिमनोहरस्य मुदा तथापूर्यत सर्वलोकः ।
यथामृतापूर्णघटीसमानं नारिच्यतापि स्तुतिबिन्दुपातैः ॥
समेऽपि स्पृहणीयत्वे पक्वान्नस्येव योषिताम् ।
भोगस्तेन परस्त्रीणामुच्छिष्टस्येव वर्जितः ॥
लग्नं तथा क्ष्मापतिपाणिपादे स्थितं यथा वक्षसि रत्नसा(हा)रैः ।
गौणं त्यजद्भिः श्रुतिकुण्डलाभ्यां कृत्वा पदं मुख्यमथास्थितं तैः ॥
आलम्बनीभूतमहीधरांस्तानुल्लङ्घ्य जुष्टं पतनं गुणौघैः ।
कुतोऽन्यथा ते सहजा बभूवुः कथं च ते तत्सहवृद्धिमापुः ॥
स यौवनोन्मत्तगजेन्द्रपार्श्वाद्धावन्मनो मारयदेवमेतत् ।
तस्माद्दते हीन्द्रियखेटकेन विलङ्घिता वैषयिकी न सीमा ॥
कायेन गेहादिनिभेन जीवो व्योमेव जन्तोर्व्यवधीयते स्म ।
तस्मात्परस्मिन्नहमेव मत्वा लक्ष्मीं समां योऽर्थिजनैरभुङ्क्त ॥
बाहू बलौ कोपगुरोश्च वासो वक्षस्तथा नम्रमवेक्ष्य चापम् ।
दर्पोद्धतं मस्तकमेव येषां द्विषां छिनत्ति स्म रणे स वीरः ॥
पृष्ठं ददच्चापमभिद्विषं यः प्रियं चकार द्विषति प्रयुक्ताः ।
लक्षानुगा मार्गणपुंगवास्ते जाताः कृतार्थास्तत एव तस्मात् ॥
तस्यासीद्दविचारकीर्तिदयिता निस्त्रिंशहस्तस्य या
सङ्ग्रामे सभयेव हन्त सहसागच्छत्परेषां गृहम् ।

सा वाच्यापगमाय तेन दधती दिव्यं प्रतापं पुरो-
क्रान्ता सप्तसमुद्रमण्डलभुवं शुद्धेति गीता सुरैः ॥
तस्माच्च **वत्सराजो** गुणरत्नमहानिधिर्जातः ।
शूरो युद्धमहार्णवमथनाय मन्दरः[1] ख्यातः ॥
आबाल्यादियमत्र मूर्तिभवने भद्रैः समं श्रीः स्थिता
व्रीडाप्यत्र वधूरिव स्वविषयं प्रच्छादयन्ती सती ।
तामेवाधिकृतां नयत्यविरता भर्तुर्मनो जानती
सा विष्णोरिव वत्सराजनृपतेः सापत्नवर्ज्यं स्थिता ॥
सहैकाम्बरदुःस्थत्वे काश्चित्कोणश्रिता दिशः ।
इतीवाच्छादयत्त्यागी वत्सेशः कीर्तिकर्पटैः ॥
हेमरत्नप्रभं छत्रं सोमनाथस्य भूषणम् ।
दीनानाथकृते सत्रमवारितमकारि सः(च) ॥
तस्याङ्गसंभवः श्रीमांस्**त्रिलोचनपति**र्नृपः ।
भोक्ता **श्रीलाटदेशस्य** पाण्डवः कलिभूभुजाम् ॥
त्यागेऽपि मार्गणा यस्य गुणग्रहणगामिनः ।
सत्ये धर्मो धवे वक्रः(?) शौर्ये गोपालविक्रमः ॥
अहो वृद्धस्य तस्यासञ्शात्रवो विकला भृशम् ।
भोक्तुस्तस्यैव ते चित्रं विहारमलशालिनः ॥
शत्रोः संगरभूषणस्य समरे तस्यासिना पातिते
मूर्धन्याशु गलत्सु कण्ठवलयाद्रक्तस्य पूरेष्वलम् ।
तत्तेजोमयवह्नितापितवपुस्तस्यासवर्णस्य त-
न्नूनं भाजनमुच्छलास सहसा खड्गोर्ध्वहस्तं चलम् ॥
धर्मशीलेन तेनेदं चलं वीक्ष्य जगत्त्रयम् ।
गोभूहिरण्यदानानि दत्तानीह द्विजन्मनाम् ॥
शाके नवशतैर्युक्ते द्विसप्तत्यधिके तथा ।
विकृते वत्सरे पौषे मासे पक्षे च तामसे ॥

---

१. अत्र च्छन्दोभङ्गो भवति.

अमावास्यातिथौ सूर्यपर्वण्यङ्गारवारके ।
गत्वा प्रत्यगुदन्वन्तं तीर्थे चागस्त्यसंज्ञके ॥
गोत्रेण कुशिकायात्र भार्गवाय द्विजन्मने ।
वैश्वामित्रदेवरातावौदलः प्रवरास्त्रयः ॥
इमानुद्वहते ग्रामं माधवाय त्रिलोचनः ।
धिल्लीश्वरपथकान्तर्द्विचत्वारिंशसंख्यके ॥
एरथाणनवशतमदादुदकपूर्वकम् ।
समस्तायं ससीमानमाघाटैस्तरुभिर्युत[म्] ॥
देवब्राह्मणयोर्दायान्वर्जयित्वा क्रमागतान् ।
पूर्वस्यां दिशि नागाम्बा ग्रामस्तन्तिका तथा ॥
वटपद्रकमाग्नेय्यां याम्यां लिङ्गवटः सि(शि)वः ।
इन्दोत्थानं तु नैर्ऋत्यां बहुणद्श्वा परे स्थितः ॥
वायव्यां टेम्बरूकं च सौम्यां तु तलपद्रकम् ।
ईशान्यां कुरुणग्रामः सीमायां खेटकाष्टकम् ॥
आघाटनानि चत्वारि आयैः सह ससीमकैः ।
तस्माद्द्विजवरस्यास्य भुञ्जतो न विकल्पना ॥
कर्तव्या कैश्चन नरैः सार्थसाधुसमाख्यकैः ।
अथैवं यदि लोप्तास्य स तदा पापभाजनः(नम्) ।
पालने हि परो धर्मो हरणे पातकं महत् ॥

तथा चोक्तम्—

'सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
स्ववंशजो वा परवंशजो वा रामो बत प्रार्थयते महीशाः ॥
कन्यामेकां गवामेकां भूमेरर्धार्धमङ्गुलम् ।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥
यानीह दत्तानि पुरा नरेन्द्रैर्धर्मार्थकामादियशस्कराणि ।
निर्माल्यवान्ति प्रतिमानि तानि को नाम साधुः पुनराददाति ॥

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥'

लिखितं मया महासांधिविग्रहिकश्रीशंकरेण । मन्नतश्रीमिति । श्रीत्रिलोचनपालस्य ॥

(इण्डियन् आण्टिक्वेरी १२।२०१-२०३)

(८)

श्रीधरणीवराहाख्यमहीपतेर्दानपत्रम् ।

ओम् ।

पुण्यं व्योमसरिज्जलेन वहता चन्द्रांशुभिः शीतलं
सत्पुष्पं कनकारविन्दनिचयैर्निर्वाणसंपत्फलम् ।
व्यालालीविषकन्दलीमृगपतिप्रान्तं न संतापदं
श्रीधन्वेश्वरमूर्ध्नि[२]......सुखदं वस्ताज्जटाकाननम् ॥
ध्यानात्पूर्वमुवाच सप्रतिरवं शंभुं प्रणम्यावनी
ध्यानाध्यासितलोचने त्वयि विभो पीडामहं नासुरीम् ।
शक्ता सोढुमिलार्थमुद्गतवपू रक्षाक्षमः शक्तिमा-
न्स्वाच्चापात्परमेश्वरेण विहितश्चापाभिधानो नृपः ॥

अपि च ।

नीरन्ध्रो गतकण्टकोऽक्षततनुः सच्छायमूर्तिः सदा
सत्पत्रोऽपि विपत्रतामनुगतः सेव्योऽस्त्यगम्यो द्विषाम् ।
शश्वत्सौख्यफलप्रदोऽपि सुतरां वृद्धेर्विधातात्मनो
भूभृन्मूर्ध्नि कृतास्पदोऽपि नतिमाञ्श्रीचापवंशोऽपरः ॥
तस्मिन्नुष्णरुचेर्बभूव सदृशः श्रीविक्रमार्को नृपः
संपन्नाखिलशक्तिषड्गुणयुतो राजा ततोऽप्यड्डकः ।

---

१. 'निचयो' इति 'इण्डियन् आण्टिक्वेरी'धृतः पाठः. २. 'इण्डियन् आण्टिक्वेरी'-मध्ये त्रुटिचिह्नं नास्ति.

तस्माच्छ्रीपुलकेसिभूभृदजनि क्ष्मापालचूडामणिः
संजातः पृथिवीपतिर्ध्रुवभटो धर्मस्य मूर्तिस्ततः ॥
तस्यानुजः सकलभूपनताङ्घ्रिपद्मः
सद्भावपुण्यभिरतो धरणीवराहः।
जातोऽखिलप्रणयिकल्पतरुर्महात्मा
लीलावतीमुखसरोरुहराजहंसः ॥
किं शौर्यं प्रभुता पराभिहननं गम्भीरता सत्यता
प्रोत्साहः किमुतोच्यतामसदृशो यस्य प्रतापो महान्।
औदार्यं कुलजावनीपतिसुतेष्वत्यादरः कोऽप्यसौ
येनैवं मुहुरेति मोहममला कष्टं कवीनां मतिः ॥
यस्त्यागशौर्यसौभाग्यगर्वितः कर्णपार्थकुसुमशरान्।
ह्रेपयतीवाधिकतरनिजचरितैर्लीलयैव नृपः ॥

अयं च प्राप्ताचलश्रीरपि सहजविवेकादेवमभावयत्। चत्वरनिहितानिलाहतदीपशिखासमानमायुरारोग्यादिकम्। यत्पश्य, तादृग्बलसमन्विता अप्यस्मदादिपूर्ववंशजास्तथाविधविधिविलसितविशेषात्कीर्तियशोनाममात्रावशेषीभूताः समभवन्। तद्वरं धर्मविषयमेव मनो विहितम्। दानशीलतपोभावनात्मके च धर्मे प्रायो राज्यावस्थितनृपाणां दानभावने एव प्रवर्तिते। तद्वसुंधरादिदानं स्वर्गसोपानमाकलय्यामितगुणभाजानेन वर्धमानावस्थितेन समधिगताशेषमहाशब्दमहासामन्ताधिपतिश्रीधरणीवराहेण स्वपितामहनामाङ्कितमड्डाणकदेशमन्यं च भूयांसं राजाधिराजपरमेश्वरश्रीमहीपालदेवपादप्रसादतः समनुशासता सता यथा दानं प्रवर्तितं तथासौ सर्वान्स्वसंबध्यमानभाविभूपानन्यांश्च राष्ट्रपतिग्रामपतिभोगिकमहत्तरकुटुम्बिकपाश्वकुलिकदण्डपासिकमध्यगप्रभृतीन्समनुबोधयति—

१. अन्यलेखेषु 'पुलकेशि' इति तालव्यान्तमुपलभ्यते. २. 'पुराभिहणनं' इति 'इण्डियन् आण्टिकेरी'धृतः पाठः. ३. गुजरातप्रान्ते 'वढवाण'नाम्ना प्रसिद्धं नगरमेव वर्धमानम्. ४. 'दण्डपाशिक' इत्यन्यत्र तालव्यमध्यः समुपलभ्यते.

अस्तु वः संविदितम् । यथा—मया मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये तथैवामुष्मिकफलावाप्त्यर्थं श्रीमदामर्दकसंतानीयश्रीशिवदेवाचार्यसुतश्रीमहेश्वराचार्याय विद्याधनं कन्थिकास्थलीसंबध्यमानः विङ्कलाभिधानग्रामः स्वसीमापर्यन्तः सदाणीभोगभागः सदण्डदशापराधः सवृक्षमालाकुलः सकलराजकीयानामहस्तप्रक्षेपणीयः अपरिपन्थनीयश्च प्राप्तोदगयनमहापर्वणि परमभक्त्या मया उदकातिसर्गेण प्रतिपादितः । यस्य चाघाटनानि पूर्वतः उत्तरक्काभिधानग्रामः । दक्षिणतः खिक्खिरिआणकाभिधानग्रामः। अपरतः कुरलाभिधानग्रामः । उत्तरतः शणाइचाणकाभिधानग्रामः । एवं चतुराघाटनोपलक्षितोऽयं विङ्कलाभिधानग्रामः सोत्पद्यमानवेष्टिकः अचाटभटप्रवेशः पूर्वदत्तदेवदायब्रह्मदायवर्जं भूमिच्छिद्रन्यायेनाचन्द्रार्कार्णवक्षितिसरित्पर्वतकालीनः श्रीमहेश्वराचार्यस्य पुत्रपौत्रान्वयन्यायेन भुञ्जतो भोजयतो वा न केनचिद्व्यासेधनीयः । यत उक्तमेव भगवता वेदव्यासेन व्यासेन—

'बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्य वान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥' इति ।

शकसंवत् ८३६[1] पौषसुदि ४ उत्तरायणे । यथा चैतदेवं तथा ग्रामं दाता स्वहस्तमारोपयति । स्वहस्तोऽयं श्रीधरणीवराहस्य । लिखितं चैतद्राजादेशात्सांधिविग्रहिकमहिन्दकेन पार्थिलसुतेनेति ।

(इण्डियन् आण्टिक्केरी १२ । १९३–१९४)

---

१. अयं शकाङ्कस्तत्र लेखे संदिग्ध एवास्ति. अस्माभिस्तु 'आण्टिक्केरी'पुस्तके एतल्लेखप्रकाशकस्य डॉक्टरबूलरस्य निर्णयानुसारं स्थापितः.

(९)

राष्ट्रकूटवंशोद्भवस्य द्वितीयकर्कराजस्य दानपत्रम् ।

ओम् ।

श्रीसरस्वत्युमाभास्वल्लक्ष्मीसंश्लेषभूषितम् ।
भूतये भवतां भूयादजकल्पतरुत्रयम् ॥
ब्रह्माद्यामरवन्द्यधूर्जटिजटाजूटाटवीसंस्थितेः
सिक्ताद्देवनदीविशुद्धसलिलैर्यश्चन्द्रखण्डादभूत् ।
आश्चर्योर्जितवृत्तजातमहिमा पालीध्वजोत्पल्लवो
वंशः कुन्दसितातपत्रबहलच्छायासु वृद्धिं गतः ॥
तस्मादिन्दुरिवाम्बुधेः शशभृतः कान्तिप्रवाहस्ततो
निष्यन्दश्च यथामृतस्य समभूद्वन्द्यो यदोरन्वयः ।
रेमेऽत्यद्भुतसाहसः स भगवान्गोपीकटाक्षालिभिः
शार्ङ्गी यत्र निपीयमानविलसल्लावण्यपुष्पोद्गमः ॥
प्रतिबोधितबन्धुपद्मषण्डः कृतचालुक्यघनान्धकारनाशः ।
उदगादथ दन्तिदुर्गभानुर्यदुवंशोदयपर्वतात्प्रतापी ॥
तस्मिन्नपुत्रेऽनु च तत्पितृव्यः पतिर्भुवोऽभूदिह **कृष्णराजः** ।
अष्टादशेशालयदृश्यरूपं पुञ्जीकृतं येन यशो विशुद्धम् ॥
गोविन्दराजः क्षितिपश्च तस्मादभूदनेकाहवलब्धकीर्तिः ।
धर्मार्थयोर्येन फलं मनोभूरा तृप्तितः कोशवतोपभुक्तः ॥
अतिशयगुणयुक्तत्वाद्यथार्थाभिधानो
निरुपम इति तस्यैवानुजोऽभूत्क्षितीशः ।
सकलजलधिवेलाप्रान्तविश्रान्तसैन्यः
परिणतभुवनत्वादुद्धृतैकातपत्रः ॥
तस्माज्जगत्तुङ्गनृपः सुतोऽभूत्तुङ्गत्वमागाज्जगतां गुणैर्यः ।
यस्यानिशं गन्धमदेभभीता मदं प्रयाणे दिगिभास्त्यजन्ति ॥

---

१. काव्यमालायां मुद्रिते षष्ठे लेखे 'तस्याद्यं नृपतेः' इत्यादि पञ्चमे श्लोके 'पितृव्यमुदयी' इत्यस्य स्थाने 'पितृव्य उदयी' इति पाठः समीचीनः.

तस्य श्रीमदमोघवर्षनृपतिश्चालुक्यकालानलः
सूनुर्भूपतिरूर्जिताहितवधूवैधव्यदीक्षागुरुः ।
आसीदिन्द्रपुराधिकं पुरमिदं श्रीमान्यखेटाभिधं
येनेदं च सरः कृतं गुरुकरुप्रासादमन्तःपुरम् ॥

तस्मादकालवर्षोऽभूत्सार्वभौमः क्षितीश्वरः ।
यत्प्रतापपरित्रस्तो व्योम्नि चन्द्रायते रविः ॥

चेदीशो [1]दशकण्ठदर्पदलनः श्रीहैहयानां कुले
कोक्कल्लः समभूच्च तस्य तनया या संकुकस्यानुजा ।
तस्यां कृष्णनृपात्ततः श्रितमहादेवीपदायामभू-
त्तैस्तैर्यः प्रथितो गुणैर्भुवि जगत्तुङ्गाभिधानः सुतः ॥

चेदीश्वरशंकरगणदुहितरि लक्ष्म्यां ततो [2]जगत्तुङ्गात् ।
सूनुरभूदिन्द्रनृपो भावी राज्यश्रियो भर्ता ॥

जनकगृहीतैः परमण्डलैरसंतुष्टमानसः स्वपितुः ।
एकच्छत्त्रां पृथ्वीं कर्तुं निरगाज्जगत्तुङ्गः ॥

चेद्यां मातुलशंकरगणात्मजायामभूज्जगत्तुङ्गात् ।
श्रीमानमोघवर्षो गोविन्दाम्बाभिधानायाम् ॥

आरुह्येन्द्रपदोपमं स नृपतिः श्रीवीरसिंहासनं
दत्त्वा ताम्रनमस्यशासनगतान्ग्रामाननन्तांस्तथा ।
अर्थैरर्थिमनोरथाधिकतरैः कृत्वा कृतार्थं जग-
द्व्याप्ता येन शिवालयैर्निजयशःपुञ्जोपमैर्मेदिनी ॥

[3]ऐन्द्रपदजिगीषयेव स्वर्गमधिरूढे च ज्येष्ठे भ्रातरि श्रीमत्कृष्णराजदेवे
युवराजदेवदुहितरि कुण्डकदेव्याममोघवर्षनृपात् ।
जातः खोट्टिगदेवो नृपतिरभूद्भुवनविख्यातः ॥

---

१. 'दशकण्ठदर्पदलनश्रीहैहयानां' इति समस्तः पाठो युक्तः. २. चेदिदेशाधीशशंकरगणस्य दुहितरि लक्ष्म्यां गोविन्दाम्बायां च जगत्तुङ्गनृपात्क्रमेणेन्द्रः, अमोघवर्षश्चेति पुत्रद्वयमुदभूत्. अमोघवर्षात्कृष्णः, खोट्टिगः, निरुपमश्चेति त्रयः पुत्रा बभूवुः. भाण्डारकरपण्डितास्तु दक्षिणेतिहासे 'गोविन्दोऽम्बाभिधानायाम्' इति पाठं समुचितं वदन्ति. ३. 'इण्डियन् आण्टिक्केरी'मध्ये फ्लीटपण्डितेन एतद्द्वयमप्यग्रिमायामार्यायां प्रवेशितम्. तथैव दक्षिणेतिहासेऽपि.

तस्यानुजान्निरुपमादुपलब्धजन्मा
वीरश्रियः पदमभूद्भुवि **कक्कराजः** ।
यो बाल एव सकलामपि राजनीति-
मात्मप्रबोधविभवातिशयाद्विवेद ॥
श्रीमालीति दिशां गुणीति विदुषां त्यागीति दीनार्थिनां
क्रोधीति द्विषतां शमीति च सतां रूपीति सद्योषिताम् ।
मित्राणां सुहृदित्यवन्ध्यविभवो विश्वंभरायाः पतिः
सर्वेषामपि सर्वदेति निवसत्येकोऽपि यश्चेतसि ॥
यस्यास्ते करवालवारिणि चिरं प्रक्षालयन्ती यथा
लक्ष्मीरात्मकलङ्कमाहितमलं निन्द्यैः कुभूपाश्रयैः ।
सत्यं श्रीगृहमेतदम्बुजमितो मे द्वेषिणी साप्यत-
स्तिष्ठाम्यत्र रुषेति यस्य च मुखे देवी सरस्वत्यपि ॥
सत्यं गुर्जरनिर्जितारिनिकरश्चोलादिलीलारतो
हूणाधीशरणेष्वकम्पितमतिः पाण्ड्यप्रचण्डो नृपः ।
वन्द्योऽयं भवतामनिन्द्यचरितः स्पर्धन्त मा स्मामुना
कीर्तिर्यस्य नियामिकैवमनिशं पृथ्वीं परिभ्राम्यति ॥
त्यागेनैव परां प्रसिद्धिमगमत्कर्णः किलानश्वरीं
सत्येनात्र युधिष्ठिरोऽपि नृपतिः प्रख्यातकीर्तिः कृतः ।
सौन्दर्येण मनोभवश्च विदितः पार्थो धनुः कौशलै-
र्यैः सर्वानतिशेत एव भुवने देवः समस्तैर्गुणैः ॥

यश्चानुपरतकनकधारानिपातोपजनितलोकहर्षः श्रीमदमोघवर्षः स्वकौशलक्षिप्तनिशितास्त्रविदारितारातिसार्थः श्रीनूतनपार्थः सकलबलवदरितिमिरभेदनप्रचण्डः श्रीमदहितमार्तण्डः स्वविक्रमच्छलितबलिबन्धपरायणः श्रीवीरनारायणः सकलादिराजचरितातिशयतुङ्गः श्रीमान्नृपतुङ्गो निखिलभुवनाधिपत्यप्रकाशितैकातपत्रः श्रीराजात्रिनेत्रः समभवत्सदर्थाभिधानतया

१. 'अवन्ध्य' इति 'इण्डियन् आण्टिक्वेरी'मुद्रितः पाठः.

स च परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमदकालवर्षदेवपादानुध्यातः परमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वरश्रीमदमोघवर्षदेवः पृथिवीवल्लभः श्रीमद्वल्लभनरेन्द्रदेवः कुशली सर्वानेव यथासंबध्यमानकान्राष्ट्रपतिविषयपतिग्रामकूटमहत्तरायुक्तकोपयुक्तकाधिकारिकान्समादिशति—अस्तु वः संविदितम्, यथा श्रीमान्यखेटस्थिरावासिते श्रीमत्कक्कलदेवराजे शकनृपकालातीतसंवत्सरशतेष्वष्टसु चतुर्नवत्यधिकेष्वङ्कतः संवत् ८९४ अङ्गिरःसंवत्सरान्तर्गताश्वयुजपौर्णमास्यायां(स्यां) बुधदिने सोमग्रहणमहापर्वणि मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये श्रीमद्वेजुचवावीवास्तव्याय इहैव कार्याभ्यागताय भारद्वाजगोत्रबह्वृचशाखासब्रह्मचारिणे त्रिप्रवराय श्रीमच्छंकरैयपुत्राय श्रीमत्सङ्गमैयसुताय श्रीमच्छन्नपैयभट्टाय उप्पलिकाशतत्रयान्तर्गतबब्बुलतल्लद्वादशमध्ये पङ्गरिकानाम ग्रामः सवृक्षमालाकुलः सधान्यहिरण्यादेयः सदण्डदोषदशापराधः पूर्वप्रसिद्धचतुःसीमापर्यन्तः शुल्कादिसमस्तोत्पत्तिसहितः आ चन्द्रार्कं मया नमस्यो दत्तः । तस्य पूर्वतः रोहीतल्लग्रामः । दक्षिणतः शिलहरेग्रामः । पश्चिमतः किणिहिग्रामः । उत्तरतः अन्तरवल्लीग्रामः । एवं चतुराघाटविशुद्धममुं पङ्गरिकाग्रामं श्रीमच्छन्नपैयभट्टस्य कृषतः कर्षयतो भुञ्जतो भोजयतो वा न केनचिद्व्याघातः कार्यः । यश्च करोति स पञ्चभिरपि महापातकैरुपपातकैश्च संयुक्तः स्यात् । उक्तं च—

'सामान्योऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ॥'
'यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥'
'बहुभिर्वसुधा भुक्ता पार्थिवैः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥'
'विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।
कृष्णाहयो हि जायन्ते भूमिदानापहारिणः ॥'

'षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥'
'सुवर्णमेकं गामेकां भूमेरप्येकमङ्गुलम्।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम्॥'
'मद्वंशजाः परमहीपतिवंशजा वा
पापादपेतमनसो भुवि भाविभूपाः।
ये पालयन्ति मम धर्ममिदं समस्तं
तेषां मया विरचितोऽञ्जलिरेष मूर्ध्नि॥'

श्रीमदम्बार्यपौत्रेण योगमार्यसुतेन च। कायस्थकुमुदभागिना लिखितं पुन्नार्यनाम्ना॥

(इण्डियन् आण्टिक्वेरी १२।२६४–६७)

---

(१०)

राणासमरसिंहस्य प्रशस्तिः[१]।

ओम्।

ॐ नमः शिवाय।

ध्यानानन्दपराः सुराः कति कति ब्रह्मादयोऽपि स्वसं-
वेद्यं यस्य महः स्वभावविशदं किंचिद्विदांकुर्वते।
मायामुक्तवपुः स्वसंगतभवाभावप्रदः प्रीतितो
लोकानामचलेश्वरः स दिशतु श्रेयः प्रभुः प्रत्यहम्॥
सर्गार्थं स्वतनुं हुताशमनिशं पद्मासने जुह्वतः
प्राणैः प्राजनि नीललोहितवपुर्यो विश्वमूर्तेः पुरा।
दुष्टाङ्गुष्ठनखाङ्कुरेण हठतस्तेजोमयं पञ्चमं
छिन्नं धातृशिरः कराम्बुजतले बिभ्रत्स वस्त्रायताम्॥

---

१. प्रशस्तिरियमर्बुदाचलो(आबूपहाड)परि श्रीमदचलेश्वरमहादेवमन्दिरसमीपस्थसंन्यासिमठे शिलायां समुत्कीर्णा वर्तते. वर्णिताश्चात्रोदयपुरमहीपतेः पूर्वपुरुषाः.

अव्यक्ताक्षरनिर्भरध्वनिजपस्त्यक्तान्यकर्मश्रमः
स्वं देहास्तितिमानमुज्झितुमना दानाम्बुसंवर्धितः ।
यत्कुम्भाचलगस्तपांसि वितनोत्यद्यापि भृङ्गव्रजः
प्रत्यूहापगमोन्नतिर्गजमुखो देवः स वोऽस्तु श्रिये ॥

किं च ।

क्षुभ्यद्वारिधिदीर्यमाणशिखरिश्रेणि भ्रमद्भूतलं
त्रुट्यद्व्योमदिगन्तसंहति पतद्ब्रह्माण्डभाण्डस्थिति ।
कल्पान्तस्य विपर्ययेऽपि जगतामुद्वेगमुच्चैर्दिश-
त्सिन्धोर्लङ्घनमद्भुतं हनुमतः पायादपायात्स नः ॥

शाखोपशाखाकुलितः सुपर्वा गुणोचितः पत्रविभूषिताङ्गः ।
कृतास्पदो मूर्धनि भूधराणां जयत्युदारो गुहिलस्य वंशः ॥

यद्वंशो गुहिलस्य राजभगवन्नारायणः कीर्त्यते
तत्सत्यं कथमन्यथा नृपतयस्तं संश्रयन्तेतराम् ।
मुक्तेः कल्पितवेतसः करतलव्यासक्तदण्डोज्ज्वलाः
प्राणत्राणधियः श्रियः समुदयैर्न्यस्तापहस्ताः सदा ॥

मेदःक्लेदभरेण दुर्जनजनस्याप्लावितः संगरे
देशः क्लेशकथापकर्षणपटुर्यो बप्पकेनोच्चकैः ।
लावण्योत्करनिर्जितामरपुरः श्रीमेद[1]पाटाभिधा-
माधत्ते स्म स एष शेषनगरश्रीगर्वसर्वंकषः ॥

अस्ति नाग[2]ह्रदं नाम सायाममिह पत्तनम् ।
चक्रे तपांसि हारीतराशिर्यत्र तपोधनः ॥

केऽपि क्वापि परप्रभावजनितैः पुण्यैर्हविर्भिर्विभुं
प्रीणन्ति ज्वलनं हिताय जगतां प्रारब्धयागक्रमाः ।
अन्ये प्राणनिरोधबोधितसुखाः पश्यन्ति चात्मस्थितं
विश्वं सद्विजनस्थलीषु मुनयो यत्राप्ततत्त्वोदयाः ॥

---

१. यस्याधुना 'मेवाड'नाम्ना प्रसिद्धिः. 'भिन्दानाः सान्द्रमानग्रहपटिममदं मेदपाटाङ्गनानाम्' इति कर्णसुन्दर्यां (१।५०) बिह्लणप्रयोगः. २. अधुना 'नागदा'नाम्ना प्रसिद्धः.

अस्मिन्नेव वने तपस्विनि जने प्रायःस्खलद्बन्धने
वृत्तान्तं भुवनस्य योगनियतः प्रत्यक्षतः पश्यति।
हारीतः शिवसङ्गमङ्गविगमात्प्राप्तः स्वसेवाकृते
बप्पाय[1] प्रथिताय सिद्धिनिलयो राज्यश्रियं दत्तवान्॥
हारीतात्किल बप्पकोऽङ्घ्रिवलयव्याजेन लेभे महः
क्षात्रं धातृनिभाद्वितीर्य मुनये ब्राह्मं स्वसेवाछलात्।
एतेऽद्यापि महीभुजः क्षितितले तद्वंशसंभूतयः
शोभन्ते सुतरामुपात्तवपुषः क्षात्रा हि धर्मा इव॥
बप्पकस्य तनयो नयवेत्ता संबभूव नृपतिर्गुहिला[3]ख्यः।
यस्य नामकलितां किल जातिं भूभुजो दधति तत्कुलजाताः॥
यैः[4] पीयूषमयूखसुन्दरमतिर्विद्यासुधालंकृति-
र्निष्प्रत्यूहविनिर्जितस्मरगतिः प्राकाम्यरम्याकृतिः।
गाम्भीर्योन्नतिसंभृतस्य जलधेर्विस्फोटिताहंकृति-
स्तस्माद्भोजनरेश्वरः स समभूत्संसेवितश्रीपतिः॥
शीलः सशीलकरवालकरालपाणि-
र्भेजे भुजेन तदनु प्रतिपक्षलक्ष्मीम्।
उत्साहभावगमकं पुलकं दधानो
वीरः स्वयं रस इव स्फुटबद्धदेहः॥
चोडस्त्रीरतिखण्डनः कुलनृपश्रेणीशिरोमण्डनः
कर्णाटेश्वरदण्डनः प्रभुकलामैत्रीमनोनन्दनः।
तत्सूनुर्नयमर्मनर्मसचिवः श्रीकालभोजः क्षमा-
पालः कालकरालकर्कशधनुर्दण्डप्रचण्डोऽजनि॥
छायाभिर्वनिताः फलैः सुमनसः सत्पत्रपुञ्जैर्दिशः
शाखाभिर्द्विजवर्गमर्गलभुजः कुर्वन्मुदामास्पदम्।

---

१. 'बापारावल' नात्रास्य सर्वत्रेतिहासेषु प्रसिद्धिः. २. 'ऽङ्घ्रि' इति मुद्रितः पाठः.
३. 'गुहिलोत' नाम्ना तद्वंशोद्भवानां प्रसिद्धिः. ४. 'यत्' इति मुद्रितः पाठः.

तद्वंशप्रबलाङ्कुरोऽतिरुचिरः प्रादुर्बभूवावनी-
पालो **भर्तृभट**स्त्रिविष्टपतरोर्गर्वाभिहर्ता ततः ॥
मुष्टिप्रमेयमध्यः कपाटवक्षस्थलस्तदनु ।
सिंहस्त्रासितभूधरमत्तेभो भूपतिर्जयति ॥
तज्जन्मा स **महायिकः** स्वभुजयोः प्राप्तैकसाहायकः[1]
क्षोणीभारमुदारमुन्नतशिरा धत्ते स्म भोगीश्वरः ।
यत्क्रोधानलविस्फुलिङ्गमहसि प्रत्यर्थिनोऽनर्थिनः
प्राग्वत्पक्षपरिग्रहा[2]कुलधियः पेतुः पतङ्गा इव ॥
खुम्माणस्य[3] ततः प्रयाणवियति क्षोणीरजोदुर्दिने
निस्त्रिंशाम्बुधरः सिषेच[4] सुभटान्धाराजलैरुज्ज्वलैः ।
तन्नारीकुचकुङ्कुमानि जगलुश्चित्राणि नेत्राञ्जनै-
रित्याश्चर्यमहो मनःसु[5] सुधियामद्यापि विस्फूर्जति ॥
अल्लटोऽजनि ततः क्षितिपालः संगरेऽनुकृतदुर्जयकालः ।
यस्य वैरिपतनां करवालः क्रीडयैव जयति स्म करालः ॥
उदयति स्म ततो **नरवाहनः** समिति संहृतभूपतिवाहनः ।
विनयसंचयसेवितशंकरः सकलवैरिजनस्य भयंकरः ॥
विक्रमविधूतविश्वप्रतिभटनीतेस्तथा गुणस्फीतेः ।
कीर्तिस्तारकजैत्री **शक्तिकुमारस्य** संजज्ञे ॥
आसीत्ततो नरपतिः **शुचिवर्म**नामा
युद्धप्रदेशरिपु[6]दर्शितचण्डधामा ।
उच्चैर्महीधरशिरःसु निवेशिताङ्कैः[7]
शंभोर्विशाख इव विक्रमसंभृतश्रीः ॥
स्वर्लोके शुचिवर्मणि स्वसुकृतैः पौरंदरं विभ्रमं
बिभ्राणे कलकण्ठकिंनरवधूसंगीतदोर्विक्रमे ।

१. 'साहायिकः' इति मुद्रितः पाठः. २. 'परीग्रहा' इति मुद्रितः पाठः. ३. 'खुंमाणस्य' इति मुद्रितः पाठः. ४. 'शिषेच' इति मुद्रितः पाठः. ५. 'मनस्तु' इति मुद्रितः पाठः. ६. 'रिपुरदर्शित' इति मुद्रितः पाठः. ७. 'निवेशितांह्निः' इति मुद्रितः पाठः.

माद्यन्मारविकारवैरितरुणीगण्डस्थलीपाण्डुरै-
ब्रह्माण्डं **नरवर्मणा** धवलितं शुभ्रैर्यशोभिस्ततः ॥
जाते सुरस्त्रीपरिरम्भसौख्यसमुत्सुके श्रीनरवर्मदेवे ।
ररक्ष भूमीमथ **कीर्तिवर्मा** नरेश्वरः शक्रसमानधर्मा ॥
कामक्षामनिकामतापिनि तपे(?)ऽमुष्मिन्नृपे रागिणि
स्वःसिन्धोर्जलसंप्लुते रमयति स्वर्लोकवामभ्रुवः ।
दोर्दण्डद्वयभग्नवैरिवसतिः क्षोणीश्वरो **वैरट**-
श्चक्रे विक्रमतः स्वपीठविलुठन्मूर्धश्चिरं द्वेषिणः ॥
तस्मिन्नुपरते राज्ञि मुदिताशेषविद्विषि ।
वैरिसिंहस्ततश्चक्रे निजं नामार्थवद्भुवि ॥
व्यूढोरस्कस्तनुर्मध्ये क्ष्वेडा[1]कम्पितभूधरः ।
विजयोपपदः सिंहस्ततोऽरिकरिणोऽवधीत् ॥
यन्मुक्तं हृदयाङ्गरागसहितं गौरत्वमेतद्द्विष-
न्नारीभिर्विरहात्ततोऽपि समभूत्किं कर्णिकारक्रमः ।
धत्ते यत्कुसुमं तदीयमुचितं रक्तत्वमभ्यन्तरे[2]
बाह्ये पिञ्जरतां च कारणगुणग्रामोपसंवर्गणम् ॥
ततः प्रतापानलदग्धवैरिक्षितीशधूमोत्थमषीरसेन[3] ।
नृपो**ऽरिसिंहः** सकलासु दिक्षु लिलेख वीरः स्वयशःप्रशस्तिम् ॥
लोचनेषु सुमनस्तरुणीनामञ्जनानि दिशता यदनेन ।
वारिकल्पितमहो बत चित्रं कज्जलं हृतमरातिवधूनाम् ॥
नृपोत्तमाङ्गोपलकान्तिकूटप्रकाशिताष्टापदपादपीठः ।
अभूदमुष्मादथ **चोड**नामा नरेश्वरः सूर्यसमानधामा ॥
कुम्भिकुम्भविलुठत्करवालः संगरे विमुखनिर्मितकालः ।
तस्य सूनुरथ **विक्रमसिंहो** वैरिविक्रमकथां निरमाइत् (?) ॥

१. क्ष्वेडा सिंहनादः. २. 'माभ्यन्तरे' इति मुद्रितः पाठः. ३. 'धूमोच्छमखीरसेन' इति मुद्रितः पाठः.

भुजवीर्यविलासेन समस्तोद्धृतकण्टकः।
चक्रे भुवि ततः क्षेम **क्षेमसिंहो** नरेश्वरः॥

रक्तं किंचिन्निपीय प्रमदपरिलसत्पादविन्यासमुग्धाः
कान्तेभ्यः प्रेतवध्वो ददति रसभरोद्गारमुद्राकपालैः।
पायंपायं तदुच्चैर्मुदितसहचरीहस्तविन्यस्तपात्रं
प्रीतास्ते ते पिशाचाः समरभुवि यशो यस्य संव्याहरन्ति॥

सामन्तसिंहनामा कामाधिकसर्वसुन्दरशरीरः।
भूपालोऽजनि तस्मादपहृतसामन्तसर्वस्वः॥

खोमाणसंततिवियोगविलक्षलक्ष्मीं[1]
सेनामदृष्टविरहां गुहिलान्वयस्य।
राजन्वतीं वसुमतीमकरोत्**कुमार-**
सिंहस्ततो रिपुगतामपहृत्य भूयः॥

नामापि यस्य जिष्णोः परबलमथनेन सान्वयं जज्ञे।
विक्रमविनीतशत्रुर्नृपतिरभून्**मथनसिंहो**ऽथ॥

कोशस्थितिः प्रतिभटक्षतजं न भुङ्क्ते
कोशं न वैरिरुधिराणि निपीयमानः।
सङ्ग्रामसीमनि पुनः परिरभ्य यस्य
पाणिं द्विसंश्रयमवाप फलं कृपाणः[2]॥

शेषनिःशेषसारेण **पद्मसिंहेन** भूभुजा।
मेदपाटमही पश्चात्पालिता लालितापि च॥

व्यादीर्णवैरिमदसिन्धुरकुम्भकूट-
निष्ठ्यूत[3]मौक्तिकमणिस्फुटवर्णभाजः।
युद्धप्रदेशफलिकासु समुल्लिलेख
विद्वानयं स्वभुजवीर्यरसप्रबन्धान्॥

---

१. 'घोमाण' इति मुद्रितः पाठः. २. 'क्रपाणः' इति मुद्रितः पाठः. ३. 'निष्ठुत' इति मुद्रितः पाठः.

नड्डूलमूलंकषबाहुलक्ष्मीस्तुरुष्कसैन्यार्णवकुम्भयोनिः।
अस्मिन्सुराधीशसहासनस्थे ररक्ष भूमीमथ **जैत्रसिंहः** ॥
अद्यापि संधकचमूरुधिरावमत्त-
संघूर्णमानरमणीपरिरम्भणेन।
आनन्दमन्दमनसः समरे पिशाचाः
श्रीजैत्रसिंहभुजविक्रममुद्गृणन्ति ॥
धवलयति स्म यशोभिः पुण्यैर्भूमण्डलं[4] तदनु।
विहिताहितभ्रंश[1]शङ्कस्तेजःसिंहो निरातङ्कः ॥
उप्तं मौक्तिकबीजमुत्तमभुवि त्यागस्य दानाम्बुभिः
सिक्त्वा सद्गुरुसाधनेन नितरामादाय पुण्यं फलम्।
राज्ञानेन कृ[2]पाणकोटिमटता स्वैरं विगाह्य श्रियः
पश्चात्केऽपि विवर्धिता दिशि दिशि स्फारा यशोराशयः ॥
आद्यक्रोडवपुः कृ[3]पाणविलसद्दंष्ट्राङ्कुरो यः क्षणा-
न्मग्नामुद्धरति स्म गूर्जरमहीमुच्चैस्तुरुष्कार्णवात्।
तेजःसिंहसुतः स एषः **समरः** क्षोणीश्वरग्रामणी-
राधत्ते बलिकर्णयोर्धुरमिलागोले वदान्योऽधुना ॥
तालीभिः स्फुटतूर्यतालरचनासंजीवनीभिः कर-
द्वन्द्वोपात्तकबन्धमुग्धशिरसः संनर्तयन्तः प्रियाः।
अद्याप्युन्मदराक्षसास्तव य[6]शःखण्डप्रशस्तिं रणे
गायन्ति प्रतिपक्षशोणितमदास्तेजस्विसिंहात्मज ॥
अप्रमेयगुणगुम्फकोटिभिर्गाढबद्धवृषविग्रहाकृतेः।
कीर्त्यते न सकला तव स्तुतिर्ग्रन्थगौरवभयान्नरेश्वर ॥
अर्बुदो विजयते गिरिरुच्चैर्देवसेवितकुलाचलरत्नम्।
यत्र षोडशविकारविपाकैरुज्झितोऽकृत तपांसि वसिष्ठः ॥

१. 'भ्रष' इति मुद्रितः पाठः. २. 'कृषाण' इति मुद्रितः पाठः. ३. 'कृषाण' इति मुद्रितः पाठः. ४. भूमण्डले. ५. 'प्युन्नद' इति मुद्रितः पाठः. ६. 'यशःखण्डं प्रतिष्ठं' इति मुद्रितः पाठः.

क्लेशावेशविमुग्धदान्तजनयोः सद्भुक्तिमुक्तिप्रदे
लक्ष्मीवेश्मनि पुण्यजह्नुतनयासंसर्गपूतात्मनि ।
प्राप प्रागचलेश्वरत्वमचले यस्मिन्भवानीपति-
र्विश्वव्याप्तिविभाव्यसर्वगतया देवश्चलोऽपि प्रभुः ॥
सर्वसौन्दर्यसारस्य कोऽपि पुञ्ज इवाद्भुतः ।
अयं यत्र मठस्तिष्ठत्यनादिस्तापसोचितः ॥
यत्र क्वापि तपस्विनः सुचरिताः कुत्रापि मर्त्याः क्वचि-
द्गीर्वाणाः परमात्मनिर्वृतिमिव प्राप्ताः क्षणेषु त्रिषु ।
यस्याद्योद्गतिमर्बुदेन सहितां गायन्ति पौराणिकाः
संधत्ते स खलु क्षणत्रयमिषात्त्रैलोक्यलक्ष्मीमिह ॥
जीर्णोद्धारमकारयन्मठमिमं भूमीश्वरग्रामणी-
र्देवः श्रीसमरः स्वभाग्यविभवादिष्टो निजश्रेयसे ।
किं चास्मिन्परमास्तिको नरपतिश्चक्रे वसुभ्र्यः कृपा-
संश्लिष्टः शुभभोजनस्थितिमपि प्रीत्या मुनिभ्यस्ततः ॥
अचलशदण्डमुच्चैः सौवर्णं समरभूपालः ।
आयुर्वायुचलाचलमिह दृष्ट्वा कारयामास ॥
आसीद्भावाग्निनामेह स्थानाधीशः पुरा मठे ।
हेलोन्मूलितसंसारबीजैः पाशुपतैर्वृतः ॥
अन्योन्यवैरविरहेण विशुद्धदेहाः
स्नेहानुबन्धिहृदयाः सदया जनेषु ।
अस्मिंस्तपस्यति मृगेन्द्रगजादयोऽपि
सत्त्वाः समीक्षितविमोक्षविधायितत्त्वाः ॥
शिष्यस्तस्यायमधुना नैष्ठिको भावशंकरः ।
शिवसायुज्यलाभाय कुरुते दुष्करं तपः ॥

---

१. 'वृतैः' इति मुद्रितः पाठः. २. 'सायोज्य' इति मुद्रितः पाठः.

फलकुसुमसमृद्धिं सर्वकालं वहन्तः
परमनियमनिष्ठां यस्य भूमीरुहोऽमी ।
अपरमुनिजनेषु प्रायशः सूचयन्ति
स्खलितविषयवृत्तेरर्बुदाद्रिप्रसूताः[1] ॥
राज्ञा समरसिंहेन भावशंकरशासनात् ।
मठः सौवर्णदण्डेन सहितः कारितोऽर्बुदे ॥
योऽकार्षीदेकलिङ्गत्रिभुवनविदितश्रीसमाधीशचक्र-
स्वामिप्रासादवृन्दे प्रियपटुलनयो वेदशर्मा प्रशस्तीः ।
तेनैषापि व्यधायि स्फुटगुणविशदा नागरज्ञातिभाजा
विप्रेणाशेषविद्वज्जनहृदयहरा चित्रकूटस्थितेन[2] ॥
यावदर्बुदमहीधरसङ्गं संबिभर्ति भगवानचलेशः ।
तावदेव पठतामुपजीव्या सत्प्रशस्तिरियमस्तु कवीनाम् ॥
लिखिता शुभचन्द्रेण प्रशस्तिरियमुज्ज्वला ।
उत्कीर्णा कर्मसिंहेन सूत्रधारेण धीमता ॥
सं १३४२ वर्षे मार्गशुदि १ प्रशस्तिः कृता ।

(भावनगरप्राचीनशोधसंग्रहस्य प्रथमे भागे पृष्ठे ३०-३७)

---

(११)

राष्ट्रकूटवंशोद्भवस्य द्वितीयप्रभूतवर्षमहीपतेर्दानपत्रम्।

स्वस्ति विस्तृतविशद[3]यशोवितानविशदीकृताशाचक्रवालकरवालप्रबला-वतंस[4]विराजितजयलक्ष्मासमीलिङ्गितदक्षदक्षिणाभूरिभुजार्गल[5]ः गलितसार-शौर्यरसविसरबिखलीकृताग्रारिवर्गः । वर्गत्रयवर्गैक[6]निपुणाचलाभारवो-र्वी(?)विशेषनिर्जितोर्वीमण्डलोत्सवोत्पादनपरम्पर(?)भूपालमौलिमालालीढा-

१. 'अर्बुदाद्रि' इति मुद्रितः पाठः. २. 'चित्तोडगढ'स्थितेनेत्यर्थः. प्रथमं चित्तोडगढ एव राजधान्यासीत्. उदयपुरनिर्माणं तु पश्चात् (खिस्ताब्दीयषोडशे शतके) जातम्. ३. 'विशाद' इति मुद्रितः पाठः. ४. 'आवतंश' इति मुद्रितः पाठः. ५. 'भुजर्गलः' इति मुद्रितः पाठः. ६. 'वर्गैनैक' इति मुद्रितः पाठः.

द्विड्वन्द्वारविन्दो **गोविन्दराजः** तस्य सूनुः सुतरुणभावोदयदयादानदीनेतरगुणगणस[1]मर्पितबन्धुजनः सकलकलागमजलधिकलशयोनिः मनुदर्शितमार्गानुगामी राष्ट्रकूटकुलामलगगनमृगलाञ्छनः बुधजनमुखकमलांशुमाली मनोहरगुणगणालंकृतभारः (?) **कक्क[2]राज**नामधेयः तस्य पुत्रः स्ववंशानेकनृपसंघातपरम्पराभ्युदयका[3]रणः परमऋषिब्राह्मणभक्तितात्पर्यकुशलः समस्तगुणगणाधिध्वानो विख्यातसर्वलोकनिरुपमस्थिरभावनिर्जितारिमण्डलः यस्येममासीत् (?) ॥

> जित्वा भूपारिवर्गान्नयकुशलतया येन राज्यं कृतं यः
> कष्टे मन्वादिमार्गस्तुतधवलयशा न क्वचिद्यागपूर्वः।
> सङ्ग्रामे यस्य शेषा स्वभुजकरबलप्रापिता या जयश्री-
> र्यस्मिञ्जाते स्ववंशोभ्युदयधवलतां यातदानर्कतेजः (?) ॥

असा**वि[4]न्द्रराज**नामधेयस्तस्य पुत्रः स्वकुलललामायमानो मानधनो दीनानाथजनाह्लादनकरदाननिरतमनोवृत्तिः हिमकर इव सुखकरकरः कुलाचलसमुदाय इव सुधाधारगुणनिपुणः (?) शिमशैलकूटतटस्थापितयशस्त[5]म्बो लिखितानेकविक्रमगु[6]णः।

> अघसंघातविनाशकसुरापगा यस्य सद्यशो विशा[7]दम्।
> गायन्तीव तरङ्गैर्[8]भवरवैर्वहति जनमहिता ॥

असौ **वैरमेघ**नामधेयस्तस्य पितृव्यः हृदयपद्मासनस्थपरेश्वरशिरःशिशिरकर[कर[9]]निकरनिराकृततमोवृत्तिः सविशेषस्य जग[10]त्त्रयसाम्रोद्धयेनेव (?) विरचितस्य चतुर्थलोकोदयसमानस्य कृतयुगशतैरिव निष्ठित[11]स्य यस्य यशसः पुञ्ज[12]मिव विराजमानः

---

१. 'सतर्पित' इत्युचितः पाठः. २. 'कक्कराजानामधेयः' इति मुद्रितः पाठः. ३. 'कारणम्' इत्यपेक्षितम्. ४. 'इन्दराजानामधेय' इति मुद्रितः पाठः. ५. 'स्तम्बं' इति मुद्रितः पाठः. ६. 'गुनम्' इति मुद्रितः पाठः. ७. 'विशादम्' इति मुद्रितः पाठः. ८. 'प्रभतरावैः' इति मुद्रितः पाठः ९. 'कर' इति मुद्रिते पाठे नास्ति. १०. 'जगत्रय' इति मुद्रितः पाठः. ११. 'निष्ठितस्य' इति मुद्रितः पाठः. १२. 'पुञ्ज इव' इत्यपेक्षितम्.

प्रदग्धकालागरुधूपधूमैः प्रवर्धमानोपचयाः पयोदाः ।
यस्याजिरं स्वच्छसुगन्धतोयैः सिञ्चन्ति सिद्धोदितकूटभागाः ॥ (?)
न चेदृशं प्राप्यमिति प्रलोभाद्भवोद्भवो भावियुगावतारे ।
अवैमि यस्य स्थितये स्वयं तत्कल्पान्तरं नैव च भाव्यतीति ॥ (?)
तारागणेषून्नतकूटकोटि[1]तटार्पितासूज्ज्वलदीपिकासु ।
मोमुह्यते रात्रिविभेदभावः निशात्ययः पौर[2]जनैर्निशायाम् ॥ (?)
आधारभूताहमिदं [3]व्यतीत्य मां वर्धते चायमतिप्रसङ्गः ।
यस्यावकाशार्थमितीव [4]पृथ्वी पृथ्वीव भूतेति च मे वितर्कः ॥

विचित्रपताकासहस्रसंछादितमुपरि परिचरणभयाल्लोकैकचूडामणिना मणिकुट्टिमसंक्रान्तप्रतिबिम्बव्याजेन स्वयमवतीर्य परमेश्वरभक्तियुक्तेन [5]नमस्क्रियमाणमिव विराजमानम्, प्रहतपुष्करमन्द्रनिनादाकर्णनोदितानुरागैः प्रावृडारम्भकालजनितोत्सवारम्भैर्मयूरैः प्रारब्धनृ[6]त्तवृत्तान्तम्, धूमवेलालिलागत(?)विलासिनीजनानां करतलकिसलयरसभावसद्भावप्रकटनकुशलशशिवदनाङ्गनानर्तनाहृतपौरयुवतिजनचित्तान्तरम्, समस्तसिद्धान्तसागरपारगमुनिशतसंकुलं देवकुलमासीत् [7]**कन्नेश्वरं** नाम स्वनामधेयाङ्कितम् ।

असाव**कालवर्ष** इति विख्यातस्तस्य सूनुराननतनृपमुकुटमणिगणकिरणजालरञ्जितपादयुगलनखमयूखप्रभाभासितसिंहासनोपान्तः कान्ताजनकटकखचितपद्मरागदीधितिबिसरशुम्भत्कुसुम्भरसरञ्जितानिजधवल[8]वर्ज्यमानचारुचामर[9]निचयविख्यातः प्राज्यराज्याभिषेकान्तरैकैश्वर्यसुखसमानुभवस्थितिः निजतुरंगमैकविजयानीतराजलक्ष्मीसनाथो महीनाथो यः कल्पाङ्घ्रिपः [10]संसेव (?) चिन्तामणिरिति [11]दृढं यं वदन्त्यर्थिनः नित्यप्रीत्या प्राप्तार्थसंपदसौ **प्रभूतवर्ष** इति विख्यातो भूपचक्रचूडामणिः तस्यानुजः **धारा**-

---

१. 'तटार्पितासु ज्वाल–' इति मुद्रितः पाठः. २. 'पौरजनेर्' इति मुद्रितः पाठः. ३. 'व्यतीत्यम् आवर्धते' इति मुद्रितः पाठः. ४. 'पृथ्वीम्' इति मुद्रितः पाठः. ५. 'नमस्क्रियमाणम् एव' इति मुद्रितः पाठः. ६. 'वृत्तनृत्तान्तम्' इति मुद्रितः पाठः. ७. कन्नेश्वर इति राज्ञोऽकालवर्षस्य नामान्तरम्. ८. 'विज्यमान' इति मुद्रितः पाठः. ९. 'विचयविख्यातम्' इति मुद्रितः पाठः. १०. 'सत्यमेव' इत्यपेक्षितम्. ११. 'धुढं' इति मुद्रितः पाठः.

वर्षश्रीपृथ्वीवल्लभमहाराजाधिराजपरमेश्वरः खण्डितारिमण्डलासिभासितदोर्दण्डः पुण्डरीक इव बलिरिपुमर्दनाक्रान्तसकलभुवनतलः सुकृतानेकराज्यभारभरोद्वहनसमर्थः हिमशैलविशालोरःस्थलेन राजलक्ष्मीविहरणमणिकुट्टिमेन चतुराङ्गनालिङ्गनतुङ्गकुचसङ्गसुखोद्रेकोदितरोमाञ्चयोजितेन स्वभुजासिधारादलितसमस्तगलितमुक्ताफलविसरविराजितारिबलहस्तिहस्तास्फालनदन्तकोटिघट्टितघनीकृतेन विराजमानः त्रिपुरहरवृषभककुदाकारोन्नतविकटांसतटनिकटदोधूयमानचारुचामरचयः फेनपिण्डपाण्डुरप्रभावोदितच्छविना वृत्तेनापि चतुराकारेण सितातपत्रेणाच्छादितसमस्तदिग्विवरो रिपुजनहृदयविदारणदारुणेन सकलभूतलाधिपत्यलक्ष्मीलीलामुत्पादयता प्रहतपटहढक्कागम्भीरध्वानेन घनाघनगर्जनानुकारिणा अस्याचितो विनोदनिर्गमः (?) स्वकीयां साञ्चलतां (?) परनृपचेतोवृत्तिषु दातुमिवोच्चैरोविलोलप्रकटितराज्यचिह्नः (?) तुरङ्गमखरखुरोत्थितपांशुपटलमसृणितजलदसंचयानेकमत्तद्विपकरटतटगलितदानधाराप्रतानप्रशमितमहीपरागः ।

यस्य श्री चपलोदया खुरतरङ्गालीसमास्फालना-
न्निर्भिन्नद्विपयानपात्रगतयो ये संचलच्चेतसः । (?)
तस्मिन्नेव समेत्य सारविभवं संत्यज्य राज्यं रणे
भग्ना मोहवशात्स्वयं खलु दिशामन्तं भजन्तेऽरयः ॥

इदं कियद्भूतलमत्र सम्यक्स्थातुं महत्संकटमित्युदग्रम् ।
स्वस्यावकाशं न करोति यस्य यशो दिशां भित्तिविभेदनानि ॥

अनवरतदानधाराबर्षागमेन तृप्तजनतायाः धारावर्ष इति जगति विख्यातः सर्वलोकवल्लभतया वल्लभ इति । तस्यात्मजो निजभुजबलसमानी-

१. 'पुण्डरीकाक्ष' इत्यपेक्षितम्. २. 'स्थलिन' इति मुद्रितः पाठः. ३. 'विहारण' इति मुद्रितः पाठः. ४. 'हास्ता–' इति मुद्रितः पाठः. ५. 'घणोकृतेन' इति मुद्रितः पाठः. ६. 'पाण्डर' इति मुद्रितः पाठः. ७. 'चतुरस्राकारेण' इत्युचितं भाति. ८. 'आतपत्रेन' इति मुद्रितः पाठः. ९. 'दारुणैन' इति मुद्रितः पाठः. १०. 'पटढका' इति मुद्रितः पाठः. ११. 'चञ्चलतां' इति भाति. १२. 'इवोच्चै' इति मुद्रितः पाठः. १३. 'सत्यज्य' इति मुद्रितः पाठः. १४. 'तस्यात्मजा' इति मुद्रितः पाठः.

तंपरनृपलक्ष्मीकर[1]धृतधवलातपत्रनालप्रतिकूलरिपुकुलचरणनिबद्धखलखला-
यमानधवलशृङ्खलारवबधिरीकृतपर्यन्तजनो निरुपमगुणगणाकर्णनसमा-
ह्लादितमनसा[2] साधुजनेन सदा संगीयमान[3]शशिविशदयशोराशिराशावष्ट-
ब्धजनमनःपरिकल्पनत्रिगुणीकृतस्वकीयानुष्ठानो निष्ठितकर्तव्यः **प्रभूत-
वर्षश्रीपृथ्वीवल्लभ**राजाधिराजपरमेश्वरस्य प्रवर्धमानश्रीराज्यविजयसं-
वत्सरेषु वेदत्सु[4] । चारुचालुक्यान्वयगगनतलहरिण[5]लाञ्छनायमान**श्रीब-
लवर्मनरेन्द्रस्य** सूनुः[6] स्वविक्रमावर्जित[7]सकलरिपुनृपशिरःशेखरार्चितचरण-
युगलो **यशोवर्म**नामधेयो राजा व्यराजत । तस्य पुत्रः सुपुत्रः कुलदी-[8]
पक इति पुराणवचनमवितथ[9]मिह कुर्वन्नतितरां धीराजमानो मनोजात इव
मानिनीजनमनस्थलीयः (?) रणचतुरश्चतुरजनाश्रयः श्रीसमालिङ्गितवि-
शालवक्षस्थलो नितरामशोभत । असौ महात्मा

कमलोचितसद्भुजान्तर**श्रीविमलादित्य** इति प्रतीतनामा ।
कमनीयवपुर्विलासिनीनां[10] भ्रमदक्षि[11]भ्रमरालिवक्रपद्मः ॥

यः प्रचण्डतरकरवाल[12]दलितरिपुनृप[13]करिघटाकुम्भमुक्तमुक्ताफलविकीर्णि-
तरुचिररक्ताब्धिकान्तिरुचिरपरीतनिजकलत्र[14]कण्ठः शितिकण्ठ इव महितम-
हिमामोद्यमानरुचिरकीर्तिरशेषगङ्गमण्डलाधिराज**श्रीचाकिराजस्य** भा-
गिनेयः भुवि प्रकाशतयस्मि[15] कुनुन्गिलनामदेशमयशःपराङ्मुखा[16] मनुमार्गेण[17] पालयति सति श्रीयापनीयनन्दिसंघपुंनागवृक्षमूलगणे श्रीकित्याचा-
र्यान्वये बहुष्वाचार्येष्वतिक्रान्तेषु व्रतसमितिगुप्तिगुप्तमुनिवृन्दवन्दितचरण-
कूविला[18]चार्याणामासीत् (?) तस्यान्तेवासी समुपनतजनपरिश्रमाहारः स्वदा-

१. 'करे धृत' इति मुद्रितः पाठः. २. 'मानसा' इति मुद्रितः पाठः. ३. 'सन्नीयमान' इति मुद्रितः पाठः. ४. 'वहत्सु' इति भाति. ५. 'हारिण–' इति मुद्रितः पाठः. ६. 'सुनु' इति मुद्रितः पाठः. ७. 'आवर्जित' इति मुद्रितः पाठः. ८. 'कुलदीपिक' इति मुद्रितः पाठः. ९. 'अवितथं' इति मुद्रितः पाठः. १०. 'विलासिनीना' इति मुद्रितः पाठः. ११. 'भ्रमराली' इति मुद्रितः पाठः. १२. 'करवाला' इति मुद्रितः पाठः. १३. 'नृपरकरि–' इति मुद्रितः पाठः. १४. 'कलत्रिकण्ठः' इति मुद्रितः पाठः. १५. 'प्रकाशते यस्मिन्' इति भाति. १६. 'पराङ्मुखे' इत्यपेक्षितम्. १७. 'मार्गेन पालयति' इति मुद्रितः पाठः. १८. 'आचार्य्यानाम्' इति मुद्रितः पाठः.

नसंतर्पितसमस्तविद्वज्जनो जनितमहोदयः विजयकीर्तिनाममुनिप्रभुरभूत्[1]।

अर्ककीर्तिरिति ख्यातिमातन्वन्मुनिसत्तमः।
तस्य शिष्यत्वमायातो नायातो वशमेनसाम्[2] ॥

तस्मै[3] मुनिवराय तस्य विमलादित्यस्य[4] शणैश्चर(?)पीडापनोदाय मयूरखण्डिमधिवसति[5] विजयस्कन्धावारे चाकिराजेन विज्ञापितो वल्लभेन्द्रः इडिगूर्विषयमध्यवर्तिनं[6] जालमङ्गलंनामधेयग्रामं शकनृपसंवत्सरेषु शरशिखिमुनिषु (७३५) व्यतीतेषु ज्येष्ठमासशुक्लपक्षदशम्यां पुष्यनक्षत्रे चन्द्रवारे मान्यपुरवरापरदिग्विभागालंकारभूतशिलाग्रामाजैनेन्द्रभवनाय[7] दत्तवान् तस्य पूर्वदक्षिणापरोत्तरदिग्विभागेषु स्वस्तिमङ्गल-बेळ्ळिन्द-गुडनूर-त्तारिपाल इति प्रसिद्धा ग्रामाः एवं चतुर्णां ग्रामाणां[8] मध्ये व्यवस्थितस्य जालमङ्गलस्यायं चतुरायधिक्रमः[9] पुनस्तस्य सीमाविभागः ईशानतः मुकूडलूदक्षिणदिग्विभागमवलोक्य एलूतग-कोडल-मूड्ग-केल-बन्दु इर्प्पेय-कोषदे-पळ्ळद्-ओलगण उलि-अलरिये कोदेयालि-बेलने सयूकने-बन्दु पोल पुणसे एव कीले अन्ते पोयिए बिदिरूर्गेरे मुकूडलू ततः पश्चिमतः पुलिपदिय तेङ्कण पेरूओलूबेये पेरूबिलिके एलगल-करण्डलो मुकूडलू अन्ते सयूकने पोगि नायूमणिगेरेय तायूगण्डि मुकूडलू ततः उत्तरतः बळ्ळगेरेय पडुव गजगोड पळम्बे पुणुसेये आनेद्लो गेरेए पुलूपडिये एलगळ्ळे पुलिगारद गेरे मुकूडलू ततः पूर्वतः निडु विळिङ्के····दविन पुलूपडिये कञ्चगार गळ्ळे पोल एळ्ळे पुणुसये बट्टपुणुसये बेळने बन्दु ईशानद मुकूडलोलू कूडि निन्दत्तू। राचमल्लगामुण्डनुं शीरनुं गङ्गगामुण्डनुं मारेयनुं बेलूगेरेयूओडेयोरुं मोदबागे-एलूपदिम्बरुं कुनुन्गिलू-अयसाबेरुं साक्षियागे कोट्टत्तू। नमः।

---

१. 'अभाद्' इति मुद्रितः पाठः. २. 'एनसा' इति मुद्रितः पाठः. ३. 'तस्मे' इति मुद्रितः पाठः. ४. 'विमलादित्यास्य' इति मुद्रितः पाठः. ५. 'वसती' इति मुद्रितः पाठः. ६. 'वार्त्तिन' इति मुद्रितः पाठः. ७. 'जिनेन्द्र' इति भाति. ८. 'ग्रामानां' इति मुद्रितः पाठः. ९. 'चतुरवधिक्रमः' इति भाति.

अद्भिर्दत्तं त्रिभिर्भुक्तं षड्भिश्च परिपालितम् ।
एतानि न निवर्तन्ते पूर्वराजकृतानि च ॥
स्वं दातुं सुमहच्छक्यं[1] दुःखमन्यस्य पालनम् ।
दानं वा पालनं वेति[2] दानाच्छ्रेयोऽनुपालनम् ॥
स्वदत्तां परदत्तां वा यो हरेत[3] वसुंधराम् ।
षष्टिं वर्षसहस्राणि विष्ठाया जायते क्रिमिः ॥
देवस्वं [हि] विषं घोरं कालकूटसमप्रभम् ।
विषमेकाकिनं हन्ति देवस्वं पुत्रपौत्रकम् ॥

(इण्डियन् आण्टिक्केरी १२।१३-१६)

(१२)

मथनदेवमहीपतेर्दानपत्रम्[4] ।

ॐ स्वस्ति । परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीक्षितिपालदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीविजयपाल[5]देवानामभिप्रवर्धमानकल्याणविजयराज्ये संवत्सरशतेषु दशसु षोडशोत्तरकेषु माघमाससितपक्षत्रयोदश्यां शनियुक्तायामेवं १०१६ माघसुदि १३ शनावद्य श्रीराज्यपुरा[6]वस्थितो महाराजाधिराजपरमेश्वरश्रीमथन[7]देवो महा-

१. 'सुमच्छक्यं' इति मुद्रितः पाठः. २. 'वेत्ति' इति मुद्रितः पाठः. ३. 'हरेति' इति मुद्रितः पाठः. ४. एतल्लेखशिला अलवरनगरे पण्डितश्रीभवानन्दोदयानन्दरामचन्द्रशर्मणां सदने वर्तते. तैरेव मुद्रितं स्वहस्तलिखितं च तत्प्रतिरूपकमुपयुक्तेन टिप्पणेनालंकृत्यास्मभ्यं प्रहितमिति भूयसीं तदुपकृतिं प्रणतिपुरःसरं स्वीकुर्मः. ५. विजयपालनामा तत्समये सुप्रसिद्धो महीपतिरासीत्, यत्संततिरधुना 'करोली'नगरे राज्यं करोति. विजयपालसमये तु तद्राजधानी 'बयाना'नगरमभूत्, यदधुना भरतपुरराज्यान्तर्गतं वर्तते. ६. अलवरनगराद्दक्षिणदिश्यष्टादशक्रोशान्तरे पर्वतस्थल्यामधुना 'राजोर'नाम्ना प्रसिद्धो ग्राम एव राज्यपुरमासीत्. अद्यापि तत्र चतुर्दिक्षु छिन्नभिन्नगोपुरप्राकारापणदेवालयादीनि प्राचीननगरचिह्नानि दृश्यन्ते. लभ्यन्ते चेतस्ततः प्रकीर्णा भूयस्यः खण्डिता बौद्धप्रतिमाः. विलोक्यन्ते च प्राचीनत्वानुमापका बहवश्चतुष्कोणाः कूपाः. तत्र च कथाशेषतां गतेषु परःशतेषु देवालयेष्वधुना नीलकण्ठमहादेवस्याशावरीदेव्याश्च त्रुटितप्रायं मन्दिरमवशिष्यते. श्रावणमासे च नीलकण्ठदर्शनार्थं सर्वतो जनाः समायान्ति. ७. मथनदेवस्तु विजयपालस्य कश्चन सामन्त आसीदित्यनुमीयते.

राजाधिराजश्रीसावटसूनुर्गुर्जरप्रतीहारान्वयः कुशली स्वभोगावाप्तवंशपोतकभोगसंबद्धव्याघ्रवाटकग्रामे समुपगतान्सर्वानेव राजपुरुषान्नियोगस्थान्क्रमागमिकान्नियुक्तकानियुक्तकांस्तन्निवासिमहत्तरमहत्तमवणिक्प्रवणिग्प्रमुखजनपदांश्च यथार्हं मानयति बोधयति समादिशति च । अस्तु वः संविदितम्—तृणाग्रलग्नजलबिन्दुसंस्थानास्थिराणि शरीरसंपज्जीवितानीतीमां संसारासारतां, कीर्तिमूर्तेश्च कल्पस्थायितां ज्ञात्वा मया पित्रोरात्मनश्च पुण्ययशोभिवृद्धये ऐहिकामुष्मिकफलनिमित्तं संसारार्णवतरणार्थं स्वर्गमार्गार्गलोद्घाटनहेतोः स्वमातृश्रीलच्छुकानाम्ना श्रीलच्छुकेश्वरमहादेवाय प्रत्यहं २ स्नपनसमालभनपुष्पधूपनैवेद्यदीपतैलसुधासिन्दूरलागनखण्डस्फुटितसमारचनप्रेक्षणकपवित्रकारोहणकर्मकरवाटिकापालादिव्ययार्थमुपरि सूचितव्याघ्रवाटकग्रामः स्वसीमातृणयूतिगोक(च)रपर्यन्तः सोद्रङ्गः सवृक्षमालाकुलः सकलाभोगम(सकलभोगसं)युतादायाभ्यामपि समस्तसस्यानां भागखलभिक्षाप्रस्थकस्कन्वकमार्गणकदण्डदशापराधदाननिधिनिधानापुत्रिकाधननष्टिभरटोचितानुचितनिबद्धानिबद्धसमस्तप्रत्यादेयसहितस्तथैतत्प्रत्यासन्नश्रीगुर्जरवाहितसमस्तक्षेत्रसमेतश्चाकिंचित्प्रग्राह्योऽद्य पुण्येऽहनि स्नात्वा देवस्य प्रतिष्ठाकाले उदकपूर्वं परिकल्प्य शासनेन दत्तः । मत्वैवमद्य दिनादारभ्य श्रीमदामर्दकविनिर्गतश्रीसोपुरीयसंतत्यां श्रीछात्रशिवे श्रीगोपालीदेवीतडागपालीमठसंबद्धश्रीराज्यपुरे श्रीनित्यप्रमुदितदेवमठे श्रीश्रीकण्ठाचार्यशिष्यश्रीरूपशिवाचार्यस्तच्छिष्यश्रीमदोंकारशिवाचार्यस्यास्खलितब्रह्मचर्यावाप्तमहामहिम्नः परमयशोराशेः शिष्यप्रतिशिष्यक्रमेण देवोपयोगार्थं तत्रिमठ्यवच्छेदेनाचन्द्रार्कं यावत्कुर्वतः कारयतो वास्मद्वंशजैरन्यतरैर्वा भाविभिर्भूपालैः कालकालेष्वपि परिपन्थना न कार्या । प्रत्युतास्मत्कृतप्रार्थनया सदा तन्निसानाथ्यं बोढव्यम् । यतः समानैवेयं पुण्यफलावाप्तिरनुमन्तव्या । उक्तं च भगवता परमर्षिणा वेदव्यासेन व्यासेन—

'बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

१. अयं ग्रामोऽधुना 'बाघोर'नाम्ना प्रसिद्धोऽस्ति.

आदित्यो वरुणो वायुर्ब्रह्मा विष्णुर्हुताशनः।
भगवाञ्शूलपाणिश्च अभिनन्दति भूमिदम्॥
षष्टिंर्वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरकं वसेत्॥'

यैर्वाञ्छितं शिशिरदीधितिशुभ्रकीर्ते-
यैश्चामरप्रणयिनीपरिरम्भणस्य।
ते साधवो नहि हरन्ति परेण दत्तां
दानाद्वदन्ति परिपालनमेव साधु॥

शासनं कृतवान्देवो लिखितं तस्य सूनुना।
व्यक्तं सूरप्रसादेन उत्कीर्णं हरिणा ततः॥ इति॥

तथामुष्मै देवाय पार्श्वदेवकुलिकाचतुष्टया ४ राजधान्यां प्रतिष्ठितविनायकसहिताय हट्टदाने गोर्नी प्रतिहट्टव्यावहरिकविं २ घटककूपकं प्रति घृतस्य तैलस्य च पलिके द्वे २ वीथीं प्रति मासि २ विं २ तथा बहिःप्रविष्टचोछिकां प्रति पर्णानां ५० एतद्देवस्य कृतमिति॥ श्रीमथनः॥ ९

---

(१३)

श्रीपृथ्वीकोङ्गणिमहाराजस्य दानपत्रम्।

स्वस्ति जितं भगवता गतघनगगनाभेन पद्मनाभेन। श्रीमज्जाह्नवेयकुलामलव्योमावभासनभास्करः स्वखड्गैकप्रहारखण्डितमहाशिलास्तम्भलब्धबलपराक्रमो दारुणारिगणविदारणोपलब्धव्रणविभूषणविभूषितः काण्वायनसगोत्रः श्रीमत्कोङ्गणिवर्मधर्ममहाधिराजः,तस्य पुत्रः पितुरन्वागतगुणयुक्तो विद्याविनयविहितवृत्तः सम्यक्प्रजापालनमात्राधिगतराज्यप्रयोजनो विद्वत्कविकाञ्चननिकषोपलभूतो नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलो दत्तकसूत्र-

---

१. 'कुलामलाव्योमा' इति मुद्रितः पाठः. २. 'पराक्रमोदारणा' इति मुद्रितः पाठः.
३. 'पुत्र' इति मुद्रितः पाठः. ४. 'विहीत' इति मुद्रितः पाठः.

वृत्तेः प्रणेता श्रीमान्माधवमहाधिराजः, तत्पुत्रः पितृपैतामहगुणयुक्तोऽनेकचातुर्दन्तयुद्धावाप्तचतुरुदधिसलिलस्वादितयशाः श्रीमद्धरिवर्ममहाधिराजः, तस्य पुत्रो द्विजगुरुदेवतापूजनपरो नारायणचरणानुध्यातः श्रीमान्विष्णुगोपमहाधिराजः, तत्पुत्रस्त्र्यम्बकचरणाम्भोरुहरजःपवित्रीकृतोत्तमाङ्गः स्वभुजबलपराक्रमक्रयक्रीतराज्यः कलियुगबलपङ्कावसन्नधर्मवृषोद्धरणनित्यसंनद्धः श्रीमान्माधवमहाधिराजः, तत्पुत्रः श्रीमत्कदम्बकुलगगनगभस्तिमालिनः कृष्णवर्ममहाधिराजस्य प्रियभागिनेयो विद्याविनयातिशयपरिपूरितान्तरात्मा निरवग्रहप्रधनशौर्यो विद्वत्सु प्रथमगण्यः श्रीमान्कोगणिमहाधिराजः अविनीतनामा, तत्पुत्रो विजृम्भमाणशक्तित्रयः अन्दरिहू-अलत्तुपू-पौरुळरे-पेलूनग-राज्यानेकसमरमुखमखहुतशूरपुरुषपशूपहारविघसविहस्तीकृतकृतान्ताग्निमुखः किरातार्जुनीयपञ्चदशसर्गादिकोंकारो दुर्विनीतनामधेयः, तस्य पुत्रो दुर्दान्तविमर्दविमृदितविश्वंभरादिपञ्चालिमालामकरन्दपुञ्जपिञ्जरीक्रियमाणचरणयुगलनलिनो मुष्करनामधेयः, तस्य पुत्रश्चतुर्दशविद्यास्थानाधिगतविमलमतिः विशेषतो नवकोशस्य नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलो रिपुतिमिरनिकरनिराकरणोदयभास्करः श्रीविक्रमप्रथितनामधेयः, तस्य पुत्रोऽनेकसमरसंपादितविजृम्भितद्विरदरदनकुलिशाघातव्रणसंरुद्धस्वास्थ्यद्विजय(?)लक्षणलक्षीकृतविशालवक्षःस्थलः समधिगतसकलशास्त्राधिगतत्त्वः समाराधितत्रिवर्गो निरवद्यचरितः प्रतिदिनमभिवर्धमानप्रभावो भूविक्रमनामधेयः । अपि च ।

नानाहेतिप्रहारप्रतिहतसुभटारामवाटोत्थितासृ-
ग्धारास्वादामृताशक्षुभितपरिसरद्भ्रसंरुद्धसीमे ।
सामन्तान्पल्लवेन्द्रान्नरपतिमजयद्यो बिलन्दाभिधाने
राजा श्रीवल्लभाख्यः समरशतजयावाप्तलक्ष्मीविलासः ॥

तस्यानुजो नतनरेन्द्रकिरीटकोटि-
रत्नार्कदीधितिविराजितपादपद्मः ।

---

१. 'सलील' इति मुद्रितः पाठः. २. 'क्रित' इति मुद्रितः पाठः. ३. 'प्रधान' इति मुद्रितः पाठः.

लक्ष्म्याः स्वयंवृतपतिर्नवकामनामा
शिष्टप्रियोऽरिगणदारणलब्धकीर्तिः ॥

तस्य कोगणिमहाराजस्य सीमेश्वरापरनामधेयस्य पौत्रः समवनतसमस्तसामन्तमुकुटतटघटितबहुलरत्नविलसदमरधनुःखण्डमण्डितचरणनखमण्डलो नारायणे निहितभक्तिः शूरपुरुषतुरगनरवारणघटासंघट्टदारुणसमरशिरसि निहितात्मकोपो भीमकोपः प्रकटरतिसमयसमनुवर्तनचतुरयुवतिजनलोकधूर्तो लोकधूर्तः सुदुर्धरानेकयुद्धमूर्धन्यलब्धविजयसंपदहितगजघटाकेसरी राजकेसरी । अपि च ।

यो गङ्गान्वयनिर्मलाम्बरतलव्याभासनप्रोल्लस-
न्मार्तण्डोऽरिभयंकरः शुभकरः सन्मार्गरक्षाकरः ।
सौराज्यं समुपेत्य राज्यसविता राजन्यतारोत्तमो
राजा श्रीपुरुषेश्वरो विजयते राजन्यचूडामणिः ॥

कामं रामः स चापे दशरथतनयो विक्रमे जामदग्न्यः
प्राज्ये वीर्ये बलारिर्बहुमहसि रविः स्वप्रभुत्वे धनेशः ।
भूयो विख्यातशक्तिः स्फुटतरमखिलप्राणभाजां विधाता
धात्रा सृष्टः प्रजानां पतिरिति कवयो यं प्रशंसन्ति नित्यम् ॥

तेन प्रतिदिनप्रवृत्तमहादानजनितपुण्याहघोषमुखरितमन्दिरोदरेण श्रीपुरुषप्रथमनामधेयेन पृथ्वीकोङ्गणिमहाराजेन अष्टानवत्युत्तरषट्छतेषु(६९८) शकवर्षेष्वावर्तितेष्वात्मनः प्रवर्धमानविजयवीर्यसंवत्सरे पञ्चाशत्तमे प्रवर्धमाने मान्यपुरमधिवसति विजयस्कन्दावारे श्रीमूलमूलशरणाभिनन्दितनन्दिसंघान्वय-एरेगित्तुर्नाम्नि गणे मूलिकल्गच्छे स्वच्छतरगुणकिर(?)-प्रततिप्रह्लादितसकललोकश्चन्द्र इवापरश्चन्द्रनन्दिनामगुरुरासीत् । तस्य शिष्यः समस्तविबुधलोकपरिरक्षणक्षमात्मशक्तिः परमेश्वरलालनीयमहिमा कुमारवद्द्वितीयः कुमारनन्दिनामा मुनिपतिरभवत् । तस्यान्तेवासी समधिगतसकलतत्त्वार्थसमर्पितबुधसार्थसंपत्संपादितकीर्तिः कीर्तिनन्द्याचार्यो नाम महामुनिः समजनि । तस्य प्रियशिष्यः शिष्यजनकमलाकर-

प्रबोधजनकः मिथ्याज्ञानसंततसनुतससन्मानात्तक(?)सद्धर्मव्योमावभासनभास्करो विमलचन्द्राचार्यः समुदपादि । तस्य महर्षेर्धर्मोपदेशनया श्रीमद्बाणकलकलः (?) सर्वतपोमहानदीप्रवाहः बाहादण्डमण्डलाखण्डितारिमण्डलद्रुमषण्डो डुण्डुप्रथमनामधेयो निर्गुण्डयुवराजो जज्ञे । तस्य प्रियात्मज आत्मजनितनयविशेषनिःशेषीकृतरिपुलोकः लोकहितः मधुरमनोहरचरितः चरितार्थत्रिकरणप्रवृत्तिः परमगूळप्रथम[नाम]धेयः श्रीपृथ्वीनिर्गुण्डराजोऽजायत । पल्लवाधिराजप्रियात्मजायां सगरकुलतिलकान्मरुवर्मणो जाता कुण्डव्वीनामधेया भर्तृभावनाविर्बभूव भार्या । तया सततप्रवर्तितधर्मकार्यया निर्मिताय श्रीपुरोत्तरदिशमलंकुर्वते लोकतिलकधाम्ने जिनभवनाय खण्डस्फुटितनवसंस्कारदेवपूजादानधर्मप्रवर्तनार्थं तस्यैव पृथ्वीनिर्गुण्डराजस्य विज्ञापनया महाराजाधिराजपरमेश्वरश्रीजसहितदेवेन निर्गुण्डविषयान्तःपातिपोन्नल्लिनामा ग्रामः सर्वपरिहारोपेतो दत्तः । तस्य सीमान्तराणि—पूर्वस्यां दिशि नोलिबेळदा बेल्गल्मोरडि । पूर्वदक्षिणस्यां दिशि पण्यङ्गेरि । दक्षिणस्यां दिशि बेल्गल्लिगेरेया दिळगेरेया पल्लदाकूदल् । दक्षिणपश्चिमायां दिशि जैदराकेय्या बेल्गल्मोरडु । पश्चिमायां दिशि हेङ्केवी ताळ्तुवायराकेरि । पश्चिमोत्तरस्यां दिशि पुणुसेयागोट्टगालाकलकुप्पे । उत्तरस्यां दिशि सामगेरेया पल्लदा पेर्मुरिक्के । उत्तरपूर्वस्यां दिशि कलम्बेट्टिगट्टु । ईशान्यामन्यानि क्षेत्रान्तराणि दत्तानि डुण्डुसमुद्रदावयलुल्किरुदारामेगेपदिरकण्डुगम्मणमपालेया इरनल्लराजापोळुदिर्क्कण्डुगं श्रीवरदाडुण्डुगामण्डराताण्डडाडुवयाण्डुताण्डुश्रीवरदावयलुल्कम्मरगट्टिनल्लिइर्कण्डुगं कळनि पेर्गेरेया केलगे आरुगण्डुगं एरेपूळिगेरेया कोयिल्गोदाएदा इरपत्तुगुण्डुगं बेदे अदुवश्रीवरदा बडगणापट्टवणाकोनुळन् देवं गेरीमदमं ऐदिदं मूवत्ताडिण्डुमनेयमनेताणम् । अस्य दान[स्य] साक्षिणोऽष्टादशप्रकृतयः । अस्य दानस्य साक्षिणः षण्णवतिसहस्रविषयप्रकृतयः । योऽस्यापहर्ता लोभान्मोहात्प्रमादेन वा स पञ्च-

भिर्महद्भिः पातकैः संयुक्तो भवति । यो रक्षति स पुण्यभाग्भवति । अपि चात्र मनुगीताः श्लोकाः—

'स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिर्वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
स्वं दातुं सुमहच्छक्यं दुःखमन्यस्य पालनम् ।
दानं वा पालनं वेति दानाच्छ्रेयोऽनुपालनम् ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
देवस्वं तु विषं घोरं न विषं विषमुच्यते ।
विषमेकाकिनं हन्ति देवस्वं पुत्रपौत्रकम् ॥'

सर्वकलाधारभूतचित्रकलाभिज्ञेन विश्वकर्माचार्येणेदं शासनं लिखितम् । चतुष्कण्डुकव्रीहिबीजमात्रं द्विकण्डुककङ्गुक्षेत्रं तदपि ब्रह्मदेयमिव रक्षणीयम् ॥

(इण्डियन् आण्टिक्वेरी २।१५६–१५९)

---

(१४)

यादववंशोद्भवस्य वीरबल्लालदेवमहीपतेर्दानपत्रम् ।

स्वस्ति ॥

त्रैलोक्यं पाल्यते येन सदयं सत्त्ववृत्तिना ।
स देवो यदुशार्दूलः श्रीपतिः श्रेयसेऽस्तु वः ॥
देवः समस्तसामन्तमस्तकन्यस्तशासनः ।
आचन्द्रार्कं नृपः पायाद्भुवमम्भोधिमेखलाम् ॥

आसीत्क्षितौ क्षत्रियपुंगवानां शिरोमणिः श्रीयदुनामधेयः ।
यदन्ववाये स हरिर्धरित्रीभारावतारार्थमजोऽपि जातः ॥
तदन्ववाये बहवो बभूवुर्भुजोद्भवा विश्रुतकीर्तिभाजः ।
अद्यापि लोके चरिताद्भुतानि येषां पुराणेषु पठन्ति सन्तः ॥

कालक्रमेणाथ बभूव कश्चिन्महीपतिस्तत्र सलाभिधानः ।
कुलस्य कृत्वा व्यपदेशमन्यं विस्मारितो येन यदुस्तदाद्यः ॥
केनापि व्रतिपतिना स्वदेवकार्ये शार्दूलं ग्रसितुमुपागतं निहन्तुम् ।
आदिष्टः शशकपुरे स होयूसलेति प्रापत्तं किल विनिहत्य होयूसलाख्याम् ॥
ततः प्रभृति तद्वंशे प्रवृत्तं होयूसलाख्यया ।
शार्दूलश्च ध्वजस्यासीदङ्कः शत्रुभयंकरः ॥
अपरेषु च तद्राज्यं भुक्तवत्स्वथ राजसु ।
विनयादित्य इत्यासीत्क्रमशः पृथिवीपतिः ॥
इरेयङ्गाभिधानोऽभून्नृपतिस्तस्य चात्मजः ।
गुणैरनन्यसामान्यैः प्रख्यातः पृथिवीतले ॥
अथ तस्यापि बल्लाल-विष्णुवर्धननामकौ ।
अभूतामात्मजन्मानावुदयादित्यपश्चिमौ ॥
तेजस्विनौ भूतहितप्रवृत्तौ लोकपूजितौ ।
यावभासयतां विश्वं सूर्याचन्द्रमसाविव ॥
रणशिरसि येन बलिना गजपतिमाक्रम्य निजतुरङ्गेण ।
विनिपात्य जगद्देवं सप्ताङ्गं तस्य चापहृतम् ॥
तत्राग्रजे निजं राज्यमुपभुक्तवति क्रमात् ।
अनुजोऽपि चिरं राज्यं बुभुजे विष्णुवर्धनः ॥
यो देशमग्रहारीकृत्य समस्तं निजं स्वराज्यार्थम् ।
आचक्रामोच्चङ्गीप्रभृतीनन्यान्द्विषद्देशान् ॥
आरभ्य निजनिवासाद्बेल्वोलूपर्यन्तमखिलमहिविषयम् ।
आक्रम्य येन धौतं तुरगवपुः कृष्णवेणायाम्[1] ॥
यः स्मार्यते नियुक्तैः प्रत्युपचारं नृपेष्वसाध्यतया ।
परमर्दिदेवनृपतेर्होयूसलमवधारयेति मुहुः ॥
येनाग्रहाराः क्रतवो महादानानि षोडश ।
अन्यान्यपि च पुण्यानि पौनःपुन्येन चक्रिरे ॥

---

१. 'कृष्णवेण्णीयाम्' इति मुद्रितः पाठः.

नरसिंह इति ख्यातो जातस्तस्यात्मजो नृपः।
यस्य वर्णयितुं नैव शक्यन्ते मादृशैर्गुणाः॥
तस्य श्रीरिव दैत्यारेः शंकरस्येव पार्वती।
आसीदेचलदेवीति महादेवी कुलोद्गता॥
तेनापि तस्यामतुलप्रभावो वज्रेश्वराराधनलब्धराज्यः।
जातः सुतो दोर्बलचक्रवर्ती श्रीवीरबल्लाल इति प्रसिद्धः॥
माध्यस्थ्येनोन्नत्या काञ्चनविभवेन विबुधसेव्यतया।
यो जङ्गम इव मेरुर्महीभृतामग्रणीर्जगति॥
सीमातिक्रमभीरोरतिगम्भीरस्य विपुलसत्त्वस्य।
रत्नाकरस्य यस्य च न कोऽपि लक्ष्मीवतो[1] भेदः॥
चरितं भरतादीनामपि भुवने तावदेव बोध्यमिह।
लोकोत्तरा न यावद्दृश्यन्ते यस्य साधुगुणाः॥
विष्णौ निसर्गसिद्धां भक्तिं यस्याद्य पश्यतां पुंसाम्।
[2]प्रह्लादादिकथा अपि न विस्मयाय प्रकल्पन्ते॥
तन्न तपस्तन्नेष्टं तन्न हुतं तन्न दानमस्तीह।
असकृन्न येन विहितं देशे काले च पात्रे च॥
स्त्रीष्वर्भकेषु शूद्रेष्वन्येष्वपि येषुकेषुचिज्जगति।
सोऽस्ति न जनो विधत्ते यः पापं यत्र शासितरि॥
षट्तर्ककाव्यनाटकवात्स्यायनभरतराजनीतिषु च।
अन्येषु तेषु तेषु च शास्त्रेष्वखिलेषु यः कुशलः॥
सर्वेषु दर्शनेषु च भुवि तार्किकचक्रवर्तिनो यस्य।
नैवास्ति प्रतिवादी वादिमदद्विरदकेसरिणः॥
सर्वायुधाजीवपुरःसरेण समस्तविद्वज्जनवल्लभेन।
शस्त्राणि शास्त्राणि च येन लोके सनाथतामद्य चिराद्गतानि॥
यन्नामधेयमपि विश्वविलासिनीनां
लोके वशीकरणकर्मणि सिद्धमन्त्रः।

---

१. 'लक्ष्मीवतोर्' इति मुद्रितः पाठः. २. 'प्रहारादि' इति मुद्रितः पाठः.

तस्य प्रगल्भवनिताकुसुमायुधस्य
सौभाग्यवर्णनविधौ कतमः समर्थः ॥

वि[1]ष्वग्वाजिखुरप्रहारदलितक्षोणीतलप्रोच्चल-
द्धूलीध्वान्तनिमीलिताखिलदिशि द्वन्द्वप्रदोषागमे ।
दूतीवातिप[2]टीयसी मुहुरिह स्वःसुन्दरीभिः समं
वीराणामभिसारणं वितनुते यत्खड्गयष्टिर्द्विषाम् ॥

शश्वद्यत्समरावतारपिशुनेष्वाहन्यमानेष्वित-
स्तूर्येषु स्वपतिप्रणाशचकिताः क्षुभ्यन्त्यरातिस्त्रियः ।
अप्येताः सुभटस्वयंवरकृते मन्दारमालामितो
हस्ताभ्यां परिगृह्य नाकवनिताः सज्जीभवन्त्यम्बरे ॥

यस्मिन्होय्सलभूमिपालधरणीसाम्राज्यसिंहासना-
दारूढे सति मत्तवारणपतेर्यु[3]द्धाय पूर्वासनम् ।
सद्यः स्वस्वकुलक्रमागतमहीसाम्राज्यसिंहासना-
त्प्रत्यर्थिक्षितिपालकैरपि रणे वल्मीकमारुह्यते ॥

यस्मिन्दिग्विजयार्थमुद्यतवति प्रस्थानभेरीरवे
गम्भीरे स्फुटमुच्चरत्यवनिभृत्स्वन्येषु वार्तैव का ।
दूरादङ्गकलिङ्गवङ्गमगधाश्चोलास्तथा मालवाः
पाण्ड्याः केरलगुर्जरप्रभृतयोऽप्युज्झन्ति सद्यो धृतिम् ॥

न्यक्कारेण पितुः श्रियं कलचुरिक्षत्रान्वयात्कर्षता
येनैकेन पि(हि) तूवरेण करिणा षष्टिर्जिता दन्तिनाम् ।
तं च ब्रह्मचमूपतिं गजघटावष्टब्धसैन्यं हठा-
द्येनाश्वैरपि केवलैर्भुजभृता निर्जित्य राज्यं हृतम् ॥

उच्छिद्य जैत्रसिंहं दक्षिणमिव तस्य भिल्लमस्य भुजम् ।
वीरेण येन लब्धं कुन्तलदेशाधिपत्यमपि ॥

---

१. 'विष्वद्वाजि' इति मुद्रितः पाठः. २. 'पदीयसी' इति मुद्रितः पाठः. ३. 'युद्धास्य' इति मुद्रितः पाठः.

स च समस्तभुवनाश्रयश्रीपृथ्वीवल्लभमहाराजाधिराजपरमेश्वरपरमभट्टारकद्वारावतीपुरवराधीश्वरयादवकुलाम्बरद्युमणिसम्यक्त्वचूडामणिमलपरालूगण्डकदनप्रचण्ड(?)-असहायशूर-एकाङ्गवीर-शनिवारसिद्धि-गिरिदुर्गमल्ल-चलदङ्कराम-इत्यादिसमस्तप्रशस्तनामावलीविराजमानः[1] श्रीमत्प्रतापचक्रवर्तिश्रीवीरबल्लालदेवो लोक्किगुण्डिनिवेशितविजयस्कन्धावारः

अस्ति स्वयंभूः क्रतुकाभिधाने ग्रामे त्रिकूटेश्वरनामधेयः ।
शिवः समस्तक्षितिपालमौलिमणिप्रभारञ्जितरम्यपीठः ॥

तस्य स्थानाचार्यः कालमुखाचार्यसंततिप्रभवः ।
सिद्धान्तिचन्द्रभूषणपण्डितदेवाभिधोऽस्ति मुनिः ॥

तं त्रिकूटेश्वरं देवं लिङ्गैः स्वैः स्थावरैस्त्रिभिः ।
जङ्गमेन समं[2] येन चतुःकूटेश्वरं विदुः ॥

सततशरीरार्धस्थितगौरीभृशसंगमाद्धधूध्वप्य(?) ।
शिव इव विराजमानो[3] यो भाति ब्रह्मचर्यस्तु(?) ॥

यश्च

कुलशैलेषु चलत्स्वपि मर्यादामतिपतत्सु सिन्धुषु च ।
सत्यं न सत्यवाक्यद्वितीयनामापदि[4] त्यजति ॥

अन्यत्र काव्यनाटकवात्स्यायनभरतराजनीत्यादौ ।
नैव कथा सिद्धान्तेष्वखिलेष्वपि यस्य नास्ति समः ॥

येन च

आदृश्येत कदाचिद्विश्रामो गतिषु [जल]तरङ्गाणाम् ।
न त्वेव कृपाभाजा प्रदीयमानेऽश्नतां सत्रे ॥

अन्नेनैव न केवलमपि तु सुवर्णौषधाम्बुवस्त्राद्यैः ।
अन्तो नास्ति जनानां निरन्तरं तृप्यमाणानाम्[5] ॥

---

१. 'विराजमानर्' इति मुद्रितः पाठः. २. 'तमन्येन' इति मुद्रितः पाठः. ३. 'विरज्यमानो' इति मुद्रितः पाठः. ४. 'नामापति' इति मुद्रितः पाठः. ५. 'तप्यमानानाम्' इति मुद्रितः पाठः.

येन चात्र स्थाने

उद्धृत्य जीर्णमखिलं निर्माय च नूतनं[1] पुरं रम्यम् ।
देवान्तिकमानीता वेश्यावीथी स्थिता परतः ॥
अमृतोपमपानीयपूर्णा पुष्करिणी कृता ।
वनं च नन्दनसमं[2] नानपुष्पलतावृतम् ॥
किं जल्पनेन[3] बहुना ग्रामप्राकारवलयबाह्यमिह ।
यद्यत्समस्ति[4] तत्तत्समस्तमपि तस्य निर्माणम् ॥

तस्य भगवतश्चराचरगुरोः श्रीस्वयंभूत्रिकूटेश्वरदेवस्याङ्गरङ्गभोगखण्डस्फुटितजीर्णोद्धाराद्यर्थं विद्यादानार्थं तपोधनब्राह्मणादिभोजनार्थं बेल्वोलत्रिशतान्तर्गतहोम्बालल्लुनामधेयग्रामं पूर्वप्रसिद्धसीमासमन्वितं निधिनिक्षेपजलपाषाणारामादिसहितं त्रिभोग्याभ्यन्तरमष्टभोगतेजःस्वाम्ययुक्तं शुल्कदण्डादिसकलद्रव्योपार्जनोपेतं शकनृपकालातीतसंवत्सरशतेषु चतुर्दशाधिकेष्वेकादशसु अङ्कतोऽपि १११४ वर्तमानपरिभाविसंवत्सरान्तर्गतमार्गशीर्षपौर्णमास्यां शनैश्चरवारे[5] सोमग्रहणे तस्य कालमुखाचार्यसोमेश्वरदेवप्रशिष्यस्य विद्याचरणदेवशिष्यस्य सत्यवाक्यापरनामधेयस्य श्रीमदाचार्यसिद्धान्तिचन्द्रभूषणपण्डितदेवस्य पादप्रक्षालनं कृत्वा राजा[6] राजकीयैरप्यनङ्गुलिप्रेक्षणीयं सर्वनमस्यं कृत्वा धारापूर्वकं भक्त्या दत्तवान् । अस्य च धर्मस्य संरक्षणे फलमिदमुदाहरन्ति स्म तपोमहिमसाक्षात्कृतधर्मस्थितयो मन्वादयो महर्षयः—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
गण्यन्ते पांसवो भूमेर्गण्यन्ते वृष्टिबिन्दवः ।
न गण्यते विधात्रापि धर्मसंरक्षणे फलम् ॥

अपहरतः समर्थस्याप्युदासीनस्य तैरेव च परीतं(?) फलमुदाहृतम् ।

---

१. 'नूतनपुरं' इति मुद्रितः पाठः. २. 'नन्दनसाम्यं' इति मुद्रितः पाठः. ३. 'जल्पेन' इति मुद्रितः पाठः. ४. 'समस्तं' इति मुद्रितः पाठः. ५. 'शनेश्चर' इति मुद्रितः पाठः. ६. 'राज्ञा' इति मुद्रितः पाठः.

'स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
परदत्तां तु यो भूमिमुपहिंसेत्कदाचन ।
स बंद्धो[1] वारुणैः पाशैः क्षिप्यते पूयशोणिते ॥
कुलानि तारयेत्कर्ता सप्त सप्त च सप्त च ।
अंधोऽधः[2] पातयेद्धर्ता सप्त सप्त च सप्त च ॥
अपि गङ्गादितीर्थेषु हन्तुर्गामथवा द्विजम् ।
निष्कृतिः स्यान्न देवस्वब्रह्मस्वहरणे नृणाम् ॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरशायिनः ।
कृष्णसर्पा हि जायन्ते देवद्रव्यापहारकाः ॥
कर्मणा मनसा वाचा यः समर्थोऽप्युपेक्षते ।
स स्यात्तदैव चण्डालः सर्वधर्मबहिष्कृतः ॥'

अंत[3] एवाह रामचन्द्रः—

'सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः ॥
मद्वंशजाः परमहीपतिवंशजा वा
पापादपेतमनसो भुवि भाविभूपाः ।
ये पालयन्ति मम धर्ममिमं समग्रं
तेषां मया विरचितोऽञ्जलिरेष मूर्ध्नि ॥'

बल्लालदेवनृपतेरादेशादग्निशर्मणा रचिता ।
शासनपद्धतिरेषा सारस्वतसार्वभौमेन ॥

(इण्डियन् आण्टिक्वेरी २ । २९६–३०२)

---

१. 'लब्धो' इति मुद्रितः पाठः. २. 'अहोऽधः' इति मुद्रितः पाठः. ३. 'अथ एवह' इति मुद्रितः पाठः.

(१५)

गुप्तवंशोद्भवस्य श्रीमहाभवगुप्तदेवस्य दानपत्रम् ।

स्वस्ति श्रीमहाराजसमावासिनः श्रीमतो विजयकटकात् परमभट्टारकमहाराजाधिराजपरमेश्वरश्री**शिवगुप्तदेव**पादानुध्यातपरममाहेश्वरपरमभट्टारकमहाराजाधिराजपरमेश्वरसोमकुलतिलकत्रिकलिङ्गाधिपतिमहाराजाधिराजश्री**महाभवगुप्तदेवः** कुशली कोशलदेशे योधाविषयी(ये) दारण्डाग्रामे तथा खलाण्डलग्रामे ब्राह्मणान्संपूज्य तद्विषयीयान् यथाकालाध्यासिनः समाहूत(य) सन्निवीतनियुक्तकाधिकारिकदण्डप्रा(पा)शिकनाटभट्टपिशुनविधिकाररोधजनराणकराजवल्लभादीन् सर्वान् समाज्ञापयति—विदितमस्तु भवतां यथास्माभिरयं ग्रामः सनिधिः सोपनिधिः शातशोऽपराधः सर्वबाधाविवर्जितः सर्वोपरिकर्तृत्वदानसहितश्चतुःसीमाद्यायत्तः सामत्रकः सगर्तोषरजलस्थलसहितः प्रतिनिषिद्धनाटभट्ट(ट)प्रवेशाष्टङ्कारीविनिर्गताय कोशले उर्वरावास्तव्याय भारद्वाजगोत्राय बार्हस्पत्याङ्गिरसप्रवराय वाजसनेयशाखाध्यायिने भट्टश्रीमहत्तमसाधारणाय भट्टश्रीशोभनसुताय सलिलधारापुरःसरमाचन्द्रतारकार्कज्योतिःसमकालोपभोगार्थं मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये ताम्रशासनेनाकरीकृत्य प्रतिपादितमित्यवगत्य संवरितभोगभागकरहिरण्यादिप्रत्ययमुपनयद्भिर्भवद्भिः सुखेन प्रतिवस्तव्यमिति । भाविभिश्च भूपतिभिर्दत्तिरियमस्मदीया धर्मगौरवादस्मदनुरोधात्स्वदत्तिरिवात्र पालनीया ।

तथा चोक्तं धर्मशास्त्रे—

'बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
मा भूदफलशङ्का वः परदत्तेति पार्थिवाः ।
स्वदत्तात्फलमानन्त्यं परदत्तानुपालने ॥
षष्टिवर्षसहस्राणि स्वर्गे मोदति भूमिदः ।
क्षितिपात्रान्नहर्तारद्वितयं(?) नरकं व्रजेत् ॥

अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
यः काञ्चनं गां च महीं प्रदद्याद्दत्तास्त्रयस्तेन भवन्ति लोके ॥
आस्फोटयन्ति पितरः प्रवल्गन्ति पितामहाः ।
भूमिदाता कुले जातः स नस्त्राता भविष्यति ॥
भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ ॥
तडागानां सहस्राणि वाजपेयशतानि च ।
गवां कोटिप्रदानेन भूमिहर्ता न शुध्यति ॥
हरेत हारयेद्यस्तु मन्दबुद्धिस्तु मोहतः ।
सवंशो(संबद्धो) वारुणैः पाशैस्तिर्यग्योनिं स गच्छति ॥
सुवर्णमेकं गामेकां भूमिमप्यर्धमङ्गुलाम् ।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते ॥
आदित्यो वरुणो विष्णुर्ब्रह्मा सोमो हुताशनः ।
शूलपाणिश्च भगवानभिनन्दति भूमिदम् ॥
सामान्योऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः ।
सर्वानेवं भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ॥
इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
सकलमिदमुदाहृतं च बुद्ध्वा नहि पुरुषैः परकीर्तयो विलोप्याः ॥

सकलभूपालमौलिमालाविलग्नमाणिक्यमयूखपादाभिरञ्जिताङ्घ्रितं लब्धवर्णैः प्रचण्डदोर्दण्डमण्डलाग्रखण्डितारातिमत्तमातङ्गविमुक्तमुक्ताफलप्रसाधिताशेषबलं महीमण्डलम्—

यः साधारणनाम्नि मन्त्रितिलके विन्यस्य सर्वागमं
चौर्योदन्वति(शौर्योदन्वति) तीव्रतेजसि धुरं राष्ट्रस्य विप्रोत्तमे ।
नानाख्यानकवीश्वरामृतरसास्वादादमर्त्यस्फुर-
त्संतोषात्सुखमन्वभूदविरतं पृथ्वीशचूडामणिः ॥

ज्ञाताशेषार्थशास्त्रस्मृतिविमलधिया वेदवेदाङ्गविद्या-
शिक्षाकल्पेतिहासप्रकटसुरसवाक्प्राप्तभूयिष्ठधाम्ना ।
नाम्ना साधारणेन द्विजवरविधिना मन्त्रिणा यस्य राज्ये
निष्ठागम्भीरमूर्तिस्त्रिजगति विदितो धर्मकंदर्पदेवः ॥

परममाहेश्वरपरमभट्टारकमहाराजाधिराजपरमेश्वरसोमकुलतिलकत्रिक-लिङ्गाधिपतिश्रीमहाभवगुप्तदेवपादपद्मप्रवर्धमानविजयराज्ये एकत्रिंशत्तमे संवत्सरे मार्गसुदितिथौ त्रयोदश्यां यत्राङ्केनापि ३४ (३१) मार्गसुदि ३ (१३) लिखितमिदं त्रिफलीताम्रशासनं महासांधिविग्रही राणकश्रीम-ल्लदत्तप्रतिबद्धकायस्थश्रीमाहूकेन इयद्वर्णाङ्कितं स्वेनेति ।

प्रणीतं कोशलेन्द्रेण प्रतिबोध्य महत्तम[म्] ।
श्रीदत्तपुण्डरीकाक्षः शासनं ताम्रनिर्ण्णि(र्मि)तम् ॥
तन्निर्मितं माधवेन वा सृष्टं तेनेति ॥

(इण्डियन् आण्टिक्वेरी ५ । ५५-५७)

---

(१६)

चालुक्यवंशोद्भूतस्य श्रीपुलकेशिनः शिलालेखः ।

जयति भगवाञ्जिनेन्द्रो····ज····रक्षणजन्मनो यस्य ।
ज्ञानसमुद्रान्तर्गतमखिलं जगदन्तरीपमिव ॥
तदनु चिरमपरिचेयश्चलुक्यकुलविपुलजलनिधिर्जयति ।
पृथिवीमौलिललामो यः प्रभवः पुरुषरत्नानाम् ॥
शूरे विदुषि च विभजन्दानं मानं च युगपदेकत्र ।
अविहितयाथातथ्यो जयति च सत्याश्रयः सुचिरम् ॥
पृथिवीवल्लभशब्दो येषामन्वर्थतां चिरं जातः ।
तद्वंशे(श्ये)षु जिगीषुषु तेषु बहुष्वप्यतीतेषु ॥
नानाहेतिशताभिघातपतितभ्रान्ताश्वपत्तिद्विपे
नृत्यद्भीमकबन्धखड्गकिरणज्वालासहस्रे रणे ।

लक्ष्मीर्भावितचापलादिव कृता शौर्येण येनात्मसा-
　द्राजासीज्जयसिंहवल्लभ इति ख्यातश्चलुक्यान्वयः ॥
तदात्मजोऽभूद्रणरागनामा दिव्यानुभावो जगदेकनाथः ।
अमानुषत्वं किल यस्य लोकः सुप्तस्य जानाति वपुःप्रकर्षात् ॥
　तस्याभवत्तनूजः **पुलकेशी** यः श्रितेन्दुकान्तिरपि ।
　श्रीवल्लभोऽप्ययासीद्वातापिपुरीवधूवरताम् ॥
यत्त्रिवर्गपदवीमलं क्षितौ नानुगन्तुमधुनापि राजकम् ।
भूश्च येन हयमेधयाजिना प्रापितावभृथमज्जना बभौ ॥
नलमौर्यकदम्बकालरात्रिस्तनयस्तस्य बभूव **कीर्तिवर्मा** ।
परदारनिवृत्तचित्तवृत्तेरपि धीर्यस्य रिपुश्रियानुकृष्टा ॥
रणपराक्रमलब्धजयश्रिया सपदि येन विरुग्णमशेषतः ।
नृपतिगन्धगजेन महौजसा पृथुकदम्बकदम्बकदम्बकम्[1] ॥
　　तस्मिन्सुरेश्वरविभूतिगताभिलाषे
　　　राजाभवत्तदनुजः किल **मङ्गलीशः** ।
　　यः पूर्वपश्चिमसमुद्रतटोषिताश्वः
　　　सेनारजःपटविनिर्मितदिग्वितानः ॥
स्फुरन्मयूखैरसिदीपिकाशतैर्व्युदस्य मातङ्गतमिस्रसंचयम् ।
अवाप्तवान्यो रणरङ्गमन्दिरे कलच्चुरिश्रीललनापरिग्रहम् ॥
　　पुनरपि च जिघृक्षोः सैन्यमाक्रान्तसालं
　　　रुचिरबहुपताकं रेवतीद्वीपमाशु ।
　　सपदि महदुदन्वत्तोयसंक्रान्तबिम्बं
　　　वरुणबलमिवाभूदागतं यस्य वाचा ॥
　　तस्याग्रजस्य तनये नहुषानुभावे
　　　लक्ष्म्या किलाभिलषिते **पुलकेशि**नाम्नि ।
　　सासूयमात्मनि भवन्तमतः पितृव्यं
　　　ज्ञात्वापरुद्धचरितव्यवसायबुद्धौ ॥

---

१. कदम्बाः केचन क्षत्रियास्त एव कदम्बा वृक्षविशेषास्तेषां कदम्बकं समूहम्.

स यदुपचितमन्त्रोत्साहशक्तिप्रयोग-
क्षपितबलविशेषो मङ्गलीशः समन्तात् ।
स्वतनयगतराज्यारम्भयत्नेन सार्धं
निजमतनु च राज्यं जीवितं चोज्झति स्म ॥

तावत्तच्छत्रभङ्गे जगदखिलमरात्यन्धकारोपरुद्धं
यस्यासह्यप्रतापद्युतिततिभिरिवाक्रान्तमासीत्प्रभातम् ।
नृत्यद्विद्युत्पताकैः प्रजविनि मरुति क्षुण्णपर्यन्तभागै-
र्गर्जद्भिर्वारिवाहैरलिकुलमलिनं व्योम या(जा)तं कदा वा ॥

लब्ध्वा कालं भुवमुपगते जेतुमाप्यायिकाख्ये
गोविन्दे च द्विरदनिकरैरुत्तराम्भोधिरथ्याः ।
यस्यानीकैर्युधि भयरसज्ञत्वमेकः प्रयात-
स्तत्रावाप्तं फलमुपकृतस्यापरेणापि सद्यः ॥

वरदातुङ्गतरङ्गरङ्गविलसद्धंसानदीमेखलां
वनवासीमवमृद्नतः सुरपुरप्रस्पर्धिनीं संपदा ।
महता यस्य बलार्णवेन परितः संछादितोर्वीतलं
स्थलदुर्गं जलदुर्गतामिव गतं तत्तत्क्षणे पश्यताम् ॥

गङ्गाम्बु पीत्वा व्यसनानि सप्त हित्वा पुरोपार्जितसंपदोऽपि ।
यस्यानुभावोपनताः सदासन्नासन्नसेवामृतपानशौण्डाः ॥

कोङ्कणेषु यदादिष्टचण्डदण्डाम्बुवीचिभिः ।
उदस्तास्तरसा मौर्यपल्वलाम्बुसमृद्धयः ॥

अपरजलधेर्लक्ष्मीं यस्मिन्पुरीं पुरभित्प्रभे
मदगजघटाकारैर्नावां शतैरवमृद्नति ।
जलदपटलानीकाकीर्णं नवोत्पलमेचकं
जलनिधिरिव व्योम व्योम्नः समोऽभवदम्बुधिः ॥

प्रतापोपनता यस्य लाटमालवगूर्जराः ।
दण्डोपनतसामन्तचर्या वर्या इवाभवन् ॥

अपरिमितविभूतिस्फीतसामन्तसेना-
मुकुटमणिमयूखाक्रान्तपादारविन्दः।
युधि पतितगजेन्द्रानीकबीभत्सभूतो
भयविगलितहर्षो येन चाकारि हर्षः॥
भुवमुरुभिरनीकैः शासतो यस्य रेवा
विविधपुलिनशोभावन्ध्यविन्ध्योपकण्ठा।
अधिकतरमराजत्स्वेन तेजोमहिम्ना
शिखरिभिरिभवर्ज्या वर्ष्मणां स्पर्धयेव॥
विधिवदुपचिताभिः शक्तिभिः शक्रकल्प-
स्तिसृभिरपि गुणौघैः स्वैश्च माहाकुलाद्यैः।
अनमदधिपतित्वं यो महाराष्ट्रकाणां
नवनवतिसहस्रग्रामभाजां त्रयाणाम्॥
गृहिणां स्वगुणैस्त्रिवर्गतुङ्गा विहितान्यक्षितिपालमानभङ्गाः।
अभवन्नुपजातभीतिलिङ्गा यदनीकेन सकोसलाः कलिङ्गाः॥
पिष्टं पिष्टपुरं येन जातं दुर्गमदुर्गमम्।
चित्रं यस्य कलेर्वृत्तं जातं दुर्गमदुर्गमम्॥
संनद्धवारणघटास्थगितान्तरालं
नानायुधक्षतनरक्षतजाङ्गरागम्।
आसीज्जलं यदवमर्दितमभ्रगर्भा-
कौणालमम्बरमिवोर्जितसांध्यरागम्॥
उद्धूतामलचामरध्वजशतच्छत्रान्धकारैर्बलैः
शौर्योत्साहरसोद्धतारिमथनैर्मौलादिभिः षड्विधैः।
आक्रान्तात्मबलोन्नतिं बलरजःसंछन्नकाञ्चीपुरः
प्राकारान्तरितप्रतापमकरोद्यः पल्लवानां पतिम्॥
कावेरी द्रुतशफरीविलोलनेत्रा चोलानां सपदि जयोद्यतस्य यस्य।
प्रश्च्योतन्मदगजसेतुरुद्धनीरा संस्पर्शं परिहरति स्म रत्नराशेः॥

चोलकेरलपाण्ड्यानां योऽभूत्तत्र महर्द्धये ।
पल्लवानीकनीहारतुहिनेतरदीधितिः ॥
उत्साहप्रभुमन्त्रशक्तिसहिते यस्मिन्समन्ताद्दिशो
जित्वा भूमिपतीन्विसृज्य महितानाराध्य देवद्विजान् ।
वातापीं नगरीं प्रविश्य नगरीमेकामिवोर्वीमिमां
चञ्चन्नीरधिनीरनीलपरिखां सत्याश्रये[1] शासति ॥
त्रिंशत्सु त्रिसहस्रेषु भारतादाहवादितः ।
सहाब्दशतयुक्तेषु श(ग)तेष्वब्देषु पञ्चसु (३७३५) ॥
पञ्चाशत्सु कलौ काले षट्सु पञ्चशतासु च (५५६) ।
समासु समतीतासु शकानामपि भूभुजाम् ॥
तस्याम्बुधित्रयनिवारितशासनस्य
सत्याश्रयस्य परमाप्तवता प्रसादम् ।
शैलं जिनेन्द्रभवनं भवनं महिम्नां
निर्मापितं मतिमता रविकीर्तिनेदम् ॥
प्रशस्तेर्वसतेश्चास्या जिनस्य त्रिजगद्गुरोः ।
कर्ता कारयिता चापि रविकीर्तिः कृती स्वयम् ।
येनायोजि नवेऽश्मस्थिरमर्थविधौ विवेकिना जिनवेश्म ।
स विजयतां रविकीर्तिः कविताश्रितकालिदासभारविकीर्तिः ॥

(इण्डिअन् आण्टिक्वेरी ५ । ६७–७१)

---

(१७)

वलभीप्रभोर्महाराजध्रुवसेनस्य दानपत्रम् ।

स्वस्ति वलभीतः प्रसभप्रणतामित्राणां मैत्रकाणामतुलबलसंपन्नमण्डलाभोगसंसक्तसंप्रहारशतलब्धप्रतापः प्रतापोपनतदानमानार्जवोपार्जितानुरागानुरक्तमौलभृतमित्रश्रेणीबलावाप्तराज्यश्रीः परममाहेश्वरः **श्रीसेनापतिभट्टार्कः** तस्य सुतस्तत्पादरजोरुणनतपवित्रीकृतशिराः शिरोवनतश-

---

१. सत्याश्रय इति पुलकेशिमहीपतेर्नामान्तरम्.

न्त्रचूडामणिप्रभाविच्छुरितपादनखपङ्क्तिदीधितिः दीनानाथजनोपजीव्यमानविभवः परममाहेश्वरः सेनापतिधरसेनस्तस्यानुजस्तत्पादाभिप्रशस्तविमलमौलिमणिर्मन्वादिप्रणीतविधिविधानधर्मा धर्मराज इव विहितविनयव्यवस्थापद्धतिरखिलभुवनमण्डलाभोगस्वामिना परमस्वामिना स्वयमुपहितराजाभिषेकमहाविश्राणनावपूतराज्यश्रीः परममाहेश्वरो महाराजद्रोणसिंहः सिंह इव तस्यानुजः स्वभुजबलघटानीकानामनेकविजयी शरणैषिणां शरणमवबोद्धा शास्त्रार्थतत्त्वानां कल्पतरुरिव सुहृत्प्रणयिनां यथाभिलषितफलोपभोगदः परमभागवतः परमभट्टारकपादानुध्यातो महाराजध्रुवसेनः कुशली सर्वानेव स्वानायुक्तकविनियुक्तकद्राङ्गिकमहत्तरचाटभटध्रुवस्थानाधिकरणदण्डपाशिकादीनन्यांश्च यथासंबध्यमानकाननुदर्शयति। अस्तु वः संविदितम्—यथा मया हस्तकवप्राहरण्यं कुक्कुटग्रामे योतिलप्रत्ययसीतापादावर्तशतं कूपश्च हस्तकवप्रवास्तव्यब्राह्मणसंचितिशर्मणे द्रोणायनसगोत्रायाथर्वणसब्रह्मचारिणे मातापित्रोः पुण्याप्यायनायात्मनश्चैहिकामुष्मिकयथाभिलषितफलावाप्तिनिमित्तमा चन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनं पुत्रपौत्रान्वयभोग्यं ब्रह्मदेयमनुज्ञातम्। अतोऽस्योचितया ब्रह्मदेयस्थित्या भुञ्जतः प्रदिशतः कर्षापयतः कृषतो वा न कैश्चित्स्वल्पाप्याबाधा कार्यास्मद्वंशजैरागामिनृपतिभिश्च। अनित्यान्यैश्वर्याण्यस्थिरं मानुष्यं चावेक्ष्य सामान्यं च भूमिदानफलमवगच्छद्भिरियमस्मदनुमतिरनुमन्तव्या। यश्चाच्छिन्द्यादाच्छिद्यमानं वानुमोदेत्स पञ्चभिर्महापातकैः सोपपातकैः संयुक्तः स्यात्। अपि चात्र व्यासगीतः श्लोको भवति—

'षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥'

स्वहस्तो मम महाराजध्रुवसेनस्य। दूतकः प्रतीहारमम्मकः। लिखितं किक्केन। [1]सं. २०७ कार्तिकसुदि ७।

(इण्डियन् आण्टिक्वेरी ५।२०५-२०६)

१. वलभीसंवत्सरोऽयम्.

(१८)

शिलाहारवंशोद्भवस्य श्रीछित्तराजदेवस्य दानपत्रम्

ॐ जयश्चाभ्युदयश्च ।

लभते सर्वकार्येषु पूजया गणनायकः । (?)
विघ्नं निघ्नन्स वः पायादपायाद्गणनायकः ॥
स वः पातु शिवो नित्यं यन्मौलौ भाति जाह्नवी ।
सुमेरुशिखरोद्गच्छदच्छचन्द्रकलोपमा ॥

जीमूतकेतुतनयो नियतं दयालु-
र्जीमूतवाहन इति त्रिजगत्प्रसिद्धः ।
देहं निजं तृणमिवाकलयन्परार्थे
यो रक्षति स्म गरुडात्किल शङ्खचूडम् ॥

तस्यान्वये नरपतिः समभूत्कपर्दी
शीलारवंशतिलको रिपुदर्पमर्दी ।
तस्मादभूच्च तनयः पुलशक्तिनामा
मार्तण्डमण्डलसमानसमिद्धधामा ॥

जातवानथ लघुः स कपर्दी सूनुरस्य सकलैररिवर्गैः ।
यद्भयेन सलिलाञ्जलिरुच्चैर्दीयते स्म निजराज्यसुखाय ॥

तस्मादभूच्च तनयो भुवनैकवीरः
श्रीवप्पुवन्त इति संगररङ्गवीरः ।
श्रीझञ्झ इत्यभवदस्य सुतः सुकीर्ति-
र्भ्राताथ गोग्गिनृपतिः समभूत्सुमूर्तिः ॥

तस्माद्विस्मयकारिहारिचरितप्रख्यातकीर्तिः सुतः
श्रीमान्वज्जडदेवभूपतिरभूद्भूचक्रचूडामणिः ।
दोर्दण्डैकबलस्य यस्य सहसा सङ्ग्रामरङ्गाङ्गणे
राज्यश्रीः स्वयमेव वक्षसि रतिं चक्रे मुरारेरिव ॥

जयन्त इव वृत्रारेः पुरारेरिव षण्मुखः ।
ततः श्रीमानभूत्पुत्रः सच्चरित्रोऽपराजितः ॥
कर्णस्त्यागेन यः साक्षात्सत्येन च युधिष्ठिरः ।
प्रतापाद्दीप्तमार्तण्डः कालदण्डश्च(कालोदण्डाच्च) यो द्विषाम् ॥
तस्मादभूद्वज्जडदेवनामा ततोऽग्रजः श्रीकेशिदेवश्च (?) ।
तद्भ्रातृजो वज्जडदेवसूनुः श्रीछित्तराजो नृपतिर्बभूव ।
शीलारवंशः शिशुनापि येन नीतः परामुन्नतिमुन्नतेन ॥

अतः स्वकीयपुण्योदयात्समधिगताशेषपञ्चमहाशब्दमहासामन्ताधिपतितगरपुरपरमेश्वरशिलाहारनरेन्द्रजीमूतवाहनान्वयप्रसूतसुवर्णगरुडध्वजसहजविद्याधरत्यागजगज्झम्पिमाण्डलिकशिखामणिशरणागतवज्रपञ्जरप्रभृतिसमस्तराजावलीसमलंकृतमहामण्डलेश्वरश्रीमच्छित्तराजदेवे निजभुजोपार्जितानेकमण्डलसमेतां पुरीप्रमुखचतुर्दशग्रामशतीसमन्वितां समग्रकोङ्कणभुवं समनुशासति तच्चैतद्राज्यचिन्ताभारमुद्वहत्सु सर्वाधिकारिश्रीनागणैयसांधिविग्रहिकश्रीसीहपैयकर्णाटसांधिविग्रहिकश्रीकपर्दिश्रीकरणादिपञ्चप्रधानेषु सत्सु अस्मिन्काले प्रवर्तमाने स च महामण्डलेश्वरश्रीमच्छित्तराजदेवः सर्वानेव स्वसंबध्यमानकानन्यानपि समागामिराजपुत्रमन्त्रिपुरोहितामात्यप्रधानाप्रधाननैयोगिकांस्तथा राष्ट्रपतिविषयपतिनगरपतिग्रामपतिनियुक्तानियुक्तराजपुरुषजनपदांस्तथा हंषमननगरपौरत्रिवर्गप्रभृतींश्च प्रणतिपूजासत्कारसमादेशैः संदिशति । अस्तु वः संविदितम्—यथा 'चला विभूतिः क्षणभङ्गं(ङ्गि) यौवनं कृतान्तदन्तान्तरवर्ति जीवितम्[1] ।' संसारः(रे) सहजजरामरणसाधारणं शरीरकम् । पवनचलितकमलिनीदलगतजललवतरलतरैव चायुषी(तरलतरमेव चायुः) इति मत्वा द्रढयन्ति दानफलम् । तथा चोक्तं भगवता व्यासेन—

'अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकत्रयं तेन भवेद्धि दत्तं यः काञ्चनं गां च महीं च दद्यात् ॥'

---

१. 'तथाप्यवज्ञा परलोकसाधने नृणामहो विस्मयकारि चेष्टितम्' इत्युत्तरार्धं सुभाषितावलौ.

इति धर्माधर्मविचारचारुचिरंतनमुनिवचनान्यवधार्य मातापित्रोरात्मनश्च श्रेयोर्थिना मया शकनृपकालातीतसंवत्सरशतेषु नवसु अष्टचत्वारिंशदधिकेषु क्षयसंवत्सरान्तर्गतकार्तिकशुद्धपञ्चदश्याम् यत्राङ्कतोऽपि संवत् ९४८ कार्तिकशुद्ध १९ रवौ संजाते आदित्यग्रहणपर्वणि सुतीर्थे स्नात्वा गगनैकचक्रचूडामणये कमलिनीकामुकाय भगवते सवित्रे नानाविधकुसुमश्लाघ्यमर्घ्यं दत्त्वा सकलसुरासुरगुरुत्रैलोक्यस्वामिनं भगवन्तमुमापतिमभ्यर्च्य यजनयाजनाध्ययनाध्यापनादिषट्कर्मनिरताय क्रतुक्रियाकाण्डशौण्डाय पाराशरगोत्राय च्छन्दोगशाखिने महाब्राह्मणाय आमदेवैयाय विप्रनोडमैयसुताय यजनयाजनाध्ययनाध्यापनादिषट्कर्मकरणाय आगताभ्यागतनित्यनैमित्तिकसंव्यवहारार्थं बलिं चरुकवैश्वदेवाग्निहोत्रक्रतुक्रियाद्युपसर्पणार्थं स्वपरिग्रहपोषणार्थं च श्रीस्थानकाभ्यन्तरषट्पष्ठी(ष्टि)विषयान्तःपाति नोउरग्रामान्तर्वर्ति चोडणिभट्टक्षेत्रम् यस्य चाघाटनानि—पूर्वतः गोंवणिमर्यादा, दक्षिणतः गोरपवलीमर्यादा, पश्चिमतो राजपथः, पूर्वोत्तरतो गोंवाणिमर्यादा, एवं चतुराघाटनोपलक्षितं ससीमापर्यन्तं समस्तोत्पत्तिसंयुक्तं अचाटभटप्रवेश्यं अनादेश्यमनासेध्यं उदकातिसर्गेण नमस्यावृत्त्या परमया भक्त्या प्रतिपादितम् । तदस्य सान्वयबन्धोरपि भुञ्जतो भोजयतो वा कृषतः कर्षयतो वा न केनापि परिपन्थना करणीया । यत उक्तमेव महामुनिभिः—

'बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥'

'दत्त्वा भूमिं भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ।
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥'

इति महर्षिवचनान्यवधार्य सर्वैरपि समागामिभिर्भूपालैः पालनधर्मफललोभ एव कलनीयः । न पुनस्तल्लोपनपापकलङ्काग्रेसरेण केनापि भवितव्यम् । यस्त्वेवमभ्यर्थितोऽपि लोभादज्ञानतिमिरपटलावृतमतिराच्छिन्द्यादाच्छिद्यमानमनुमोदेत वा स पञ्चभिरपि पातकैरुपपातकैश्च लिप्तो

रौरवमहारौरवान्धतामिस्रादिनरकांश्चिरमनुभविष्यति । तथा चोक्तं व्यासेन—

'स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्ठायां कृमिर्भूत्वा कृमिभिः सह पच्यते ॥'

यथा चैतदेवं शासनदाता लेखकहस्तेन स्वमतमारोपयति । यथा—मतं मम महामण्डलेश्वरश्रीछित्तराजदेवस्य महामण्डलेश्वरश्रीमद्वज्जडदेवराजसूनोर्यदत्र शासने लिखितम् । लिखितं चैतन्मया श्रीमद्राजानुज्ञया भाण्डागारसेन जोगपैयेन भाण्डागारसेनमहाकविश्रीनागलै(पै)यभ्रातृसुतेन । यदत्रोनाक्षरमधिकाक्षरं वा तत्सर्वं प्रमाणमिति । श्रीर्भवतु ।

(इण्डियन् आण्टिक्केरी ५।२७७–२७९)

---

(१९)

श्रीविष्णुगोपवर्मणो महीपतेर्दानपत्रम् ।

जितं भगवता ॥ श्रीविजयपलक्कडस्थानात् परमब्रह्मण्यस्य स्वबाहुबलार्जितोर्जितक्षात्रतपोनिधेः विहितसर्वमर्यादस्य स्थितिस्थितस्यामितात्मनो महाराजस्य **श्रीस्कन्दवर्मणः** प्रपौत्रस्यार्चितशक्तिसिद्धिसंपन्नस्य प्रतापोपनतराजमण्डलस्य महाराजस्य वसुधातलैकवीरस्य **श्रीवीरवर्मणः** पौत्रस्य देवद्विजगुरुवृद्धोपचायिनो विवृद्धविनयस्यानेकगोहिरण्यभूम्यादिप्रदानैः प्रवृद्धधर्मसंचयस्य प्रजापालनदक्षस्य लोकपालानां पञ्चमस्य लोकपालस्य सत्यात्मनो महात्मनो महाराजस्य **श्रीस्कन्दवर्मणः** पुत्रस्य भगवद्भक्तिसद्भावसंभावितसर्वकल्याणस्य प्रजासंरञ्जनपरिपालनोद्योगसततसत्रव्रतदीक्षितस्य अनेकसमरसाहसावमर्दलब्धविजययशःप्रकाशस्य कलियुगदोषावसन्नधर्मोद्धरणानित्यसंनद्धस्य राजर्षिगुणसर्वसंदोहविजिगीषोर्धर्मविजिगीषोर्भगवत्पादानुध्यातस्य बप्पभट्टारकमहाराजपादभक्तस्य परमभागवतस्य भारद्वाजसगोत्रस्य स्वविक्रमाक्रान्तान्यनृपश्रीनिलयानां यथावदाहृताश्वमेधानां पल्लवानां धर्मयुवमहाराजस्य **श्रीविष्णुगोपवर्मणो** वचनेन मुण्डराष्ट्रे उरुवपल्लिये ग्रामेयका वक्तव्याः—एतस्मिन्ग्रामसीमे

द्विशतं सि(सी)मनिवर्तनानि । एतेषां निवर्तनानामवधयः—अपरदिशि के-ण्डुकूरग्रामस्य सीमावधिः । दक्षिणदिशि सुप्रयोगनदी अवधिः । पूर्वदि-शि अवधिः पूर्वदक्षिणोत्तरं महापथपार्श्वे शिला । एतस्या उत्तरं गत्वा चिञ्चावृक्षः । तत उत्तरं गत्वा कुरुपूरग्रामस्य केण्डुकूरग्रामस्य च पथि शिला । तत उत्तरं गत्वा शिलोपलयम् । तत उत्तरं गत्वा कुरुपूरग्रामे ब्राह्मणानां हलक्षेत्रस्यावधौ शिला । उत्तरदिश्यवधिः शिलोपलयवृतो महाचिञ्चावृक्षः । ततः अपरादिशं गत्वा कोण्डुमुरुवुडुग्रामस्य सीमान्तम-वधिः । एवं चतुर्णां सीमावधीनां मध्यसीमस्य तद्द्विशतं निवर्तनानि के-ण्डुकूरे विष्णुवर्मसेनापतिकृतविष्णुहारदेवकुलाय देवभोगं कृत्वा अष्टाद-शजातिभिः परिहारैरुपेतं अस्मदायुर्बलवर्धनीयमस्माभिः संप्रदत्तम् । तद-वगम्य तस्मिन्विषये सर्वायुक्तकाः सर्वनियुक्ता राजवल्लभाः संचरन्तकाश्च तत्सीमं सर्वपरिहारैः परिहरन्तु परिहारयन्तु च । यश्चेदमस्मच्छासनम-तिक्रामेत्स पापः शरीरदण्डमर्हति । अपि चापि श्लोकाः—

‘भूमिदानात्परं दानं न भूतं न भविष्यति ।
तस्यैव हरणपापान्(हरणात्पापं) न भूतं न भविष्यति ॥’
‘स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
गवां शतसहस्रस्य हन्तुः पिबति दुष्कृतम् ॥’

सिंहवर्ममहाराजस्य विजयसंवत्सरे एकादशे पौष्य(ष)मासे कृष्णपक्षे दशम्यां मया दत्ता ताम्रपट्टिका ॥

(इण्डियन् आण्टिक्वेरी ५।५१-५२)

---

(२०)

अविनीतमहीपतेर्दानपत्रम् ।

जितं भगवता गतघनगगनाभेन पद्मनाभेन श्रीमज्जान्हवेयकुलामल-व्योमावभासनभास्करस्य स्वखड्गैकप्रहारखण्डितमहाशिलास्तम्भलब्धबल-स्वस्तिः (?) पराक्रमयशाः(शसः) दारुणारिगणविदारणरणोपलब्धव्रण-विभूषणविभूषितस्य काण्वायनसगोत्रस्य श्रीमत्कोंगणिवर्मधर्ममहाधि-

राजस्य पुत्रस्य पितुरन्वागतगुणयुक्तस्य विद्याविनयविनीतस्य सम्य[क्]प्रजापालनमात्राधिगतराज्यप्रयोजनस्य नानाशास्त्रार्त(र्थ)सद्भावाधिगमप्रणीतमतिविशेषस्य विद्वत्काञ्चननिकषोपलभूतस्य विशेषतोऽप्यनवशेषस्य (?) नीतिशास्त्रस्य वक्तृप्रयोक्तृकुशलस्य सुविभक्तभक्तभृत्यजनस्य दत्तकसूत्रवृत्तेः प्रणेतुः श्रीमन्**माधव**महाधिराजस्य पुत्रस्य पितृपितामहगुणयुक्तस्य अनेकचतुर्दन्तयुद्धावाप्तचतुरुदधिसलिलास्वादितयशसः समदद्विरदतुरगारोहणातिशयोत्पन्नतेजसो धनुरभियोगसंपादितसंपद्विशेषस्य श्रीमद्**हरिवर्म**महाधिराजस्य पुत्रस्य गुरुगोब्राह्मणपूजकस्य नारायणचरणानुध्यातस्य श्रीमद्**विष्णुगोप**महाधिराजस्य पुत्रस्य त्र्यम्बकचरणाम्भोरुहरजःपवित्रीकृतोत्तमाङ्गस्य व्यायामोद्वृत्तपीनकठिनभुजद्वयस्य स्वभुजबलपराक्रमक्रयक्रीतराज्यस्य क्षुत्शा(क्षा)मोष्ठपिशिताशनप्रीतिकरनिशितधारासे[ः] (?) चिरप्रनष्टदेवभोगब्रह्मादेयविसर्गअयणकारिण[ः] (?) कलियुगबलपङ्कावसन्नधर्मवृषोद्धरणनित्यसंनद्धस्य श्रीमन्**माधव**महाधिराजस्य पुत्रस्य अविच्छिन्नाश्वमेधावभृता(था)भिषिक्तश्रीमत्कादम्बकुलगगनगभस्तिमालिनः श्री**कृष्णवर्म**महाधिराजस्य प्रियभागिनेयस्य जननि(नी)देवताङ्कपर्यङ्क एवाधिगतराज्याभिषेकस्य विजृम्भमाणशक्तित्रयस्य परस्परानवमर्द्दि(मर्द्दे)नोपभुज्यमानत्रिवर्गसारस्य असंभ्रमावनमितसमस्तसामन्तमण्डलस्य निरन्तरप्रेमबहुमानानुरक्तप्रकृतिवर्गस्य विद्याविनयातिशयपरिभू[षि]तान्तरात्मन[ः] कार्तयुगीयराजचरितावलम्बिन[ः] अनेकसमरविजयोपार्जितविपुलयश[सः] क्षीरोदैकार्णवीकृतभुवनत्रयस्य निरवग्रहप्रदानशौर्यस्य अविषह्यपराक्रमाक्रान्तप्रतिराजमस्तकार्पिताप्रतिहतशासनस्य अनेकमुखाभिवर्धमानविभवोदयपराजितद्रविणपतेः प्रतीतानेकगुणनिधानभूतस्य विद्वत्सु प्रथमगण्यस्य प्रणायिजनहृदयानन्दनस्य मर्यादालङ्घनालं(नु)कृतरत्नाकरवृत्तस्य यथार्हदण्डितयानुकृतवैवस्वतस्य प्रतापातिशयानुग(कृ)त विवस्वतो वैवस्वतस्य वा मनोर्वर्णाश्रमाभिरक्षिणे(णो) दक्षिणदिशामभिगोप्तुं पर्य्याप्तु(प्त)वतः (?) प्रातिजनीनस्य सुप्रजसः श्रीमत्**कोगणि**महाधिराजस्य **अविनीत**नामपुत्रेण पुन्ना-

डराजस्कन्दवर्मप्रियपुत्रिकाजन्मना स्वगुरुणानुगामिना पित्रा परसुतसमावर्जितयापिलष्या(क्ष्म्या ?) स्वयमभिप्रातिया(त्या) लिङ्गितवक्षस्त(क्षःस्थ)लेन विजृम्भमाणशक्तित्रयोपनमितसमस्तसामन्तमण्डलेन अन्दरिय-आलन्तूर-पौरुलरे अपेनंगराद्यनेकसमरमखमुखाहुतप्रपातशूरपुरुषपशूपहारविघसविहस्तीकृतान्ताग्निमुखेन श्रीमत्कोगणिवृद्धराजेन **दुर्विनीतनामधेयेन** समस्तपान्नाडपुन्नाडाधिपतिना वैवस्वतेनेव मनुना वर्णाश्रमाभिलक्षणां दक्षिणां दिशमभिगोप्तुं परिया(र्या)प्तवता प्रातिजनितेन सुप्रजसा आत्मनः प्रवर्धमानविजयैश्वर्ये पञ्चत्रिंशद्विजयसंवत्सरे (शकाब्दे ४३९) प्रवर्तमाने श्रीमद्वाल्मीकिनाम्नि जगत्सूर्यवंशखरमहादेवाख्यकास्य(श्य)पसगोत्रवाजसैन्यवादेयश्रीमद्देवशर्मणां केललेनाम्ना बेम्पुरीश्वस्तीन(?)मुदकपूर्वं दत्त[म्] ईशान्यदिशा आपक्षेत्रं चतारिखण्डि कुण्णता(त)टाकं आपक्षेत्रं ऊर्ध्वत्रिखण्डि अध आपक्षेत्रं षट्खण्डि पेन्तनाडिपूर्वदिशां क्षेत्रं पञ्चदशखण्डि दक्षिणदिश(शि) महावृक्ष अग्नि अश्वत्तं(त्थं) ईशानायदिशा जमुवृक्षं पुनः पुन ईशानायदिशा नकुले तटाकवरुणादिशां क्षेत्रं द्वादशखण्डि वायव्यदिशा महातटाक आपक्षेत्रं सप्तखण्डि एतेन महादेवादिव्यदत्तम् । अपि चात्र मनुगीतो(ताः) श्लोको(काः)—

'स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि घोरे तमसि वर्तते ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य [तस्य] तदा फलम् ॥
स्वं दातुं सुमहच्छक्यं दुःखमन्यत्र पालनम् ।
दानं वा पालनं वेति दानाच्छ्रेयोऽनुपालनम् ॥
अद्भिर्दत्तं त्रिभिर्भुक्तं षड्भिश्च प्रतिपालनम्(लितम्) ।
एतानि न निवर्तन्ते पूर्वराजकृतानि च ॥'

(इण्डियन् आण्टिक्केरी ५।१३८–१३९)

---

(२१)

ग्वाल्हेरनगरोपकण्ठस्थितगिरिदुर्गे पद्मनाथदेवालये समुत्कीर्णा[1] प्रशस्तिः।

ॐ नमः पद्मनाथाय[2] ॥

हर्षोत्फुल्लविलोचनैर्दिशि दिशि प्रोद्गीयमानं जनै-
मेंदिन्यां विततं ततो हरिहरब्रह्मास्पदानि क्रमात्।
श्वेतीकृत्य यदात्मना परिणतं श्रीपद्मभूभृद्यशः
पायादेष जगन्ति निर्मलवपुः श्वेतानिरुद्धश्चिरम् ॥ १ ॥
मौलिन्यस्तमहानीलशकलः पातु वो हरिः।
दर्शयन्निव केशस्थनवजीमूतकर्णिकाम् ॥ २ ॥
मुक्ताशैलच्छलेन क्षितितिलकयशोराशिना निर्मितोऽयं
देवः पायादुषायाः पतिरतिधवलस्वच्छकान्तिर्जगन्ति।
मन्वानः सर्वथैव त्रिभुवनविदितं श्यामतापह्नवं यः
शङ्के स्वं वर्णचिह्नं मुकुटतटमिलन्नीलकान्त्या बिभर्ति ॥ ३ ॥
इदं मौलिन्यस्तं न भवति महानीलशकलं
न मुक्ताशैलेन स्फुरति घटितश्चैष भगवान्।

---

१. प्रशस्तिरियं सुप्रसिद्धविद्वद्वरराजेन्द्रलालमित्रेण 'इण्डो-आर्यन्स्' (Indo-Aryans) नाम्नि स्वग्रन्थे द्वितीयभागे (३७०-३७७ पृष्ठेषु) १८८१ मिते खिस्ताब्दे मुद्रिता. तत्र चात्रुटितानि शुद्धानि च विरलान्येव पद्यानि दृश्यन्ते. बहूनि च पद्यानि निःशेषमेव गलितानि सन्ति. पुनर्भट्टकीलहार्नेन १८८६ मिते खिस्ताब्दे 'इण्डियन्-आण्टिक्केरी'मध्ये (१५ । ३३-४७) मुद्रिता. तन्मुद्रणं समीचीनमेव. अथ चास्मिन्नेव वर्षे ग्वाल्हेरमहाराजाश्रितपौराणिकभट्टश्रीपुरुषोत्तमशास्त्रिभिरेकमेतत्प्रशस्तिप्रतिरूपकमस्मभ्यं प्रहितम्. तदपि केनचिद्वैधेयधुरीणेन लिखितमित्यशुद्धिप्रचुरमेव. किंतु तत्राक्षराणि पद्यानि वा न गलितानि सन्ति. अस्माभिरत्र भट्टकीलहार्नमुद्रिता क-नाम्ना, ग्वाल्हेरनगरागता च प्रशस्तिः ग-नाम्ना व्यवहृतास्ति. राजेन्द्रलालमित्रमुद्रितायास्तु नोपयोगः कृतः. २. पद्मपालमहीपतिस्थापितत्वात्पद्मनाथ इति नाम.

उपाकर्णोत्तंसीकरणसुभगं नीलनलिनं
वहत्यद्याप्यस्याश्चिरविरहपाण्डूकृततनुः ॥ ४ ॥

आसीद्वीर्यलघूकृतेन्द्रतनयो निःशेषभूमीभृतां
वन्द्यः कच्छपघातवंशतिलकः क्षोणीपतिर्लक्ष्मणः ।
यः कोदण्डधरः प्रजाहितकरश्चक्रे स्वचित्तानुगां
गामेकः पृथुवत्पृथूनपि हठादुत्पाट्य पृथ्वीभृतः ॥ ५ ॥

तस्माद्वज्रधरोपमः क्षितिपतिः **श्रीवज्रदामा**भव-
द्दुर्वारोर्जितबाहुदण्डविजिते गोपाद्रिदुर्गे युधा ।
निर्व्याजं परिभूय गाधिनगराधीशप्रतापोदयं
यद्वीरव्रतसूचकः समभवत्प्रोद्घोषणाडिण्डिमः ॥ ६ ॥

न तुलितः किल केनचिदप्यहं जगति भूमिभृतेति कुतूहलात् ।
तुलयति स्म तुलापुरुषैः स्वयं स्वमिह यः सुविशुद्धहिरण्मयैः ॥ ७ ॥

ततो रिपुध्वान्तसहस्रधामा नृपोऽभवन्**मङ्गलराज**नामा ।
यं ईश्वरैकप्रणतिप्रभावान्महीश्वराणां प्रणतः सहस्रैः ॥ ८ ॥

श्रीकीर्तिराजो नृपतिस्ततोऽभूद्यस्य प्रयाणेषु चमूसमुत्थैः ।
धूलीवितानैः सममेव चित्रं मित्रस्य वैवर्ण्यमभूद्द्विषश्च ॥ ९ ॥

किं ब्रूमोऽस्य कथाद्भुतं नरपतेरेतेन शौर्याब्धिना
दण्डो मालवभूमिपस्य समरे संख्यामतीतोजितः ।
यस्मिन्भङ्गमुपागते दिशि दिशि त्रासात्कराग्रच्युतै-
र्ग्रामीणाः स्वगृहाणि कुन्तनिकरैः संछादयांचक्रिरे ॥ १० ॥

अद्भुतः सिंहपानीयनगरे येन कारितः ।
कीर्तिस्तम्भ इवाभाति प्रासादः पार्वतीपतेः ॥ ११ ॥

---

१. गोपाद्रिरिति ग्वाल्हेरसमीपवर्तिनः पर्वतस्य नाम. २. 'युवा' ग. ३. 'वैरिनगरा' ग. ४. 'पूरकः समचरत्' क. ५. 'यन्नैश्वरैक' ग. ६. 'अतीतोर्जित' ग. ७. 'रङ्गमुपागते' ग.

तस्मादजायत [1]महामतिमूलदेवः
पृथ्वीपतिर्भुवनपाल इति प्रसिद्धः ।
आनन्दयञ्जगदनिन्दितचक्रवर्ति-
चिह्नैरलंकृततनुर्मनुतुल्यकीर्तिः ॥ १२ ॥

यस्य [2]ध्वस्तारिभूपालां सर्वां पालयतः प्रभोः ।
भुवं त्रैलोक्यमल्लस्य निःसपत्नमभूज्जगत् ॥ १३ ॥

[3]राज्ञी देवव्रता तस्य हरेर्लक्ष्मीरिवाभवत् ।
तस्यां **श्रीदेवपालो**ऽभूत्तनयस्तस्य भूपतेः ॥ १४ ॥

त्यागेन कर्णमजयत्पार्थं कोदण्डविद्यया ।
धर्मराजं च सत्येन स युवा विनयाश्रयः ॥ १५ ॥

सूनुस्तस्य विशुद्धबुद्धिविभवः पुण्यैः प्रजानामभू-
न्मांधातेव स चक्रवर्तितिलकः **श्रीपद्मपालः** प्रभुः ।
मत्वाम्येऽपि करप्रवृत्तिरपरस्येतीव यश्चिन्तय-
न्दिग्यात्रासु मुहुः खरांशुमरुणत्सान्द्रैश्चमूरेणुभिः ॥ १६ ॥

कृत्वान्याः स्ववशे दिशः क्रमवशादाशां गतैर्दक्षिणा-
मुत्क्षिप्ताचलसंनिभानविरतं यत्सैन्यवाजिव्रजैः ।
उद्धूतान्पततः पयोधिमभितः संप्रेक्ष्य रेणूत्करा-
न्भूयोऽप्युद्भटसेतुबन्धनधिया त्रस्यन्ति नक्तंचराः ॥ १७ ॥

यस्येन्दुद्युतिसुन्दरेण यशसा नीते सुराणां गणे
वैवर्ण्यं [4]भ्रमशीलखण्डनभयाद्प्राप्नुवन्तः प्रियान् ।

---

१. महामत्या मूलदेवतुल्यः. कलाङ्करापरनामा निखिलकलावेत्ता विक्रमादित्यसभ्यो मूलदेवः कथासरित्सागरादिषु प्रसिद्ध एव. भट्टकीलहार्नस्तु 'मूलदेव इति महीपतेर्नाम, भुवनपालस्त्रैलोक्यमल्लश्चेति नामद्वयमपि तस्यैव' इति वदति. वस्तुतस्तु 'महामतिमूलदेवः' इति भुवनपालस्य विशेषणरूपमेवेति ज्ञेयम्. तथा च समयमातृकायां क्षेमेन्द्रप्रयोगः—'श्रीगुप्तो नाम धूर्तः सकलकलिकलाकल्पनामूलदेवः' (६।२९). एवं त्रैलोक्यमल्ल इत्यपि भुवनपालस्य विशेषणमेव. २. 'ध्वस्तान्यभूपालां' क. ३. 'पत्नी' ग. ४. 'शुचिशील' ग.

नूनं शक्रपुरःसरामरवधूसंघाः श्रिये सांप्रतं
गौर्यै च स्पृहयन्ति ये प्रथमतः पत्युर्वपुःसंश्रिते ॥ १८ ॥
कै[1]र्दृष्टाः क्व समस्तवाञ्छितफलभ्राजिष्णवः पादपा
गावः कामदुघाश्च कैः क्व मणयः कैश्चिन्तितार्थप्रदाः ।
पूर्णाः कस्य मनोरथा इह न के[2] पत्यामुना पूरिता
[3]वीरोऽधोऽनयदस्य(?) तद्गुणवतः [4]कल्पद्रुमादीनपि ॥ १९ ॥
[5]स्तुत्वा न पद्मनृपतिं [6]परिरक्षिता भूः
प्राप्तोऽन्यथापि यदसौ बत [7]नग्नभावः ।
दौःस्थ्यान्निरम्बरतनुर्विपिनेष्वशोच-
[8]द्यस्य प्रतिक्षणमिति प्रतिपन्थिसार्थः ॥ २० ॥
भ्रमः कुलालचक्रेषु लोभः पुण्यार्जनेष्वभूत् ।
काठिन्यं कुचकुम्भेषु [9]यस्मिञ्शासति मेदिनीम् ॥ २१ ॥
[10]असंमतोद्गूढगुणस्य पीडा साधुर्न निस्त्रिंश[11]परिग्रहोऽपि ।
इत्याललम्बे न धनुर्न चासिं तथापि यो वैरिगणं जिगाय ॥ २२ ॥
सद्यः स्रुतास्रप्रृषत[12]व्यतिकीर्णभूषु
वैरि[13]द्विपाधिपशिरोमणिभिः समन्तात् ।
लोकानुरागयशसामिव बीजवापं
विस्तारयां [14]यदसिरास रणाजिरेषु ॥ २३ ॥
वने यदरिनारीणां हैमनीरजनिश्रयः (?) ।
भृङ्गाणां [15]तन्मुखेनातो हैमनीरजनिश्रयः ॥ २४ ॥
स विमृश्य नदीपूरगत्वरे संपदायुषी ।
पूर्तधर्मे मतिं चक्रे जिघृक्षु[16]रनयोः फलम् ॥ २५ ॥

---

१. 'दृष्टाः' क. २. 'कैः' क. ३. 'वीरोद्यानतटस्य' क. ४. 'कल्पद्रुमादीन्यपि' क. ५. 'श्रुत्वा' क. ६. 'परिरक्षितारं' ग. ७. नग्ना बन्दिनोऽपि. 'नम्रभावः' ग. ८. 'यस्मात्' क. ९. 'तस्मिन्' क. १०. उद्गूढगुणस्य गुणवतः पुरुषस्य धनुषश्च पीडा असंमता. ११. 'परिज्ञतापि' क. १२. 'व्यतिकीर्णरूपो' क. १३. 'वैरिद्विषाधिप' क. १४. यस्य खड्गो लोकानुरागयशसामिव बीजवापं विस्तारयामास. १५. 'तन्मुखेष्वेव' ग. १६. अनयोः संपदायुषोः.

प्रजाभर्त्रा तेन क्षितितिलकभूतेन [1]सदनं
हरेर्धर्मज्ञेन त्रिदशसदृशा कारितमदः ।
वदाम्यस्योच्चैस्त्वं कथमिव गिरा यस्य शिखरं
समारूढः सिंहो मृगमिव मृगाङ्कस्थमशितुम् ॥ २६ ॥
[2]प्रासादस्यास्य शश्वद्वि[3]धुधरशिखरिस्पर्धिनो हैममण्डं
[4]दण्डाग्रात्पावनीयं शशधरधवला वैजयन्ती पतन्ती ।
नि[5]र्वातं भाति भूतिच्छुरितनिजतनोर्देवदेवस्य शंभोः
स्वर्गाद्गङ्गेव पिङ्गस्फुटविकटजटाजूटमध्यं विशन्ती ॥ २७ ॥
तदेतद्ब्रह्माण्डं स इह भविता पङ्कजभवः
पुनर्यं वोढास्मो(रो) वयमिह विमानेन वियति ।
सुवर्णाण्डं हंसास्तदिदमुररीकृत्य सकलं
ध्रुवं संसेवन्ते हरिसदन[6]मूर्ध्नि स्थितममी ॥ २८ ॥
तुङ्गिम्ना कनकाचलः [7]शुंभविधावन्तःस्थितश्रीपति-
र्बिभ्राणो द्विजसत्तमानुदधिजावासो नृसिंहान्वितः ।
निर्मातास्य वृतः समस्तविबुधैर्लब्धप्रतिष्ठैरयं
प्रासादश्च धरातले सममहो कल्पं हरेः कल्पताम् ॥ २९ ॥
[8]देवेऽर्धसिद्धे द्विजपुंगवेषु [9]प्रतिष्ठितेष्वष्टसु पद्मपालः ।
युवैव दैवप्रतिकूलभावात्सं[10]क्रन्दनार्धासनभाग्बभूव ॥ ३० ॥
तस्य भ्राता नृपतिरभवत्सूर्यपालस्य सूनुः
श्रीगोपाद्रौ सुकृतनिलयः श्रीमहीपालदेवः ।
यं प्राप्यैव प्रथितयशसं तावभूतां सनाथौ
शौर्यत्यागौ [11]हरिरविसुताभावदुःस्थौ चिरेण ॥ ३१ ॥

---

१. 'भवनं' क. २. 'प्रासादस्योत्पतन्ती विधु' ग. ३. कैलासतुल्यस्य. ४. 'शृङ्गाग्रात्' ग. ५. 'निर्भ्रान्तं' ग. ६. 'उच्चैः स्थितं' क. ७. 'समभवच्चान्तःस्थितश्रीपतिः' ग. ८. 'देवेन्द्रसिद्धद्विज' ग. ९. 'प्रतिष्ठितेष्वेषु स' ग. १०. 'संक्रन्दनाङ्कासन' क. ११. अर्जुनकर्णवियोगदुःखितौ शौर्यत्यागौ.

सृष्टिं कुर्वन्नमात्यानां विप्राणां[1] स नृपः स्थितिम्।
प्रलयं[2] विद्विषामासीद्ब्रह्मोपेन्द्रहरात्मकः॥ ३२॥
यत्र धामनिधौ राज्ञि पालयत्यवनीतलम्।
न भास्वान्भास्करादन्यो न राजान्यो विधोरभूत्॥ ३३॥
कृताभिषेकं सद्वृत्तैरुपविष्टं नृपासने।
यमुदारपदैरेवं तुष्टुवुः सूतमागधाः[3]॥ ३४॥

[4]'त्वामुद्वहन्ति शिरसा खलु राजहंसाः
सृष्टास्त्वया पुनरिमाः समयावसन्नाः।
नाथ प्रजाः सुमनसां प्रथमोऽसि कोऽसि
त्वं सिद्धवीररस तामरसोद्भवस्य॥ ३५॥'

लक्ष्मीपतिस्त्वमसि पङ्कजचक्रचिह्नं
पाणिद्वयं वहसि भूप भुवं बिभर्षि।
श्यामं वपुः प्रथयसि स्थितिहेतुरेक-
स्त्वं कोऽसि [5]नीतिविजितोद्धव माधवस्य॥ ३६॥

त्वं पालयस्यनिशमर्थिजनस्य कामं[6]
रामः श्रिया त्वमसि नाथ गुणैरनन्तः[7]।
संकर्षणः समिति विद्विषदायुषस्त्वं
त्वं कोऽसि [8]सच्चरितहाल हलायुधस्य॥ ३७॥

ख्याता रतिस्[9]तव निजप्रमदासु नित्यं
रूपं तवातिशयविस्मयकारि देव।

१. 'विशां वै' ग. २. विद्विषां प्रलयं कुर्वन्नासीत्. ३. 'गायनाः' क. ४. इतः प्रभृति षड्विंशतिपद्यानां भट्टकीलहार्नेन इङ्लिशभाषान्तरं न विहितम्. ५. 'नीतिविजितोद्भव' क. नीत्या विजित उद्धवो येन. श्रीकृष्णामात्यो नीतिविच्चोद्धव आसीदिति शिशुपालवधादौ व्यक्तमेव. ६. कामपाल इति बलदेवस्य नामान्तरमपि. ७. अनन्तः शेषोऽपि. बलदेवः शेषावतार इति प्रसिद्धिः. ८. सच्चरितैर्हालो द्वितीयः सातवाहनमहीपतिरेवेति तात्पर्यम्; बलदेवपक्षे तु सम्यक् चरिता हाला सुरा येन. ९. रतिः कामदेवस्य भार्यापि.

त्वं मीन[1]चिह्न पुरु[2]षोत्तमसंभवोऽसि
कस्त्वं क्षितीश्वर [3]शम्बरसूदनस्य ॥ ३८ ॥
[4]भूभृत्सुतापतिरसि द्विषतां [5]पुराणां
भेत्ता त्वमीश [6]वृषपोषरतोऽसि नित्यम् ।
[7]भूतिं दधास्यमलचन्द्र[8]विभूषिताङ्गः
कस्त्वं सदम्बुजदि[9]वाकर शंकरस्य ॥ ३९ ॥
त्वं तेजसा शिखि[10]नमिद्धमधः करोषि
[11]शक्तिं दधासि नरदेव [12]विपत्तिहन्त्रीम् ।
त्वं [13]तारकं रिपुबलस्य बलान्निहंसि
कस्त्वं [14]नवीनबल [15]नीलगलध्वजस्य ॥ ४० ॥
त्वं [16]वज्रभृत्त्वमसि [17]पक्षभिदप्यशेष-
[18]भूमीभृतां [19]विबुधवन्द्य [20]गुरुप्रियोऽसि ।
श्रीमत्[21]सुवर्णगिरिदुर्गचरोऽसि कोऽसि
त्वं भीमसाहस [22]सहस्रविलोचनस्य ॥ ४१ ॥
ख्यातं तवेश बहु[23]पुण्यजनाधिपत्यं
कान्ता[24]लकाबलिभिराप्ततमैश्च गुप्ता । (?)
त्वामामनन्ति [25]परमेश्वरबद्धसख्यं
त्वं कोऽसि सद्गुणनिधान [26]धनाधिपस्य ॥ ४२ ॥

---

१. मत्स्याकारं चिह्नं महीपतीनां करचरणे भवति यस्य मत्स्यरेखेति प्रसिद्धिः; पक्षे मकरध्वज. २. पुरुषोत्तमो विष्णुः, सत्पुरुषश्च. ३. मन्मथस्य. ४. पार्वती नृपतिकन्याश्च. ५. शत्रुभूतानां त्रिपुरासुराणां वैरिनगराणां च. ६. वृषो महोक्षो धर्मश्च. ७. भस्म संपत्तिश्च. ८. चन्द्रं कनकमपि. ९. 'विभाकर' क. १०. मयूरमग्निं च. ११. आयुधविशेषं सामर्थ्यं च. १२. 'विपन्निहन्त्रीम्' क. १३. तारकं दैत्यविशेषं रिपुबलस्य तारकं शरण्यं च. प्रधानरिपुमिति यावत्. १४. 'नवीननल' क. १५. मयूरध्वजस्य कार्तिकेयस्य. १६. वज्रो हीरकमणिर्दम्भोलिश्च. १७. पक्षाः सहायाः पतत्राणि च. १८. राज्ञां पर्वतानां च. १९. विबुधा देवाः पण्डिताश्च. २०. गुरुरुपदेष्टा वाक्पतिश्च. २१. शोभनवर्णो गिरिदुर्गः; पक्षे सुवर्णगिरिः कनकाचलो मेरुः स एव दुर्गः. 'श्रीकम्बुवर्णगिरिदुर्गचणोऽसि' क. २२. इन्द्रस्य. २३. पुण्ययुक्ता जना राक्षसाश्च. २४. अलका कुबेरपुरी; पक्षे अलकावलिभिश्चूर्णकुन्तलैः. २५. कुबेरपक्षे परमेश्वरः शिवः. २६. कुबेरस्य.

तेजोनिधिस्त्वमसि भूमिभृतः[1] समग्राः
क्रान्ताः करैः[2] प्रसभमुग्रतरैस्तवेश।
प्राप्तोदयः सततमर्थिजनस्य[3] कोऽसि
त्वं कल्पभूरुह सरोरुहबान्धवस्य[4] ॥ ४३ ॥

आनन्ददोऽसि जनतानयनोत्पलाना-
माप्यायिताखिलजनः करमार्दवेन।
त्वं शश्वदीश्वर[5]शिरस्तलदत्तपाद[6]-
स्तत्को[7]ऽसि मर्त्यभुवनेश निशाकरस्य ॥ ४४ ॥

त्वामंशमीश निगदन्ति मधुद्विषोऽमी
श्यामाभिरामतनुरस्यमलप्रबोधः।
पुण्यं च भारत[8]मिदं विहितं त्वयैव
त्वं कोऽसि सत्यधन सत्यवती[9]सुतस्य ॥ ४५ ॥

नीतात्मकीर्तिसुरसिन्धुरियं समुद्र-
प्रान्तं त्वयोन्नतिमसौ गमितः स्ववंशः।
पूर्वे पवित्रतनवो विहिताश्च कोऽसि
त्वं सत्सु लब्धपरभाग[10] भगीरथस्य ॥ ४६ ॥

एतत्त्वया कृतमताडक[11]माशु विश्वं
व्याप्ता मही हरिभि[12]रीश मनोजवैस्ते।
पुण्यावतारकरणक्षतदुर्दशास्य[13]-
स्त्वं कोऽसि दत्तरिपुलाघव राघवस्य[14] ॥ ४७ ॥

धर्म[15]प्रसूस्त्वमसि सत्यधनस्त्वमेक-
स्त्वं वासुदेवचरणार्चनदत्तचित्तः।

---

१. पर्वता राजानश्च. २. किरणै राजबलिभिश्च. ३. हे अर्थिजनस्य कल्पभूरुह. ४. सूर्यस्य. ५. शिवो राजानश्च. ६. किरणा अङ्घ्रिश्च. ७. 'त्वं कोऽसि' क. ८. महाभारताभिधो ग्रन्थः, भारतवर्षं च. ९. वेदव्यासस्य. १०. प्राप्तगुणोत्कर्ष. ११. ताडयतीति ताडकः शत्रुः; पक्षे ताडका रामायणप्रसिद्धा काचन राक्षसी. १२. अश्वैर्वानरैश्च. १३. क्षतं दुर्दशाया आस्यं मुखं प्रारम्भो येन; पक्षे क्षतो दुष्टो दशास्यो रावणो येन. १४. रामचन्द्रस्य. १५. युधिष्ठिरो धर्मात्मजः, सत्यसंधश्च प्रसिद्ध एव.

त्वं कोऽसि वि[1]प्रजनसेवितशेषवृत्तिः
सङ्ग्रामनिष्ठुर युधिष्ठिरपार्थिवस्य ॥ ४८ ॥
त्वं [2]भूरिकुञ्जरबलो [3]भुवनैकमल्ल-
विद्याविभूषिततनुर्नृप पावनोऽसि।
[4]प्रच्छन्नसूपकृतिसंभृतबन्धुवाञ्छः
कस्त्वं कवीन्द्रकृतमोद [5]वृकोदरस्य ॥ ४९ ॥
एकस्त्वमीश भुवि [6]धन्वभृतां वरिष्ठः
सं[7]स्वामिकारिगणदर्पहरस्त्वमाजौ। (?)
[8]गन्धर्वराजपृतनाविजयाप्तकीर्ति-
स्त्वं कोऽसि सुन्दर [9]पुरंदरनन्दनस्य ॥ ५० ॥
[10]दुर्योधनारिबलदर्पहृतस्तवेश
यत्नः [11]परार्जुनयशःप्रसरं निरोद्धुम्।

१. विप्रजनसेविताद्यच्छेषं तेन वृत्तिर्यस्य. २. दशसहस्रनागबलो भीमसेन इति भारते प्रसिद्धम्; राजपक्षे भूरिकुञ्जरयुक्तं बलं सैन्यं यस्य. ३. मल्लविद्याविभूषिततनुर्भीमः; राजपक्षे भुवनैकमल्लेति संबोधनम्. ४. प्रच्छन्ना या सूपकृतिः सूपकर्म तया संभृता बन्धुवाञ्छा येन. भीमः सूपकारो भूत्वा विराटसदने स्थित इति भारते विराटपर्वणि प्रसिद्धम्; अन्यत्र प्रच्छन्ना या शोभना उपकृतिरुपकारस्तया. महान्तस्तु प्रच्छन्नमेवोपकुर्वन्ति न तु स्वोपकारं प्रोद्घोषयन्ति. ५. भीमस्य. ६. 'धर्मभृतां' क. अर्जुनस्य धनुर्धरत्वं प्रसिद्धं न तु धर्मभृत्त्वम्. ७ 'संशप्तकारिगणदर्पहरस्त्वमाजौ' इति पाठो भाति. 'संशप्तकास्तु समरे सङ्ग्रामादनिवर्तिनः' इति कोषप्रामाण्यात्संशप्तकाः सङ्ग्रामादनिवर्तिनो येऽरयस्तेषां गणस्य दर्पहर इति राजपक्षे; अर्जुनपक्षे तु संशप्तका नाम केचन क्षत्रिया आसन्, तैः सहार्जुनस्य युद्धं महाभारते द्रोणपर्वण्यतीव प्रसिद्धमस्तीति ज्ञेयम्. ८. गन्धर्वराजा अश्वश्रेष्ठास्तेषां पृतना अश्वसैन्यम्. भट्टकीलहार्नस्तु 'Nothing definite of any historical importance is said of Mahîpâla, unless there is in V. 50 an allusion to some war in which a Prince of the Gandharvas was defeated by him' इति वदति; अर्जुनपक्षे गन्धर्वराजस्य चित्ररथस्य पृतना. इयं कथा भारते वनपर्वणि द्रष्टव्या. ९. अर्जुनस्य. १०. दुर्योधना दुःखेन योद्धुं शक्या येऽरयस्तेषां बलं तद्गर्वहारिणः; अन्यत्र दुर्योधनस्यारयः पाण्डवाः. ११. परेषां शात्रवाणामर्जुनस्य शुभ्रस्य यशसः प्रसरम्; अन्यत्र परः शत्रुर्योऽर्जुनो मध्यमपाण्डवस्तस्य यशःप्रसरम्.

त्वं कोऽसि [1]सूर्यजनितप्रमदार्थिसार्थ-
दौर्गत्यकर्तन [2]विकर्तनसंभवस्य ॥ ९१ ॥
रत्नालयस्त्वमसि धाम गभीरताया-
स्त्वं पासि [3]पार्थसम भूमिभृतः प्रविष्टान् ।
अन्तःस्थितस्तव हरिः सततं नरेश
कस्त्वं वितीर्णरिपुजागर सागरस्य ॥ ९२ ॥
शौर्यैकभूः क्रमसमागतसत्त्ववृत्ति-
स्त्वं [4]राजकुञ्जरशिरःप्रवितीर्णपादः ।
दृप्तारिभास्करतिरस्कृतिसिं[5]हिकाभूः
कस्त्वं महीपतिमृगाङ्क [6]मृगाधिपस्य ॥ ९३ ॥
[7]दानं ददासि विकटोन्नतवंशशोभ-
स्त्वं दन्तपालिकरवालहतारिदर्पः । (?)
[8]क्षोणीभृतो जयसि तुङ्गतया नरेन्द्र
त्वं कोऽसि वैरिबलवारण [9]वारणस्य ॥ ९४ ॥
सद्म श्रियस्त्वमसि [10]मित्रकृतप्रमोद-
स्त्वं [11]राजहंससमलंकृतपादमूलः ।
स्वामिन्नधःकृत[12]जडोऽसि [13]गुणाभिरामः
कस्त्वं स्मिताढ्यमुखपङ्कज पङ्कजस्य ॥ ९५ ॥
सत्[14]पत्रभूषिततनुः सुविशुद्ध[15]कोशो-
स्त्वं चन्द्रकान्तिसमलंकृतकान्तमूर्तिः ।
ख्यातं तवैव कविवल्लभ [16]सौमनस्यं
त्वं ब्रूहि कः समरभैरव कैरवस्य ॥ ९६ ॥

---

१. कर्णः सूर्यसुतः, राजा च सूर्यपालसुतः. २. कर्णस्य. ३. हे अर्जुनतुल्य. ४. राजकुञ्जराः श्रेष्ठगजाः, नृपश्रेष्ठाश्च. ५. सिंहिकाभूः, सिंहो राहुश्च. ६. केसरिणः. ७. मदजलमपि. ८. पर्वतान्महीपतींश्च. ९. गजस्य. १०. मित्रः सूर्योऽपि. ११. राजहंसाः पक्षिविशेषाः, नृपश्रेष्ठाश्च. १२. जलं सलिलम्, जडश्च मूर्खः. १३. गुणास्तन्तवः, शौर्यौदार्यादयश्च. १४. पत्रं वाहनमपि. १५. कोशः कर्णिकापि. १६. पुष्पत्वम्, पाण्डित्यं च.

त्वं पश्यतां हरसि देव मनांसि शश्व-
न्मङ्गल्यभूस्त्वमसि निर्मलताभिरामः।
कोऽसि प्रसीद वद सद्गुणरत्नयोनि-
स्त्वं कच्छपारिकुलभूषण भूषणस्य[1] ॥ ५७ ॥
धात्रा परोपकरणाय विसृष्टकाय[2]
सच्छायजन्मसमलंकृततुङ्गगोत्रैः[3]।
ब्रूहि त्रिसंध्यमवनीश्वरवन्दनीय-
स्त्वं कोऽसि सूर्यनृपनन्दन चन्दनस्य ॥ ५८ ॥
नाधःकृतर्द्विजपतिर्[4]न गदान्वितोऽसि[5]
न त्वं विशुद्धहृदय प्रथितो[6]ग्रमायः।
त्वं जातु न क्षतवृषो[7] न जडे[8] कृतास्थ-
स्तेनास्तु नाथ हरिणो[9]पमितिः कथं ते ॥ ५९ ॥
नित्यं संनिहितक्षयः स तमसा प्रायोऽभिभूयेत स
त्वत्त्रासाद्भुवनैकनाथ हरिणस्तस्योदरे प्राविशत्।
मूर्तिस्तस्य कलङ्किता सजडतां धत्ते स दोषाकर
शंश्चत्ते[10] विदितस्तथापि नृपते राजा त्वमित्य[11]द्भुतम् ॥ ६० ॥
एकेनोत्तरगोग्रहे विमुखतां पार्थेन नीताः परे
व्यासेन स्तुतिरर्जुनस्य विहितेत्यज्ञायि पूर्वं किल।
तत्सम्यक्प्रतिभाति संप्रति पुनः श्रीमन्महीपाल न-
स्त्वामालोक्य सहस्रशो रिपुबलं निघ्नन्तमेकं रणे ॥ ६१ ॥
किं ब्रूमो[12]ऽविकलत्वमीश भवतस्त्वं नीतिपात्रं परं
वृत्तान्तं जगतीपते चतसृणामात्मप्रियाणां शृणु।

---

१. कटककण्डलादेः. २. निर्मितशरीर. ३. गोत्रः पर्वतोऽपि. ४. गरुडः, ब्राह्मणश्रेष्ठश्च. ५. गदा आयुधविशेषः, गदश्च रोगः. 'मदान्वितो' क. ६. विष्णुर्मायावीति पुराणप्रसिद्धम्. ७. वृषो धर्मः, कश्चिदसुरश्च. ८. जले, मूर्खे च. ९. विष्णुना. १०. 'शब्दस्ते' क. ११. राजा चन्द्रः क्षयादिदोषयुक्तः, भवांस्तद्रहितोऽपि राजेत्याश्चर्यम्. १२. 'ब्रूमोऽधिकतरत्वमीश' क.

कीर्तिर्भ्राम्यति दिक्षु गीर्गुणवतां कण्ठे लुठत्यादृता
मर्यादारहिता मही द्विजसुहृद्देहे रता श्रीरपि ॥ ६२ ॥
किं चित्रं[1] भुवनैकमल्ल यदियं मन्दाकिनी पद्मभू-
र्लोकादुद्धरता भगीरथनृपेणानायि निम्नां महीम् ।
आश्चर्यं पुनरेतदीश यदितो निम्नान्महीमण्डला-
दूर्ध्वं कीर्तितरङ्गिणी कमलभूलोकं त्वया प्रापिता ॥ ६३ ॥
चित्रं नात्र [2]सलक्षणस्त्वमकरोः सर्वात्मना विद्विषो
देव [3]प्रत्ययलोपमाशु विशिखैः संमूर्छितस्याहवे ।
क्रोधाद्भैरवमूर्तिरुल्लसदसिक्रूरप्रहाराद्भुतै-
रस्य त्वं यदनीनशः प्रकृतिमप्येतन्न नाश्चर्यकृत् ॥ ६४ ॥
अत्यम्बुधि भवद्धैर्यमत्यादित्यं भवन्महः ।
अतिसिंहं भवच्छौर्यमतः केनोपमीयसे ॥ ६५ ॥
केयूरं तव भूपाल भुजदण्डे विराजते ।
किरीटमिव बाह्वन्तर्निवासि विजयश्रियः ॥ ६६ ॥
[4]यदर्चायां नित्यं त्रिभुवनगुरोस्तोत्रमकृथा-
स्तदेष प्रीतस्त्वां [5]ध्रुवमकृत कल्पस्थितिमिह ।
यदुत्सङ्गे तुङ्गे [6]तव लुठति चन्द्रांशुविमला
प्रलम्बव्याजेन क्षितितिलक तारावलिरियम् ॥ ६७ ॥
वैतालिकैरित्थमभिष्टुतेन संपूजितामर्त्यगुरुद्विजेन ।
विमुक्तकारागृहसंयतेन वितीर्णभूताभयदक्षिणेन ॥ ६८ ॥
तेनाभिषिक्तमात्रेण प्रतिजज्ञे द्वयं स्वयम् ।
पद्मनाथस्य संसिद्धिः कन्यायाः सद्वरार्पणम् ॥ ६९ ॥

---

१. 'चित्रं तावदिदं सुरेन्द्रभवनान्मन्दाकिनीपाथसा केनाप्युत्तमतेजसा नृपतिना क्ष्मामण्डलं मण्डितम् । नातश्चित्रतरं निशाकरकलालावण्यदुग्धोदधे भूमेर्यद्भवता विरञ्चिनगरी कीर्तिप्लवैः प्लाव्यते ॥' इति प्राचीनपद्यच्छायामनुहरतीदं पद्यम्. २. सप्तसप्ततिमिते पद्येऽपि 'सूरिसलक्षणः' इति प्रयोगोऽस्ति. 'स लक्षशः' क. ३. प्रकृतिप्रत्ययौ व्याकरणप्रसिद्धावपि. ४. 'यदर्चा संतत्य' क. ५. ध्रुवो नक्षत्रविशेषोऽपि. ६. 'धवलरविचन्द्रांशु' क.

तच्च[1] द्वयं कृतमनेन विवेकभाजा
राजात्मजा मदनपालवराय[2] दत्ता ।
श्रीपद्मनाथसुरमन्दिरमेतदुच्चै-
र्नीतं समाप्तिमविनाशि यशःशरीरम् ॥ ७० ॥

समर्धिता[3] ब्रह्मपुरी च तेन शेषान्विधायावनिदेवमुख्यान् ।
प्रवर्तितं सत्रमतन्द्रितेन मृष्टान्नपानैरतिधार्मिकेण ॥ ७१ ॥

श्रीपद्मनाथस्य स लोकनाथश्चक्रिद्वयं[4] (?) भूपतिचक्रवर्ती ।
नैवेद्यपाकाय विपक्वबुद्धिः प्रादात्प्रदीपाय च गोत्रदीपः ॥ ७२ ॥

ब्रह्मोत्तरं मण्डपिकासमुत्थं द्वैधा[5] विधाय स्वयमीश्वरेण ।
श्रीपद्मनाथाय वितीर्णमर्धमर्धं च वैकुण्ठसुरेश्वराय ॥ ७३ ॥

विलासिनीवादकगायनादेर्यथार्हतः पादकुलस्य वृत्तिम् ।
स पद्मनाथस्य पुरः समग्रामकल्पयत्प्रेक्षणकाय भूपः ॥ ७४ ॥

पाषाणपल्लीं प्रविभज्य सम्यग्देवाय सार्धानि पदानि पञ्च ।
संपादयामास तथा द्विजेभ्यः सार्धा चतुर्विंशतिमुत्तमेभ्यः ॥ ७५ ॥

ददौ करस्वं[6] खरवारखेटं महीपतिस्तत्रभवं समस्तम् ।
आकाशपातालसमुद्गतं च देवद्विजेभ्यो लवणाकरं च ॥ ७६ ॥

तस्यादृष्टसहायतामुपगतो योगेश्वराङ्गोद्भवः
ख्यातः सूरिसलक्षणः क्षितिपतेः सर्वत्र विश्वासभूः ।
आधारो विनयस्य शीलभवनं भूमिः श्रुतस्याकरः
स्वाध्यायस्य कृतज्ञतैकवसतिः सौजन्यकोशालयः ॥ ७७ ॥

तत्प्रत्ययेन निदधे निखिलानि धर्म-
कार्याणि धर्मनिरतः स नरेन्द्रचन्द्रः ।
विप्रः स निःस्पृहतया गुणगौरवेण
चित्तं विवेश समवृत्तितया च राज्ञः ॥ ७८ ॥

---

१. 'तत्र' ग. २. 'मदनहारिवराय' क. ३. 'समर्पिता' क. ४. 'चक्रिर्द्वयं' क. ५. 'द्विधा' क. ६. 'करस्कन्धकवाटपीटं' क.

महीपालेन ये विप्रास्तस्मिन्ग्रामे प्रतिष्ठिताः ।
तेषां नामानि लिख्यन्ते विस्तरः शासनोदितः ॥ ७९ ॥
देवलब्धिः सुधीराद्यस्तथा श्रीधरदीक्षितः ।
सूरिः कीर्तिरथः सार्धपदिनोऽस्य[1] द्विजास्त्रयः ॥ ८० ॥
गङ्गाधरो गौतमश्चा[2]मलकोऽथ गदाधरः ।
देवनागो वसिष्ठश्च देवशर्मा यशस्करः ॥ ८१ ॥
कृष्णो वराहस्वामी च गृ[3]हवासः प्रभाकरः ।
इच्छाधरो मधुश्चैव तिह्लेकः पुरुषोत्तमः ॥ ८२ ॥
रामेश्वरो द्विजवरस्तथा दामोदरो द्विजः ।
अष्टादशैते विप्राश्च पदिनः शैं[4]ङ्लो द्विजः ॥ ८३ ॥
पादोनपदिको रत्नति[5]हूणेकौ सुरार्चकौ ।
द्वावर्धपदिनावेष विप्राणां संग्रहः कृतः ॥ ८४ ॥
ददौ देवपदानां च मध्यादर्धपदं नृपः ।
विधाय शाश्वतं लोहभटकायस्थसूरये ॥ ८५ ॥
देवाय दत्तः सौवर्णो राज्ञा रत्नैः समाचितः ।
मुकुटः सु[6]महानीलो मणिर्यत्र विराजते ॥ ८६ ॥
हरिन्मणिमयं भूपतिलकस्तिलकं ददौ ।
रत्नैर्विचित्रं निष्कं च निष्कलङ्कः स भूपतिः ॥ ८७ ॥
प्रादात्केयूरयुगलं रत्नैर्बहुभिराचितम् ।
कङ्कणानां चतुष्कं च महार्हमणिभूषितम् ॥ ८८ ॥
इति रत्नमयं तावदेकमाभरणं विभोः ।
द्वितीयमनिरुद्धस्य सौवर्णं केवलं यथा ॥ ८९ ॥
कङ्कणानां चतुष्कं च भा[7]लपट्टद्वयं तथा ।
कृत्तिदारं(?) स्वर्णमुष्टिं बिभर्त्यन्वहमच्युतः ॥ ९० ॥

---

१. 'वै' क. २. 'च मलकोऽथ गयाधरः' क. ३. 'गृहदासः' क. ४. 'षड्भो' क. ५. 'तिहुणेका' क. ६. 'सुमहान्मध्ये' क. ७. 'ताल' क.

रूप्यम[1]ङ्गालिका(?) दत्ता [2]कच्चोलैः पञ्चभिर्युता ।
नैवेद्यधारणार्थं च कांस्यस्थालचतुष्टयम् ॥ ९१ ॥
सुवर्णाण्डत्रयं देवपरिवारविभूषणम् ।
धृतं चोपरि हेमाब्जमातपत्रीकृतं विभोः ॥ ९२ ॥
निवेश्य ताम्रप[3]त्रे च तन्मयेनैव ग[4]ड्डुना ।
स्नाप्यते प्रतिमा नित्यमनिरुद्धस्य राजती ॥ ९३ ॥
प्रतिमा वामनस्यैका द्वितीया लघुराच्युती ।
राजावर्तमयी चान्या द्वे पूर्वे रीतिनिर्मिते ॥ ९४ ॥
ताः प्रयत्नेन तिस्रोऽपि पूज्यन्ते गर्भवेश्मनि ।
तत्र ताम्रमयं दत्तं दीपार्थं म[5]ल्लिकाद्वयम् ॥ ९५ ॥
स्नानार्थं ताम्रकुण्डे द्वे दत्ते द्वे ताम्रपात्रिके ।
ताम्रार्धपात्रद्वितयं तथा दत्तं महीभुजा ॥ ९६ ॥
सधूपदहनाः सप्त घण्टाश्चारात्रिकान्विताः ।
दत्ताः शङ्खाश्च सप्तैव ताम्रपात्रीचतुष्टयम् ॥ ९७ ॥
सर्कांस्यभाजनं प्रादान्नृपतिः काहलाद्वयम् ।
[6]चामरं दण्डयुग्मं च रीतिस्फटिकसंभवम् ॥ ९८ ॥
बृहच्चरुद्वयं ताम्रमयं ताम्रालुका[8]त्रयम् ।
ताम्रा[9]भाण्ड्यस्तथा पञ्च दत्ताश्[10]चाटुश्च तन्मयः ॥ ९९ ॥
.... ।
एष देवोपकरणद्रव्याणां संग्रहः कृतः ॥ १०० ॥
शिलाकुट्टस्थपत्यादि[11]यन्त्रिशाकाटिकादिषु ।
वापीकूपतडागादि[12]खननाबन्धनेषु च ॥ १०१ ॥
दशमांशं तथा विंशत्यंशं सर्वत्र मण्डले ।
ददौ राजानिरुद्धाय तेन सत्रं प्रवर्तते ॥ १०२ ॥

---

१. 'मङ्गालिहा' क. २. कच्चोलः पात्रविशेषः. कचोला, कटोरा, इति हिन्दीभाषा. ३. 'पट्टे' क. ४. गड्डुर्जलपात्रविशेषः. गड्डुवा, लोटा, इति यस्य प्रसिद्धिः. 'किं त्वं लोचनगड्डुकैः स्नपयसे वक्षोजलिङ्गद्वयम्' इति प्राचीनकविप्रयोगः. ५. मल्लिका दीपाधारपात्रम् 'मञ्चिकाद्वयम्' क. ६. 'कांस्यवाढढां' क. ७. चरुः 'चरुवा' इति प्रसिद्धो बृहद्भाण्डविशेषः 'भेरिद्वयं' ग. ८. 'द्वयम्' क. ९. 'भाण्डाः' ग. १०. चाटुरिति दर्वीवाचकं देशभाषापदम्. ११. 'खानशर्करिलादिषु' ग. १२. 'चखानाबन्धनेषु' ग.

अयं देवालयः पद्मनृपतेः स्फटिकामलः।
भूयादुपार्जितः पुण्यैर्विष्णुलोक इवाक्षयः॥ १०३॥
भारद्वाजेन मीमांसान्यायसंस्कृतबुद्धिना।
कवीन्द्ररामपौत्रेण गोविन्दकविसूनुना॥ १०४॥
कविना मणिकण्ठेन सुभाषितसरस्वता।
प्रशस्तिर्द्विजमुख्येन रचितेयमनिन्दिता॥ १०५॥
प्रतापलङ्केश्वरवाग्द्वितीयां(?)बिभ्रत्सुहृत्तां मणिकण्ठसूरेः।
अशेषभाषासुकविर्लिलेख वर्णान्यशोदेव दिगम्बरार्कः॥ १०६॥
एकादशस्वतीतेषु संवत्सरशतेषु च।
एकोनपञ्चाशति च गतेष्वब्देषु विक्रमात्॥ १०७॥
पञ्चाशे चाश्विने मासे कृष्णपक्षे नृपाज्ञया।
रचिता मणिकण्ठेन प्रशस्तिरियमुज्ज्वला॥ १०८॥

अङ्कतोऽपि ११५० आश्विनबहुलपञ्चम्याम्।

ॐ॥ तैस्तैस्तस्य महीपतेः प्रतिरणं प्रौढप्रतापानले
नाश्चर्यं यदनेकशो रिपुचमूचक्रैः पतङ्गायितम्।
यस्येन्द्रप्रतिमस्य बुद्धिसचिवः सर्वज्ञकल्पोऽभव-
न्नीत्या निर्जितमौर्यवंशतिलकाचार्यः स गौरः सुधीः॥१०९॥
किं चित्रं यन्महीपालो भुनक्ति क्ष्माखिलां महीम्।
यस्य गीर्वाणमन्त्रीव मन्त्री गौरोऽभवत्सुधीः॥ ११०॥
प्रशस्तिरियमुत्कीर्णा सद्वर्णा पद्मशिल्पिना।
देवस्वामिसुतेन श्रीपद्मनाथसुरालये॥ १११॥
तथैव सिंहराजेन मौहुलेन च शिल्पिना।
प्राप्नुवन्तु समुत्कीर्णान्यक्षराणि यथार्थताम्॥ ११२॥

---

१. 'उपार्जितैः' ग. २. सूक्तिसमुद्रेण. ३. धीसचिवपदस्य रूपान्तरम्. मन्त्रीत्यर्थः. 'बुद्धिसहितः' क. ४. नीत्या निर्जितो मौर्यवंशतिलकस्य (चन्द्रगुप्तस्य) आचार्यो (चाणक्यः) येन सः. चाणक्यादप्यधिकनीतिवेत्तेति भावः. 'सौर्यवंश' इति भट्टकीलहार्नः पठति स्म, व्याख्याति स्म च तथैव. ६. 'सिंहवाजेन' क. ७. 'मङ्गलेन' ग.

(२२)

कान्यकुब्जाधीशविजयचन्द्रमहीपतिसूनुयुवराज-जयच्चन्द्रस्य दानपत्रम् ।

ॐ स्वस्ति ॥

अकुण्ठोत्कण्ठवैकुण्ठकण्ठपीठलुठत्करः ।
संरम्भः सुरतारम्भे स श्रियः श्रेयसेऽस्तु वः ॥ १ ॥

आसीदशीतद्युतिवंशजातक्ष्मापालमालासु दिवं गतासु ।
साक्षाद्विवस्वानिव भूरिधाम्ना नाम्ना **यशोविग्रह** इत्युदारः ॥ २ ॥

तत्सुतोऽभून्**महीचन्द्र**श्चन्द्रधामनिभं निजम् ।
येनापारमकूपारपारे व्यापारितं यशः ॥ ३ ॥

तस्याभूत्तनयो नयैकरसिकः क्रान्तद्विषन्मण्डलो
विध्वस्तोद्धतवीरयोधतिमिरः **श्रीचन्द्रदेवो** नृपः ।
येनोदारतरप्रतापशमिताशेषप्रजोपद्रवं
श्रीमद्गाधिपुराधिराज्यमसमं[1] दोर्विक्रमेणार्जितम् ॥ ४ ॥

तीर्थानि काशिकुशिकोत्तरकोशलेन्द्र-
स्थानीयकानि परिपालयताधिगम्य ।
हेमात्मतुल्यमनिशं ददता द्विजेभ्यो
येनाङ्किता वसुमती शतशस्तुलाभिः ॥ ५ ॥

तस्यात्मजो **मदनपाल** इति क्षितीन्द्र-
चूडामणिर्विजयते निजगोत्रचन्द्रः ।
यस्याभिषेककलशोल्लसितैः पयोभिः
प्रक्षालितं कलिरजःपटलं धरित्र्याः ॥ ६ ॥

तस्मादजायत निजायतबाहुवल्लि-
बन्धावरुद्धनवराज्यगजो नरेन्द्रः ।

---

१. कनौजनगरसाम्राज्यम्.

सान्द्रामृतद्रवमुचां प्रभवो गवां यो
गोविन्दचन्द्र इति चन्द्र इवाम्बुराशेः ॥ ७ ॥

न कथमप्यलभन्त रणक्षमांस्तिसृषु दिक्षु गजानथ वज्रिणः ।
ककुभि बभ्रमुरभ्रमुवल्लभप्रतिभटा इव यस्य घटागजाः ॥ ८ ॥

अजनि **विजयचन्द्रो** नाम तस्मान्नरेन्द्रः
सुरपतिरिव भूभृत्पक्षविच्छेददक्षः ।
भुवनदलनहेलाहर्म्यहम्मीरनारी-
नयनजलदधाराधौतभूलोकतापः ॥ ९ ॥

यस्मिंश्चलत्युदधिनेमिमहीजयाय
माद्यत्करीन्द्रगुरुभारनिपीडितेव ।
याति प्रजापतिपदं शरणार्थिनी भू-
स्त्वङ्गत्तुरंगनिवहोत्थरजश्छलेन ॥ १० ॥

सोऽयं समस्तराजचक्रसंसेवितचरणः स च परमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वरनिजभुजोपार्जितकन्यकुब्जाधिपत्यश्रीचन्द्रदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वरश्रीमदनपालदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वराश्वपतिगजपतिनरपतिराजत्रयाधिपतिविविधविद्याविचारवाचस्पतिश्रीगोविन्दचन्द्रदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वराश्वपतिगजपतिनरपतिराज्यत्रयाधिपतिविविधविद्याविचारवाचस्पतिश्रीमद्विजयचन्द्रदेवो विजयी देवहलीपत्तलायां नागलीग्रामनिवासिनो निखिलजनपदानुपगतानपि च राजराज्ञीयुवराजमन्त्रिपुरोहितप्रतीहारसेनापतिभाण्डागारिकाक्षपटलिकभिषङ्नैमित्तिकान्तःपुरिकदूतकरितुरगपत्तनाकरस्थानगोकुलाधिकारिपुरुषानाज्ञापयति बोधयत्यादिशति च यथा विदितमस्तु भवतां यथोपरिलिखितग्रामः सजलस्थलः सलोहलवणाकरः सगर्तोषरः साम्रमधूकवनः समत्स्याकरस्तृणयूतिगोचरसहितः स्वसीमासहितश्चतुराघाटविशुद्धः पञ्चविंशत्यधिकद्वाद-

१. वाणीनामुत्पत्तिस्थानम्. गोविन्दचन्द्रः कविरासीदिति तात्पर्यम्.

शशतसंवत्सरेऽङ्केऽपि १२२९ माघीपौर्णमास्यां वसिष्ठघट्टे यमुनायां स्नात्वा विधिवन्मन्त्रदेवमुनिमनुजभूतपितृगणांस्तर्पयित्वा तिमिरपटलपाटनपटुमहस-मुष्णरोचिषमुपस्थायौषधिपतिशकलशेखरं समभ्यर्च्य त्रिभुवनत्रातुर्भगवतो वासुदेवस्य पूजां विधाय मातापित्रोरात्मनश्च पुण्ययशोविवृद्धयेऽस्मत्सं-मत्या समस्तराज[प्र]क्रियोपेतयौवराज्याभिषिक्तमहाराजपुत्रश्रीजयच्चन्द्रदेवेन गोकर्णकुशलतापूतकरतलोदकपूर्वमा चन्द्रार्कं यावत्काश्यपगोत्राभ्यां का-श्यपावत्सारनैध्रुवत्रिप्रवराभ्यां ठक्कुर[1]तिहुलपौत्राभ्यां ठक्कुरआल्हे[2]पुत्राभ्यां राउतश्रीदादेशर्मभ्यां ब्राह्मणाभ्यां शुद्धप्रसादं प्रदत्तो मत्वा यथादीयमान-भागभोगकरप्रवणिकरगोकरजातकरतुरुष्कदण्डक्षमारगदिआणणप्रभृतिसम-स्तनियतानियतादायानाज्ञाविधेयीभूय दास्यथ ।

भवन्ति चात्र धर्मानुशासिनः पौराणिकश्लोकाः—

'भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ ॥
शङ्खं भद्रासनं छत्रं वराश्वा वरवारणाः ।
भूमिदानस्य चिह्नानि फलमेतत्पुरंदर ॥
षष्टिं वर्षसहस्राणि स्वर्गे वसति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह मज्जति ॥
गामेकां स्वर्णमेकं च भूमेरप्येकमङ्गुलम् ॥
हरन्नरकमाप्नोति यावदाहूतसंप्लवम् ॥
वाताभ्रविभ्रममिदं वसुधाधिपत्य-
　　मापातमात्रमधुरा विषयोपभोगाः ।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
　　धर्मः सखा परमहो परलोकयाने ॥

---

१. 'ठन्कुर' इति मुद्रितः पाठः. २. 'पौत्राभ्यां' इति मुद्रितः पाठः.

सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ।
मामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥'
लिखितं ताम्रकमिदं श्रीजयपालेन ।

(इण्डियन् आण्टिक्वेरी १५।७८८.)

---

(२३)

कान्यकुब्जेश्वरश्रीजयचन्द्रमहीपतेर्दानपत्रम् ।

ॐ स्वस्ति ॥

अकुण्ठोत्कण्ठवैकुण्ठकण्ठपीठलुठत्करः ।
संरम्भः सुरतारम्भे स श्रियः श्रेयसेऽस्तु वः ॥ १ ॥

आसीदशीतद्युतिवंशजातक्ष्मापालमालासु दिवं गतासु ।
साक्षाद्विवस्वानिव भूरिधाम्ना नाम्ना **यशोविग्रह** इत्युदारः ॥ २ ॥

तत्सुतोऽभून्**महीचन्द्र**श्चन्द्रधामनिभं निजम् ।
येनापारमकूपारपारे व्यापारितं यशः ॥ ३ ॥

तस्याभूत्तनयो नयैकरसिकः क्रान्तद्विषन्मण्डलो
विध्वस्तोद्धतवीरयोधतिमिरः **श्रीचन्द्रदेवो** नृपः ।
येनोदारतरप्रभावशमिताशेषप्रजोपद्रवं
श्रीमद्गाधिपुराधिराज्यमसमं दोर्विक्रमेणार्जितम् ॥ ४ ॥

तीर्थानि काशिकुशिकोत्तरकोशलेन्द्र-
स्थानीयकानि परिपालयताधिगम्य ।
हेमात्मतुल्यमनिशं ददता द्विजेभ्यो
येनाङ्किता वसुमती शतशस्तुलाभिः ॥ ५ ॥

तस्यात्मजो **मदनपाल** इति क्षितीन्द्र-
चूडामणिर्विजयते निजगोत्रचन्द्रः ।
यस्याभिषेककलशोल्लसितैः पयोभिः
प्रक्षालितं कलिरजःपटलं धरित्र्याः ॥ ६ ॥

यस्यासीद्विजयप्रयाणसमये तुङ्गाचलोच्चैश्चल-
न्माद्यत्कुम्भिपदक्रमासमभरभ्रश्यन्महीमण्डले ।
चूडारत्नविभिन्नतालुगलितस्त्यानासृगुद्भासितः
शेषः शेषमथादिव(?) क्षणमसौ क्रोडे निलीनाननः ॥ ७ ॥

तस्मादजायत निजायतबाहुवल्लि-
बन्धावरुद्धनवराज्यगजो नरेन्द्रः ।
सान्द्रामृतद्रवमुचां प्रभवो गवां यो
गोविन्दचन्द्र इति चन्द्र इवाम्बुराशेः ॥ ८ ॥

न कथमप्यलभन्त रणक्षमांस्तिसृषु दिक्षु गजानथ वज्रिणः ।
ककुभि बभ्रमुरभ्रमुवल्लभप्रतिभटा इव यस्य घटागजाः ॥ ९ ॥

अजनि विजयचन्द्रो नाम तस्मान्नरेद्रः
सुरपतिरिव भूभृत्पक्षविच्छेददक्षः ।
भुवनदलनहेलाहर्म्यहम्मीरनारी-
नयनजलदधाराधौतभूलोकतापः ॥ १० ॥

लोकत्रयाक्रमणकेलिविशृङ्खलानि
प्रख्यातकीर्तिकविवर्णितवैभवानि ।
यस्य त्रिविक्रमपदक्रमभाञ्जि भान्ति
प्रोद्द्योतयन्ति बलिराजभयं यशांसि ॥ ११ ॥

यस्मिंश्चलत्युदधिनेमिमहीजयार्थे
माद्यत्करीन्द्रगुरुभारनिपीडितेव ।
याति प्रजापतिपदं शरणार्थिनी भू-
स्त्वङ्गत्तुरङ्गनिवहोत्थरजश्छलेन ॥ १२ ॥

तस्मादद्भुतविक्रमादथ जयच्चन्द्राभिधानः पति-
र्भूपानामवतीर्ण एष भुवनोद्धाराय नारायणः ।
द्वैधीभावमपास्य विग्रहरुचिं धिक्कृत्य शान्ताशयाः
सेवन्ते यमुदग्रबन्धनभयध्वंसार्थिनः पार्थिवाः ॥ १३ ॥

गच्छेन्मूर्छामतुच्छां न यदि कवलयेत्कूर्मपृष्ठाभिघात-
प्रत्यावृत्तः श्रमार्तो नमदखिलफणश्वासवात्यासहस्रम् ।
उद्योगे यस्य धावद्धरणिधरधुनीनिर्झरस्फारधार-
भ्रश्यद्दानद्विपालीबहलभरगलद्धैर्यमुद्रः फणीन्द्रः ॥ १४ ॥

सोऽयं समस्तराजचक्रसंसेवितचरणः स च परमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वरनिजभुजोपार्जितकन्यकुब्जाधिपत्यश्रीचन्द्रदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वरश्रीमदनपालदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वराश्वपतिगजपतिनरपतिराजत्रयाधिपतिविविधविद्याविचारवाचस्पतिश्रीगोविन्दचन्द्रदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वराश्वपतिगजपतिनरपतिराजत्रयाधिपतिविविधविद्याविचारवाचस्पतिश्रीविजयचन्द्रदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वराश्वपतिगजपतिनरपतिराजत्रयाधिपतिविविधविद्याविचारवाचस्पतिश्रीमज्जयच्चन्द्रदेवो विजयी असुरेसपत्तलायां केमोलीग्रामनिवासिनो निखिलजनपदानुपगतानपि च राजराज्ञीयुवराजमन्त्रिपुरोहितप्रतीहारसेनापतिभाण्डागारिकाक्षपटलिकभिषङ्नैमित्तिकान्तःपुरिकदूतकरितुरगपत्तनाकरस्थानगोकुलाधिकारिपुरुषानाज्ञापयति बोधयत्यादिशति च । विदितमस्तु भवतां यथोपरिलिखितग्रामः सजलस्थलः सलोहलवणाकरः समत्स्याकरः सगर्तोषरः सगिरिगहननिधानः समधूकाम्रवनवाटिकाविटपतृणयूतिगोचरपर्यन्तः सोर्ध्वाधश्चतुराघाटविशुद्धः स्वसीमापर्यन्तस्त्रिचत्वारिंशदधिकद्वादशशतसंवत्सरे आषाढे मासि शुक्लपक्षे सप्तम्यां तिथौ रविदिने अङ्कतोऽपि संवत् १२४३ आषाढसुदि ७ रवौ अद्येह श्रीमद्वाराणस्यां गङ्गायां स्नात्वा विधिवन्मन्त्रदेवमुनिमनुजभूतपितृगणांस्तर्पयित्वा तिमिरपटलपाटनपटुमहसमुष्णरोचिषमुपस्थायौषधिपतिशकलशेखरं समभ्यर्च्य त्रिभुवनत्रातुर्भगवतो वासुदेवस्य पूजां विधाय प्रचुरपायसेन हविषा हविर्भुजं हुत्वा मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धयेऽस्माभिर्गोकर्णकुशलतापूतकरतलोदकपूर्वकं भारद्वाजगोत्राय भारद्वाजाङ्गिरसबा-

र्हस्पत्येति त्रिप्रवराय राउतश्रीआढलेपौत्राय राउतश्रीदूंटापुत्राय डोडराउतश्रीअणंगाय चन्द्रार्कं यावच्छासनीकृत्य प्रदत्तो मत्वा यथादीयमानभागभोगकरप्रवणिकरप्रभृतिनियतानियतसमस्तदायानाज्ञाविधेयीभूय दास्यथेति।

भवन्ति चात्र श्लोकाः—

भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति।
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ॥
शङ्खं भद्रासनं छत्रं वराश्वा वरवारणाः।
भूमिदानस्य चिह्नानि फलमेतत्पुरंदर॥
षष्टिं वर्षसहस्राणि स्वर्गे वसति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह मज्जति॥
तडागानां सहस्रेण वाजपेयशतेन च।
गवां कोटिप्रदानेन भूमिहर्ता न शुध्यति॥
वारिहीनेष्वरण्येषु शुष्ककोटरवासिनः।
कृष्णसर्पाश्च जायन्ते देवब्रह्मस्वहारिणः॥
न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम्॥
वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरा विषयोपभोगाः।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
धर्मः सखा परमहो परलोकयाने॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत॥

(इण्डियन् आण्टिक्वेरी १५।११-१२)

(२४)

महाराजश्रीमहेन्द्रपालस्य दानपत्रम् ।

(पत्रोपरि राजमुद्रा)

परमवैष्णवो महाराजश्रीदेवशक्तिदेवस्तस्य पु-
त्रस्तत्पादानुध्यातः श्रीभूयिकादेव्यामुत्पन्नः प-
रममाहेश्वरो महाराजश्रीवत्सराजदेवस्तस्य पुत्र-
स्तत्पादानुध्यातः श्रीसुन्दरीदेव्यामुत्पन्नः परम-
भगवतीभक्तो महाराजश्रीनागभटदेवस्तस्य पु-
त्रस्तत्पादानुध्यातः श्रीमदीसटादेव्यामुत्पन्नः पर-
मादित्यभक्तो महाराजश्रीरामभद्रदेवस्तस्य पुत्र-
स्तत्पादानुध्यातः श्रीमदप्पादेव्यामुत्पन्नः परम-
भगवतीभक्तो महाराजश्रीभोजदेवस्तस्य पुत्रस्त-
त्पादानुध्यातः श्रीचन्द्रभट्टारिकादेव्यामुत्पन्नः
परमभगवतीभक्तो महाराजश्रीमहेन्द्रपालदेवः ॥

(दानपत्रम्)

स्वस्तिश्रीमहोदयसमावासितानेकगोहस्त्यश्वरथपत्तिसंपन्नस्कन्धावारात्परमवैष्णवो महाराजश्रीदेवशक्तिदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीभूयिकादेव्यामुत्पन्नः परममाहेश्वरो महाराजश्रीवत्सराजदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीसुन्दरीदेव्यामुत्पन्नः परमभगवतीभक्तो महाराजश्रीनागभटदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीमदीसटादेव्यामुत्पन्नः परमादित्यभक्तो महाराजश्रीरामभद्रदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीमदप्पादेव्यामुत्पन्नः परमभगवतीभक्तो महाराजश्रीभोजदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीचन्द्रभट्टारिकादेव्यामुत्पन्नः परमभगवतीभक्तो महाराजश्रीमहेन्द्रपालदेवः श्रावस्तीभुक्तौ श्रावस्तीमण्डलान्तःपातिवालयिकाविषयसंबद्धपानीयकग्रामसमुप-

---

१. महोदयमिति कान्यकुब्ज(कनौज)नगरस्य नामान्तरम्. २. श्रावस्तीति 'साहेतमाहेत'नाम्ना प्रसिद्धो ग्रामो 'गोंडा'प्रान्ते वर्तते.

गतान्सर्वानेव यथास्थाननियुक्तान्प्रतिवासिनश्च समाज्ञापयति । उपरिलिखितग्रामः सर्वायसमेत आचन्द्रार्कक्षितिकालं पूर्वदत्तदेवब्रह्मदेयवर्जितो मया पित्रोः पुण्याभिवृद्धये सावर्णसगोत्रकौथुमच्छन्दोगसब्रह्मचारिभट्टपद्मसाराय सवितुः कुम्भसंक्रान्तौ स्नात्वा प्रतिग्रहेण प्रतिपादित इति विदित्वा भवद्भिः समनुमन्तव्यम् । प्रतिवासिभिरप्याज्ञाश्रवणविधेयैर्भूत्वा सर्वाया अस्य समुपनेया इति ।

श्रीमद्भाकप्रयुक्तस्य शासनस्य स्थिरायतेः ।
संवत्सराणां १०० ५० ५ माघसुदि १० निबद्धम् ॥[1]

(इण्डियन् आण्टिक्केरी १५।१०५-१३)

(२९)

महाराजश्रीविनायकपालस्य दानपत्रम् ।

(पत्रोपरि राजमुद्रा)

परमवैष्णवो महाराजश्रीदेवशक्तिदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीभूयिकादेव्यामुत्पन्नः परममाहेश्वरो महाराजश्रीवत्सराजदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीसुन्दरीदेव्यामुत्पन्नः परमभगवतीभक्तो महाराजश्रीनागभटदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीमदीसटादेव्यामुत्पन्नः परमादित्यभक्तो महाराजश्रीरामभद्रदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीमदप्पादेव्यामुत्पन्नः परमभगवतीभक्तो महाराजश्रीभोजदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीचन्द्रभट्टारिकादेव्यामुत्पन्नः परमभगवतीभक्तो महाराजश्रीमहेन्द्रपालदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीदेहनागादेव्यामुत्पन्नः परमवै-

---

१. अत्र संवत्सराङ्काणां संकलने १५५ इयं संख्या समुत्पद्यते. अयं सुप्रसिद्धस्य कान्यकुब्जमहीपतेर्हर्षवर्धनस्य संवत्सरः. हर्षवर्धनश्च ६०६ खिस्ताब्द आसीदित्येतेषु वर्षेषु पूर्वसंख्यायां योजितेषु ७६१ मितः खिस्ताब्दो दानपत्रलेखनकाल इति फ्लीटपण्डितो वक्ति.

ष्णवो महाराजश्रीभोजदेवस्तस्य भ्राता श्रीमहेन्द्रपालदेवपुत्रस्तयोः पादानुध्यातः श्रीमहीदेवीदेव्यामुत्पन्नः परमादित्यभक्तो महाराजश्रीविनायकपालदेवः ॥

(दानपत्रम्)

ॐ स्वस्ति महोदयसमावासितानेकगोहस्त्यश्वरथपत्तिसंपन्नस्कन्धावारात्परमवैष्णवो महाराजश्रीदेवशक्तिदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीभूयिकादेव्यामुत्पन्नः परममाहेश्वरो महाराजश्रीवत्सराजदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीसुन्दरीदेव्यामुत्पन्नः परमभगवतीभक्तो महाराजश्रीनागभटदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीमदीसटादेव्यामुत्पन्नः परमादित्यभक्तो महाराजश्रीरामभद्रदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीमदप्पादेव्यामुत्पन्नः परमभगवतीभक्तो महाराजश्रीभोजदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीचन्द्रभट्टारिकादेव्यामुत्पन्नः परमभगवतीभक्तो महाराजश्रीमहेन्द्रपालदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीदेहनागादेव्यामुत्पन्नः परमवैष्णवो महाराजश्रीभोजदेवस्तस्य भ्राता श्रीमहेन्द्रपालदेवपुत्रस्तयोः पादानुध्यातः श्रीमहीदेवीदेव्यामुत्पन्नः परमादित्यभक्तो महाराजश्रीविनायकपालदेवः प्रतिष्ठानभुक्तौ[१] वाराणसीविषयसंबद्धकाशीपारपथकप्रतिबद्धटिक्करिकाग्रामसमुपगतान्सर्वानेव यथास्थाननियुक्तान्प्रतिवासिनश्च समाज्ञापयति । उपरिलिखतग्रामः सर्वायसमेत आ चन्द्रार्कक्षितिकालं पूर्वदत्तदेवब्रह्मदेयवर्जितो मया पित्रोः पुण्याभिवृद्धये दर्भिसगोत्राथर्वसब्रह्मचारिभट्टभुल्लाकाय षष्ठ्यां गङ्गायां स्नात्वा प्रतिग्रहेण प्रतिपादित इति विदित्वा भवद्भिः समनुमन्तव्यः । प्रतिवासिभिरप्याज्ञाश्रवणविधेयैर्भूत्वा सर्वाया अस्य समुपनेया इति ।

श्रीहर्षेण प्रयुक्तस्य शासनस्य स्थिरायतेः ।

संवत्सराणां १०० ८० ८ फाल्गुनबदि ९ निबद्धम् ॥

(इण्डियन् आण्टिक्वेरी १५।१३८–४१)

१. एतत्प्रतिष्ठानं नाम नगरं चन्द्रवंश्यमहीपतीनां राजधानी प्रयागसमीपे क्वचिदासीत्. 'एतद्भगवत्या भागीरथ्या यमुनासङ्गपावनेषु सलिलेषु पुण्येष्ववलोकयत इवात्मानं प्रतिष्ठानस्य' इति विक्रमोर्वश्यां द्वितीयेऽङ्के उर्वशयुक्तिः. दक्षिणदेशे पैठणनाम्ना प्रसिद्धं प्रतिष्ठानं त्वन्यत्.

(२६)

मन्दसोरनगरस्थसूर्यमन्दिरप्रशस्तिः।

सिद्धम् ॥

यो वृत्त्यर्थमुपास्यते सुरगणैः सिद्धैश्च सिद्ध्यर्थिभि-
र्ध्यानैकाग्र(ग्र्य)परैर्विधेयविषयैर्मोक्षार्थिभिर्योगिभिः।
भक्त्या तीव्रतपोधनैश्च मुनिभिः शापप्रसादक्षमै-
र्हेतुर्यो जगतः क्षयाभ्युदययोः पायात्स वो भास्करः ॥

तत्त्वं ज्ञानविदोऽपि यस्य न विदुर्ब्रह्मर्षयोऽभ्युद्यताः
कृत्स्नं यश्च गभस्तिभिः प्रविसृतैः पुष्णाति लोकत्रयम्।
गन्धर्वामरसिद्धकिंनरनरैः संस्तूयतेऽभ्युत्थितो
भक्तेभ्यश्च ददाति योऽभिलषितं तस्मै सवित्रे नमः ॥

यः प्रत्यहं प्रतिविभात्युदयाचलेन्द्र-
विस्तीर्णतुङ्गशिखरस्खलितांशुजालः।
क्षीबाङ्गनाजनकपोलतलाभिरामः
पायात्स वः सुकिरणाभरणो विवस्वान् ॥

कुसुमभरानततरुवरदेवकुलसभाविहाररमणीयात्।
लाटविषयान्नगावृतशैलाज्जगति प्रथितशिल्पाः ॥

ते(तद्)देशपार्थिवगुणापहृताः प्रकाश-
मध्वादिजान्यविरलान्यसुखान्यपास्य।
जातादरा दशपुरं[1] प्रथमं मनोभि-
रन्वागताः ससुतबन्धुजनाः समेत्य ॥

मत्तेभगण्डतटविच्युतदानबिन्दु-
सिक्तोपलाचलसहस्रविभूषणायाः।

---

1. 'दशपुरं' इति नाम्नोऽपभ्रंशो 'दसोर' इति तस्य च क्रमेण 'मन्दसोर' इति जात इत्याधुनिकाः.

पुष्पावतंसतरुम(ख)ण्डवतंसकाया
भूमेः परं तिलकभूतमिदं क्रमेण ॥
तटोत्थवृक्षच्युतनैकपुष्पविचित्रतीरान्तजलानि भान्ति ।
प्रफुल्लपद्माभरणानि यत्र सरांसि कारण्डवसंकुलानि ॥
विलोलवीचीचलितारविन्दपतद्रजःपिञ्जरितैश्च हंसैः ।
स्वकेसरोदारभरावभुग्नैः क्वचित्सरांस्यम्बुरुहैश्च भान्ति ॥
स्वपुष्पभारावनतैर्नगेन्द्रैर्मदप्रगल्भालिकुलस्वनैश्च ।
अजस्रगाभिश्च पुराङ्गनाभिर्वनानि यस्मिन्समलंकृतानि ॥
चलत्पताकान्यबलासनाथान्यत्यर्थशुक्लान्यधिकोन्नतानि ।
तडिल्लताचित्रसिताभ्रकूटतुल्योपमानानि गृहाणि यत्र ॥
कैलासतुङ्गशिखरप्रतिमानि चान्या-
न्याभान्ति दीर्घवलभीनि सवेदिकानि ।
गान्धर्वशब्दमुखराणि निविष्टचित्र-
कर्माणि लोलकदलीवनशोभितानि ॥
प्रासादमालाभिरलंकृतानि धरां विदार्येव समुत्थितानि ।
विमानमालासदृशानि यत्र गृहाणि पूर्णेन्दुकरामलानि ॥
यद्भात्यभिरम्यसरिद्द्वयेन चपलोर्मिणा समुपगूढम् ।
रहसि कुचशालिनीभ्यां प्रीतिरतिभ्यां स्मराङ्गमिव ॥
सत्पक्षमादमशमव्रतशौचधैर्य-
स्वाध्यायवृत्तविनयस्थितिबुद्ध्युपेतैः ।
विद्यातपोनिधिभिरस्मयितैश्च विप्रै-
र्यद्भ्राजते ग्रहगणैः खमिव प्रदीप्तैः ॥
अथ समेत्य निरन्तरसंगतैरहरहः प्रविजृम्भितसौहृदाः ।
नृपतिभिः सुतवत्प्रतिमानिताः प्रमुदिता न्यवसन्त सुखं पुरे ॥

१. 'सिवानी' 'सुमली' इति च नदीद्वयं मन्दसोरनगरसमीपस्थम्. २. ते पूर्वोक्ता लाटविषयादागताः पट्टशिल्पिनः.

श्रवणसुभगं धानुर्वेद्यं दृढं परिनिष्ठिताः
सुचरितशतासङ्गाः केचिद्विचित्रकथाविदः ।
विनयनिभृताः सम्यग्धर्मप्रसङ्गपरायणाः
प्रियमपरुषं पथ्यं चान्ये क्षमा बहु भाषितुम् ॥
केचित्स्वकर्मण्यधिकास्तथान्यैर्विज्ञायते ज्योतिषमात्मवद्भिः ।
अद्यापि चान्ये समरप्रगल्भाः कुर्वन्त्यरीणामहितं प्रसह्य ॥
प्राज्ञा मनोज्ञवधवः(पुषः) प्रथितोरुवंशा
वंशानुरूपचरिताभरणास्तथान्ये ।
सत्यव्रताः प्रणयिनामुपकारदक्षा
विस्रम्भपूर्वमपरे दृढसौहृदाश्च ॥
विजितविषयसङ्गैर्धर्मशीलैस्तथान्यै-
र्मृदुभिरधिकसत्त्वैर्लोकयात्राम(प)रैश्च ।
स्वकुलतिलकभूतैर्मुक्तरागैरुदारै-
रधिकमभिविभाति श्रेणि[1]रेवंप्रकारैः ॥
तारुण्यकान्त्युपचितोऽपि सुवर्णहार-
ताम्बूलपुष्पविधिना समलंकृतोऽपि ।
नारीजनः प्रियमुपैति न तावदग्र्यां (?)
यावन्न पट्टमयवस्त्रयुगानि धत्ते ॥
स्पर्शवता वर्णान्तरविभागचित्रेण नेत्रसुभगेन ।
यैः सकलमिदं क्षितितलमलंकृतं पट्टवस्त्रेण ॥
विद्याधरीरुचिरपल्लवकर्णपूर-
वातेरितास्थिरतरं प्रविचिन्त्य लोकम् ।
मानुष्यमर्थनिचयांश्च तथा विशालां-
स्तेषां शुभा मतिरभूदचला ततस्तु ॥

---

१. सजातीयानां शिल्पिनां समूहः.

चतुःसमुद्रान्तविलोलमेखलां सुमेरुकैलासबृहत्पयोधराम् ।
वनान्तवान्तस्फुटपुष्पहासिनीं **कुमारगुप्ते** पृथिवीं प्रशासति ॥
समानधीः शुक्रबृहस्पतिभ्यां ललामभूतो भुवि पार्थिवानाम् ।
रणेषु यः पार्थसमानकर्मा बभूव गोप्ता **नृपविश्ववर्मा** ॥

दीनानुकम्पनपरः कृपणार्तवर्ग-
संधा(?)प्रदोऽधिकदयालुरनाथनाथः ।
कल्पद्रुमः प्रणयिनामभयप्रदश्च
भीतस्य यो जनपदस्य च बन्धुरासीत् ॥

तस्यात्मजः स्थैर्यनयोपपन्नो बन्धुप्रियो बन्धुरिव प्रजानाम् ।
बन्ध्वर्तिहर्ता **नृपबन्धुवर्मा** द्विड्दृप्तपक्षक्षपणैकदक्षः ॥

कान्तो युवा रणपटुर्विनयान्वितश्च
राजापि सन्नुपसृतो न मदैः स्मयाद्यैः ।
शृङ्गारमूर्तिरभिभात्यनलंकृतोऽपि
रूपेण यः कुसुमचाप इव द्वितीयः ॥

वैधव्यतीव्रव्यसनक्षतानां स्मृत्वा यमद्याप्यरिसुन्दरीणाम् ।
भयाद्भवत्यायतलोचनानां घनस्तनायासकरः प्रकम्पः ॥

तस्मिन्नेव क्षितिपतिवृषे बन्धुवर्मण्युदारे
सम्यक्स्फीतं दशपुरमिदं पालयत्युन्नतांसे ।
शिल्पावाप्तैर्धनसमुदयैः पट्टवायै[1]रुदारं
श्रेणीभूतैर्भवनमतुलं कारितं दीप्तरश्मेः ॥

विस्तीर्णतुङ्गशिखरं शिखरिप्रकाश-
मभ्युद्गतेन्द्वमलरश्मिकलापगौरम् ।
यद्भाति पश्चिमपुरस्य निविष्टकान्त-
चूडामणिप्रतिसमं नयनाभिरामम् ॥

रामासनाथरचने दरभास्करांशु-
वह्निप्रतापसुभगे जललीनमीने ।

१. हिन्दुस्तानीभाषायां 'पट्टवा' इति प्रसिद्धैः.

चन्द्रांशुहर्म्यतलचन्दनतालवृन्त-
हारोपभोगरहिते हिमदग्धपद्मे ॥
रोध्रप्रियंगुतरुकुन्दलताविकोश-
पुष्पासवप्रमुदितालिक(कु)लाभिरामे ।
काले तुषारकणकर्कशशीतवात-
वेगप्रनृत्तलवलीनगणै(नै)कशाखे ॥
स्मरवशगतरुणजनवल्लभाङ्गनाविपुलकान्तपीनोरु-[1] ।
स्तनजघनघनालिङ्गननिर्भर्त्सिततुहिनहिमपाते ॥
मालवानां गणस्थित्या याते शतचतुष्टये ।
त्रिनवत्यधिकेऽब्दानां(४९३)ऋतौ सेव्यघनस्व(स्त)ने ॥
सहस्यमासशुक्लस्य प्रशस्तेऽह्नि त्रयोदशे ।
मङ्गलाचारविधिना प्रासादोऽयं निवेशितः ॥
बहुना समतीतेन कालेनान्यैश्च पार्थिवैः ।
व्यशीर्यतैकदेशोऽस्य भवनस्य ततोऽधुना ॥
स्वयशोवृद्धये सर्वमत्युदारमुदारया ।
संस्कारितमिदं भूयः श्रेण्या भानुमतो गृहम् ॥
अत्युन्नतमवदातं नभः स्पृशन्निव मनोहरैः शिखरैः ।
शशिभान्वोरभ्युदयेष्वमलमयूखायतनभूतम् ॥
वत्सरशतेषु पञ्चसु विंशत्यधिकेषु नवसु चाब्देषु(५२९)[2]।
यातेष्वभिरम्यतपस्यमासशुक्लद्वितीयायाम् ॥
स्पष्टैरशोकतरुकेतकसिन्दुवार-
लोलातिमुक्तकलतामदयन्तिकानाम् ।
पुष्पोद्गमैरभिनवैरधिगम्य नून-
मैक्यं विजृम्भितशरे हरधूतदेहे ॥
मधुपानमुदितमधुकरकुलोपगीतनगणै(नै)कपृथुशाखे ।
काले नवकुसुमोद्गमदन्तुरकान्तप्रचुररोध्रे ॥

---

१. कविसंप्रदायविरुद्धोऽयं पूर्वोत्तरार्धयोः समासः. २. विक्रमसंवत्सरोऽयम्.

शशिनेव नभो विमलं कौस्तुभमणिनेव शार्ङ्गिणो वक्षः ।
भवनवरेण तथेदं पुरमखिलमलंकृतमुदारम् ॥

अमलिनशशिलेखादन्तुरं पिङ्गलानां
परिवहति समूहं यावदीशो जटानाम् ।
विकट(च)कमलमालामंससक्तां च शार्ङ्गी
भवनमिदमुदारं शाश्वतं तावदस्तु ॥

श्रेण्यादेशेन भक्त्या च कारितं भवनं रवेः ।
पूर्वा(?) चेयं प्रयत्नेन रचिता वत्सभट्टिना ॥

स्वस्ति कर्तृलेखकवाचकश्रोतृभ्यः । सिद्धिरस्तु ॥

(इण्डियन् आण्टिक्केरी १५।१९४–२०१)

---

(२७)

मन्दसोरनगरकूपस्थितप्रशस्तिः ।

सिद्धम् ॥

स जयति जगतां पतिः पिनाकी स्मितरवगीतिषु यस्य दन्तकान्तिः ।
द्युतिरिव तडितां निशि स्फुरन्ती तिरयति च स्फुटयत्यदश्च विश्वम् ॥

स्वयंभूर्भूतानां स्थितिलयसमुत्पत्तिविधिषु
प्रयुक्तो येनाज्ञां वहति भुवनानां विधृतये ।
पितृत्वं चानीतो जगति गरिमाणं गमयता
स शंभुर्भूयांसि प्रतिदिशतु भद्राणि भवताम् ॥

फणमणिगुरुभाराक्रान्तिदूरावनम्रं
स्थगयति रुचमिन्दोर्मण्डलं यस्य मूर्ध्नाम् ।
स शिरसि विनिबध्नन्रन्ध्रिणीमस्थिमालां
सृजतु भवसृजो[1] वः क्लेशभङ्गं भुजंगः ॥

---

१. शिवस्य.

षष्ट्या सहस्रैः सगरात्मजानां खातः खतुल्यां रुचमादधानः।
अस्योदपन्ना(पाना)धिपतेश्चिराय यशांसि पायात्पयसां विधाता ॥[1]

अथ जयति जनेन्द्रः श्रीयशोधर्मनामा
प्रमदवनमिवान्तः शत्रुसैन्यं विगाह्य।
व्रणकिसलयभङ्गैर्योऽङ्गभूषां विधत्ते
तरुणतरुलतावद्वीरकीर्तीर्विनाम्य ॥

आजौ जिती(तां) विजयते जगतीं पुनश्च
श्रीविष्णुवर्धननराधिपतिः स एव।
प्रख्यात औलिकरलाञ्छन आत्मवंशो
येनोदितोदितपदं गमितो गरीयः ॥

प्राचो नृपान्सुबृहतश्च बहूनुदीचः
साम्ना युधा च वशगान्प्रविधाय येन।
नामापरं जगति कान्तमदो दुरापं
राजाधिराजपरमेश्वर इत्युदूढम् ॥

स्निग्धश्यामाम्बुदाभैः स्थगितदिनकृतो यज्वनामाज्यधूमै-
रम्भो मेघ्यं(ध्यं) मघोनावधिषु विदधता गाढसंपन्नसस्यैः।
संहर्षाद्वाणिनीनां[2] कररभसहृतोद्यानचूताङ्कुराग्रा
राजन्वन्तो रमन्ते भुजविजितभुवा भूरयो येन देशाः ॥

यस्योत्केतुभिरुन्मदद्विपकरव्याविद्धलोध्रद्रुमै-
रुद्धूतेन वनाध्वनि ध्वनिनदद्विन्ध्याद्रिरन्ध्रैर्बलैः ॥
वालेयच्छविधूम(स)रेण[3] रजसा मन्दांशु संलक्ष्यते
पर्यावृत्तशिखण्डिचन्द्रक इव ध्यामं रवेर्मण्डलम् ॥

तस्य प्रभोर्वंशकृतां नृपाणां पादाश्रयाद्विश्रुतपुण्यकीर्तिः।
भृत्यः स्वनैभृत्यजितारिषट्क आसीद्व(द्ध ?)सीयान्किल षष्ठिदत्तः ॥

१. कूपस्य. २. स्त्रीणाम्. ३. गर्दभकान्तिमलिनेन.

हिमवत इव गाङ्गस्तुङ्गनम्रः प्रवाहः
शशभृत इव रेवावारिराशिः प्रथीयान् ।
परमभिगमनीयः शुद्धिमानन्ववायो
यत उदित गरिम्णस्तायते नैगमानाम् ॥

तस्यानुकूलः कुलजात्कलत्रात्सुतः प्रसूतो यशसां प्रसूतिः ।
हरेरिवांशं वशिनं वराहं **वराहदासं** यमुदाहरन्ति ॥

सुकृतिविषयितुङ्गं रूढमूलं धरायां
स्थितिमपगतभङ्गां स्थेयसीमादधानम् ।
गुरुशिखरमिवाद्रेस्तत्कुलं स्वात्मभूत्या
रविरिव **रविकीर्तिः** सुप्रकाशं व्यधत्त ॥

बिभ्रता शुभ्रमभ्रंशि स्मार्तं वर्त्मोचितं सताम् ।
न विसंवादिता येन कलावपि कुलीनता ॥

धुतधीदीधितिध्वान्तान्हविर्भुज इवाध्वरान् ।
भानुगुप्ता ततः साध्वी तनयांस्त्रीनजीजनत् ॥

भगवद्दोष इत्यासीत्प्रथमः कार्यवर्त्मसु ।
आलम्बनं बान्धवानामन्धकानामिवोद्धवः ॥

बहुनयविधिवेधा गह्वरेऽप्यर्थमार्गे
विदुर इव विदूरं प्रेक्षया प्रेक्षमाणः ।
वचनरचनबन्धे संस्कृतप्राकृते यः
कविभिरुदितरागं गीयते गीरभिज्ञः ॥

प्रणिधिदृगनुगन्त्रा यस्य बौद्धेन चाक्ष्णा
न निशि तनु दवीयो नास्त्यदृष्टं धरित्र्याम् ।
पदमुदयि दधानोऽनन्तरं तस्य चाभू-
त्स भयमभय**दत्तो** नाम चिन्वन्प्रजानाम् ॥

विन्ध्यस्यावन्ध्यकर्मा शिखरतटपतत्पाण्डुरेवाम्बुराशे-
र्गोलाङ्गूलैः सहेल प्लुतिनमिततरोः पारियात्रस्य चाद्रेः ।

---

१. वैश्यानाम्. २. यादवानाम्.

आसिन्धोरन्तरालं निजशुचिसचिवाध्यासितानेकदेशं
राजस्थानीयवृत्त्या सुरगुरुरिव यो वर्णिनां भूतये पात् ॥
विहितसकलवर्णासंकरं शान्तडिम्बं
कृत इव कृतमेतद्येन राज्यं निराधि ।
स धुरमयमिदानीं दोषकुम्भस्य सूनु-
र्गुरु वहति तदूढां धर्मतो धर्मदोषः ॥
स्वसुखमनतिवाञ्छन्दुर्गमेऽध्वन्यसङ्गं
धुरमतिगुरुभारां यो दधद्भर्तुरर्थे ।
वहति नृपतिवेषं केवलं लक्ष्ममात्रं
[1]वलिनमिव विलम्बं[2] कम्बलं[3] बाहुलेयः[4] ॥
उपहितहितरक्षामण्डनो जातिरत्नै-
र्भुज इव पृथुलांसस्तस्य दक्षः कनीयान् ।
महदिदमुदपानं खातयामास बिभ्र-
च्छ्रुतिहृदयनितान्तानन्दिनिर्दोषनामा ॥
सुखाश्रेयच्छायं परिणतिहितस्वादुफलदं
गजेन्द्रेणारुग्णं द्रुममिव कृतान्तेन बलिना ।
पितृव्यं प्रोद्दिश्य प्रियमभयदत्तं पृथुधिया
प्रथीयस्तेनेदं कुशलमिह कर्मोपरचितम् ॥
[5]पञ्चसु शतेषु शरदां यातेष्वेकान्ननवतिसहितेषु (५८९) ।
मालवगणस्थितिवशात्कालज्ञानाय लिखितेषु ॥
यस्मिन्काले कलमृदुगिरां कोकिलानां प्रलापा
भिन्दन्तीव स्मरशरनिभाः प्रोषितानां मनांसि ।
भृङ्गालीनां ध्वनिरनुवनं भार(तार)मन्द्रश्च यस्मि-
न्नाधूतज्यं धनुरिव नदच्छ्रूयते पुष्पकेतोः ॥

---

१. वलियुक्तम्. २. विशेषेण लम्बमानम्. ३. सास्नाम्. ४. वृषभः. ५. ५३३-३४ मिते खिस्ताब्द इति फ्लीटपण्डितः.

प्रियतमकुपितानां रामयन्बद्धरागं
किसलयमिव मुग्धं मानसं मानिनीनाम्।
उपनयति नभस्वान्मानभङ्गाय यस्मि-
न्कुसुमसमयमासे तत्र निर्मापितोऽयम्॥
यावत्तुङ्गैरुदन्वान्किरणसमुदयं(या)सङ्गकान्तं तरङ्गै-
रालिङ्गन्निन्दुबिम्बं गुरुभिरिव भुजैः संविधत्ते सुहृत्ताम्।
बिभ्रत्सौधान्तलेखावलयपरिगतिं मुण्डमालामिवायं
सत्कूपस्तावदास्तामसृतसमरसस्वच्छविष्यन्दिताम्बुः॥
धीमान्दक्षो दक्षिणः सत्यसंधो ह्रीमाञ्छूरो वृद्धसेवी कृतज्ञः।
बद्धोत्साहः स्वामिकार्येष्वखेदी निर्दोषोऽयं पातु धर्मं चिराय॥
उत्कीर्णा गोविन्देन॥

(इण्डियन् आण्टिक्केरी १५।२२२-२२८)

(२८)

यशोधर्ममहीपतेः प्रशस्तिः।

वेपन्ते यस्य भीमस्तनितभयसमुद्भ्रान्तदैत्या दिगन्ताः
शृङ्गाघातैः सुमेरोर्विघटितदृषदः कंदरा यः करोति।
उक्षाणं तं दधानः क्षितिधरतनयादत्तपञ्चाङ्गुलाङ्कं
द्राघिष्ठः शूलपाणेः क्षपयतु भवतां शत्रुतेजांसि केतुः॥
आविर्भूतावलेपैरविनयपटुभिर्लङ्घिताचारमार्गै-
र्मोहादैदंयुगीनैरपशुभमतिभिः पीड्यमाना नरेन्द्रैः।
यस्य क्ष्मा शार्ङ्गपाणेरिव कठिनधनुर्ज्याकिणाङ्कप्रकोष्ठं
बाहुं लोकोपकारव्रतसफलपरिस्पन्दधीरं प्रपन्ना॥
निन्द्याचारेषु योऽस्मिन्विनयमुषि युगे कल्पनामात्रवृत्त्या
राजस्वन्येषु पांशुस्विव कुसुमबलिर्नाबभासे प्रयुक्तः।
स श्रेयोधाम्नि सम्राडिति मनुभरतालर्कमांधातृकल्पे
कल्याणे हेम्नि भास्वान्मणिरिव सुतरां भ्राजते यत्र शब्दः॥

ये भुक्ता गुप्तनाथैर्न सकलवसुधाक्रान्तिदृष्टप्रतापै-
　　र्नाज्ञा हूणाधिपानां क्षितिपतिमुकुटाध्यासिनी यान्प्रविष्टा ।
देशांस्तान्धन्वशैलद्रुमगहनसरिद्वीरबाहूपगूढा-
　　वीर्यावस्कन्नराज्ञः स्वगृहपरिसरावज्ञया यो भुनक्ति ॥
आ लौहित्योपकण्ठात्तलवनगहनोपत्यकादा महेन्द्रा-
　　दा गङ्गाश्लिष्टसानोस्तुहिनशिखरिणः पश्चिमादा पयोधेः ।
सामन्तैर्यस्य बाहुद्रविणहृतमदैः पादयोरानमद्भि-
　　श्चूडारत्नांशुराजिव्यतिकरशबला भूमिभागाः क्रियन्ते ॥
स्थाणोरन्यत्र येन प्रणतिकृपणतां प्रापितं नोत्तमाङ्गं
　　यस्याश्लिष्टो भुजाभ्यां वहति हिमगिरिर्दुर्गशब्दाभिमानम् ।
नीचैस्तेनापि यस्य प्रणतिभुजबलावर्जनक्लिष्टमूर्ध्ना
　　चूडापुष्पोपहारैर्मिहिरकुलनृपेणार्चितं पादयुग्मम् ॥
गा(द्या)मेवोन्मातुमूर्ध्वं विगणयितुमिव ज्योतिषां चक्रवालं
　　निर्देष्टुं मार्गमुच्चैर्दिव इव सुकृतोपार्जितायाः स्वकीर्तेः ।
तेनाकल्पान्तकालावधिरवनिभुजा श्रीयशोधर्मणायं
　　स्तम्भः स्तम्भाभिरामस्थिरभुजपरिघेणोच्छ्रितिं नायितोऽत्र ॥
श्लाघ्ये जन्मास्य वंशे चरितमघहरं दृश्यते कान्तमस्मि-
　　न्धर्मस्यायं निकेतश्चलति नियमितं नामुना लोकवृत्तम् ।
इत्युत्कर्षं गुणानां लिखितुमिव यशोधर्मणश्चन्द्रबिम्बे
　　रागादुत्क्षिप्त उच्चैर्भुज इव रुचिमान्यः पृथिव्या विभाति ॥
　　　इति तुष्टूषया तस्य नृपतेः पुण्यकर्मणः ।
　　　वासुलेनोपरचिताः श्लोकाः कक्कस्य सूनुना ॥
उत्कीर्णा गोविन्देन ॥

(इण्डियन् आण्टिक्केरी १५।२५३-२५७)

(२९)

श्रीनारायणपालदेवस्य दानपत्रम् ।

ॐ स्वस्ति ।

मैत्रीं कारुण्यरत्नप्रमुदितहृदयः प्रेयसीं संदधानः
सम्यक्संबोधिविद्यासरिदमलजलक्षालिताज्ञानपङ्कः ।
जित्वा यः कामकारिप्रभवमभिभवं शाश्वतीं प्राप शान्ति
स श्रीमाँल्लोकनाथो जयति दशबलोऽन्यश्च **गोपालदेवः** ॥
लक्ष्मी जन्मनिकेतनं समकरो वोढुं क्षमः क्ष्माभरं
पक्षच्छेदभयादुपस्थितवतामेकाश्रयो भूभृताम् ।
मर्यादापरिपालनैकनिरतः शौर्यालयोऽस्मादभू-
द्दुग्धाम्भोधिविलासहासिमहिमा **श्रीधर्मपालो** नृपः ॥
जित्वेन्द्रराजप्रभृतीनरातीनुपार्जिता येन महोदयश्रीः ।
दत्ता पुनः सा बलिनार्थयित्रे चक्रायुधायानतिवामनाय ॥
रामस्येव गृहीतसत्यतपसस्तस्यानुरूपो गुणैः
सौमित्रेरुदपादि तुल्यमहिमा **वाक्पाल**नामानुजः ।
यः श्रीमान्नयविक्रमैकवसतिर्भ्रातुः स्थितः शासने
शून्याः शत्रुपताकिनीभिरकरोदेकातपत्रा दिशः ॥
तस्मादुपेन्द्रचरितैर्जगतीं पुनानः
पुत्रो बभूव विजयी **जयपाल**नामा ।
धर्मद्विषां शमयिता युधि **देवपाले**
यः पूर्वजे भुवनराज्यसुखान्यनैषीत् ॥
यस्मिन्भ्रातुर्निदेशाद्बलवति परितः प्रस्थिते जेतुमाशाः
सीदन्नाम्नैव दूरान्निजपुरमजहादुत्कलानामधीशः ।
आसांचक्रे चिराय प्रणयिपरिवृतो बिभ्रदुच्चेन मूर्ध्ना
राजा प्राग्ज्योतिषाणामुपशमितसमित्संकथां यस्य चाज्ञाम् ॥

श्रीमान्विग्रहपालस्तत्सूनुरजातशत्रुरिव जातः ।
शत्रुवनिताप्रसाधनविलोपिविमलासिजलधारः ॥
रिपवो येन गुर्वीणां विपदमास्पदीकृताः ।
पुरुषायुषदीर्घाणां सुहृदः संपदामपि ॥
लज्जेति तस्य जलधेरिव जह्नुकन्या
पत्नी बभूव कृतहैहयवंशभूषा ।
यस्याः शुचीनि चरितानि पितुश्च वंशे
पत्युश्च पावनविधिः परमो बभूव ॥
दिक्पालैः क्षितिपालनाय दधतं देहे विभक्ताः श्रियः
श्रीनारायणपालदेवमसृजत्तस्यां स पुण्योत्तरम् ।
यः क्षोणीपतिभिः शिरोमणिरुचा श्लिष्टाङ्घ्रिपीठोपलं
न्यायोपात्तमलं चकार चरितैः स्वैरेव धर्मासनम् ॥
चेतःपुराणलेख्यानि चतुर्वर्गनिधीनि च ।
आरिप्सन्ते यतस्त्यानि चरितानि महीभृतः ॥
स्वीकृतसुजनमनोभिः सत्यापितसातवाहनः सूक्तैः ।
त्यागेन यो व्यधत्त श्रद्धेयामङ्गराजकथाम् ॥
भयादरातिभिर्यस्य रणमूर्धनि विस्फुरन् ।
असिरिन्दीवरश्यामो ददृशे पीतलोहितः ॥
यः प्रज्ञया च धनुषा च जगद्विनीय
नित्यं न्यवीविशदनाकुलमात्मधर्मे ।
यस्यार्थिनः सविधमेत्य भृशं कृतार्था
नैवार्थितां प्रति पुनर्विदधुर्मनीषाम् ॥
श्रीपतिरकृष्णकर्मा विद्याधरनायको महाभोगी ।
अनलसदृशोऽपि धाम्ना यश्चित्रं नलसमश्चरितैः ॥
व्याप्ते यस्य त्रिजगति शरच्चन्द्रगौरैर्यशोभि-
र्मन्ये शोभां न खलु बिभरामास रुद्राट्टहासः ।

सिद्धस्त्रीणामपि शिरसिजेष्वर्पिताः केतकीनां
पत्रापीडाः सुचिरमभवन्भृङ्गशब्दानुमेयाः ॥
तपो ममास्तु राज्यं ते द्वाभ्यामुक्तमिदं द्वयोः ।
यस्मिन्विग्रहपालेन सगरेण भगीरथे ॥

स खलु भागीरथीपथप्रवर्तमाननानाविधनौवाटसंपादितसेतुबन्धनिहितशैलशिखरश्रेणीविभ्रमात् निरतिशयघनघनाघनघटाश्यामायमानवासरलक्ष्मीसमारब्धसंततजलदसमयसंदेहात् उदीचीनानेकनरपतिप्राभृतीकृताप्रमेयहयवाहिनीखरखुरोत्खातधूलीधूसरितदिगन्तरालात् परमेश्वरसेवासमायाताशेषजम्बुद्वीपभूपालानन्तपादातभरनमदवनेः श्रीमुद्गगिरिसमावासितश्रीमज्जयस्कन्धावारात् परमसौगतो महाराजाधिराजश्रीविग्रहपालदेवपादानुध्यातः परमेश्वरः परमभट्टारको महाराजाधिराजः श्रीमन्नारायणपालदेवः कुशली तीरभुक्तौ कक्षवैषयिकस्वसंबद्धाविच्छिन्नतलोपेतमकुतिकाग्रामे समुपगताशेषराजपुरुषान् राजराज(जा)नकराजपुत्रराजामात्यमहासांधिविग्रहिकमहाक्षपटलिकमहासामन्तमहासेनापतिमहाप्रतीहारमहाकार्ताकृतिकमहादौःसाधसाधनिकमहादण्डनायकमहाकुमारामात्यराजस्थानीयोपरिकदाशापराधिकचौरोद्धरणिकदाण्डिकदाण्डपाशिकशौल्किकगौल्मिकक्षेत्रपप्रान्तपालकोट्टपालखण्डरक्षतदायुक्तकविनियुक्तकहस्त्यश्वोष्ट्रनौबलव्यापृतककिशोरवडवागोमहिष्यजाविकाध्यक्षदूतप्रेषणिकगमागमिकाभित्वरमाणविषयपतिग्रामपतितरिकगौडमालवखशहूणकुलिककर्णाटलाटचाटभटसेवकादीन् अन्यांश्चाकीर्तितान् राजपादोपजीविनः प्रतिवासिनो ब्राह्मणोत्तरान् महत्तमोत्तमपुरोगमेदान्ध्रचण्डालपर्यन्तान् यथार्हं मानयति बोधयति समादिशति च। मतमस्तु भवताम्। कलशपोते महाराजाधिराजश्रीनारायणपालदेवेन स्वयंकारितसहस्रायतनस्य तत्र प्रतिष्ठापितस्य भगवतः शिवभट्टारकस्य पाशुपताचार्यपरिषदश्च यथार्हं पूजाबलिचरुसत्रनवकर्माद्यर्थं शयनासनग्लानप्रत्ययभैषज्यपरिष्कारार्थमन्येषामपि स्वाभिमतानां स्वपरिकल्पितविभागेनानवद्यभोगार्थं च यथोपरिलिखितमकु-

---

१. 'मुङ्गेर' नाम्ना प्रसिद्धे नगरे. २. 'तिरहुत' इति प्रसिद्धायां मिथिलायाम्.

तिकाग्रामः स्वसीमातृणयूतिगोचरपर्यन्तः सतलः सोद्देशः साम्रमधूकः सजलस्थलः सगर्तोषरः सोपरिकरः सदशापचारः सचौरोद्धरणः परिहृतसर्वपीडः अचाटभटप्रवेशः अकिंचित्प्रग्राह्यः समस्तभागभोगकरहिरण्यादिप्रत्यायसमेतः भूमिच्छिद्रन्यायेनाचन्द्रार्कक्षितिसमकालं यावत् मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये भगवन्तं शिवभट्टारकमुद्दिश्य शासनीकृत्य प्रदत्तः। ततो भवद्भिः सर्वैरेवानुमन्तव्यम्। भाविभिरपि भूपतिभिर्भूमेर्दानफलगौरवादपहरणे च महानरकपातभयाद्दानमिदमनुमोद्य पालनीयम्। प्रतिवासिभिः क्षेत्रकरैश्चाज्ञाश्रवणविधेयीभूय यथाकालं समुचितभागभोगकरहिरण्यादि सर्वप्रत्यायोपनयः कार्य इति। संवत् १७ वैशाखदिने ९॥

तथा च धर्मानुशंसिनः श्लोकाः—

बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥

षष्टिं वर्षसहस्राणि स्वर्गे मोदति भूमिदः।
आक्षेप्ता चानुमन्ता च तान्येव नरके वसेत्॥

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते॥

सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयोभूयः प्रार्थयत्येष रामः।
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयः क्रमेण॥

इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च।
सकलमिदमुदाहृतं च बुद्ध्वा न हि पुरुषैः परकीर्तयो विलोप्याः॥

वेदान्तैरप्यसुगमतमं वेदिता ब्रह्मतार्थं(तत्त्वं)
यः सर्वासु श्रुतिषु परमः सार्धमङ्गैरधीती।
यो यज्ञानां समुदितमहादक्षिणानां प्रणेता
भट्टः श्रीमानिह स गुरवो दूतकः पुण्यकीर्तिः॥

---

१. नारायणपालदेवस्य राज्यारम्भसंवत्सरोऽयम्.

श्रीमता म(स)ङ्गदासेन शुभदासस्य सूनुना ।
इदं शासनमुत्कीर्णं सत्सामतटजन्मना ॥

(राजमुद्रा)

श्रीनारायणपालदेवस्य

(इण्डियन् आण्टिक्केरी १५ । ३०४-३१०)

---

(३०)

वलभीप्रभोः श्रीधरसेनमहीपतेर्दानपत्रम् ।

ॐ स्वस्ति विजयस्कन्धावाराद्भरुकच्छवासकात्प्रसभप्रणतामित्राणां मैत्रकाणामतुलबलसंपन्नमण्डलाभोगसंसक्तप्रहारशतलब्धप्रतापात्प्रतापोपनतदानमानार्जवोपार्जितानुरागादनुरक्तमौलभूतश्रेणीबलावाप्तराज्यश्रियः परममाहेश्वरश्रीभट्टार्कादव्यवच्छिन्नराजवंशान्मातापितृचरणारविन्दप्रणतिप्रविधौताशेषकल्मषः शैशवात्प्रभृति खड्गद्वितीयबाहुरेव समदपरगजघटास्फोटनप्रकाशितसत्त्वनिकषः तत्प्रभावप्रणतारातिचूडारत्नप्रभासंसक्तपादनखरश्मिसंहतिः सकलस्मृतिप्रणीतमार्गसम्यक्परिपालनप्रजाहृदयरञ्जनान्वर्थराजशब्दो रूपकान्तिस्थैर्यगाम्भीर्यबुद्धिसंपद्भिः स्मरशशाङ्काद्रिराजोदधित्रिदशगुरुधनेशानतिशयानः शरणागताभयप्रदानपरतया तृणवदपास्ताशेषस्वकार्यफलप्रार्थनाधिकार्थप्रदानानन्दितविद्वत्सुहृत्प्रणयिहृदयः पादचारीव सकलभुवनमण्डलाभोगप्रमोदः परममाहेश्वर**श्रीगुहसेन**स्तस्य सुतस्तत्पादनखमयूखसंतानविसृतजाह्नवीजलौघप्रक्षालिताशेषकल्मषः प्रणयिशतसहस्रोपजीव्यमानसंपद्रूपलोभादिवाश्रितः सरभसमाभिगामिकैर्गुणैः सहजशक्तिशिक्षाविशेषविस्मापिताखिलधनुर्धरः प्रथमनरपतिसमतिसृष्टानामनुपालयिता धर्मदायानामपाकर्ता प्रजोपघातकारिणामुपप्लवानां दर्शयिता श्रीसरस्वत्योरेकाधिवासस्य संहतारातिपक्षलक्ष्मीपरिभोगदक्षविक्रमो विक्रमोपसंप्राप्तविमलपार्थिवश्रीः परममाहेश्वरः **श्रीधरसेन**स्तस्य सुतस्तत्पादानुध्यातः सकलजगदानन्दनात्यद्भुतगुणसमुदयस्थगितसमग्रदिङ्मण्डलः समरशतविजयशोभासनाथमण्डलाग्रद्युतिभासुरतरां-

सपीठोदूढगुरुमनोरथमहाभारः सर्वविद्यापरावरविभागाधिगमविमलमतिरपि सर्वतः सुभाषितलवेनापि सुखोपपादनीयपरितोषः समग्रलोकागाधगाम्भीर्यहृदयोऽपि सुचरितातिशयसुव्यक्तपरमकल्याणस्वभावः खिलीभूतकृतयुगनृपतिपथविशोधनाधिगतोदग्रकीर्तिर्धर्मानुपरोधोज्ज्वलतरीकृतार्थसुखसंपदुपसेवानिरूढधर्मादित्यद्वितीयनामा परममाहेश्वरः **श्रीशीलादित्यः** तस्यानुजस्तत्पादानुध्यातः स्वयमुपेन्द्रगुरुणेव गुरुणात्यादरवता समभिलषणीयामपि राजलक्ष्मीं स्कन्धसक्तां परमभद्र इव धुर्यस्तदाज्ञासंपादनैकरसतयैवोद्वहन्खेदसुखरतिभ्यामनायासितसत्त्वसंपत्तिः प्रभावसंपद्वशीकृतनृपतिशतशिरोरत्नच्छायोपगूढपादपीठोऽपि परावज्ञाभिमानरसानालिङ्गितमनोवृत्तिः प्रणतिमेकां परित्यज्य प्रख्यातपौरुषाभिमानैरप्यरातिभिरनासादितप्रतिक्रियोपायः कृतनिखिलभुवनामोदविमलगुणसंहतिप्रसभविघटितसकलकलिविलसितगतिर्नीचजनाधिरोहिभिरशेषैर्दोषैरनामृष्टात्युन्नतहृदयः प्रख्यातपौरुषास्त्रकौशलातिशयगणतिथविपक्षक्षितिपतिलक्ष्मीस्वयंग्रहप्रकाशितप्रवीरपुरुषप्रथमसंख्याधिगमः परममाहेश्वर**श्रीखरग्रह**स्तस्य तनयस्तत्पादानुध्यातः सकलविद्याधिगमविहितनिखिलविद्वज्जनमनःपरितोषातिशयः सत्त्वसंपदा त्यागौदार्येण च विगतानुसंधानाशमाहिता(?)रातिपक्षमनोरथाक्षभङ्गः सम्यगुपलक्षितानेकशास्त्रकलालोकचरितगह्वरविभागोऽपि परमभद्रप्रकृतिरकृत्रिमप्रश्रयविनयशोभाविभूषणः समरशतजयपताकाहरणप्रत्यग्रोदग्रबाहुदण्डविध्वंसितनिखिलप्रतिपक्षदर्पोदयः स्वधनुः प्रभावपरिभूतास्त्रकौशलाभिमानसकलनृपतिमण्डलाभिनन्दितशासनः परममाहेश्वरः **श्रीधरसेन**स्तस्यानुजस्तत्पादानुध्यातः सच्चरितातिशयितसकलपूर्वनरपतिरतिदुःसाधानामपि प्रसाधयिता विषयाणां मूर्तिमानिव पुरुषकारः परिवृद्धगुणानुरागनिर्भरचित्तवृत्तिभिर्मनुरिव स्वयमभ्युपपन्नः प्रकृतिभिरधिगतकलाकलापः कान्तिमान्निर्वृतिहेतुरकलङ्कः कुमुदनाथः प्राज्यप्रतापस्थगितदिगन्तरालप्रध्वंसितध्वान्तराशिः सततोदितः सविता प्रकृतिभ्यः परं प्रत्ययमर्थवन्तमतिबहुतिथप्रयोजनानुबद्धमागमपरिपूर्णं विदधानः संधिविग्रहसमासनिश्चयनिपुणः स्थानेऽनुरूपमादेशं ददद्गुणवृद्धिविधानज-

नितसंस्कारः साधूनां राज्यशालातुरीयतन्त्रयोरुभयोरपि निष्णातः प्रकटविक्रमोऽपि करुणामृदुहृदयः श्रुतवानप्यगर्वितः कान्तोऽपि प्रशमी स्थिरसौहृदोऽपि निरसिता दोषवतामुदयसमयसमुपजनितजनतानुरागपरिपिहितभुवनसमर्थितप्रथितबालादित्यद्वितीयनामा परममाहेश्वरः श्रीध्रुवसेनस्तस्य सुतस्तत्पादकमलप्रणामधरणिकषणजनितकिणलाञ्छनललाटचन्द्रशकलः शिशुभाव एव श्रवणनिहितमौक्तिकालंकारविभ्रमामलश्रुतिविशेषः प्रदानसलिलक्षालिताग्रहस्तारविन्दः कन्याया इव मृदुकरग्रहणादमन्दीकृतानन्दविधिर्वसुंधरायाः कार्मुके धनुर्वेद इव संभाविताशेषलक्ष्यकलापः प्रणतसामन्तमण्डलोत्तमाङ्गधृतचूडारत्नायमानशासनः परममाहेश्वरः परमभट्टारकमहाराजाधिराजपरमेश्वरचक्रवर्तिश्रीधरसेनः कुशली सर्वानेव समाज्ञापयति—अस्तु वः संविदितं यथा मया मातापित्रोः पुण्याप्यायनाय उदुम्बरगह्वरविनिर्गतखेटकवास्तव्योदुम्बरगह्वरचातुर्विद्यसामान्यपराशरसगोत्रवाजसनेयिसब्रह्मचारिब्राह्मणभवीनागशर्मपुत्रब्राह्मणादितिशर्मणे खेटकाहारे कोलम्बे वड्डसोमालिकाग्रामपूर्वसीम्नि खेटकमानेन व्रीहिद्विपिटुकद्वयवापं सभृष्टीकं क्षेत्रं यस्याघाटनानि पूर्वतः सीहमुहिज्जग्रामसीमा दक्षिणतो विश्वपल्लिग्रामसीमा अपरतो द्रोणकसत्कशमीकेदारक्षेत्रं उत्तरतो महेश्वरसत्कखग्गडिकेदारीक्षेत्रं तथा नगरकपथकान्तर्गतदुहुदुहुग्रामे दक्षिणापरसीम्नि खेटकमानेन व्रीहिद्विपीठकवापं कोटीलकक्षेत्रं यस्याघाटनानि पूर्वतः आटिरमणकेदारसंज्ञितं महत्तरगोल्लसत्कक्षेत्रं सभीलकसत्कखण्डकेदारश्च दक्षिणतः जाइण्णपल्लिग्रामसीमा अपरतो गुड्डपल्लिग्रामसीमा उत्तरत आरलिकेदारः शमीकेदारो वल्मीकद्वयं च तथा पूर्वसीम्नि दुहुदुहिकापद्राके भृष्टी यस्या आघाटनानि पूर्वतः कपित्थोन्दनदक्षिणतो विशीर्णोज्झित केदारिकं अपरतः कपित्थोन्दनी उत्तरतः ब्राह्मणवैरभटसत्कब्रह्मदेयक्षेत्रमतिक्रम्य उन्दनीद्वयं एवं क्षेत्रद्वयं सभृष्टीकं सोद्रङ्गं सोपरिकरं सभूतवातप्रत्यायं सधान्यहिरण्यादेयं सदशापराधं सोत्पद्यमानवि-

---

१. शालातुरीयः पाणिनिः.

ष्टिकं सर्वप्रक्षेपणीयं पूर्वप्रत्तदेवब्रह्मदेयब्राह्मणविंशतिरहितं भूमिच्छिद्रन्यायेनाचन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनं पुत्रपौत्रान्वयभोग्यं उदकातिसर्गेण धर्मदायो निसृष्टः यतोऽस्योचितया ब्रह्मदेयस्थित्या भुञ्जतः कृषतः कर्षयतः प्रदिशतो वा न कैश्चिद्व्यासेधे वर्तितव्यमागामिभद्रनृपतिभिरस्मद्वंशजैरन्यैर्वा। अनित्यान्यैश्वर्याण्यस्थिरं मानुष्यं सामान्यं च भूमिदानफलमवगच्छद्भिरयमस्मद्दायोऽनुमन्तव्यः परिपालयितव्यश्चेति।

उक्तं च—

'बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
यानीह दारिद्र्यभयान्नरेन्द्रैर्धनानि धर्मायतनीकृतानि।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधुः पुनराददीत॥
षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥'

दूतकोऽत्र राजदुहितृभूवा॥ लिखितमिदं संधिविग्रहाधिकृतदिविरपतिवत्रभट्टिपुत्रदिविरपतिश्रीस्कन्दभटेनेति। सं ३०० ३० द्विमार्गशिरशु २ स्वहस्तो मम=

(इण्डियन् आण्टिक्केरी १५।३३५-४०)

(३१)

बौद्धगयामन्दिरस्थशिलालेखोऽयम्।

ॐम्॥

व्याप्तो येनाप्रमेयः सकलशशिरुचा सर्वतः सत्त्वधातुः
क्षुण्णाः पाषण्डयोधाः सुगतिपथरुधस्तर्कशास्त्राभियुक्ताः।
संपूर्णो धर्मकोषः प्रकृतिरिपुहतः साधितो लोकभूत्यै
शास्तुः शाक्यैकबन्धोर्जयति चिरतरं तद्यशःसारतन्त्रम्॥

१. वलभीसंवत्सरोऽयम् ३३०. अत्र ३१९ मितवर्षेषु योजितेषु ६४८-६४९ मितः खिस्ताब्दः.

नैरोधीं शुभभावनामनुसृतैः संसारसंक्लेशजि-
न्मैत्रेयस्य करे विमुक्तिवशिता यस्याद्भुता व्याकृता ।
निर्वाणावसरे च येन चरणौ दृष्टौ मुनेः पावनौ
पायाद्वः स मुनीन्द्रशासनधरः स्तुत्यै महाकाश्यपः ॥
संयुक्तागमिनो विशुद्धरजसः सत्त्वानुकम्पोद्यताः
शिष्या यस्य सकृद्विचेरुरतुलां लङ्काचलोपत्यकाम् ।
तेभ्यः शीलगुणान्विताश्च शतशः शिष्यप्रशिष्याः क्रमा-
ज्जातास्तुङ्गनरेन्द्रवंशतिलकाः प्रोत्सृज्य राज्यश्रियम् ॥
ध्यानोदयाहितहितः शुभाशुभविवेककृद्विहतमोहः ।
सद्धर्मातुलविभवो भवो बभूव श्रमणस्ततः ॥
राहुलाख्यश्च तच्छिष्य उपसेनो यतिर्यतः ।
महानामा क्रमादेवमुपसेनस्ततोऽपरः ॥
वात्सल्यं शरणागतस्य सततं दीनस्य वैशेषिकं
व्यापत्सायकसंततिक्षतधृतेरार्तस्य चापत्यकम् ।
क्रूरस्याहितकारिणः प्रविततं बन्धोर्यथाभावतः
एवं सच्चरितोद्भवेन यशसा यस्याचितं भूतलम् ॥
आम्रद्वीपाधिवासी पृथुकुलजलधिस्तस्य शिष्यो महीयां-
ल्लङ्काद्वीपप्रसूतः परहितनिरतः सन्महानामनामा ।
तेनोच्चैर्बोधिमण्डे शशिकरधवलः सर्वतो मण्डपेन
कान्तः प्रासाद एष स्मरबलजयिनः कारितो लोकशास्तुः ॥
व्यपगतविषयस्नेहो हततिमिरदशः प्रदीपवदसङ्गः ।
कुशलेनानेन जनो बोधिसुखमनुत्तरं भजताम् ॥
यावद्ध्वान्तापहारी प्रविततकिरणः सर्वतो भाति भास्वा-
न्यावत्पूर्णोऽम्बुराशिः फणिफणकुटिलैरूर्मिचक्रैः समन्तात् ।

यावच्चेन्द्राधिवासो विविधमणिशिलाचारुशृङ्गः सुमेरुः
शोभाढ्यं तावदेतद्भवनमुरु मुनेः शाश्वतत्वं प्रयातु ॥

संवत् २०० ६० ९ चैत्रसुदि ८ ॥

(इण्डियन् आण्टिक्केरी १५।३५६–३५८)

---

(३२)

कोटाप्रान्तस्थविहारप्रशस्तिः ।

ॐ नमो रत्नत्रयाय ।

जयन्ति वादाः सुगतस्य निर्मलाः समस्तसंदेहनिरासभासुराः ।
कुतर्कसंपातनिपातहेतवो युगान्तवाता इव विश्वसंततेः ॥
योऽरूपवानपि बिभर्ति सदैव रूप-
मेकोऽप्यनेक इव भाति च यो निकामम् ।
आराद्गात्परधियः प्रतिमर्त्यवेद्यो
यो निर्जितारिरजितश्च जिनः स वोऽव्यात् ॥
भिनत्ति यो नृणां मोहं तमो वेश्मनि दीपवत् ।
सोऽव्याद्वः सौगतो धर्मो भक्तमुक्तिफलप्रदः ॥
आर्यसंघस्य विमलाः शरच्छशिजितश्रियः ।
जयन्ति जयिनः पादाः सुरासुरशिरोर्चिताः ॥
आसीदम्भोधिधीरः शशिधवलयशा विन्दुनागाभिधान-
स्तत्सूनुः पद्मनागोऽभवदसमगुणैर्भूषिताशेषवंशः ।
तस्याप्यानन्दकारी करनिकर इवानुष्णरश्मेस्तनूजो
जातः सामन्तचक्रप्रकटतरगुणः सर्वणागो जितारिः ॥
तस्याभूद्दयिता विशुद्धयशसः श्रीरित्युरःशायिनी
कृष्णस्येव महोदया च शशिनो ज्योत्स्नेव विश्वंभरा ।
गौरीवाद्रिदृशोऽसमा शमवतः प्रज्ञेव वा तायिनो
गम्भीरा यदि वा महोर्मिवलया वेलेव वेलाभृतः ॥

ताभ्यामभूद्गुणाम्भोधिर्वशीकृतमनोमलः।
देवदत्त इति ख्यातः सामन्तः कृतिनां कृती॥

येषां नतिर्जिनगुरौ गुरुता गुणेषु
सङ्गोऽर्थिभिः सततदाननिबद्धगर्धैः।
भीतिः प्रकाममघतो जगदेकशत्रो-
स्तेषामयं कृतविशेषगुणोऽन्ववाये॥

येषां भूतिरियं परेति न परैरालोक्यतेऽर्थार्थिभि-
र्येषां मुद्भिभवः परः परमुदः स्वप्नेऽपि नाभूत्तनौ।
येषामात्महितोदयाय दयितं नासीद्गुणासादनं
तेषामेव वशी शशाङ्कधवलो जातः कुलाम्भोनिधौ॥

संपादितजनानन्दः समासादितसंततिः।
कल्पशाखीव जगतामेष जातो गुणाकरः॥

विश्वाश्वासविधौ तृणीकृतसितज्योत्स्नोदये देहिना-
मन्तःशुद्धिविचारणे सुरगुरोरप्याहिताल्पोदयः।
गाम्भीर्याकलने निकामकलितक्षीरोदसारस्त्वयं
यत्तन्नूनमहो गुणा गुणितनुव्यासङ्गिनः संगताः॥

तावन्मानधना यशस्ततिभृतस्तावच्च तावद्बुधा-
स्तावत्तायिसुतानुकारकरणास्तावत्कृपाम्भोधयः।
तावन्न्यस्तपरोपकारतनवस्तावत्कृतज्ञाः परे
यावन्नास्य गुणेक्षणे क्षणमपि प्राप्तावधानो जनः॥

यस्योद्वीक्ष्य गुणानशेषगुणिनामद्याप्यवज्ञात्मनि
निर्वाणाखिलमानसंततिपतच्चेतोविकासासमा।
भानौ ध्वस्तसमस्तनैशतमसि स्वैरं करालीकृति
प्रातर्येन कलावलोऽपि विगलच्छायः शशाङ्को न किम्॥

यस्यान्वयेऽप्यगुणजन्म न दृष्टपूर्व-
मासादिता न च गुणैर्गणनव्यवस्था।

याता मुहूर्तमपि नो कलिदोषलेशाः
सोऽयं निरस्तसमतो भुवि कोऽप्यपूर्वः ॥
यस्य दानमतिरक्षतदाना भाषितान्यफलवन्ति न सन्ति।
प्राणदानविहितावधि सख्यं तस्य को गुणनिधेरिह तुल्यः ॥
नाना सन्ति दिनानि सन्ति विविधाश्चन्द्रांशुशीता निशाः
सन्त्यन्याः शतशोऽबला जितजगन्नारीसमस्तश्रियः।
तन्नानन्दि जगत्त्रयेऽपि सुदिनं सा वा निशा सात्रला
यज्जन्मन्यगमन्निमित्तपदवीमस्यापरैर्दुर्गमाम् ॥
कोषवर्धनगिरेरनुपूर्वं सोऽयमुन्मिषितधीः सुगतस्य।
व्यस्तमारनिकरैकगरिम्णो मन्दिरं स विदधाति यथार्थम् ॥
सुखान्यस्वन्तानि प्रकृतिचपलं जीवितमिदं
प्रियाः प्राणप्रख्यास्तडिदुदयकल्पाश्च विभवाः।
प्रियोदर्काश्चालं क्षणसुखकृतो दुःखबहुला
विहारस्तेनायं भवविभवभीतेन रचितः ॥
सान्द्रध्वानशरद्बलाक(?)निवहत्यक्तार्कबिम्बोज्ज्वलं
संसाराङ्कुरसङ्गभङ्गचतुरं यत्पुण्यमात्तं मया।
जैनावासविधेरतोऽयमखिलो लोकत्रयानन्दिनीं
तेनारं सुगतश्रियं जितजगद्दोषां जनः प्राप्नुयात् ॥
प्रशस्तिमेनामकरोज्जातः शाक्यकुलोदधौ।
जज्जकः कियदर्थांशनिवेशविहितस्थितिम् ॥
संवत्सराङ्क ७ माघशुदि ६। उत्कीर्णा चणकेन ॥

(इण्डियन् आण्टिक्वेरी १४।४५-४८)

---

(३३)

भरतपुरदेशान्तर्वर्तिब्यानानगरस्थप्रशस्तिः।

ॐ ॐ नमः सिद्धेभ्यः ॥
आसीन्निर्वृतकान्वयैकतिलकः श्रीविष्णुसूर्यासने
श्रीमत्काम्यकगच्छतारकपथश्वेतांशुमान्विश्रुतः।

श्रीमान्सूरिमहेश्वरः प्रशमभूः श्वेताम्बरग्रामणी
राज्ये श्रीविजयाधिराजनृपतेः श्रीश्रीपथायां पुरि ॥

ततश्च

नाशं यातु शतं सहस्रसहितं संवत्सराणां द्रुतं
म्यामा(मा मा) भाद्रपदः स भद्रपदवीं मासः समारोहतु ।
सास्यैव क्षयमेतु सोमसहिता कृष्णा द्वितीया तिथिः
पञ्चश्रीपरमेष्ठिनिष्ठहृदयः प्राप्तो दिवं यत्र सः ॥

अपि च

कीर्तिर्दिक्करिकान्तदन्तमुसलप्रोद्भूतलास्यक्रमं
क्वापि क्वापि हिमाद्रिमू····महीसोत्रासहासस्थितिम् ।
क्वाप्यैरावणनागराजजनितस्पर्धानुबन्धोद्धुरं
भ्राम्यन्ती भुवनत्रयं त्रिपथगेवाद्यापि न श्राम्यति ॥

सं० ११०० भाद्रपदि २ चन्द्रे कल्याणकदिने प्रशस्तिरियं साधुसर्वदेवेनोत्कीर्णेति ।

(इण्डियन् आण्टिक्केरी १४।९–१०)

---

(३४)

सत्यवर्ममहीपतेर्दानपत्रम् ।

ॐ ॥ स्वस्ति अमरपुरानुकारिणः सर्वर्तुसुखरमणीयाद्विजयवतः कलिङ्गनगरवासकान्महेन्द्राचलामलशिखरप्रतिष्ठितस्य सचराचरगुरोः सकलभुवननिर्माणैकसूत्रधारस्य शशाङ्कचूडामणेर्भगवतो गोकर्णस्वामिनश्चरणकमलयुगलप्रणामाद्विगतसर्वकलिकलङ्कोऽनेकाहवसंक्षोभजनितजयशब्दप्रतापोपनतसमस्तसामन्तचक्रचूडामणिप्रभामञ्जरीपुञ्जरञ्जितवरचरणः सितकुमुदकुन्देन्दुवदात[यशाः] ध्वस्तारातिकुलाचलो नयविनयदयादानदाक्षिण्यशौर्यौदार्यसत्यत्यागादिगुणसंपदाधारभूतो निजनिस्त्रिंशधारोपार्जितसकलकलिङ्गाधिराज्यः परममाहेश्वरो मातापितृपादानुध्यातो गङ्गामलकुलतिलकमहा-

राजश्रीमद्देवेन्द्रवर्मसूनुः श्रीसत्यवर्मदेवो गल्लेलविषये तरुग्रामवासिनः कुटुम्बिनः समाज्ञापयति—विदितमस्तु वो यथायं मया विदितसकलपरमार्थतत्त्वेनाभिमतदेवतायै नूङ्कवपोसे स्वामित्यै सूर्योपरागे उदकपूर्वकं तारुग्रामदेवाग्रहारं कृत्वा सर्वकरभरैः परिहृत्याचन्द्रतारकं मातापित्रोरात्मनश्च पुण्याभिवृद्धये संप्रदत्त इति। अखण्डितब्रह्मदेयं शैवस्थानकमिदं खण्ड्यमगुरवपुत्रकमलासनभट्टारकेणोपार्जितम् इदानीं प्रदक्षिणं(प्रतिदिशं) सीमालिङ्गानि लिख्यते—पूर्वस्यां दिशि त्रिवृततटाकखेतु आग्नेय्यां दिशि अर्जुनडोङ्कः दक्षिणेन गिरिनाशिका नैर्ऋत्यां दिशि पर्वत पश्चिमेन मेरुपाषाण वायव्यस्यां दिशि अक्षलोङ्क उत्तरेण अलिशिलातल ईशान्यस्यां दिशि उत्पलवापी खेतु॥

अत्र व्यासगीतानि भवन्ति—

'बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते॥
हिरण्यमेकं गामेकां भूमेरप्येकमङ्गुलम्।
हरन्नरकमायाति यावदाभूतसंप्लवम्॥'

आदित्य, पुनरपि गल्लेलै धान्यसहस्रकस्य भूमिः तद्विषये ग्रामानुग्रामे तण्डुलमुरयघृततालि गल्लेलै पोलै खाण्डी। गाङ्गेयवंशसंवछ(त्स)रशतानां एकपञ्चाशत्॥ श्रीरहस्यखण्डिमपुत्रवीरपलिखितोत्कीर्णमिति॥

(इण्डियन् आण्टिक्वेरी १४।१०–१२)

---

(३९)

चालुक्यवंशोद्भूतराजराजापरनामश्रीविष्णुवर्धनमहीपतेर्दानपत्रम्।

श्रीधाम्नः पुरुषोत्तमस्य महतो नारायणस्य प्रभो-
र्नाभीपङ्करुहाद्बभूव जगतः स्रष्टा स्वयंभूस्ततः।

जज्ञे मानससूनुरत्रिरिति यस्तस्मान्मुनेरत्रितः
सोमो वंशकरः सुधांशुरुदितः श्रीकण्ठचूडामणिः ॥
तस्मादासीत्सुधासूतेर्बुधो बुधनुतस्ततः।
जातः पुरूरवा नाम चक्रवर्ती सविक्रमः॥

तस्मादायुरायुषो नहुषस्ततो ययातिश्चक्रवर्ती वंशकर्ता ततः पुरुरिति चक्रवर्ती। ततो जनमेजयोऽश्वमेधत्रितयस्य कर्ता ततः प्राचीशस्तस्मात्सैन्ययाती ततो हयपतिस्ततः सार्वभौमस्ततो जयसेनस्ततो महाभौमस्तस्माद्देशानकस्ततः क्रोधाननः। ततो देवकिः देवकेः ऋभुकस्तस्मात् ऋक्षकः। ततो मतिवरः सत्रयागयाजी सरस्वतीनदीनाथः ततः कात्यायनः कात्यायनान्नीलः ततो दुष्यन्तः तत आर्यो गङ्गायमुनातीरे यदविच्छिन्नान्निखाय यूपान् क्रमशः कृत्वा तथाश्वमेधान्नाम महाकर्म भरत इति योऽलभत। ततो भरताद्भूमन्युः तस्मात्सुहोत्रः ततो हस्ती। ततो विरोचनः तस्मादजमीलः ततः संवरणः ततश्च तपनसुतायास्तपत्याश्च सुधन्वा। ततः परिक्षित्। ततो भीमसेनः। ततः प्रदीपनः तस्माच्छन्तनुः ततो विचित्रवीर्यः। ततः पाण्डुराजः। ततः

आर्या[1]

पुत्रास्तस्य च धर्मजभीमार्जुननकुलसहदेवाः।
पञ्चेन्द्रियवत्पञ्च स्युर्विषयग्राहिणस्तत्र[2] ॥
येनादाहि विजित्य खाण्डवमठे(वनं) गाण्डीविणा वज्रिणं
युद्धे पाशुपतास्त्रमन्धकरिपोश्चालाभि दैत्यान्बहून्।
इन्द्रार्धासनमध्यरोहि जयिना यत्कालिकेयादिका-
न्हत्वा स्वैरमकारि वंशविपिनच्छेदः कुरूणां विभोः॥

ततोऽर्जुनादभिमन्युः ततः परिक्षित् ततो जनमेजयः ततः क्षेमुकः ततो नरवाहनः ततः शतानीकः तस्मादुदयनः॥

ततः परं तत्प्रभृतिष्वविच्छिन्नसंतानेष्वयोध्यासिंहासनासीनेष्वेकान्नषष्टिचक्रवर्तिषु तद्वंश्यो **विजयादित्यो** नाम राजा विजिगीषया दक्षि-

१. फ्लीट पण्डितेन तु 'आर्या' इत्यग्रिमेण 'पुत्रा' इति पदेन संयोज्य 'आर्या-पुत्राः' इत्येकं पदं विधाय 'पुत्रास्तस्य च' इत्यावार्या गद्यतां नीता. २. 'ग्रहिणः' इति मुद्रितः पाठः.

णापथं गत्वा त्रिलोचनपल्लवमधिक्षिप्य दैवदुरीहया लोकान्तरमगमत् । तस्मिन्संकुले पुरोहितेन सार्धमन्तर्वत्नी तस्य महादेवी मुडिवेमुनामाग्रहारं कतिपयाभिरन्तःपुरकान्ताभिः कञ्चुकिभिश्च सहोपगम्य तद्वास्तव्येन विष्णुभट्टसोमयाजिना दुहितृनिर्विशेषमभिरक्षिता सती **विष्णुवर्धनं** नन्दनमसूत । सा तस्य च कुमारकस्य मानव्यसगोत्रहारीतिपुत्रद्विपक्षगोत्रक्रमोचितानि कर्माणि कारयित्वा तमवर्धयत् । स च मात्रा विदितवृत्तान्तः सन्निर्गत्य चलुक्यगिरौ नन्दां भगवतीं गौरीमाराध्य कुमारनारायणमातृगणांश्च संतर्प्य श्वेतातपत्रैकशङ्खपञ्चमहाशब्दपालिकेतनप्रतिढक्का वराहलाञ्छनपिच्छकुन्तसिंहासनमकरतोरणकनकदण्डगङ्गायमुनादीनि स्वकुलक्रमागतानि निक्षिप्तानीव साम्राज्यचिह्नानि समादाय कदम्बगङ्गादिभूमिपान्निर्जित्य सेतुनर्मदामध्यं सार्धसप्तलक्षं दक्षिणापथं पालयामास ।

श्लोकः—

तस्यासीद्विजयादित्यो विष्णुवर्धनभूपतेः ।
पल्लवान्वयजाताया महादेव्याश्च नन्दनः ॥

तत्सुतः **पोलकेशी**वल्लभः तत्पुत्रः **कीर्तिवर्मा** । तस्य तनयः स्वस्तिश्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां कौशिकीवरप्रसादलब्धराज्यानां मातृगणपरिपालितानां स्वामिमहासेनपादानुध्यातानां भगवन्नारायणप्रसादसमासादितवरवराहलाञ्छनेक्षणक्षणवशीकृताराति-मण्डलानां अश्वमेधावभृथस्नानपवित्रीकृतवपुषां चालुक्यानां कुलमलंकरिष्णोः **सत्याश्रयवल्लभेन्द्र**स्य भ्राता **कुब्जविष्णुवर्धनो**ऽष्टादशवर्षाणि वेङ्गीदेशमपालयत् । तदात्मजो **जयसिंहवल्लभ**स्त्रयस्त्रिंशतम् । तदनुज **इन्द्रराजनन्दनः** सप्तदिनानि । तत्सुतो **विष्णुवर्धनो** नव वर्षाणि । तत्सूनुर्**माङ्गियुवराजः** पञ्चविंशतिम् । तत्पुत्रो **जयसिंह**स्त्रयोदश । तदवरजः **कोक्किलिः** षण्मासान् । तस्य ज्येष्ठो भ्राता **विष्णुवर्धन**स्तमुच्छित्य सप्तत्रिंशतमब्दान् । तत्पुत्रो **विजयादित्यभट्टारको**ऽष्टादश । तदनुजो **विष्णुवर्धनः** षट्त्रिंशतम् । तत्सूनुर्**विजयादित्यनरेन्द्रमृगराज**श्चाष्टाचत्वारिंशतम् । तत्सुत **कलिविष्णुवर्धनो**ऽध्यर्धवर्षम् । तत्सुतो **गुङ्गविजयादि-**

त्यश्चतुश्चत्वारिंशतम् । तद्भ्रातुर्विक्रमादित्यभूपतेस्तनयश्चालुक्यभीमस्त्रिंशतम् । तत्सुतः **कोल्लबिगण्डविजयादित्यः** षण्मासान् । तत्सूनुरम्मराजः सप्तवर्षाणि । तत्सुतं **विजयादित्यं** बालमुच्छित्य **ताडपो** मासमेकम् । तं जित्वा चालुक्यभीमतनयो **विक्रमादित्य** एकादश मासान् । तत्ताडपराजसुतो **युद्धमल्लः** सप्तवर्षाणि । अम्मराजानुजो **राजभीमो**ऽब्दान्द्वादशाभुनक् । युद्धे युद्धमल्लं तं धाट्या निर्घात्य धरुणिर (?)-**सुताम्मभूपः** क्ष्मां पञ्चविंशतिं वर्षाण्यपात् ।

द्वैमातुरोऽम्मराजस्य **दानार्णव** इति स्मृतः ।
चतुःषष्टिकलाभिज्ञः समास्तिस्रोऽभुनग्भुवम् ॥
ततः परं पतिं लब्धिमनुरूपमनायिकाम् (?) ।
सप्तविंशतिं वर्षाणि च्छाव एव तपः क्षमाम् (?) ॥
अथ दानार्णवाज्जातः कलावान्मृदुभिः करैः ।
राजा चालुक्यचन्द्रो यः क्ष्मातापमपाकरोत् ॥
सत्ये प्रतिष्ठिता लोका इति सत्यं वचो यतः ।
सर्वलोकाश्रये यस्मिन्सत्यराजे स्थितं जगत् ॥
निर्वक्रं वसुधाचक्रमरक्षत्क्षपिताहितः ।
न्याय्ये पथि नृपैराद्यैः स द्वादशसमाः समः ॥
विमलादित्यदेवाख्यस्ततस्तस्यानुजोऽदधत् ।
महीमण्डलसाम्राज्यं विजित्य विजयी रिपून् ॥

यस्य प्रज्वलितं प्रतापदहनं सोढुं न शक्ता भया-
द्रुत्वा काननमम्बुधिं च तरसा विद्वेषिणो विह्वलाः ।
दावौर्वाग्निपदेन तत्र च पुनस्तेनैव संतापिताः
श्रीपादामरपादपस्य महतीं छायां समाशिश्रियन् ॥

अपि च ।

सूर्यान्वये सुरपतिप्रतिमः प्रभावैः
श्रीराजराज इति यो जगति व्यराजत् ।

नाथः समस्तनरनाथकिरीटकोटि-
रत्नप्रभापटलपाटलपादपीठः ॥
जातस्ततस्ततयशोजितराजतेजा
राजेन्द्रचोडनृपतिर्नृपचक्रवर्ती ।
दम्बं (?) प्रचण्डमददन्तिकपोलनिर्य-
द्दानाविलामरसरित्सलिलप्रवाहः ॥
सद्वीपां च प(चतु)रम्बुराशिपरिखां विश्वंभरां लीलया
दण्डेनैव विजित्य च प्रतिदिशं योऽतिष्ठिपत्सर्वतः ।
स्वैरोद्भ्रान्तिनिवारणाय विजयस्तम्भान्स्वनामाङ्किता-
नालानानिव बद्धुमन्धमनसो दर्पेण दिग्दन्तिनः ॥
तस्यानुजां सुरूपामनुरूपां कुन्दवां महादेवीम् ।
स उपायत कृतकृत्यो विमलादित्यो जनस्तुत्यः ॥
समुद्ररशनां पृथ्वीं पृथ्वीं स भुजविक्रमात् ।
समरक्षत्समाः सप्त सप्तसप्तिसमः समः ॥
तस्माच्चालुक्यचूडामणिरथ विमलादित्यदेवान्महीश-
श्चोडक्ष्मापाललक्ष्म्या इव रचिततनोः कुन्दवायाश्च देव्याः ।
जातः **श्रीराजराजो** रजनिकरकुलश्रीमदम्भोधिराजो
राजद्राजन्यसेव्यामभृत भुजबलाद्राजलक्ष्मीं पृथिव्याः ॥
यो रक्षितुं वसुमतीं शशवत्सरेषु
वेदाम्बुराशिनिधिवर्तिषु (९४४) सिंहगेऽर्के ।
कृष्णद्वितीयदिवसोत्तरभद्रिकायां
वारे गुरोर्वणिजि लग्नवरेऽभिषिक्तः ॥
यस्योत्तमाङ्गं पट्टेन समबन्धि महीयसा ।
भर्तुं विश्वंभराभारं जनैरारोपितं चिरम् ॥
पृथ्वीमिमां यत्र पृथुप्रभावे रक्षत्यवर्गे क्षपितारिवर्गे ।
दूरीकृतावग्रहचोररोगाः प्रजा लभन्ते सफलं त्रिवर्गम् ॥

शौर्योदार्याभिमानाद्यगणितगुणजन्मानुरक्ता महिम्ना
प्रख्यातेनातिकृष्णा शशधरधवला सज्जनानां गणेन ।
पीता प्रीतेन कर्णाञ्जलिभिरभिनवा भाति दिग्देवतानां
नानावर्णा वितानश्रियमतनुतरा तन्वती यस्य कीर्तिः ॥
पित्रोर्वंशगुरू बभूवतुरलं यस्य स्फुरत्तेजसौ
सूर्याचन्द्रमसौ निरस्ततमसौ देवौ जगच्चक्षुषी ।
दंष्ट्राकोटिसमुद्धृताखिलमहीचक्रं महत्क्रीडया
विष्णोरादिवराहरूपमभवद्यच्छासने लाञ्छनम् ॥

स सर्वलोकाश्रयश्रीविष्णुवर्धनमहाराजाधिराजपरमेश्वरपरमभट्टारकपरमब्रह्मण्यः मातापितृपादानुध्यातः त्यागसिंहासनासीनः चण्डिकाप्रसादपरिलब्धसाम्राज्यचिह्नः गुद्दवाडिविषयनिवासिनो राष्ट्रकूटप्रमुखान्कुटुम्बिनः सर्वान्समाहूय मन्त्रिपुरोहितसेनापतियुवराजदौवारिकप्रधानाध्यक्षानित्यादिशति—

आद्यन्तात्यन्तदूरात्समजनि जगतां ज्योतिषो जन्महेतु-
र्ब्रह्मा धाम प्रजानामभवदथ ततः कश्यपो नाम वेधाः ।
भारद्वाजस्ततोऽभून्मुनिरधिकतपास्तस्य गोत्रे पवित्रे
तत्रापस्तम्बसूत्रे श्रुतिनिधिरुदगाच्चीडमार्यः क्रमेण ॥
राज्ञामर्चितवर्चसः समुदितैर्यज्ञैर्विधौताङ्ग(तांह)सो
यज्ञो नाम सुतस्ततः कृतधियो जज्ञे कृतज्ञः कृती ।
विज्ञाताखिलवेदशास्त्रसमयः प्राज्ञः सदा पोषित-
ज्ञातिर्ज्ञाननिधिर्गुरुज्ञसदृशो नीतिज्ञतायां भुवि ॥
यथा वसिष्ठो विदुषां वरिष्ठो निरुन्धतीं दोषमरुन्धतीं सः ।
तथानुरूपामभिरूपरूपः सतीमुपायच्छत माकवाख्याम् ॥
पुत्रस्तयोरदितिकश्यपयोरिवाभू-
द्भास्वानपाकृततमाः खलु चीडमार्यः ।
यो वेदशास्त्रसकलश्रुतिरश्मिजातैः
शिष्याननाम्बुरुहबोधकरो गरीयान् ॥

नित्याभीष्टफलप्रदानरुचिरं लक्ष्मीनिवासास्पदं
विभ्राणं गुरुतां प्रबुद्धसुमनःसंपूर्णशाखान्वितम्।
छायासंततिमाश्रितैश्च विबुधैः संस्तूयमानं सदा
सेवित्वा सुखमास्यते द्विजवरैर्यं विप्रकल्पद्रुमम्॥

यद्गेहं सुचिरं विभाति पर(ठ)तां पुण्यैर्वटूनां पटु-
व्यावृत्त्याविरतं क्रमात्क्षमपदे सामर्थ्यजुघ्गो(मुद्घो)षणैः।
सायं प्रातरुपाहितं(ता) हुतिहुतस्वाहाप्रियप्रोच्चल-
द्धामै(?)श्चापि समन्ततः कलिमलं प्रोत्सारयद्दूरतः॥

तस्मै समस्तजनताविशेषणा(का)य। रैसुतर्पितमहीदेवदेवगणाय। विप्रान्वयाब्धिशशभृत्प्रतिचन्द्राय(च्छन्दाय)। विद्वज्जनाङ्गीकृतविश्रुतानन्दाय। जन्मप्रभृति गीतवेदार्थतत्त्वाय। सन्मनोवसतिवास्तव्यात्मसत्त्वाय। लम्भितसरलत्वपरिलालितचरित्राय। शुम्भितमतिस्वसितजीवभृशपुत्राय (?)। सिद्धनिजनाथकृतिसेवितमनीषाय (?)। शुद्धमतिदूषितसमस्तजनदोषाय। संतताराधितनिजस्वामिपादाय। चिन्तितमनःस्थसुखदाभूतसुपादाय (?)। होमधूमविनिर्गतामितकलङ्काय। धीमत्प्रगीतरुचिरस्थिरस्वनामाङ्काय। सकलमुनिगणनुतापस्तम्बसूत्राय। तत्रसंगीत(?)भारद्वाजगोत्राय। सप्ततन्तुकृतयूपस्तम्भशोभाय। सप्ताश्वरूपसदृशात्मतनुलाभाय। नित्यजनतोचितसुसत्यसणयुक्ताय(?)। पत्यभिलषितकार्यनिःपत्तिसक्ताय। परमपुरुषार्थसंपादनपटिष्ठाय। परमेश्वरस्मरणपालनवरिष्ठाय। सकलार्थशास्त्रपरिनिश्चितविनोदाय। सुकुमारताधिकसरोजनिभपादाय। धाराकरेणाग्रहारीकृतः कोरुमेल्लिनामा ग्राम इन्दूपरागे दत्तो मया आचन्द्रतारकं हि तिष्ठेत्। तस्यावधिव्यक्तिरेषोच्यतेऽद्य। पूर्वतः कूडकुसीमा। आग्नेयतः मुण्डकालियसीमा। दक्षिणतः वानपल्लियु संपतनिययु मामण्डेट्यिु सीमैव सीमा। नैर्ऋत्यतः गोदावरियसीमा। पश्चिमतः बूरुवुडोग्गुसीमा। वायव्यतः वेनेट्यिु मासरयु सीमैव सीमा। उत्तरतः मासरपोन्वड्डवयु खलमेण्डिकालियुसीमा। ईशानतः एरुवङ्कयुत्तरसुन कडलिभाटिसीमा॥ अस्योपरि न केनचिद्बाधा क-

रणीया । यः करोति स पञ्चमहापातकैर्युक्तो भवति । तथा चोक्तं भगवता व्यासादिमहर्षिप्रकरेणापि—

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
बहुभिर्वसुधा दत्ता बहुभिश्चानुपालिता ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
आज्ञप्ति(प्तेः) कटकेशो राचियपेड्डेरिभीमनामतनूजः ।
कर्ता चेतनभट्टः काव्यानां लेखकोऽस्य गण्डाचार्यः ॥[1]

अस्मिन्ग्रामे प्रतिवर्षं भूपसिद्धाय ग्रहणम् पञ्चविंशतिनिष्काणि शतद्वय-सहितानि पञ्चाशद्धान्यखण्डकानि च ॥

(इण्डियन् आण्टिक्केरी १४।५०–५५)

---

(३६)

कुलोत्तुङ्गचोडदेवमहीपाश्रितकाटदण्डाधिनाथस्य दानपत्रम् ।

जयति जलधिकन्यावक्त्रपद्मांशुमाली
सकलभुवनसृष्टित्राणसंहारहेतुः ।
उपनिषदवगम्यो योगिविज्ञानवेद्य-
स्त्रिदशवरवचोभिः स्तूयमानो मुकुन्दः ॥
जयति जगति नित्यं सोमवंशो महीभृ-
च्छिरसि निहितपादः संश्रयः कीर्तिवल्ल्याः ।
जलधिवलयितोर्वीचक्रवालालवाला-
द्रिपुनृपरुधिरोदैरुक्षितादुद्गतायाः ॥

स्वस्ति श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां कौशिकीवरप्रसादलब्धराज्यानां मातृगणपरिपालितानां स्वामिमहासेनपादा-

---

१. स्कन्धकं नाम च्छन्दः. एतदपि फ्लीटपण्डितेन गद्यान्तः पातितम्.

नुध्यातानां भगवन्नारायणप्रसादसमासादितवरवराहलाञ्छनेक्षणक्षणवशीकृतारातिमण्डलानामश्वमेधावभृथपवित्रीकृतवपुषां चालुक्यानां कुलमलंकरिष्णोः सत्याश्रयवल्लभेन्द्रस्य भ्राता कुब्जविष्णुवर्धनोऽष्टादशवर्षाणि वेङ्गीदेशमपालयत्। तत्पुत्रो जयसिंहस्त्रिंशत्। तत्कनियानिन्द्रराजः सप्ताहम्। तत्पुत्रो विष्णुवर्धनो नववर्षाणि। तत्पुत्रो मङ्गियुवराजः पञ्चविंशतिम्। तत्पुत्रो जयसिंहस्त्रयोदश। तत्कनीयान्कोक्किलिः षण्मासान्। तद्भ्राता विष्णुवर्धनः सप्तत्रिंशत्। तत्सूनुर्विजयादित्योऽष्टादश। तत्सूनुर्विष्णुवर्धनः षट्त्रिंशत्। तत्सूनुर्नरेन्द्रो[३]ऽष्टाचत्वारिंशत्। तत्सुतः कलिविष्णुवर्धनोऽध्यर्धवर्षम्। तत्सूनुर्गुङ्गविजयादित्यश्चतुश्चत्वारिंशत्। तद्भ्रातृविक्रमादित्यपुत्रश्चालुक्यभीमस्त्रिंशत्। तत्सूनुर्विजयादित्यः षण्मासान्। तत्सूनुरम्मराजः सप्तवर्षाणि। विक्रमादित्यभ्रातृपुत्रस्ताडपो मासम्। चालुक्यभीमसूनुर्विक्रमादित्य एकादशमासान्। तत्सूनुर्युद्धमल्लः[४] सप्तवर्षाणि। अम्मराजानुजो राजभीमो द्वादश। तत्सूनुरम्मराजः पञ्चविंशतिम्। तज्ज्येष्ठो दानार्णवस्त्रिंशत्[५]। तत्पुत्रः शक्तिवर्मा द्वादश। तदनुजो विमलादित्यः सप्त। तत्पुत्रो राजराजदेव एकचत्वारिंशत्। तत्पुत्रः श्रीकुलोत्तुङ्गचोडदेव एकोनपञ्चाशत्। तत्सुतो विक्रमचोडः पञ्चदश। तत्पुत्रे श्रीकुलोत्तुङ्गचोडदेवे राज्यं प्रशासति तद्वंशराजप्रसादलब्धनानादेशपरिवृतं परम्परागतमण्डलेशाधिष्ठितं वेङ्गीमण्डले महासरः स्थिरतरमस्ति।

तत्रासीत्सरसीपुरीति जलधौ विष्णोः पुरीं द्वारका-
मुद्यल्लावणवारिदोषकलुषां न्यक्कुर्वती यानिशम्।
मातेव स्वपयःप्रवाहनिवहैः सुस्वादुभिः सादरं
स्वाङ्कं संश्रितमण्डलेश्वरमहीचक्रं स्वयं रक्षति॥

१. पूर्वमुद्रिते विष्णुवर्धनदानपत्रे तु 'त्रयस्त्रिंशतम्' इत्यस्ति. २. 'तदनुज इन्द्रराजनन्दनः' इति विष्णुवर्धनदानपत्रे पाठः. ३. 'विजयादित्यनरेन्द्रमृगराजः' इति विष्णुवर्धनदानपत्रे पाठः. ४. 'तताडपराजसुतो युद्धमल्लः' इति विष्णुवर्धनदानपत्रधृतः पाठः. ५. 'तिस्रः' इति विष्णुवर्धनदानपत्रे शोधितः पाठः.

गर्वाधिद्विजिगीषया रिपुगणाः संप्राप्य वेलातलं
लोलत्स्यन्दनवाजिवारणभटा जेतुं न शक्ताः पुनः ।
युद्धालोकनलोलवैरिललनासोल्लासहासोदया-
लज्जावद्वदनाः प्रविश्य सरसीं यान्त्येकतां कर्दमैः ॥

तस्याः पतिः को(कु)लनिकाटमनायकोऽभू-
त्प्रख्यातधर्मनिचयः प्रततोरुकीर्तिः ।
स्फूर्जत्स्वबाहुबलनिर्जितवैरिवर्गः
सर्वाश्रयो नयनिधिर्भुवि सत्यसंधः ॥

यो धर्मे धर्मपुत्रप्रतिनिधिरवनित्राणने कार्तवीर्यः
प्रायः शौर्ये किरीटी स्फुटमहिमरुचा तुल्य एव प्रतापे ।
औदार्ये कर्णकल्पः स्मर इव वपुषि क्ष्मासदृक्षः क्षमायां
सौजन्ये यस्य लोके कथमपि सदृशो विक्रमादित्य एव ॥

योऽदृश्यत सतां भूत्यै जलदुर्गे श्रिया सह ।
भुवनत्रितयं भासा भासयन्व्योम चन्द्रवत् ॥

यः सर्वामवनिमरक्षदक्षतश्रीः सेनाभिर्बहुरणकेलिनिर्जितारिः ।
वीरश्रीवदनविलासदर्पणाभो नीतिज्ञो नियमितवागतिप्रगल्भः ॥

द्विजजनपरिरक्षादक्षमक्षय्यलक्ष्मीं
प्रशमितरिपुपक्षं काङ्क्षिणां कल्पवृक्षम् ।
गुणमणिगणभूषाकल्पमाकल्पमुर्व्यां
धृततनुमिव धर्मं मन्वते मानवा यम् ॥

सुधृता येन धरित्री निःशङ्कं निर्जितारिवर्गेण ।
चिरतरकालं कृतिना कृतयुगवच्छ्रीसमृद्धेयम् ॥

विदुषां बहवो ग्रामा देवानां भूरिहर्म्याणि ।
जलपरिपूर्णतटाका देशे देशे विनिर्मिता येन ॥

यस्मिन्काङ्क्षाबहुलं ददति द्रव्यं प्रभूतमर्थे(र्थि)भ्यः ।
उपपदरहिता जाताश्चिन्तामणिकामधेनुकल्पागाः ॥

यस्यासिधारासुनिपीतमम्बु द्विषच्छिरश्छेदनकर्महेतु ।
प्रवर्तुलं वैरिपुरं त्रिनेत्रेष्वश्रुच्छलेनेव कृतस्वकार्यम् ॥

यत्खङ्गहस्तपरिषातमदान्धमत्त-
मातङ्गमस्तकविनिर्गतमौक्तिकौघैः ।
संयत्यरातिनिकरान्हसतीव नाना-
दिक्षु पलायनपरान्महती जयश्रीः ॥

कीर्तिर्यस्य मनोहरा त्रिभुवनं विभ्राजयन्ती भृशं
स्वच्छासत्कुमुदाकरप्रियकरी दिङ्मण्डलं तन्वती ।
कुर्वाणापि सदा समस्तजगतां हर्षं द्विषद्योषितां
वक्राम्भोजसुदुःसहा विजयते ज्योत्स्नेव शीतद्युतेः ॥

स स्वामिनश्चोडदेवस्य तस्य प्राप्य प्रसादादथ ग्रामवर्यम् ।
लक्ष्मीपतीशप्रसादाप्तलक्ष्मीर्दातुं द्विजेभ्यो धियं संदधार ॥

ततश्च—

शाकाब्दानां प्रमाणे रसविशिखवियच्चन्द्रसंख्यां (१०५६) प्रयाते
देशे सावत्तिलीतिक्षितितलविदिते पोण्डुवग्रामयुक्तम् ।
सार्द्रक्षे पूर्वपक्षे विषुवति सुतिथौ मण्डदोरग्रहारं
प्रादाद्विद्वद्विजेभ्यः स्थिरतरमकरं काटदण्डाधिनाथः ॥

तथैतद्ग्रामसीमान्तर्वर्तिनो ये कुटुम्बिनः ।
विट्छूद्रतक्षरजककर्मारतिलपूतकाः ॥
सुवर्णकंसचर्मास्त्रकुम्भकाराश्च नापिताः ।
अजगोपालकाश्चैव चण्डालाद्यास्तथापरे ॥
तैर्देयकरमप्येभ्यो ब्राह्मणेभ्योऽददात्तदा ।
दत्त्वैवमग्रहारं तमित्थमाज्ञापयत्यसौ ।
तद्राष्ट्रकूटप्रमुखान्समाहूय कुटुम्बिनः ।
दत्तमित्थं मया सर्वमेतद्विदितमस्तु वः ॥

---

१. 'वैरिपुरंत्रिनेत्रेषु' इत्युचितः पाठः. २. 'परिघात' इत्युचितः पाठः.

प्रतृगृहीतृब्राह्मणनामानि—तत्र भारद्वाजाः द्रोणार्यः मेडार्यः सूरार्यः नूङ्कार्यः गुण्डार्यः वेन्नार्यः नामार्यः वासनार्यः नामार्यः मधुराधिपार्यः द्रोड्डार्यः माधवार्यः सिन्वार्यः कोम्मार्यः वामार्यः पोटार्यः गोविन्दार्यः चन्द्रार्यः भागिनः—सोमनार्यः नित्तनार्यः सूरार्यः कुण्डिनाः—भीमार्यः उर्यकोण्डार्यः विष्ण्वार्यः अर्धिनः—कोम्मार्यः कृष्णार्यः वामार्यः कामार्यः नन्दार्यः कोम्मार्यः मण्डनार्यः कृष्णार्यः भीमार्यः वामार्यः दारार्यः वाधूलाः—आदित्यार्यः ईश्वरार्यः करुकनार्यः हरिताः—विष्ण्वार्यः माधवार्यः मल्लार्यः कोटार्यः द्रोणार्यः कामार्यः रेमार्यः नारायणार्यः भागिनः—नामार्यौ द्वौ मैत्रावरुणौ सत्युनार्यौ भागी सूरार्यः कौशिकाः—नूङ्कार्यः कोम्मार्यः सूरार्यः अर्धिनः—तातार्यः विष्ण्वार्यः पेन्नार्यः बोप्पार्यः श्रीधरार्यः मैत्रेयः—शंकरार्यः वात्सः द्रोणार्यः कपिलः पोटार्यः यस्कः—अय्यनार्यः आत्रेयाः—राघवार्यः भागिनः—ताडार्यः अल्लीडार्यः अर्धिनौ शौनकाः पोटार्यादयः पञ्च सार्धभागिनः पराशरौ कोम्मार्यः विष्ण्वार्यः पुरुकुत्सः मलयाण्डार्यः भागिनः काश्यपाः—अन्नार्यः अप्पार्यः अर्धिनौ—वासुदेवार्यः मावार्यः सूरार्यः अन्नार्यः शासनकाव्यकृच्छंकरनारायणार्यः भागिनः ईश्वरस्यैको भागः विष्णोरेको भागः। अथ पोण्डुवयुक्तस्यास्य ग्रामस्य क्षेत्रसीमानः—पूर्वतः—पोण्डुव कोम्मर यिलियूरि मुय्यनिकुट्गुण्ट अटवेन्ननिगुण्ट । आग्नेयतः—पोण्डुव यिलियूरि नलमियय्पमुल्वु अटपेनुङ्गोलुनय्पमुल्वुम् गरुवुगुण्ट लुङ्गाण्डि यावगुमियु नूङ्क निगुण्टपु । दक्षिणतः—नूङ्कनिगुण्टम् बासिपायिनयमरुपट्ट अटपहिण्डिगुण्ट नलुमु । निर्ऋतितः—कोक्किलिपूण्डि पाटिपलुमटि मुय्यनिकुट्गुण्ट । पश्चिमतः—लेल्लगुण्ट कोलु । वायव्यतः—उण्डन्दोर्टि पासुदोव गोवमि मुय्यनिकुट् अट उण्डन्दोर्टि गोवमि काकण्डिबाल मुय्यनिकुट् । उत्तरतः—मद्दिगुण्ट अट मेलनिगुण्टयु नेरियनिगुण्टयु नावनिगुण्टयु नटयीयूरि पल्लियैन पोण्डुव स्वाङ्कग्राम्यार्ति मुय्यनिकुट् अट पनुलवाण्डूगुण्टयुम् बल्लनिकाटितलयु । ईशानतः—प्रान्तगुण्ट ।

इतः परं न कार्योऽस्य ग्रामस्योपद्रवो नरैः ।
लोभादुपद्रवं तस्य कुर्याद्यः स नराधमः ॥
यायात्पञ्चमहापापी द्रोही सोमेश्वरस्य च ।
गङ्गायां गोसहस्रस्य वधपापमवाप्नुयात् ॥

अस्ति व्यासोक्तमपि—

'स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिवर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥

तथा, बहुभिर्वसुधा दत्ता बहुभिश्चानुपालिता ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ इति ॥

लेखकः कन्नाचार्यसूनुः पल्लाचार्यः ।

(इण्डियन् आण्टिक्केरी १४।५६-५९)

---

(३७)

श्रीभद्रबाहुप्रशस्तिः ।

स्वस्ति ॥

जितं भगवता श्रीमद्धर्मतीर्थविधायिना ।
वर्धमानेन संप्राप्तसिद्धिसौख्यामृतात्मना ॥
लोकालोकद्वयाधारवस्तु स्थास्नु चरिष्णु च ।
सच्चिदालोकशक्तिः स्वा व्यश्नुते यस्य केवला ॥
जगत्यचिन्त्यमाहात्म्यपूजातिशयमीयुषः ।
तीर्थकृन्नामपुण्यौघमहार्हन्त्यमुपेयुषः ॥
तदनु श्रीविशाले यज्जयत्यद्य जगद्धितम् ।
तस्य शासनमव्याजं प्रवादिमतशासनम् ॥

अथ खलु सकलजगदुदयकरणोदितातिशयगुणास्पदीभूतपरमजिनशासनसरससमभिवर्धितभव्यजनकमलविकसनवितिमिरगुणकिरणसहस्रमहोति**महावीरसवितरि** परिनिर्वृते भगवत्परमर्षि**गौतम**गणधरसाक्षाच्छिष्यलो-

हार्य-जम्बु-विष्णुदेव-अपराजित-गोवर्धन-भद्रबाहु-विशाखप्रोष्ठिल-क्षत्रिकार्य-जयनाम-सिद्धार्थ-धृतिषेण-बुद्धिलादिगुरुपरम्परीणक्रमाभ्यागतमहापुरुषसंततिसमवद्योतितान्वयभद्रबाहुस्वामिना उज्जयिन्यामष्टाङ्गमहानिमित्ततत्त्वज्ञेन त्रैकाल्यदर्शिना निमित्तेन द्वादशसंवत्सरकालवैषम्यमुपलभ्य कथिते सर्वः संघ उत्तरापथाद्दक्षिणापथं प्रस्थितः । आर्षेणैव जनपदमनेकग्रामशतसंख्यमुदितजनधनकनकसस्यगोमहिषाजाविक(कु)लसंमाकीर्णं प्राप्तवान् । अतः आचार्यः प्रभाचन्द्रेणामावनितलललामभूतेऽथास्मिन्कटवप्रनामकोपलक्षिते विविधतरुवरकुसुमदलावलीविकचनाशबलविपुलसजलजलदनिवहनीलोपलतले वराहद्वीपिव्याघ्रर्क्षतरक्षुव्यालमृगकुलोपचितोपत्यकाकंदरदरीमहागुहागहनाभोगवति समुत्तुङ्गशृङ्गे शिखरिणि जीवितशेषमल्पतरकालमवबुध्याध्वनः सुचकितस्तपःसमाधिमाराधयितुमापृच्छ्य निरवशेषेण संघं विसृज्य शिष्येणैकेन पृथुलकास्तीर्णतलासु शिलासु शीतलासु स्वदेहं सन्यस्याराधितवान् । क्रमेण सप्तशतमृषीणामाराधितमिति । जयतु जिनशासनमिति ॥

(ब० ल० राइसपण्डितमुद्रिते 'इन्स्क्रिप्शन्स् ऐट् श्रवलबेल्गोला' नामकपुस्तके प्रथमो लेखः.)

---

(३८)

श्रीमल्लिषेणप्रशस्तिः ।

(उत्तरपार्श्वे) (पार्श्वनाथबस्ती)

श्रीमन्नाथकुलेन्दुरिद्रपरिषद्वन्द्यः श्रुतश्रीसुधा-
धाराधौतजगत्तमोपहमहः पिण्डप्रकाण्डं महत् ।
यस्मान्निर्मलधर्मवार्धिविपुलश्रीर्वर्धमाना सतां
भर्तुर्भव्यचकोरचक्रमवतु श्रीवर्धमानो जिनः ॥
जीयादर्थयुतेन्द्रभूतिविदिताभिख्यो गणे गौतम-
स्वामी सप्तमहर्द्धिभिस्त्रिजगतीमापादयन्पादयोः ।

---

१. प्रभाचन्द्रेण सहेत्यर्थः.

यद्बोधाम्बुधिमेत्य वीरहिमवत्कुत्कील(घोप)कण्ठाद्बुधा-
म्भोदात्ता भुवनं पुनाति वचनस्वच्छन्दमन्दाकिनी ॥
तीर्थेशदशन(दर्शन)भवन्नयदक्सहस्र-
विस्रब्धबोधवपुषः श्रुतकेवलीन्द्राः ।
निर्भिन्दतां विबुधवृन्दशिरोभिवन्द्याः
स्फूर्जद्वचःकुलिशतः कुमताद्रिमुद्राः ॥
वर्ण्यः कथं नु महिमा भण भद्रबाहो-
र्मोहोरुमल्लमदमर्दनवृत्तबाहोः ।
यच्छिष्यताप्तसुकृतेन स चन्द्रगुप्तः
शुश्रूष्यते स सुचिरं वनदेवताभिः ॥
वन्द्यो विभुर्भुवि न कैरिह कोण्डकुन्दः
कुन्दप्रभाप्रणयिकीर्तिविभूषिताशः ।
यश्चारुचारणकराम्बुजचञ्चरीक-
श्चक्रे श्रुतस्य भरते प्रयतः प्रतिष्ठात्(म्) ॥
वन्द्यो भस्मकभस्मसात्कृतिपटुः पद्मावतीदेवता-
दत्तोदात्तपदः स्वमन्त्रवचनव्याहूतचन्द्रप्रभः ।
आचार्यः स समन्तभद्रगणभृद्येनेह काले कलौ
जैनं वर्त्म समन्तभद्रमभवद्भद्रं समन्तान्मुहुः ॥
चूर्णि(ः) ॥
यस्यैवंविधा वादारम्भसंरम्भविजृम्भिताभिव्यक्तयः सूक्तयः ॥
वृत्त(म्) ॥
पूर्वं पाटलिपुत्रमध्यनगरे भेरी मया ताडिता
पश्चान्मालवसिन्धुठक्कविषये काञ्चीपुरे वैदिशे ।
प्राप्तोऽहं करहाटकं बहुभटं विद्योत्कटं संकटं
वादार्थी विचराम्यहं नरपते शार्दूलविक्रीडितम् ॥
अवटुतटमटति झटिति स्फुटपटुवाचाटधूर्जटेरपि जिह्वा ।
वादिनि समन्तभद्रे स्थितवति तव सदसि भूप कास्थानै(न्ये)षाम् ॥

योऽसौ घातिमलद्विषद्बलशिलास्तम्भावलीखण्डन-
ध्यानासिः पटुरर्हतो भगवतः सोऽस्य प्रसादीकृतः।
छात्रस्यापि स सिंहनन्दिमुनिना नो चेत्कथं वा शिला-
स्तम्भो राज्यरमागमाध्वपरिघस्तेनासिखण्डो घनः॥

वक्रग्रीवमहामुनेर्दशशतग्रीवोऽप्यहीन्द्रो यथा
जातं स्तोतुमलं वचोबलमसौ किं भग्नवाग्मिव्रजम्।
योऽसौ शासनदेवताबहुमतो ह्रीवक्रवादिग्रह-
ग्रीवोऽस्मिन्नथ शब्दवाच्यमवदन्मासान्समासेन षट्॥

नवस्तोत्रं तत्र प्रसरति कवीन्द्राः कथमपि
प्रणामं वज्रादौ[1] रचयत परं नन्दिनि मुनौ।
नवस्तोत्रं येन व्यरचि सकलार्हत्प्रवचन-
प्रपञ्चान्तर्भावप्रवणवरसंदर्भसुभगम्॥

महिमा स पात्रकेसरिगुरोः परं भवति यस्य भक्त्यासीत्।
पद्मावतीसहायात्रिलक्षणकदर्थनं कर्तुम्॥

सुमतिदेवममुं स्तुत येन वः सुमतिसप्तकमाप्ततया कृतम्।
परिहृतापदतत्त्वपदार्थिनां सुमतिकोटिविवर्ति भवार्तिहृत्॥

उपेत्य सम्यग्दिशि दक्षिणस्यां कुमारसेनो मुनिरस्तमाप।
तत्रैव चित्रं जगदेकभानोस्तिष्ठत्यसौ तस्य तथा प्रकाशः॥

धर्मार्थकामपरिनिर्वृतिचारुचिन्त-
श्चिन्तामणिः प्रतिनिकेतमकारि येन।
स स्तूयते सरससौख्यभुजा सुजात-
श्चिन्तामणिर्मुनिवृषो न कथं जनेन॥

चूडामणिः कवीनां चूडामणिनामसेव्यकाव्यकविः।
श्रीवर्धदेव एव हि कृतपुण्यः कीर्तिमाहर्तुम्॥

---

1. वज्रनन्दिनि.

चूर्णि(:) ॥

य एवमुपश्लोकितो **दण्डिना** ।

जह्नोः कन्यां जटाग्रेण बभार परमेश्वरः ।

श्रीवर्धदेव संधत्से जिह्वाग्रेण सरस्वतीम् ॥

पुष्पास्त्रस्य जयो गणस्य भरणं भूभृच्छिखाघट्टनं

पञ्चास्यमस्तु महेश्वरस्तदपि न प्राप्तुं तुलामीश्वरः ।

यस्याखण्डकलावतोऽष्टविलसद्दिक्पालमौलिस्खल-

त्कीर्तिस्वःसरितो **महेश्वर** इह स्तुत्यः स कैः स्यान्मुनिः ॥

यः सप्ततिमहावादान् जिगायान्यानथामितान् ।

ब्रह्मरक्षोऽर्चितः सोऽर्च्यो महेश्वरमुनीश्वरः ॥

तारा येन विनिर्जिता घटकुटीगूढावतारा समं

बौद्धैर्यो धृतपीडपीडितकुदृग्देवार्थसेवाञ्जलिः ।

प्रायश्चित्तमिवाङ्घ्रिवारिजरजःस्नानं च यस्याचर-

द्दोषाणां सुगतः स कस्य विषयो **देवाकलङ्कः** कृती ॥

चूर्णि(:) ॥

यस्येदमात्मनोऽनन्यसामान्यनिरवद्यविद्याविभवोपवर्णनमाकर्ण्यते ।

राजन्साहसतुङ्ग सन्ति बहवः श्वेतातपत्रा नृपाः

किं तु त्वत्सदृशा रणे विजयिनस्त्यागोन्नता दुर्लभाः ।

तद्वत्सन्ति बुधा न सन्ति कवयो वादीश्वरा वाग्मिनो

नानाशास्त्रविचारचातुरधियः काले कलौ मद्विधाः ॥

नमो मल्लिषेणमलधारिदेवाय ॥   (पूर्वपार्श्वे)

राजन्सर्वारिदर्पप्रविदलनपटुस्त्वं यथात्र प्रसिद्ध-

स्तद्वत्ख्यातोऽहमस्यां भुवि निखिलमदोत्पाटनः पण्डितानाम् ।

नो चेदेषोऽहमेते तव सदसि सदा सन्ति सन्तो महान्तो

वक्तुं यस्यास्ति शक्तिः स वदतु विदिताशेषशास्त्रो यदि स्यात् ॥

नाहंकारवशीकृतेन मनसा न द्वेषिणा केवलं

नैरात्म्यं प्रतिपद्य नश्यति जने कारुण्यबुद्ध्या मया ।

राज्ञः श्रीहिमशीतलस्य सदसि प्रायो विदग्धात्मनो
बौद्धौघान्सकलान्विजित्य सुगतः पादेन विस्फोटितः ॥
श्रीपुष्पषेणमुनिरेव पदं महिम्नो
देवः स यस्य समभूत्स भवान्सधर्मा ।
श्रीविभ्रमस्य भवनं ननु पद्ममेव
पुष्पेषु मित्रमिह यस्य सहस्रधामा ॥

विमलचन्द्रमुनीन्द्रगुरोर्गुरुः प्रशमिताखिलवादिमदं पदम् ।
यदि यथावदवैष्यत पण्डितैर्ननु तदान्ववदिष्यत वाग्विभोः ॥
चूर्णि(:) ॥

तथाहि । यस्यायमापादितपरवादिहृदयशोकः पत्रालम्बनश्लोकः ॥
पत्रं शत्रुभयंकरोरु भवनद्वारे सदा संचर-
न्नानाराजकरीन्द्रवृन्दतुरगव्राताकुले स्थापितम् ।
शैवान्पाशुपतांस्तथागतसुतान्कापालिकान्कापिला-
नुद्दिश्योद्धृतचेतसा विमलचन्द्राशाम्बरेणादरात् ॥
दुरितग्रहनिग्रहाद्भयं यदि भो भूरिनरेन्द्रवन्दितम् ।
ननु तेन हि भव्यदेहिनो भजत श्रीमुनि**मिन्द्रनन्दिनम्** ॥
घटवादघटाकोटिकोविदं को विदां प्रवाक् ।
परवादिमल्लदेवो देव एव न संशयः ॥
चूर्णि(:) ॥

येनेयमात्मनामधेयनिरुक्तिरुक्ता नाम पृष्टवन्तं **कृष्णराजं** प्रति ।
गृहीतपक्षादितरः परः स्यात्तद्वादिनस्ते परवादिनः स्युः ।
तेषां हि मल्लः परवादिमल्लस्तन्नाम मन्नाम वदन्ति सन्तः ॥
आचार्यवर्यो यतिरार्यदेवो राद्धान्तकर्ता ध्रियतां स मूर्ध्नि ।
यः स्वर्गयानोत्सवसीम्नि कायोत्सर्गस्थितः कायमुदुत्ससर्ज ॥
श्रवणकृततृणोऽसौ संयमं ज्ञातुकामैः
शयनविहितवेलासुप्तलुप्तावधानः ।

श्रुतिमरभसवृत्त्योन्मृज्य पिञ्छेन शिश्ये
किल मृदुपरिवृत्त्या दत्ततत्कीटवर्त्मा ॥
विश्वं यः श्रुतबिन्दुनावरुरुधे भावं कुशाग्रीयया
बुद्ध्यैवातिमहीयसा प्रवचसा बद्धं गणाधीश्वरैः ।
शिष्यान्प्रत्यनुकम्पया कृशमतीनैदंयुगीनान्सुगी-
स्तं वाचार्चत **चन्द्रकीर्तिगणिनं** चन्द्राभकीर्तिं बुधाः ॥
सद्धर्मकर्मप्रकृतिं प्रणामाद्यस्योग्रकर्मप्रकृतिप्रमोषः ।
तं नाम्नि **कर्मप्रकृतिं** नमामो भट्टारकं दृष्टकृतान्तपारम् ॥
अपि स्ववाग्व्यस्तसमस्तविद्यस्त्रैविद्यशब्देऽप्यनुमन्यमानः ।
श्रीपालदेवः प्रतिपालनीयः सतां यतस्तत्त्वविवेचनी धीः ॥
तीर्थे **श्रीमतिसागरो** गुरुरिलाचक्रं चकार स्फुर-
ज्ज्योतिःपीततमःपयःप्रविततिः पूतं प्रभूताशयः ।
यस्माद्भूरिपरार्थ्यपावनगुणः श्रीवर्धमानोल्लस-
द्रत्नोत्पत्तिरिलातलाधिपशिरःशृङ्गारकारिण्यभूत् ॥
यत्राभियोक्तरि लघुर्लघुधामसोम-
सौम्याङ्गभृत्स च भवत्यपि भूतिभूमिः ।
विद्याधनं जयपदं विशदं दधानो
विष्णुः स एव हि महामुनि**र्हेमसेनः** ॥
चूर्णि ॥ यस्यायमवनिपतिपरिषदि निग्रहमहीनिपातभीतदुस्थदुर्गर्वपर्व-
तारूढप्रतिवादिलोकः प्रतिज्ञाश्लोकः ॥
तर्के व्याकरणे कृतश्रमतया धीमत्तयाप्युद्धतो
मध्यस्थेषु मनीषिषु क्षितिभृतामग्रे मया स्पर्धया ।
यः कश्चित्प्रतिवक्ति तस्य विदुषो वाग्मेयभङ्गं परं
कुर्वेऽवश्यमिति प्रतीहि नृपते हे हैमसेनं मतम् ॥
हितैषिणां यस्य नृणामुदात्तवाचा निबद्धा हितरूपसिद्धिः ।
बन्धो **दयापालमुनिः** स वाचा सिद्धः सतां मूर्धनि यः प्रभावैः ॥

यस्य श्रीमतिसागरो गुरुरसौ चञ्चद्यशश्चन्द्रसूः
श्रीमान्यस्य स वादिराजगणभृत्सब्रह्मचारी विभोः ।
एकोऽतीव कृती स एव हि दयापालव्रती यन्मन-
स्यास्तामन्यपरिग्रहग्रहकथा स्वे विग्रहे विग्रहः ॥
त्रैलोक्यदीपिका वाणी द्वाभ्यामेवोदगादिह ।
जिनराजत एकस्मादेकस्माद्वादिराजतः ॥
आरुह्याम्बरमिन्दुबिम्बरचितौत्सुक्यं सदा यद्यश-
श्छत्रं वाक्चमरीजराजिरुचयोऽभ्यर्णं च यत्कर्णयोः ।
सेव्यः सिंहसमर्च्यपीठविभवः सर्वप्रवादिप्रजा-
दत्तोच्चैर्जयकारसारमहिमा श्रीवादिराजो विदाम् ॥
चूर्णि ॥ यदीयगुणगोचरोऽयं वचनविलासप्रसरः कवीनाम् ।
नमोऽर्हते ॥ (दक्षिणपार्श्वे)
श्रीमच्चालुक्यचक्रेश्वरजयकटके वाग्वधूजन्मभूमौ
निष्काडं डिण्डिमः पर्यटति पटुरटो(वो) वादिराजस्य जिष्णोः ।
जह्युद्यद्वाददर्पो जहिहि गमकतागर्वभूमा जहाहि
व्याहारेर्ष्यो जहीहि स्फुटमृदुमधुरश्राव्यकाव्यावलेपः ॥
पाताले व्यालराजो वसति सुविदितं यस्य जिह्वासहस्रं
निर्गन्ता स्वर्गतोऽसौ न भवति धिषणो वज्रभृद्यस्य शिष्यः ।
जीवेतां तावदेतौ निलयबलवशाद्वादिनः केऽत्र नान्ये
गर्वं निर्मुच्य सर्वं जयिनमिनसभे वादिराजं नमन्ति ॥
वाग्देवीं सुचिरप्रयोगसुदृढप्रेमाणमप्यादरा-
दादत्ते मम पार्श्वतोऽयमधुना श्रीवादिराजो मुनिः ।
भो भोः पश्यत पश्यतैष यमिनां किं धर्म इत्युच्चकै-
रब्रह्मण्यपराः पुरातनमुनेर्वाग्वृत्तयः पान्तु वः ॥
गङ्गावनीश्वरशिरोमणिबन्धसंध्या-
रागोल्लसच्चरणचारुनखेन्दुलक्ष्मीः ।
श्रीशब्दपूर्वविजयान्तविनूतनामा[1]
धीमानमानुषगुणोऽस्ततमः प्रमांशुः ॥

१. श्रीविजय इति तात्पर्यम्.

चूर्णि ॥ स्तुतो हि स भवानेष श्रीवादिराजदेवेन ॥

यद्विद्यातपसोः प्रशस्तमुभयं श्रीहेमसेने मुनौ
प्रागासीत्सुचिराभियोगबलतो नीतं परामुन्नतिम् ।
प्रायः श्रीविजये तदेतदखिलं तद्वीथिकायां स्थिते
संक्रान्तं कथमन्यथानतिचिरादीदृग्विधेदृक्तपः ॥

विद्योदयोऽस्ति न मदोऽस्ति तपोऽस्ति भास्व-
न्नोग्रत्वमस्ति विभुतास्ति न चास्ति मानः ।
यस्याश्रये **कमलभद्र**मुनीश्वरं तं
यः ख्यातिमापदिह शाम्यदघैर्गुणौघैः ॥

स्मरणमात्रपवित्रतमं मनो भवति यस्य सतामिह तीर्थिनाम् ।
तमतिनिर्मलमात्मविशुद्धये कमलभद्रसरोवरमाश्रये ॥

सर्वाङ्गैर्यमिहालिलिङ्ग सुमहाभागं कला भारती
भास्वन्तं गुणरत्नभूषणगणैरप्यग्रिमं योगिनाम् ।
तं सन्तः स्तुवतामलंकृत**दयापाला**भिधानं महा-
सूरिं भूरिधियोऽत्र पण्डितपदं यत्रैव युक्तं स्मृताः(तम्) ॥

विजितमदनदर्पः श्रीदयापालदेवो
विदितसकलशास्त्रो निर्जिताशेषवादी ।
विमलतरयशोभिर्व्याप्तदिक्चक्रवालो
जयति नतमहीभृन्मौलिरत्नारुणाङ्घ्रिः ॥

यस्योपास्य पवित्रपादकमलद्वन्द्वं नृपः **पोय्सलो**
लक्ष्मीं सन्निधिमानयत्स **विनयादित्यः** कृताज्ञाभुवः ।
कस्तस्यार्हति **शान्तिदेव**यमिनः सामर्थ्यमित्थं तथे-
त्याख्यातुं विरलाः कलौ स्फुरदुरुज्योतिर्दशास्तादृशाः ॥

स्वामीति **पाण्ड्य**पृथिवीपतिना निसृष्ट-
नामाप्तदृष्टिविभवेन निजप्रसादात् ।
धन्यः स एव मुनि**राहवमल्ल**भूभु-
गास्थानिकप्रथितशब्द**चतुर्मुखा**ख्यः ॥

श्रीमुह्लूरविदूरसारवसुधारत्नं सनाथो गुणे
नाक्षूणीनमहीक्षितामुरुमहःपिण्डः शिरोमण्डनः।
आराध्यो **गुणसेनपण्डितपतिः** स स्वास्थ्यकामैर्जना
यद्युक्तागमगन्धतोऽपि गलितग्लानिं गतिं लम्बि(म्भि)ताः।
वन्दे वन्दितमादरादहरहः स्याद्वादविद्याविदां
स्वान्तध्वान्तवितानधूननविधौ भास्वन्तमन्यं भुवि।
भक्तोत्पादितसेवमानतिकृतां यत्संनियोगान्मनः-
पद्मं सद्म भवेद्विकासविभवस्योनु(न्मु)क्तनिद्राभरम्।
मिथ्याभाषणभूषणं परिहरेतौद्धत्य·······चत
स्याद्वादं वदता नमेत विनयाद्वादीभकण्ठीरवम्।
नो चेत्तद्गुणनिर्जितश्रुतिभयभ्रान्ताः स्थ यूयं यत-
स्तूर्णं निग्रहजीर्णकूपकुहरे वादिद्विपा पातिनः॥
गुणाः कुन्दस्पन्दोड्डमरसमरा वागमृत वाः-
प्लवप्रायप्रेयःप्रसरसरसा कीर्तिरिव सा।
नखेन्दुज्योत्स्नाङ्कैर्नृपचयचकोरप्रणयिनी
न कासां श्लाघानां पदमजितसेनव्रतिपतिः(तेः)॥
सकलभुवनपालानम्रमूर्धावबद्ध-
स्फुरितमकुटचूडालीढपादारविन्दः।
मदवदखिलवादीभेन्द्रकुम्भप्रभेदी
गणभृदजितसेनो भाति वादीभसिंहः॥
चूर्णि॥ यस्य संसारवैराग्यवैभवमेवंविधाः स्ववाचः सूचयन्ति॥
प्राप्तं श्रीजिनशासनं त्रिभुवने यद्दुर्लभं प्राणिनां
यत्संसारसमुद्रमग्नजनता हस्तावलम्बायितम्।
यत्प्राप्ताः परनिर्व्यपेक्षसकलज्ञानश्रियालंकृता-
स्तस्मात्किं गहनं कुतो भयवशः का वात्र देहे रतिः॥
आत्मैश्वर्यं विदितमधुनानन्तबोधादिरूपं
तत्संप्राप्त्यै तदनु समयं वर्ततेऽत्रैव चेतः।

त्यक्त्वान्यस्मिन्सुरपतिसुखे चक्रिसौख्ये च तृष्णां
तत्तुच्छार्थैरलमलमधीलोचनैर्लोकवृत्तैः ॥
अजानन्नात्मानं सकलविषयज्ञानवपुषं
सदा शान्तं स्वान्तःकरणमपि तत्साधनतया ।
बही रागद्वेषैः कलुषितमनाः कोऽपि यततां
कथं जानन्नेनं क्षणमपि ततोऽन्यत्र यतते ॥

(पश्चिमपार्श्वे) चूर्णि ॥ यस्य च शिष्ययोः **कविताकान्त-वादिकोलाहला**परनामधेययोः **शान्तिनाथ-पद्मनाभ**पण्डितयोरखण्डपाण्डित्यगुणोपवर्णनमिदमसंपूर्णम् ॥

त्वामासाद्य महाधियं परिगता या विश्वविद्वज्जन-
ज्येष्ठाराध्यगुणा चिरेण सरसा वैदग्ध्यसंपद्गिरा(म्) ।
कृत्स्नाशान्तनिरन्तरोदितयशःश्रीकान्त शान्ते न तां
वक्तुं सापि सरस्वती प्रभवति ब्रूमः कथं तद्वयम् ॥
व्यावृत्तभूरिमदसंततिविस्मृतेर्ष्या-
पारुष्यमाप्तकरुणारुतिकान्दिशीकम् ।
धावन्ति हन्त परवादिगजास्त्रसन्तः
श्रीपद्मनाभबुधगन्धगजस्य गन्धात् ॥
दीक्षा च शिक्षा च यतो यतीनां जैनं तपस्तापहरं दधानात् ।
कुमारसेनोऽवतु यच्चरित्रं श्रेयःपथोदाहरणं पवित्रम् ॥
जगद्भरिमघस्मरस्मरमदान्धगन्धद्विप-
द्विधाकरणकेसरी चरणभूष्यभूभृच्छिखः ।
द्विषद्गुणवपुस्तपश्चरणचण्डधामोदयो
दयेत मम **मल्लिषेणमलधारिदेवो** गुरुः ॥
वन्दे तं मलधारिणं मुनिपतिं मोहद्विषद्व्याहति-
व्यापारव्यवसायसारहृदयं सत्संयमोरुश्रियम् ।
यत्कायोपचयीभवन्मलमपि प्रव्यक्तभक्तिक्रमा-
नम्राकम्रमनोमिलन्मलमषीप्रक्षालनैकक्षमम् ॥

अतुच्छतिमिरच्छटाजटिलजन्मजीर्णाटवी-
दवानलतुलाजुषां पृथुतपःप्रभावत्विषाम् ।
पदं पदपयोरुहभ्रमितभव्यभृङ्गावलि-
र्ममोल्लसतु मल्लिषेणमुनिराण्मनोमन्दिरे ॥
नैर्मल्याय मलाविलाङ्गमखिलत्रैलोक्यराज्यश्रिये
नैष्किंचन्यमतुच्छतापहृतये न्यञ्चद्धुताशं तपः ।
यस्यासौ गुणरत्नरोहणगिरिः श्रीमल्लिषेणो गुरु-
र्वन्द्यो येन विचित्रचारुचरितैर्धात्री पवित्रीकृता ॥
यस्मिन्नप्रमिता क्षमाभिरमते यस्मिन्दयानिर्दया-
श्लेषो यत्र समत्वधीः प्रणयिनी यत्रास्पृहा सस्पृहा ।
कामं निर्वृतिकामुकः स्वयमधोऽप्यग्रेसरो योगिना-
माश्चर्याय कथं न नाम चरितैः श्रीमल्लिषेणो मुनिः ॥
यः पूज्यः पृथिवीतले यमनिशं सन्तः स्तुवन्त्यादरा-
द्येनानङ्गधनुर्जितं मुनिजना यस्मै नमस्कुर्वते ।
यस्मादागमनिर्णयोऽयमभवद्यस्यास्ति जीवे दया
यस्मिञ्श्रीमलधारिणि व्रतिपतौ धर्मोऽस्ति तस्मै नमः ॥
धवलसरसतीर्थे[1] सैष सन्न्यासधन्यां
परिणतिमनुतिष्ठन्नन्दिमानिष्ठितात्मा ।
व्यसृजत निजमङ्गं भङ्गमङ्गोद्भवस्य
ग्रथितुमिव समूलं भावयन्भावनाभिः ॥

चूर्णि ॥ तेन श्रीमदजितसेनपण्डितदेवदिव्यश्रीपादकमलमधुकरीभूतभावेन महानुभावेन जैनागमप्रसिद्धसल्लेखनाविधिविसृज्यमानदेहेन समाधिविधिविलोकनोचितकरणकुतूहलमिलितसकलसंघसंतोषनिमित्तमात्मान्तःकरणपरिणतिप्रकाशनाय निरवद्यं पद्यमिदमाशु विरचितम् ॥

आराध्य रत्नत्रयमागमोक्तं विधाय निःशल्यमशेषजन्तोः ।
क्षमां च कृत्वा जिनपादमूले देहं परित्यज्य दिवं विशामः ॥

१. अधुना 'बेल्गोला'नाम्ना प्रसिद्धे.

शाके शून्यशराम्बरावनि(१०५०)मिते संवत्सरे कीलके
मासे फाल्गुनिके तृतीयदिवसे वारेऽसिते भास्करे।
स्वातौ श्वेतसरोवरे सुरपुरं यातो यतीनां पति-
र्मध्याह्ने दिवसत्रयानशनतः श्रीमल्लिषेणो मुनिः॥

श्रीमन्मलधारिदेवर गुड्डं विरुदलेखक मदन महेश्वरं मल्लिनाथं वरेदं विरुद्रूवारिमुखतिलकं गङ्गाचारिकण्डरिषिदम्॥

(बृ. लु. राइस् पण्डितमुद्रिते 'इन्स्क्रिपृशन्स् ऐट् श्रवणबेल्-गोला'नामकपुस्तके चतुष्पञ्चाशो लेखः।)

---

(३९)

यादववंशोद्भूतकृष्ण(कन्हर)महीपालामात्यमल्लिसेट्टि-दानपत्रम्।

ॐ नमः शिवाय॥ श्रीगणाधिपतये नमः॥

पायादाद्यः स वः पोत्री यद्दंष्ट्राप्रतिबिम्बिता।
अगादिव धृता धात्री हर्षाद्द्विगुणपुष्टताम्॥
अस्ति स्वस्त्ययनो राजा **सिंहणो** यदुवंशजः।
यस्य कीर्तिस्त्रिभुवने प्रथिता हरिकीर्तिवत्॥
प्रत्यर्थिक्षितिपालमौलिमुकुटप्रत्युप्तमुक्ताफल-
प्रान्तप्रोल्लसदङ्घ्रिवारिजयुगः श्रीसिंहणः क्षोणिपः।
आशाविश्रुतशुद्धयादवकुलस्रष्टोऽवति क्ष्मातलं
पारावारसुमेखलं सुतवरः शूरोऽजयज्जैतुगिः॥
यो राजा जैतुगिर्नाम सिंहणाख्यान्नृपात्ततः।
जनितो यदुवंशाब्धौ पयोधाविव चन्द्रमाः॥
तस्य पुत्रो महातेजाः **श्रीकन्हर** इति श्रुतः।
यदाज्ञां शिरसा धृत्वा भवन्ति सुखिनो नृपाः॥
जयति जगति राजा सर्वभूपालमौलि-
प्र(ग्र)थितपरमरत्नप्रोल्लसत्पादपद्मः।

यदुकुलचिरलीले वासुदेवे जनाना
नयनकमलसूर्यः प्रीतिमान्कह्नराख्यः ॥
यद्वक्षसि स्थिता लक्ष्मीर्यद्भुजे विजयाङ्गना ।
यद्दृष्टौ करुणा नित्यं ददामीति वचस्यपि ॥
यद्यात्रायां नृपाः सर्वे तत्र तत्र स्थिता दिशि ।
बालैरन्तःपुरैर्भीत्या क्षेपयन्त्यञ्जसा बलिम् ॥
तस्यान्यक्षितिपालमौलिमुकुटप्रत्युप्तरत्नैश्चिरं
नीराजच्चरणारविन्दयुगलः शेषस्य पृथ्वीपतेः ।
शूरोऽमात्यधुरि स्थितो विजयते बीचाग्रजः संततं
मल्लाख्यः किल चिक्कदेवतनयः प्रख्यातकीर्तिर्भुवि ॥
तस्यात्मजो महामात्यश्चौण्डिसेट्टिर्महायशाः ।
यो जिह्वा पृथिवीशस्य यो राज्ञो दक्षिणो भुजः ॥
यश्चौण्डिसेट्टिः प्रथितप्रतापः सर्वासु दिक्षूर्जितपुण्यकीर्तिः ।
श्रीसोमनाथाङ्घ्रियुगात्म(ब्ज)नत्या प्रवर्धिताशेषविभूतिरम्यः ॥
दिशो जिगीषं(षुं) तमवेक्ष्य सर्वे द्विषन्त एवं त्वथ चौण्डिसेट्टिम् ।
वल्मीकमारुह्य तृणं चरन्ति गृह्णन्ति नीवीमपि कर्णपत्रम् ॥
यद्रूपसौन्दर्यगुणप्रलुब्धा रतिः समासाद्य पुनः पतिं सा ।
विस्मृत्य चानङ्गसुखं प्रवृद्धसुखेन विक्रीडति लब्धहर्षा ॥
प्रशास्त्यरीन्यः प्रगृहीतचापो ददाति चार्थान्कृपया द्विजेभ्यः ।
चवुण्डसेट्टाख्यबुधाय दद्यात्तस्मै चिरायुर्भुवि सोमनाथः ॥ ७ ॥

स्वस्तिश्रीशाकसंवत्सरस्य शताधिकसहस्रैकाधिकसप्तत्या(११७०)श्चानन्तरे सौम्येऽब्दे श्रावणे मासि सितपक्षे द्वादश्यां गुरुवारे श्रीकह्नरदेवस्य महाराजस्य बीचाग्रजो मल्लिसेट्टाख्यो महामात्यः कटकयात्रायां भीमरथ्यां पौण्डरीकक्षेत्रे श्रीविष्णुसंनिधौ वेणुग्रामदेशस्थां ताम्रपुरीं दशाधिकशतवृत्तीः प्रकल्पाष्टभोगसमस्ततेजःसहितां सर्वनमस्यां प्रसिद्धचतुःसीमामुद्रितां श्रीकह्नरदेवस्य राज्ञो राज्याभ्युदयार्थं नानागोत्रेभ्यो ब्राह्मणेभ्यः सदक्षिणं धारापूर्वकं प्रदत्तवान् । तस्य पुत्रो महामात्यश्चौण्डिसेट्टिः राज्ञः समीपं

गत्वा पितुः सर्वाधिपत्यं राज्ञो लब्ध्वा वेणुग्रामदेशस्था ताम्ब्रपुरी मम पित्रा ब्राह्मणेभ्यो दत्तेति तस्य राज्ञो निवेदयित्वा तेन राज्ञा मयैव दत्तेति लब्धाभ्यनुज्ञस्तेभ्यो ब्राह्मणेभ्योऽष्टभोगतेजःसमन्वितं सर्वनमस्यं ताम्रशासनं चौण्डिसेट्टिर्दापयित्वा पितुर्धर्ममाचन्द्रार्कं सुस्थिरं कृतवान् ॥ ॐ ॥ तस्मै सर्वतः स्वस्त्यस्तु ॥ ॐ ॥ ततस्तस्यास्ताम्ब्रपुर्याः प्रतिगृहितॄणां ब्राह्मणानां गोत्रगुणनामानि क्रमेण लिख्यन्ते ॥ ॐ ॥ स्वस्ति ॥ ॐ ॥ वसिष्ठगोत्रीयलक्ष्मीधरभट्टोपाध्यायसुतनारायणभट्टोपाध्यायः । तस्य पुत्रः लक्ष्मीधरक्रमितः । वसिष्ठगोत्रीयवामनक्रमितसुतनारायणभट्टोपाध्यायः । आत्रेयगोत्रीयऋगर्थद दुग्गणभट्टोपाध्यायसुतकृष्णभट्टोपाध्यायः । तस्य पुत्रः दुग्गणभट्टोपाध्यायः । काश्यपगोत्रीयकावदेवपट्टवर्धनसुतरामेश्वरपट्टवर्धनः । अगस्त्यगोत्रीयाचार्यकेशवभट्टोपाध्यायसुतदशग्रन्थिमाधवभट्टोपाध्यायः । तस्य भ्राता वेदार्थनार(राय)णभट्टोपाध्यायः । आत्रेयगोत्रीयब्रह्मदेवपट्टवर्धनसुतनारायणपट्टवर्धनः । तस्य भ्राता श्रीधरपट्टवर्धनः । जामदग्न्यवत्सगोत्रीयजक्कदेवभट्टोपाध्यायसुतश्रीधरभट्टोपाध्यायः । काश्यपगोत्रीयश्रीधरभट्टोपाध्यायसुतश्रीभागवतकलिदेवभट्टोपाध्यायः । आत्रेयगोत्रीयनारायणक्रमितसुताध्वरिबसवणभट्टोपाध्यायः । भारद्वाजगोत्रीयनारद(?)सुतकामदेवघैसः । वासिष्ठगोत्रीयभास्करसुतरामदेवघैसः । भारद्वाजगोत्रीयब्रह्मदेवक्रमितसुतसोमेश्वरक्रमितः । काश्यपगोत्रीयलक्ष्मीधरभट्टोपाध्यायसुतसोमेश्वरभट्टोपाध्यायः । भारद्वाजगोत्रीयवामदेवपट्टवर्धनसुतविष्णुपट्टवर्धनः । भारद्वाजगोत्रीयमेधाविघलिसाससुतगोपालपट्टवर्धनः । तस्य भ्राता उत्तमक्रमितः । तस्य सुतः विश्वनाथघलिसासः । वासिष्ठगोत्रीयदेवणपट्टवर्धनसुतशंकराचार्यः । तस्य सुतः चौडरायपट्टवर्धनः । वासिष्ठगोत्रीयजैतकह्नरपाठकसुतरवलदेवपाठकः । तस्य भ्राता केशव पाठकः । भार्गवगोत्रीयदामोदरद्वे(द्विवे)दिसुतशिवहरिपाठकः । तस्य भ्राता सर्वेश्वरद्वे(द्विवे)दी । वासिष्ठगोत्रीयःदेव दुवे(द्विवेदि)सुतलक्ष्मीधरपाठकः । पाराशरगोत्रीयशान्तिशुक्लसुतगजा(दा)धरपाठकः । वत्सगोत्रीयदेवशर्मशुक्लसुतनरसिंहपाठकः । भार्गवगोत्रीयकीर्तिवासपाठकसुतनागदेवपाठकः । गर्गगोत्रीयदेवशर्मपाठकसुताश्वधरपाठकः ।

आर्ष्टिकगोत्रीयामदेवोपाध्यायसुतदामोदरोपाध्यायः। तस्य भ्राता आशोपाध्यायः। कापिष्ठलगोत्रीयचांगदेवपाठकसुतदामोदरपाठकः। देवरातगोत्रीयसारङ्गदीक्षितसुतवासूपाध्यायः। वत्सगोत्रीयमहेश्वरपाठकसुतमहेशर्मपाठकः। गार्ग्यगोत्रीयवाकुपाठकसुतसोढणपाठकः। भारद्वाजगोत्रीयात्रिदेवपण्डितसुतवैजनाथपण्डितः। कौशिकगोत्रीयप्रभाकरत्रिवाडि(पाठि)सुतदामोदरत्रिवाडिः। कौण्डिन्यगोत्रवाकुद्वे(द्विवे)दिसुतजगद्धरद्वे(द्विवे)दिः। कौशिकगोत्रीयमदनाइतपाठकसुतरामदेवपाठकः। भारद्वाजगोत्रीयत्रिलोचनसुतविजयशर्मपाठकः। तस्य भ्राता क्षेमधरपाठकः। शाण्डिल्यगोत्रीयहरिहरत्रिवाडिसुतमहशर्मत्रिवाडिः। कौशिकगोत्रीयउत्तमपण्डितसुतखेयिदेवपण्डितः। गरगगोत्रीयअसधरपाठकसुतसावलपाठकः। मौदुग(द्ग)ल्यगोत्रीयनारायणोपाध्यायसुतबसवणोपाध्यायः। भारद्वाजगोत्रीयगनगनूरमैलारस्वामिगलसुतईश्वरस्वामिः(मी)। विश्वामित्रगोत्रीयसर्वज्ञसरस्वतीभण्डारडदेवणभट्टोपाध्यायसुतसर्वज्ञवैजनाथभट्टोपाध्यायः। आत्रेयगोत्रीयनागदेवसुतवोपदेवोपाध्यायः। काश्यपगोत्रीयतेजोपाध्यायसुतलक्ष्मीधरोपाध्यायः। गर्गगोत्रीयब्रह्मदेवपट्टवर्धनसुतसोमनाथपट्टवर्धनः। तस्य भ्राता त्रिविक्रमभट्टोपाध्यायः। भारद्वाजगोत्रीयमलिदेवपट्टवर्धनसुतभास्करभट्टोपाध्यायः। तस्य भ्राता कलिदेवपट्टवर्धनः। विष्णुवृद्धगोत्रीयतन्त्रमन्त्राचार्यवामदेवभट्टोपाध्यायसुतनरसिंहभट्टोपाध्यायः। विश्वामित्रगोत्रीयसोमेश्वरपट्टवर्धनसुतशंकरघलिसः। विष्णुवृद्धगोत्रीयश्रीधरपट्टवर्धनसुतमाधवपट्टवर्धनः। कपिगोत्रीयमाधवपट्टवर्धनसुतश्रीधरपट्टवर्धनः। काश्यपगोत्रीयकलिदेवघलिससुतविष्णुपट्टवर्धनः। काश्यपगोत्रीयकेशवपट्टवर्धनसुतस्वामिदेवघलिसासः। काश्यपगोत्रीयनारणभट्टनसुतदेवणघलिसः। भारद्वाजगोत्रीयमहादेवपट्टवर्धनसुतमलिदेवघैसासः। तस्य भ्राता देवणघैसासः। भारद्वाजगोत्रीयरामदेवघैसाससुतविष्णुघैसासः। वासिष्ठगोत्रीयादित्यभट्टोपाध्यायसुतवारणाशियविष्णुभट्टोपाध्यायः। पाराशरगोत्रीयवारणाशियनारायणभट्टोपाध्यायसुतविश्वनाथक्रमितः। आत्रेयगोत्रीयसरस्वतीपद्मनाभभट्टोपाध्यायः। काश्यपगोत्रीयद्रविडविश्वनाथभट्टोपाध्यायः। कपिगोत्रीयदामोदरभट्टो-

पाध्यायसुतरवलदेवभट्टोपाध्यायः । काश्यपगोत्रीयमाधवपट्टवर्धनसुतमञ्चयणोपाध्यायः । विश्वामित्रगोत्रीयब्रह्मज्ञानिगलब्रह्मदेवभट्टोपाध्यायसुतानन्तभट्टोपाध्यायः । हरितगोत्रीयगोविन्दपट्टवर्धनसुतवामनपट्टवर्धनः । हरितगोत्रीयवामनपट्टवर्धनसुतगोविन्दपट्टवर्धनः । तस्य भ्राता वासुदेवपट्टवर्धनः । भारद्वाजगोत्रीयचन्द्रभट्टोपाध्यायसुतप्रोलिभट्टोपाध्यायः । भारद्वाजगोत्रीयवासुदेवभट्टोपाध्यायसुतमहादेवपट्टवर्धनः । भारद्वाजगोत्रीयश्रीधरसुतईश्वरघलिसः । श्रीवत्सगोत्रीयमायिदेवघलिसासुतगोविन्दघलिसासः । श्रीवत्सगोत्रीयदिवाकरघलिसासुतनागदेवघलिसासः । वासिष्ठगोत्रीयबलिदेवघैससुतमलिदेवपट्टवर्धनः । मौनभार्गवगोत्रीयनारायणघलिससुतबसवणघलिसासः । भारद्वाजगोत्रीयवेदार्थदरेच्च्यपणसुतमैलारभट्टोपाध्यायः । गौतमगोत्रीयलक्ष्मीधरसुतविष्णुभट्टोपाध्यायः । भारद्वाजगोत्रीयप्रसन्नसरस्वतीश्रीधरभट्टोपाध्यायसुतवासुदेवभट्टोपाध्यायः । आत्रेयगोत्रीयविष्णुभट्टोपाध्यायसुतसामवेदीहरिहरभट्टोपाध्यायः । मौनभार्गवगोत्रीयभास्करभट्टोपाध्यायसुतविष्णुपट्टवर्धनः । भारद्वाजगोत्रीयकेशवभट्टोपाध्यायसुतहिमदकलिदेवपट्टवर्धनः । भारद्वाजगोत्रीयनरसिंहपट्टवर्धनसुतमाधवपट्टवर्धनः । भारद्वाजगोत्रीयनागदेवपट्टवर्धनसुतसरस्वतीनागदेवपट्टवर्धनः । काश्यपगोत्रीयविष्णुभट्टोपाध्यायसुतमलिदेवभट्टोपाध्यायः । आत्रेयगोत्रकेशवपट्टवर्धनस्य भ्राता मधुसूदनपट्टवर्धनः । आत्रेयगोत्रवरदेवसुतप्रौढसरस्वतीनां वृत्तिद्वयम् । काश्यपगोत्रविष्णुदेव(:) । वामनभट्टोपाध्यायः । काश्यपगोत्रनागदेव(नागदेव)भट्टोपाध्यायः । काश्यपगोत्रीयबोनकममञ्चयणभट्टोपाध्यायः । वासिष्ठगोत्रीयसामवेदिचद्यणभट्टोपाध्यायः । काश्यपगोत्रीयस्वयंपाकिविश्वनाथभट्टोपाध्यायः । काश्यपगोत्रीयगोकागेयवेदार्थदनागदेवभट्टोपाध्यायः । मौनभार्गवगोत्रीयमेधाविघैससुतउत्तमक्रमितः । काश्यपगोत्रीयअण्णिगेरेयविष्णुपट्टवर्धन(:) । भारद्वाजगोत्रीयरिह्वशुक्लसुतश्रीविप्रदासपद्मनाभशर्मोपाध्यायः तस्य वृत्तिचतुष्टयम् । आत्रेयगोत्रसामवेदिहरिहरभट्टोपाध्यायः ॥ ७ ॥

भूमिं यः प्रतिगृह्णाति यश्च दानं प्रयच्छति ।
तावुभौ पुण्यकर्माणौ नियतौ(तं) स्वर्गगामिनौ ॥
अपि हस्तमितां भूमिं यो विप्राय प्रयच्छति ।
षष्टिं वर्षसहस्राणि स्वर्गे लोके महीयते ॥
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम् ।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
गामेकां रत्निकामेकां भूमेरप्येकमङ्गुलम् ।
हरन्नरकमाप्नोति यावदा भूतसंप्लवम् ॥
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो महद्भिः ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः ॥
यो देवपूजाप्रगृहीतचित्तो यो वैरिपक्षेषु गृहीतखड्गः ।
यो ब्राह्मणेष्वर्पितवित्तराशिः स चौण्डिसेट्टिर्भवताच्चिरायुः ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
श्रीमच्चौण्डीश्वरकृतधर्मोऽयं सर्वधर्मतोऽभ्यधिकः ।
कल्पस्थायी भूयाद्भूयादप्येष दीर्घायुः ॥ ७ ॥
श्रीसोमनाथश्रीपादपद्माराधकः श्रीचौण्डिसेट्टिः ॥ ७ ॥

लेखकः ज्योतिषबसवणोपाध्यायः ॥ ७ ॥ श्री ॥ स्वस्तिश्री ॥ मङ्गलं महाश्री ॥ ७ ॥ श्री ॥ ७ ॥

काश्यपगोत्रमङ्गलपण्डितसुतगोपालपण्डितो महाराजनङ्गलिगेनडहं वावेद्यवृत्ति ड ॥ ७ ॥ श्रीः ॥ ७ ॥ भारद्वाजगोत्रीयहिमडनागदेवपट्टवर्धनः । भारद्वाजगोत्रीयविप्रदासपद्मनाभभट्टोपाध्यायसुतसोमनाथदेवस्य वृत्तिद्वयम् ॥ ७ ॥ श्री ॥

(इण्डियन् आण्टिक्वेरी १४।६८–७५)

(४०)

नेपालमहीपालसिद्धिनृसिंहमल्लस्य प्रशस्तिः।

ॐ नमो गोपालाय ॥

ब्रह्मत्वे सृजते विश्वं स्थितौ पालयते हरे।
रुद्ररूपाय कल्पान्ते नमस्तुभ्यं त्रिमूर्तये ॥

प्रावीण्यप्रथितः प्रतापमथितप्रत्यर्थिपृथ्वीपति-
प्रोद्दामप्रमदौघलोचनपयःप्रारब्धवारांनिधिः।
जातः श्रीहरिसिंहदेवनृपतिर्दातावदातान्वये
संप्राप्तः पृथुना नृपेण समतां यो वृत्तिदाता सताम् ॥

यस्यान्ववायजलधावुदियाय राज-
चन्द्रो महेन्द्र इव तत्र महेन्द्रमल्लः।
येनार्थिकल्पतरुणा गुणसागरेण
राजन्वती वसुमती महती बभूव ॥

यत्प्रौढप्रभवत्प्रतापपतिताः प्राकम्पिताः शात्रवो
भेजुः शैलदरीं विहाय नगरीं त्यक्त्वा पुरे सुन्दरीम्।
यस्याचारविचारपौरुषरवव्यग्राः समग्रा गिर-
स्तस्य क्षोणिपतेः प्रसिद्धमहसः केनोपमेयं यशः ॥

अस्यात्मजोऽजनि महीतलकल्पवृक्षो
राजा विराजितयशाः शिवसिंहदेवः।
भूमीभुजा समरसीम्नि महाभुजेन
क्षेमं क्षणेन रिपवो बहवो विनष्टाः ॥

येन क्षोणिभुजा प्रयाणसमये पादातसैन्योच्छल-
द्धूलीजालसमुत्थितेन मनसा व्योमान्धकारीकृतम्।
कूर्मो मर्मणि चूर्णितोऽपि नितरां धत्ते कथंचिद्धरां
शेषः शेषदशां जगाम सहसा सर्वंसहा निःसहा ॥

तनयोऽस्य विनयपूर्णो बभूव कर्णोपमो भूमौ।
हरिहरसिंहनरेन्द्रो वसुधाचन्द्रो बभूवासौ ॥
अरीणां निहन्ता यशःपारगन्ता सुशीलः समन्ताज्जयन्ताधिकश्रीः।
स्वतातानुरूपोऽतितेजःसुरूपो बभूवावनीमण्डले चण्डरोचिः ॥
इन्द्राणीव सुरेश्वरस्य दयिता पद्मेव पद्मापते-
वैदेहीव रघूत्तमस्य गृहिणी गौरीव गौरीपतेः।
तस्य क्षोणिपतेर्बभूव महिषी भव्या भवानीसमा
राज्ञी लालमती सती गुणवती प्रायो रतिर्भारती ॥
पौरंदरी दिगिव नूतनभानुबिम्बं
सौन्दर्यकाननगजाननमम्बिकेव।
पुत्रं पवित्रमथ सिद्धिनृसिंहमल्लं
सा राजपुत्रतनया जनयांबभूव ॥
येनाकारि विपक्षपक्ष्मलदृशां दृग्वारिभिर्वारिधि-
र्येनाधारि जगत्त्रयोपरि शरच्चन्द्रावदातं यशः।
बाल्योपक्रम एव विक्रमवतस्तस्याधुना पौरुषे
श्रीमत्सिद्धिनृसिंहमल्लनृपतेर्युद्धे समर्थो हि कः ॥
यद्भूमीपालगङ्गाजलविमलयशःपूरकर्पूरपूरै-
र्ब्रह्माण्डे पाण्डुरेऽस्मिन्समजनि रजनीनायको निष्कलङ्कः।
तत्किं भूसेवकोऽभून्मुखमलमिषादेष यस्यामृतांशुः
सोऽयं दीर्घायुरास्तामधिधरणि मणिः सिद्धिपूर्वो नृसिंहः ॥
दानाल्पीकृतकल्पवृक्षगरिमा सीमा च तेजस्विनां
श्रीमानद्भुतकीर्तियुक्तमहिमा भीमानुजः साहसे।
दोर्दण्डद्वयचण्डिमान्तगलितप्रत्यर्थिपृथ्वीपतिः
श्रीमत्सिद्धिनृसिंहमल्लनृपतिर्वर्वर्ति सर्वोपरि ॥
प्रातिष्ठ्यं च युधिष्ठिराधिकतरं निष्ठा वसिष्ठाधिका
कीर्तिः कार्तिककृत्तिकापतिमति(?)स्तस्याधिका वर्तते।

वाणी व्याससमा रमा स्थिरतमा रामाभिरामाकृतिः
श्रीमत्सिद्धिनृसिंहमल्लनृपतेः किं नाम यन्नाद्भुतम् ॥
कदाचिदेतेन महोन्नतेन मठः कृतः कोऽपि धनैरनेकैः ।
श्रीबालगोपालविरामभूमिर्विकुर्वतामर्त्यधरा जगत्याम् ॥
यो मेरुमन्दरमहेन्द्रहिमाद्रिविन्ध्य-
कैलासशैलशिखरभ्रममातनोति ।
किं चास्य हेमकलशानवलोक्य देवैः
संदिह्यते कनकधामनि पर्वतेन्द्रे ॥
हर्षान्नेपालवर्षे[1] स्वरशरतुरगैरङ्किते (७५७) फाल्गुनीये
पक्षे प्राप्ते वलक्षेऽमरगुरुदिवसे शंकरर्क्षे दशम्याम् ।
चक्रे जाम्बूनदीयैर्गुरुतरकलशैर्भास्वरैरेकविंशै-
र्नेपालक्षोणिपालः प्रथितभुजबलो भूषणं तन्मठस्य ॥
युद्धारम्भः कृतोऽस्मिन्नपि शुभदिवसे शत्रुभिर्युद्धशौण्डै-
र्दुष्टैः कोटोऽवरुद्धः कुटिलनृपभटैरद्भुतैः कोटिसंख्यैः ।
लीलामात्रेण शत्रूनपयनयत(?)तदा पार्थिवः पार्थतुल्यः
कोटं निर्मोचयित्वा नमुचिरिपुरिवानन्दसंदोहमाप ॥
राजसूय इवारब्धो मध्यस्थेन महीभुजा ।
विशिष्य शेषनागोऽपि न शक्तो यस्य वर्णने ॥
आचार्यो यत्र मर्यादाधैर्यौदार्यदयानिधिः ।
विश्वनाथ उपाध्यायो विश्वनाथ इवाभवत् ॥
यो मेरुभूधर इवातिगुरुर्गरिम्णा
योऽसौ महार्णव इवातिमहान्महिम्ना ।
यो व्यासवद्विविधवैदिकमन्त्रपाठे
यो निष्ठया भुवि वसिष्ठमहर्षिकल्पः ॥
यात्रायाता मञ्जुयन्तः(?) कियन्तो विद्यावन्तो जञ्जपूका यिवन्तः (?) ।
नानादिग्भ्यः पण्डितैरभ्युपेतं सत्रे तस्मिन्मण्डपं मण्डितं यैः ॥

१. ख्रिस्ताब्दे तु १३६३ एतन्मिते.

द्वास्थातारौ कल्पितौ तत्र सत्रे द्वौ द्वौ द्वारि द्वारि देवर्षितुल्यौ ।
भूषाभूतो विद्विषां दर्पहन्ता नेता तेषां विश्वनाथो मनीषी ॥

आरब्धे शिबिना नृपेण विधिना सत्रे पुरा गौरवा-
दग्नेः खाण्डवखण्डनं समतनोद्गाण्डीवकोदण्डवान् ।
तस्मिन्सिद्धिनृसिंहमल्लनृपतेः सत्रे घृताजीर्णतः
किं भूयासमितीव मुञ्चति शिखी बाष्पाणि धूमच्छलात् ॥

चत्वारिंशद्दिनान्यासीन्महासोमो महोत्सवः ।
श्रीमान्सिद्धिनृसिंहेन कलिकर्णेन कारितः ॥

संभारः सर्ववस्तूनां राजसूये यथा श्रुतः ।
तथैव तत्र सत्रेऽपि जातस्तदधिकोऽपि वा ॥

रत्ने स्वर्णे गवादौ करितुरगधने भूषणे दिव्यवस्त्रे
दासीदासे निवासे विविधरसमये भक्ष्यमात्रे पवित्रे ।
चत्वारिंशद्दिनानि क्षितिपकुलमणेरास्यपद्मे प्रसन्ने
वाणी तत्रोल्ललास प्रतिपदमधिका देहिदेहीति मात्रा ॥

पामरी(?) वलयकुण्डलादिकं दृष्टपूर्वमपि येन न क्वचित् ।
तेन तत्र नृपतेः प्रसादतो भिक्षुणा निजतनौ समर्पितम् ॥

दिव्यान्येव गृहाणि दिव्यवसुधारत्नानि दिव्याम्बरं
दिव्यान्येव विभूषणानि सदयो दिव्यानि रत्नानि च ।
नेपाले प्रचरन्ति यानि वसुधावस्तूनि दिव्यान्यसौ
श्रीमत्सिद्धिनृसिंहमल्लनृपतिः सर्वाणि तान्यार्पयत् ॥

यानि दृष्टानि वस्तूनि न श्रुतानि कदाचन ।
तानि दत्तानि सर्वाणि तत्र सत्रे महीभुजा ॥

येनाकारि जगत्त्रयोपरि मठो होमोऽपि कोट्याहुति-
र्दत्ता स्वर्णशतद्वयी प्रतिदिनं किं किं न दत्तं धनम् ।
दत्तस्तण्डुलपर्वतोऽपि विधिना कल्पद्रुमोऽप्यद्भुतः
श्रीमत्सिद्धिनृसिंहमल्लनृपतिः कर्णावतारो ध्रुवम् ॥

विद्यावन्तः कियन्तो विविधगुणभृतः केऽपि विद्याविहीना
　　नानादिग्भ्यः समेताः श्रुतनृपतिगुणा भिक्षवो लक्षसंख्याः ।
तेषामन्नैः सुवर्णैः सुललितवसनैर्भूषणाद्यैर्धनौघै-
　　र्दारिद्यं वारयित्वा नृग इव मुमुदे देवकल्पोऽवनीन्द्रः ॥
कर्णः कन्यातनूजो बलिरपि विदितः किंतु दैतेयजन्मा
　　पाषाणो देवतानां मणिरजनि महादारु देवद्रुमोऽपि ।
भ्रान्तो राजा नृगोऽपि प्रथितभुजबलो भार्गवो मातृहन्ता
　　कोऽन्यो धन्यो वदान्यो जगति विजयते सिद्धिपूर्वान्नृसिंहात् ॥
नित्यानि गीतानि मनोहराणि वाद्यानि हृद्यानि च कौतुकानि ।
अन्नानि वस्त्राणि विभूषणानि सर्वाणि जातानि च तत्र सत्रे ॥
　　यावच्चन्द्रदिवाकरावुदयतो यावन्महीमण्डलं
　　　　यावत्पर्वतनन्दिनी पशुपतेरुत्सङ्गमालिङ्गति ।
　　यावज्जह्नुकलिन्दयोरपिसुते तावद्भ्रीवर्तताम्
　　　　श्रीमत्सिद्धिनृसिंहमल्लनृपतेरेषा यशोवल्लरी ॥

अथ नेपालभाषा लिख्यते—

संवत् ७९७ फाल्गुणमासे शुक्लपक्षे दशम्यां तिथौ आर्द्रापरपुनर्वसु-नक्षत्रे आयुष्मान्योगे बृहस्पतिवासरे थ्व कुह्नु कोट्याहुतियज्ञ याङन देवतास्थापन याङन नियछपु गजुरिछास्यं देवो दयकाव आयप्रत्याय दुंता । रोव ७ पोवि वूं रोव ह्नेस पविखं ३ खोरागार वूं रोव श्लंपि १४ तवधर वूं करख छि १ थंथछे वाटिका थ्व तेया वरसानन नित्यपूजानि-श्रावहोम याङन वुंसाधन वुगंयातन इन्द्रयातन मतंछोपके स्वह्नन्तो धारे कार्तिकलछिघेर ष्ठछि धारेण जलदेवाछोयके कृष्णाष्टमीकुह्नु चाक्रमतं छो-यके थ्वते जुलो भूय रोव गुं ९ यंथाको वूं रोव च्या ८ काकापलि रोव श्लनछि १२ गुस्तलको वूं रोव ह्नेस ७ खोमोर वूं थ्वत वूया वरसानन फाल्गुनशुक्लपूर्णिमासी प्रतिपत्संधि स दोलयात्रा ज्येष्ठशुक्लपूर्णिमा कुह्नु स्नानयात्रा आषाढशुक्लद्वादशी कुह्नु शयनपूजा देवशयन याचके श्रावण-

शुक्ल द्वादशी कुह्नु पवित्रारोहण श्रावणकृष्णाष्टमी कुह्नु जन्माष्टमीपूजा चाक्रमतं छोयके कार्तिकशुक्लद्वादशी कुह्नु उत्थानपूजा वारी ब्राह्मनेयातं दंशं गुये फं ९० जाक्य विय थ्व छपतकजुरो। भूय रोव श्लंखू १६ थ्वे वूं रोव स्व थ्वां वूं थ्वतेय वरसानन कार्तिकलछि चेकन कुडषुन ६। श्लंछि नियपात १२० चाकमतं छोयके मालभूय निश्राव दछिना यात मगाङाव तंङा रोव ङा ९ न्यंखुवुं–

(इन्स्क्रिप्शन्स् फ्रॉम् नेपाल २३–२६).

---

(४१)

नेपालपालस्य श्रीजयदेवमहीपतेः प्रशस्तिः।

त्र्यक्षस्त्रय्यव्ययात्मा त्रिसमयसदृशस्त्रिप्रतीतस्त्रिलोकी-
त्राता त्रेतादिहेतुस्त्रिगुणमयतयाब्ज्यादिभिर्वर्णितोऽलम्।
त्रिस्रोतोधौतमूर्धा त्रिपुरजिदजितो निर्विबन्धत्रिवर्गो
यस्योत्तुङ्गस्त्रिशूलस्त्रिदशपतिनुतः (पापिनां) तापनोऽभूत्॥

राजद्रावणमूर्धपङ्क्तिशिखरव्यासक्तचूडामणि-
श्रेणीसंगतिनिश्चलात्मकतया लङ्कां पुनानाः पुरीम्।
................द्व.................................संगताः
श्रीबाणासुरशेखराः पशुपतेः पादाणवः पान्तु वः॥

सूर्याद्ब्रह्मप्रपौत्रान्मनुरथ भगवाञ्जन्म लेभे ततोऽभू-
दिक्ष्वाकुश्चक्रवर्ती नृपतिरपि ततः श्रीविकुक्षिर्बभूव।
जात..........................विदितो भूमिपः सार्वभौमो
भूतोऽस्माद्विश्वगश्वः प्रबलनिजबलव्याप्तविश्वान्तरालः॥

राजाष्टोत्तरविंशतिक्षितिभुजस्तस्माद्व्यतीत्य क्रमा-
त्संभूतः सगरः पतिः.....................रायाः क्षितेः।
जातोऽस्मादसमञ्जसो नरपतिस्तस्मादभूदंशुमा-
न्स श्रीमन्तमजीजनन्नरवरो भूपं दिलीपाह्वयम्॥

भेजे जन्म ततो भगीरथ इति ख्यातो नृपोत्रान्तरे
भूपाल............................ रघोरप्यजः ।
श्रीमत्तुङ्गरथस्ततो दशरथः पुत्रैश्च पौत्रैः समं
राज्ञोऽष्टावपरान्विहाय परतः श्रीमानभूल्लिच्छविः ॥
अस्त्येव क्षितिमण्डलैकतिलको लोकप्रतीतो महा-
ना.................... प्रभावमहतां मान्यः सुराणामपि ।
स्वच्छं लिच्छवि नाम बिभ्रदपरो वंशः प्रवृत्तोदयः
श्रीमच्चन्द्रकलाकलापधवलो गङ्गाप्रवाहोपमः ॥
तस्माल्लिच्छवितः परेण नृपतीन्हित्वा प.........रं
श्रीमान्पुष्पपुरे कृतिः क्षितिपतिर्जातः सुपुष्पस्ततः ।
साकं भूपतिभिस्त्रिभिः क्षितिभृतां त्यक्त्वान्तरे विंशतिं
ख्यातः श्रीजयदेवनामनृपतिः प्रादुर्बभूवापरः ॥
एकादशक्षिति.........................
त्यक्त्वान्तरे विजयिनो जयदेवनाम्नः ।
श्रीमान्बभूव वृषदेव इति प्रतीतो
राज्ञोत्तमः सुगतशासनपक्षपाती ॥
अभूत्ततः शंकरदेवनामा श्रीधर्मदेवोऽप्युदपादि तस्मात् ।
श्रीमानदेवो नृपतिस्ततोऽभूत्ततो महीदेव इति प्रसिद्धः ॥
वसन्त इव लोकस्य कान्तः शान्तारिविग्रहः ।
आसीद्वसन्तदेवोऽस्माद्दान्तसामन्तवन्दितः ॥
अस्यान्तरेऽप्युदयदेव इति क्षितीशा-
ज्जातास्त्रयोदश ततश्च नरेन्द्रदेवः ।
मानोन्नतो नतसमस्तनरेन्द्रमौलि-
मालारजोनिकरपांशुलपादपीठः ॥
दाता सद्द्रविणस्य भूरिविभवो जेता द्विषत्संहतेः
कर्ता बान्धवतोषणस्य यमवत्पाता प्रजानामलम् ।

हर्ता संश्रितसाधुवर्गविपदां सत्यस्य वक्ता ततो
जातः श्रीशिवदेव इत्यभिमतो लोकस्य भर्ता भुवः ॥
देवी बाहुबलाढ्यमौखरिकुलश्रीवर्मचूडामणि-
ख्यातिह्रेपितवैरिभूपतिगणश्रीभोगवर्मोद्भवा ।
दौहित्री मगधाधिपस्य महतः श्र्यादित्यसेनस्य या
व्यूढा श्रीरिव तेन सा क्षितिभुजा श्रीवत्सदेव्यादरात् ॥
तस्माद्भूमिभुजोऽप्यनायत जितारातेरजय्यः परै
राजश्रीजयदेव इत्यवगतः श्रीवत्सदेव्यात्मजः ।
त्यागी मानधनो विशालनयनः सौजन्यरत्नाकरो
विद्वा·········चिराश्रयो गुणवतां पीनोरुवक्षःस्थलः ॥
माद्यद्दन्तिसमूहदन्तमुसलक्षुण्णारिभूभृच्छिरो-
गौडोड्रादिकलिङ्गकोसलपतिश्रीहर्षदेवात्मजा ।
देवी राज्यमती कुलोचितगुणैर्युक्ता प्रभूता कुलै-
र्येनोढा भगदत्तराजकुलजा लक्ष्मीरिव क्ष्माभुजा ॥
अङ्गश्रिया परिगतो जितकामरूपः
काञ्चीगुणाढ्यवनिताभिरुपास्यमानः ।
कुर्वन्सुराष्ट्रपरिपालनकार्यचिन्तां
यः सार्वभौमचरितं प्रकटीकरोति ॥
राज्यं प्राज्यसुखोर्जितद्विजजनप्रत्यर्पिताज्याहुति-
ज्योतिर्जातशिखाविजृम्भणजिताशेषप्रजापद्रुजम् ।
बिभ्रत्कण्टकवर्जितं निजभुजावष्टम्भविस्फूर्जितं
शूरत्वात्परचक्रकाम इति यो नाम्ना परेणान्वितः ॥
स श्रीमाञ्जयदेवाख्यो विशुद्धबृहदन्वयः ।
लब्धप्रतापः संप्राप्तबहुपुण्यसमुच्चयः ॥
मूर्तीरष्टाभिरष्टौ महयितुमतुलैः स्वैर्दलैरष्टमूर्तेः
पातालादुत्थितं किं कमलमभिनवं पद्मनाभस्य नाभेः ।

देवस्यास्यासनायोपगतमिह चतुर्वक्त्रसादृश्यमोहा-
द्विस्तीर्णं विष्टरं किं प्रविकसितसिताम्भोजमम्भोजयोनेः ॥
कीर्णा किं भूतिरेषा सपदि पशुपतेर्नृत्यतोऽत्र प्रकामं
मौलीन्दोः किं मयूखाः शरदमभिनवां प्राप्य शोभामुपेताः ।
भक्त्या कैलासशैलाद्धिमनिचयरुचः सानवः किं समेता
दुग्धाब्धेरागतः किं गलगरसहजप्रीतिपीयूषराशिः ॥

राज्ञः ॥

देवं वन्दितुमुद्यतो द्युतिमतो विद्योतमानद्युतिः
किं ज्योत्स्नाधवला फणावलिरियं शेषस्य संदृश्यते ।
अन्तर्दूररसातलाश्रितगतेर्देवं प्रभावश्रिया
किं क्षीरस्नपनं विधातुमुदिताः क्षीरार्णवस्योर्मयः ॥
विष्णोः पातालमूले फणिपतिशयनाक्रान्तिलीलासुखस्था-
दाज्ञां प्राप्योत्पतन्त्यास्त्रिपुरविजयिनो भक्तितोऽभ्यर्चनाय ।
लक्ष्म्याः संलक्ष्यते प्राक्करतलकलितोत्फुल्ललीलासरोजं
किं वेतीत्थं वितर्कास्पदमतिरुचिरं मुग्धसिद्धाङ्गनानाम् ॥
नालीनालीकमेतन्न खलु समुदितं राजतो राजतोऽहं
पद्मा पद्मासनाब्जे कथमनुहरतो मानवा मा नवाभे ।
पृथ्व्यां पृथ्व्यां न मादृग्भवति हृतजगन्मानसे मानसे वा
भास्वान्भास्वान्विशेषं जनयति नहि मे वासरो वा सरो वा ॥
इतीव चामीकरकेसरालीसिन्दूररक्तद्युतिदन्तपङ्क्त्या ।
राजीवराजीं प्रति जीवलोके सौन्दर्यदर्पादिव सप्रहासम् ॥
एषाभाति कुलाचलैः परिवृता प्रालेयसंसर्गिभि-
र्वेदी मेरुशिलेव काञ्चनमयी देवस्य विश्रामभूः ।
शुभ्रैः प्रान्तविकासिपङ्कजदलैरित्याकलय्य स्वयं
रौप्यं पद्ममचीकरत्पशुपतेः पूजार्थमत्युज्ज्वलम् ॥

राज्ञः ॥

यं स्तौति प्रकटप्रभावमहिमा ब्रह्मा चतुर्भिर्मुखै-
र्यं च श्लाघयति प्रणम्य चरणे षड्भिर्मुखैः षण्मुखः।
यं तुष्टाव दशाननोऽपि दशभिर्वक्त्रैः स्फुरत्कंधरः
सेवां यस्य करोति वासुकिरलं जिह्वासहस्रैः स्तुवन् ॥
ख्यात्या यः परमेश्वरोऽपि वहते वासो दिशां मण्डलं
व्यापी सूक्ष्मतरश्च शंकरतया ख्यातोऽपि संहारकः।
एकोऽप्यष्टतनुः सुरासुरगुरुर्वीतत्रपो नृत्यति
स्थाणुः पूज्यतमो विराजति गुणैरेवं विरुद्धैरपि ॥

राज्ञः ॥

तस्येदं प्रमथाधिपस्य विपुलं ब्रह्माब्जतुल्यं शुभं
राजद्राजतपङ्कजं प्रविततं प्रान्तप्रकीर्णैर्दलैः।
पूजार्थं प्रविधाप्य तत्पशुपतेर्यत्रापि पुण्यं मया
भक्त्या तत्प्रतिपाद्य मातरि पुनः संप्राप्नुयां निर्वृतिम् ॥
किं शंभोरुपरि स्थितं ससलिलं मन्दाकिनीपङ्कजं
स्वर्गोद्भिन्नवाम्बुजेक्षणधिया संप्राप्तमम्भोरुहम्।
देवानां किमियं शुभा सुकृतिनां रम्या विमानावली
पद्मं किं करुणाकरस्य करतो [1]लोकेश्वरस्यागतम् ॥

राज्ञः ॥

स्रोतः स्वर्गापगायाः किमिदमवतरल्लोलकल्लोलरम्यं
किं ब्रह्मोत्पत्तिपद्मं तलकमलवरप्रेक्षणायोपयातम्।
संप्राप्तं चन्द्रमौलेरमलनिजशिरश्चन्द्रबिम्बं किमत्रे-
त्येवं यद्वीक्ष्य शङ्कां वहति भुवि जनो विस्मयोत्फुल्लनेत्रः ॥
श्रीवत्सदेव्या नृपतेर्जनन्या समं समन्तात्परिवारपद्मैः।
रौप्यं हरस्योपरि पुण्डरीकं तदादरैः कारितमत्युदारम् ॥

---

१. भगवतो बुद्धस्य.

पुण्यं पुत्रेण दत्तं शशिकरविमलं कारयित्वाब्जमुख्यं
प्राप्तं शुभ्रं शुभं च स्वयमपि रजतैः पद्मपूजां विधाय ।
सर्वं श्रीवत्सदेवी निजकुलधवलां चित्तवृत्तिं दधाना
प्रादात्कल्याणहेतोश्चिरमवनिभुजे स्वामिने स्वर्गताय ॥
कः कुर्यात्कुलजः पुमान्निजगुणश्लाघामनिर्ह्रीच्छया
राज्ञा सत्कविनापि नो विरचितं काव्यं स्ववंशाश्रयम् ।
श्लोकान्पञ्च विहाय साधुरचितान्प्राज्ञेन राज्ञा स्वयं
स्नेहाद्भूभुजि बुद्धकीर्तिरकरोत्पूर्वामपूर्वामिमाम् ॥
योगक्षेमविधानबन्धुरभुजः संवर्धयन्बान्धवा-
न्स्निह्यत्पुत्रकलत्रभृत्यसहितो लब्धप्रतापो नृपः ।
दीर्घायुर्नितरां निरामयवपुर्नित्यप्रमोदान्वितः
पृथ्वीं पालयतु प्रकामविभवस्फीतानुरक्तप्रजाम् ॥
संवत्[1] १९२ कार्तिकशुक्लनवम्याम् ।

(इन्स्क्रिप्शन्स् फ्रॉम् नेपाल १६–१८).

---

(४२)

प्रतापमल्लनृपतिप्रासादप्रशस्तिः ।

आसीच्छ्रीसूर्यवंशे रघुनृपकुलजो रामचन्द्रो नृपेश-
स्तद्वंशे **नान्यदेवो**ऽवनिपतिरभवत्तत्सुतो **गङ्गदेवः** ।
तत्पुत्रोऽभून्**नृसिंहो** नरपतिरतुलस्तत्सुतो **रामसिंह**-
स्तज्जः श्री**शक्तिसिंहो** धरणिपतिरतो भूप**भूपालसिंहः** ॥
तस्मात्कर्णाटचूडामणिरिव **हरयुतिंसहदेवो**ऽस्य वंशे
भूपः श्री**यक्षमल्लो** नरपतिरतुलो **रत्नमल्लो**ऽप्यमुष्मात् ।
तस्माच्छ्री**सूर्यमल्लो** ह्यवनिपतिरभूत्तत्तनूजोऽमराख्यो
मल्लोऽभूत्तस्य पुत्रो रिपुगणविजयी श्रीमहेन्द्राख्यमल्लः ॥

---

१. ७५९ ख्रिस्ताब्दे.

तस्माच्छिवसिंहोऽभूद्धरिहरसिंहः सुतस्तस्मात् ।
तस्माल्लक्ष्मिनृसिंहो नरसिंहपराक्रमः [सूनुः] ॥

तस्माच्छ्रीमत्प्रतापो नरपतिरभवद्भूपभालावलीषु
न्यस्यत्पादारविन्दद्वयरसविलसद्रेणुभिर्भूषणानि ।
योऽकार्षीत्कूतिखासाकिरमिति स्ववशे भोट्टभूपस्य देशा-
ञ्जग्राहैवावदीनं प्रतिदिनमपरे यं भजन्ते नरेशाः ॥

भक्तग्रामनरेशमल्लनृपतिर्दत्त्वेभमेनं भिया
भेजेऽसौ वसुधां जहार सुदृढं संधार्य दुर्गं पुनः ।
श्रीमड्डम्बरशाहभूपतिबलं विध्वस्य हत्वा बलं
श्रीमत्सिद्धनृसिंहमल्लनृपतेर्जग्राह दुर्गावलीम् ॥

आस्ते काप्यमरावतीव विलसद्दन्तीन्द्रदिव्याङ्गना-
युक्ता स्वर्णमयी विहारनगरी सा राजधानी परा ।
श्रीमच्छ्रीकमलाधिका मधुपतेरिन्द्रेण तुल्यस्य च
प्रत्यर्थिव्रजनिर्जितस्य नवपुन्नारायणस्यापि च ॥

लक्ष्मीनारायणस्तस्माद्**वीरनारायण**स्ततः ।
पुत्री **रूपमती** तस्य **प्राणनारायणः** सुतः ॥

सेयं रूपमती सती गुणवती स्वर्णद्युतिः सन्मति-
र्माद्यत्कुञ्जरगामिनी प्रणयिनी साक्षात्परा रुक्मिणी ।
आसीत्सर्वगुणा पितुर्नरपतेः श्रीमत्प्रतापस्य सा
पत्नी प्राणसमा यथा जलनिधेः पुत्री जगत्पायिनः ॥

कर्णाटीरङ्गघाटी कुचकनकघटी कामलीलैकवाटी
स्वर्णालंकारकोटी हरिसदृशकटी चारुदेहानुपाटी ।
नाम्ना **राजमती** महारसवती भूपप्रतापस्य सा
भूता भोगवधूटिका किल हरेर्भामेव जीवाधिका ॥

स्वर्गार्थं कृतवान्प्रतापनृपतिः सद्योषितोरेतयोः
प्रासादं वसुपत्रपद्मसदृशं शृङ्गाष्टकैः शोभितम् ।

नानाचित्रविराजितं सममिदं सद्वैजयन्तेन वै
होमाद्यैरकरोच्छ्रुतिस्मृतिमतैरस्य प्रतिष्ठाविधिम् ॥
संवत् ७६९ फाल्गुनशुक्लषष्ठ्यां अनुराधानक्षत्रे हर्षणयोगे बृहस्पतिवासरे ।

(इन्स्क्रिप्शन्स् फ्रॉम् नेपाल २७-२८).

---

(४३)

नेपालक्षितिपालवंशावलिः ।

श्री ३ भवानीशंकराभ्यां नमः ।

नत्वा गिरीन्द्रतनयां प्रलयानलाभां
भालोल्लसल्ललितचन्द्रकलाभिरामाम् ।
मल्लप्रतापनृपतिः स्वकुलप्रकाशां
वंशावलीं सुतनुते विमलां कवीन्द्रः ॥
श्रीविष्णोर्नयनाम्बुजात्रिजगतीपापान्तकर्ता रविः
प्रोद्भूतस्तिमिरौघवारणघटाविद्रावणः केसरी ।
कालाकाशदिशां प्रकाशनिपुणः कंदर्पदर्पापहः
सानन्दं सरसीरुहेषु तनुते मैत्रीं विचित्राकृतिः ॥
गाम्भीर्यादिगुणेन सागरसमो धैर्येण विन्ध्याचलः
सौन्दर्यप्रकरेण दैत्यदलनो रूपेण कामोपमः ।
जातो भूमितले ततोऽतिविमले वैवस्वताख्यो मनु-
र्मर्यादा रचिता सतां समुचिता कीर्तिप्रदा येन वै ॥
तद्वंशे विमले बभूव धरणीचन्द्रो दिलीपो हि यो
देवेन प्रमथाधिपेन तुलनां प्राप प्रचण्डे रणे ।
यस्य प्रौढतरप्रतापदहने नित्यं द्विषः शेरते
दृष्ट्वा तस्य कलेवरं सुविमलं कामेन दग्धं वपुः ॥
जातः सन्नृपसत्तमो रघुरिति ख्यातस्ततो वीर्यवा-
न्बाणाग्रैः परिमथ्य शक्रहृदयं कीर्तिः स्थिरा स्थापिता ।

यस्य प्रौढतरप्रतापतपनत्रासेन सद्यः कृता
वृष्टिस्तेन धनेश्वरेण ललिता कार्तस्वरी भूतले ॥
जातो भूपवरस्ततः कलिहरः श्रीमानजो वीर्यवा-
न्दुष्टानां किल दर्पहारणविधौ प्रोद्भूतकण्ठीरवः ।
शिष्टानां प्रतिपालकः प्रतिपलं दानैः ······· म्मनः
पश्चादिन्दुमतीवियोगजनितक्लेशाब्धिमध्येऽपतत् ॥
जातो देवतनुस्ततो दशरथः कंदर्पदर्पापहः
सेनापत्यमुपेत्य पङ्कपतितः शत्रुः(कः) कृतो निर्भरः(यः) ।
क्रूरः कोपरतः प्रसारितभयो भेत्तुं गतः कृत्तिकां
पापे संसक्तचित्तः शनिरपि सहसा स्तम्भितो येन मार्गे ॥
जातस्तत्तनयो महानययुतो रामोऽभिरामाकृति-
र्दानेन प्रचुरेण वर्धितगुणः ख्यातस्त्रिलोकीतले ।
बद्ध्वा यो जलधिं निशाचरभटान्निर्जित्य लङ्कापुरीं
गत्वा रावणराक्षसं कलिकरं हत्वा वशे लब्धवान् ॥
तत्पुत्रः सूर्यतुल्यो लव इति विदितो प्रोल्लसद्दानपुण्यै-
र्जातो भूचक्रशक्रः प्रथितगुणचयः संमतः सज्जनानाम् ।
शत्रूणां शासकोऽसौ प्रबलरणधराधारणादत्तभारो
धर्मात्मा देवतुल्यो दशरथतनया निर्जिता येन संख्ये ॥
जातः श्रीहरिसिंहदेवनृपतिः प्रौढप्रतापोदय-
स्तद्वंशे विपुले महारिपुहरे गाम्भीर्यरत्नाकरः ।
कर्ता यः सरसामुपेत्य मिथिलां संलक्ष्य लक्ष्मप्रियो
नेपाले पुनराढ्यवैभवयुते स्थैर्यं विधत्ते चिरम् ॥
माणिक्यप्रतिमप्रतापपटलैरादीप्तलोकत्रयो
मुक्तापङ्क्तिसहस्रशोभनयशोवृन्देन संशोभितः ।
पक्षत्याकृतिकर्णवारणगिरिग्रामावनव्याकुलः
पारावारमिवेह यः परिहसत्याधाय चित्तेऽच्युतम् ॥

तत्पुत्रो **यक्षमल्लः** प्रबलरिपुहरः कर्णतुल्योऽवनीशः
सर्वासां नागरीणां नयनसुखकरः सर्वदः सज्जनानाम् ।
प्रोद्यद्दोर्दण्डचण्डाहृतनिशितमहाखड्गपातैर्विपक्षा-
न्क्षिप्त्वा सद्यः क्षितीशान्क्षितितलविषये प्रोल्लसत्कीर्तिचन्द्रः ॥

तस्माच्छ्रीरत्नमल्लः समजनि विबुधाराधने दत्तबुद्धि-
र्दन्तीनां दानकर्ता प्रबलरिपुकुलोत्सादने पार्थतुल्यः ।
यद्दानाम्बुप्रवाहप्रकरविलसितां वाहिनीं वीक्ष्य नूनं
गङ्गासङ्गात्प्रवृद्धं प्रचलजलनिधिः प्रेमगर्वं मुमोच ॥

यो नु प्रौढतरान्निहत्य धरणीपालान्महासंगरे
गत्वा कान्तिपुरं चकार विमलं राज्यं तु स्वर्गोपमम् ।
श्रीसिद्धिर्हरपूर्विका हरवधूराराधनैस्तद्वशे
जाता भावहृता मुदा सुविदिता चाद्यापि या तिष्ठति ॥

प्रोद्यत्प्रौढप्रतापप्रचुरपरिलसत्कुङ्कुमक्षोदपूर्णैः
कीर्णैः पाटीरपङ्कैः सितकरकिरणाकारकीर्तिप्रतारः(नः) ।
मित्राणामत्र शैत्यं किमपि विरचयन्पूर्वपूर्वागतानां
तत्पुत्रः **सूर्यमल्लो** नरपतितिलकः प्रादुरासीत्प्रवीरः ॥

तस्मान्मल्लनरेन्द्रनामधरणीपालो बभूव प्रभुः
प्रोद्भूतप्रबलप्रतापदहनज्वालावृताहस्करः ।
यस्यारातिनितम्बिनी सुचकिता शुष्यन्मुखाम्भोरुहा
स्थित्वा पर्वतगह्वरेऽतिविषमे दैन्यं सदाभ्यस्यति ॥

पुण्यौघैर्जपयज्ञदानविपुलैर्गौरीपदार्चाफलैः
संजातस्तु **महीन्द्रमल्ल**वसुधारत्नं ततस्तत्सुतः ।
येनेमां किल काश्यपीं वसुमतीं रत्नेन पूर्णां वरां
दत्त्वा भूमिसुराय स्वर्गभवने कीर्तिः स्थिरा स्थापिता ॥

श्रीग्रामे भक्तपूर्वं विनिहितसहसावासरूपप्रतिष्ठां
भावैर्निर्जित्य देवीं कलिकलुषहरीं दैत्यदर्पापहन्त्रीम् ।

आनीय स्वर्गतुल्ये रचितगृहवरे स्थापिता येन पूर्वे
नित्यं तत्पूजनेन त्रिभुवनललितां सिद्धिमुग्रामवाप ॥
तस्माच्छ्रीशिवसिंहनाम नृपतिर्जातो धरामण्डले
नेपालक्षितिपालभालतिलकः कंदर्पदर्पापहः ।
संसारार्णवतारणाय सततं नित्यं भवानीपद-
ध्याने दत्तमनाः समस्तविदुषां मध्ये प्रसिद्धक्रियः ॥
वैरिस्त्रीनयनाब्जनिर्गतजलैर्धाराम्बुभिर्येन वै
शस्ताः सान्द्रकबन्धरन्ध्ररुधिरैर्नद्यः समासादिताः ।
तासां संगमसंभवं सुविमलं तीर्थं प्रयागाह्वयं
यत्र स्नानकृता प्रलब्धमनिशं शत्रुक्षयं सत्फलम् ॥
तस्माद्धरिहरसिंहो नरपतिसिंहो बभूव भूपालः ।
गच्छति जलनिधिपारं कीर्तिरेकाकिनी यस्य ॥
धत्ते गैरिकरागविभ्रमभयं यस्य प्रतापोत्करो
यत्कीर्तिर्गुणपर्वतोपरिसरी कौतूहलं यच्छति ।
एतेनैव तु हेतुनास्य तु गुणान्विज्ञाय शैलोत्तमा-
न्दूरस्थाः प्रपलाय्य संनिधिममी कुर्वन्ति यद्वैरिणः ॥
श्रीलक्ष्मीनरसिंहनामनृपतिस्तस्मादभूत्सन्मति-
र्बाणाग्रैः परिपन्थिमन्थनकरः कारुण्यपुण्याकरः ।
यं दृष्ट्वा खलु वैरिवर्गवनिता कम्पाकुला सर्वदा
प्राणेशस्य सुजीवितं मम विभो देहीति संयाचते ॥
अष्टाशास्वपि यत्प्रतापतपनस्यालोक्य नित्योदयं
दीप्तात्मापि दिवानिशं भृशमहो विश्वान्धकारापहम् ।
आत्मानं सहसा समीक्ष्य मनसा हीनं हठाद्गर्हय-
न्सायं सायमयं स्वयं दिनमणिर्दीनोऽम्बुधौ मज्जति ॥
श्रीलक्ष्मीनरसिंहभूपतिदिवप्रस्थानकालोद्यते
देवैः शङ्खमृदङ्गभेरिपटहध्वानैर्दिशः पूरिताः ।

प्रौढाः शूरतराः प्रदारितरिपोर्ब्रह्माण्डचण्डोल्लस-
न्मार्गेणैव विनिर्गताः सुयमिताः प्राणास्त्रयोऽस्यामलाः ॥
तत्पुत्रोऽसौ कवीन्द्रः क्षितिपतितिलकः श्रीप्रतापाभिधानः
सङ्ग्रामे वैरिवर्गप्रबलतरलसद्दर्पदावानलांभः ।
तर्कालंकारकोशादिकसकलमहाशास्त्रमार्गप्रवीणो
नानागद्यानवद्यासुललितकवितानर्तकीरङ्गभूमिः ॥
मेदिन्यामुदधौ सरःसु सरितां मध्ये गिरौ कानने
यस्य प्रौढतरप्रतापतपनस्यालोक्य दीप्तिं पराम् ।
अत्युत्कर्षमवेक्ष्य संप्रति समासाद्यापकर्षं चिरा-
दौर्वः खर्वयशाः प्रशाम्यति हठान्मग्नः समुद्राम्भसि ॥
दृष्ट्वा तस्य प्रतापं तपनमनुपमं हन्त हृष्टो विवस्वा-
न्मेने ब्रह्माण्डभाण्डभ्रमणविधिकृतं श्रान्तमेव श्रमौघम् ।
व्यस्ताहोरात्रभेदं त्रिभुवनभवनं व्याप्तमेनं विदित्वा
किं चायं चक्रवाकः शिथिलयति शुचं सर्वतः सर्वबीजम् ॥
शस्त्रे शास्त्रवरे सदा सुखकरे संगीतविद्यावरे
सानन्दं किल केलिकर्मकुशलव्यापारकण्ठीरवः ।
स्वर्गे भूमितले तथा दशदिशां प्रान्ते गिरौ कानने
कोऽप्यस्तीति निगद्यते मम समो राजेन्द्रचूडामणिः ॥
नेपाले संवतेऽस्मिन्हयगिरिमुनिभिः (७८७) संयुते माघमासे
सप्तम्यां शुक्लपक्षे रविदिनसहिते रेवतीऋक्षराजे ।
योगे श्रीसिद्धिसंज्ञे रजतमणिलसत्स्वर्णमुक्ताप्रवालै-
रेकीकृत्य प्रदत्तं हयशतसहितं येन दानं तुलाख्यम् ॥

इति श्रीमहाराजाधिराजश्रीश्रीराजराजेन्द्रकवीन्द्रजयप्रतापमल्लदेवविरचिता
निजवंशावली समाप्ता ।

माधुर्यादिविचित्रताखिलपदन्यासैर्मनोहारिणी
संक्षिप्तेन कवीन्द्रभूमिपतिना वंशावली निर्मिता ।

प्रत्येकं किल कीर्तिशौर्यनिखिलप्रौढप्रतापादिकं
भूपानां रचितुं विमृश्य निपुणं शक्तो न वा वाक्पतिः ॥

(इन्स्क्रिप्शन्स् फ्रॉम् नेपाल २९–३१)

---

(४४)

॥ श्रीगणाधिपतये नमः ॥

कारणं जगतां वन्दे कण्ठादुपरि वारणम् ।
मातामहमहाशैलं महस्तदपितामहम् ॥
क्षेमं वः प्रचुरीकुर्यात्क्षोणीमभ्युद्वहन्हरिः ।
क्रोडाकृतेरभूद्यस्य क्रीडापल्वलमम्बुधिः ॥
अस्ति क्षीरार्णवोद्भूतमपांपुष्पमनुत्तमम् ।
अम्लानं यदनिर्माल्यमाधत्त शिरसीश्वरः ॥
सदामोदनिधेस्तस्य संताने यदुसंज्ञिते ।
अभूदाश्चर्यमाधुर्यं वसुधायास्तपःफलम् ॥
संगमो नाम राजाभूत्सारभूते तदन्वये ।
रेजे यस्य यशःसिन्धोः सरणीव सुरापगा ॥
सर्वरत्ननिधेस्तस्य सम्राडासीत्तनूभुवाम् ।
मध्ये **बुक्कमहीपालो**[1] मणीनामिव कौस्तुभः ॥
तस्य गौराम्बिकाजानेस्तनयोऽभूद्गुणोन्नतः ।
हारगौरयशःपूरहारी **हरिहरेश्वरः** ॥
यत्षोडशमहादानयशसां दिग्विहारिणाम् ।
भूयसामभवन्नालं भुवनानि चतुर्दश ॥
प्रतापदेवरायोऽस्य पुत्रोऽभूद्भुवि विश्रुतः ।
प्रमोद इव मूर्तोऽयं प्रजानां स्वैर्गुणैरभूत् ॥
प्रत्यर्थिसमिधो हुत्वा प्रतापाग्नौ रणाङ्क(ङ्ग)णे ।
विहितो येन वीरेण विजयश्रीकरग्रहः ॥

---

१. वेदभाष्यादिनानाग्रन्थप्रणेता सुप्रसिद्धो माधवाचार्योऽस्यैव मन्त्रिप्रवर आसीत्.

तस्य हेमाम्बिकाजानेस्तनयो विनयोन्नतः ।
विद्यानिधिर्विशेषज्ञो वीरो **विजयभूपतिः** ॥
असौ विजयभूपालः पित्रा दत्तं स्वतेजसा ।
समस्तं द्राविडं देशमासिन्ध्याः पर्यपालयत् ॥
बुक्कक्षितीशसदने हरितान्ववायः
श्रीसिंहसूरिरभवत्प्रथमानकीर्तिः ।
यद्वारपञ्जरशुकाः किल सर्वशास्त्र-
सिद्धान्तभञ्जनसमर्थनकेलिलोलाः ॥
तत्पुत्रस्तार्किकाचार्यः पदवाक्यप्रमाणवित् ।
सर्वं हरिहरक्षोणीभुजां धर्ममब्रवीत्यत्(यद्धर्ममब्रवीत्?) ॥
तत्पुत्रो हम्पणाचार्यः सर्वविद्याविशारदः ।
निजेन चरितेनासीद्वसिष्ठ इव पूजितः ॥
राज्ञा हरिहरेणापि देवरायेण भूभुजा ।
अचीकरदसौ विद्वान्महादानानि षोडश ॥
सोऽयं विजयभूपालो हम्पणार्याय धीमते ।
स्वदेशे चेट्टुपेडाख्यं ग्रामं मान्यं प्रदत्तवान् ॥

स्वस्ति श्रीविजयाभ्युदयशकवर्ष १३३८ वर्तमानदुर्मुखिसंवत्सरद भाद्रपदबौळ सप्तमियलु श्रीमन्महामण्डलेश्वरश्रीवीरप्रतापविजयराय वोडयरु हरितगोत्रद आपस्तम्बसूत्रद सकलविद्याविशारद तार्किकहम्पणैयगळिगे कोट्टग्रामशासनद क्रमवेंतेंदरे पडबीडुराज्यदलु सप्तनाथनु माडुव आगरदहोवळि यनु वृत्तिपट्टिनळि शेरिवहकोनैकोट्टपट्टिन चेट्टुपडेंबग्रामक्के सलुव तगरइरुपेडंतांगलु सह कुलवरहगद्याण इप्पत्तुमूरुहोन्नु मूरुहणं वट्टदिन्द होन्नुहणंवड्डुहुरुळिय तुंदविदंद मूरुहणवड्डुवेळे अन्तुं रोकवराह इप्पत्तुनालुहोन्नु एट्टुहणुंवेळे यकालुपळिसह चेट्टुपेडुग्रामवन्नु तेजोनिधियलु महामायाप्रीतियागि सर्वमान्यदानधारापूर्वकवागि कोट्टड्डु ईग्रामक्के सलुव सुंकद भत्य मार्गयडतोरे चेक्ककडमे वाणियरु सेट्टियरु सेणियरु

कैकोळरतेरिगिवोळगाद सकलसुवर्णादाय सकलभत्तादायसहितवागि सर्वमान्यवागि आचन्द्रार्कस्थायियागि अनुभविसुदु ईग्रामद चतुस्सीमेयविवर ईसानामोदलागि एरॆकोंडकेणिअकल्लुशासन अल्लिंद नडुसीमेयकल्लुपोरडियसालु अल्लिंद आग्नेयएल्ले वाहकोल्लगे तेंकलु एल्लकुलि अलिंद तेंकलु कलरवयलु अल्लिंद तेंकलु एरेयकोलेयमूडणसीमे अल्लिंद तेंकलु कारणेयकेरेये गणपोक्करैमडुइदरिंद तेंकलु पुलिकुल अल्लिंद तेंकलु समयनारायणंकुलक्केवडगनकल्लु अल्लिंद वायव्य गुडदनडुवणतेवरुमरिसु अल्लिंद वायव्य सदरहोइदकल्लु अल्लिंदवडगलु एट्टिकुलि अल्लिंदनाच्चिमांगलपडुवनकोडियहुत्त अल्लिंद येत्तणङ्गेयमूडणवरपु अल्लिंद वडगलु मुरुकंकुलियपल्लगुलियशासन अल्लिंद मूडलु मुक्कदकल्लु अल्लिंद ईसानकल्लुसालु अल्लिंदपालकोल्लेयमूडणमरिसु अल्लिंद करुवले वेले अल्लिंद एल्लेकल्लुगलु अल्लिंद एरॆकोन केणि ईचतुस्सीमेबोळगादनिधिनिक्षेपजलपाषाणसिद्धसाध्य अक्षिणि आगामि गोभूहिरण्याद्यष्टभोगवेंब स्वाम्यसहितवागि सर्वमान्यदानधारापूर्वकवागि कोट्टदु आचन्द्रार्कस्थायियागि अनुभविसुवदु ।

एकैव भगिनी लोके सर्वेषामेव भूभुजाम् ।
न भोज्या न करग्राह्या विप्रदत्ता वसुंधरा ॥
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम् ।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥
स्वदत्ताद्द्विगुणं पुण्यं परदत्तानुपालनम् ।
परदत्तापहारेण स्वदत्तं निष्फलं भवेत् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिवर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥

सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयोभूयो याचते रामचन्द्रः ॥

(कण्ट्रिब्यूशन्स् टु धि हिस्टरी ऑफ् सदर्न् इण्डिआ ४५–४८)

(४५)

कुमारपालकारितवडनगरप्राकारप्रशस्तिः ।[1]

ओं ॥ ओं नमः शिवाय ॥

ब्रह्माद्वैतधिया मुमुक्षुभिरभिध्यातस्य बद्धाक्षरै-
रिच्छाशक्तिमभीष्टवीमि जगतां पत्युः श्रुतीनां निधेः ।
या व्यापारितसंहृतैः स्वसमये ब्रह्माण्डपिण्डैर्नवैः
क्रीडन्ती मणिकन्दुकैरिव सदा स्वच्छन्दमाह्लादते ॥
गीर्वाणैर्वीतगर्वं दनुजपरिभवात्प्रार्थितस्त्रायकार्थं
वेधाः संध्यां नमस्यन्नपि निजचुलके पुण्यगङ्गाम्बुपूर्णे ।
सद्यो वीरं चुलुक्याह्वयमसृजदिमं येन कीर्तिप्रवाहैः
पूतं त्रैलोक्यमेतन्नियतमनुहरत्येव हेतोः फलं श्रीः ॥
वंशः कोऽपि ततो बभूव विविधाश्चर्यैकलीलास्पदं
यस्माद्भूमिभृतोऽपि वीतगणिताः(णनाः) प्रादुर्भवन्त्यन्वहम् ।
छायां यः प्रथितप्रतापमहतीं दध्रे विपन्नोऽपि स-
न्यो जन्यावधि सर्वदापि जगतो विश्वस्य दत्ते फलम् ॥
वंशस्यास्य यशःप्रकाशनविधौ निर्मूल्यमुक्तामणिः
क्षोणीपालकिरीटकल्पितपदः **श्रीमूलराजो**ऽभवत् ।
यो मूलं कलिदावदग्धनिखिलन्यायद्रुमोत्पादने
यो राजेव करैः प्रकामशिशिरैः प्रीतिं निनाय प्रजाः ॥
यश्चापोत्कटराजराज्यकमलां स्वच्छन्दवन्दीकृतां
विद्वद्बान्धवविप्रबन्दिभृतकव्यूहोपभोग्यां व्यधात् ।
यत्खङ्गाश्रयिणीं तदा श्रियमलं युद्धस्फुरद्विक्रम-
क्रीताः सर्वदिगन्तरक्षितिभुजां लक्ष्म्यश्चिरं भेजिरे ॥

---

१. इतः प्रभृति मुद्रितं प्रशस्तिचतुष्टयं ऑस्ट्रिआदेशराजधान्यां वीएनानगरे विराजमानेन विद्वद्वतंसेन श्रीमता डॉक्टरब्यूलरेण (G. Bühler, Ph. D., LL. D., C. I. E.) अस्मभ्यं प्रहितमस्ति. वयमपि तत्सादरं सप्रणयं चोररींकुर्मः.

सूनुस्तस्य बभूव भूपतिलकश्चामुण्डराजाह्वयो
यद्गन्धद्विपदानगन्धपवनाघ्राणेन दूरादपि ।
विभ्रश्यन्मदगन्धभग्नकरिभिः श्रीसिन्धुराजस्तथा
नष्टः क्षोणिपतेर्यथास्य यशसां गन्धोऽपि निर्नाशितः ॥

तस्माद्वल्लभराज इत्यभिधया क्ष्मापालचूडामणि-
र्जज्ञे साहसकर्मनिर्मितचमत्कार[ः] क्षमामण्डलो(ले) ।
यत्कोपानलजृम्भितं पिशुनयत्येतत्प्रयाणश्रुति-
क्षुभ्यन्मालवभूपचक्रविकसन्मालिन्यधूमोद्गमः ॥

श्रीमद्दुर्लभराजनामनृपतिर्भ्रातास्य राज्यं दधे
शृङ्गारेऽपि निषण्णधीः परवधूवर्गस्य यो दुर्लभः ।
यस्य क्रोधपरायणस्य किमपि भ्रूवल्लरी भङ्गुरा
सद्यो दर्शयति स्म लाटवसुधाभङ्गस्वरूपं फलम् ॥

भीमोऽपि द्विषतां सदा प्रणयिनां भोग्यत्वमासेदिवा-
न्क्षोणीभारमिदं बभार नृपतिः श्रीभीमदेवो नृपः ।
धारापञ्चकसाधनैकचतुरैस्तद्वाजिभिः साधिता
क्षिप्रं मालवचक्रवर्तिनगरी धारेति को विस्मयः ॥

तस्माद्भूमिपतिर्बभूव वसुधाकर्णावतंसः स्फुर-
त्कीर्तिप्रीणितविश्वकर्णविवरः श्रीकर्णदेवाह्वयः ।
येन ज्याप्रथितस्वनं च्युतशरं धर्मं पुरस्कुर्वता
न्यायज्ञेन न केवलं रिपुगणः कालोऽपि विद्धः कलिः ॥

दृप्यन्मालवभूपबन्धनविधित्रस्ताखिलक्ष्मापति-
र्भक्त्याकृष्टवितीर्णदर्शनशिवो मूर्तः प्रभावोदयः ।
सद्यः सिद्धरसानृणीकृतजगद्गीतोपमान(तावदान)स्थिति-
र्जज्ञे श्रीजयसिंहदेवनृपतिः सिद्धाधिराजस्ततः ॥

वश्या वेश्म रसातलं च विलसद्भोगि..........
....भोक्तुम............क्षत्राणि रक्षांसि च ।

य: क्षोणीधरयागिनीं च सुमहाभोगां सिषेवे चिरं
　हेलासिद्धरसाः सदा क्षितिभुज·············रे ॥
[संख्य]ातीतवितीर्णदाननिवहैः संपन्नपुण्योच्चयः
　क्रीडाक्रान्तदिगन्तराल························ ।
···
　································· ॥
·········कुलभूप···················ावलम्ब·········
　क्रीडाक्रोड इवोद्दधार वसुधां देवाधिदेवाज्ञया ।
देवः सोऽथ **कुमारपालनृपतिः** श्रीराज्यचूडामणि-
　र्यः स्वर्गादवतीर्णवान्हरिरिति ज्ञातः प्रभावाज्जनैः ॥
अर्णोराजनराधिराजहृदये क्षिप्त्वैक(व) बाणव्रजं
　श्च्योतल्लोहिततर्पणाद्मदयच्चण्डीं भुजस्थायिनीम् ।
द्वारालम्बितमालवेश्वरशिरःपद्मेन यश्चाहर-
　ल्लीलापङ्कजसंग्रहव्यसनिनीं चौलुक्यराजान्वयः ॥
शुद्धाचारनवावतारसरणिः सद्धर्मकर्मक्रम-
　प्रादुर्भावविशारदो नयपथप्रस्थानसार्थाधिपः ।
यः संप्रत्यवतारयन्कृतयुगं योगं कलेर्लङ्घय-
　न्मन्ये संहरति स भूमिवलयं(ये) कालव्यवस्थामपि ॥
प्रत्यू·······खण्डिताङ्गुलिदलैः पर्युल्लसत्पल्लवो
　नष्टोदीच्यनराधिपोज्झितसितच्छत्रैः प्रसूनोज्ज्वलः ।
छिन्नप्राच्यनरेन्द्रमौलिकमलैः प्रौष्य(प्रोद्य)त्फलद्योतित-
　श्छायां दूरमवर्धयन्निजकुले यस्य प्रतापद्रुमः ॥
आचारः किल तस्य रक्षणविधिर्विघ्नेशनिर्नाशित-
　प्रत्यूहस्य फलावलोकिशकुनज्ञानस्य मं·······यः ।
देवीमण्डलखण्डिताखिलरिपोर्युद्धं विनोदोत्सवः
　श्रीसोमेश्वरदत्तराज्यविभवस्याडम्बरं वाहिनी ॥

राज्ञानेन च भुज्यमानसुभगा विश्वंभरा विस्फुर-
द्रत्नद्योतितवारिराशिरशना शीताद्रिविन्ध्यस्तनी ।
एषाभूषयदस्थिकुण्डलमिव श्रुत्याश्रयं····ष्टता
बिभ्राणा नगराह्वयं द्विजमहास्थानं सुवर्णोदयम् ॥
आब्रह्मादिऋषिप्रवर्तितमहायज्ञक्रमोत्तम्भितै-
र्यूपैर्दत्तकरावलम्बनतया पादव्यपेक्षाच्युतः ।
धर्मोऽत्रैव चतुर्युगेऽपि कलितानन्दः परिस्पन्दते
तेनानन्दपुरेति यस्य विबुधैर्नामान्तरं निर्मितम् ॥
अश्रान्तद्विजवर्गवेदतुमुलैर्बाधिर्यमारोपितः
शश्वद्धोमहुताशधूमपटलैरान्ध्यव्यथां लम्भितः ।
नानादेवनिकेतनध्वजशिखाघातैश्च खञ्जीकृतो
यस्मिन्नद्य कलिः स्वकालविहितोत्साहोऽपि नोत्सर्पति ॥
सर्पद्विप्रवधूजनस्य विविधालंकाररत्नांशुभिः
स्मेराः संततगीतमङ्गलरवैर्वाचालतां प्रापिताः ।
अश्रान्तोत्सवलक्ष्यमाणविभवोत्कर्षप्रकाशस्थितौ
मार्गा एव वदन्ति यत्र नृपतेः सौराज्यसंपद्गुणम् ॥
अस्मिन्नागरवंशजद्विजजनस्त्राणं करोत्यध्वरे
रक्षां शान्तिकपौष्टिकैर्वितनुते भूपस्य राष्ट्रस्य च ।
मा भूत्तस्य तथापि तीव्रतपसो बाधेति भक्त्या नृपो
वप्रं विप्रपुराभिरक्षणकृते निर्मापयामास सः ॥
अस्मिन्वप्रगुणेन तोयनिलयाः प्रीणन्ति लोकं जलैः
कामं क्षेत्रभुवोऽपि वप्रकलितास्तन्वन्ति धान्यश्रियम् ।
एवं चेतसि संप्रधार्य सकलब्रह्मोपकारेच्छया
चक्रे वप्रविभूषितं पुरमिदं चौलुक्यचूडामणिः ॥
पादाक्रान्तरसातलो गिरिरिव श्लाघ्यो महाभोगतः
शृङ्गारीव तरङ्गिणीपतिरिव स्फारोदयद्वारभूः ।

उत्सर्पत्कपिशीर्षको जय इव क्रव्यादनाथद्विषां
नारीवर्ग इवेष्टकान्तरुचिरः सालोऽयमालोक्यते ॥
भोगाभोगमनोहरः फणशतैरुत्तुङ्गतां धारय-
न्यातः कुण्डलितां च यज्ञपुरुषस्याज्ञावशेनागतः ।
रत्नस्वर्णमहानिधिं पुरमिव त्रातुं स शेषः स्थितः
प्राकारः सुधया सितोपलशिराः संलक्ष्यते वृत्तवान् ॥
कामं कामसमृद्धिपूरकरमारामाभिरामाः सदा
स्वच्छन्दस्वनतत्परैर्द्विजकुलैरत्यन्तवाचालिताः ।
उत्सर्पद्गुणशालिवप्रवलयप्रीतैः प्रसन्ना जनै-
रत्रान्तश्च बहिश्च संप्रति भुवः शोभाद्भुतं बिभ्रति ॥
लक्ष्मीकुलं क्षोणिभुजो दधानः प्रौढोदयाधिष्ठितविग्रहोऽयम् ।
विभ्राजते नागरकाम्यवृष्टिर्वप्रश्च चौलुक्यनराधिपश्च ॥
यावत्पृथ्वी पृथुविरचिताशेषभूभृन्निवेशा
यावत्कीर्तिः सगरनृपतेर्विद्यते सागरोऽयम् ।
तावन्नन्द्याद्द्विजवरमहास्थानरक्षानिदानं
श्रीचौलुक्यक्षितिपतियशःकीर्तनं वप्र एषः ॥
एकाहनिष्पन्नमहाप्रबन्धः श्रीसिद्धराजप्रतिपन्नबन्धुः ।
श्रीपालनामा कविचक्रवर्ती प्रशस्तिमेतामकरोत्प्रशस्ताम् ॥

संवत् १२०८ वर्षे आश्विन शुदि (२) गुरौ लिखितं नागरब्राह्मणप-
ण्डितवालणेन ॥

चौलुक्य·······धिपेन कारिता प्रतोलिका यार्जुनवारिकोपगा ।
पुनर्नवीना लतफहा····त····वेगमिर्जाने········नेन नृपेण कारिता ॥
चैत्रमासे शुभ्रे पक्षे प्रतिपद्गुरुवासरे ।
नन्दाष्टनृपे १६८९ नृपे वर्षे प्रशस्तिर्लिखिता पुनः ॥
नागरब्राह्मणजोशीवेणीसुतेन विष्णुजीकेन लिखिता प्रशस्तिः ॥

शुभं भवतु ॥ ७ ॥

(४६)

कुरुक्षेत्रप्रान्तवर्तिपृथूदकक्षेत्र (Pehoa) स्थविष्णु-मन्दिरप्रशस्तिः ।

ओं नमो माधवाय ॥

याते यामवतीपतौ शिखरिषु क्षामेषु सर्वात्मना
ध्वस्ते ध्वान्तरिपौ जने विघटिते स्रस्ते च तारागणे ।
भ्रष्टे भूवलये गतेषु च तथा रत्नाकरेष्वेकता-
मेको यः स्वपिति प्रधानपुरुषः पायात्स वः शार्ङ्गभृत् ॥
दृष्टिः पायात्रिजगदखिलं शार्ङ्गिणः कान्तमूर्तेः
कान्ता सभ्रूस्फुरितसुभगस्निग्धताराभिरामा ।
उद्यत्तीव्रस्मरजलनिधौ मज्जतः श्रीमुखेन्दु-
स्फारज्योत्स्ना..............: स्मेरगण्डस्थलस्य ॥
क्षेत्रं कुरोर्विविधपापमलाभिघात-
दक्षं क्रियादुदयमस्तसमस्ततापम् ।
अध्यासितं मुनिगणैरुदितात्मबोध-
प्रध्वस्तगाढतिमिरप्रकटप्रमोदैः ॥
पोतः संसारसिन्धौ सुरपथगमने स्यन्दनः साधुवर्ग-
............तवह्नेः प्रलयजलधरः संपतत्सान्द्रधारः ।
नानाव्याधिप्रबन्धप्रचुरतरतमःपङ्कविध्वंसभानु-
र्नीरं चैतत्समन्ताद्दयतु....दुरित........सारस्वतं वः ॥
यः शक्तः स्वकुल........ ....मृद्ध्या भिन्दानः परबलमानसं समन्तात् ।
स श्रीमाञ्जयति महेन्द्रपालदेवः[1] शान्तारिः शशधरसुन्दरः शरण्यः ॥
आसीत्तोमरतुङ्गवंशतिलकश्चण्डप्रतापोज्ज्वलो
राजा रञ्जितसाधुवृत्तहृदयो दुर्वृत्तशैलाशनिः ।

---

१. अयं कन्नौजमहीपतिः खिस्ताब्दीयनवमशतकसमाप्तौ दशमशतकारम्भे च महीं शासितवान्.

नाम्ना जाउल[1] इत्यपूर्वचरितख्यातो दयालंकृति-
स्तत्त्वालोकिविलोकितक्षितिपतिव्यापारलब्धोदयः ॥
येन ज्ञातिकुलं क[लङ्कविकलं] नीतं परां संपदं
छिन्नारातिकरीन्द्रकुम्भशकलैः कृत्वोपहारं भुवः।
कीर्त्या यस्य च नाकनागनिकर(लय)व्यासङ्गतः संगमा-
द्व्योम्नश्च स्फुरदिन्दुसुन्दररुचा स्वःसिन्धुलीलायितम् ॥
प्रतिदिशममराणां मन्दिराण्युच्छ्रिताग्र-
स्थगितशशधराणि स्फारमारोपितानि।
जगति विततभासा येन दूरं विभान्ति
स्वयश इव निरोद्धुं शङ्कवो दिङ्(न्नि)खाताः ॥
तत्संतानमहोदधेः प्रमुदितप्रोद्यद्भुजंगाश्रया-
दुर्लङ्घा(ङ्घ्या)द्घनमौक्तिकांशुनिकरस्फारीभवत्संपदः।
प्रख्यातादजनि स्ववंशतिलकः **श्रीवज्रटाख्यः** प्रभुः
प्राप्ताशेषमनोरथः शुभतरव्यापारतुङ्गोन्नतिः ॥
तस्य स्फुरदिन्दुरुचः शौरेरिव जलधिकन्यका जाता।
नाम्ना मङ्गलदेवी जाया गिरिजेव गिरिशस्य ॥
तस्मात्तस्यां **जज्जुकः** प्रादुरासीदुच्चैः शान्तः सत्सु निर्मत्सरेषु।
क्रूरः केतुर्दुर्धरारातिचक्रे क्रुध्यत्सेनाकुञ्जरध्वानरौद्रे ॥
तस्य स्फुरन्निशितखड्गनिकृत्तशत्रो-
स्त्रस्तान्धदीननिकरोद्धरणोरुकीर्तेः।
सद्वृत्तरक्तवनितातिलकाङ्ककल्पे
कान्ते बभूवतुरुदारशशाङ्ककान्ते ॥
एका चन्द्रेति विख्याता द्वितीया नायिकेति च।
विशिष्टगुणनिर्माणाद्द्वे एव सदनं श्रियः ॥
चन्द्रायाः समजनि **गोग्गनामधेयो** धीराणां धुरि विनिवेशितो विधात्रा।
भूनाथो द्विषदिभकुम्भभेदनिर्यन्मुक्ताभिर्महितमहीतलः शि(सि)ताभिः ॥

१. अयं कश्चन महेन्द्रपालस्य सामन्तः स्यात्.

असूत च विचक्षणं क्षतविपक्षपक्षप्रभं
प्रभाकरकरोत्करं स्वबलसैनिकाम्भोरुहाम् ।
अधर्मपरिपन्थिनं तदनु **पूर्णराजं** सुतं
स्ववंशगगनोदरे तुहिनदीधितं नायिका ॥

करतलस्थगिताधरपल्लवाः प्रतनुकान्ति कपोलतलोदरम् ।
सिषिचुरश्रुजलैर्यदरिस्त्रियः सरलितप्रचुरालकजालकाः ॥

तस्य भ्राता गुणनिधिरभूत्सोदरो **देवराजः**
स्फूर्जत्तेजः प्रविहतपरस्फारसेनान्धकारः ।
स्थानं क्षान्तेः क्षतकलिमलः क्षिप्तरागादिदोषः
स्निग्धच्छायस्तरुरिव ततः सत्फलानम्रमूर्तिः ॥

नामापि प्रकटतरं निशम्य यस्य क्रुद्धस्य भ्रुकुटितरङ्गिताननस्य ।
दृप्तानां युधि विकसद्विगाढभासां सस्रंसे करतलतः कृपाणदण्डः ॥

यदास्यसरसीरुहं सरसमर्थिनां पश्यतां
नितान्तमगमत्क्षणात्क्षयमुपद्रवो मानसः ।
व्यघूर्णत च संभ्रमात्प्रतिभटध्वनद्दन्तिनां
घटा विघटनोन्मुखी समिति यस्य सद्यः पुरः ॥

इत्युद्दामप्रकटितगुणोद्गाररम्याः क्रमेण
प्राप्तश्रीकाः शुभतरधियः साधुरक्तास्त्रयोऽपि ।
विष्णोः सौधान्यतुलमहसः कारयामासुरत्र
त्रस्तास्तीव्राद्भवजलनिधेर्दुर्गमान्मन्दबोधैः ॥

गोग्गेन कारितं मध्ये पूर्णराजेन पृष्ठतः ।
पुरतो देवराजेन घनान्धतमसच्छिदे ॥

चतुःसमुद्रसीमाङ्कं यावदेतन्महीतलम् ।
इदमायतनं तावद्विभातु सदनं श्रियः ॥

धन्वन्तरिप्रतिनिधिः श्रुतसारमूर्तिः
सद्बन्धुरच्युत इति प्रकटाभिधानः ।

कम्बोजजः प्रभुमनःकमलद्विरेफो
रामस्य सूनुरिह कारयिता बभूव ॥
यक्षपालकनामैको द्वितीयो गेज्जराभिधः ।
पाटलाख्यस्तृतीयोऽपि ग्रामो भोगाय कल्पितः ॥
अत्रार्यैः क्ष्मानाथैः श्रेयोर्थं देहस्य ।
संसारं दृष्ट्वोच्चैः कर्तव्या सद्बुद्धिः ॥
स्वकुलगगनभानुः····[·········]प्रसक्तः
श्रुतविनयविदग्धो भट्टरामः किलासीत् ।
अकृत मधुरबन्धां मु[द्गल]स्तस्य सूनुः
सरसललितसारां लीलयेमां प्रशस्तिम् ॥
बभूव सूत्रधारोऽत्र दुर्लभादित्यसंज्ञकः ।
·································लादित्येन धीमता ॥

---

(४७)

सोमनाथक्षेत्रस्थस्य कस्यचन प्रासादस्य प्रशस्तिः ।

ॐ ॥ ॐ नमः शिवाय ।
हृदि स्थितं चिन्मयमात्मवेदिनः समाधिमास्थाय विलोकयन्ति यम् ।
स चित्तसंतापमपाकरोतु वः स्तनंधयश्वेतमयूखभूषणः ॥
शैलात्मजोरसिजशृङ्गकुरङ्गनाभि-
पत्रावलीतलिनतल्पशयालुपाणिः ।
पीयूषभानुकलिकाकलितावतंसो
देवः शिवानि वितनोतु दिवानिशं वः ॥
त्रैलोक्यमङ्गलमनङ्गरिपोरपत्य-
मङ्कूरितैकदशनोल्लसदाननश्रीः ।
देवः प्रपद्य हृदयैकपदीं कपर्दी
भूयादनेकपमुखः सुखसंपदे वः ॥

श्रीविश्वमल्ल इति भूपतिमौलिरत्नं
चौलुक्यवंशमवतंसयति स्म जिष्णुः।
यस्य द्विधारमपि संयति मण्डलाग्र-
माराद्गमंस्त शतधारमरातिवर्गः॥

आबद्धमूलमभितः क्षितिपाद्रिजात-
मुन्मूलयन्कुलिशवंशभुवा भुजेन।
सत्त्वस्य यः किमपि धाम जनेन राज-
नारायणेति जगदे जगदेकनाथः॥

यस्मिन्नात्मकलां न्यधत्त सकलक्षत्रावतंसे जग-
त्तापव्यापदपाकरिष्णुमहिमा श्रीवैद्यनाथः प्रभुः।
शस्त्रैस्तेन चिकित्सितास्तदुचितं विश्वोपकारव्रत-
स्नातेन प्रतिभूभुजामपि हृदः प्रौढा मदग्रन्थयः॥

नागल्लदेवीति बभूव यस्य जाया जयश्रीरिव देहबद्धा।
तया स राजा सुतरां बभासे भासेव देवो हरिणाङ्कमूर्तिः॥

आशान्तविश्रान्तभुजप्रतापः प्रतापमल्लावरजः स राजा।
स्वपौरुषोत्कर्षरसातिरेकादेकातपत्रां बुभुजे धरित्रीम्॥

श्रीविश्वमल्लः स्वपदेऽभिषिच्य प्रतापमल्लात्मजमर्जुनं सः।
साकं सुधापाकमभुङ्क्त नाकनितम्बिनीनामधरामृतेन॥

राकानिशाकरसनाभिगुणाभिरामो
दामोदरांश इव विक्रममांसलश्रीः।
भूपालमौलिमणिरर्जुनदेवनामा
कामार्जुनीमिव धनानि धरामदुग्ध॥

हस्ते विधाय कदनाय दुराशयानां
दानावधूतसुरशाखिनि भूमिचक्रम्।
यः स्वैरुदारचरितैरनघः प्रजानां
रक्षां चकार किल चक्रधरावतारः॥

तस्याङ्गभूर्जयति गूर्जरराज्यलक्ष्मी-
संभोगकन्दलितसौख्यनिमग्नचेताः ।
क्षोणीसमुद्धरणकेलिरसोत्तरङ्गः
सारङ्गदेव इति शार्ङ्गधरानुभावः ॥
युधि यादवमालवेश्वरावकृत क्षीणबलौ बलेन यः ।
पृथुविग्रहधारिणौ पुरा पतगेन्द्रो गजकच्छपाविव ॥
इतश्च ।
भट्टारकश्रीलकुलीशमूर्त्या तपःक्रियाकाण्डफलप्रदाता ।
अवातरद्विश्वमनुग्रहीतुं देवः स्वयं बालमृगाङ्कमौलिः ॥
अनुग्रहीतुं च चिरं विपुत्रकानुलूकभूतानभिशापतः पितुः ।
ललाटमुर्व्या इव लाटभूषणं समेत्य कारोहणमध्युवास यः ॥
अवतेरुश्चत्वारः पाशुपतव्रतविशेषचर्यार्थम् ।
इह कुशिकगार्ग्यकौरुषमैत्रेया इति तदन्तसदः ॥
ततस्तपस्विनां तेषां चतुर्धा जातिरुद्गता ।
भुवं विभूषयामास चतुरर्णवमुद्रिताम् ॥
एतैरनुगृहीतानामन्वयेन महात्मनाम् ।
निःसीमवैभवं श्रीम········कमित्यभूत् ॥
गार्गेयगोत्राभरणं बभूव स्थानाधिपः कार्तिकराशिनामा ।
मूर्तस्तपोराशिरिवाश्रितानामालोकमात्रेण हरन्नघानि ॥
तेन स्वहस्तकमलानुगृहीतजन्मा
वाल्मीकिराशिरुदियाय दयालुचेताः ।
वाणीं च तीर्थपदवीं च सदा पदानां
न्यासैः स्वचित्तविमलाकृतिभिः पुनानः ॥
तेनानुगृह्य समकेति सतां प्रबोध-
कारी तपोधनयुवा त्रिपुरान्तकेति ।
साक्षाद्भवन्ति विबुधाः किल तद्विधानां
हस्ताम्बुजेन दृषदोऽपि कृतप्रतिष्ठाः ॥

वाल्मीकिराशेः सुगृहीतनाम्नस्तस्यैष शिष्यस्त्रिपुरान्तकेति।
तीर्थान्तरालोकनकौतुकेन पवित्रयामास दिशश्चतस्रः॥

पूर्वं तपस्विगृहिणीस्पृहणीयमूर्ति-
र्यो देवदारुविपिने विजहार देवः।
आशावधूलवणिमानमनुग्रहीतुं
तीर्थावगाहनमिषेण चचार सोऽयम्॥

समाधिपूतेन हृदम्बुजेन यः ····यि··········।
ततः शुचिब्रह्मसरःसरोजैरानर्च केदारपदारविन्दे॥

जगद्गुरुं चेतसि यः प्रपद्य यागेश्वरं मूर्तमि··········।
···············प्रसादसंपत्तिलभ्यानि तपःफलानि॥

मिथोमिलज्जह्नुकलिन्दकन्यातरङ्गहस्तोपहृतैः पयोभिः।
ससर्ज यस्याजि···············षः पाद्यमिव प्रयागः॥

प्रदक्षिणीकृत्य सतां प्रदीपः श्रीपर्वतं यः किल सर्वतोऽपि।
श्रीमल्लिनाथस्य विलोकनेन कृतार्थ··················त्ते॥

प्रेङ्खोलितानि कलसोद्भवपादमुद्रा-
निःकल्मषाकृतिषु विन्ध्यगिरेः शिलासु।
रेवाजलानि गजराजविगाहलीला-
···············षाण्यपि यः सिषेवे॥

गोदावरीतीरविहारणीभिर्वनस्थलीनामधिदेवताभिः।
कृतार्थयन्नध्वगदृक्पयोजं यो जङ्गमत्र्यम्बक··········॥

ततः शमाद्वैतरसाभिरामे रामेश्वरं चेतसि चिन्तयन्यः।
ददर्श लङ्काधिपकालरात्रेः प्रस्थानवीथीमिव सेतुलेखाम्॥

श्रीदेवपत्तनसमस्तघनस्तनीनां
नेत्रारविन्दसुकृतैरिव सानुबन्धैः।
तीर्थावगाहनधिया दिशि पश्चिमाया-
मायातवानुपशमायतनं कृती यः॥

सरस्वतीसागरसंप्रयोगविभूषिताभोगमथागमद्यः ।
सोमेशचूडावलमानबालचन्द्रप्रभासंवलितं प्रभासम् ॥
इह महीतलतीर्थविगाहनादखिलतीर्थमयीं दधदाकृतिम् ।
भुवनभूषणभूतमभूषयन्नगरमिन्दुकलाभरणस्य यः ॥
इह साक्षादुमाकान्तः श्रीमान्गण्डबृहस्पतिः ।
आर्यमेनं विनिर्माय षष्ठं चक्रे महत्तरम् ॥
स्थानकं निजविशुद्धचरित्रैरुद्धरिष्यति महत्तर एषः ।
इत्यवेत्य मुमुदे हृदि चातुर्जातकेन गुणजातरसेन ॥
अस्ति श्रीत्रिपुरान्तकोऽपि विबुधश्रेणीकिरीटोपल-
च्छायापल्लवलालितांह्रिकमलः कासां गिरामध्वनि ।
यस्योद्दामचरित्रवैभवनिधेरेषा कियन्तं गुण-
ग्रामं धारयतु स्वकुक्षिकुहरक्रोडे वराकी श्रुतिः ॥
धनानि कामाधिकवामलोचनाविलोचनप्राञ्चलचञ्चलानि यः ।
ददौ महादौस्थ्यनिपीडितात्मने सतां प्रपन्नार्तिहरा हि संपदः ॥
आस्थितस्य पुरुषोत्तमभूयं कामजन्मनि समाहितबुद्धेः ।
यस्य पुण्यघटितस्य रमेति प्रेयसी भुवनभूषणमास्ते ॥
सरस्वतीमौलिशयालुकेतकीपलाशलक्ष्मीसहपांशुकेलयः ।
महात्मनो यस्य महोज्ज्वला गुणा दिगङ्गनानामवतंसतां ययुः ॥
सोमेश्वरायतनमण्डपमुत्तरेण
श्रीभाजि जीर्णघटिकालयसंनिधाने ।
श्रीकण्ठपञ्चमुखवासमधिष्ठितानि
येनाक्रियन्त कृतिनायतनानि पञ्च ॥
मातुर्माह्लणदेव्या यः श्रेयसे माह्लणेश्वरम् ।
सतामध्येयमहिमा तन्मध्ये निरमापयत् ॥
उमापतेरायतनं नाम्ना गण्डबृहस्पतेः ।
कृती कृतयुगाचारः कारयामास तत्र यः ॥

श्रीबृहस्पतिभार्याया उमायाः श्लाघ्यजन्मनः।
श्रेयसे यः सतां सीमा निरमासीदुमेश्वरम्॥
इह स्वनाम्ना त्रिपुरान्तकेश्वरं महत्तरश्रीत्रिपुरान्तको व्यधात्।
प्रियाभिधानेन मनोरमं श्रिया रमापतिः संविदधे रमेश्वरम्॥
गोरक्षकं भैरवमाञ्जनेयं सरस्वतीं सिद्धिविनायकं च।
चकार पञ्चायतनान्तराले बालेन्दुमौलिस्थितमानसो यः॥
आत्मबाहुयुगसौहृदञ्चितस्तम्भसौरभशुभं सतोरणम्।
दूरमस्तदुरितस्तदुत्तरद्वारभूपरिसरे चकार यः॥
संमार्जनाय देवानां कावडिद्वयमम्भसः।
संमार्जनी जगत्याश्च कोलिनी प्रतिवासरम्॥
कर्तव्यमेतदुभयं बटुकेन पटीयसा।
स्वभासपाटकद्रव्यनैवेद्यान्नोपयोगतः॥ (युग्मम्)
श्रीखण्डहेतोः शशिखण्डमौलिपुरानुकूल्येन मपारके यः।
द्रम्मांश्चकार प्रतिमासमष्टावष्टापदोत्सर्गनिसर्गपूतः॥
दातव्यं मालिकश्रेण्या शतपत्रशतद्वयम्।
नवीनकण(र)वीराणां द्वे सहस्रे च नित्यशः॥
घाटीवाहाय वाटीभ्यो ग्रहीतुं शुचिवेदिकाम्।
चक्रे परीक्षिपट्टे यः षड्द्रम्मान्मासपाटके॥
माणकद्वितयं चोषा मुद्गानामेकमाणकम्।
घृतं कर्षाश्च चत्वारस्तैलं दीपाय तादृशम्॥
जात्यानि पञ्च पूगानि स्थितके स्थितिशालिना।
कोष्ठागारे गुणज्ञेन प्रत्यहं येन चक्रिरे॥ (युग्मम्)
इहैव धूपवेलार्थं गुग्गुलस्य मणद्वयम्।
यः पुण्येषु समासक्तः प्रतिमासमकारयत्॥
पत्र....णां च पञ्चाशत्पत्राणि फणिवीरुधाम्
मेहरेण प्रदेयानि नित्यं बीटकहेतवे॥

पशुपालेन तदेवं धर्मस्थानोपहारसंबद्धम् ।
श्री··········कोष्ठागारादानीय दातव्यम् ॥
चोषा माणकमेकं निर्वापे पल्लिकाद्वयं मुद्गाः ।
नित्यं घृतकर्षौं द्वाविति पशुपालाय दातव्यम् ॥

इदमेव प्रदातव्यं नित्यं नैवेद्यहेतवे ।
ततस्तदन्नं बटुना पचनीयं प्रयत्नतः ॥
पशुपालेन संकल्प्य तन्नैवेद्यं सबीटकम् ।
बटुकाय प्रदातव्यं पूजाकर्मविधायिने ॥
मण्डपिकायां स्थितके चातुर्जातकशासनात् ।
प्रत्यहं यः सतां सीमा द्रम्ममेकमकारयत् ॥
अत्रैव कारयामास प्रतिमासमुदारधीः ।
स्थितके यो नवद्रम्मान्बटुकग्रासहेतवे ॥
पूजामप्रतिमां कर्तुं प्रतिमासमुपेयुषः ।
देयाः पञ्चदश द्रम्मा पशुपालस्य धर्मतः ॥
चातुर्जातकपादानां यः संमिलितपोत्तके ।
ततः पञ्चदशद्रम्मान्प्रतिमासं व्यधत्त यः ॥
हट्टानि यो विशिष्टानि त्रीणि प्रीणितमानसः ।
चातुर्जातकपादेभ्यो वित्तेनादाय दत्तवान् ॥

तेषां मध्यादुत्तमं हट्टमेकं देवश्रद्धामालिना मालिकेभ्यः ।
नित्यं पूजापुष्पजातोपहारैः श्रीमच्चातुर्जातकेन प्रदत्तम् ॥
चैत्रीमहे भाद्रपदीमहे च पवित्रकं विस्तरणं च कर्तुम् ।
महाजनोऽपि प्रतिहट्टमेकं द्रम्मं विशेषस्थितके चकार ॥

कोष्ठागारेण पूगानि मेहरेण दलानि च ।
शिवरात्रौ प्रदेयानि चातुर्जातकबीटके ॥

श्रीसोमनाथप्रभुराजपाटिकात्रये त्रिभिर्हट्टवणिग्भिरात्मना ।
स्रग्नालिकेराणि युगाश्च कोमलाः सदा विधेयानि विशुद्धबुद्धिभिः ॥

अमूनि सोमेश्वरदेवरीत्या संपूज्य पञ्चायतनानि पूर्वम् ।
अनेन पश्चात्पशुपालकेन श्रीदेवपाट्यामधिरोहणीयम् ॥

चैत्री भाद्रपदी भग्नपतितोद्धारहेतवे ।
चातुर्जातकपादेभ्यो धर्मस्थानमदत्त यः ॥

स्वोपार्जितेन शुचिना विभवेन धर्म-
स्थानं च शासनमिदं च विनिर्ममे यः ।
तेनास्य कीर्तननिबद्धयशःपताका
राकामृगाङ्कधवलाकृतिरुल्ललास ॥

श्रीगण्डराणकबृहस्पतिकीर्तनस्य
सारङ्गभूपतिसरस्तटभूषणस्य ।
यः श्रीविलासगृहमायतनस्य मध्ये
स्वात्मीयदेवकुलिकां रचयां चकार ॥

तादृग्विशेषशुचिताधिगमाय सन्त-
श्चित्तेषु बिभ्रति यदीयगुणानजस्रम् ।
पुष्णन्ति सिन्धुतनयाहृदयाधिनाथ-
नाभीसरोरुहमृणालसनाभितां ये ॥

निर्व्याजभक्तिरसवासितविश्वनाथ-
माबिभ्रतः सरिदभीकगभीरमन्तः ।
एतस्य शारदतुषारमयूखलेखा-
निष्कल्मषाणि चरितानि जगत्पुनन्ति ॥

सोमार्कवक्त्रशशिमण्डलतो निपीय
पीयूषबद्धसखितानि सुभाषितानि ।
एषा प्रशस्तिरनवद्यपदार्थबन्धा
धन्धात्मजेन विदधे धरणीधरेण ॥

एनां लिलेख मन्त्री विक्रम इति पूर्णसिंहतनुजन्मा ।
उदटङ्कयदथ शिल्पी नाहडतनयश्च पूणसीह इति ॥

श्रीनृपविक्रमसं० १३४३ वर्षे माघ शुदि ९ सोमे लिङ्गप्रतिष्ठामहोत्सवः समजनि ॥

---

(४८)

मालवमहीपालप्रशस्तिः ।

ओं नमः शिवाय ॥

गङ्गाम्बुसंसिक्तभुजंगमालवाले कलेन्दोरमलाङ्कुराभा ।
यन्मूर्ध्नि नम्रेहितकल्पवल्ल्या भातीव भूत्यै स तवास्तु शंभुः ॥
सानन्दनन्दिकरसुन्दरसान्द्रनान्दी-
नादेन तुम्बुरुमनोरमगानमानैः ।
नृत्यन्त्यवश्यमनिशं सुरवासवेश्या
यस्याग्रतो भवतु वः स शिवः शिवाय ॥
मूर्धस्थिताभ्रसरितोऽक्षमयेव शंभो-
रर्धाङ्गमङ्गघटनाद्धनमाश्रयन्ती ।
दृष्टात्मनाथ वशतां सकलाङ्गतुष्टा
पुष्टिं नगेन्द्रतनया भवतां विदध्यात् ॥
गणेशो वः सुखायास्तु निशातः परशुः करे ।
यस्य नम्रघनावद्यकन्दोच्छित्त्या इवोद्यतः ॥
अस्त्युर्वीध्रः प्रतीच्यां हिमगिरितनयः सिद्धदांपत्यसिद्धेः
स्थानं च ज्ञानभाजामभिमतफलदोऽखर्वितः सोऽर्बुदाख्यः ।
विश्वामित्रो वसिष्ठादहरत बलतो यत्र गां तत्प्रभावा-
ज्जज्ञे वीरोऽग्निकुण्डाद्रिपुबलनिधनं यश्चकारैक एव ॥
मारयित्वा परान्धेनुमानिन्ये स ततो मुनिः ।
उवाच परमाराख्यः पार्थिवेन्द्रो भविष्यसि ॥
तदन्ववायेऽखिलयज्ञसंघतृप्तामरोदाहृतकीर्तिरासीत् ।
उपेन्द्रराजो द्विजवर्गरत्नं शौर्यार्जितोत्तुङ्गनृपत्वमानः ॥

तत्सूनुरासीदरिराजकुम्भिकण्ठीरवो वीर्यवतां वरिष्ठः।
श्रीवैरिसिंहश्चतुरर्णवान्तधान्यां जयस्तम्भकृतप्रशस्तिः॥

तस्माद्बभूव वसुधाधिपमौलिमाला-
रत्नप्रभारुचिररञ्जितपादपीठः।
श्रीसीयकः करकृपाणजलोर्मिमग्न-
शत्रुव्रजो विजयिनां धुरि भूमिपालः॥

तस्मादवन्तितरुणीनयनारविन्द-
भास्वानभूत्करकृपाणमरीचिदीप्रः।
श्रीवाक्पतिः शतमखानुकृतिस्तुरंगा
गङ्गासमुद्रसलिलानि पिबन्ति यस्य॥

जातस्तस्माद्वैरिसिंहोऽन्यनाम्ना-लोको ब्रूते वज्रटस्वामिनं यम्।
शत्रोर्वर्गं धारयासेर्निहत्य श्रीमद्धारा सूचिता येन राज्ञा॥

तस्मादभूदरिनरेश्वरसंघसेना-
गर्जद्गजेन्द्ररवसुन्दरतूर्यनादः।
श्रीहर्षदेव इति खोट्टिगदेवलक्ष्मीं
जग्राह यो युधि नगादसमप्रतापः॥

पुत्रस्तस्य विभूषिताखिलधराभोगो गुणैकास्पदं
शौर्याक्रान्तसमस्तशत्रुविभवाधिन्याय्यवित्तोदयः।
वक्तृत्वोच्चकवित्वतर्ककलनप्रज्ञातशास्त्रागमः
श्रीमद्वाक्पतिराजदेव इति यः सद्भिः सदा कीर्त्यते॥

कर्णाटलाटकेरलचोलशिरोरत्नरागिपदकमलः।
यश्च प्रणयिगणार्थितदाता कल्पद्रुमप्रख्यः॥

युवराजं विजित्याजौ हत्वा तद्वाहिनीपतीन्।
खड्ग उर्ध्वीकृतो येन त्रिपुर्यां विजिगीषुणा॥

तस्यानुजो निर्जितहूणराजः श्रीसिन्धुराजो विजयार्जितश्रीः।
श्रीभोजराजोऽजनि येन रत्नं नरोत्तमाकम्प(ल्प ?)कृदद्वितीयम्॥

आ कैलासान्मलयगिरितोऽस्तोदयाद्रिद्वयादा
भुक्ता पृथ्वी पृथुनरपतेस्तुल्यरूपेण येन।
उन्मूल्योर्वीभरगुरुगणा लीलया चापयष्ट्या
क्षिप्ता दिक्षु क्षितिरपि परां प्रीतिमापादिता च ॥
साधितं विहितं दत्तं ज्ञातं तद्यन्न केनचित्।
किमन्यत्कविराजस्य श्रीभोजस्य प्रशस्यते ॥
चेदीश्वरेन्द्ररथतोग्गलभीममुख्या-
न्कर्णाटलाटपतिगूर्जरराट्तुरुष्कान्।
यद्भृत्यमात्रविजितानवलोक्य मौला
दोष्णां बलानि कलयन्ति न⋯लो⋯ ॥
केदाररामेश्वरसोमनाथसुण्डीरकालानलरुद्रसत्कैः।
सुराश्रयैर्व्याप्य च यः समन्ताद्यथार्थसंज्ञां जगतीं चकार ॥
तत्रादित्यप्रतापे गतवति सदनं स्वर्गिणां भर्गभक्ते
व्याप्ता धारेव धात्री रिपुतिमिरभरैर्मौललोकस्तदाभूत्।
विस्रस्ताङ्गो निहत्योद्भटरिपुतिमिरं खड्गदण्डांशुजालै-
रन्यो भास्वानिवोद्यन्द्युतिमुदितजनात्मोदयादित्यदेवः ॥
येन धरणीवराहः परमारेणोद्धृतो निरायासात्।
तस्यैतस्या भूमेरुद्धारो बत कियन्मात्रः ॥
कुंवान्य⋯ वाजित्रजरु⋯⋯⋯
⋯⋯⋯⋯⋯⋯⋯⋯ ।
⋯⋯⋯⋯⋯⋯⋯⋯
⋯⋯⋯⋯⋯⋯⋯⋯ ॥

(अग्रे सर्वं त्रुटितम्।)

---

(४९)

कम्बोजदेशस्थशिवालयप्रशस्तिः।

जयत्यनन्यसामान्यमहिमा परमेश्वरः।
ब्रह्मोपेन्द्राञ्जलिन्यासद्विगुणाङ्घ्रियुगाम्बुजः ॥

राजा श्रीरुद्रवर्मासीत्त्रिविक्रमपराक्रमः ।
यस्य सौराज्यमद्यापि दिलीपस्येव विश्रुतम् ॥
तस्याभूतां भिषङ्मुख्यौ भ्रातरावश्विनाविव ।
ब्रह्मदत्तः स यो ज्येष्ठो ब्रह्मसिंहः स योऽनुजः ॥
तयोरपि महाभाग्यौ भागिनेयौ बभूवतुः ।
धर्मदेवः प्रथमजः सिंहदेवस्त्वनन्तरः ॥
स्वशक्त्याक्रान्तराज्यस्य राज्ञः श्रीभववर्मणः ।
श्रीगम्भीरेश्वरो यस्य राज्यकल्पतरोः फलम् ॥
यस्य तौ मन्त्रिणावास्तां सम्मतौ कृतवेदिनौ ।
धर्मशास्त्रार्थशास्त्रज्ञौ धर्मार्थाविव रूपिणौ ॥
महेन्द्रवर्मणो भूयः श्रीमतः पृथिवीपतेः ।
तौ चाप्यमात्यतां प्राप्तौ प्रत्ययौ कृत्यवस्तुषु ॥
सिंहदेवोऽनुजो राज्ञा दूतत्वे सत्कृतः कृती ।
प्रीतये प्रेषितः प्रेम्णा चम्पाधिपनराधिपम् ॥
धर्मदेवस्य तु पुनस्तनयोऽभूदनल्पधीः ।
कुलकाननसिंहो यः सिंहवीर इतीरितः ॥
विद्वान्योऽद्यापि विद्वद्भिरापीतकवितारसः ।
श्रीशानवर्मनृपतेरभू(भ)वन्मन्त्रिसत्तमः ॥
निकामवरदं देवं श्रीनिकामेश्वरं हरम् ।
हरिं च सिद्धिसंकल्पस्वामिनं सिद्धिदायिनम् ॥
योऽतिष्ठिपदिमौ देवौ श्रद्धया भूरिदक्षिणौ ।
कीर्तिस्तम्भाविवोदग्रौ यौ स्थितावा भुवः स्थितेः ॥
तस्य सूनुरसूयादिदोषैरस्पृष्टमानसः ।
योऽभवद्भवसंन्यस्तचित्तवृत्तिरुदारधीः ॥
बाल्येऽपि विनयोपेतो यौवनेऽपि जितेन्द्रियः ।
त्रिवर्गारम्भकालेऽपि धर्मे यस्त्वधिकादरः ॥

यस्मिन्नैदंयुगीनेऽपि सदाचारावलम्बिनि ।
कलिप्रचालितो धर्मो न स्खलत्येकपादपि ॥
श्रीमतो राजसिंहस्य जयिनो **जयवर्मणः** ।
यो वैद्यो वेदितव्यानां वेत्तापि निरहंकृतिः ॥
पुनः सत्कृत्य यं राजा प्रादात्स्वे राजमातुले ।
अलब्धराजशब्देऽपि लब्धराजार्हसंपदि ॥
पश्चादाढ्यपुरस्यास्य योऽध्यक्षत्वे कुलक्रमात् ।
योग्योऽयमिति सत्कृत्य स्वयं राज्ञा नियोजितः ॥
यस्मिन्नवति धर्मेण पराभ्युदयकारिणि ।
अन्वर्थसंज्ञां संप्राप्तमिदमाढ्यपुरं पुरम् ॥
उचितं यः करादानमारामेभ्यः कुटुम्बिनाम् ।
अनाददत्प्रभुरपि पूर्णां वृत्तिमदादितः ॥
रोगिणामर्थिनां वापि विस्रम्भाद्दुषितं वचः ।
शृण्वतो यस्य करुणा द्विगुणा समजायत ॥
यन्मदीयं शुभं नाम जन्मप्रभृति संभृतम् ।
तदस्तु पितुरेवेति संकल्पो यस्य कीर्तितः ॥
शिवयज्ञेन यो देवान्मुनीनध्ययनेन च ।
पितॄंश्चातर्पयत्तोयैः सत्पुत्रकरनिःसृतैः ॥
तेनेह सिंहदत्तेन दत्तदातव्यवस्तुना ।
स्थापितो विजयस्यायं दाता श्रीविजयेश्वरः ॥
अस्मिंस्तेन च यद्दत्तं दासारामादि किंचन ।
तदेव देवस्वमिति न हरेन्नापि नाशयेत् ॥
वैशाखप्रथमद्विपञ्चकदिने द्वाराष्टबाणैर्युते
जीवश्चापयुतो वृषे कविसुतः सिंहार्धगश्चन्द्रमाः ।
कौलीरे वणिजो(ऽवनिजो) घटे रविसुतः शेषास्तु मेषस्थिताः
सोऽयं श्रीविजयेश्वरो विजयते यः कीटलग्ने स्थितः ॥

(कम्बोज इन्स्क्रिप्शन्स् ५-८

---

(५०)

कम्बोजदेशस्थशिवालयप्रशस्तिः ।

जितमिन्दुवतंसेन मूर्ध्ना गङ्गां बभार यः ।
उमाभ्रूभङ्गजिह्मोर्मि मालामालु(?)मिवामलाम् ॥
राजा श्रीभववर्मेति पतिरासीन्महीभृताम् ।
अप्रधृष्यमहासत्त्वा तु(त्त्वस्तु)ङ्गो मेरुरिवापरः ॥
सोमान्वये प्रसूतस्य सोमस्येव पयोनिधौ ।
केनापि यस्य तेजस्तु जाज्वलिते(लीति ?) सदाहवे ॥
अन्तः समुत्था दुर्ग्राह्या मूर्त्यभावादतीन्द्रियाः ।
यदा षडरयो येन जिता बाह्येषु का कथा ॥
नित्यदानपयःसिक्तकरानेव मतङ्गजान् ।
आत्मानुकारादिव यः समराय समग्रहीत् ॥
शरत्कालाभियातस्य परानावृततेजसः ।
द्विषामसह्यो यस्यैव प्रतापो न रवेरपि ॥
यस्य सेनारजो धूतमुज्झितालंकृतिष्वपि ।
रिपुस्त्रीगण्डदेशेषु चूर्णभावमुपागतम् ॥
रिपोरिव मनः शुष्कं नगरीपरिखाजलम् ।
यस्य योधैमरापीतमासद्रै रतिना(?) सह ॥
परीतायामपि पुरि ज्वलता यस्य तेजसा ।
पुनरुक्त इवारोपः प्राकारे जातवेदसः ॥
जित्वा पर्वतभूपालांस्तनोति सकुला भुवः ।
बन्दिभिः सगुणानीशै(?)र्यशोभिरिव यो दिशः ॥
येनेयद्भैरवंश्यानां मर्यादालङ्घनं कृतम् ।
यदेषामवधिर्भूमेरतिक्रान्ता पराक्रमैः ॥
शक्त्यापि पूर्वं विजिता भूमिरम्बुधिमेखला ।
प्रभुत्वे क्षमया येन सैव पश्चादजीयत ॥

यस्याकृष्टाः प्रभावेन परे युध्यजिता अपि ।
राजश्रियम(मु)पादाय नमन्ते चरणाम्बुजे ॥
परेणाक्रान्तपूर्वेयमखिलेति विचिन्तया ।
अजित्वाम्भोधिपर्यन्तामवनिं यो न शाम्यति ॥
अवाप्य षोडश कलाः शशाङ्को याति पूर्णताम् ।
असंख्या अपि यो लब्ध्वा न पर्यस्तः कदाचन ॥
नास्ति सर्वगुणः कश्चिदिति वाक्यं महाधियाम् ।
येनासीद्विकृतमिदं(?) स्वेनापि वचसा विना ॥
तस्य राजाधिराजस्य नवेन्दुरिव यः सुतः ।
गुणकान्त्यादिभिर्योगादुन्नेत्रयति यः प्रजाः ॥
रागं दधाति भूपानां........आरतमरीचयः ।
यस्य..॥
शैव(वं) पदं गते राज्ञि दृष्ट्वा यमुदितं प्रजाः ।
मुञ्चन्ति युगपद्बाष्पं शोकानन्दसमुद्भवे(वम्) ॥
.... ।
.... ॥
नवे वयसि वृत्तस्य यस्य राज्यभरोद्यतम् ।
चित्रायते कुमारस्य सैनान्यं मरुतामिव ॥
उपधाशुद्धिमा(न्) भृत्यस्तयोरवनिपालयोः ।
.... ॥
.... ।
.... ॥
हैमौ करङ्ककलशावित्यादिश्रियमुत्तमाम् ।
यो लब्धवान्प्रसादेन स्वामिनोरुभयोरपि ॥
न किंचित्स्वाम्यसंभुक्तमाप्तं येन कदाचन ।
भोजन(नं) वसन........यानाद्याभरणानि वा ॥

प्राणैरसारलघुभिः पितृपिण्डविवर्धितः ।
स्वामिनोऽर्थे गुरुस्थेयं क्रेतुमैहत यो यमम्(?) ॥
लक्ष्म्या गाढोपगूढोऽपि पूर्वाभ्यासश(ब)लेन यः ।
मुनीनां चरितं धत्ते क्षमास(श)मपरायणः ॥
सुप्रकाशितशौर्यस्य सङ्ग्रामत्यागयोरपि ।
भीरुत्वं यस्य विख्यातमकीर्तेर्वृजिनादपि ॥
प्रीणयन्नुद्य·······रुचं कुर्वन्द्विषामपि ।
पक्षद्वयं यो मित्रत्वमनयद्गुणसंपदा ॥
कलिदा(ना)वलीना(बलिना) धर्मो भग्नैकचरणोऽपि यम् ।
महास्तम्भमिवालम्ब्य चतुष्पादिव सुस्थितः ॥
अशाश्वतीत्यव(ना)दृत्य तनुश्रियमिवात्मनः ।
यशःपुण्यमयीमेव यः स्थिरां बह्वमन्यत ॥
इदमुग्रपुराधीशः सुभक्त्या लिङ्गमैश्वरम् ।
प्रतिष्ठापितवानत्र श्रीभद्रेश्वरसंज्ञकम् ॥
दासगोक्षेत्रहेमादिदेयद्रव्यमशेषव(तः ?) ।
प्रमाणमिह ते सन्तु यतयो देवयाजकाः ॥
बान्धवा यजमानस्य पुत्राः संबन्धिनोऽपि च ।
देवस्वं नोपभुञ्जीरन्न प्रमाणि (?) भवन्ति च ॥
यद्दत्तमस्मै देवाय यजमानेन भक्तितः ।
ये नरा हर्तुमिच्छन्ति ते यान्तु नरकं चिरम् ॥

(कम्बोज इन्स्क्रिप्शन्स् २४–२८)

---

(५१)

मल्लपुरस्थशिवालयप्रशस्तिः ।

संभवस्थितिसंहारकारणं वीतकारणः ।
भूयादत्यन्तकामाय जगतां काममर्दनः ॥

अमायश्चित्रमायोसावगुणो गुणभाजनः(नम्) ।
स्वस्थो निरुत्तरो जीयादनीशः परमेश्वरः ॥
यस्याङ्गुष्ठभराक्रान्तः कैलासः सदशाननः ।
पातालमगमन्मूर्ध्ना श्रीनिधिस्तं बिभर्त्यजम् ॥
भक्तिप्रह्वेण मनसा भवं भूषणलीलया ।
दोष्णा च यो भुवो भारं जीयात्स श्रीभरश्चिरम् ॥
अत्यन्तकामो नृपतिर्निर्जितारातिमण्डलः ।
ख्यातो रणजयः शंभोस्तेनेदं वेश्म कारितम् ॥
ज्ञः स्थाणुर्निष्कलः सोमः पावकात्मा वियद्वपुः ।
भीमः शिवो विजयतां शंकरः कामसूदनः ॥
राजराजो न विरसश्चक्रभृन्न जनार्दनः ।
तारकाधिपतिः स्वस्थो जयतात्तरुणाङ्कुरः ॥
श्रीमतोऽत्यन्तकामस्य द्विषद्दर्पापहारिणः ।
श्रीनिधेः कामरागस्य हराराधनसङ्गिनः ॥
अभिषेकजलापूर्णे चित्ररत्नाम्बुजाकरे ।
आस्ते विशाले सुमुखः शिरःसरसि शंकरः ॥
तेनेदं कारितं तुङ्गं धूर्जटेर्मन्दिरगृहम् ।
प्रजानामिष्टसिद्ध्यर्थं शाङ्करीं भूतिमिच्छता ॥
धिक्तेषां धिक्तेषां पुनरपि धिग्धिग्धिगस्तु धिक्तेषाम् ।
येषां न वसति हृदये कुपथगतिविमोक्षको रुद्रः ॥

अत्यन्तकामपल्लवेश्वरगृहम् ।

(साउथ इण्डियन् इन्स्क्रिप्शन्स् १—४)

---

(५२)

चालुक्यवीरचोडमहीपतेर्दानपत्रम् ।

श्रीधाम्नः पुरुषोत्तमस्य महतो नारायणस्य प्रभो-
र्नाभीपङ्करुहाद्बभूव जगतः स्रष्टा स्वयंभूस्ततः ।

जज्ञे मानससूनुरत्रिरिति यस्तस्मान्मुनेरत्रितः
सोमो वंशकरः सुधांशुरुदितः श्रीकण्ठचूडामणिः ॥
तस्मादभूत्सुधासूतेर्बुधो बुधनुतस्ततः ।
जातः पुरूरवा नाम चक्रवर्ती सविक्रमः ॥

तस्मादायुस्ततो नहुषः । ततो ययातिश्चक्रवर्ती वंशकर्ता । ततः पुरुः ततो जनमेजयः ततः प्राचीशः ततः सैन्ययातिः ततो हयपतिः ततः सार्वभौमः ततो जनमेजयः ततो महाभौमः तस्मादैशानकः ततः क्रोधाननः ततो देवकिः तस्मादृभुकः तस्मादृक्षकः ततो मतिवरः सत्रयागयाजी सरस्वतीनदीनाथः ततः कात्यायनः ततो नीलः ततो दुष्यन्तः तत्सुतः गङ्गायमुनातीरयोरविच्छिन्नान्निधाय यूपान् क्रमशः कृत्वा तथाश्वमेधं नाम महाकर्म भरत इति योऽलभत । ततो भरताद्भूमन्युः । ततो हस्ती ततो विरोचनः । तस्मादजमील्हः ततः संवरणः ततः सुधन्वा ततः परिक्षित् ततो भीमसेनस्ततः प्रदीपनः ततः शंतनुः ततो विचित्रवीर्यः ततः पाण्डुराजः ततः पाण्डवाः ।

येनादाहि विजित्य खाण्डवमठो(थो) गाण्डीविना वज्रिणं
युद्धे पाशुपतास्त्रमन्धकरिपोश्चालाभि दैत्यान्बहून् ।
इन्द्रार्धासनमध्यरोहि जयिना यत्कालि(ल)केयादिका-
न्हत्वा स्वैरमकारि वंशविपिनच्छेदः कुरूणां विभोः ॥

ततोऽर्जुनादभिमन्युः ततः परिक्षित् ततो जनमेजयः ततः क्षेमुकः ततो नरवाहनः ततः शतानीकः तस्मादुदयनः ततः प्रभृतिष्वविच्छिन्नसंतानेष्वयोध्यासिंहासनासीनेष्वेकान्नषष्टिचक्रवर्तिषु गतेषु तद्वंश्यो **विजयादित्यो** नाम राजा विजिगीषया दक्षिणापथं गत्वा त्रिलोचनपल्लवमधिक्षिप्य दैवदुरीहया लोकान्तरमगमत् । तस्मिन्संकुले पुरोहितेन वृद्धामात्यैश्च सार्धमन्तर्वती(त्नी) तस्य महादेवी मुडिवेमुनामाग्रहारमुपगम्य तद्वास्तव्येन विष्णुभट्टसोमयाजिना महामुनिप्रभावेन दुहितृनिर्विशेषमभिरक्षिता **विष्णुवर्धनं** नन्दनमसूत । सा तस्य कुमारस्य मानव्यसगोत्रहारीतिपुत्रद्विपक्षगोत्रक्रमोचितानि कर्माणि कारयित्वा तमवर्धयत् । स च मात्रा विदितवृत्तान्तः सन्निर्गत्य चलुक्यगिरौ नन्दां भगवतीं गौरीमाराध्य

कुमारनारायणमातृगणांश्च संतर्प्य श्वेतातपत्रैकशङ्खपञ्चमहाशब्दपालिकेतनप्रतिढक्कावराहलाञ्छनपिच्छकुन्तसिंहासनमकरतोरणकनकदण्डगङ्गायमुनादीनि स्वकुलक्रमागतानि निक्षिप्तानीव साम्राज्यचिह्नानि समादाय कड(द ?)म्बगङ्गादिभूमिपान्निर्जित्य सेतुनर्मदामध्यं सार्धसप्तलक्षं दक्षिणापथं पालयामास ।

तस्यासीद्विजयादित्यो विष्णुवर्धनभूपतेः ।
पल्लवान्वयजाताया महादेव्याश्च नन्दनः ॥

तत्सुतः **पुलकेशिवल्लभः** तत्पुत्रः **कीर्तिवर्मा** तस्य तनयः स्वस्तिश्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां कौशिकीवरप्रसादलब्धराज्यानां मातृगणपरिपालितानां स्वामिमहासेनपादानुध्यातानां भगवन्नारायणप्रसादसमासादितवरवराहलाञ्छनेक्षणक्षणवशीकृताराविमण्डलानामश्वमेधावभृथस्नानपवित्रीकृतवपुषां चालुक्यानां कुलमलंकरिष्णोः सत्याश्रयवल्लभेन्द्रस्य भ्राता **कुब्जविष्णुवर्धनो**ऽष्टादशवर्षाणि वेङ्गीदेशमपालयत् । तदात्मजो **जयसिंहवल्लभ**स्त्रिंशतम् । तदनुज **इन्द्रराजः** सप्तदिनानि । तत्सुतो **विष्णुवर्धनो** नववर्षाणि । तत्सूनुर्मङ्गियुवराजः पञ्चविंशतिम् तत्पुत्रो **जयसिंह**स्त्रयोदश तदवरजः **कोक्किलिः** षण्मासान् तस्य ज्येष्ठो भ्राता **विष्णुवर्धन**स्तमुच्चाट्य सप्तत्रिंशतम् तत्पुत्रो **विजयादित्यभट्टारको**ऽष्टादश । तत्तनुजो **विष्णुवर्धनः** षट्त्रिंशतम् तत्सुतो **नरेन्द्रमृगराजो**ऽष्टाचत्वारिंशतं तत्सुतः **कलिविष्णुवर्धनो**ध्यर्ध वर्षं तत्सुतो **गुणगाङ्कविजयादित्य**श्चतुश्चत्वारिंशतम् तद्भ्रातुर्विक्रमादित्यस्य तनयश्चालुक्यभीमस्त्रिंशतम् । तत्सुतः **कोल्लभिगण्डविजयादित्यः** षण्मासान् । तत्सुतो**ऽम्मराजः** सप्त वर्षाणि । तत्सुतं विजयादित्यं बालमुत्पाट्य **ताडपो** मासमेकम् । तं जित्वा चालुक्यभीमसुतो **विक्रमादित्य** एकादशमासान् । तत्ताडपराजसुतो **युद्धमल्लः** सप्त वर्षाणि । तमुच्चाट्य देशादम्मराजानुजो **राजभीमः** द्वादशवर्षाणि तत्सूनु**रम्मराजः** पञ्चविंशतिं तस्य द्वैमातुरो **दाननृप**स्त्रीणि वर्षाणि ततः सप्तविंशतिवर्षाणि दैवदुरीहया वेङ्गीमहिर-

नायिकाभवत् । ततो दानार्णवसुतः शक्तिवर्मभूपतिर्द्वादशवर्षाणि स रक्षदुर्वीम् ।

ततस्तदनुजः सप्तवत्सरान्भूतवत्सलः ।
विमलादित्यभूपालः पालयामास मेदिनीम् ॥
तत्तनयो नयशाली जयलक्ष्मीधाम राजराजनरेन्द्रः ।
चत्वारिंशतमब्दानेकं च पुनर्महीमपालयदखिलाम् ॥
यो रूपेण मनोभवं विशदया कान्त्या कलानां निधिं
भोगेनापि पुरंदरं विपुलया लक्ष्म्या च लक्ष्मीधरम् ।
भीमं भीमपराक्रमेण विहसन्भाति स्म भास्वद्यशाः
श्रीमत्सोमकुलैकभूषणमणिर्दीनैकचिन्तामणिः ॥
तस्यासीदपकल्मषा सुचरितैरम्मङ्गनाम्ना भुवि
प्रख्याता शुभलक्षणैकवसतिर्देवी जगत्पावनी ।
या जह्नोरिव जाह्नवी हिमवतो गौरीव लक्ष्मीरिव
क्षीरोदाद्दिवसेशवंशतिलकाद्राजेन्द्रचोडादभूत् ॥
पुत्रस्तयोरभवदप्रतिघातशक्ति-
निःशेषितारिनिवहो महनीयकीर्तिः ।
गङ्गाधराद्रिसुतयोरिव कार्तिकेयो
राजेन्द्रचोड इति राजकुलप्रदीपः ॥
भासामुन्नतिहेतुं प्रथमं वेङ्गीश्वरत्वमध्यास्य ।
यस्तेजसा दिगन्तानाक्रमदुदयं सहस्ररश्मिरिव ॥
उद्यच्चण्डतरप्रतापदहनप्लुष्टाखिलद्वेषिणा
सर्वान्केरलपाण्ड्यकुन्तलमुखान्निर्जित्य देशान्क्रमात् ।
आज्ञा मौलिषु भूभृतां भयरुजा चित्तेषु दुर्मेधसां
कीर्तिर्दिक्षु सुधांशुधामधवला येनार्पितोज्जृम्भते ॥
भोगीशाभीलभोगप्रतिभयभुजनिर्भर्त्सनात्यन्तबिभ्य-
न्नानाभूपाललोकप्रहितबहुविधानर्घ्यरत्नाभिरामम् ।

१. E. Hultzsch, Ph. D. महाशयेनैतत्स्कन्धकं गद्यान्तः पातितम्.

धत्ते मौलिं परार्ध्यो महति नृपकुले यः कुलोत्तुङ्गदेवो
देवेन्द्रत्वादनूने सुरपतिमहिमा चोडराज्येऽभिषिक्तः ॥
हस्तभ्राजितशङ्खचक्रजलजं यं राजनारायणं
लोक[:] स्तौति स सूर्यवंशतिलकाद्राजेन्द्रदेवार्णवात् ।
संभूतां मधुरान्तकीर्ति विदितां नाम्ना परेण स्वयं
लक्ष्मीमुद्वहति स लोकमहितां देवीं चरित्रोन्नताम् ॥
गाङ्गौघा इव निर्मलाः कृततमोध्वंसा दिनेशा इव
क्षोणीध्रा इव भूभरश्रमसहा जातास्तयोः सूनवः ।
तन्मध्ये नयविक्रमैकनिलयः **श्रीराजराजं** प्रति
प्रेम्णा वाचमिमामवोचत पिता सर्वोवराधीश्वरः ॥
मया वेङ्गीमहाराज्यं चोडराज्याभिलाषिणा ।
मत्पितृव्ये पुरा न्यस्तं विजयादित्यभूभुजि ॥
स च पञ्चदशाब्दानि पञ्चाननपराक्रमः ।
महीं रक्षन्महीनाथो दिवं देवोपमो गतः ॥
इत्युक्त्वा तां धुरं दत्तां गुरुणा चक्रवर्तिना ।
अनिष्टतद्वियोगोऽपि विनीतो वहति स सः ॥
श्रीपादसेवासुखतो गुरूणां न जातु राज्यं सुखमित्यवेक्ष्य ।
संरक्ष्य वेङ्गीभुवमेकमब्दं भूयः स पित्रोरगमत्समीपम् ॥
तदनुजमथ धीरं **वीरचोडं** कुमारं
गुणमिव तनुबद्धं विक्रमं चक्रवर्ती ।
उदयमिव रविस्त्वं प्राप्य वेङ्गीश्वरत्वं
वितनु शिरसि पादं भूभृतामित्यवोचत् ॥
इत्याशिषं समधिगम्य नृपादवन्ध्यां
देव्यास्तथाग्रजनृपद्वितयात्क्रमेण ।
आनम्य तानवनतोवरजैः कुमारः
सृष्टः स्वदेशगमनाय स तैः कथंचित् ॥

शत्रुध्वान्तमपास्य राजनिकरानाच्छाद्य धाम्ना परा-
न्दुर्वृत्तान्विनिवर्त्य भूकमलिनीं कृत्वा तथानन्दिनीम्।
आरूढो जभनाथ(?)नामनगरीहर्म्योदयाद्रिं विभु-
र्वेङ्गीभूतलभूषणं नृपसुतो बालार्कबिम्बद्युतिः॥
शाकाब्दे शशिखद्वयेन्दु(१००१)गणिते सिंहाधिरूढे रवौ
चन्द्रे वृद्धिमति त्रयोदशतिथौ वारे गुरोर्वृश्चिके।
लग्नेऽथ श्रवणे समस्तजगतीराज्याभिषिक्तो मुदा
लोकस्योद्वहति स पट्टमनघः श्रीवीरचोडो नृपः॥

स सर्वलोकाश्रयश्रीविष्णुवर्धनमहाराजो राजपरमेश्वरः परममाहेश्वरपरमभट्टारकः परमब्रह्मण्यश्रीवीरचोडदेवः गुद्वाटिविषयनिवासिनो राष्ट्रकूटप्रमुखान् कुटुम्बिनः सर्वान् समाहूय मन्त्रिपुरोहितसेनापतियुवराजदौवारिकसमक्षमित्थमाज्ञापयति—

यथा—

पावने ब्रह्मवंशेऽभूत्परमाह्लाददर्शनः।
मुनीन्द्रो मुद्गलो नाम क्षीरोद इव चन्द्रमाः॥
येनातर्क्यानुभावेन समाहूते दिवाकरे।
यस्य यष्टिः समादिष्टा रविचेष्टामचेष्टत॥
आसीत्पवित्रचारित्रस्तद्गोत्रे गोत्रवर्धनः।
दिशो निजयशोधाम्ना द्योतयन्पोतनाह्वयः॥
गुणाधिको गुणज्ञेन राजराजाधिपेन यः।
राजराजब्रह्ममहाराजनाम्ना स्तुतो मुदा॥
तस्य पुण्यनिधेः पत्नी कन्नमाम्बा जगन्नुता।
अत्रेरिवानसूयासीदनसूयगुणोन्नता॥
सुतमिव वसुदेवाद्देवकी वासुदेवं
गुहमिव गिरिकन्या नन्दनं चन्द्रमौलेः।
अथ तनयमसूत श्रीनिधिं सा च तस्मा-

दखिलविबुधसंघैरीडितं मेडमार्यम् ॥
उद्दामधामविमलीकृतदिग्विभागे
नित्योदयस्थितिमति प्रविकासिपद्मे ।
यत्रोदिते निखिलबन्धुकुलानि लक्ष्मी-
रध्यास्त वारिजवनानि विवस्वतीव ॥
यस्मिन्नाश्रितवत्सले कृतयुगाचारैकधीरे स्थितिं
बिभ्राणा गुणरत्नभूषण इति प्रख्यातनाम्नि स्वयम् ।
सत्यत्यागपराक्रमप्रभृतयः संभूय सर्वे गुणा
वर्धन्ते गुणराशिलोपनिपुणं निर्जित्य कालं कलिम् ॥
धीरो नित्यानुरक्तो दृढनिशितमतिर्ब्रह्मवंशप्रदीपो
लक्ष्मीभूरिद्धतेजा नयविनयनिधिः शास्त्रशस्त्रप्रवीणः ।
मान्यः शैलेन्द्रसारस्थिर इति च मया सादरं सप्रसादं
सैनापत्येऽभिषिक्तो वहति जनमुदे पट्टमारोपितं यः ॥
शुश्रूषया गुरुजनं चरितेन लोकं
मानेन बन्धुजनमिष्टधनेन शिष्टान् ।
यो माम्मदीयनिखिलक्षितिराज्यभार-
क्षान्त्याभिनन्दयति भक्तिभरेण शौरिम् ॥
यस्य प्राङ्गणभूमिषु प्रतिदिनं प्रक्षाल्यमानामित-
क्षोणीदेवसमूहपादविगलद्वारिप्रवाहैः शुभैः ।
शश्वन्मार्गसहस्रपूरिभिरहो गङ्गाप्रवाहा जिता
देवेष्वन्यतमस्य पादगलिता मार्गत्रयायासिताः ॥
द्राक्षारामे पावने पुण्यभाजा पुण्यक्षेत्रे पीठपुर्यां च येन ।
भोक्तुं प्रीत्या प्रत्यहं ब्राह्मणानामाकल्पान्तं कल्पितं सत्रयुग्मम् ॥
चेब्रूरुनामप्रथिताभिरामशिष्टाग्रहारोत्तरदिग्विभागे ।
महत्तटाकं मधुराम्बुपूर्णमचीकरद्यः करुणारसात्मा ॥
विप्रैरगस्त्यप्रतिमैरसंख्यैर्नित्योपभोग्येन शशिप्रभेण ।
यद्वारिणाब्धिं हसतीव भूयो निःशेषपीतं कलशोद्भवेन ॥

महौजसा तेन महामहिम्ना ग्रामस्य तस्यापरदिग्विभागे ।
निर्मापितं धर्मपरायणेन विष्णोर्गृहं वैष्णवपुंगवेन ॥
समुन्नते चन्द्रमरीचिगौरे लक्ष्मीनिवासे नयनाभिरामे ।
तत्राविरासीत्स्वयमेव देवो लक्ष्मीपतिर्लक्षितशङ्खचक्रः ॥

तस्मै श्रीविष्णुभट्टारकाय प्रत्यहं चरुबलिपूजार्थं खण्डस्फुटितनवकर्मार्थं च भवद्विषये कोलारू नाम ग्रामः सर्वकरपरिहारेण देवभोगीकृत्य उदकपूर्वकं दत्त इति विदितमस्तु वः अस्य ग्रामस्य सीमानः पूर्वतः कु..सीमा ॥ अस्योपरि न केनचिद्बाधा कर्तव्या । यः करोति स पञ्चमहापातकयुक्तो भवति । तथा चोक्तं भगवता व्यासेन—

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
गामेकां स्वर्णमेकं वा भूमेरप्येकमङ्गुलम् ।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥
बहुभिर्वसुधा भुक्ता बहुभिश्चानुपालिता ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

श्रीविजयराज्यसंवत्सरे एकविंशे दत्तस्यास्य शासनस्याज्ञप्तिः पञ्चप्रधाना काव्यकर्ता विद्दयभट्टः लेखकः पेन्नाचारिः ॥

(साउथ इण्डियन् इन्स्क्रिप्शन्स् १।५३–५७)

---

(५३)

चालुक्यविष्णुवर्धनमहाराजदानपत्रम् ।

सर्वाकारमशेषस्य जगतः सर्वदा शिवम् ।
गोब्राह्मणनृपाणां च शिवं भवतु सर्वदा ॥

स्वस्ति श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतीपुत्राणां कौशिकीवरप्रसादलब्धराज्यानां मातृगणपरिपालितानां स्वामिमहासेनपादा-

नुध्यातानां भगवन्नारायणप्रसादसमासादितवरवराहलाञ्छनेक्षणक्षणवशीकृ-तारातिमण्डलानां अश्वमेधावभृथस्नानपवित्रीकृतवपुषां चलुक्यानां कुलमलं-करिष्णुः सत्याश्रयवल्लभस्य भ्राता **कुब्जविष्णुवर्धनो**ऽष्टादशवर्षाणि । तत्पुत्रो **जयसिंहवल्लभस्त्रय**स्त्रिंशद्वर्षाणि । तद्भ्रातुरिन्द्रराजनन्दनो **विष्णु-वर्धनः** नववर्षाणि । तत्पुत्रो **मङ्गियुवराजः** पञ्चविंशतिसंवत्सरान् । तत्सूनु-**र्जयसिंह**स्त्रयोदश वत्सरान् । तद्वैमातुरानुजः **कोक्किलिः** षण्मासान् । तद-ग्रजो **विष्णुराजः** स्वानुजमुच्चाट्य सप्तत्रिंशत्संवत्सरान् तत्पुत्रो **विजया-दित्यभट्टारकः** अष्टादशाब्दान्। तन्नन्दनो **विष्णुवर्धनः** षट्त्रिंशदब्दान्। तत्पुत्रः

गङ्गरट्टबलैः सार्धं द्वादशाब्दानहर्निशम् ।
भुजार्जितबलं खड्गसहायो नयविक्रमैः ॥
अष्टोत्तरं युद्धशतं युद्ध्वा शंभोर्महालयान् ।
तत्संख्ययाकरोद्वीरो विजयादित्यभूपतिः ॥
कृत्वा राज्यं स वेङ्गीशः स चत्वारिंशतः समान् ।
चतुरुत्तरसंख्यातान्ययौ सख्यं शचीपतेः ॥ ४ ॥
तत्सूनुर्नयविद्वीरः **कल्ल्याविर्विष्णुवर्धनः** ।
वेङ्गीनाथः समस्तानामायुधानां कलौ कृती ॥
　वर्णाश्रमस्थितिनियोजनदक्षरक्षा-
　　शिक्षापरः परपुरंजयसक्तबाहुः ।
　नित्यं त्रिवर्गपरिपालनतन्त्रिमन्त्रि-
　　संवर्धिताखिलधरातललब्धतेजाः ॥
गजवाजियुद्धकुशलः सार्धसंवत्सरं पतिः ।
बभूव राज्ये नयविदभिषिक्तः कुलोन्नतेः ॥
तत्सुतोऽजनि समस्तभूभृतां शासकः सकलसंपदां पतिः ।
धैर्यदानधृतिधर्मनिर्मलश्रीप्रतापधरमूर्तिविश्रुतः ॥
　समरनिरताराातिव्रातानानेकधरेश्वरा-
　　न्प्रकृतिबलसंपन्नस्तेजस्ततिक्रमजोन्नतिः ।

विलसदसिना जित्वा सूर्यं प्रतापयशोमयै-
  र्जगति **विजयादित्यो** नित्यं गुणैश्च जिगाय सः ॥
गङ्गानङ्गजवैरिशक्तिरसमात्रट्टेशसंचोदितो
  जित्वा मङ्गिशिरोहरं युधि महाबाह्वाप्तवीर्यो यमा।
कृष्णं संकिलमङ्कितारिवलबलप्राप्तोरुसद्विक्रमो
  भीतार्तौ च विधाय तत्पुरमरं यो निर्ददाह प्रभुः ॥

स समस्तभुवनाश्रयश्रीविजयादित्यश्चतुश्चत्वारिंशद्वर्षाणि। तदनु सवितर्यस्तं गते तिमिरपटलेनेव रट्टदायादबलेनाभिव्याप्तं वेङ्गीमण्डलम् तदनुजविक्रमादित्यसूनुश्चलुक्यभीमाधिपो द्रोहार्जुनापरनामा स्वविक्रमैकसहायतरवारिप्रभयावभास्याधिपतिरभूत् किं च दीनानाथनग्ननटगायकधर्मध्वजवृत्तीनां पितराविव सखेव गुरुरिवाभिलषितं विस्ती(ती)र्य कल्पतरुप्रतिमश्चेतांसि दानेन संतर्प्य त्रिंशद्वर्षाणि पालयित्वात्मगुणैः पुरंदरमानन्दयन्निव तत्सख्यमगमत्।

तत्पुत्रो **विजयादित्यः** शैशवाल्लब्धसंपदा।
सर्वं भोगाधिराज्याङ्गबलरत्नैरविश्रुतः ॥

जीवत्येव प्रतापात्पितरि भुजबलध्वस्ततद्वैरिवर्गः
  पश्चाज्जित्वारिवर्गं निजमजितमहाशक्तिसंपन्नमन्त्रः।
प्रज्ञाचक्रेण बाह्यां रिपुसमितिमपि स्वार्थभोगैः कृतार्थो
  राज्याशीर्लब्धतेजाः समदल(बल?)मधिपो जेतुमिन्द्रं प्रयातः ॥

तत्सूनुरुदयादित्य **इवाम्भो** राजमहेन्द्रापरनामा रिपुतिमिरमारान्निहत्य प्रकृतिसपत्नपक्षनिक्षिप्तसामन्तकुल्यकुटिलमनोभङ्गकरं करवालमुत्कृष्य शक्तित्रयसंपन्नप्रतापावर्जितपितृपितामहप्रकृतिबलः प्रज्ञया सुरगुरुं तेजसा भानुमन्तं क्षमया क्षमाममरगिरिं विविध(वि)बुधसमाश्रयतयानुकुर्वन् सर्वलोकाश्रयश्रीविष्णुवर्धनमहाराजः स्वराज्याभिषेककृतकल्याणः सिंहासनारूढः कण्डेरुवाडिविषयनिवासिनः सर्वान्कुटुम्बिनः समाहूयेत्थमाज्ञापयति स। अस्मत्कुलकल्याणपरम्परानियोगाधिकृतपट्टवर्धनी वंशाग्रण्या। कल्ल-

कम्प इति विश्रुतेन कुब्जविष्णुवर्धनानुचरेण संग्रामे तदनुज्ञया दुर्धर्षबलं दद्दरनामानं विनिहत्य तच्चिह्नानि येन जगृहिरे। तत्कुलप्रसूतसोमादित्यस्य सूनुरनेकयुद्धलब्धप्रतापः प्रतिवियराजः।

तत्सूनुः सकलारातिमदच्छेदकरायुधः।
सेवको विजयादित्यकलियर्त्यङ्कभूभुजः॥
अभैषुर्भण्डनादित्यं दृष्ट्वा प्रतिमुखाञ्जनम्।
प्राप्तमुज्ज्वलगण्डाङ्कं यं परे यमसंनिभम्॥

यो हि—

शत्रूणां तुमुलेषु वीरपटहं संश्राव्य जित्वा बलं
कुन्तादित्य इति श्रुताङ्कितमहाकीर्तिप्रतापालयः।
मच्चित्तं परितोष्य भृत्यपदवीं लब्ध्वा प्रसादं गतः
स्फीतानेकबलारिभूपविजयश्रीजन्मबाहून्नतिः॥

तस्मै सद्वादशग्रामटिको गोण्टूरुनामग्रामः सर्वकरपरिहारीकृत्यास्माभिर्दत्त इति विदितमस्तु वोऽस्माभिः। अस्यावधयः। पूर्वतः गोङ्कुव। दक्षिणतः गोणयूरु। पश्चिमतः कुलुचेरुवुलु। उत्तरतः मडपल्लि। एतेषां मध्यवर्तिनः क्षेत्रसीमानः। पूर्वतः पोतुरायु। आग्नेयतः पेद्दकोयिलमु। दक्षिणतः कुरुवपोटि। नैर्ऋततः पेरुवातिकुरुव। पश्चिमतः पाल्गुण्ट पड्डुमटिकट्ट। वायव्यतः पोल्कुंगोण्ड मोनदुर्ग भधवति। उत्तरतः मडपल्लिपर्रु। ऐशानतः चामिरे निगुण्ट। अस्योपरि न केनचिद्बाधा कर्तव्या। यः करोति स पञ्चमहापातको भवति। तथा च व्यासेनोक्तम्—

बहुभिर्वसुधा दत्ता बहुभिश्चानुपालिता।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
स्वदत्तां परदत्तां वा यो हरेत्तु वसुंधराम्।
षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः॥

(साउथ इण्डियन् इन्स्क्रिप्शन्स् ३९–४१.)

---

(५४)

श्रीबदरिकाश्रमयात्रान्तर्गतपण्डकेश्वर-मन्दिरोपलब्धदानपत्रम् ।

स्वस्ति श्रीमत्कार्तिकेयपुरात्सकलामरदितितनुजमनुजविभुभक्तिभावभरभारानमितामितोत्तमाङ्गसङ्गिविकटमुकुटकिरीटविटङ्ककोटिकोटिशोलोकतानाना(ताता)यकप्रदीपदीपदीधितिपानमदरक्तचरणकमलामलविपुलबहुलकिरणकेशरासारसारिताशेषविशेषमोषिघनतमतेजसः स्वर्धुनीधौतजटाजूटस्य भगवतो धूर्जटेः प्रसादान्निजभुजोपार्जितौर्जित्यनिर्जितरिपुतिमिरलब्धोदयप्रकाशदयादाक्षिण्यसत्यसत्त्वशीलशौचशौर्यौदार्यगाम्भीर्यमर्यादार्यवृत्ताश्चर्यकार्यवर्यादिगुणगणालंकृतशरीरो महासुकृतिसंतानबीजावतारः कृतयुगागमभूपाललतिकीर्तिर्नन्दाभगवतीचरणकमलकमलासनाथमूर्तिः **श्रीमिम्बरः,** तस्य तनयस्तत्पादानुध्यातो राज्ञीमहादेवी **श्रीनाशूदेवी,** तस्यामुत्पन्नः परममाहेश्वरः परब्रह्मण्यः शितकृपाणधारोत्कृत्तमत्तेभकुम्भाकृष्टमुक्तावलीयशःपताकाच्छायचन्द्रिकापहसिततारागणः परमभट्टारकमहाराजाधिराजपरमेश्वर**श्रीमदिष्टगणदेवः,** तस्य पुत्रस्तत्पादानुध्यातो राज्ञी महादेवी **श्रीवेगदेवी,** तस्यामुत्पन्नः परममाहेश्वरः परमब्रह्मण्यः कलिकलङ्कपङ्कातङ्कमग्नधरण्युद्धारधारितधैरेयवरवराहचरितः सहजमतिविभवविभुविभूतिस्थगितारातिचक्रप्रतापदहनोऽतिवैभवसंहारारम्भसंभृतभीमभ्रुकुटिकुटिलकेसरिसटाभीतभीताराताीभकलभभरोऽरुणारुणकृपाणबाणगुणप्राणगणहठाकृष्टोत्कृष्टसलीलजयलक्ष्मीप्रथमसमालिङ्गनावलोकनवलक्ष्यसखेदसुरसुन्दरीविधूतकरस्खलद्वलयकुसुमप्रकरप्रकीर्णावतंससंवर्धितकीर्तिबीजः पृथुरिव दोर्दण्डसाधितधनुर्मण्डलबलावष्टम्भवशवशीकृतगोपालनानिश्चलीकृतधराधरेन्द्रः परमभट्टारकमहाराजाधिराजपरमेश्वर**श्रीमल्ललितशूरदेवः** कुशली अस्मिन्नेव **श्रीमत्कार्तिकेयपुर**विषये समुपगतान्सर्वानवनियोगस्थान् राजराजत(न्य)कराजपुत्रासृष्टामात्यसामन्तमहासामन्तठक्कुरमहामनुष्यमहाकर्तृकृतिकमहाप्रतीहारमहादण्डनायकमहाराजप्रमातारशरभङ्गकुमारामात्यापरिकदुःसाध्यासाध-

निकदशापराधिकचौरोद्धरणिकशौल्किकशौल्मिकतदायुक्तकविनियुक्तकप-ट्टाकापचारिकाशेषभङ्गाधिकृतहरत्यश्वोष्ट्रबलव्यापृतकभूतप्रेषणिकदण्डिकद-ण्डपाशिकगमागमिकशार्ङ्गिकाभित्वरमाणकराजस्थानीयविषयपतिभोगपति-नरपत्यश्वपति······ण्डरक्षप्रतिशूरिकस्थानाधिकृतवर्त्मपालकोट्टपालघट्टपाल-क्षेत्रपालप्रान्तपालकिशोरवर(ड)वागोमहिष्यधिकृतभट्टमहत्तमाभीरवणिक्श्रे-ष्ठिपुरोगास्त(?)ष्टादशप्रकृत्यधिष्ठानीयान्खषकिरातद्रविडकलिङ्गशौरहूणोड्ड-मेदान्ध्रचाण्डालपर्यन्तान्सर्वसंवसान्समस्तजनपदान्भटाचटसेवकादीनन्यांश्च कीर्तितानकीर्तितानस्मत्पादोपजीविनः प्रतिवासिनश्च ब्राह्मणोत्तरान्यथार्हं मत्तयति बोधयति समाज्ञापयति—अस्तु तेऽस्माद्विदितम्—उपरिनिर्दि-ष्टविषये गोरुन्नसायां प्रतिबद्धखषियाकपरिभुज्यमानपल्लिका, तथा पणि-भूतिकायां प्रतिबद्धगुग्गुलपरिभुज्यमानपल्लिकाद्वयं एते मया मातापित्रो-रात्मनश्च पुण्ययशोभिवृद्धये पवनविघट्टिताश्वत्थपत्रवच्चलतरङ्गजीवलोकम-वलोक्य जलबुद्बुदाकारमसारं वायुर्दृष्ट्वा गजकलभकर्णाग्रचपलतां चालक्ष्य ········त्वापरलोकनिःश्रेयसार्थं संसारोत्तरणार्थं च पुण्येऽहनि उत्तरायण-संक्रान्तौ गन्धपुष्पधूपदीपोपलेपननैवेद्यबलिचरुनृत्यगेयवाद्यसत्त्वादिप्रवर्त-नाय खण्डस्फुटितसंस्करणाय अभिनवकर्मकरणाय च भृत्यपदमूलभरणाय च गोरुन्नसायां महादेवी**श्रीसामदेव्या** स्वयंकारायितभगवते **श्रीनाराय-णभट्टारकाय** शासनदानेन प्रतिपादिताः । प्रकृतिपरिहारयुक्तः प्रचा-टाभटाप्रवेशः अकिंचित्प्रग्राह्याः, अनाच्छेद्य आचन्द्रार्कक्षितिस्थितिसमका-लिको विषयादुद्धृतपिण्डास्थसीमागोचरपर्यन्तस्य वृक्षारामः, ह्(ह्र)दप्रस्त्रव-णोपेतदेवब्राह्मणभुक्तभुज्यमानवर्जिताः । यतः—सुखं पारम्पर्येण परि-भुञ्जतश्चास्योपरिनिर्दिष्टैरन्यतरैर्वा धरणविधारणपरिपन्थिजनादिकोपद्रवो मनागपि कर्तव्यो नोऽन्यथा·······महान्द्रोहः स्यादिति प्रवर्धमानविजयरा-ज्यसंवत्सर एकविंशति[त]मे । सम्वत् २।१ माघवदि ३। महादानाक्षयपट-लाधिकृत**श्रीपोजकः** । लिखितमिदं महासंधिविग्रहाक्षपटलाधिकृतश्रीम-दायटाववनातङ्कोत्कीर्ण**श्रीगङ्गभद्रेण** ।

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ।
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि श्वविष्ठा जायते कृमिः ॥
भूमेर्दाता याति लोके सुराणां हंसैर्युक्तं यानमारुह्य दिव्यम् ।
लौहे कुम्भे तैलपूर्णे सुतप्ते भूमेर्हर्ता पच्यते कालदूतैः ॥
षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
गामेकां च सुवर्णं च भूमेरप्येकमङ्गुलम् ।
हृत्वा नरकमायाति यावदाभूतसंप्लवम् ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
...............भ्रममिदं समुदाहरद्भि-
रन्यैश्च दानमिदमभ्यनुमोदनीयम् ।
लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया
दानं फलं परयशःपरिपालनं च ॥
इति कमलदलबिन्दुलोलमिदमनुचिन्त्य मनुष्यजीवितं च ।
सकलमिदमुदाहृतं च बुद्ध्वा नहि पुरुषैः परकीर्तयो विलोप्याः ॥

नोट्स् ऑन् धि हिस्टरी ऑफ् धि हिमालय—एट्किन्सन्.

---

(५५)

सुप्रसिद्धश्रीवीरबुक्करायसुतहरिहरमहाराजस्य दानपत्रम् ।

श्रीगणाधिपतये नमः ।

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शंभवे ॥

अव्याद्व्याहतैश्वर्यैकारणं वारणाननः ।
वरदस्तीव्रतिमिरमिहिरो हरनन्दनः ॥
श्रीमानादिवराहो यः श्रियं दिशतु भूयसीम् ।
गाढमालिङ्गिता येन मेदिनी यत्र मोदते ॥
अस्ति कौस्तुभकल्पद्रुकामधेनुसहोदरः ।
रमानुजः सुधानाथः क्षीरसागरसंभवः ॥
उदभूदन्वये तस्य यदुर्नाम महीपतिः ।
पालितं यत्कुलीनेन वासुदेवेन भूतलम् ॥
अभूदस्य कुले श्रीमान्भूमौ गुरुगुणोदयः ।
अपास्तदुरितासङ्गः संगमो नाम भूपतिः ॥
आसन्हरिहरः कम्पो बुक्करायमहीपतिः ।
मारपो मुद्गपश्चेति कुमारास्तस्य भूपतेः ॥
पञ्चानां दृप्तगात्राणां प्रख्यातो बुक्कभूपतिः ।
प्रसिद्धविक्रमो मध्यः पाण्डवानामिवार्जुनः ॥
दिक्करीन्द्रधुराधारादक्षिणस्कन्धबन्धुरः ।
बुक्करायस्ततः श्रीमानासीदाहवकर्कशः ॥

यस्योद्यद्युद्धरङ्गे वितरति परितस्ताण्डवं मण्डलाग्रे
वक्रे शुष्कास्तुरुष्का भयभरभरितः कोङ्कणः शङ्कितायुः ।
सान्ध्रा रन्ध्राणि धावन्त्यधमनतनया गुर्जरा जर्जराङ्गाः
काम्बोजाः स्विन्नधैर्याः सपदि समभवन्प्राप्तभङ्गाः कलिङ्गाः ॥

राजाधिराजस्तेजस्वी यो राजपरमेश्वरः ।
भाषातिरिङ्गिभूपालभुजंगमविहंगराट् ॥
राजवेश्याभुजङ्गो यः परराायतपंकरः ।
हिन्दुरायसुरत्राणः शास्त्रेत्यादिभिरन्वितः ॥
श्रीविद्यानगरी विश्वविजयोदयशालिनी ।
राज्ञा विजयिना येन राजधानी कृता स्थिरा ॥

तस्य **गौराम्बिका** नाम महिषी समजायत।
माननीयगुणा मायावल्लभस्य यथा रमा॥
कपर्दिनो यथा गौरी शचीव नमुचिद्विषः।
पितामहस्य सावित्री छायेव द्युमणेरिव॥
विलासविभ्रमोल्लासतिरस्कृततिलोत्तमा।
अनसूयापि सासूया यत्पातिव्रत्यसंपदा॥
अहीनभोगसंपत्तिरसौ राजशिखामणिः।
तस्यां **हरिहरं** गौर्यां कुमारमुदपादयत्॥
शिष्टान्संरक्षिता यश्च दुष्टानामपि शासकः।
लब्धाप्तो विदुषा साकं श्लाघ्यो हरिहरे परः॥
यस्मिन्षोडशदानानि(नां) यशसा परिशोभिते।
दानाम्बुधारया यस्य वर्धते धर्मपादपः॥
ऋषिभूवह्निचन्द्रे(१३१७)तु गणिते धात(तृ)वत्सरे।
माघमासे शुक्लपक्षे पौर्णमास्यां महातिथौ॥
नक्षत्रे पितृदैवत्ये भानुवारेण संयुते।
तुङ्गभद्रानदीतीरे हेमकूटोपशोभिते॥
श्रीविरूपाक्षदेवस्य संनिधौ शुभदायिने।
भारद्वाजसगोत्राय बह्वृचोऽग्रेसराय च॥
वाचस्पते**र्भिलाख्यस्य** सूनवे सूनृतोक्तये।
पटवर्धनिने **विष्णुदीक्षितेन्द्राय** धीमते॥
वसिष्ठगोत्रजायापस्तम्बशाखाग्रयायिने।
रामभट्टसुतानन्तदीक्षिताय विपश्चिते॥
प्रसिद्धपाण्डवाक्रान्तरुचङ्गिस्थलवासिने।
भिलिचन्द्राभिधासीमामध्ये ख्यातं महोदयम्॥
पूर्वभागे स्थितं ग्रामाद्रिसीकेरसंज्ञकात्।
गडिकेहल्याभिधाद्ग्रामाद्दक्षिणां दिशमाश्रितम्॥

ग्रामात्पल्लवकटाख्यात्प्रतीच्याभिमुखाश्रितम् ।
ग्रामाच्च भूदिहल्याख्यादुत्तरस्यां दिशि श्रितम् ॥
प्रतिनाम्ना समाख्यातं पुरं हरिहराभिधम् ।
मादेनहल्लीतिग्रामं सर्वसस्यसमन्वितम् ॥
सर्वमान्यं चतुःसीमासंयुतं च समन्ततः ।
निधिनिःक्षेपपाषाणसिद्धसाध्यसमन्वितम् ॥
अक्षिण्यागामिसंयुक्तं द्विभोग्यं रम्यभूरुहम् ।
वापीकूपतडागैश्च कच्छेनापि समन्वितम् ॥
पुत्रपौत्रादिभिर्भोग्यं क्रमादाचन्द्रतारकम् ।
सर्वस्याधमनस्यापि विक्रयस्यापि चोचितम् ॥
परीतं प्रयतैः स्निग्धैः पुरोहितपुरोगमैः ।
विविधैर्विबुधैः श्रीतोपयिकैरपिकैर्गिरा ॥
वीरो हरिहरश्चाभून्माननीयो मनस्विनाम् ।
भूदानपात्रभूतात्मा भूसुरात्मा विशेषतः ॥
सहिरण्यपयोधारापूर्वकं दत्तवान्मुदा ।
.... ॥

इदमखिलराजशासनमधुकरकाकारगीतमहात्मनः ।
राज्ञो हरिहरनृपतेः शासनमचलैकपारिजातस्य ॥

तस्य तच्छासनेनेव शासनं तु विनिर्मितम् ।
शासनाचार्यधर्मेण वाणिदेवेन शिक्षितम् ॥

अस्मिन्ग्रामेऽष्टदिक्षु सीमा देशभाषया लिखिता ॥

दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम् ।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥
स्वदत्ताद्द्विगुणं पुण्यं परदत्तानुपालनम् ।
परदत्तापहारेण स्वदत्तं निष्फलं भवेत् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥

एकैव भगिनी लोके सर्वेषामेव भूभुजाम् ।
न भोज्या न करग्राह्या विप्रदत्ता वसुंधरा ॥
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः ॥

लाइफ् एण्ड एसेज् आफ् एच्. टी. कोलब्रूक.
वाल्यूम २ पेज २३२ ।

---

(५६)

श्रीलक्ष्मीवर्मदेवानां शासनपत्रम् ।

(उज्जयनीप्रान्त उपलब्धम् ।)

जयति व्योमकेशोऽसौ यः सर्गाय बिभर्ति ताम् ।
ऐन्दवीं शिरसा लेखां जगद्बीजाङ्कुराकृतिम् ॥
तन्वन्तु वः स्मरारातेः कल्याणमनिशं जटाः ।
कल्पान्तसमयोद्दामतडिद्वलयपिङ्गलाः ॥

परमभट्टारकमहाराजाधिराजपरमेश्वरश्री**उदयादित्यदेव**पादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्री**नरवर्मदेव**पादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्री**यशोवर्मदेव**पादानुध्यातसमस्तप्रशस्तोपेतसमधिगतपञ्चमहाशब्दालंकारविराजमानमहाकुमारश्री**लक्ष्मीवर्मदेवः** श्रीमहाद्वादशकमण्डले श्रीराजशासनभोगे सुरासणीसंबद्धवडनुदग्रामतथासुवर्णप्रासादिकासंबद्धउथवणकग्रामयोः समभूतिषयिक(समस्तविषयिक)पट्टकिलजनपदादीन्ब्राह्मणोत्तरान्बोधयति—अस्तु वः संविदितम्—यथा श्रीमद्धारायां महाराजाधिराजपरमेश्वरश्री**यशोवर्मदेवेन** श्रीविक्रमकालातीतसंवत्सरैकनवत्यधिकशतैकादशेषु कार्तिकशुदि अष्टम्यां संजातमहाराजश्री**नरवर्मदेव**सांवत्सरिके तीर्थाम्भोभिः स्नात्वा देवऋषिमनुष्यपितॄंस्तर्पयित्वा भगवन्तं भवानीपतिं समभ्यर्च्य शमीकुशतिलान्नाद्याहुतिभिर्हिरण्यरेतसं हुत्वा भानवे

अर्घ्यं विधाय कपिलां त्रिः प्रदक्षिणीकृत्य संसारस्यासारतां दृष्ट्वा नलिनीदलगतजलवत्तरलतरं जीवितं धनं चावेक्ष्य, उक्तं च—

'वाताभ्रविभ्रममिदं वसुधाधिपत्य-
　मापातमात्रमधुरो विषयोपभोगः ।
प्राणास्तृणाग्रजलबिन्दुसमा नराणां
　धर्मः सखा परमहो परलोकयाने ॥'

एवमाकलय्य अद्रेलवद्धावरिस्थानविनिर्गतभरद्वाजगोत्राय भरद्वाजाङ्गिरसबार्हस्पत्यत्रिप्रवरायाश्वलायनशाखिने दक्षिणायातकर्णाटब्राह्मणद्विवेदठक्कुरश्रीमहिरस्वामिपौत्रश्रीविश्वरूपसुत आवसथिकश्रीधनपालाय उपरिलिखितवडउदग्रामउथवणकग्रामौ सवृक्षमालाकुलौ निधिनिक्षेपसहितौ वापीकूपतडागान्वितौ चतुष्कण्टकविशुद्धौ चन्द्रार्कयावदुदकपूर्वकतया शासनेन प्रदत्तौ । संवत्सरशतद्वादशकेषु श्रावणशुदि पञ्चदश्यां सोमग्रहणपर्वणि श्रीमत्पितृश्रेयोर्थं पुनरेवास्माभिरेतौ ग्रामौ उदकपूर्वकतया शासनेन प्रदत्तौ । तदनयोर्ग्रामयोर्निवासिसमस्तपट्टकिलादिलोकैस्तथा कर्षकैश्च यथोत्पद्यमानकरहिरण्यभागभोगादिकमाज्ञाश्रवणविधेयैर्भूत्वा सर्वममुष्मै समुपनेतव्यम् । सामान्यं वै तत्पुण्यफलं बुद्ध्वास्मद्वंशजैरन्यैरपि भाविभूपतिभिर्धर्मादायोऽयं मन्तव्यश्चेति । यतः—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिवर्षसहस्राणि विष्टायां जायते कृमिः ॥

सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ।
सामान्योऽयं धर्मसे.. ।

(अग्रे सर्वं त्रुटितम्)

रॉयल् एशियाटिक् सोसायटी वा. १ पे. ३८२ ।

(५७)

श्रीमदमोघवर्षदेवापराभिधानश्रीमद्वाक्पतिराज-देवानां शासनपत्रम् ।

ॐम्

य: स्फूर्जत्फणभृद्विषानलमिलद्धूम्रप्रभाः प्रोल्लस-
न्मूर्धाबद्धशशाङ्ककोटिघटिता याः सैंहिकेयोपमाः ।
याश्चञ्चद्गिरिजाकपोललुलिताः कस्तूरिकाविभ्रमा-
स्ताः श्रीकण्ठकठोरकण्ठरुचयः श्रेयांसि पुष्णन्तु वः ॥
यल्लक्ष्मीवदनेन्दुना न सुखितं यन्नार्दितं वारिधे-
र्वारा यन्न निजेन नाभिसरसीपद्मेन शान्तिं गतम् ।
यच्छेषाहिफणासहस्रमधुरः श्वासैर्न चाश्वासितं
तद्राधाविरहातुरं मुररिपोर्वेल्लद्वपुः पातु वः ॥

परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीकृष्णराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीवैरिसिंहदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीसीयकदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमदमोघवर्षदेवापराभिधानश्रीमद्वाक्पतिराजदेवपृथ्वीवल्लभश्रीवल्लभनरेन्द्रदेवः कुशली तिणिसपदद्वादशकसंबद्धमहासाधनिकश्रीमहाइकभुक्तसेम्बलपुरग्रामे समुपगतान्समस्तराजपुरुषान्ब्राह्मणोत्तरान्प्रतिवासिपट्टकिलजनपदादींश्च बोधयति—अस्तु वः संविदितम्—यथा ग्रामोऽयमस्माभिः षट्तृं(त्रिं)शसहस्रिकसंवत्सरेऽस्मिन्कार्तिकशुद्धपौर्णमास्यां सोमग्रहणपर्वणि श्रीभगवत्पुरावासितैरस्माभिर्महासाधनिकश्रीमहाइकपत्नीआसिनीप्रार्थनयोपरिलिखितग्रामः स्वसीमा तृणयूतिगोचरपर्यन्तः सहिरण्याभोगभागः सोपरिकरः सर्वादायसमेतः श्रीमदुज्जयिन्यां भट्टारिकाश्रीमद्भट्टेश्वरीदेव्यै स्नानविलेपनपुष्पगन्धधूपनैवेद्यप्रेक्षणिकादिनिमित्तं च, तथा खण्डस्फुटितदेवगृहजगतीसमारचनार्थं च मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धयेऽदृष्टफलमङ्गीकृत्या-चन्द्रार्कार्णवक्षितिसमकालं परया भक्त्या शासनेनोदकपूर्वकं प्रतिपादित

इति मत्वा तन्निवासिपट्टकिलजनपदैर्यथादीयमानभागभोगः करहिरण्यादिकं सर्वमाज्ञाश्रवणविधेयैर्भूत्वा सर्वथा सर्वमस्याः समुपनेतव्यम् । सामान्यं चैतत्पुण्यफलं बुद्ध्वास्मद्वंशजैरन्यैरपि भाविभोक्तृभिरस्मत्प्रदत्तधर्मदायोऽयमनुमन्तव्यः पालनीयश्च । उक्तं च—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥

अस्मत्कुलक्रममुदारमुदाहरद्भिरन्यैश्च दानमिदमभ्यनुमोदनीयम् ।
लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया दानं फलं परयशःप्रतिपालनं च ॥
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ।
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥
इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
सकलमिदमुदाहृतं च बुद्ध्वा नहि पुरुषैः परकीर्तयो विलोप्याः ॥

इति ॥ संवत् १०३६ चैत्र वदि ९ । गुणपुराविसितै(वासिते) श्रीमन्महाविजयस्कन्धावारे स्वयमाज्ञादायकश्चात्र श्रीरुद्रादित्यः । स्वहस्तोऽयं श्रीवाक्पतिराजदेवस्य ॥

(इण्डियन् आण्टिक्वरी १४।१६०)

---

(९८)

श्रीशिवसिंहदेवनृपतीनां शासनपत्रम् ।

श्रीगजरथपुरात्समस्तप्रक्रियाविराजमानश्रीमद्रामेश्वरीवरलब्धप्रसादभवानीभक्तिभावनापरायणरूपनरायणमहाराजाधिराजश्रीमच्छिवसिंहदेवपादाः समरविजयिनो जरैलतप्पायां विसपीग्रामवास्तव्यसकललोकान्भूकर्षकांश्च समादिशन्ति । ज्ञातमस्तु भवताम्—ग्रामोऽयमस्माभिः सप्रक्रियाभिनवजयदेवमहापण्डितठक्कुरश्रीविद्यापतिभ्यः शासनीकृत्य प्रदत्तः । ग्रामकस्था यूय-

मेतेषां वचनकरी(रा) भूकर्षणादिकर्म करिष्यथेति ॥ ल सं २८३ श्रावण-सुदि ७ गुरौ।

श्लोकास्तु—

अब्दे लक्ष्मणसेनभूपतिमते वह्निग्रहद्व्यङ्किते
मासे श्रावणसंज्ञके मुनितिथौ पक्षेऽवलक्षे गुरौ।
वाग्वत्याः सरितस्तटे गजरथेत्याख्याप्रसिद्धे पुरे
दित्सोत्साहविवृद्धि(द्ध)बाहुपुलकः सभ्याय मध्ये शुभम् ॥
प्रज्ञावान्प्रचुरोर्वरं पृथुतराभोगं नदीमातृकं
सारण्यं ससरोवरं च विसपीनामानमासीमतः।
श्रीविद्यापतिशर्मणे सुकवये पुत्रादिभिर्भुञ्जतां(ते)
स श्रीमाञ्शिवसिंहदेवनृपतिर्ग्रामं ददे शासनम् ॥
येन साहसमयेन सत्रिणा तुङ्गवाहवरपृष्ठवर्तिना।
अश्वपत्तिबलयोर्बलं जितं गज्जनाधिपतिगौडभूभुजाम् ॥
रौप्यकुम्भ इव कज्जलरेखा श्वेतपद्म इव शैवलवल्ली।
यस्य कीर्तिनवकेतककान्त्या म्लानिमेति विजितो हरिणाङ्कः ॥
द्विषन्नृपतिवाहिनीरुधिरवाहिनीकोटिभिः
प्रतापतरुवृद्धये समरमेदिनी प्लाविता।
समस्तहरिदङ्गनाचिकुरपाशवासक्षमं
सितप्रसरपाण्डुरं जगति येन लब्धं यशः ॥
मतङ्गजरथप्रदः कनकदानकल्पद्रुम-
स्तुलापुरुषमद्भुतं निजधनैः पिता दापितः।
सुखानि च महात्मना जगति येन भूमीभुजा
परापरपयोनिधिः प्रथममैत्रपात्रं सदा ॥
नरपतिकुलमान्यः कर्णशिक्षावदान्यः
परिचितपरमार्थो दानतुष्टार्थिसार्थः।
निजचरितपवित्रो देवसिंहस्य पुत्रः
स जयति शिवसिंहो वैरिनागेन्द्रसिंहः ॥

ग्रामे गृह्णन्त्यमुष्मिन्किमपि नृपतयो हिन्दवोऽन्ये तुरुष्का
गोकोलं स्वात्ममांसैः सहितमनुदिनं भुञ्जते ते स्वधर्मम् ।
ये चैनं ग्रामरत्नं नृपकररहितं पालयन्ति प्रतापै-
स्तेषां सत्कीर्तिगाथा दिशि दिशि सुचिरं गीयतां बन्दिवृन्दैः ॥
सन् ८०७ संवत् १४५५ शाके १३२१ । शुभमस्तु ।

(इण्डियन् आण्टिकेरी १४ ।)

---

(५९)

यादववंशभूषणरामभूपतिदानपत्रम् ।

ॐ नमो वराहाय ॥

जयत्याविष्कृतं विष्णोर्वाराहं क्षोभितार्णवम् ।
दक्षिणोन्नतदंष्ट्राग्रविश्रान्तभुवनं वपुः ॥
विष्णोर्नाभीकमलकुहरादाविरासीद्विरिञ्चि-
र्न्यञ्चन्मौलिस्खलितकुसुमं वन्दितो देवदैत्यैः ।
तस्मादत्रिः समजनि जगज्जातनेत्रप्रकाश-
श्चन्द्रस्तस्मादभवदमृतोद्गारशृङ्गारिताशः ॥
वंशे तस्य पुरूरवाः समभवद्यच्चापमापद्गतो
देवानामधिपः स्मरत्यविरतं व्यालुप्तवज्रग्रहः ।
आब्रह्माण्डमखण्डताण्डवरथप्रस्थानलीलां वह-
न्यश्चैको बुभुजे भुजेन विजितामुर्वीं तथैवोर्वशीम् ॥
तस्मिन्नेव ययातिराविरभवद्भूमण्डलाखण्डलः
सर्वः स्वर्वनितानितान्तसुभगप्रोद्गीतदोर्विक्रमः ।
यस्याद्यापि मखाहिताहुतिशतप्रोद्दानधूमोत्करै-
राकीर्णं परितः स्फुरत्यविरतं तापिच्छनीलं नभः ॥
तस्मादजायत यदुर्यदुपग्रहेण
वंशस्ततः परमगाज्जगतीप्रतिष्ठाम् ।

तस्मिन्नथायमभवत्प्रभवः प्रजानां
लीलामयं वपुरमन्दबलं दधानः ॥
यदोस्तस्मिन्वंशे समजनि स निर्वापितरिपु-
प्रतापस्तापच्छिन्निखिलजगतो राजनृपतिः ।
यदीयप्रोदञ्चच्चरणनखरत्नांशुजलधौ
निमज्जन्तश्चित्रं जगदुपरि वृत्तिप्रणयिनः ॥
खेलत्खड्गावतंसो रणशिरसि वशीकृत्य कर्णाटराजं
यः पाण्ड्यं दण्डयित्वा न्यधित जलनिधेः स्तम्भमभ्यर्णभूमौ ।
यद्बाणव्रातपातैर्न समरमभजज्जर्जरो गुर्जरेन्द्रः
स श्रीमानाविरासीत्तुहिनकरकुले **सिङ्घणः** साहसाङ्कः ॥
तस्मादभूत्प्रभुरशेषमहीपतीनां
श्रीमज्जुगिर्विजयकार्मणकार्मुकश्रीः ।
यस्य प्रतापतरणौ तरणे तरूणां
छायेव दैर्घ्यमजहादरिभूभृतां श्रीः ॥
यस्मिन्भ्रूभङ्गभीमे चलति वसुमतीमण्डलं चण्डभानो-
र्बिम्बं शैलेन्द्रसंधैस्त्रिभिरभित इमे संभ्रियन्ते स सर्वे ।
वल्गद्भिर्वाजिवृन्दैस्तुरगखुरहतैः पांसुभिर्भीतिभित्तैः
क्षोणीन्द्रः स प्रवीरस्तदनु समभवद्**भिल्लमः** सार्वभौमः ॥
यः संख्ये त्रिकलिङ्गराजमवधद्विद्वेषिसीमन्तिनी-
नेत्राम्भःप्रसरत्प्रगल्भलहरीनिर्वाणवैरानलः ।
यश्चैतस्य समस्तराज्यमहरन्मत्तेभकुम्भस्थली-
कूजत्षट्पदगीतवैभवभरं जातस्ततो **जैतुगिः** ॥
कारागारात्समानीय करुणावरुणालयः ।
प्रियंवदास्यमकरोत्क्षितेर्**गणपतिं** पतिम् ॥
हम्मीरतिमिरतरणिः सरणिर्धर्मस्य संक्रमः कीर्तेः ।
तस्मादयमजनि श्री**सिङ्घण**देवभूपालः ॥

बल्लालो विजितः पराभवभुवं संभावितोऽन्ध्राधिपः
कक्कल्लो दलितः क्षणेन गलितो भम्भागिरेरीश्वरः ।
दुर्गाग्रे विनिबाध्य भोजनृपतिं न्यस्तोऽर्जुनो निर्जित-
स्तेनेति प्रति[प]द्य के भुवि भयं भेजुर्न भूमीभुजः ॥
कृष्यन्ते यदुराजरत्न भवता वक्षांसि विद्वेषिणा-
मुप्यन्ते समरस्थलीषु करिणां मुक्तावलिश्रेणयः ।
वर्षन्ति स्तनमण्डलेषु तरुणीनेत्राणि बाष्पोत्करै-
रुद्भेदो भुवनत्रयेऽपि यशसामाश्चर्यमुज्जृम्भते ॥
तस्मादजायत जगत्त्रयगीयमान-
प्रौढप्रतापतपनोदयदुर्निवारः ।
श्रीजैतुगिर्वसुमतीवलयाधिनाथै-
श्चूडामणिप्रकरसंकरचुम्बिताङ्घ्रिः ॥
तस्मात्कृष्ण इति प्रसिद्धचरितः श्रीरायनारायणो
जातः कार्तिकचन्द्रकान्तिजयिनां कीर्तिं चिरं नर्तयन् ।
गर्जद्दुर्जरवीरशोणितसरित्सङ्गत्वरे श्रीपतिः
पाथोधौ सघृणो यदीयहृदये निर्दूषणे निद्रितः ॥
आदाय द्विषतां करङ्कनिवहान्कृत्वा हलादीनि तैः
कृष्टे कृष्णमहीभृता कृषिमता क्षेत्रे महीमण्डले ।
येनारातिवधूविलोचनगलत्सान्द्राञ्जनैरस्तुभिः
क्लिन्ने शौर्यसुबीजमुप्तमभितः प्राप्ता यशोराशयः ॥
सत्त्वं यद्धनवाहने रविसुते वैरोचनं श्रीशिबौ
दानं यच्च दधीचिनाम्नि सकलं संगृह्य सृष्टोऽद्भुतः ।
नूनं कृष्णघटोद्भवोऽखिलकृता दारिद्र्यपाथोनिधिः
पीतस्त्यागकरप्रवृद्धचुलुकेनोद्धृत्य येनार्थिनाम् ॥
तस्यानुजो निजभुजार्पितभूमिभारः
स्वच्छन्दचारमुदितोरगसार्वभौमः ।

योो वीसलं समरकौतुकिनां सुराणा-
मग्रे समूलविभवं दलयांचकार ॥
तस्मादभूदामनभूमिपालः समस्तमाहेश्वरमौलिरत्नम्।
अलिख्यतोच्चैः खुरलेखनीभिर्यद्वाजिभिर्दिक्षु जयप्रशस्तिः ॥
प्रसह्य तस्मादपहृत्य भुङ्क्ते कृष्णानुजः स्वामवनिं स **रामः**।
यस्यासिरुज्जृम्भितकैरवाभिर्दिशो यशोभिः सुरभीकरोति ॥
महामाहेश्वरः श्रीमान्**रामः** क्षोणीभृतां गुरुः।
यशःक्षीरेण यः शंभोर्मूर्तीरष्टाभिषिञ्चति ॥
यत्पुण्यगिरिगर्भोत्थयशोमारुतमण्डली।
ब्रह्माण्डपरमाणूनामभवद्बहुलं रजः ॥
प्राप्तः श्रीरामभूपोऽपसरत रिपवः संगरादाशु हित्वा
राज्यं सप्ताङ्गमेतत्पिबत भुवि जलं शीतलं क्वापि याताः।
नो चेदस्यासिधाराविदलितवपुषस्तत्क्षणादेव दिव्यं
देहं प्राप्यामरस्त्रीजननयननवप्रेमसंपत्सुधां वा ॥
आसन्सन्ति च वंशजाः कति कति प्राज्ञा भविष्यन्ति च
स्फीताः शस्त्रभृतः कलासु कुशला धूर्ता विटाः कर्मठाः।
वर्ण्योऽयं पुनरेव **रामनृपतिः** प्रत्यर्थिनामर्थिनां
यो न क्वापि पराङ्मुखः क्षितितलालंकारचूडामणिः ॥
वाक्प्रपञ्चप्रवहणे रिक्तं यद्गुणसंगरम्।
अपारयन्त नापारं तरीतुं कविनाविकाः ॥

स खल्वेवंविधगुणगणालंकृततनुरनारतद्रविणवितरणकृतार्थीकृतार्थिसार्थः सकलपरिपन्थिपार्थिवान्विनिर्जित्य निजकुलकर्मागतसांराज्यपदमुद्धृत्य दधानो रायनारायणो रामनृपतिः सेउनदेशालंकारभूतं गोदावर्युत्तरकूलस्थितं वादाथनग्रामं पाटारपिम्पलग्रामवैद्यघोघरग्रामवैद्यद्वयसहितमग्रहारीकृत्य निधिनिक्षेपजलपाषाणशुल्कमौलिकश्रोणदानदण्डकारुकादिसमस्तादायसहितं राजराजपुरुषैरप्यनङ्गुलिनिर्देश्यं प्रविष्टग्रामद्वयसहितं चतुराघाटविशुद्धं भक्तिश्रद्धातिशयहिरण्याक्षतोदकसहितं शाके च एकादशसु त्रिनवत्यधिके-

ष्वतीतेषु ११९३ वर्तमानप्रजापतिसंवत्सरान्तर्गते माघशुद्धद्वादश्यां बुधे आत्मनः श्रीशार्ङ्गपाणिप्रीत्यर्थं नानागोत्रेभ्यः सप्तपञ्चाशत्संख्यकेभ्यो ब्राह्मणेभ्यः प्रादात् ॥ ते च ब्राह्मणा नामतो लिख्यन्ते । तत्र बह्वृचाः—वाशिष्ठगोत्रगोविन्दसुतविष्णु—मुद्गलगोत्रपद्मनाभसुतजानू—वाशिष्ठगोत्रदामोदरसुतरवलदेव—विष्णुवृद्धगोत्रदामोदरसुतविष्णु—भारद्वाजगोत्ररवलदेवसुतजानू—कौण्डिन्यगोत्रधरणूसुतप्रभाकर—विश्वामित्रगोत्रगोविन्दसुतमाइआ—गर्गगोत्रनागदेवसुतवामन—हरितगोत्रआपदेवसुतश्रीधर—गार्ग्यगोत्रराघवसुतकेशव—कौण्डिन्यगोत्रगौतमसुतमहादेव—जामदग्न्यवत्सगोत्रमाम्यदेवसुतनरसिंह—हरितगोत्रअनन्तसुतसारङ्ग—भारद्वाजगोत्रविनायकसुतआईदेव—भारद्वाजगोत्रवामदेवसुतकृष्ण—कौण्डिन्यगोत्रईश्वरसुतकृष्ण—कौण्डिन्यगोत्रकृष्णसुतपुरुषो—कौण्डिन्यगोत्रकृष्णसुतराम—भरद्वाजगोत्रमल्लिनाथसुतभानु—हरितगोत्रहरिदेवसुतलक्ष्मीधर—वाशिष्ठगोत्रगोविन्दसुतनागदेव—वाशिष्ठगोत्रगोविन्दसुतकेशव—विश्वामित्रगोत्रश्रीपतिसुतएल्हुगि—कौण्डिन्यगोत्रनागदेवसुतईश्वर—गौतमगोत्रधनेश्वरसुतवामन—भरद्वाजगोत्रगदाधरसुतब्रह्मदेव—गौतमगोत्रदामोदरसुतधनेश्वर—मुद्गलगोत्रमाधवसुतगोविन्द—भरद्वाजगोत्रनारायणसुतगङ्गाधर—भरद्वाजगोत्रगङ्गाधरसुतजगन्नाथ ॥ अथ तैत्तिरीयाः—कौण्डिन्यगोत्रसोमनाथसुतपद्मनामभट्ट—कौण्डिन्यगोत्रपद्मनाभसुतनरसिंह—कौण्डिन्यगोत्रपद्मनाभसुतसोमनाथ—कौण्डिन्यगोत्रपद्मनाभसुतसारङ्ग—कौण्डिन्यगोत्रपद्मनाभसुतगणेश्वर—कौण्डिन्यगोत्रपद्मनाभसुतहरिहर—कौण्डिन्यगोत्रपद्मनाभसुतत्रिविक्रम—काश्यपगोत्रमहादेवसुतकूचिष्ठ(?)—गार्ग्यगोत्रदेवन्नसुतदिवाकर—कौशिकगोत्रमल्लिदेवसुतविष्णु—वाध्र्यश्वगोत्रनामदेवसुतविष्णु—आत्रेयगोत्ररामसुतसारङ्ग—काश्यपगोत्रकामदेवसुतसोमनाथ—गौतमगोत्रविष्णुसुतचौवेरि—गार्ग्यगोत्रनारायणसुतविष्णु—कौण्डिन्यगोत्रसारङ्गभट्टसुतऋषिदेव—देवरातगोत्रतीलूआपसुतत्राईदेव—कौण्डिन्यगोत्रनागदेवसुतआदित्य—कौण्डिन्यगोत्रनरसिंहसुतविष्णु—देवरातगोत्रनारायणसुतबापदेव—देवरातगोत्रबापदेवसुतराम—देवरातगोत्रनारायणसुतविष्णु—भरद्वाजगोत्रजनार्दनसुतकृष्ण—देवरातगोत्रनारायणसुतअनन्त ॥ अथ बह्वृचो

भरद्वाजगोत्रविष्णुसुतरामपण्डित–भरद्वाजगोत्ररामपण्डितसुतमैंदेवपण्डित ॥ एवमङ्कतः ९७ ॥ अथाघाटाः—पूर्वतः–वाहगाँव । आग्नेये–नेउरगाँव । दक्षिणे–देइगाँव, तथा गङ्गा । पश्चिमे–गङ्गा, तथा खाटिगाँव, तथा आलुएँगाँव, तथा नागमथनम् । वायवे–जाँटेगाँव । उत्तरे–पानिव । ईशाने–वेद्खल । एवं सर्वाघाटविशुद्धाः सप्रविष्टखेटकसहितास्त्रयो ग्रामाः ॥ अत्र चैवं समयः । राजसेवकानां वसतिदण्डप्रयाणदण्डौ नस्तः ॥

आचन्द्रार्कमिदं भोज्यमेभिरेषां च वंशजैः ।
वसद्भिरेव भोक्तव्यं न चादेयं कदाचन ॥

पण्याङ्गनानां सदनं न देयं द्यूतप्रचारोऽपि निवारणीयः ।
शस्त्रादिकं चापि न धारणीयं सत्कर्मनिष्ठैर्भवितव्यमेभिः ॥

अस्य धर्मस्य संरक्षणे फलमिति स्माहुः प्राञ्चो महर्षयः—

गण्यन्ते पांसवो भूमेर्गण्यन्ते वृष्टिबिन्दवः ।
न गण्यते विधात्रापि धर्मसंरक्षणे फलम् ॥
बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

अत एवाह रामभद्रः—

सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ॥

मद्वंशजाः परमहीपतिवंशजा वा
पापादपेतमनसो भुवि भाविभूपाः ।
ये पालयन्ति मम धर्ममिमं समग्रं
तेभ्यो मया विरचितोऽञ्जलिरेष मूर्ध्नि ॥

नास्ति भूमिसमं दानं नास्ति राज्ञः समो गुरुः ।
नास्ति सत्यसमो धर्मो नास्ति दानसमो निधिः ॥
अग्निष्टोमप्रभृतिभिरिष्ट्वा यज्ञैः सदक्षिणैः ।
न तत्फलमवाप्नोति भूमिदानाद्यदश्नुते ॥

अपहरतः समर्थस्याप्युपेक्षकस्येव विपरीतफलमाहुः—

गामेकां रत्निकामेकां भूमेरप्येकमङ्गुलम्।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम्॥
दाता दशानुगृह्णाति दशाहन्ति तथाक्षिपन्।
पूर्वदत्तां हरन्भूमिं नरकायोपगच्छति॥
न ददाति प्रतिश्रुत्य दत्तां वा हरते तु यः।
तौ च द्वौ वारुणैः पाशैस्तप्येते मृत्युशासनात्॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरशायिनः।
कृष्णसर्पाः प्रजायन्ते ब्रह्मभूम्यपहारकाः॥
पतन्त्यश्रूणि रुदतां दीनानामवसीदताम्।
ब्राह्मणानां ह(हृ)ते क्षेत्रे हन्ति त्रैपुरुषं कुलम्॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
षष्टिर्वर्षसहस्राणि विष्ठायां जायते कृमिः॥

॥ ७ ॥ लिखितं पण्डितधनेश्वरेण ॥ ७ ॥
मङ्गलं महाश्रीः॥ ॐ शिवमस्तु॥ ७॥

(इण्डियन् आण्टिक्केरी १४।३१५-३१९)

---

(६०)

राज्ञः श्रीशिवसिंहदेवस्य दानपत्रम्।

श्रीगजरथपुरात्समस्तप्रक्रियाविराजमान–श्रीमद्रामेश्वरीवरलब्धप्रसाद–भवानीभक्तिभावनापरायण–रूपन(ना)रायण–महाराजाधिराज–श्रीमच्छिवसिंहदेवपादाः समरविजयिनो जरैलतप्पायां बिसपीग्रामवास्तव्यसकललोकान्भूकर्षकांश्च समादिशन्ति। ज्ञातमस्तु भवताम्। ग्रामोऽयमस्माभिः सप्रक्रियाभिनवजयदेव[1]–महापण्डित–ठक्कुर[2]–श्रीविद्यापतिभ्यः शासनीकृत्य प्र-

१. जयदेवो गीतगोविन्दकृत्. २. मैथिलप्रसिद्धमुपनाम.

दत्तः। ग्रामकस्था यूयमेतेषां वचनकरी भूकर्षकादिकर्म करिष्यथेति ॥ लँ[1] सं २८३ श्रावणसुदि ७ गुरौ ॥

श्लोकास्तु—

अब्दे लक्ष्मणसेनभूपतिमते वह्निग्रहद्व्यङ्किते
मासे श्रावणसंज्ञके मुनितिथौ पक्षेऽवलक्षे गुरौ।
वाग्वत्याः सरितस्तटे गजरथेत्याख्याप्रसिद्धे पुरे
दित्सोत्साहविवृद्धिबाहुपुलकः सभ्याय मध्ये शुभम्॥
प्रज्ञावान्प्रचरोर्वरं पृथुतराभोगं नदीमातृकं
सारण्यं ससरोवरं च बिसपीनामानमासीमतः।
श्रीविद्यापतिशर्मणे सुकवये पुत्रादिभिर्भुञ्जतां
स श्रीमाञ्शिवसिंहदेवनृपतिर्ग्रामं ददे शासनम्॥
येन साहसमयेन सत्रिणा तुङ्गवाहवरपृष्ठवर्तिना।
अश्वपत्तिबलयोर्बलं निजं गज्जनाधिपतिगौडभूभुजाम्॥
रौप्यकुम्भ इव कज्जलरेखा श्वेतपद्म इव शैवलवल्ली।
यस्य कीर्तिनवकेतककान्त्या म्लानिमेति विजितो हरिणाङ्कः॥
द्विषन्नृपतिवाहिनीरुधिरवाहिनीकोटिभिः
प्रतापतरुवृद्धये समरमेदिनी प्लाविता।
समस्तहरिदङ्गनाचिकुरपाशवासक्षमं
सितप्रसरपाण्डुरं जगति येन लब्धं यशः॥
मतङ्गजरथप्रदः कनकदानकल्पद्रुम-
स्तुलापुरुषमद्भुतं निजधनैः पिता दापितः।
सुखानि च महात्मना जगति येन भूमीभुजा
परापरपयोनिधिः प्रथममैत्रपात्रं सदा॥

---

१. लक्ष्मणसेनसंवत्. २. अयमेव लक्ष्मणसेनभूपतिः 'सकलकलाः कल्पयितुं प्रभुः प्रबन्धस्य कुमुदबन्धोश्च। सेनकुलतिलकभूपतिरेको राकाप्रदोषश्च ॥ ३९ ॥' इत्यार्यया गोवर्धनाचार्यैर्वर्णितः. अनेन ख्रिस्ताब्दस्यैकादशशतकसमाप्तिपर्यन्तं वङ्गदेशोऽपायीति केचिदैतिहासिकाः. एतल्लेखख्रिस्ताब्दसंख्या तु गजाङ्काग्नीन्दु(१३९८)मिता भवति.

नरपतिकुलमान्यः कर्णशिक्षावदान्यः
परिचितपरमार्थो दानतुष्टार्थिसार्थः।
निजचरितपवित्रो देवसिंहस्य पुत्रः
स जयति शिवसिंहो वैरिनागेन्द्रसिंहः॥
ग्रामे गृह्णन्त्यमुष्मिन्किमपि नृपतयो हिन्दवोऽन्ये तुरुक्का
गोकोलं[1] स्वात्ममांसैः सहितमनुदिनं भुञ्जते ते स्वधर्मम्।
ये चैनं ग्रामरत्नं नृपकररहितं पालयन्ति प्रतापै-
स्तेषां सत्कीर्तिगाथा दिशि दिशि सुचिरं गीयतां बन्दिवृन्दैः॥
सन ८०७ संवत[2](त्) १४५५ शाके १३२१ शुभमस्तु।

(इण्डियन् आण्टिक्केरी १४।१९०–१९१)

---

(६१)

वलभीप्रभोः प्रथमशिलादित्यस्य दानपत्रम्।

ओं स्वस्ति वलभीतः प्रसभप्रणतामित्राणां मैत्रकाणामतुलबलसंपन्नमण्डलाभोगसंसक्तप्रहारशतलब्धप्रतापात्प्रतापोपनतदानमानार्जवोपार्जितानुरागानुरक्तमौलभृतश्रेणीबलावाप्तराज्यश्रियः परममाहेश्वरश्रीभट्टार्कादव्यवच्छिन्नराजवंशान्मातापितृचरणारविन्दप्रणतिप्रविधौताशेषकल्मषः शैशवात्प्रभृति खड्गद्वितीयबाहुरेव समदपरगजघटास्फोटनप्रकाशितसत्त्वनिकषस्तत्प्रभावप्रणताराातिचूडारत्नप्रभासंसक्तपादनखरश्मिसंहतिः सकलस्मृतिप्रणीतमार्गसम्यक्परिपालनप्रजाहृदयरञ्जनान्वर्थराजशब्दः रूपकान्तिधैर्यगाम्भीर्यबुद्धिसंपद्भिः स्मरशशाङ्काद्रिराजोदधित्रिदशगुरुधनेशानतिशयानः शरणागताभयप्रदानपरतया तृणवदपास्ताशेषस्वकार्यफलः प्रार्थनाधिकार्थप्रदानानन्दितविद्वत्सुहृत्प्रणयिहृदयः पादचारीव सकलभुवनमण्डलाभोगप्रमोदः

---

१. कोलः सूकरः. २. संवत्-शकसंख्ययोर्मध्ये एकतरा संख्याशुद्धा. यदि संवत्संख्या १४५५ एतावती तर्हि शकसंख्या १३२० इयती भवितुमर्हति; यदा च शकसंख्या १३२१ इयती तदा संवत्संख्येयं १४५६ युज्यते.

परममाहेश्वरः श्रीगुहसेनस्तस्य सुतस्तत्पादनखमयूखसंतानविसृजितजाह्नवीजलौघप्रक्षालिताशेषकल्मषः प्रणयिशतसहस्रोपजीव्यमानसंपद्रूपलोभादिवाश्रितः सरभसमाभिगामिकैर्गुणैः सहजशक्तिशिक्षाविशेषविस्मायिताखिलबलधनुर्धरः प्रथमनरपतिसमतिसृष्टानामनुपालयिता धर्मादायानामपाकर्ता प्रजोपघातकारिणामुपप्लवानां दर्शयिता श्रीसरस्वत्योरेकाधिवासस्य संहताराातिपक्षलक्ष्मीपरिभोगदक्षविक्रमो विक्रमोपसंप्राप्तविमलपार्थिवश्रीः परममाहेश्वरः श्रीधरसेनस्तस्य सुतस्तत्पादानुध्यातः सकलजगदानन्दनात्यद्भुतगुणसमुदयस्थगितसमग्रदिङ्मण्डलः समरशतविजयशोभासनाथमण्डलाग्रद्युतिभासुरांसपीठोदूढगुरुमनोरथमहाभारः सर्वविद्यापरावरविभागाधिगमविमलमतिरपि सर्वतः सुभाषितलवेनापि सुखोपपादनीयपरितोषः समग्रलोकागाधगाम्भीर्यहृदयोऽपि सुचरितातिशयसुव्यक्तपरमकल्याणस्वभावः खिलीभूतकृतयुगनृपतिपथविशोधनाधिगतोदग्रकीर्तिर्धर्मानुपरोधोज्ज्वलतरीकृतार्थसुखसंपदुपसेवानिरूढधर्मादित्यद्वितीयनामा परममाहेश्वरः श्रीशिलादित्यः कुशली सर्वानेवायुक्तकविनियु·········हत्तरचाटभटकुमारामात्यादीनन्यांश्च यथाभिसंबध्यमानकान्समाज्ञाप[यति]·······[वि]दितं यथा मया मातापित्रोः पुण्याप्यायनायवलभीप्रतिष्ठपितराज्ञीडड्डाकारितविहारनिवासिचतुर्दिगभ्यागतार्यभिक्षुसंघस्य चीवरपिण्डपातशयनासनभैषज्यपरिष्कारार्थं बुद्धानां च भगवतां गन्धधूपपुष्पमाल्यदीपतैलाद्युपयोगार्थं विहारस्य च खण्डस्फुटितप्रतिसंस्काराय······पुष्पानकस्थल्यन्तर्गत उच्चापद्रके कुटुम्बिसूर्यकप्रत्ययक्षेत्रं तथा ·······प्रत्ययक्षेत्रं तथा कक्किजग्रामे अधिकप्रत्ययवापि तथा कुम्भारप्रत्ययवापि तथेन्द्राणिपद्रके····रप्रत्ययक्षेत्रं तथा वलभीस्वतलसीम्नि पुष्पवाटिकाकूपकचतुष्टयमेवमयं क्षेत्रत्रयवापिद्वयपुष्पवाटिकाकूपकचतुष्टयसमेतो ग्रामः सोद्रङ्गः सोपरिकरः सवातभूतप्रत्यायः सधान्यहिरण्या देयः सदसापराधः सोत्पद्यमानविष्टिः सर्वराजकीयानामहस्तप्रक्षेपणीयः पूर्वप्रत्तदेवब्रह्मदेयवर्जितो भूमिच्छिद्रन्यायेनाचन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनो व्यवच्छित्तिभोग्यो धर्मदायतया प्रतिपादितः। यत उचितया च देवाग्रहारस्थित्या भुज्यमानको न कैश्चित्परिपन्थिनीयः। आगामिभद्रनृपतिभिरप्यस्म-

द्वंशजैरन्यैर्वानित्यान्यैश्वर्याण्यस्थिरं मानुष्यं सामान्यं च भूमिदानफलमव-
•गच्छभिरयमस्मद्दायोऽनुमन्तव्यः पालयितव्यश्चेति ।

बहुभिर्बहुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दारिद्र्यभयान्नरेन्द्रैर्धनानि धर्मायतनीकृतानि ।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधुः पुनराददीत॥
षष्टिं वर्षसहस्राणि स्वर्गे मोदेत भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥

दूतकश्चात्र भट्टादित्ययशाः । लिखितं संधिविग्रहाधिकृतदिविरपतिवत्र-भट्टिना ॥ सं २०० ८०६ ज्येष्ठ व ६॥ स्वहस्तो मम ॥

(इण्डियन् आण्टिक्केरी १४।२२९-२३०)

---

(६२)

श्रीध्रुवराजदेवस्य शासनपत्रम् ।

[1]..

.... ।

दाता मानभृदग्रणीर्गुणवतां योऽसौ श्रियो वल्लभो
भोक्तुं स्वर्गफलानि भूरितपसा स्थानं जगामापरम् ॥
येन श्वेतातपत्रप्रहतरविकरव्राततापात्सलीलं
जज्ञे नासीरधूलीधवलितशिरसा वल्लभाख्यः सदाजौ ।
श्रीमद्गोविन्दराजो जितगदहित····स्त्रैणवैधव्यदक्ष-
स्तस्यासीत्सूनुरेकः क्षणरणदलितारातिमत्तेभकुम्भः ॥
तस्यानुजः श्रीध्रुवराजनामा महानुभावोऽप्रहतप्रतापः ।
प्रसाधिताशेषनरेन्द्रचक्रः क्रमेण बालार्कवपुर्बभूव ॥

---

१. लेखोऽयं प्राय: प्राचीनलेखमालामुद्रितचतुर्थलेखसमोऽस्ति, अतस्तत्प्रारम्भश्लोका अत्रापि स्युः.

रक्षता येन निःशेषं चतुरम्भोधिसंयुतम् ।
राज्यं धर्मेण लोकानां कृता हृष्टिः परा हृदि ॥

तस्यात्मजो जगति सत्प्रथितोरुकीर्ति-
र्गोविन्दराज इति गोत्रललामभूतः ।
त्यागी पराक्रमधनः प्रकटप्रताप-
संतापिताहितजनो जनवल्लभोऽभूत् ॥

एकोऽनेकनरेन्द्रवृन्दसहितान्यस्तान्समस्तानपि
प्रोत्खातासिलताप्रहारविधुरान्बद्ध्वा महासंयुगे ।
लक्ष्मीमप्यचलां चकार विलसत्सच्चामरग्राहिणीं
संसीदद्गुरुविप्रसज्जनसुहृद्बन्धूपभोग्यां भुवि ॥

तत्पुत्रेऽत्र गते नाकमाकम्पितरिपुप्रजे ।
श्रीमहाराजशर्वाख्यः ख्यातो राजाभवद्गुणैः ॥

राजाभूत्तत्पितृव्यो रिपुभवविभवोद्भूत्यभावैकहेतु-
र्लक्ष्मीवानिन्द्रराजो गुणिनृपनिकरान्तश्चमत्कारकारी ।
सङ्गादन्यान्व्युदस्य प्रकटितविनया यं नृपान्सेवमाना
राज्यश्रीरेव चक्रे सकलकविजनोद्गीतकथ्यस्वभावम् ॥

श्रीकर्कराज इति रक्षितराज्यभारः
सारः कुलस्य तनयो नयशालिशौर्यः ।
तस्याभवद्विभवनन्दितबन्धुसार्थः
पार्थः सदैव धनुषि प्रथमः शुचीनाम् ॥

स्वेच्छागृहीतविनयान्दृढसंघभाजः
प्रोद्वृत्तदृप्ततरशुल्किकराष्ट्रकूटान् ।
उत्खातखड्गनिजबाहुबलेन जित्वा
योऽमोघवर्षमचिरात्स्वपदे व्यधत्त ॥

पुत्रीयतस्तस्य महानुभावः कृती कृतज्ञः कृतवीर्यवीर्यः ।
वशीकृताशेषनरेन्द्रवृन्दो बभूव सूनुर्ध्रुवराजनामा ॥

चन्द्रो जडो हिमगिरिः स हिमः प्रकृत्या
वातश्चलश्च तपनस्तपनस्वभावः।
क्षारः पयोधिरिति यः सममस्य नास्ति
येनोपमा निरुपमस्तत एव गीतः॥
अचिराभोज्ज्वलवपुषि क्षितिसंतापहारिणि द्युम्नम्।
धारावर्षे वर्षति जलद इव न कः कृतार्थः स्यात्॥
ब्रह्माण्डमेतत्किमिति प्रजासृजा न मत्प्रमाणेन पुरा विनिर्मितम्।
एवं विचिन्त्य ध्रुवराजकीर्तिर्विधातुरासीत्सुतरामसूयिनी॥
तेनेदमनिलविद्युच्चञ्चलमालोक्य जीवितमसारम्।
क्षितिदानपरमपुण्यः प्रवर्तितो धर्मदायोऽयम्॥

स च समधिगताशेषमहाशब्दमहासामन्ताधिपतिधारावर्षश्रीध्रुवराजदेवः सर्वानेव यथासंबध्यमानान्राष्ट्रपतिविषपतिग्रामकूटायुक्तनियुक्ताधिकारिकमहत्तरादीन्समनुदर्शयति—अस्तु वः संविदितम्। यथा मया श्रीखेटकबहिः सर्वमङ्गलासत्तावासितेन मातापित्रोरात्मनश्चैहिकामुष्मिकपुण्ययशोभिवृद्धये वदरसिद्धिवास्तव्यतच्चातुर्विद्यसामान्यलाबाणसगोत्रवाजिमाध्यंदिनसब्रह्मचारिभट्टमहेश्वरसुतयोगायानन्तरं श्रीगोविन्दराजदेवेन ख्यापितज्यौतिषिकनाम्ने काशह्रडदेशान्तर्वर्तिपूसिलाविल्लिनामा ग्रामो यस्याघाटनानि पूर्वतो वेहिच्चाभिधाना नदी वोरीवद्रवकग्रामश्च दक्षिणतश्चतुःसरीनामा ग्रामोपरतस्तसिलावल्लिनामा उत्तरतो विहुचवल्लिनामा ग्रामः, एवमयं चतुराघाटनोपलक्षितः सोद्रङ्गः सपरिकरः सदण्डदशापराधः सभूतपातप्रत्यायसोत्पद्यमानविष्टिकः सधान्यहिरण्यादेयोचाटभटप्रवेश्यः सर्वराजकीयानामहस्तप्रक्षेपणीय आचन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनः पुत्रपौत्रान्वयक्रमोपभोग्यः पूर्वप्रदत्तदेवब्रह्मदायरहितोऽभ्यन्तरसिद्ध्या शकनृपकालातीतसंवत्सरशतेषु सप्तसु सप्तपञ्चाशदधिकेषु कार्तिकशुद्धपञ्चदश्यां महाकार्तिकीपर्वणि स्नात्वाद्योदकातिसर्गेण बलिचरुवैश्वदेवाग्निहोत्रातिथिपञ्चमहायज्ञक्रियोत्सर्पणार्थं प्रतिपादितो यतोऽस्योचितया ब्रह्मदायादस्थित्या भुञ्जतो भोजयतः कर्षतः कर्षयतश्च प्रतिदिशतो वा न केनचित्परिपन्थिता कार्या।

तथागामिनृपतिभिरस्मद्वंश्यैरन्यैर्वा सामान्यं भूमिदानफलमवेत्य विद्युल्लोलान्यनित्यैश्वर्याणि तृणाग्रलग्नजलबिन्दुचञ्चलं च जीवितमाकलस्य(य्य) स्वदायनिर्विशेषोऽयमस्मद्दायोऽनुमन्तव्यः परिपालयितव्यश्च । यश्चाज्ञानतिमिरपटलावृतमतिराच्छिन्द्यात्, आच्छिद्यमानं वानुमोदेत, स पञ्चभिर्महापातकैरुपपातकैश्च संयुक्तः स्यात् । इति ॥ उक्तं च भगवता वेद्व्यासेन व्यासेन—

षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।
कृष्णाहयो हि जायन्ते भूमिदायं हरन्ति ये ॥
अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकत्रयं तेन भवेद्धि दत्तं यः काञ्चनं गां च महीं च दद्यात् ॥
बहुकि(भि)र्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
स्वदत्तां परदत्तां वा यत्नाद्रक्ष नराधिप ।
महीं महिमतां श्रेष्ठ दानाच्छ्रेयोनुपालनम् ॥
इति कमलदलाम्बुबिन्दुलोलां
श्रियमनुचिन्त्य मनुष्यजीवितं च ।
अतिविमलमनोभिरात्मनीनै-
र्नहि पुरुषैः परकीर्तयो विलोप्याः ॥ इति ॥

दूतकोऽत्र श्रीदेवराजः । लिखितं च श्रीदुर्गभटसूनुना सांधिविग्रहिकश्रीनारायणेन ॥ इति मतं मम श्रीध्रुवराजदेवस्य श्रीकर्कराजदेवसुतस्य यदुपरि लिखितम् ॥

(इण्डियन् आण्टिक्वेरी १४।१९९–२००)

KÂVYAMÂLÂ. 64.

THE

PRÂCHÎNA-LEKHA-MÂLÂ

OR

A COLLECTION OF

Ancient Historical Records.

Vol. II.

EDITED BY

MAHÂMAHOPÂDHYÂYA PANDIT S'IVADATTA

AND

KÂS'ÎNÂTH PÂNDURANG PARAB.

PRINTED AND PUBLISHED

BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR OF JÂVAJI DÂDÂJI'S "NIRNAYA-SÂGARA" PRESS

BOMBAY.

1897

(Registered according to Act XXV of 1867.)

(All rights reserved by the publisher.)

प्राचीनलेखमालाया अनुक्रमणी।

काव्यमाला. ६४.

प्राचीनलेखमाला।

(द्वितीयो भागः।)

लवपुरओरिएण्टलकॉलेजमुख्याध्यापकेन
महामहोपाध्यायपण्डितशिवदत्तेन,
परबोपाह्वेन पाण्डुरङ्गतनूभुवा
काशीनाथशर्मणा च
संशोधिता।

सा च

मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीता।

१८९७

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा निर्णयसागरमुद्रायन्त्रालयाधिपते-
रेवाधिकारः।)

प्राचीनलेखमालाया अनुक्रमणी ।

लेखाङ्काः । पृष्ठम् ।

६३. विजयनगरमहाराजवंशीयस्य कर्नाटकद्वितीयरङ्गस्य दानपत्रम् १
६४. कोटप्रान्तोपलब्धमहाराजशिवगणकारितशिवमन्दिरप्रशस्तिः ७
६५. शिवमन्दिरप्रशस्तिः ११
६६. यादवसेउणचन्द्रनृपतेर्दानपत्रम् १२
६७. यादवसेउणदेवनृपतेर्द्वितीयं दानपत्रम् १६
६८. श्रीविजयादित्यमहाराजानां दानपत्रम् १७
६९. वलभीवल्लभशासनपत्रम् २०
७०. श्रीजाइकदेवानां दानपत्रम् २२
७१. मङ्गलपुर(मङ्गरोल)समुपलब्धा वापीप्रशस्तिः २२
७२. उदयपुरवायव्यकोणे सारणेश्वरमहादेवमन्दिरोपलब्धलेखः २४
७३. भावनगरे महुवाबन्दरग्रामे लक्ष्मीनारायणमन्दिरोपलब्धलेखः २६
७४. मरु(मारवाड)देशीयसादडीग्रामपार्श्वे राणकपुरजैनमन्दिरप्रशस्तिः २८
७५. बाणासुरवंशीयविक्रमादित्यानां शासनपत्रम् २९
७६. श्रीमहाराजनन्दप्रभञ्जनवर्मणां दानपत्रम् ३२
७७. श्रीचालुक्यकुलालंकारश्रीविजयादित्यमहाराजानां शासनपत्रम् ३२
७८. राष्ट्रकूटकुलालंकारश्रीमदकालवर्षश्रीकृष्णराजस्य शासनपत्रम् ३४
७९. श्रीजयभटमहाराजानां दानपत्रम् ३९
८०. प्रशान्तरागापरनामधेयश्रीदद्दमहाराजानां दानपत्रम् ४१

८१. प्रशान्तरागापराभिधेयश्रीदद्दमहाराजानां द्वितीयं दानपत्रम् ४४
८२. कर्णाटकश्रीवेङ्कटपतिरायस्य दानपत्रम्.... .... ४८
८३. कण्वाश्रमस्थमहादेवमन्दिरप्रशस्तिः ५५
८४. उदयपुराधीशजयसिंहवल्लभानां शासनपत्रम् ५९
८५. वाकाटकदेशमहाराजश्रीप्रवरसेनस्य शासनपत्रम् ६०
८६. कान्यकुब्जेश्वरश्रीगोविन्दचन्द्रमहाराजानां शासनपत्रम्.... ६३
८७. श्रीसिङ्घणदेवमहाराजानां ताम्रपत्रम् ६५
८८. कुरुकुलवंशावतंसश्रीजनमेजयभूपालानां शासनपत्रम् ६८
८९. माढपुरशिवमन्दिरस्थः शिलालेखः ६९
९०. महासामन्तप्रचण्डनायकश्रीचन्द्रगुप्तस्य दानपत्रम् ७१
९१. बाणादिमहाकविवर्णितश्रीहर्षवर्धनमहाराजानां दानपत्रम् ७५
९२. छिन्दवंशप्रभूतलल्लमहाराजानां प्रशस्तिपत्रम् ७७
९३. वलभीप्रभोस्तृतीयध्रुवसेनमहाराजस्य दानपत्रम् ८२
९४. दिल्लीप्रान्तस्थसारवलग्रामस्थकूपप्रशस्तिः ८५
९५. श्रीवैद्यनाथप्रशस्तिद्वयम् ८७
९६. श्रीयशोवर्मराजतत्सुतश्रीधङ्गदेवयोः प्रशस्तिः ९४
९७. श्रीधङ्गमहाराजप्रतिष्ठापितमरकतेश्वरमहादेवप्रशस्तिः १०२
९८. श्रीकोक्कलमहाराजनिर्मापितनगरप्रशस्तिः ११०
९९. गोपगिरि(ग्वालियरदुर्ग)मार्गस्थितविष्णुमन्दिरप्रशस्तिः ११३
१००. कुदारकोट(गवीधुमती)ग्रामस्थितमन्दिरप्रशस्तिः ११६
१०१. कांगराज्वालामुखीस्तोत्रसंसारचन्द्रप्रशस्ती ११९
१०२. परमर्दिदेवमहामात्यसल्लक्षणकारितमन्दिरप्रशस्तिः १२१
१०३. कान्यकुब्जाधीशमहेन्द्रपालराज्यसमकालिकमन्दिरत्रय-
प्रशस्तिः १२५
१०४. बिल्हारीखेडीशिलालेखः १२९
१०५. विजयसेनमहाराजकारितश्रीप्रद्युम्नेश्वरमन्दिरप्रशस्तिः १४०
१०६. श्रीवीरवर्ममहिषीश्रीकल्याणदेवीनिर्मापितनिर्जरकूपप्रशस्तिः १४६

१०७. भोजवर्मकोशाध्यक्षसुभटस्य पूर्वजानां देवालयस्य च प्रशस्तिः १४८
१०८. सिद्धान्तशिरोमण्याद्यनेकग्रन्थनिर्मातृश्रीमद्भास्कराचार्यवंश-प्रशस्तिः १५३
१०९. नारोदग्रामीयवापीप्रशस्तिः १५६
११०. विजयनगराधीशमहाराजश्रीकृष्णरायवितीर्णग्रामप्रशस्तिः १६४
१११. महाराजयशःकर्णदेवानां प्रशस्तिः १६९
११२. श्रीमद्यशःकर्णमहाराजसुतगयकर्णमहाराजधर्मपत्न्याः श्रीमदल्हणदेव्या दानपत्रम् १७२
११३. शत्रुंजयाचलबिम्बसप्तमोद्धारप्रशस्तिः १७७
११४. सौवर्णिकसाहश्रीतेजःपालोद्धृतविमलाचलपट्टनश्रीआदीश-मूलप्रासादप्रशस्तिः १८१
११५. साहश्रीपद्मासिंहकारितशत्रुंजयतीर्थप्रासादप्रशस्तिः १९०
११६. पारीक्षश्रीसोमचन्द्रजननीश्रीहीरबाईकारितजिनमन्दिरजी-र्णोद्धारप्रशस्तिः १९३
११७. विग्रहराजमहाराजसमकालिकाल्हटकारितहर्षनाथप्रासादप्र-तिष्ठाप्रशस्तिः १९६
११८. श्रीपरमारान्वयभूषणश्रीनरवर्मदेवकारितमन्दिरप्रशस्तिः २०३
११९. अरितरुदवयादवश्रीभिल्लमहाराजशासनपत्रम् २११
१२०. खेलरीग्रामस्थहरिब्रह्मदेवमन्दिरप्रशस्तिपत्रम् २१७
१२१. दुबकुण्डग्रामस्थजिनमन्दिरशासनपत्रम् २१९
१२२. सुप्रसिद्धमथुरान्तर्गतकेशवप्रोपलब्धविष्णुमन्दिरप्रशस्तिः २२५
१२३. श्रीमहाराजाधिराजश्रीकर्णदेवानां शासनपत्रम् २२८
१२४. श्रीगङ्गाधरकारितकासारप्रशस्तिः २३४

प्राचीनलेखमाला।

(६३)

विजयनगरमहाराजवंशीयस्य कर्नाटक-द्वितीय-रङ्गस्य दानपत्रम्।

श्रीवेङ्कटेशाय नमः।

यस्य संपर्कपुण्येन नारीरत्नमभूच्छिला।
यदुपास्यं सुमनसां तद्वस्तुद्वन्द्वमाश्रये॥
यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शताः।
विघ्नं निघ्नन्ति भजतां विष्वक्सेनं तमाश्रये॥
जयति क्षीरजलधेर्जातं सव्येक्षणं हरेः।
आलम्बनं चकोराणाममरायुष्करं महः॥
पौत्रस्तस्य पुरूरवा बुधसुतस्तस्यायुरस्यात्मजः
संजज्ञे नहुषो ययातिरभवत्तस्माच्च पूरुस्ततः।
तद्वंशे भरतो बभूव नृपतिस्तत्संततौ शंतनु-
स्तत्तुर्यो विजयोऽभिमन्युरुदभूत्तस्मात्परीक्षित्ततः॥
नन्दस्तस्याष्टमोऽभूत्समजनि नवमस्तस्य राज्ञश्चलिक्क-
क्ष्मापस्तत्सप्तमः श्रीपतिरुचिरभवद्राजपूर्वो नरेन्द्रः।
तस्यासीद्विज्जलेन्द्रो दशम इह नृपो वीरहेमालिराय-
स्तार्तीयीको मुरारौ कृतनतिरुदभूत्तस्य मायापुरीशः॥
तत्तुर्योऽजनि तातपिन्नमहीपालो निजालोकन-
त्रस्तामित्रगणस्ततोऽजनि हरन्दुर्गाणि सप्ताहितात्।
अह्नैकेन स सोमिदेवनृपतिस्तस्यैव जज्ञे सुतो
वीरो राघवदेवराडिति ततः श्रीपिन्नमोऽभून्नृपः॥

आरवीटिनगरीविभोर[भू]त्तस्य बुक्कधरणीपतिः सुतः ।
येन सालुवनृसिंहराज्यमप्येधमानमहसा स्थिरीकृतम् ॥

स्वःकामिनीः स्वतनुकान्तिभिराक्षिपन्तीं
बुक्कावनीपतिलको बुधकल्पशाखी ।
कल्याणिनीं कमलनाभ इवाब्धिकन्यां
बल्लाम्बिकामुदवहद्बहुमान्यशीलाम् ॥

सुतेव कलशाम्बुधेः सुरभिलाशुगं माधवा-
त्कुमारमिव शंकरात्कुमहीभृतः कन्यका ।
जयन्तममरप्रभोरपि शचीव बुक्काधिपा-
च्छ्रुतं जगति वल्लभालभत रामराजं सुतम् ॥

श्रीरामराजक्षितिपस्य तस्य चिन्तामणीरर्थिकदम्बकानाम् ।
लक्ष्मीरिवाम्भोरुहलोचनस्य लक्काम्बिकामुष्य महिष्यलासीत् ॥

तस्याधिकैः समभवत्तनयस्तपोभिः
श्रीरङ्गराजनृपतिः शशिवंशदीपः ।
आसन्समुल्लसति धामनि यस्य चित्रं
नेत्राणि वैरिसुदृशां च निरञ्जनानि ॥

सती तिरुमलाम्बिकां चरितलीलयारुन्धती-
प्रथामपि तितिक्षया वसुमतीयशो रुन्धतीम् ।
हिमांशुरिव रोहिणीं हृदयहारिणीं सद्गुणै-
रमोदत सधर्मिणीमयमवाप्य वीराग्रणीः ॥

रचितनयविचारं रामराजं च धीरं
वरतिरुमलरायं वेङ्कटाद्रिक्षितीशम् ।
अजनयत स एतानानुपूर्व्यात्कुमारा-
निह तिरुमलदेव्यामेव राजा महौजाः ॥

सकलभुवनकण्टकानरातीन्समिति निहत्य स रामराजधीरः(वीरः) ।
भरतमनु भगीरथादिराजप्रथितयशाः प्रशशास चक्रमुर्व्याः ॥

व्यराजत श्रीवरवेङ्कटाद्रिराजः क्षितौ लक्ष्मणचारुमूर्तिः।
ज्याघोषदूरीकृतमेघनादः कुर्वन्सुमित्राशयहर्षपोषम् ॥

त्रिषु श्रीरङ्गक्ष्मापरिवृढकुमारेष्वधरिणं
विजित्यारिक्ष्मापांस्तिरुमलमहाराजनृपतिः।
महौजाः साम्राज्ये सुमतिरभिषिक्तो निरुपमे
प्रशास्त्युर्वीं सर्वामपि तिसृषु मूर्तिष्विव हरिः ॥

यशस्विनामग्रसरस्य यस्य पट्टाभिषेके सति पार्थिवेन्दोः।
दानाम्बुपूरैरभिषिच्यमाना देवीपदं भूमिरियं दधाति ॥

सामादयो विधिमुखादिव सत्यवाचः
सामाद्युपायनिवहा इव सांयुगीनात्।
रामादयो दशरथादिव राजमौले-
स्तस्मादमेययशसस्तनया बभूवुः ॥

राजा ततोऽभूद्रघुनाथनामा श्रीरङ्गराजः श्रितपारिजातः।
श्रीरामराजः शिशिरांशुरुर्व्यां विख्यातिमान्वेङ्कटदेवरायः ॥
श्रीरङ्गरायः सहजेषु तेषु पारंगतो नीतिपयःपयोधेः।
अष्टासु दिक्षु प्रथितस्य लेभे पट्टाभिषेकं पे(पि)नुगोण्डराज्ये ॥

अथ श्रीवेङ्कटपतिदेवरायो नयोज्ज्वलः।
अवनीमशिषत्कीर्त्या दिशो दश विशोभयन् ॥

तज्ज्यायसः सुरद्रुमलज्जावहचरितरामराजविभोः।
जातस्तिरुमलराजः ख्यातः श्रीरङ्गराजोऽपि ॥

[ततः] श्रीरङ्गरायस्य तनया विनयाधिकाः।
अजायन्त दयावन्तः श्रुतवन्तो यशस्विनः ॥

श्रीरङ्गरायनृपतेस्तनयेषु तेषु
पारं गिरामधिगतः कविपुंगवानाम्।
रत्नेषु कौस्तुभ इवाम्बुधिसंभवेषु
श्रीरामरायनृपतिः सुचिरं व्यलासीत् ॥

पूर्वं विश्रुतरामराजनृपतेः श्रीरामभद्राकृतेः
कल्याणोदयशालिनस्तनुभवाः पञ्च प्रपञ्चावने ।
दक्षा नीतिपथानुगाः समभवन्क्षीरापगाकामिनो
गीर्वाणालयभूरुहा इव बुधश्रेणीष्टदानोत्सुकाः ॥

विख्यातचर्येषु नृपेषु तेषु श्रीरङ्गराजः शिशिरांशुरुर्व्याः ।
विश्वत्रये विश्रुतकीर्तिरासीत्सौरेषु[1] शालेष्विव पारिजातः ॥
श्रीरङ्गराजस्य तपोविशेषैः संतोषिणः शेषगिरीश्वरस्य ।
कारुण्यभूम्ना कमनीयशोभौ पुत्रावभूतां पुरुहूतभोगौ ॥
पे(पि)दवेङ्कटेन्द्रपिनवेङ्कटाधिराडिति नामकौ प्रकृतिपालनोत्सुकौ ।
खरदूषणप्रहतिदक्षिणावुभौ ददतः प्रमोदमिव रामलक्ष्मणौ ॥

श्रीशाली पे(पि)दवेङ्कटेन्द्रनृपतिर्ज्येष्ठो वयोभिस्तयोः
शौर्यौदार्यगभीरताधृतिकलापूर्वैश्च सर्वैर्गुणैः ।
यस्यारातिनृपालभेदनकलायात्रासु सेनारजः-
पूरैर्भूर्जलधिर्भवेदिति हरि[श्चिन्तेति][2] धत्ते [स्थितौ][3] ॥

श्रीरङ्गराजेन्द्रकुमारकेऽस्मिन्वीरोत्तमे वेङ्कटदेवराये ।
पट्टाभिषेके पे(पि)नुगोण्डराज्ये तदाभिषिक्ताः सुधियोऽपि हेम्ना ॥

ख्यातस्तस्य पितामहानुजतया श्रीवेङ्कटाद्रिक्षमा-
पालश्रीललनास्वयंवृतपतेर्जातानुकम्पास्पदम् ।
आसीदुद्धतशत्रुगन्धकरटिप्रध्वंसबद्धव्रतो(ते)
हर्यक्षः कविलोकरक्षणकलाप्रत्यग्रभोजाकृतिः ॥
तस्य श्रीरङ्गपति[:] क्षोणीपतिरात्मभूर्गुणाब्धिरभूत् ।
यस्यौदार्यमहिम्ना कल्पतरुः क्वापि नन्दने वसति ॥
राज्ञस्तस्य गुणाद्भुतस्य सुकृतैः प्राचीनजन्मार्जितैः
पुत्रोऽभूत्पुरुहूतकल्पमहिमा गोपालराजाग्रणीः ।

---

१ 'कल्पद्रुमाणामिव पारिजात' इति रघु २ 'श्चित्तेश्च' मुद्रितपाठ. ३. तिम्' मुद्रितपाठ..

सर्वेषां विदुषां समीहितफलं दत्वा जगत्यां स्वयं
यो विस्मारयति स दानचतुरान्भोजादिकान्पार्थिवान् ॥
[1]सोऽयं प्रियासहचरः सुकृती तपोभि-
राराधयद्वेङ्कटशैलनाथम् ।
प्रीतस्तदानीमगदीदभीष्ट-
दायी स देवः कृपया तमेनम् ॥

पुत्रः सन्धरणीमवाप मधुना श्रीरङ्गरायाभिधो
विख्यातश्चि(:पि)न वेङ्कटेन्द्रनृपतेरुग्रैस्तपोवैभवैः ।
पूर्वं श्रीवसुदेवभूर्बलरिपोः कृष्णाभिधोऽयं यथा
नन्दः प्रागिव तं सुतं कलयतां श्रीरङ्गरायाभिधम् ॥

श्रीरङ्गेश्वरदत्तराज्यमहिमा श्रीरङ्गरायाग्रणी-
पादाम्भोजविनम्रभोजमगधक्ष्मापार्पितप्राभृतः ।
सर्वेषां पृथिवीभुजामधिशिरोविन्यस्तपादाम्बुजः
पृथ्वीं पालयते नयेन महता सप्तार्णवीमेखलाम् ॥
वाराशिगाम्भीर्यविशेषधुर्यचौराशिदुर्गैकविभालवर्यः ।
पराष्टदिग्रायमनःप्रकामभयंकरः शार्ङ्गधरान्तरङ्गः ॥
सारवीर रमया समुल्लसन्नारवीटिपुरहारनायकः ।
कुण्डलीश्वरमहाभुज[:] श्रयन्मण्डलीकधरणीवराहताम् ॥
आत्रेयगोत्रजानामग्रसरो भूभुजामुदारयशाः ।
[2].. ॥

सोऽयं नीतिजितादिभूपतिततिः सुत्रामशाखी सुधी-
सार्थानां भुजतेजसा स्ववशयन्कर्णाटसिंहासनम् ।
आ सेतोरपि चाहिमाद्रि विमतान्संहृत्य शासन्मुदा ।
सर्वोर्वीं प्रचकास्ति सिन्धुपरिधां श्रीरङ्गरायाग्रणीः ॥

---

१ अस्मिन्वृत्ते प्रथमः पादो वसन्ततिलकात्मकः, अवशिष्टा इन्द्रावज्रात्मकाः.
२. आदर्शे त्रुटिचिह्न नास्ति.

रसर्तुबाणचन्द्राख्यगणिते शकवत्सरे ।
तारुण्याख्ये महावर्षे मासि फाल्गुननामके ॥
पक्षे वलक्षे पुण्यर्क्षे द्वादश्यां च महातिथौ ।
श्रीवेङ्कटेशपादाब्जसंनिधौ श्रेयसां निधौ ।
कौण्डिन्यगोत्रजाताय वरापस्तम्बसूत्रिणे ॥
यजुःशाखावतामग्र्ययायिनेऽभीष्टदायिने ।
मिष्टान्नदानसंतुष्टशिष्टाचारद्विजन्मने ॥
मागण्टिभमहाराजपौत्रायातियशस्विने ।
यल्लमराजपुत्राय कौण्डण्याख्याय धीमते ॥
कान्तं तिरुवदिराज्ये वलुदलंवट्टुचावडौ (?) ।
ययल्वानसूरिसीमायां पादूरिप्पत्तुविश्रुतम् (?) ॥
श्रीआर्यानेत्तग्रामस्य प्राची दिशमुपाश्रितम् ।
कूटडिग्रामरत्नस्य दक्षिणस्यां दिशि स्थितम् ॥
प्रख्यातमट्टे ग्रामस्य पश्चिमाशामुपाश्रितम् ।
वाल्ताल्ले महाग्रामस्योत्तरस्यां दिशि स्थितम् ॥
प्रख्यातचिन्नमःशेट्टिसमुद्रप्रतिनामकम् ।
कल्लकुर्शिमहाग्रामं सर्वसस्योपशोभितम् ॥
सर्वमान्यं चतुःसीमासहितं च समन्ततः ।
निधिनिक्षेपपाषाणसिद्धसाध्यजलान्वितम् ॥
अक्षिण्यागामिसंयुक्तं गणभोज्यं सभूरुहम् ।
वापीकूपतटाकैश्च कच्छारामैश्च संयुतम् ॥
पुत्रपौत्रादिभिर्भोज्यं क्रमादाचन्द्रतारकम् ।
दानादमनविक्रीतियोग्यं विनिमयोचितम् ॥
परीतः प्रयतैः स्निग्धैः पुरोहितपुरोगमैः ।
विविधैर्विबुधैः श्रौतपथिकैरधिकैर्गिरा ॥
श्रीरङ्गरायभूपालो माननीयो मनस्विनाम् ।
सहिरण्यपयोधारापूर्वगं दत्तवान्मुदा ॥

वीरश्रीरङ्गरायक्षितिपतिवर्यस्य कीर्तिधुर्यस्य ।
शासनमिदं सुधीजनकुवलयचन्द्रस्य भूमहेन्द्रस्य ॥
वीरश्रीरङ्गरायोक्त्या प्राह पौत्रः सभापतिः ।
कामकोटिसुतो रामकविशासनवाङ्मयम् ॥
वीरश्रीरङ्गरायक्ष्मापतिदेशेन सोमनाथार्यः ।
शासनमलिखत्कामयतनयः श्रीगणपर्यायपौत्रमणिः ॥
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम् ।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥
स्वदत्ताद्विगुणं पुण्यं परदत्तानुपालनम् ।
परदत्तापहारेण स्वदत्तं निष्फलं भवेत् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिर्वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
एकैव भगिनी लोके सर्वेषामेव भूभुजाम् ।
न भोज्या न करग्राह्या विप्रदत्ता वसुंधरा ॥
सामान्योऽयं धर्मसेतुर्नृपाणा काले काले पालनीयो भवद्भिः ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः ॥

(इण्डियन् आण्टिक्वेरी १३।१५६-१६०)

---

(६४)

कोटप्रान्तोपलब्धमहाराजशिवगणकारित-शिवमन्दिरप्रशस्तिः ।

ॐ नमः शिवाय ।

नमः सकलसंसारसागरोत्तारहेतवे ।
तमोगर्ताभिसंपातहस्तालम्बाय शंभवे ॥
श्वेतद्वीपानुकाराः क्वचिदपरमितैरिन्दुपादैः पतद्भि-
र्नित्यस्थैः सान्धकाराः क्वचिदपि निभृतैः फाणियैर्भोगभागैः ।

सोष्माणो नेत्रभाभिः क्वचिदतिशिशिरा जह्नुकन्याजलौघै-
रित्थंभावैर्विरुद्धैरपि जनितमुदः पान्तु शंभोर्जटा वः ॥

भोगीन्द्रस्य फणामणिद्युतिमिलन्मौलीन्दुलोलांशवो
नेत्राग्निच्छुरिभस्मधूमकपिशैर्ज्वालाशिखाग्रैः क्वचित् ।
मुक्ताकारमरुन्नदीजलकणैराकीर्णशोभाः क्वचि-
च्चे[1]त्थं शाश्वतभूषणव्यतिकराः शंभोर्जटाः पान्तु वः ॥

स्थाणोर्वः पातु मूर्धा सर इव सततव्योमगङ्गाम्बुलोल-
स्फूर्जद्भोगीन्द्रपङ्कश्लथविकटजटाजूटकह्लारहारी ।
मन्दं यत्र स्फुरन्त्यो धवलनरशिरोवारिजन्मान्तराले
स्पष्टः प्रोद्यन्मृणालाङ्कुरनिकर इवाभान्ति मौलीन्दुभासः ।
नेत्रक्रोडप्रसक्तोज्ज्वलदहनशिखा[पिङ्ग[2]]भासा जटानां
भार संयम्य कृत्वा सममम्र्तकरोद्भासि मौलीन्दुबिम्बम् ।
हस्ताभ्यामूर्ध्वमुद्यद्विषशिखिवदनग्रन्थिमातत्य नागं
स्थाणुः प्रारब्धनृत्तो जगदवतु लयोत्कम्पिपादाङ्गुलीकः ॥

चूडाचारुमणीन्दुमण्डितभु[3]वः सद्भोगिनामाश्रयः
पक्षच्छेदभयार्तिसंकटवतां रक्षाक्षमो भूभृताम् ।
दूराभ्यागतवाहिनीपरिकरो रत्न[प्र[4]काशो]ज्ज्वलः
श्रीमानित्थमुदारसागरसमो मौर्यान्वयो दृश्यते ॥

दिङ्नागा इव जात्यसम्भृतमुदो दानोज्ज्वलैराननै-
र्विस्रम्भेण रमन्त्यभीतमनसो मानोद्धुराः सर्वतः ।
सद्वंशत्ववशप्रसिद्धयशसो यस्मिन्प्रसिद्धा गुणैः
श्लाघ्या भद्रतया च सत्त्वबहुलाः पक्षैः समं भूभृतः ॥

इत्थं भवत्सु भूपेषु भुञ्जत्सु सकलां महीम् ।
धवलात्मा नृपस्तत्र यशसा धवलोऽभवत् ॥

---

१. पादादौ चकारोऽनुचितः. २. 'प्रिय' इति मुद्रितः पाठः. ३. 'तरः' इति साधीयान्पाठः. ४. '–प्रकार–' इति मुद्रितः पाठः.

कायादिप्रकटार्जितैरहरहः स्वैरेव दोषैः सदा
निर्वस्त्राः सततक्षु[धः] प्रतिदिनं स्पष्टीभवद्यातनाः।
रात्रीसंचरणा भृशं परगृहेष्वित्थं विजित्यारयो
येनाद्यापि विकीर्णतां सुविपदो नीताः पिशाचा इव॥
कोपाल्लूनमहेभकुम्भविगलन्मुक्ताफलालंकृत-
स्फीतास्रस्रुतिमण्डिता अपि मुहुर्येनोर्जितेन स्वयम्।
उन्नालैरिव पङ्कजैः पुनरपि च्छिन्नैः शिरोभिर्द्विषां
विक्रान्तेन विभूषिता रणभुवस्त्यक्ता नरैः कातरैः॥
इत्थं तस्य चिरंतनो द्विजवरः सद्वीर्यसत्त्वायुध-
प्रीतिप्रोतनरेन्द्रसत्कृतिमुदः पात्रं प्रसिद्धो गुणैः।
यस्याद्यापि रणाङ्गणे विलसितं संसूचयन्ति द्विष-
च्छुष्यच्छोणितमर्मरा रणभुवः प्रेतप्रिया: प्रायशः॥
शब्दस्यार्थ इव प्रह्लादनपटोर्मार्गस्त्रयीसंज्ञितो
धर्मः सेव्यविशुद्धभावसरलो न्यायस्य मूलं सतः।
प्रामाण्यं प्रगतस्य············यः साध्यस्य संसिद्धये
तस्याभू[दति]संयतः पृथुसखः श्रीसं(श)ङ्कुकाख्यो नृपः॥
द्रेङ्गिणी नाम तस्यासीद्धर्मपत्नी द्विजोद्भवा।
तस्यां तस्याभवद्वीरः सूनुः कृतगुणाकरः॥
यशस्वी रूपवान्दाता श्रीमाञ्शिवगणो नृपः।
शिवस्य नूनं स गणो येन तद्भक्ततां गतः॥
खड्गाघातदलत्तनुत्रविचटद्वह्निस्फुलिङ्गोज्ज्वल-
ज्वालादग्धकबन्धकण्ठकुहरप्रोन्मुक्तदानोल्बणे।
नाराचैर्मथिताननाकुलखगप्रोद्वान्तरक्तासव-
प्रीतप्रेतजनो रणे रतधिया येनासकृच्चर्वितः॥
ज्ञात्वा जन्मजरावियोगमरणक्लेशैरशेषैश्रितं
स्वार्थस्याप्ययमेव योग उचितो लोके प्रसिद्धः सताम्।

१. 'प्रेत' इति मुद्रितः पाठः. २. '-आसवम्' इति मुद्रित. पाठः.

तेनेदं परमेश्वरस्य भवनं धर्मात्मना कारितं
यद्दृष्ट्वैव समस्तलोकवपुषां नष्टं कलेः कल्मषम् ॥
पुष्पाशोकसमीरणेन सुरभावुत्फुल्लचूताङ्कुरे
[काले] मत्तविलोलषट्पदकुलैर्व्यारुद्धदिङ्मण्डले ।
जातेऽपाङ्गनिरीक्षणैककथके नारीजनस्य स्मरे
क्लृप्तं सद्भवनं भवस्य सुधिया तेनेह कण्वाश्रमे ॥
काले दोलाकुलानां तनुवलनभरात्प्रस्फुटत्कञ्चुकानां
कान्तानां दृश्यमानैः कुचकलशभुजा[1][व्यक्त]संभोगचिह्नैः ।
यस्मि[न्प्रिया] (?) मुख्यस्थितिझटितिनमत्सस्मितार्धेक्षणानां
भ्रूभङ्गैरेव रम्यैर्हृदयविनिहितः सूच्यते प्रेमबन्धः ॥
मत्तद्विरेफझंकारिसहकारविराजिताः ।
संवीक्ष्य ककुभो बाष्पं मुञ्चन्ति पथिकाङ्गनाः ॥
धूपादिगन्धदीपार्थं खण्डस्फुटितिहेतुना(तवे) ।
ग्रामौ दत्तौ क्षयो निमिः (?) सर्वाङ्काङ्घोणिपद्रकौ ॥
पालयन्तु नृपाः सर्वे येषां भूमिरियं भवेत् ।
एवं कृते ते धर्मार्थं नूनं यान्ति शिवालयम् ॥
संसारसागरं घोरमनेन धर्मसेतुना ।
तारयिष्यत्यसौ नूनं जन्यौ चात्मानमेव च ॥
यावत्ससागरां पृथ्वीं सनगां च सकाननाम् ।
यावदिन्दुस्तपेद्भानुस्तावत्कीर्तिर्भविष्यति ॥
संवत्सरशतैर्यातैः सपञ्चनवत्यर्गलैः ।
सप्तभिर्मालवेशानां मन्दिरं धूर्जटेः कृतम् ॥
अलुब्धः प्रियवादी च शिवभक्तिरतः सदा ।
कारापकः शब्दगुणो धार्मिकः शंसितव्रतः ॥
दक्षः प्राज्ञो विनीतात्मा शूरभक्तः प्रियंवदः ।
तृप्तोऽत्र रौपुकश्चास्मि (?) कायस्थो गोमिकाङ्गजः ॥

---

१. '–भुजा भोजि–' इति मुद्रितः पाठः.

उत्कीर्णे शिवनागेन द्वार(रे) शिवस्य सूनुना ।
सूनुना भट्टसुरभेर्देवट्टेन श्रुतोज्ज्वलाः ॥
श्लोका अमी कृता भक्त्या मौलिचन्द्रसुधाजुषः ।
कृष्णसुतो गुणाढ्यश्च सूत्रधारोऽत्र णण्णकः ॥
एतत्कण्वाश्रमं ज्ञात्वा सर्वपापहरं शुभम् ।
कृतं हि मन्दिरं शंभोर्धर्मकीर्तिविवर्धनम् ॥
यतिहीनं शब्दहीनं मात्राहीनं तु यद्भवेत् ।
तत्सर्वं साधु चित्तेन मर्षणीयं बुधैः सदा ॥

(इण्डियन् आण्टिक्वेरी १३।१६३-१६५)

---

(६९)

शिवमन्दिरप्रशस्तिः ।

ॐ नमः शिवाय ।

सोमः सोमपवित्रिताधरदलैः संस्तूयते यो द्विजैः
सौम्यैः सामसमूहसङ्गविमलैः सोमार्चित[:] सामगैः ।
कैलासे कलकोकिलालिबहुले देवैश्च दैत्यादिभिः
सोऽव्यात्सोमसुधावपुर्भुवि भवो भावान्वितान्भक्तिदः ॥
योगी योगिवरैरगे गणगणैर्यक्षैश्च यक्षालये
सिद्धैः सिद्धिबलैरलं सुखनिधिर्लोके च लोकाधिपैः ।
विद्यापादविलेपनादिविभवैर्विद्याधरैः सादरं
पूज्यो यः सततं समाधिकुसुमैर्भावोज्ज्वलैः सोऽवतात् ॥
त्यक्त्वामात्यनृपे कलावपि सुधीः सत्त्वोज्झितप्राणिनि
सत्योपेतगुणाकरो नययुतस्त्यागी क्षमी योगवित् ।
शूर[:] क्रूरजनं प्रति क्रमवशाच्छ्रीपुण्ययुक्तं कुलं
त्यक्त्वासौ धनसंपदोऽवकुलजः श्रीयोगचर्यां गतः ॥

तेनेदं सुसमाहितेन मनसा संरक्षणायापदां
शंभोश्चारुसु(शु)भैरकारि भवनं षाषाणकूटैरिदम् ।
आस्ते यत्र झरेश्वरः सह गणैः शंभुर्विभूर्भूतिद-
स्तीर्थान्यत्र समाहितान्यवितथं श्रीपुष्करादीन्यपि ॥
[1]यं दृष्ट्वापि कथाप्रपञ्चरचनान्नामादिसंकीर्तना-
त्संपर्काद्यदि कौतुकाद्भुवि जनः कुर्यादथाराधनम् ॥
त्यक्त्वा पापमशेषमुग्रभयदं पापैः समापूर्यते ॥
संवत् ७८३ चैत्रे सुदि ९ पञ्चम्यां निधनमिङ्

(इण्डियन् आण्टिक्केरी १३।२५०-२५१)

---

(६६)

यादव-सेउणचन्द्रनृपतेर्दानपत्रम् ।

ॐ स्वस्ति जयोऽभ्युदयश्च ।

त्रैलोक्येशः सृजति भगवाँल्लब्धमाहात्म्यतेजा-
श्चित्ताराध्यः परमतपसां योगिनां ध्यायतां यः ।
अप्रत्यक्षं भवति विबुधानामपि प्रायशोऽसौ
देवः सोऽयं यदुपतिपतेः शंकरः शंकरो नु ॥
आदौ ख्यातदृढप्रहारनृपतिः श्रीविष्णुरूपः स हि
त्वायातो निजवंशशेखरतनुर्द्वारावतीपत्तनात् ।
संग्रामे रिपुहस्तिपत्तिशिरसां संच्छेदभेदे दृढ-
श्चन्द्रादित्यपुरं प्रसिद्धमकरोत्प्राक्संभवं यो भुवि ॥
श्रीमत्सेउणचन्द्रनामनृवरस्तस्मादभूद्भूमिपो
नित्यं देशे[2]·········पदातिविषये सन्नाम संपादयन् ।
येनाकारि पुरं च सेउणपुरं श्रीसिन्दिनेरे वरे
तत्पुत्रः कुलदीपको गुणनिधिः श्रीद्वाडियप्यस्ततः ॥

---

१. पादत्रयमेव लब्धम्. २. त्रुटिचिह्नमादर्शपुस्तके नास्ति.

आसीत्सत्तदशेषभूतलशशी श्रीमान्बृहद्भिल्लिमः
श्रीराजस्तदनन्तरं नरपतिर्जाल्लो महीमण्डनः(म्) ।
अर्वाक्तस्य बभूव भूतलहरिः श्रीवद्दिगाख्यो नृप-
स्तस्माच्छ्रीवरभिल्लमक्षितिपतेः प्रत्यक्षधर्माभवत् ॥
भार्या यस्य च झञ्झराजतनया श्रीले[१]स्थियअब्वाह्वया
धर्मत्यागविवेकबुद्धिसुगुणा श्रीराष्ट्रकूटान्वया ।
याजातानवबालनाजसमये यदन्वया(यद्वंशजा) धारिता
सप्ताङ्गोद्यतराज्यभारधरणाद्राज्यत्रयाध्यार्तेतः ॥
चालुक्यान्वयमण्डलीकतिलकाच्छ्रीगोगिराजाकरा-
दुत्पन्ना दुहितात्रयाद्गुणवती धाम्ना कुलद्योतिता(का) ।
स्त्रीरत्नं बत वेधसा प्रकटितं सामन्तरत्नासया(?)
श्रीनाइ(ई)यलदेविनामसुभगा श्रीपट्टराज्ञी सदा ॥
श्रीतेसूकमहीपतिः समभवद्यस्याङ्गश्लिष्टा(?) ततः
श्री[मद्]भिल्लमधराधरः(भूपतिः) समुदितः श्रीमण्डलीकाख्यया ।
त्रैलोक्यं निजवंशकीर्ति[[२]कलया] संभूषयन्यादवो
दक्षो दुष्कृतिमर्दनस्य चरणौ सयूजयन्भूतले ॥
दोर्दण्डप्रबलासिघातनिहतः सग्रामरामेण [भू-]
शक्रः श्राहवमल्लदेवनृपते प्रौढाङ्गकारेण हि ।
शश्वल्लब्धसुचक्रवर्तिपदकालंकारिणा राजसु
संसारस्थिति[[३]कारकेण] गुणिना तेनोद्धवद्धर्मिणा ॥
यस्यार्धाङ्गनिषक्तसुन्दरतनुः प्रत्यक्षलक्ष्मीगुणा
हाम्मा श्रीजयसिंहदेवदुहिता श्रीअब्वल(ल्)देवी सती ।
या चात्राहवमल्लदेवभगिनी चालुक्यवंशान्वया(शोद्भवा)
श्रेष्ठा कायविशेषकारणपदे सद्धर्मपत्नी क्षितौ ॥

---

१. 'लस्थि अब्बा' 'लच्छि अब्बा' इति शोधितः पाठः. २. 'निर्मलतया' इत्यादर्शस्थपाठे छन्दोभङ्गः, वा 'कीर्ति'शब्दनिष्काशने 'निजवशनिर्मलतया' इति पाठः. ३. 'भातकेन' इति मुद्रितः पाठः.

तद्वंशोद्भवसेउणेन्दुनृपतिर्जातोऽत्र धर्माधिकः
सर्वान्भूवलयाश्रितान्क्षितिपतीन्निर्जित्य शौर्यासिना।
राज्यं येन समुद्धृतं सतिलकं स्वर्गं गते भिल्लमे
यद्वत्सूकररूपसाम्यहरिणा लोकत्रयं चोद्धृतम् ॥

गोत्रान्वये यमनियमस्वाध्यायध्यानानुष्ठानरतपरमशैवश्रीसोमदेवाचार्याः, तस्य (तेषां) शिष्याः परमगुरुभक्तिसंपन्ना अनेकशिवागमतत्त्वज्ञाः शब्दशास्त्रविशारदा दीक्षापरीक्षादानसमर्थाः श्रीमत्सर्वदेवाचार्या राजगुरवः तेभ्यः शकसंवत् एकनवत्यधिकनवशतेषु सवत् ९९१ सौम्यसंवत्सरीयश्रावणसुदि चतुर्दश्यां गुरुदिने राजगुरोर्मणित्व(?) (गुरुनिमित्त) दक्षिणायां पादप्रक्षालनार्घ्यादिकं कृत्वा श्रीसेउणचन्द्रमहामण्डलेश्वरेण अतिभक्तितत्परेण महाप्रचण्डदण्डनायक[ः] श्रीधर। महामात्यश्रीवासुदेवैय। महाप्रधाननायकश्रीभभियाक। संधिविग्रहिश्रीनायक। पातलकरणीश्रीभरवैयानायक। राजाध्यक्षश्रीआपैयाक। महत्तमश्री आमादित्यो मौलिकृतहस्तद्वयेन सह सद्भिर्धर्मार्थप्रेरकैः सततं सकलपरिग्रहविदितं सिंहिग्रामद्वादस(श)के चिञ्चुलिग्रामः प्रदत्तः। तस्य च आघाटनानि पूर्वदिग्भागे डोङ्गरदन्त। आग्नेय्यां डोङ्गरसत्क उत्तरपानीयप्रवाहः। दक्षिणे चिञ्चालानामतडाग। नैर्ऋत्ये वडगम्भाग्राम पूर्वतो डोङ्गरदन्त। पश्चिमे तलठेलीपर्यन्त। वायव्ये तलाडलीच। उत्तरतो(तः) सिंसिग्रामीय डोङ्गरदन्ततथा वटवृक्षश्च। ईशान्यां महुयग्रामीयनीगुडीयालानाम तडागं तयसे वै। इत्यष्टसीमोपलक्षितः सवृक्षमालाकुलः स्वसीमापर्यन्तः सकाष्ठतृणोदकः समस्तद्रव्योपायसमन्वितः स्वचक्रपरचक्रोत्थितविदुलादिद्रव्योपक्षयाद्युपद्रवादिविवर्जितः अकरवातोत्तरः सर्वभोगसमन्वितः परिपालनीयः।

सामान्योऽयं धर्मसेतुर्नृपाणा काले काले पालनीयो भवद्भिः।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ॥

मद्वंशजा वा परवंशजा वा ये पुण्यवन्तो मम धर्ममेवम्।
प्रपालयिष्यन्ति नृपास्तु सर्वे कृताञ्जलिः सादरमाह सर्वान् ॥

यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यतुल्यानि भवन्ति तानि को नाम साधुः पुनराददीत ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
गयागोदावरीगङ्गाप्रयागादिषु दानतः ।
यत्फलं तत्फल सर्वं भवेद्भूमिप्रपालनात् ॥
परत्र संवलं(मतं) दिव्यं भूमिदानात्परं नहि ।
तस्मात्सर्वादरेणापि भूमिदानं प्रपालयेत् ॥
रत्नान्नपानगोष्ठयाद्यं सर्वं भूमौ प्रजायते ।
तस्माद्भूमिप्रदानेन नरो भवति सर्वदः ॥
देवस्वानि हरन्तीह नरा नरकनिर्भयाः ।
ब्रह्मस्वानि तु ये मोहात्पच्यन्ते नरकेषु ते ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
दिव्यं(षष्टिः) वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
वापीकूपतडागैश्च वाजपेयशतैरपि ।
गवां कोटिप्रदानेन भूमिहर्ता न शुध्यति ॥
भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
द्वावेतौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ ॥
चन्द्रार्कौ च तथा भूमिर्नभस्तापनवानिलः (?)।
तारकाश्चानलश्चैव धर्मराजस्तथैव च ॥
तिस्रः संध्यास्त्रयोवेदास्त्रयोदेवास्त्रयोऽग्नयः ।
अहोरात्रं च(त्रश्च) दानस्य एते वै साक्षिणः स्मृताः ॥
हर्ता देवस्य यो भूमिं ब्राह्मण(स्या)पि यो हरेत् ।
स्वदत्तां परदत्तां वा स याति नरकं नरः ॥
सर्वं वा भूमिहरणाद्धृतमेव न संशयः ।
भूमिहर्ता वसेत्तस्मान्नरके कालमक्षयम् ॥

यावत्सूर्यशशाङ्कौ च यावद्भूधरसागराः ।
तावत्पुत्रप्रपौत्रेभ्यो[1] ग्रामः पाल्यो नृपोत्तमैः ॥

पूर्वलोकैः प्रदत्तं देवब्राह्मणसहितं पालनीयं राज्ञानुतुष्टेन निरन्तरमिति शासनं समाप्तम् । पातलकरणीभरथनायकप्रतिहस्तकप्रेकरयेण लिखितम् । स्तंबुसुतः(त)सेकारेयानैयकेन घटितम् । मङ्गलं महाश्री[:] ॥

(इण्डियन् आण्टिक्केरी १२।११९-१२१)

(६७)

यादव-सेउणदेवनृपतेर्द्वितीयं दानपत्रम् ।

ॐ पञ्चपरमेष्ठिभ्यो नमः ।

स्वस्ति श्रीशकसंवत् १०६३ दुन्दुभिसंवत्सरान्तर्गतज्येष्ठसुदि पञ्चदश्यां सोमेऽनुराधानक्षत्रे सिद्धयोगेऽस्यां संवत्सरमासपक्षदिवसपूर्वायां तिथौ समधिगताशेषपञ्चमहाशब्दद्वारावतीपुरपरमेश्वरविष्णुवंशोद्भवयादवकुलकमलकलिकाविकासभास्करयादवनारायणसामन्तपितामहसामन्तअमरा इत्यादिसमस्तनिजराजावलीविराजितमहासामन्तश्रीसेउणदेवविजयराज्ये तत्पादप्रसादावाप्तमहामहत्तमप्रतापसतापितवैरिवर्गः संग्रामशौण्डः शूरवैरिघटाविमर्दनकण्ठीरवोऽनवरतदानार्द्रीकृतदक्षिणकरप्रकोष्ठो निशितनिस्त्रिंशविदारितारातिकरिकुम्भस्थलगलितमुक्ताफलमण्डितरणाङ्गनो मनस्विनीमानोन्मूलनकंदर्पो दर्पाधर्मरहितशौर्यौदार्यदयादाक्षिण्यधर्मगुणसत्वोत्साहमन्त्रशीलसंपन्नः प्रजापालनानन्दशत्रुपराजयानन्दतोषितः कीर्तिप्लावितदिग्वलयोऽनेकराजनीतिशास्त्रोक्तवर्धितबुद्धिकौशलसहस्रविज्ञानप्रभुत्वमन्त्रोत्साहशक्तिसामर्थ्यरूपलावण्यविचित्रवक्तव्यताभोगोपभोगराष्ट्रकौशलाद्यनेकविषयगुणगणालंकृतो व्यर्थीकृतपरिपन्थिमनोरथः संग्रामविजयलक्ष्यालानस्तम्भः रत्नाकर इवा[2]नन्तगाम्भीर्ययुक्तः हिमाद्रिरिवा[3]परिमितमहिमान्वितः षाड्गुण्य-

१. 'प्रपौत्रादिभ्यः' इति मुद्रितः पाठः. २. पक्षे अनन्तो विष्णुः, गाम्भीर्यमगाधता च. ३. वासवदत्ताश्लेषहरणेऽपि पक्षे क्लिष्टोऽर्थः.

संपन्नाविपर्यतानिष्ठः देवद्विजगुरुवराचार्यसाधुपूजाभिरतः दीनानाथोद्धारणक्षमः रविरिव प्रतिदिवसोपचीयमानोदयः परिहासप्राकारः ईदृग्गुणविशिष्टश्रीपाणुमडउरीसर्वव्यापारे कुर्वति सतीत्येतस्मिन्काले प्रवर्तमाने श्रीसेउणाख्येन महानृपेण प्रधानयुक्तेन विचार्य भक्त्या देवाय चन्द्रद्युतये प्रदत्तं हट्टद्वयं भारविवर्जितं च । श्रीसाधुवत्सराजेन स्वकुलतिलकभूतेन देवद्विजगुरुवराचार्यपूजाभिरतेन श्रीलाथसाधुना स्वकीयं हट्टदानं कृतं तथा गृहदानं च कृतम् ।

चन्द्र[प्र]भाय देवाय कंदर्पदहनाय च ।
विशुद्धदेहरूपाय सर्वसत्त्वहिताय च ॥

तथा नगरे वर्षं प्रति द्रम्मपञ्चकं कृतम् ।

आयुः पुत्रा धनं सौख्यं सौभाग्यं राज्यमक्षयम् ।
आभिश्रेष्ठ्यं यशः स्वर्गं भूमिदो लभते फलम् ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
दाता चैवानुमन्ता च स्वर्गस्योपरि तिष्ठति ।
हर्ता हारयिता भूमेः पच्यते रौरवे ध्रुवम् ।
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिर्वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥

श्रीकोल(ले)श्वरपण्डितसुतेन दुष्टगणकगजकण्ठीरवेण साधुगणकचरणारविन्दमकरन्दलुब्धषट्पदेन श्रीदिवाकरपण्डितेन हट्टशासनमिदं शैल(शिला)पट्टे लिखितमिति⋯⋯मङ्गलं महाश्री[ः]

(इण्डियन् आण्टिक्केरी १२।१२७-१२८)

---

(६८)

श्रीविजयादित्यमहाराजानां दानपत्रम् ।

स्वस्ति श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां

---

१. कादम्बरीश्लेषोऽयम्. २. आदर्शे गद्यसक्रान्तोऽय श्लोकः.

कौशिकीवरप्रसादलब्धराज्यानां मातृगन(ण)परिपालितानां स्वामिमहासेनपादानुध्यातानां भगवन्नारायणप्रसादसमासादितवरवराहलाञ्छनक्षणक्षणवशीकृतारातिमण्डलानामश्वमेधावभृथस्नानपवित्रीकृतवपुषां चालुक्यानां कुलमलंकरिष्णोः सत्याश्रयवल्लभेन्द्रस्य भ्राता **कुब्जविष्णुवर्धनो**ऽष्टादशवर्षाणि **वेङ्गीदेशमपालयत्** । तदात्मजो **जयसिंहस्त्रयस्त्रिंशतम्** । तदनुजे**न्द्रराजनन्दनो विष्णुवर्धनो** नव । तत्सूनु**र्माङ्गियुवराजः** पञ्चविंशतिम् । तत्पुत्रो **जयसिंहस्त्रयोदश** । तदवरजः **कक्किलिः** षण्मासान् । तस्य ज्येष्ठो भ्राता **विष्णुवर्धन**स्तमुच्चाट्य सप्तत्रिंशतम् । तत्पुत्रो **विजयादित्य**भट्टारकोऽष्टादश । तत्सुतो **विष्णुवर्धनः** सप्तत्रिंशतम् । तत्सुतो **विजयादित्य**नरेन्द्रमृगराजश्चाष्टचत्वारिंशतम् । तत्सुतः **कलिविष्णुवर्धनो**ऽध्यर्धवर्षम् । तत्सुतो **गुणगाङ्कविजयादित्य**श्चतुश्चत्वारिंशतम् । तदनुज**विक्रमादित्य**भूपतेः सूनुश्चालुक्य**भीमभूपाल**स्त्रिंशतम् । तत्पुत्रः **कोल्लभिगण्डविजयादित्यः** षण्मासान् । तत्सूनु**रम्मराजः** सप्त वर्षाणि । तत्सुतं **विजयादित्यं** बालमुच्चाट्य **तालपो** मासमेकम् । तं जित्वा **चालुक्यभीमतनयो विक्रमादित्य** एकादश मासान् । ततस्तालपराजस्य सुतो **युद्धमल्लः** सप्त वर्षाणि । तत्पुत्रः **कोल्लभिगण्डविजयादित्य**सुतो **भीमराजो** द्वादश वर्षाणि ।

तस्य महेश्वरमूर्तेरुमासमानाकृतेः कुमाराभः ।
लोकमहादेव्याः खलु यः समभव**दम्मराजाख्यः** ॥

जलजातपत्रचामरकलशाङ्कुशलक्षणाङ्ककरचरणतलः ।
लसदाजान्ववलम्बितभुजयुगपरिघो गिरीन्द्रसानूरस्कः ॥

यो रूपेण मनोजं विभवेन महेन्द्रमहिमकरमुरुमहसा ।
हरमरिपुरदहनेन न्यक्कुर्वन्भाति विदितदिगवनिकीर्तिः ॥

स सकलरिपुनृपतिमुकुटतटघटितमणिगणमधुकरनिकरपरिचुम्बितचरणसरसीरुहयुगलो युगलोचनपदकमलविलसद्द्विरेफायमानो मानोन्नतानतोद्धतसमस्तलोकः समस्तभुवनाश्रयश्री**विजयादित्य**महाराजाधिराजः **परमेश्वरः**

परमभट्टारकः परमब्राह्मण्यः वेलनान्दुविषयनिवासनो राष्ट्रकूटप्रमुखान्कुटुम्बिनः समाहूयेत्थमाज्ञापयति—

विद्वत्कवीन्द्रप्रभवं प्रसिद्धं पूज्योदयं भूरिगुणाधिवासम् ।
धर्मिष्ठभूमिर्नियमस्वधाम पात्रं परं काश्यपगोत्रमासीत् ॥
तत्र भूसुरयथोचितविद्याकर्मशक्तविधिनिर्मलदेहः ।
वेदविद्विदितशास्त्रसमूहो **विद्दमय्य** इति विश्रुतकीर्तिः ॥
भूदेववंशाम्बुधिशीतरश्मिर्विद्वत्सरोजाकरभानुभानुः ।
तत्सूनुरम्भोजभवोपमानो विद्यामयो **विद्दमय**प्रसिद्धः ॥
अरुन्धत्या विशिष्टस्य वशिष्टस्योपमामयात् ।
पतिव्रतात्मया धर्मपत्न्या यश्चा**नमव्वया** ॥
कुलक्रमायातमुदारभावमनन्यदृष्टाश्रुतपूर्वरूपम् ।
दव(ध)द्धराधारिधरोपमानस्तयोः सुतः **कोरमिया**भिधानः ॥
श्रीलोकमहादेव्या समवर्ध्यत योऽसदम्बया प्रीत्या ।
चातुर्यनागरकयोरावासस्थानमिति मनोहरयोः ॥
अपहसति वाग्मिता वाग्वनितां यत्र स्थिता महाचतुरे ।
असुजनधरानागरिकजलजभवबहुमुखप्रियं सततम् ॥
उत्पद्यते प्रसङ्गात्सुजनतया त्वात्मसहजया यस्य ।
विभवः पतिप्रशंस्यश्चित्रमिदं साधुवाद इति ॥
रसिकानामतिरसिकश्चतुराणामधिकचतुर एवायम् ।
कोरमियनामधेयो विदुषामत्यन्तविज्ञानी ॥
सेवितसमस्तभूपतिहृदयस्थितिभाग्गुणोपपन्नोऽमूल्यः ।
मुक्ताफलसच्चरितः कोरमियो वस्तुपुरुष इत्युपपन्नम् ॥
अनागतज्ञानविवेकिनी धीरनिन्द्यचारित्रपरे हि चेष्टा ।
अशेषभोगोपगतं मनश्च अहो मह**त्कोरमिय**स्य पुण्यम् ॥

तस्मै कूरमियनाम्ने सुवर्णभाण्डागारश्रीकरणमुख्याय । **एलवक्र**नामग्रामः सर्वकरपरिहारेणाग्रहारीकृत्योदकपूर्वमुत्तरायणनिमित्तेऽस्माभिर्दत्त इति वि-

दितमस्तु वः । अस्यावधयः—पूर्वतः—**गोमदूअनु** सीमा, आग्नेयतः—**डग्गूर्वांटि** सीमा, दक्षिणतः—**इंथूरी** सीमा, नैर्ऋतिपश्चिमाभ्यां—**प्रेमपरती** सीमा, वायव्यतः—**तूरीमिण्डी** सीमा, उत्तरेशानाभ्यां—**अमुद्दनूरी** सीमा ॥ अस्योपरि न केनचिद्बाधा कर्तव्या । यः करोति स पञ्चमहापातको भवति । तथोक्तं व्यासेन—

बहुभिर्वसुधा दत्ता बहुभिश्चानुपालिता ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ।
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः ॥

आज्ञापतिः **कटकराजः । पोटनभट्टः** काव्यम् । **जोन्ताचार्य**लिखितम् ॥

(इण्डियन् आण्टिक्केरी १२।९१-९३)

---

(६९)

वलभीवल्लभशासनपत्रम् ।

ॐ स्वस्ति वलभीतः प्रसभप्रणतामित्राणां मैत्रकाणामतुलबलसंपन्नमण्डलाभोगसंसक्तप्रहारशतलब्धप्रतापोपनतदानमानार्जवोपार्जितानुरागादनुरक्तमौलभृतश्रेणीबलावाप्तराज्यश्रियः परममाहेश्वरश्रीभटार्कादव्यवच्छिन्नराजवंशान्मातापितृचरणारविन्दप्रणतिप्रविधौताशेषकल्मषः शैशवात्प्रभृति खड्गद्वितीयबाहुरेव समदपरगजघटास्फोटनप्रकाशितसत्त्वनिकषस्तत्प्रभावप्रणताराातिचूडारत्नप्रभासंसक्तपादनख(र)श्मिसंहतिः सकलस्मृतिप्रणीतमार्गसम्यक्परिपालनप्रजाहृदयरञ्जनान्वर्थराजशब्दो रूपकान्तिस्थैर्यगा[म्भी]र्यबुद्धिसंपद्भिः स्मरशशाङ्काद्रिराजोदधित्रिदशगुरुधनेशानतिशयानः शरणागताभयप्रदानपरतया तृणवदपास्ताशेषस्वकार्यफलप्रत्यर्थनाधिकार्थप्रदानानन्दितवद्वत्सुहृत्प्रणयिहृदयः पादचारीव सकलभुवनमण्डलाभोगप्रमोदः परममाहेश्वरः **श्रीगुहसेनः,** तस्य सुतस्तत्पादनखमयूखसंतानविसृतजाह्नवीजलौघप्रक्षालिताशेषकल्मषः प्रणयिशतसहस्रोपजीव्यमानसंपद्रूपलोभादिवा-

श्रितः सरभसमाभिगामिकै[र्गुणैः] सहजशक्तिशिक्षाविशेषविस्मापिताखिल-
धनुर्धरः प्रथमनरपतिसमतिसृष्टानामनुपालयिता धर्मदायानाम्, अपाकर्ता
प्रजोपघातकारिणामुपप्लवानाम्, दर्शयिता श्रीसरस्वत्योरधिवासस्य, संहता-
रातिपक्षलक्ष्मीपरिभोगदक्षविक्रमो विक्रमोपसंप्राप्तविमलपार्थिवश्रीः परममा-
हेश्वरः **श्रीधरसेनः**, तस्य सुतस्तत्पादानुध्यातः सकलजगदानन्दनात्यद्भुत-
गुणसमुदयस्थगितसमग्रदिङ्मण्डलः समरशतविजयशोभासनाथमण्डलाग्रद्यु-
तिभासुरतरांसपीठोदूढगुरुमनोरथभारः सर्वविद्यापरावरविभागाधिगमविमल-
मतिरपि सर्वतः सुभाषितलवेनापि सुखोपपादनीयपरितोषः समग्रलोका-
गाधगाम्भीर्यहृदयोऽपि सुचरितातिशयसुव्यक्तपरमकल्याणस्वभावः खिलीकृ-
तयुगनृपतिपथविशोधनाधिगतोदग्रकीर्तिर्धर्मानुपरोधोज्ज्वलतरीकृतार्थसुखसं-
पदुपसेवानिरूढधर्मादित्यद्वितीयनामा परममाहेश्वरः **श्रीशीलादित्यः**, त-
स्यानुजस्तत्पदानुध्यातः स्वयमुपेन्द्रगुरुणेव गुरुणात्यादरवता समभिलषणी-
यामपि राजलक्ष्मीं स्कन्धासक्तां परमभद्र इव धुर्यस्तदाज्ञासंपादनैकरसत-
यैवोद्वहन्खेदसुखरतिभ्यामनायासितसत्त्वसंपत्तिः प्रभावसंपद्वशीकृतनृपतिश-
तशिरोरत्नच्छायोपगूढपादपीठोऽपि परावज्ञाभिमानरसानालिङ्गितमनोवृत्तिः
प्रणतिमेकां परित्यज्य प्रख्यातपौरुषाभिमानैरप्यरातिभिरनासादितप्रतिक्रि-
योपायः कृतनिखिलभुवनामोदविमलगुणसंहतिः प्रसभविघटितसकलकलि-
विलसितगतिर्नीचजनाधिरोहिभिरशेषैरनामृष्टात्युन्नतहृदयः प्रख्यातपौरुषा-
स्त्रकौशलातिशयगणतिथविपक्षक्षितिपतिलक्ष्मीस्वयंग्रहप्रकाशितप्रवीरपुरुष-
प्रथमसंख्याधिगमः परममाहेश्वरः **श्रीखरग्रहः**, तस्य तनयस्तत्पादानु-
ध्यातः सकलविद्याधिगमविहितनिखिलविद्वज्जनमनःपरितोषातिशयः सत्त्व-
संपदा त्यागौदार्येण च विगतानुसंधानाशमाहितारातिपक्षमनोरथाक्षभङ्गः
सम्यगुपलक्षितानेकशास्त्रकलालोकचरितगह्वरविभागोऽपि परमभद्रप्रकृतिर-
कृत्रिमप्रश्रयविनयशोभाविभूषणः समरशतजयपताकाहरण[प्रत्य]लो(?)दग्र-
बाहुदण्डविध्वंसितनिखिल— (अग्रे त्रुटितम्)

(इण्डियन् आण्टिक्वेरी १२।१४८–४९)

(७०)

श्रीजाइकदेवानां दानपत्रम् ।

ॐ स्वस्ति विक्रमसंवत्सरशतेषु सप्तसु चतुर्नवत्यधिकेष्वङ्कतः ७९४ कार्तिकमासापरपक्षेऽमावास्यायामादित्यवारे ज्येष्ठानक्षत्रे रविग्रहणपर्वणि—अस्यां संवत्सरमासपक्षदिवसपूर्वायां तिथावद्येह **भूमिलिकायां सौराष्ट्र**मण्डलाधिपतिः परमभट्टारकमहाराजाधिराजपरमेश्वरः श्री**जाइकदेवो** महामात्यभट्ट**नारायण**धर्मसहायानुमतेन संसारस्यानित्यतां ज्ञात्वात्मधर्मयशोभिवृद्धये रवेरुपरागसमये धर्मकालमपेच्छय(क्ष्य) चतुर्वेदविदे.... संतानाय मुन्त(द्ग)लगोत्राय त्रिप्रवरायेश्वरनाम्ने ब्राह्मणाय **तद्धेनिका**नाम ग्रामं सतृणकाष्ठजलं सवृक्षमालाकुलं देवदायवर्जमुदकपूर्वं भूमिलिकामण्डलमध्ये दत्तवान् । इदानीं कालान्तरमुक्तिनिश्चयकरणार्थमस्य ग्रामस्य चतुर्दिशमाघाटा लिख्यन्ते—उत्तरभागे सामापखे(क्षे)त्रे समुद्रः, पूर्वभागे सवनगरुजा नालिका रोहरधारासमेता, दक्षिणभागे सयलाशतकान्तगरिचा नदी यावत् । पश्चिमभागे पर्वतस्य धारा समुद्रगामिनी । एवं चतुर्घाटाविशुद्धां तद्धनिकाग्रामभूमिमीश्वरनामा ब्राह्मणो भुञ्जन्भोज[य]न्वा न केनापि परिपन्थनीयः ।

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
मयि राज्ञि व्यतिक्रान्ते योऽन्यो राजा भविष्यति ।
तस्याहं करलग्नोऽस्मि शासनं न व्यतिक्रमेत् ॥

लिखितमिदं शासनं महाक्षपटलिकेन नरहरिनाम्ना मयेति ॥ शिवमस्तु ॥

(इण्डियन् आण्टिक्केरी १२ । १५५)

---

(७१)

मङ्गलपुर(मङ्गरोल)समुपलब्धा वापीप्रशस्तिः ।

ॐ नमः शिवाय ।

मुकुटः स हरस्य पातु वः शशिपङ्केरुहकन्दकाङ्क्षया ।
गमनादचिरेण यत्र सा सुरहंसीव पपात जाह्नवी ॥

कृत्वा राज्यमुपारमन्नरपतिः **श्रीसिद्धराजो** यदा
दैवादुत्तमकीर्तिमण्डितमहीपृष्ठो गरिष्ठो गुणैः ।
आचक्राम झटित्यचिन्त्यमहिमा तद्राज्यसिंहासनं
श्रीमानेष **कुमारपाल**नृपतिः पुण्यप्ररूढोदयः ॥
राज्येऽमुष्य महीभुजोऽभवदिह श्रीगूहिलाख्यान्वये
श्रीसाहार इति प्रभूतगरिमाधारो धरामण्डनम् ।
चौलुक्याङ्गनिगूहकः **सजहिगः** ख्यातस्तनूजस्तत-
स्तत्पुत्रा बलिनो बभूवुरवनौ सौराष्ट्ररक्षाक्षमान् ॥
एषामेकतमो वीरः **सोमराज** इति क्षितौ ।
विख्यातो विदधे देवं पितुर्नाम्ना महेश्वरम् ॥
श्री**सोमनाथदेव**स्य जगत्या पुण्यवृद्धये ।
इन्दुकुन्दयशाश्चक्रे कीर्तिं मेरुसमाश्रितम् ॥
पूजार्थमस्य देवस्य भ्राता ज्येष्ठोऽस्य **मूलुकः** ।
सुराष्ट्रानायकः प्रादाच्छासनं कुलशासनम् ॥

ठ[क्कुर]श्रीसहजिगपुत्रठ[क्कुर]श्रीमूलुकेन श्री**सहजिगेश्वरदेव**स्यानवरतपञ्चोपचारपूजाहेतोः श्रीमन्**मङ्गलपुर**शुल्कमण्डपिकायां दिनं प्रति का[र्षापणम्] १, तथा तलाराभाव्यमध्याद्दिनं प्रति का[र्षापणम्] १, तथा बलीवर्दछाटमाणकाभाव्येछाटां प्रति का० १, कणभृतगडकं प्रति का० १, तथा रासभछाटां प्रति का० ॥, तथा समस्तलोकेन निःशेषवल्लीकारैश्च पत्रभरावीडहरा केरी चाडुया प्रभृतीनां प्रत्येकं का० ॥, तथा पत्रभृत उंटभरकं प्रति का० २॥, पत्रभृतगन्त्रीं प्रति द्रम्मः १, क्षेत्रं प्रति उच्चताभाव्ये का० १, तथा आगरमध्ये खुंटितखरालिसाहा प्रति का० १, तथानयैव स्थित्या चोरुया वडे वलइजे च ग्राह्यम् । तथा लाठिवद्रापथके वहन्तशुल्कमण्डपिकामध्याद्दिनं प्रति ठ०श्रीमूलुकेन रूपकैकः प्रदत्तः । तथा चोरूयावडेऽन्यसमस्तबृहत्पुरुषैरेकमतीभूय चतुराघाटनविशुद्धा यथाप्रसिद्धपरिभोगा सवृक्षमालाकुला वीसणवेलीग्राममार्गसमासन्ना देगयावावी

नाम वापी राजानुमत्या श्रीसहजिगेश्वराय प्रदत्ता । तथा श्रीवामनस्थल्यां शुल्कमण्डपिकायां दिनं प्रति का० १, तथा द्यूतमध्ये दिनं प्रति का० १, तथा पत्रकुट्या भरां प्रति पत्रशत १, तथा वीडहरा करी वाटुयाप्रभृतीनां प्रत्येकं पत्र ५०, तथा तलाराभाव्यमध्यात्ताम्बूलिकहट्टं प्रति प्रतिदिनं पत्र २, मडावा पू ॥ १,

देवदाय[ः] समस्तोयं समस्तैर्भाविभूमिपैः ।
पालनीयोऽनुमान्यश्च दानाच्छ्रेयोनुपालनम् ॥
शिवः पात्रं जनो दाता पालकः पुण्यभाक्परम् ।
लोपकृच्च महापापी विचार्यैवं प्रपालयेत् ॥

यत उक्तं च—

बहुभिर्वसुधा वु(भु)क्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

श्रीमद्विक्रमसवत् १२०२ तथा श्रीसिंहसवत् ३२ आश्विनवदि १३ सोमे प्रशस्तिरियं नि[र्मिता] । कृतिरियं परमपाशुपताचार्यमहापण्डितश्रीप्रसर्वज्ञस्य ॥

(भावनगरप्राचीनशोधसंग्रहे १५८–७)

(७२)

उदयपुरवायव्यकोणे सारणेश्वरमहादेवमन्दिरोपलब्धलेखः ।

ॐ ।

पान्तु पद्माङ्गसंसङ्गचञ्चद्रोमाञ्चवीचयः ।
श्यामाः कलिन्दतनयापूरा इव हरेर्भुजाः ॥

राज्ञी महालक्ष्म्यभिधानविश्रुता
तदङ्गजोऽप्यल्लटमेदिनीपतिः ।
तदीयपुत्रो नरवाहनाभिधः
सगुन्दलः सोढकसिद्धसीलुकाः ॥

सांधिविग्रहिकदुर्लभराजो मातृदेवसहितः सदुदेवः।
अक्षटाच्छ(क्ष)पटलाभिनियुक्तौ विश्रुतावपि मयूरसमुद्रौ ॥
वसन्तराजद्विजनागरुद्रौ सभूवणौ मावषनारकौ च।
रिपिः प्रमाता गुहिषोऽथ गर्गस्त्रिविक्रमोऽवन्दि(न्ति)पतिश्च नागः ॥
भिषगविराजो रुद्रादित्यो वज्रटलिम्बादियच्छन्नाः।
अम्मुलसंगमवीरसजोज्जा वैश्रवणाविकभक्तिम्मोह[ा]ः ॥
संगमवेल्लकनागाः जज्जेल्लकवासुदेवदुम्बटकाः।
यच्चकाद्या देशी तथा वणिग्देवराजश्च ॥
प्रतीहारयशःपुष्पो रुद्रहासोऽथ राहटः।
धर्मः काष्ठिकसाहारः श्रीधरो वनूटिस्तथा ॥
हूणश्च कृषुराजोऽन्यः सर्वदेवोऽपि गौष्ठिकः।
कृतमायतनं चेदममात्ये मम्मटे सति ॥
पुण्यप्रबन्धपरिपाकिमकीर्तयोऽमी
संसारसागरमसारमिमं गभीरम्।
बुद्धाद्रिराजशिखरोत्थमचीकरन्त
पोतायमानमिदमायतनं मुरारेः ॥
कर्णाटमध्यविषयोद्भवलाटटक्का
अन्येऽपि केचिदिह ये वणिजो विशन्ति।
तैः कल्पितं मधुरिपोः प्रतिपूजनाय
दानं न केनचिदपि व्यभिचारणीयम् ॥
द्रम्ममेकं करी दद्यात्तुरगो रूपकद्वयम्।
द्रम्मार्धविंशकं शृङ्गी लाटहट्टे तुलाढकौ ॥
एकादशीशुक्लदिनेऽखिलायः कन्दूद्धृतां स्याद्घटिका पणस्य।
द्यूतंधराणामपि पे[टकं] स्यादेकैकशस्तैलपणं च घाणे ॥
रन्धनीनां गते मासे रूपकोऽथ चतुःसरम्।
प्रत्यहं मालिकानां च दानमेतदिह स्फुटम् ॥

कार्तिकसितपञ्चम्यामग्रटनाम्ना सुसूत्रधारेण ।
प्रारब्धं देवगृहं काले वसुशून्यदिक्संख्ये ॥
दशदिग्विक्रमकाले वैशाखे शुद्धसप्तमीदिवसे ।
हरिरिह निवेशितोऽयं घटितप्रतिमो वराहेण ॥
तथा निरूपिताशेषश्रीमद**ल्लट**[भूपतिः] ।
लेखितारौ च कायस्थौ **पालवेल्लक**संज्ञकौ ॥
गोपप्रभासमहिधरनारायणभट्टसर्वदेवाद्याः ।
अम्मकसहिताः सर्वे निश्चितमिह गोष्टिका ह्येते ॥

(भावनगरप्राचीनशोधसंग्रहे १।१५–१७)

---

(७३)

भावनगरे महुवाबन्दरग्रामे लक्ष्मीनारायण-मन्दिरोपलब्धलेखः ।

ॐ नमः सर्वज्ञाय ।

स्वस्ति स्वस्तिमति प्रसिद्धनृपतिश्रीविक्रमातिक्रमा-
त्संवद्विष्णुपदद्वयेषुजगतीसंख्ये प्रजानां पतौ ।
मित्रे चोत्तरगे प्रचण्डकिरणे धन्ये मधौ माधवे
शुक्ले पूर्णतिथौ गुरौ च गुरुभे सद्योगभोगक्षणे ॥
बालाकान्तरगे पुरे मधुमतीसंज्ञे निवासोचिते
श्रीमत्कामगवीखुरोद्भवभवे वंशे शिवे संभवः ।
श्रीरामार्पितचामरातपहरप्रौढिप्रतिष्ठान्वितः
श्रेष्ठिश्री**नरपाल** एष समभूच्छ्रीकृष्णसेवापरः ॥
तत्पुत्रोऽतः पवित्रो हरिपरिचरणः श्रेष्ठि**मल्लो**ऽत्र **पल्ह**-
स्तस्मादप्याविरासीदमितवितरणोऽन्वस्य सत्यप्रभावः ।
श्रेष्ठिश्री**राम**नामा कृतसुकृतचयः संयुतो **जानुसत्या**
सन्मत्या विष्णुभक्त्या [नि]वसति सदने ब्रह्मणो वेदवेदः ॥

तदनु जनितपूर्वादुग्रपुण्यप्रभावा-
त्कलिबलदलनोऽयं मोकलो निर्जलायाम् ।
प्रणयति वरवापीं तत्प्रतीचीनभूमौ
मधुरसलिलपूर्णां श्रेयसे तत्र पित्रोः ॥
अनुतिष्ठेदधिष्ठानं मृष्टायां दृष्टनिर्जले ।
स तिष्ठेदिष्टमुद्दिष्टदिष्टं शिष्टैस्त्रिविष्टपे ॥
नीलोद्वाहं यो हरिमेधं सुनिपानं कुर्यात्पुत्रो गोत्रपवित्रोऽभिजनेन ।
दद्यादन्नं भूमिगजाश्वोभयवक्ता भूयाद्भावात्तीर्थसुपर्वद्विजभक्तः ॥
गोहिल्लोऽसौ रणे शूरः सारङ्गः शार्ङ्गिसेवकः ।
तदुर्व्यां कुरुते वापीं धर्मधी**र्मोढमोकलः** ॥
उक्तं च श्रीभारते—
'गोमासे[1] गोगवाक्रान्ते गोरसे गगने गते ।
गोमात्रं गोरसं दद्याद्गोसहस्रफलं लभेत् ॥'
श्रीकान्तं कृतदैत्यान्त देव सेवकवत्सल ।
त्वया विना प्रभुः कोऽत्र ज्ञातुं कर्म क्रियापदे ॥
पुराणपुरुषः पायादपायात्त्वां कृपादृशा ।
जलशायी प्रणीतोऽत्र यो लक्ष्म्या सह मोकलः ।
उक्तं च धर्मारण्यपुराणे—
पुरा सृष्टिसमारम्भे स्वयंभूर्भगवान्स्वयम् ।
अस्थापयन्महास्थानमिदं मोहविमोहनम् ।
धर्मारण्यं कृते प्रोक्तं त्रेतायां सत्यमन्दिरम् ।
द्वापरे वेदभुवनं कलौ मोहेरकं मतम् ॥
स्वस्ति श्रीमन्नृपविक्रमार्कसमयातीतसंवत् १५०० वर्षे प्रजापतिनाम्नि संवत्सरे उत्तरायणे वसन्तऋतौ वैशाखशुक्लपञ्चम्यां गुरौ श्रीमधुमत्याः पश्चिमे प्रदेशे निर्जले माता सतीबाई **जानु**, पिता श्रेष्ठि **श्रीरामा**, भ्रातृ श्रे०

---

१. 'वृषसंक्रमणमासे सूर्यस्य किरणैराक्रान्ते पृथिव्या रसे आकाश गते सति गोतृप्तिजनकं जलरस दद्यात्तर्हि गोसहस्रफलं लभेत्' इत्यर्थः.

राघवश्रेयसे श्रेष्ठिमोकलः भ्रातृसांगलीवासहितो मार्गे शृङ्गाटके मृष्टोदकपूर्णां वापीं निर्मिमीते ॥ श्री ॥

(भावनगरप्राचीनशोधसग्रहे १।६८–७०)

---

(७४)

मरु(मारवाड)देशीय-सादडीग्रामपार्श्वे राणकपुरजैनमन्दिरप्रशस्तिः ।

स्वस्तिश्रीचतुर्मुखजिनयुगादीश्वराय नमः ।

श्रीमद्विक्रमतः १४९६ संख्यवर्षे श्रीमेदपाट(मेवाड)राजाधिराज-श्रीबप्प (१) श्रीगुहिल (२) भोज (३) शील (४) कालभोज (५) भर्तृभट (६) सिंह (७) महायक (८) राज्ञीसुतयुतस्वसुवर्णतुलातोलक-श्रीखुम्भाण (९) श्रीमदल्लट (१०) नरवाहन (११) शक्तिकुमार (१२) शुचिवर्म (१३) कीर्तिवर्म (१४) योगराज (१५) वैरट (१६) वंशपाल (१७) वैरीसिंह (१८) वीरसिंह (१९) श्रीअरीसिंह (२०) चोडसिंह (२१) विक्रमसिंह (२२) रणसिंह (२३) खेमसिंह (२४) सामन्तसिंह (२५) कुमारसिंह (२६) मथनसिंह (२७) पद्मसिंह (२८) जैत्रसिंह (२९) तेजस्विसिंह (३०) समरसिंह (३१) चाहुमानश्री-कीतूकनृप–श्रीअल्लावदीन–सुरत्राणजैत्रबप्पवंश्यश्रीभुवनसिंह (३२) सुतश्रीजयसिंह (३३) मालवेशगोगादेवजैत्रलक्ष्मणसिंह (३४) पुत्र-श्रीअजयसिंह (३५) भ्रातृश्रीअरिसिंह (३६) श्रीहम्मीर (३७) श्री-खेतसिंह (३८) श्रीलक्षाह्वयनरेन्द्र (३९) नन्दनसुवर्णदानपुण्यपरोप-कारादिसारगुणसुरद्रुमविश्रामनन्दन श्रीमोकलमहीपति (४०) कुलकाननपञ्चाननस्य विषमतमाभं सारङ्गपुरनागपुरगागरणनराणकाजयमेरुमण्डोरमण्डलकरबूदीखाट्टचाटसूजानादिनानामहादुर्गलीलामात्रग्रहणप्रमाणितजितकाशित्वाभिमानस्य निजभुजोर्जितसमुपार्जितानेकभद्रगजेन्द्रस्य म्लेच्छमहीपालव्यालचक्रवालविदलनविहंगमेन्द्रस्य प्रचण्डदोर्दण्डखण्डिताभिनिवेशनानादेशनरेशभालमालालालितपादारविन्दस्यास्खलितललितलक्ष्मीविलासगोविन्द-

स्य कुनयगहनदहनदवानलायमानप्रतापतापपलायमानसकलबलूलप्रतिकूल-क्ष्मापश्वापदवृन्दस्य प्रबलपराक्रमाक्रान्तढिल्लीमण्डलगुर्जरत्रासुरत्राणदत्तातपत्रप्रथितहिन्दुसुरत्राणबिरुदस्य सुवर्णसत्रागारस्य षड्दर्शनधर्माधारस्य चतुरङ्गवाहिनीवाहिनीपारावारस्य कीर्तिधर्मप्रजापालनसत्यादिगुणक्रियमाणश्रीरामयुधिष्ठिरादिनरेश्वरानुकारस्य राणाश्रीकुम्भकर्णसर्वोर्वीपतिसार्वभौमस्य विजयमानराज्ये तस्य प्रसादपात्रेण विनयविवेकधैर्यौदार्यशुभकर्मनिर्मलशीलाद्युद्भूतगुणमणिमयाभरणभासुरगात्रेण श्रीमहम्मदसुरत्राणदत्तफुरमाणसाधुश्रीगुणराजसंघपतिसाहचर्यकृताश्चर्यकारिदेवालयाद्याडम्बरपुरःसरः श्रीशत्रुंजयादितीर्थयात्रेण अजाहरि पिण्डरवाटकसालेरादिबहुस्थाननवीनजैनविहारजीर्णोद्धारपदस्थापनाविषमसमयसत्रागारनानाप्रकारपरोपकारश्रीसंघसत्काराद्यगण्यपुण्यमहार्थक्रयाणकपूर्यमाणभवार्णवतारणक्षममनुष्यजन्मयानपात्रेण प्राग्वाटवंशावतंस सं० सागरसुत सं० कुरपालभा० [र्या] कामलदेपुत्रपरमार्हत सं० धरणाकेन ज्येष्ठभ्रातृ सं० रत्ना भा० रत्नादेपुत्र सं० लाषा-सजा-सोना सालिगस्व भा० सं० धारलदेपुत्रजावडादिप्रवर्धमानसंतानयुतेन राणपुरनगरे राणाश्रीकुम्भकर्णनरेन्द्रेण स्वनाम्ना निवेशिततदीयसुप्रसादादेशतस्त्रैलोक्यदीपकाभिधानः श्रीचतुर्मुखयुगादीश्वरविहारः कारितः । प्रतिष्ठितः । श्रीबृहत्तपागच्छे श्रीजगचन्द्रसूरिश्रीदेवेन्द्रसूरिसंताने श्रीमच्छ्रीदेसुन्दरसूरिपट्टप्रभाकरपरमगुरुसुविहितपुरंदरगच्छाधिराजश्रीसोमसुन्दरसूरिभिः ॥ कृतमिदं च सूत्रधारदेपाकस्य । अयं च श्रीचतुर्मुखविहार आचन्द्रार्कं नन्दतात् ॥ शुभं भवतात् ॥

(भावनगरप्राचीनशोधसंग्रह १, ५६–५८)

---

(७९)

बाणासुरवंशीयविक्रमादित्यानां शासनपत्रम् ।

स्वस्ति श्री

यत्तत्वप्रकटीकृतावतितरां वेदोऽपि नालं यतः
स्थित्युत्पत्तिलयाः समस्तजगतां यन्मन्वते योगिनः ।

साक्षान्नम्रसुरेन्द्रवृन्दमुकुटव्यालीनरत्नावली-
शोणांशुव्रजरञ्जिताङ्घ्रियुगलो भूत्यै शिवः सोऽस्तु वः ॥
क्षीरोदं मथितुं मनोभिरतुलं देवासुरैर्मन्दरं
हित्वाक्षिप्त इवाञ्जनाद्रिरिव यस्तत्राधिकं राजते ।
यो भोगीन्द्रनिविष्टमूर्तिरनिशं भूयोऽमृतस्याप्तये
रक्षेद्वः सुरवृन्दवन्दितपत(द)द्वन्द्वः स नारायणः ॥
यः प्रादादसुराधिपो मुखवरे दत्त्वार्घमादाय गां
सद्वीपां सचराचरामधिमुदा देवाय दैत्यद्विषे ।
सोऽभूद्वामनरूपिणे बलिरिति ख्यातः सुरोपद्रव-
व्यापारैकरतः शिवाङ्घ्रिकमलद्वन्द्वार्चनैकव्रतः ॥
तस्मादभूद्गुणनिधिर्बलवांस्तनूजो
यत्राध्यवर्तत महानमलः प्रसादः ।
शंभोः शशाङ्कशकलद्युतिराजिमौले-
र्बाणः कृपाणनिहितारिबलः सुरारिः ॥
तस्यान्ववाये महति प्रसूतः क्षीरार्णवे शीतमरीचिवद्यः ।
बाणाधिराजो युधि शातखड्गखण्डीकृताराातिरखण्डतेजाः ॥
बाणाधिराजप्रमुखेष्वतीतेष्वनेकशो बाणनृपेष्वथान्त्यः ।
अजायतास्मिञ्जयनन्दवर्मा साक्षाज्जयश्रीवसतिः श्रियश्च ॥
स रक्षति स्म क्षितिमेकवीर आन्ध्रात्पथः पश्चिमतो बलीयान् ।
वधूमिवानन्यसमां कुलोत्थां राजन्यचूडामणिरञ्जिताङ्घ्रिः ॥
तस्मादजनिष्ट सुतो **विजयादित्यो**ऽन्तरस्त(स्थ)रिपुवर्गः ।
रणभुवि यस्य न तिष्ठन्त्यरयपयाग्रते(?) भियाक्रान्ताः ॥
तस्मात्समस्तरिपुतक्षणदक्षबाहो-
रक्षीणपुण्ययशसां प्रभवस्तनूजः ।
आसीदनङ्ग इव यो वनिताजनानां
श्रीमल्लदेव इति यो जगदेकमल्लः ॥

तेनाशेषनिरस्तवैरिनिकरो देव्यां हरेणातुलः
पार्वत्यामुदपादि षण्मुख इव श्रीमान्सुतो यः सुधीः ।
यत्कीर्तिर्विशदा दिगन्तकरिणां कर्णेषु सच्चामरी-
भूता भूपतिवन्द्यपादयुगल[ः] **श्रीबाणविद्याधरः** ॥
तस्यात्मजोऽभवदपास्तसमस्तशत्रु-
विद्याचतुष्टयनिविष्टमतिर्विनीतः ।
दुर्वारवीर्ययशसां प्रभवस्तरस्वी
यः पापदुःखरहितः **प्रभुमेरुदेवः** ॥
अभवदनुपमश्रीराननतारातिवर्ग-
प्रथितपृथुलकीर्तिः सूनुरस्माद्विनीतः ।
क्षितिपतिकुलमुख्यः पार्वतीशाङ्घ्रिपद्म-
द्वयनिहितमतिर्यो **विक्रमादित्य**नामा ॥
तस्यापि **विजयादित्य**नामधेयोऽभवत्सुतः ।
यद्विक्रमेण वित्रस्ताः पलायन्तेऽरयो युधि ॥
पुलविप्पवगण्ड इति प्रथितं रिपुदुःसहमस्य च नाम परम् ।
अभवद्युधि यत्करवालतलं द्विपवारिमुचोऽस्रजलं ववृषुः ॥
अनुगतनयमार्गो बाणवंशैकदीपः
प्रणतरिपुसमाजः कृष्णराजप्रियो यः ।
अजनि विजयबाहुः सूनुरस्याधिकश्री-
रपगतदुरितेतिर्विक्रमादित्यनामा ॥

स ह्यशेषनृपतिमुकुटकोटिरत्नद्युतिरञ्जितपदरेणुर्नानाविधभूरिपरनृपपक्ष-दोःखण्डविजयलब्धविपुलयशोभिपूर्णबाहुमण्डलो विविधविचित्ररत्नविलीनव-लयस्वकरतलगृहीतचारुहेमकुम्भनिस्रवद्वारिधारापूर्वकमखिलवेदवेदाङ्गतर्कत-त्त्वसंवित्स्वकर्मनिरतेभ्यः स्वमनोनिहितान्तःसंवित्प्रदानशीलेभ्यो द्विजवरेभ्य उदयेन्दुमङ्गलनिवासिभ्य एवंभूत—　　　　　(अग्रे त्रुटितम्)

(इण्डियन् आण्टिक्वेरी १३।७–८)

(७६)

श्रीमहाराजनन्दप्रभञ्जनवर्मणां दानपत्रम् ।

स्वस्ति विजयसारपल्लिवासकात्परमभागवतो मातापितृपादानुध्यातः सकलकलिङ्गाधिपतिः श्रीमहाराजनन्दप्रभञ्जनवर्मा देयवाते कुटुम्बिनमाज्ञापयति—विदितमस्तु—'अक्षताग्रहरीयब्राह्मणहरिश्चन्द्रस्वामिने उदकपूर्वेणाकरं भरवानवर्जं पुण्यायुर्यशसामभिवृद्धये आचन्द्रतारकार्कप्रतिष्ठितमग्रहारं कृत्वा सर्वकरपरिहारैश्च परिहृत्य देवरातगोत्रचरणेभ्यः परदत्तम् । एवं ज्ञात्वा युष्माभिः पूर्वोचितमर्यादया सर्वोपस्थानं कर्तव्यम् । मेयं हिरण्याद्यं चोपनेयम् ।' भविष्यतश्च राज्ञो विज्ञापयामि—'धर्म क्रमविक्रमाणामन्यतमयोगादवाप्यमनुशासतां प्रवृत्तकमिदं दानं स्वधर्ममनुपश्यद्भिः स्वदत्तिरिवायमग्रहारोऽनुपाल्यः ॥

अपि चात्र व्यासगीतश्लोकानुदाहरामि—

बहुभिर्वसुधा दत्ता राजानो वसुधाधिपैः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
स्वदत्तां परदत्तां वा यत्नाद्रक्ष युधिष्ठिर ।
महीं महीमतां श्रेष्ठ दानाच्छ्रेयोऽनुपालनम् ॥
षष्टिवर्षसहस्राणि स्वर्गे मोदति(?) भूमिदः ।
आक्षेप्ता चानुमन्ता च तानेव नरके वसेत् ॥

(इण्डियन् आण्टिक्केरी १३।४९–५०)

---

(७७)

श्रीचालुक्यकुलालंकारश्रीविजयादित्यमहाराजानां शासनपत्रम् ।

स्वस्ति श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां कौशिकीवरप्रसादलब्धराज्यानां भगवन्नारायणप्रसादसमासादितवरवराहलाञ्छनेक्षणक्षणवशीकृतारातिमण्डलानामश्वमेधावभृत(थ)स्नानपवित्रीकृतवपुषां

चालुक्यानां कुलमलंकरिष्णुर्विविधयुद्धलब्धविजयसिद्धेर्भुवनमनोभिरामवि-क्रा(क्र)मरामस्य पौत्रः प्रतापावनतपरमण्डलनृपतिमण्डलस्य **श्रीविष्णुवर्धन**महाराजस्य प्रियतनयो निजभुजनिशितासिधाराप्रशमितपरचक्रविक्रमः शक्तित्रयालंकृतः क्षीरसागर इव लक्ष्मीप्रभवः, दिनकर इव सततरक्षितपद्मः[1], शशधर इव कुमुदवनप्रियः[2], धर्मज[3] इव निजधर्मनिर्मलः, धर्मजानुज[4] इव दुःशासन[5]क्षयकरः, मेरुरिव स्थिरस्थितिः, अतुलतुलाधृतकडधौतधौत-दुर्बलमलिनः परमब्राह्मण्यो विष्णुरिव जिष्णुः, समस्तभुवनाश्रयः **श्रीविजयादित्य**महाराजाधिराजपरमेश्व[र]भट्टारकः कण्डेरुवातीविषये वन.........व....ग्रामस्य कु...............कप्रमुखान्कुटुम्बिनः सर्वानित्थमाज्ञापयति—विदितमस्तु वः 'अस्माभिर्मिनमिनिवास्तव्याय काश्यपगोत्रायापस्तम्बसूत्राय तैत्तिरीयब्रह्मचारिणे **तुर्कवर्म**त्रे(त्रिवे)दिपौत्रा(य) वेदाङ्गविदे षट्कर्म-निरताय **द्रोणशर्म**द्विवेदिपुत्राय ब्राह्मणगुणगणालंकृताय प[द्म]**भट्टारकाय**, सूर्यग्रहणनिमित्तेऽस्मिन्नेव ग्रामे द्वादशवेण्डिककोद्रवबीजसंस्थितं..........
....................आवासनं सर्वकरपरि..................................। पूर्वतः—कोरुपुरसीमा, दक्षिणतः—तरुखः, पश्चिमतः—रूमाती, उत्तरतः—रेण्वुवतीबौहरेण्वुवती..........चतुरवधि,

आज्ञप्तिरस्य धर्मस्य निर्मलो धर्मसंग्रहः।
बुधमानमले(?) कश्चित्पुण्यवित्तो नरोत्तमः॥
बहुभिर्वसुधा दत्ता बहुभिश्चानुपालिता।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः॥

(इण्डियन् आण्टिक्वेरी १३। ५५–५६)

---

१. पद्म कमलम्, पद्मा लक्ष्मीः. २. कुमुदानां कैरवाणां वनस्य, कौ पृथिव्या मुदा हर्षेण अवनेन पालनेन प्रियः. ३. युधिष्ठिरः. ४. भीमसेनः. ५. दुःशासनो धृतराष्ट्रात्मजः, दुष्टशिक्षा च दुःशासनम्.

(७७)

राष्ट्रकूटकुलालंकारश्रीमदकालवर्षश्रीकृष्णराजस्य शासनपत्रम् ।

ओं ओं स्वस्ति ।

[1]सो(स) वोऽव्याद्वेधसा धाम यन्नाभिकमलं कृतम् ।
हरश्च यश्य(स्य) कान्तेन्दुकलया कमलंकृतम् ॥

आसीद्विशति(द्विपत्ति)मिरमुत्य(मुद्यत)मण्डलाग्रो
ध्वस्तिं नयन्नभिमुखो रणसर्वरीशु(शर्वरीषु) ।
भूपः सु(शु)चिर्विधुरिव(वा)स्तदिगन्तकीर्ति[2]-
गोविन्दराज इति राजसु राजसिङ्ह(सिंह): ॥

तस्यात्मजो जगति विश्रुतसु(शु)भ्रकीर्ति-
रार्तार्तिहारिहरि**विक्रम**नामधारी ।
भूपस्तृ(स्त्रि)विष्टपनृपानुकृतिः कृतज्ञः
श्रीकर्कराज इ[ति] गोत्रमणिर्बभूव ॥

तस्य प्रभिन्नकरटच्चु(च्यु)तदानदन्ति-
दन्तप्रहाररुचिरोल्लिखितांसपीठः ।
क्ष्माप[:] क्षितौ क्षपितस(श)त्रुरभूतभू(त्तनू)जः
सद्राष्ट्रकु(कू)टकनकाद्र(द्रि)**रिवेन्द्रराजा**[:] ॥

तस्योपार्जितमहसस्तनयश्चतुरुदधिवलयमालिन्या[:] ।
भोक्ता भुव[:] शतक्रतुश(स)दृश[:] श्री**दन्तिदुर्गराजो**ऽभूत् ॥

काची(ञ्ची)शकेरलनराधिपचोलपाड्य(ण्ड्य)-
श्रीहर्षवज्रटविभेदविधानदक्षः ।
कर्णाटकं बलमचिन्त्यमजेयमन्यै-
र्भृत्यैः कियद्भिरपि यः सहसा जिगाय ॥

१. अस्मिंल्लेखे प्रायः श्लोकाश्चतुर्थपञ्चमलेखस्था एव, अतोऽत्रोपयुक्तं टिप्पणमपि तत्रैव महामहोपाध्यायैः कृतमवलोकनीयम्. २ 'कीर्तिः प्रसादयशसोः' इति मेदिनी.

तस्मिन्दिवं प्रयाते वल्लभराजे कृतप्रजाबाधः ।
श्रीकर्कराजसूनुर्महीपतिः **कृष्णराजो**ऽभूत् ॥

राहप्यमात्मभुजजातबलावलेप-
माजौ विजित्य निशितासिलताप्रहारैः ।
पालिधज(ध्वजा)वलिशुभामचिरेण यो हि
राजाधिराजपरमेश्वरतामवाप ॥

येन श्वेतातपत्रप्रहतरविकरत्राततापास्त(त्स)लीलं
जग्मे नासीरधूलीधवलितशिरसा वल्लभाख्यः सदाजौ ।
श्रीम**द्गोविन्दराजो** जितजगद[हि]तस्त्रैणवैधव्यदक्ष-
स्तस्यासीत्सूनुरेक[ः] क्षणरणदलितारातिमत्तेभकुम्भः ॥

तस्यानुजः श्री**ध्रुवराज**नामा महानुभावोऽप्रहतप्रतापः ।
प्रशा(सा)धिताशेषनरेन्द्रचक्रः क्रमेण बालार्कवपुर्बभूव ॥

या(जा)ते ज(य)त्र च राष्ट्रकूटतिलके सद्भूपचूडामणौ
गुर्वी तुष्टिरथाखिलस्य जगतः सुस्वामिनि प्रत्यहम् ।
सत्यं सत्यमिति प्रशासति सति क्ष्मामासमुद्रान्तिका-
मासीद्धर्मपरे गुणामृतनिधौ सत्यव्रताधिष्ठिते ॥

रक्षि(क्ष)ता येन निःशेषं चतुरम्भोधिसंयुतम् ।
राज्यं धर्मेण लोकानां कृता हृष्टिः परा हृदि ॥

तस्यात्मजो जगति सत्प्रथितोरुकीर्ति-
गोविन्दराज इति गोत्रललामभूतः ।
त्यागी पराक्रमधनः प्रकटप्रताप-
संतापिताहितजनो जनवल्लभोऽभूत् ॥

तत्पुत्रोऽत्र गते नाकमाकम्पितरिपुव्रजे ।
श्रीमहाराजस(श)र्वाख्यः ख्यातो राजाभवद्गुणैः ॥

अर्थिशु(षु) यथार्थतां यः समम्भ(भी)ष्टफला(ष्टावा)प्तिलब्धतोशेशु(षेषु) ।
वृद्धिं निनाय परमाममोघवर्षाभिधानस्य ॥

राजाभूत्तत्पितृव्यो रिपुभवविभवोद्भूत्यभावैकहेतु-
लक्ष्मीवानिन्द्रराजो गुणिनृपनिकरान्तश्चमत्कारकारी ।
[१रागादन्यान्व्युदस्य प्रकटितविषया यं नृपान्सेवमाना
राज्यश्रीरेव चक्रे सकलकविजनोद्गीततथ्यस्वभावम् ॥]
श्रीकर्कराज इति रक्षितराज्यभारः
सारं कु[ल]स्य तनयो नयशालिशौर्यः ।
तस्याभवद्विभवनन्दितबन्धुसार्थः
पार्थ[ः] सदैव धनुशि(षि) प्रथमः शुचीनाम् ॥
स्वेच्छाग्रि(गृ)हीतविषयो(यान्) दृढसंघभाज[ः]
प्रोद्वृत्तदृप्ततरशुल्किकराष्ट्रकूटान् ।
उत्खातखड्गनिजबाहुबलेन जित्वा
योऽमोघवर्षमचिराश्व(त्स्व)पदे व्यधत्त ॥
पुत्रृ(त्री)यतस्तस्य महानुभाव[ः] कृती कृतज्ञ[ः] कृतधीर्यवीर्यः ।
वशीकृताशेषनरेन्द्रवृन्दो बभूव सू[नु]र्ध्रुवराजनामा ॥]
श्रीदन्तिवर्मण··········तस्य··············
························सुतः प्रबलप्रतापः ॥
यस्यानेकनरेन्द्रवृन्दविनुतस्यापू··············
··························द्विपद्मद्वयः ।
प्रोत्खातासिलताप्रहारदलितद्विड्दन्तिकुम्भस्थलः
शूरः सज्जनवल्लभः ससरलः·············· ॥
································
······························ ।
································
··························पीतमथो यशश्च ॥

१. इदमुत्तरार्धमादर्शपुस्तकेऽनुपलब्धं चतुर्थलेखदृष्टं पूरितम्. २ 'वर्ष इति राज्यपदे' चतुर्थलेखपाठः ३. चतुर्थलेखदृष्टः पूरितः.

येन खड्गद्वितीयेन वल्लभनृपस्य पश्यतः।
उज्जयिन्यां रिपूञ्जित्वा दूरमुत्तम्भितं यशः॥

तेनेदमनिलविद्युच्चञ्चलमालोक्य जीवितमसारम्।
क्षितिदानपरमपुण्यः प्रवर्तितो धर्मदायोऽयम्॥

स च समधिरा(ग)ताशेषस(म)हाशब्दम(हासामन्ता)धिपतिश्रीमदकालवर्षश्रीकृष्णराजः सर्वानेव समनुबोधयति—अस्तु वः संविदितम्—'यथा मया श्रीअङ्कलेश्वरावस्थि[ते]न मातापित्रोरात्मनश्चैहिकामुष्मिकपुण्ययशोभिवृद्धये नर्मदायां भगवत्तीर्थे स्नात्वोदकातिस्व(स)र्गेण श्रीवरिअविव(वा)स्तव्यत्रैविद्यसामान्यकुण्डिनसगोत्राध्वर्युसब्रह्मचारिब्राह्मणश्रीअजवासावकसुताय श्रीतणुअवासावका[य]श्रीगुहेश्वरभ्रातरे(त्रे) द्वयो(द्वाभ्यां) प्रतिपादितः श्रीकोङ्कणविषयान्तर्गतवारिअविषोडशोत्त[रग्रामशत]मध्यवर्ति कविडसाव्यभिधानग्रामः। यस्याघाटनानि—पूर्वतः—वलछग्रामसीमा, दक्षिणतः—उत्तरपढवणकग्रामसीमा, पश्चिमतः—वरिअविपट्टनसीमा, उत्तरतः—वसुहारियकग्रामसीमा। एवं चतुराघाटनोपलक्षितः सोद्रङ्गः सपरिकरः, ससीमापर्यन्तः, सवृक्षमालाकुलः, सदण्डदशापराधः, सधान्यहिरण्यादेयोऽचाटभटप्रवेश्यः सर्वराजकीयानामहस्तप्रक्षेपणीय आचन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनः पूर्वदत्तदेवदायब्रह्मदायरहितोऽभ्यन्तरसिद्ध्या शकनृपकालातीतसंवत्सरशतेष्वष्टसु दशोत्तरेषु ८१० चैत्रेऽमावास्यायां सूर्यग्रहणपर्वणि स्नात्वोदकातिसर्गेण बलिचरुवैश्वदेवाग्निहोत्रानुष्ठानादिक्र(क्रि)योच्छ(त्स)र्पणार्थं प्रतिपादितः। तदस्युतया (?) ब्रह्मदायस्थित्या भुञ्जतो भोजयतः कृश(ष)तः कर्षयतः प्रतिदिशतो वा न केनापि परिपन्थना कार्या। तथागामिनृपतिभिरस्मद्वंशजैरन्यैर्वा सहस्रमेकेन पालनीयः, द्रम्माश्च त्रिभिः स्कन्धकैर्देयाः। प्रथमं भाद्रपदे। द्वितीयं कार्तिके। तृतीयं माघे। एभिः स्थित्या सर्वराजकीयैः पालनीयः। न केनापि परिपन्थना कार्या। आगामिनृपतिभिरस्मद्वंशजैरन्यैर्वा 'सामान्यं भूमिदानफलम्' इत्यवधार्य विद्युल्लोलान्यनित्यान्यैश्वर्याणि तृणाग्रलग्नजलबि-

न्दुचञ्चलं च जीवितमाकलय्य स्वदायनिर्विशेषोऽस्मदायोऽनुमन्तव्यः पालनीयश्च । यश्चाज्ञानतिमिरपटलावृतमतिराच्छिन्द्यादाच्छिद्यमानं वानुमोदेत स पञ्चभिर्महापातकैरुपपातकैश्च संयुक्तः स्यात् । उक्तं च भगवता व्यासेन—

षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥

अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकत्रयं तेन भवेद्धि दत्तं यः काञ्चनं गां च महीं च दद्यात् ॥

विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।
कृष्णाहयो हि जायन्ते भूमिदायं हरन्ति ये ॥

कन्यामेकां [गां तथै]का भूम्यामप्येकमङ्गुलम् ।
हरन्नरकमायाति यावदाहू(भू)तसंप्लवम् ॥

यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यनिष्ठीवसमानि तानि को नाम साधुः पुनराददीत ॥

स्वदत्तां परदत्तां वा यत्नाद्रक्ष नराधिप ।
महीं महीभुजां श्रेष्ठ दानाच्छ्रेयोनुपालनम् ॥

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

इति कमलदलाम्बुबिन्दुलोलां श्रियमनुचिन्त्य मनुष्यजीवितं च ।
अतिविमलमनोभिरात्मनीनैर्नहि पुरुषैः परकीर्तयो विलोप्याः ॥

दूतकोऽत्र महत्तमसर्वाधिकारी ब्राह्मण **अल्लैयको** नाम्ना । लिखितं चैतन्मया महासांधिविग्रहाधिकारिणा श्री**जज्जकेन** श्रीकुल्लकसूनुना । इति ॥ स्वहस्तोऽयं मम श्रीम**दकालवर्षश्रीकृष्णराजस्य** ॥

(इण्डियन् आण्टिक्केरी १३।६६–६८)

(७८)

श्रीजयभटमहाराजानां दानपत्रम्।

स्वस्तिश्रीकायावतारवासकात्सततलक्ष्मीनिवासभूते तृष्णासंतापहारिणि दीनानाथविस्तृतानुभावे द्विजकुलोपजीव्यमानविभवशालिनि महति महाराजकर्णान्वये कमलाकर इव राजहंसः, प्रबलकलिकालविलसिताकुलितविमलस्वभावो गम्भीरोदारचरितविस्मापितसकललोकपालमानसः परमेश्वरश्रीदद्दः, तस्य सूनुरशङ्कितागतप्रणयिजनोपभुक्तविभवसंचयोपचीयमानमानो निर्वृति..........नेककण्टकवंशसंदोहदुर्ललितप्रतापानलो निशितनिस्त्रिंशधारादारितारातिकरिकुम्भमुक्ताफलच्छलोल्लसितसितयशोंशुकावगुण्ठितदिग्वधूवदनसरसिजः **श्रीजयभटः**, तस्यात्मजो महामुनिमनुप्रणीतप्रवचनाधिगमविवेकस्वधर्मानुष्ठानप्रवणिवर्णाश्रमव्यवस्थोन्मूलितसकलकलिकालावलेपः प्रणयिजनमनोरथविलयव्यतीतविभवसंपादनापनीताशेषपार्थिवदानाभिमानो मदविवशाङ्कुशातिवर्तिकुपितकरिनिवारणप्रथितगुरुगजाधिरोहणप्रभावो विपत्प्रपातपतितनरपतिशताभ्युद्धरणनिखिललोकविश्रुतपरोपकारकरणव्यसनः प्राच्यप्रतीच्याधिराजविजृम्भितमहासङ्ग्रामनरपतिसहस्रपरिवारितानेकगजघटाविघटनप्रकटितभुजवीर्यविख्यातबाहुसहायापरनामा परममहेश्वरः समधिगतपञ्चमहाशब्दश्रीदद्दः, तस्य सूनुरनेकसमरसंघट्टघनघटितगजघटापाटनपटुरसहिष्णुवनदावानलो दीनानाथातुरसुहृत्स्वजनबन्धुकुमुदाकरकौमुदीनिशाकरः, भागीरथीप्रवाह इव विपक्षक्षोभक्षमः, शान्तनुरिव समुद्भूतकलकलारावमहावाहिनीपतिः, आदिवराह इव स्वभुजबलप्रक्रमोद्धृतधरणिः, परममहेश्वरः समधिगतपञ्चमहाशब्द**श्रीजयभटः** कुशली सर्वानेव राजसामन्तभोगिकविषयपतिराष्ट्रग्राममहत्तराधिकारिकादीन्समनुदर्शयति—अस्तु वः संविदितम्—यथा मया मातापित्रोरात्मनश्चैहिकामुष्मिकपुण्ययशोभिवृद्धये गिरिनगरविनिर्गतश्रद्धिकाग्रहारवास्तव्यतच्चातुर्विधसामान्यप्रावायनसगोत्रवाजसनेयमाध्यंदिनसब्रह्मचारिब्राह्मणदत्तपु-

---

१. अयं कायावतारनामको वासकोऽधुना 'कावी' इति नाम्ना प्रसिद्धो 'ब्रूच'प्रान्ते 'गुजरात'देशे वर्तते. २. विपक्षाणा शत्रूणाम्, पक्षिपक्षाणा च. ३. वाहिन्यो नद्यः, सेनाश्च.

त्रब्राह्मणदेवस्वामिनेऽसत्कृतप्रकाशनाय कल्लुम्बराय बलिचरुवैश्वदेवाग्निहोत्रातिथिपञ्चमहायज्ञादिक्रियोत्सर्पणार्थं कोरिल्लापथकान्तर्गतशमीपद्रकग्रामे पूर्वतः सीम्नि चतुष्षष्टिभूनिवर्तनप्रमाणं क्षेत्रम्, यस्याघाटनानि—पूर्वतः—गोलिकाग्रामसंधिः, दक्षिणतः—यमलखल्लराभिधानतडाकम्, तथा महत्तरमहेश्वरसत्कक्षेत्रम्, वापितदेवकसत्कवापकक्षेत्रं च, अपरतः शमीपद्रकग्रामादेव धाहद्धाग्रामयायी पन्थाः, उत्तरतो वरुटखल्लराभिधानतडाकं तथा कोरिल्लावासी ब्राह्मणनर्मसत्कब्रह्मदेयक्षेत्रं च । एवमिदं चतुराघाटनोपलक्षितं क्षेत्रं सोद्रङ्गं सपरिकरं सभूतवातप्रत्ययं सधान्यहिरण्यादेयं सदशापराधं सोत्पद्यमानविष्टिकं गृहस्थावरच्छलकरथ्याप्रवेशनिर्गमसगरचतुष्पदप्रचारवापीकूपतडाकपद्रोपजीव्यसमेतं सर्वराजकीयानामहस्तप्रक्षेपणीयं पूर्वप्रत्तदेवब्रह्मदायरहितं भूमिच्छिद्रन्यायेनाचन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनं पुत्रपौत्रान्वयक्रमोपभोग्यम्—अद्य माघशुद्धपञ्चदश्यां चन्द्रोपरागे पुण्यतिथावुदकातिसर्गेण ब्रह्मदायत्वेन प्रतिपादितम् । यस्योचितया ब्रह्मदायस्थित्या भुञ्जतः कृषतः कर्षयतः प्रतिदिशतो वा न कैश्चिद्व्यासेधे वर्तितव्यम् । आगामिभद्रनृपतिभिरस्मद्वंश्यैरन्यैर्वायमस्मद्दायोऽनुमन्तव्यः पालयितव्यश्च । यश्चाज्ञानतिमिरपटलावृतमतिराच्छिन्द्यादाच्छिद्यमानमनुमोदते, स पञ्चभिर्महापातकैः सोपपातकैः संयुक्तः स्यादिति । उक्तं च भगवता वेदव्यासेन—

षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।
कृष्णाहयो हि जायन्ते भूमिदानं हरन्ति ये ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकत्रयं तेन भवेत्तु दत्तं यः काञ्चनं गां च महीं च दद्यात् ॥

यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
स्वदत्तां परदत्तां वा यत्नाद्रक्ष युधिष्ठिर ।
मही मतिमतां श्रेष्ठ दानाच्छ्रेयोनुपालनम् ॥

संवत्सरशतचतुष्टये षट्पञ्चाशदुत्तरके माघशुद्धपञ्चदश्यां लिखितमिदं ....भोगिकपुत्रमहाबलाधिकृतकेशवेनेति ।

बलाधिकृतवायुल्लदूतकम् । सम्—४००+५०+६ ॥ [माघ सु. १०,+५ सो]मवारे ॥ निबाद्धम् ॥ स्वहस्तो मम श्रीजयभटस्य ॥

(इण्डियन् आण्टिक्वेरी १३।७७-७९)

---

(७९)

प्रशान्तरागापरनामधेयश्रीदद्दमहाराजानां दानपत्रम् ।

ॐ स्वस्ति नन्दीपुरतो विविधविमलगुणरत्नसंपदुद्भासितसकलदिङ्मुखे परित्राताशेषसपक्षमहामहीभृति सततमविलङ्घितावधौ स्थैर्यगाम्भीर्यला-वण्यवति महासत्त्वतयातिदुरवगाहे गुर्जरनरपतिवंशमहोदधौ श्रीसहजन्मा कृष्णाहृदयाहितास्पदः कौस्तुभमणिरिव विमलयशोदीधितिनिकरविनिहत-कलितिमिरनिचयः, सत्पक्षो वैनतेय इवाकृष्टशत्रुनागकुलसंततिः उत्पतित एव दिनकरचरणकमलप्रणामापनीताशेषदुरितनिवहः **सामन्तदद्दः** । प्रति-दिनमपेतशङ्कं येन स्थितम् । अचलगुणनिकरकेसरिविराजितवपुषा विनी-तारिगजकुम्भविगलितमुक्ताफलच्छलप्रनिकीर्णविमलयशोवितानेन रूपानुरूपं सत्त्वमुद्वहता केसरिकिशोरकेणेव, उपरि क्षितिभृताम् । यं चातिमलिनक-लियुगतिमिरचन्द्रमसमनुदिवसमन्योन्यस्पर्धयेवाययुः कलासमूहादयो गुणाः, विक्रमानीतमदविलासालसगतयोऽरातिगजघटाः प्रमदाश्च । यस्य चाविरत-

१. अस्य नन्दीपुरस्य 'भडोच' नगरतः ऐशान्यां चतुस्त्रिंशन्मैलदूरे 'नान्दोड' इति नाम्ना ख्यातिरिति पण्डित इन्द्रजीपुत्रो भगवान्लालोऽवदत्. बूह्लरपण्डितस्तु भडोचनग-रस्य पूर्वतो झडेश्वरद्वारे सत्तां ब्रवीति स्म.

दानप्रवाहप्रीतार्थिमधुकरकुलस्य रुचिरकीर्तिवशासहायस्य सततमस्खलितपदं प्रसरतः सद्वंशासितशोभागौरवस्य भद्रमतङ्गजस्येव करघातविनिहतक्षितिभृदुन्नततनूरुहस्य रेवानिर्झरसलिलप्रपातमधुरनिनदस्य, भगोद्भवाः(?) समुन्नतपयोधराहितश्रियो दयिता इव मुदे विन्ध्यनगोपत्यका। यश्चोपमीयते शशिनि सौम्यत्ववैमल्यशोभाकलाभिः, न कलङ्केन[1]। श्रीनिकेतशोभासमुदयाधःकृतकुलकण्टक[2]तया कमलाकरे, न पङ्क[3]जन्मतया; सत्त्वोत्साहविक्रमैर्मृगाधिराजे, न क्रूरा[4]श्रयतया; लावण्यस्थैर्यगाम्भीर्यस्थित्यनुपालनतया महोदधौ, न व्याला[5]श्रयतया; सत्कटकसमुन्नतविद्याधरा[6]वासतया हिमाचले, न खशा[7]परिवारतया। यस्य च सद्भोगः शेषोरगस्येव विमलकिरणमणिशताविष्कृतगौरवः सकलजगत्साधारणः। यस्य प्रकाश्यते सत्कुलं शीलेन, प्रभुत्वमाज्ञया, शस्त्रमरातिप्रणिपातेन, कोपो निग्रहेण, प्रसादः प्रदानैः, धर्मो देवद्विजातिगुरुजनसपर्ययेति। तस्य सूनुः प्रतप्तरुचिरकनकावदातः कल्पतरुरिवाविरतमभिरुचितफलप्रदः सततमृतुगणस्येव वसन्तसमयः, वसन्तसमयस्येव प्रविकाशितनिबिडचूततरुवनाभोगः, सरस इव कमलनिवहः, कमलनिवहस्येव प्रबोधः, महाविषधरस्येव मणिः, मणेरिव स्वच्छतारभावः, महोदधेरिवामृतकलशः; अमृतकलशस्येवामरनदायित्वप्रभावः, करिण इव मदः, प्रमदाजनस्येव विलासः, विभवस्येव सत्पात्रविनियोगः, धर्मस्येव क्रतुः, क्रतोरिव स्वदक्षिणाकालः, प्रेम्ण इव सद्भावः, शशिन इवामलकलासमूहो नियतमलंकारभूतः सकलनिशाकराभिरूपवदनः, शक्तो वदान्यः, प्रबलरिपुबलानीकसमरसमवाप्तविजयश्रीः, श्रीवीतरागापरनामा श्रीजयभटः। कलिप्रतिपक्षभयाच्छरणार्थिन इव यमाश्रिताः सविनया गुणाः स्फुरितविमलकीर्तिसौदामनिना येन सकलजीवलोकानन्दकारिणा कालबलाहकेनेवावन्ध्यफलं गर्जता प्रणयिनामपनीतास्तृष्णासंतापदोषाः। यश्च शूरोऽपि सततमयशोभीरुः

---

१. 'कलङ्कोऽङ्केऽपवादे च' इति मेदिनी. २. कण्टकः क्षुद्रशत्रौ द्रुमाङ्गे च. ३. 'पङ्कोऽस्त्री कर्दमे पापे' इति मेदिनी. ४. 'क्रूरस्तु कठिने घोरे नृशंसे' इति मेदिनी. ५. व्यालाः सर्पाः खलश्च. ६. विद्याधराः पण्डिता देवविशेषाश्च. ७. खशा हीनजातीयविशेषाः.

अपगततृष्णोऽपि गुणार्जनाविच्छिन्नतर्षः, सर्वप्रदानाशीलोऽपि परयुवतिहृदयदानपराङ्मुखः, पटुरपि परपरिवादाभिधानजडधीः । यस्य च न विरोधि रूपं शीलस्य, यौवनं सद्वृत्तस्य, विभवः प्रदानस्य, त्रिवर्गासेवा परस्परापीडनस्य, प्रभुत्वं क्षान्तेः, कलिकालो गुणानामिति ॥ तस्य सूनुः सजलघनपटलनिर्गतरजनिकरकरावबोधित(कुमुदधवल)यशोप्रतानास्थगितनभोमण्डलोऽनेकसमरसंकटप्रमुखागतनिहतशत्रुसामन्तकुलवधू(प्रभातसमय)रुदितच्छलोद्गीयमानविमलनिस्त्रिंशप्रतापो देवद्विजातिगुरुचरणकमलप्रणामोद्धृष्टवज्रमणिकोटिरुचिरदीधितिविराजितमुकुटोद्भासितश्रीः दीनानाथातुराभ्यागतार्थिजनाक्लिष्टपरिपूरितविभवमनोरथोपचीयमानत्रिविष्टपैकसहायधर्मसंचयः प्रणयपरिकुपितमानिनीजनप्रणामपूर्वमधुरवचनोपपादितप्रसादप्रकाशीकृतविदग्धनागरिकस्वभावो विमलगुणनिकरपञ्जराक्षिप्तबहलकलितिमिरनिचयः समधिगतपञ्चमहाशब्दः **श्रीदद्दः** कुशली सर्वानेव राजसामन्तभोगिकविषयपतिराष्ट्रग्राममहत्तराधिकारिकादीन्समनुबोधयति—अस्तु वो विदितम्—अस्माभिरक्रूरेश्वरविषयान्तर्गत**शिरीषपद्रकं** एष ग्रामः सोद्रङ्गः सो[प]प[रि]करः सर्वादानसंग्राह्यः सर्वदित्यविष्टिप्रतिभेदिकापरिहीणो भूमिच्छिद्रन्यायेनाचाटभटप्रावेश्य आचन्द्रार्कार्णवक्षितिसमकालीनः पुत्रपौत्रान्वयभोग्यो जम्बूसरोविनिर्गताक्रूरेश्वरविषयान्तर्गतशिरीषपद्रवासिबह्वृचवत्ससगोत्राश्वलायनसब्रह्मचारिब्राह्मणभट्टयध्यापक तथा गोपादित्य, तथा भट्टिगण—विशाख—अग्निशर्म—द्रोण—काश्यपसगोत्रभट्टिदाम, तथा वत्र—अध्वर्युवाजसनेयडौण्डकीयसगोत्र—कण्वसब्रह्मचारिब्राह्मणतापिशर्म—द्वितापिशर्म—दत्तस्वामि—भागिस्वामि—पितृशर्म—भट्टि—द्रोण—धूम्रायणसगोत्रकर्काध्यापक—आवुक—कौण्डिन्यसगोत्र—वातशर्म—शैल—घोष—महादेव—वाव—माठरसगोत्रधर—विशाख—नन्दि—रामिल—हारीतसगोत्रधर्मधर—छान्दोग्यभरद्वाजसगोत्रकौथुमसब्रह्मचारिब्राह्मणइन्द्रशर्म—आदित्यराव—तापिशूर—इन्द्रशूर—ईश्वर—धर—दामधर—द्वि. ईश्वर—भरुकच्छविनिर्गतभेरज्जिकानिवासि—आथर्वणचौलिसगोत्रपिप्पलादसब्रह्मचारिब्राह्मणभद्र—वायुशर्म—द्रोणस्वामि—रुद्रादित्य—पूर्णस्वामि. एभ्यश्चतुश्चरणब्राह्मणेभ्यश्चातुर्विद्यपरिकल्पनपूर्वं बलि-

चरुवैश्वदेवाग्निहोत्रपञ्चमहायज्ञादिक्रियोत्सर्पणार्थं मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये कार्तिक्यामुदकातिसर्गेणातिसृष्टो यतोऽस्मद्वंश्यैरन्यैर्वागामिभोगपतिभिः प्रबलपवनप्रेरितोदधिजलत्तरङ्गचञ्चलं जीवलोकम्, अभावानुगतानसारान्विभवान्, दीर्घकालस्थेयसश्च गुणान्, आकलय्य सामान्यभोगभूप्रदानफलेप्सुभिः शशिकररुचिरं यशश्चिराय चिचीषुभिरयमस्मद्दायोऽनुमन्तव्यः पालनीयश्च ॥ यो वाँज्ञानतिमिरपटलावृतमतिराच्छिन्द्यादाच्छिद्यमानमनुमोदते स पञ्चभिर्महापातकैः सोपपातकैः संयुक्तः स्यात् ॥

उक्तं च भगवता वेदव्यासेन व्यासेन—

'षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।
कृष्णाहयो हि जायन्ते भूमिदायं हरन्ति ये ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधुः पुनराददीत ॥'

इति ॥ संवत्सर—शतत्रयेशीत्यधिके कार्तिकशुद्धपञ्चदश्यां लिखितं संधिविग्रहाधिकरणाधिकृतरेवेण स्वमुखाज्ञेति ॥ सम्—३००+८० कार्तिक सुदि १०+५ ॥ दिनकरचरणार्चनरतस्य श्रीवीतरागसूनोः स्वहस्तोऽयं प्रशान्तरागस्य ॥

(इण्डियन् आण्टिक्वेरी १३।८२-८४)

---

(८०)

प्रशान्तरागापराभिधेयश्रीदद्दमहाराजानां द्वितीयं दानपत्रम् ।

ॐ स्वस्ति **नन्दिपुरतो** विविधविमलगुणरत्नसंपदुपहसितसकलदिङ्मुखे परित्राताशेषसपक्षमहामहीभृति सततमविलङ्घिता(त)बन्धौ स्थैर्यगा-

म्भीर्यलावण्यवति महासत्त्वतयातिदुरवगाहे गुर्जरनृपतिवंशमहोदधौ श्रीसहजन्मा कृष्णहृदयाहितास्पदः कौस्तुभमणिरिव विमलयशोदीधितिनिकरविनिहतकलितिमिरनिचयः सत्पक्षो वैनतेय इवाकृष्टशत्रुनागकुलसंततिः, उत्पतित एव दिनकरचरणकमलप्रणामापनीताशेषदुरितनिवहः **सामन्तदद्दः** प्रतिदिनमपेतशङ्कं येन स्थितमचलगुणनिकरकेसरिविराजितवपुषा विनिहतारिगजकुम्भविगलितमुक्ताफलच्छलप्रकीर्णविमलयशोवितानेन रूपानुरूपं सत्त्वमुद्वहता केसरिकिशोरकेणेवोपरिक्षितिभृताम् । येन चातिमलिनकलियुगतिमिरचन्द्रमसमनुदिवसमन्योन्यस्पर्धयेवाययुः कलासमूहादयो गुणाः विक्रमानीतमदविलासगतयोऽरातिगजघटाः प्रमदाश्च । यस्य चाविरतदानादिप्रवहप्रीणितार्थिमधुकरकुलस्य रुचिरकीर्तिवशासहायस्य सततमस्खलितपदं प्रसरतः सद्वंशाहितशोभागौरवस्य भद्रमतङ्गजस्येव करघातविनिहतक्षितिभृदुन्नततनूरुहस्य रेवानिर्झरसलिलप्रपातमधुरनिनादस्य भगोद्भवाः(?) समुन्नतपयोधराहितश्रियो दयिता इव मुदे विन्ध्यनगोपत्यकाः। यश्चोपमीयते शशिनि सौम्यत्ववैमल्यशोभाकलाभिः, न कलङ्केन; श्रीनिकेतशोभासमुदयाधःकृतकुलकण्टकतया कमलाकरे, न पङ्कजन्मतया; सत्त्वोत्साहविक्रमैर्मृगाधिराजे क्रूराशयतया, लावण्यस्थैर्यगाम्भीर्यस्थित्यनुपालनतया महोदधौ, न व्यालाश्रयतया; सत्कटकसमुन्नतविद्याधरावासतया हिमाचलेन खशय(प)रिवारतया। यस्य च सद्भोगः शेषोरगस्येव विमलकिरणमणिशताविष्कृतगौरवः सकलजगत्साधारणः। यस्य प्रकाश्यते सत्कुलं शीलेन प्रभुत्वमाज्ञया, शस्त्रमरातिप्रणिपातेन, कोपो निग्रहेण, प्रसादः प्रदानैः, धर्मो देवद्विजातिगुरुजनसपर्ययेति ॥

तस्य सूनुः प्रतप्तरुचिरकनकावदातः कल्पतरुरिवाविरतमभिरुचितफलप्रदः सततमृतुगणस्येव वसन्तसमयः, वसन्तसमयस्येव प्रविकसितनिबिडचूततरुवनाभोगः, सरस इव कमलनिवहः, कमलनिवहस्येव प्रबोधः, महाविषधरस्येव मणिः, मणेरिव स्वच्छतरभावः, महोदधेरिवामृतकलशः, अमृतकलशस्येवामरणदायित्वप्रभावः, करिण इव मदः, प्रमदाजनस्येव विलासः, विभवस्येव सत्पात्रविनियोगः, धर्मस्येव क्रतुः, क्रतोरिव स्वदक्षिणाकालः,

प्रेम्ण इव सद्भावः, शशिन इवामलकलासमूहः, नियतमलंकारभूतः सकलनिशाकराभिरूपवदनः शकलो वदान्यः प्रबलरिपुबलानीकसमरसमवाप्तविजयश्रीः श्रीवीतरागापरनामा श्रीजयभटः । कलिप्रतिपक्षभयाच्छरणार्थिन इव यमाश्रिताः सविनया गुणाः । स्फूर्तिविमलकीर्तिसौधमानिना येन सकलजीवलोकानन्दकारिणा कालबलाहकेनेवावन्ध्यफलं गर्जता प्रणयिनामपनीतास्तृष्णासंतापदोषाः । यश्च शूरोऽपि सततमयशोभीरुः, अपगततृष्णोऽपि गुणार्जनाविच्छिन्नतृष्णः, सर्वप्रदानशीलोऽपि परयुवतिहृदयदानपराङ्मुखः, पटुरपि परपरिवादाभिधानजडधीः । यस्य च न विरोधि रूपं शीलस्य, यौवनं सद्वृत्तस्य, विभवः प्रदानस्य, त्रिवर्गसेवा परस्परापीडनस्य, प्रभुत्वं क्षान्तेः, कलिकालो गुणानामिति ॥

तस्य सूनुः सजलघनपटलनिर्गतरजनिकरकरावबोधितकुमुदधवलयशःप्रतानास्थगितनभोमण्डलोऽनेकसमरसंकटप्रमुखागतनिहतशत्रुसामन्तकुलवधूप्रभातसमयरुदितच्छलोद्गीयमानविमलनिस्त्रिंशप्रतापो देवद्विजातिगुरुचरणकमलप्रणामोद्धृष्टवज्रमणिकोटिरुचिरदीधितिविराजितमुकुटोद्भासितश्रीर्दीनानाथातुराभ्यागतार्थिजनाक्लिष्टपरिपूरितविभवमनोरथोपचीयमानत्रिविष्टपैकसहायधर्मसंचयः प्रणयपरिकुपितमानिनीजनप्रणामपूर्वमधुरवचनोपपादितप्रसादप्रकाशीकृतविदग्धनागरिकस्वभावो विमलगुणकिरणपञ्जराक्षिप्तबहलकलितिमिरनिचयः समधिगतपञ्चमहाशब्दः श्रीदद्दः कुशली सर्वानेव राजसामन्तभोगिकविषयपतिराष्ट्रग्राममहत्तराधिकारिकादीन्समनुबोधयति—अस्तु वो विदितम्—अस्माभिरक्रूरेश्वरविषयान्तर्गतशिरीषपद्रक एष ग्रामः सोद्रङ्गः सो(स)परिकरः सर्वादानसंग्रहः सर्वदित्यविष्टिप्रातिभेदिकापरिहीणो भूमिच्छिद्रन्यायेनाचाटभटप्रविश्य आचन्द्रार्कार्णवक्षितिस्थितिसमकालीनः पुत्रपौत्रान्वयभोग्यो जम्बूसरोवास्तव्यभारद्वाजसगोत्रकण्वसब्रह्मचारिब्राह्मण—आदित्यरवि तथा—तापिशूर—इन्द्रशूर—ईश्वर तथा—वत्ससगोत्रभट्टचध्यापक—गोपादित्य—वाड—विशाख—अग्निशर्म—भट्टिगण—द्रोण—माठरसगोत्र—विशाख—धर—नन्दि—राम—डौण्डकीयसगोत्र—तापिशर्म—द्वि. तापिशर्म—द्रोण—भट्टि—पितृशर्म—भागिस्वामि—दत्तस्वामि—लाक्ष्मण्यसगोत्र—धर—दाम-

धर—ईश्वर—कौण्डिण्यसगोत्र—बाव—घोष—शील—काश्यपसगोत्र—भट्टिदाम—वत्र—हारीतसगोत्रधर्मधर—धौम्रायणसगोत्रककाध्यापक—आवुक—इन्द्रशूरादिब्राह्मणेभ्यश्चतुस्त्रिंशद्भ्यो बलिचरुवैश्वदेवाग्निहोत्रपञ्चमहायज्ञादिक्रियोत्सर्पणार्थं मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये कार्तिक्यामुदकातिसर्गेणातिसृष्टो यतोऽस्मद्वंश्यैरन्यैर्वागामिभोगपतिभिः प्रबलपवनप्रेरितोदधिजलतरङ्गचञ्चलं जीवलोकम्, अभावानुगतानसारान्विभवान्दीर्घकालस्थेयसश्च गुणानाकलय्य सामान्यभोगभूप्रदानफलेप्सुभिः शशिकररुचिरं यशश्चिराय चिचीषुभिरयमस्मद्दायोऽनुमन्तव्यः पालनीयश्च । यो वाज्ञानतिमिरपटलावृतमतिराच्छिन्द्यात्, आच्छिद्यमानं नानुमोदते स पञ्चभिर्महापातकैः संयुक्तः स्यादिति। उक्तं च भगवता वेदव्यासेन व्यासेन—

'षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।
कृष्णाहयो हि जायन्ते भूमिदायं हरन्ति ये ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधुः पुनराददीत ॥'

इति ॥ संवत्सरशतत्रये पञ्चाशीत्यधिके कार्तिकपूर्णिमायां लिखितं संधिविग्रहाधिकरणाधिकृतरेवेण स्वमुखाज्ञयेति ॥ सम्. ३००+८०+५, कार्तिक सु. १०+५, दिनकरचरणार्चनरतस्य श्रीवीतरागसूनोः स्वहस्तोऽयं प्रशान्तरागस्य ॥

(इण्डियन् आण्टिक्केरी १३।८८-९०)

(८१)

कर्णाटकश्रीवेङ्कटपतिरायस्य दानपत्रम् ।

श्रीवेङ्कटेशाय नमः ।

यस्य संपर्कपुण्येन नारीरत्नमभूत्सि(च्छि)ला ।
यदुपास्यं सुमनसां तद्वस्तुद्वन्द्वमाश्रये ॥
यस्य द्विरदवक्त्राद्याः परिषद्याः परश्शतम् ।
विघ्नं निघ्नन्ति भजतां विष्वक्सेनं तमाश्रये ॥
जयति क्षीरजलधेर्जातं सम्बे(व्ये)क्षणं हरेः ।
आलम्बनं चकोराणाम[1]मरायुष्करं महः ॥
पौत्रस्तस्य पुरूरवा भू(बु)धसुतस्तस्यायुरस्यात्मजः
संजज्ञे नहुषो ययातिरभवत्तस्माच्छ(च्च) पूरुस्ततः ।
तद्वंसे(शे) भरतो बभूव नृपतिस्तत्संततौ शंतनु-
स्तत्तुर्यो वि[2]जयोऽभिमन्युरुदभूत्तस्मात्प[3]रीक्षिस्ततः ॥
नन्दस्तस्याष्टमोऽभूत्समजनि नवमस्तस्य राज्ञश्चलिङ्क-
क्ष्मापस्तत्सप्तमः श्रीपतिरुचिरभवद्राजपूर्वो नरेन्द्रः ।
तश्याशि(स्यासी)द्विज्जलि(ले)न्द्रो दशम इह नृपो वीरहेमालिराय-
स्तार्तीई(यी)को मुरारौ कृतनतिरुदभूस्त(त्त)स्य मायापुरीशः ॥
तत्तुर्योऽजनि तातपिन्नमहीपालो निजालोकन-
स्तस्त्रा(त्रस्ता)मित्रगणस्ततोऽजनि हरन्दुर्गाणि सपा(प्ता)हितात् ।
अन्नै(ह्ले)केन स सोमिदेवनृपतिस्तस्यैव जज्ञे सुतो
वीरो राघवदेवराडिति ततः श्रीपिन्नमोऽभून्नृपः ॥
आरवीटिनगरीविभोरभूद्य(द)स्य वुक्कधरणीपति[ः] सुतः ।
येन साळु(व)नृसिंहराज्यमप्येधमानमहसा स्थिरीकृत[म्] ॥

---

१. सोमाख्यम्. २. अर्जुनः. ३. इकारान्तोऽपि परीक्षिशब्दोऽस्ति. 'जनमेजय इव परीक्षितनय.' दमयन्तीश्लेषात्.

श्वा(स्वः)कामिनीं श्व(स्व)तनुकान्तिभिराक्षिपन्तीं
बुक्कावनीपतिलको भु(बु)धकल्पशाखी ।
कल्याणिनीं कमलनाभ इवाब्धिकन्यां
वल्लाम्बिकामुदवहद्बहुमान्यशीलाम् ॥
सुतेव कलशाम्बुधे[ः] सुरभिलाशुगं[1] माधवा-
त्कुमारमिव शंकरात्कुलमहीभृतः कन्यका ।
जयन्तममरप्रभोरपि शचीव बुक्काधिपा-
च्छ्रुतं जगति वल्लभालभत रामराजं सुतम् ॥
सहश्रै(स्रैः) ससत्या सहितमपि यः सिन्धुजनुषां
सपातस्यानीकं समिति भुजशौर्येण महता ।
विजित्यादत्तेश्मा(स्मा)द्वनिगिरिदुर्गं विभुतया
विधूतेन्द्र[ः] कासप्पुडयमपि विद्राव्य सहसा ॥
कन्दनवोलिदुर्गमुरुकंदलदभ्युदयो
बाहुवलेन यो बहुतरेण विजित्य हरेः ।
संनिहितस्य तत्र चरणाम्बुषु भक्ततया
ज्ञातिभिरर्पितं सुधयति स्म निषेव्य विषम् ॥
श्रीरामराजक्षितिपस्य तस्य चिन्तामणेरर्थिकदम्बकानाम् ।
लक्ष्मीरिवाम्भोरुहलोचनस्य लक्काम्बिकामुष्य महिष्यलासीत् ॥
तस्याधिकै[ः] समभवस्त(त्त)नयस्तपोभि[ः]
श्रीरङ्गराजनृपति[ः] शसि(शि)वंशदीपः ।
आसन्समुल्लसति धामनि यस्य चित्रं
नेत्राणि वैरिसुदृशां च निरञ्जनानि ॥
सतीं तिरुमलाम्बिकां चरितलीलयारुन्धती-
प्रथामपि तितिक्षया वसुमतीयशो रुन्धतीम् ।
हिमांशुरिव रोहिणीं हृदयहारिणीं श(स)द्गुणै-
रमोदत सधर्मिणीमयमवाप्य वीराग्रणीः ॥

---

१. पुष्पाशुगं कामम्.

रचितनयविचारं रामराजं च धीरं
वरतिरुमलरायं वेंकटाद्रिक्षितीशम् ।
अजनयत स एतानानुपूर्व्या कुमारा-
निह तिरुमलदेव्यामेव राजा महौजाः ॥

सकलभुवनकण्टकानरातीन्समिति निहत्य स रामराजवीरः ।
भरतमनुभगीरथादिराजप्रथितयशाः प्रशशास चक्रमुर्व्याः ॥

वितरणपरिपाटीं यस्य विद्याधरीणां
नखरमुखरवीणानादगीतां निशम्य ।
अनुकलमयमाबालाम्बुबिम्बापदेशा-
दमरनगरशाखी लज्जया मज्जतीव ॥

व्यराजत श्रीवरवेंकटाद्रिराजक्षितौ लक्ष्मण[1]चारुमूर्तिः ।
ज्याघोषदूरीकृतमेघनाद[2][:] कुर्वन्सुमित्रा[3]शयहर्षपोषम् ॥

त्रिषु श्रीरङ्गक्ष्मापरिवृढकुमारेष्वधिरणं
विजित्यारिक्ष्मापांस्तिरुमलमहारायनृपतिः ।
महौजाः साम्राज्ये सुमतिरभिषिक्तो निरुपमे
प्रशास्त्यूर्वीं सर्वामपि तिसृषु मूर्तिष्विव हरिः ॥

यशश्वि(स्वि)नामग्रसरस्य यस्य पट्टाभिषेके सति पार्थिवेन्दोः ।
दानाम्बुपूरैरभिषिच्च[च्य]माना देवीपदं भूमिरियं दधाति ॥

सामादयो विधिमुखादिव सत्यवाचा(चः)
सामाद्युपायनिवहा इव सांयुगीनात् ।
रामादयो दशरथादिव राजमौले-
स्तस्मादमेय[य]शसस्तनया बु(ब)भू[वुः] ॥

राजा ततोऽभूद्रघु[नाथ]नामा श्रीरङ्गराय[:] श्रितपारिजातः ।
श्रीरामराज[:] शिशिरांशुरुर्व्यां विख्यातिमान्वेंकटदेवरायः ॥

---

१. लक्ष्मणः सौमित्रिः, लक्ष्मणं चिह्नं च. २. मेघनादो रावणिः, गर्जितं च. ३. सुमित्रा दशरथपत्नी, शोभनानि मित्राणि च.

श्रीरङ्गराय[:] सहजेषु तेषु पारं गतो नीतिपयःपयोधेः ।
अष्टासु दिक्षु प्रथितः स लेभे पट्टाभिषेकं पेनुगोण्डराज्ये ॥
अथ श्रीवेंकटपतिदेवरायो नयोज्ज्वलः ।
अवनीमसि(शि)षत्कीर्त्या दिशो दश विशोभयन् ॥
तज्ज्यायसः सु[र]द्रुम[ल]ज्जावहचरितरामराजविभोः ।
जातस्तिरुम[ल]राजख्यातश्रीरङ्गरायोऽपि ॥
तयोः श्रीरङ्गराजस्य तनया विनयाधिकाः ।
अजायन्त दयावन्त[:] श्रुतवन्तो यशस्विनः ॥
श्रीरङ्गरायनृपतेस्तनयेषु तेषु
पारं गिरामधिगतः कविपुंगवानाम् ।
रत्नेषु कौस्तुभ इवाम्बुधिसंभवेषु
श्रीरामरायनृपति[:] सुचिरं वि(व्य)लासीत् ॥
पूर्वं विश्रु(श्रु)तरामराजनृपते[:] श्रीरामभद्राकृतेः
कल्याणोदयशालिनस्तनुभवा[:] पञ्च प्रपञ्चानने ।
दक्षा नीतिपथानुगाः समभवन्क्षीरापगाकामिनो
गीर्वाणालयभूरुहा इव बुधश्रेणीष्टदानोत्सुकाः ॥
प्रज्ञाविजितसुग्रीवाः प्राज्ञावनकृताग्रहाः ।
सर्वे ते विबुधग्राह्या गुणै रुचिरविग्रहाः ॥
विख्यातचर्येषु नृपेषु तेषु श्रीरङ्गराज[:] शिशिरांशुरुर्व्याः ।
विश्वत्रये विश्रुतकीर्तिरासीत्सौरेषु[1] शालेष्विव पारिजातः ॥
यद्भेरीघनभांकृतिश्रवणतो भीत्या महत्या रणे
प्रत्यर्थिक्षितिपैः फ(प)लायनपरैर्मुक्ता लुठन्त[:] श्रमात् ।
कान्ताराभरणीभवन्ति कलशच्छत्रध्वजाङ्काञ्चिता-
न्युन्मार्जत्यधिभूपदानि तदनुव्रज्जा(ज्या)भिया किं हयाः ॥
श्रीरङ्गराजस्य तपोविशेषैः सतोषणः शेषगिरीश्वरस्य ।
कारुण्यभूम्ना कमनीयशोभौ पुत्रावहू(भू)तां पुरुहूतभोगौ ॥

---

१. सुरसंबन्धिवृक्षेषु.

पे(पि)दवेंकटेन्द्रपिनवेंकटाधिराडिति नामकौ प्रकृतिपालनोत्सुकौ ।
खरदूषणप्रहृतिदक्षिणावुभौ ददतः(?) प्रमोदमिव रामलक्ष्मणौ ॥
श्रीशाली पिदवेंकटेन्द्रनृपतिर्जे(र्ज्ये)ष्ठो वयोभिस्तयोः
शौर्यौदार्यगभीरताधृतिकलापूर्वैश्च सर्वैर्गुणैः ।
यस्यारातिनृपालभेदनकलायात्रासु सेनारजः-
पूरैर्भूर्जलधिर्भवेदिति हरिश्चित्तेश्च(?) धत्ते स्थितिम् ॥
श्रीरङ्गराजेन्द्रकुमारकेऽस्मिन्वीरोत्तमे वेंकटदेवराये ।
पट्टाभिषिक्ते पे(पि)नुगोण्डराज्ये तदाभिषिक्ताः सुधियोऽपि हेम्ना ॥
यथा रघुकुलोद्वह[ः] स्वयमरुन्धतीजानिना
स्वगोत्रगुरुणा सुधीतिलकताताचार्येण यः ।
यथाविधि यशश्वि(स्वि)ना विरचिताभिषेक[ः] क्षणा-
द्विभिद्य यवनाशरान्विजयते प्रशासन्महीम् ॥
यथाविधि महीसुरोत्तमकृताभिषेकोत्सवे
यदीयकरवारिदे कनकवृष्टिदे सर्वतः ।
यशोमयतरङ्गिणी दशदिगन्तरे जृम्भते
सतां प्रशमितोऽभवत्कृपणतोऽरुदावानलः ॥
यस्मिन्वेंकटरायभूभृति वहत्युर्वीं मुदा निर्भरां
कूर्मो वेंकटनाथतामुपगतस्तद्रक्षणे दीक्षितः ।
शेषोऽप्येत्यमषवेष(?)मचला दुर्गत्वमप्याश्रिताः
संतोषं दधते भजन्ति करिणां रूपेण चाशागजाः ॥
वाराशिगाम्भीर्यविशेषधुर्यश्चौराशिदुर्गैकविभालवर्यः ।
पराष्टदिग्रायमनःप्रकामभयंकरः शार्ङ्गधरान्तराण्डा(ङ्ग)ः ॥
हतरिपुरनिमेषानोकहो याचकानां
होसविरुदर(?)गण्डो रायराहुत्तमिण्डः ।
महितचरितधन्यो मन्नियान्शामुलादि-
प्रकटितविरुदश्रीः पाटितारातिलोकः ॥

---

१. खरदूषणौ राक्षसौ, खरो दूषणश्च.

सारवीररमया समुल्लसन्नारवीटिपुरहारनायकः ।
कुण्डलीश्वरमहाभुज[ः]श्रयन्मण्डलीकधरणीवराहताम् ॥
आत्रेयगोत्रजानामग्रसरो भूभुजामुदारयशाः ।
अतिविरुदतुरगघट्टो मतिगुरुरारट्टमगधमान्यपदः ॥
शल्यारिनीतिशाली कल्याणपुराधिपः कलाचतुरः ।
चाक्कि(लिक्क)चक्रवर्ती माणिक्क(क्य)महाकिरीटमहनीयः ॥
ऐबिरुदरायराहुतवेश्यैकभुजङ्गबिरुदभरितश्रीः ।
[1]....................................... ॥

राजाधिराजबिरुदो राजराजसमाहितिः ।
मूरुरायरगण्डाङ्को मेरुलङ्घियशोभरः ॥
परदारेषु विमुखः पररायभयंकरः ।
शिष्टसंरक्षणपरो दुष्टशार्दूलमर्दनः ॥
अरीभगण्डभेरुण्डो हरिभक्तिसुधानिधिः ।
[1]....................................... ॥

सोऽयं नीतिजितादिभूपतितति[ः] सु[त्रा]मशाखी सुधी
सार्थानां भुजतेजसा स्ववशयन्कर्णाटशिं(सिं)हासनम् ।
आ सेतोरपि चाहिमाद्रि विमतान्संहृत्य शासन्मुदा
सर्वोर्वी प्रचकास्ति वेंकटपति[ः] श्रीदेवरायाग्रणीः ॥
वसुबाणकलम्बेन्दु[ग]णिति शकवत्सरे ।
धातृसंवत्सरे नाम्नि मासि चाषाढनामनि ॥
पक्षे वलक्षे पुण्यर्क्षे द्वादस्यां(श्यां) च महातिथौ ।
श्रीवेंकटेशपादाब्जसंनिधौ श्रेयसां निधौ ॥
श्रीमत्कौशिकगोत्राय वरापस्तम्बसूत्रिणे ।
यशश्वि(स्वि)ने यजुःशाखाध्यायिनेऽभीष्टदायिने ॥
यजनादिमषट्कर्मभजनात्पावनात्मने ।
श्रीरामचरणाम्भोजभ्रमरायितचेतसः(से) ॥

---

१. आदर्शे त्रुटिचिह्नं नास्ति.

वीरवेंकटरायेन्द्रनृपचित्तानुवर्तिने ।
लक्कराजस्य पौत्राय सिंगराजस्य सूनवे ॥
राजन्यास्थानरत्नाय रङ्गनाथाय धीमते ।
जगत्ख्यातजयंकौण्डतोण्डमण्डलभूषणम् ॥
पडवीडुमहाराज्ये परंद्रामिश्रपत्तुगम् ।
आमूरुकोट्टविख्यातमाञ्जनाडुविशोभितम् ॥
गुडियातस्य सीमायां विडुग्राममिति श्रुतम् ।
गूडनगरग्रामस्य प्राचीभागमुपाश्रितम् ॥
कौण्डिन्यनामनद्याश्च दक्षिणस्यां दिशि स्थितम् ।
चित्तातूरुमहाग्रामपश्चिमस्यां दिशि स्थितम् ॥
वेङ्गायिनेत्तरत्नस्य वु(चो)त्तराशामुपाश्रितम् ।
गोपालश्रीपुरमिति प्रतिनामसमन्वितम् ॥
ग्रामं कोङ्यातनामानं शोभितं शोभनैर्गुणैः ।
सर्वमान्यं चतुःसीमासहितं च समन्ततः ॥
निधिनिक्षेपपाषाणसिद्धसाध्यजलान्वितम् ।
अक्षिण्यागामिसंयुक्तं गणभोज्यसभूरुहम् ॥
वापीकूपतडागैश्च कच्छारामैश्च संयुतम् ।
पुत्रपौत्रादिवि(भि)र्भोज्यं क्रमादाचन्द्रतारकम् ॥
दानाद(ध)मनविक्रीतियोग्यं विनिमयोचितम् ।
परीतः प्रयतैः स्निग्धैः पुरोहितपुरोगमैः ।
विविधैर्विबुधै[ः] श्रौतपथिकैरथि(धि)कैर्गिरा ॥
श्रीवेंकटपतिरायक्षितिपतिवर्यस्य कीर्तिधुर्यस्य ।
शासनमिदं सुधीजनकुवलयचन्द्रस्य भूमहेन्द्रस्य ॥
श्रीवेंकटपतिरायोक्या(ज्ञोक्त्या)प्राह पौत्रः सभापतेः ।
कावकोटिसुतो रामकवि[ः] शासनवाङ्मयम् ॥
श्रीवीरणाचार्यवरेण्यपौत्रो वराच्युतार्यो गणपार्यपुत्रः ।

सूक्त्यालिखद्वेंकटरायमौलेः पद्यानि हृद्यान्यथ शासनस्य ॥

दानपालनयोर्मध्ये दाना[च्]श्रेयोऽनुपालनम् ।
दाना[त्] स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥
श्व(स्व)दत्ताद्विगुणं पुण्यं परदत्तानुपालनम् ।
परदत्तापहारेण स्वदत्तं [निष्फलं भवे]त् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिवर्षसहस्राणि विष्टायां जायते क्रिमिः ॥
ये(ए)कैव भगिनी लोके सर्वेषामेव भूभुजाम् ।
न भोज्या न करग्राह्या विप्रदत्ता वसुंधरा ॥

सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः ॥

(इण्डिअन् आण्टिक्केरी १३,१८–१३२)

---

(८२)

कण्वाश्रमस्थमहादेवमन्दिरप्रशस्तिः[१] ।

ओं नमः शिवाय ।

ओम् ।

नमः सकलसंसारसागरोत्तारहेतवे ।
तमोगर्ताभिसंपातहस्तालम्बाय शंभवे ॥

श्वेतद्वीपानुकाराः क्वचिदपरिमितैरिन्दुपादैः पतद्भि-
र्नित्यस्थैः सान्धकाराः क्वचिदपि निभृतैः फाणिपै(?)र्भोगभागैः ।
सोष्माणो नेत्रभाभिः क्वचिदतिशिशिरा ज[ह्नुक]न्याजलौघै-
रित्थं भावैर्विरुद्धैरपि जनितमुदः पान्तु शंभोर्जटा वः ॥

भोगीन्द्रस्य फणामणी(णि)द्युतिमिलन्मौलीन्दुलोलाशवो
नेत्राग्नेश्छुरिभस्मधूमकपिशैर्ज्वालाशिखाग्रैः क्वचित् ।

---

१. अस्य कण्वाश्रमस्याधुना 'कुन्नस्व' इति नाम्ना बूंदीनरेशराज्यतो विनिःसृतस्य **कोटानगरस्य चर्मण्वती**तीरवसतेः पूर्वस्या गव्यूतिमात्रान्तराले प्रसिद्धिः.

मुक्ताकारमरुन्नदीजलकणैराकीर्णशोभाः क्वचि-
च्चेत्थं शाश्वतभूषणव्यतिकराः शंभोर्जटाः पान्तु वः ॥
स्थाणोर्वः पातु मूर्ध्ना(र्धा) सर इव सततव्योमगङ्गाम्बुलोल-
स्फूर्जद्भोगीन्द्रपङ्कश्लथविकटजटाजूटकह्लारहारी ।
मन्दं यत्र स्फुरन्त्यो धवलनरशिरोवारिजन्मान्तराले
स्पष्टः प्रोद्यन्मृणालाङ्कुरनिकर इवाभान्ति मौलीन्दुभासः ॥
नेत्रक्रोडप्रसक्तोज्ज्वलदहनशिखा[1]......भासां शिखानां
हस्ताभ्यामूर्ध्वमुद्यद्विश(ष)शिखिवदनग्रन्थिमातत्य नागम् ।
भारं संयम्य कृत्वा सममममृतकरोद्भासि मौलीन्दुबिम्बं
स्थाणुः प्रारब्धनृत्तो जगदवतु लयोत्कम्पिपादाङ्गुलीकः ॥
चूडाचारुमणीन्दुमण्डितभुवः(?) सद्भोगिनामाश्रयः
पक्षच्छेदभयार्तिसकटवता रक्षाक्षमो भूभृताम् ।
दूराभ्यागतवाहिनीपरिकरो रत्नप्रकारोज्ज्वलः
श्रीमानित्थमुदारसागरसमो मौर्यान्वयो[2] दृश्यते ॥
दिङ्नागा इव जात्यसंभृतमुदो दानोज्ज्वलैराननै-
र्विस्रम्भेण रमन्त्यभीतमनसो मानोद्धुराः सर्वतः ।
सद्वंशत्ववशप्रसिद्धयशसो यस्मिन्प्रसिद्धा गुणैः
श्लाघ्या भद्र[3]...... च सत्त्वबहुलाः पक्षैः समं भूभृतः ॥
इत्थं भवत्सु भूपेषु भुञ्जत्सु सकलां महीम् ।
धवलात्मा नृपस्तत्र यशसा धवलोऽभवत् ॥
कायादिप्रकटार्जितैरहरहः स्वैरेव दोषैः सदा
निर्वस्त्रा[ः] सततक्षुधि प्रतिदिनं स्पष्टि(ष्टी)भवद्यातनाः ।
रात्रीसंचरणा भृशं परगृहेष्वित्थं विजित्यारयो
येनाद्यापि[4]......ता सुविपदो नीताः पिशाचा इव ॥

१ 'शिखाप्रायभासा' इति भवेत्. २. 'मौर्यैर्हिरण्यार्थिभिरर्चाः प्रकल्पिताः' व्याकरणमहाभाष्यम् ३. 'भद्रतया' इति भवेत् ४. 'विकीर्णता' इति भवेत्.

कोपाद्धूनमहेभकुम्भविगलन्मुक्ताफलालंकृत-
स्फीतास्रस्रुतिमण्डिता अपि मुहुर्येनोर्जितेन स्वयम् ।
उन्नालैरिव पङ्कजैः पुनरपि च्छिन्नैः शिरोभिर्वि(र्द्वि)षा
विक्रान्तेन विभूषिता रणभुवस्त्यक्ता नरैः कातरैः ॥
इत्थं तस्य चिरंतनो द्विजवरः स[1]........त्तायुध-
प्रीति(?)प्रेतनरेन्द्रसत्कृति[2]........प्रसिद्धो गुणैः ।
यस्याद्यापि रणाङ्गणे विलसितं संसूचयन्ति द्विषः
[3]....ष्यच्छोणितमर्मरा रणभुवः प्रेतपृ(प्रि)याः प्रायशः ॥
शब्दस्यार्थ इव प्रह्लादनपटोर्मार्गस्त्रयीसंज्ञितो
धर्मः सेव्यविशुद्धभावसरलो न्यायस्य मूलं सतः ।
प्रामाण्यं प्रगत[4].... ....यः साध्यस्य संसिद्धये
तस्य[5]..................तः पृ(प्रि)यसखः श्रीसंकुकाख्यो नृपः ॥
द्रेङ्गिणी नाम तस्यासीद्धर्मपत्नी द्विजोद्भवा ।
तस्यां समभवद्वीरः [6]....कृतगुणाकरः ॥
यशस्वी रूपवान्दाता श्रीमाञ्शिवगणो नृपः ।
शिवस्य नूनं स गणो येन तद्भक्ततां गतः ॥
खड्गाघातदलत्तनुत्रविचटद्वह्निस्फुलिङ्गोज्ज्वल-
ज्वालादग्धकबन्धकण्ठकुहरप्रोन्मुक्तनादोल्बणे ।
नाराचैर्व्यथिताननाकुलखगप्रोद्वान्तरक्तासवं
प्रीतप्रेतजनो रणे रतधिया येनासकृच्चर्वितः(?) ॥
ज्ञात्वा जन्म जराविपत्तिमरणक्लेशैरशेषैश्चितं
स्वार्थस्याप्ययमेव योग उचितो लोके प्रसिद्धः सताम् ।
तेनेदं परमेश्वरस्य भवनं धर्मात्मना कारितं
यं दृष्ट्वैव समस्तलोकवपुषा नष्टं कलेः कल्मषम् ॥

---

१. 'सन्वीर्यवत्ता' इति भवेत्. २. 'मुद' पात्र' इति भवेत्. ३. 'शुष्यत्' इति पूरितम्. ४. 'प्रगतस्य हेतुविषयः' इति भवेत्. ५. 'तस्याभदतिसयत' इति पूरितम्. ६. 'सुतः' इति भवेत्.

पुष्पाशोकसमीरणेन सुरभावुत्फुल्लचूताङ्कुरे
कालये(ले) मत्तविलोलषट्पदकुलैर्व्यारुद्धदिङ्मण्डले ।
जातेऽपाङ्गनिरीक्षणैककथके नारीजनस्य स्मरे
क्लृप्तं सद्भवनं भवस्य सुधिया तेनेह **कण्वाश्रमे** ॥
काल्पे(?)न्दोलाकुलानां तनुवलनभरात्प्रस्फुटत्कञ्चुकानां
कान्तानां दृश्यमानैः [1]…………भोजि(गि)संभोगचिह्नैः ।
यस्मि[2]……भिमुख्यस्थितिझटितिनमच्छ(त्स)सितार्धेक्षणानां
भ्रूभङ्गैरेव रम्यैर्हृदयविनिहितः सूच्यते प्रेमबन्धः ॥
मत्तद्विरेफझङ्कारि सहकारविराजिताः ।
संवीक्ष्य ककुभो बाष्पं मुञ्चन्ति पथिकाङ्गनाः ॥
धूपादिगन्धदीपार्थं खण्डस्फुटितहेतुना ।
ग्रामौ दत्तौ क्षयो निमिः(?) सर्वाङ्गां चोणिपद्रकौ ॥
पालयन्तु नृपाः सर्वे येषां भूमिरियं भवेत् ।
एवंकृते ते धर्मार्थं नूनं यान्ति शिवालयम् ॥
संसारसागरं घोरमनेन धर्मसेतुना ।
तारयिष्यत्ययं नूनं जन्यौ चात्मानमेव च ॥
तावत्ससागरां पृथ्वीं सनगां च सकाननाम् ।
यावदिन्दुस्तपे[3] भानुस्तावत्कीर्तिर्भविष्यति ॥
संवत्सरशतैर्यातैः सपञ्चनवत्यर्गलैः ।
सप्तभिर्मालवेशानां मन्दिरं धूर्जटेः कृतम् ॥
अलुब्धः पृ(प्रि)यवादी च शिवभक्तिरतः सदा ।
कारापको शब्दगुणो धार्मिकः शंसितव्रतः ॥
दक्षः प्राज्ञो विशुद्धात्मा शूर(लि)भक्तः पृ(प्रि)यंवदः ।
[4]…प्तो[5]……कश्चासिन्कायस्थो **गोमिकाङ्गजः** ॥

---

१. 'कुचकलशभुजा' इति पूरितम्. २. 'न्प्रीत्याभिमु' इति भवेत्. ३. 'स्तपेत्' इति भवेत्. ४. 'आप्तो' इति भवेत्. ५. 'ऽत्र रौगुक' इति पूरितम्.

उत्कीर्णं **शिवनागेन द्वारशिवस्य** सूनुना ।
.... ॥

सूनुना भट्टसुरभेर्देवटेन श्रुतोज्ज्वलाः ।
श्लोका अमी कृता भक्त्या मौलिचन्द्रसुधाभुजः ॥
.... ।

कृष्णसुतो गुणाढ्यश्च सूत्रधारोऽत्र **णण्णकः** ॥
एतत्कण्वाश्रमं ज्ञात्वा सर्वपापहरं शुभम् ।
कृतं हि मन्दिरं शंभोर्धर्मकीर्तिविवर्धनम् ॥
यतिहीनं शब्दहीनं मात्राहीनं तु यद्भवेत् ।
तत्सर्वं साधुचित्तेन मर्षणीयं बुधैः सदा ॥

(इण्डिअन् आण्टिक्वेरी १३।१६३–६५)

(८३)

[१]उदयपुराधीशजयसिंहवल्लभानां शासनपत्रम् ।

स्वस्ति श्रीमद्विजयोदयपुराद्भगवत्स्वामिमहासेनपादानुध्यातानां सप्तलोकमातृभिः सप्तमातृभिः परिवर्धितानां भगवन्नारायणप्रसादसमाना(सा)दितवराहलाञ्छनेक्षणक्षणवशीकृताशेषमहीक्षितां मानव्यसगोत्राणां हारीतीपुत्राणामश्वमेधावभृथस्नानपवित्रीकृतगात्राणां च(चा)लुक्याना कुलमलंकरिष्णोश्चतुरुदधिसलिलसमुल्लङ्घितकीर्तेः **श्रीकीर्तिवर्मणः** पौत्रः समाश्रिताना कामधेनुचरितस्यानेकरिपुदुर्गप्रमथनावाप्तविषमसिद्धेर्यस्य च शस्त्रमापन्नत्राणाय, विग्रहः पराभिमानभङ्गाय, शिक्षितं विनयाय, विभवार्जनं प्रदानाय, प्रदानं धर्माय, धर्मः श्रेयोवाप्तये, तस्य तनयः शशधर इव सर्वलोकहृदयानन्दकरः, सुरगज इवाविच्छिन्नदा[२]नकि(क्लि)न्ननिकेतः, चक्रधर इवाप्रतिहतच[३]क्रः, द्रोण इव कृ[४]पानुगतः, स्वबाहुबलोपार्जितसर्वसिद्धिः समर-

१. अस्योदयपुरस्य सत्ता **मद्राजराजधान्या कृष्णा**परिसरे **नूर्जिविद्**परगणेऽस्तीति बोध्यम्. २. 'दान गजमदे त्यागे' इति मेदिनि'. ३. चक्र सैन्य राष्ट्रम्, अस्त्र च. ४. कृपा दया, कृपो द्रोणाचार्यश्यालक .

शतसंकटोत्कण्ठविजयवीरधवजः श्रीजयसिंहवल्लभमहाराजः परमब्रह्मण्यो मातापितृपादानुध्यातः सर्वानेवमाज्ञापयति—अस्तु वो विदितम्—अस्माभिर्गुद्रहारविषये मर्दावल्लीपूर्वपार्श्वे पेणुकपङ्गुनाम ग्रामग्रामो विष्णुनिमित्तं विजयराज्यसंवत्सरेऽष्टादशे पोगुलूरवास्तव्याय भारद्वाजसगोत्राय भारद्वाजसूत्रस्याधीतवेदद्वयस्य शिवशर्मणः पौत्राय गृहीतसाहस्रस्याधिगतवेदद्वयस्य देवशर्मणः पुत्राय षट्कर्मनिरतायाशीतितर्काय गुप्तशर्मणे सर्वकरपरिहारेणाग्रहारीकृत्य प्रतिग्रहो दत्तो न कैश्चिदप्यस्योपरि बाधा करणीया ॥

उक्तं च भगवता वेदव्यासेन व्यासेन—

बहुभिर्वसुधा दत्ता बहुभिश्चानुपालिता ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
षष्टिं वर्षसहस्राणि स्वर्गे मोदति(?) भूमिदः ।
आक्षेप्ता(च्छेत्ता) चानुमन्ता च तान्येव नरके वसेत् ॥
मन्त्री पुरोहित[श्चा]स्य यथेन्द्रस्य बृहस्पतिः ।
आज्ञप्तिः(?) शिय(व)शर्मास्य वाजपेय······· ॥

(इण्डिअन् आण्टिक्केरी १३।१३७–३८)

(८४)

वांकाटकदेशमहाराजश्रीप्रवरसेनस्य शासनपत्रम् ।

ओं ओं स्वस्ति प्रवरपुरादग्निष्टोमाप्तोर्या(?)मोक्थ्यषोडश्यतिरात्रवाजपेयबृहस्पतिसवसा(ना)दास्कचतुरश्वमेधयाजिनः वि[ष्णुवृ]द्धसगोत्रस्य साम्रा[जो] वाकाटकानां महाराजश्रीप्रवरसेनस्य सूनोरत्यन्तस्वामिमहाभैरवभक्तस्यांसभारसंनिवेशितशिवलिङ्गोद्वहनशिवसुपरितुष्टसमुत्पादितराजवशानां पराक्रमाधिगतभागीरथ्यामलजलमूर्धाभिषिक्तानां दशाश्वमेधावभृथस्नातानां भारशिवानां महाराजभवनागदौहित्रस्य गौतमीपुत्रस्य पुत्रस्य(?) वाका-

१. अय च वाकाटकदेशो महादेवपर्वतगोदावरीनद्योर्महानद्यजण्टपर्वतयोश्चान्तराले वर्तते इति डॉक्टर्बूल्हरव्याख्यानतोऽवगम्यते.

टकानां महाराजश्री**रुद्रसेन**स्य सूनोरत्यन्तमाहेश्वरस्य सत्यार्जवकारुण्यशौर्यविक्रमनयविनयमाहात्म्याधि(दि)मत्त्वहात्रा(?)गतभक्तित्वधर्मविजयित्वमनोनैर्मल्यादिगुणैः समुपेतस्य वर्षशतमभिवर्धमानकोशदण्डसाधनसंतानपुत्रपौत्रिणो युधिष्ठिरवृत्तेर्वाकाटकाना महाराजश्री**पृथिवि(वी)षेण**स्य सूनोर्भगवतश्चक्रपाणेः प्रसादोपार्जितश्रीसमुदयस्य वाकाटकानां महाराजश्री**रुद्रसेन**[स्य] सूनोर्महाराजाधिराजश्री**देवगुप्त**सुतायां **प्रभावती**गुप्तायामुत्पन्नस्य शंभोः प्रसादधृतिकार्तयुगस्य वाकाटकानां परममाहेश्वरमहाराजश्री**प्रवरसेन**स्य वचना[त्] भोजकटराज्ये मधुनदीतटे **चर्माङ्कनाम**ग्रामो राजमानिकभूमिसहस्रैरष्टाभिः ८००० शत्रुघ्नराजपुत्रकोण्डराजविज्ञप्त्या नानागोत्रचरणेभ्यो ब्राह्मणेभ्यः सहस्राय दत्तः । यतोऽस्मत्संतका(?)सर्वाध्यक्षाधियोगनियुक्ता आज्ञासंचारिकुलपुत्राधिकृता भटाश्च विश्रुतपूर्वयाज्ञयाज्ञपयितव्याः—विदितमस्तु वो यथेहास्माकं मनोधर्मायुर्बलविजयैश्वर्यविवृद्धये इहामुत्र हितार्थमात्मानुग्रहाय वैजयिके धर्मस्थानेऽपूर्वदत्त्योदकपूर्वमतिसृष्टः । अथास्योचितां पूर्वराजानुमतां चातुर्वैद्यग्राममर्यादान्वितरामः । तद्यथा—अकरदायी, अभटच्छात्रप्रावेश्यः, अपारम्परगोबलीवर्दः, अपुष्पक्षीरसंदोहः, अचरासनचर्माङ्गार[ः], अलवणक्लिन्नक्रेणिखणकः(?), सर्ववेष्टिपरिहारपरिहृ(हृ)तः, सनिधिः सोपनिधिः, सक्लि(क्लृ)प्तोपक्लि(क्लृ)प्तः, आचन्द्रादित्यकालीयः, पुत्रपौत्रानुगमकः, भुज(ञ्ज)तां न केनचिद्व्याघातः कर्तव्यः सर्वक्लि(क्रि)याभिः स रक्षितव्यः पर(रि)वर्धयितव्यश्च । यश्चायं(श्चेदं) शासनमगणयमानो(नः) स्वल्पामपि [प]रिबाधां कुर्यात् कारयिता वा तस्य ब्राह्मणैर्वेदितस्य सदण्डनिग्रहं कुर्याम । अस्मिंश्च धर्मावरकरणेऽतीतानेकराजदत्तसचिन्तनपरिपालनं कृतपुण्यानुकीर्तनपरिहारार्थं न कीर्तयामः—

व्यासगीतौ चात्र श्लोकौ प्रमाणीकर्तव्यौ—

‘स्वदत्तां परदत्ता वा यो हरेत वसुंधराम् ।
गवां शतसहस्र[स्य] हन्तुर्हरति दुष्कृतम् ॥

षष्टिं वर्षसहस्राणि स्वर्गे मोदति(?) भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥' इति।

शासनस्थितिश्चेयं ब्राह्मणैरीश्वरैश्चानुपालनीया। तद्यथा—राजा सप्ताङ्गे राज्येऽद्रोहप्रवृत्तानां ब्रह्मघ्नचौरपारदारिकराजापथ्यकारिप्रभृतीनां संग्रामं कुर्वतामन्यग्रामेष्वनपराद्धानामाचन्द्रादित्यकालीयः। अतोऽन्यथाकुर्वतामनुमोदितव्यो(?) राज्ञो भूमिच्छेदं कुर्वतोऽस्तेपमिति(?)। प्रतिग्राहिणश्चात्र वारनियुक्ताः शाट्यायनः गणार्यः वात्स्यदेवार्यः भारद्वाजकुमारशर्मार्यः पाराशर्यगुहशर्मा काश्यपदेवार्यः महेश्वरमात्रार्यः कौण्डिन्यरुद्रार्यः सोमार्यो हरिशर्मार्यो भारद्वाजकुमारशर्मार्यः कौण्डिन्यमातृशर्मा वरशर्मा गौण्डशर्मा नागशर्मा भारद्वाजशान्तिशर्मा रुद्रशर्मा वात्स्यो भोजकदेवार्यो भवशर्मा देवशर्मा भारद्वाजमोक्षशर्मा नागशर्मा रेवतीशशर्मा धर्मार्यो भारद्वाजशर्मार्यो नन्दनार्यो मूलशर्मेश्वरशर्मा वरशर्मा वात्स्यस्कन्दार्यो भारद्वाजवप्पार्यो धर्मार्य आत्रेयस्कन्दार्यो गोतमसोमशर्मार्यो भर्तृशर्मार्यो रुद्रशर्मार्यो भवार्यो मातृशर्मार्य ईश्वरशर्मार्यो गोतमसगोत्रमातृशर्मार्यः कौण्डिन्यदेवशर्मार्यो वरशर्मार्यो रोहार्यो गोतमसगोत्रस्वामिदे[वा]र्यो रेवतीशर्मार्यो ज्येष्ठशर्मार्यः शाण्डिल्यकुमारशर्मार्यः स्वातिशर्मार्यः शाट्यायनकौण्डार्यप्रभृतयः सेनापतौ खत्रवर्मणि संवत्सरेऽष्टादशे[1] १८ ज्येष्ठमासशुक्लपक्षे त्रयोदश्यां शासनं लिखितमिति ॥

वाकाटकललामस्य क्रमप्राप्तनृपश्रियः।
राज्ञः प्रवरसेनस्य शासनं रिपुशासनम् ॥

(इण्डिअन् आण्टिक्वेरी १२।२४३–४५)

---

१. अयं चाष्टादशः संवत्सरः प्रवरसेनराज्यारम्भतो बोध्यः. तद्राज्यमीशाब्दीयपञ्चमशतके आसीदिति डॉक्टरबूल्हरसिद्धान्तः.

(८५)

कान्यकुब्जेश्वरश्रीगोविन्दचन्द्रमहाराजानां शासनपत्रम्।

ओं ओं नमो भगवते वासुदेवाय।

तमाद्यं सर्वदेवानां दामोदरमुपास्महे।
त्रैलोक्यं यस्य वक्षीव क्रोडान्तःस्थं वलित्रयी॥
वंशे गाहडवालाख्ये बभूव विजयी नृपः।
महिअलसुतः[1] श्रीमान्नलना भागसंनिभः॥
याते श्रीभोजभूपे विबुधवरवधूनेत्रसीमातिथित्वं
श्रीकर्णे कीर्तिशेषं गतवति च नृपे क्ष्मात्यये जायमाने।
भर्तारं यं धरित्री त्रिदिवविभुनिभं प्रीतियोगादुपेता
त्राता विश्व(श्वा)सपूर्वं समभवदिह स क्ष्मापतिश्चन्द्रदेवः॥
द्विषत्क्षितिभृतः सर्वान्विधाय विवशान्वशे।
क(का)न्यकुब्जेऽकरोद्राजा राजधानीमनिन्दिताम्॥
तेनाजनि द्विषदिलापतिदन्तिसिंहः
क्षोणीपतिर्मदनपाल इति प्रसिद्धः।
येनाक्रियन्त बहुशः समरप्रबन्धाः
संनर्तितप्रहतशत्रुकबन्धबन्धाः॥
तस्मादजायत नरेश्वरवृन्दवन्द्य-
पादारविन्दयुगलो ज्वलितप्रतापः।
क्षोणीपतीन्द्रतिलको रिपुरङ्गभङ्गी
गोविन्दचन्द्र इति विश्रुतराजपुत्रः॥
संवत्साहस्रिके एकषष्ट्युत्तरशता(भ्य)धिके।
पौषमासे शुक्लपक्षे पञ्चम्यां रविदिनेऽङ्के॥

---

१. द्वाविंशे लेखे कान्यकुब्जेश्वरचन्द्रदेवस्य महीचन्द्रात्मजत्ववर्णनेन 'महीचन्द्र' 'महीपाल' इति पाठो भवेत्.

संवत् ११६१ पौषसुदी ९ रवौ । अद्येहासतिकायां सकलकल्मषक्षयकारिण्यां यमुनायां स्नात्वा यथाविधानं मन्त्रैर्देवर्षिमनुष्यभूतपितॄंस्तर्पयित्वा सूर्यं भट्टारकं सर्वकर्तारं भगवन्तं शिवं विश्वाधारं वासुदेवं समभ्यर्च्य हुतवहं हुत्वा जीआवतीपट्टलायां वसभीग्रामे समस्तमहत्तमजनपदान्संबोधयति—यथा ग्रामोऽयं मया क्षेत्रवनमधूकाम्रविशति अथू(?)प्रस्थाक्षपटलप्रस्थाकारतुरुष्कदण्डवरवज्ञा(?)हिरण्यसर्वादायसंयुक्तः पूर्वस्याम्—वाधुमउअग्रामः, पश्चिमायाम्—वाडथलाग्रामः, दक्षिणस्याम्—पुसौलीग्रामः, उत्तरस्याम्—सावधडग्रामः, एवं चतुराघाटविशुद्धो मातापित्रोरात्मनश्च यशोपुण्यविवृद्धये जलबुद्बुदाकारं जीवितं दानभोगफलां लक्ष्मीं ज्ञात्वा बह्वृचशाखिने गौतमगोत्राय गौतमावितथाङ्गिरसत्रिप्रवराय मेनेपौत्राय कल्पेपुत्राय ज्योतिर्विदे ब्राह्मणाल्हेकाय महाराजपुत्रश्रीमद्गोविन्दचन्द्रदेवेनोत्तरायणसंक्रान्तौ कुशपूतेन हस्तोदकेन चन्द्रार्कं यावच्छासनत्वेन प्रदत्तः ।

ये यास्यन्ति महीभृतो मम कुले किं वा परस्मिन्पुर-
स्तस्मिन्नेष मयाञ्जलिर्विरचितो नादेयमस्मात्कियत् ।
दूर्वामात्रमपि स्वधर्मनिरता दत्तं मया पाल्यतां
वायुर्वास्यति तप्स्यति प्रतपनः श्रुत्वा मुनीनां वचः ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्टायां कृमिर्भूत्वा पितृभिः सह मज्जति ॥
भूमिं यः प्रतिगृह्णाति यस्तु भूमिं प्रयच्छति ।
तावुभौ पुण्यकर्माणौ नियतं स्वर्गवासिनौ ॥
तडागानां सहस्रेण वाजपेयशतेन च ।
गवां कोटिप्रदानेन भूमिहर्ता न शुध्यति ॥

लिखितं च पुरोहितश्रीजागूक—महत्तक—श्रीवाल्हण—प्रतिहारश्रीगौतम—एषां संमत्या पण्डितश्रीकूकेपुत्रविजयदासेनेति ॥

(इण्डिअन् आण्टिक्वेरी १४।१०—३४)

(८६)

श्रीसिङ्घणदेवमहाराजानां ताम्रपत्रम् ।

स्वस्ति ।

दीर्घायुरुन्नततरप्रतापः पृथिवीमिमाम् ।
रक्षतादक्षताचारः प्रजानाथः प्रजाहितः ॥
निर्विघ्नं पातु विश्वस्य गोप्ता स धरणीधरः ।
धर्मद्रुहां दमयिता देवस्त्याग(?)चतुर्भुजः ॥
अस्ति क्षत्रियरत्नानामाकरः सागरायति ।
कुलं **कलचुरी**त्याख्यं विख्यातं भुवनत्रये ॥
तदन्ववाये राजाभूत्**कृष्णः** कृष्ण इवापरः ।
अपि बालस्य चरितमद्भुतं यस्य गीयते ॥
स **जोगम**महीपालं कालं वैरिमहीभुजाम् ।
वीरैकवन्द्यमहसां पात्रं पुत्रमजीजनत् ॥
दाक्षिण्यजलधेस्तस्मात्क्षीरोदादिव चन्द्रमाः ।
अजायत जगत्कान्तः **परमर्दि**महीपतिः ॥
तस्मान्मेरोरिवाशेषव्यापिनां तेजसां निधिः ।
उदितः सुभटादित्यो **विज्जणः** पृथिवीपतिः ॥

स च

आचक्राम न कां दिशं न बुभुजे कं देशमुन्मूलयां-
चक्रे कं न रिपुं बभार न रिपूनप्याश्रितान्कानिह ।
संचिक्ये न धनानि कानि न ददौ किं दातमीजे मखैः
कैर्नायं गुणरत्नरोहणगिरिः **श्रीविज्जण**क्ष्मापतिः ॥
चाण्ड्यं पाण्ड्यस्त्यजति भजते चोलभूपश्चलत्वं
भङ्गं वङ्गः सरति भरते मालवः कालशङ्काम् ।
भूप(पा)श्चान्ये जयति जगती विज्जणक्षोणिपाले
किं नो दुर्गं जहति जिहते कां दिशं कादिशीकाः ॥

सर्वाशातिमिरं नुदन्मुकुलयन्सर्वद्विपद्भूभुजां
हस्ताम्भोजततीर्जगद्धवलयन्सर्वं स्वकीर्त्योजसा ।
सर्वोर्वीव(ध)रमूर्धपीठनिहितश्रीपादरम्योदयो
राजा **सोम** उदैत्कलानिधिरितः पूर्णस्फुरन्मण्डलः ॥
वार्ता कैव रणोत्सवेषु निनदद्भेरीरवे भैरवे
दूष्येषु द्रुघणाहतैरपि कृतैस्तैः कीलकोलाहलैः ।
यद्यात्रासु विदुद्रुवुर्न रिपवः के कोशदेशत्यजः
केषां वा न विदीर्यते स हृदयं मूर्छानिमीलद्दृशाम् ॥
यत्र पितरीव पातरि यम इव यन्तरि जनो हि दण्डधरे ।
लोकद्वयोचितानां सौख्यानां पारदृश्वाभूत् ॥
ततस्तस्यानुजः श्रीमाञ्जातः **संकम**भूपतिः ।
प्रसन्नपुण्यलक्ष्माङ्कः प्रकृत्यैव दयापरः ॥
तत **आहवमल्लो**ऽभूद्राजा तत्सोदरः सुधीः ।
अशेषैरप्यशेषं च जगदाह्लादयन्गुणैः ॥
तस्य श्रीकन्यसो भ्राता गुणै रत्नाकरोपमः ।
अभूत्**सिंघणदेवा**ख्यो जगदाह्लादकारकः ॥
यस्य नामाक्षरैरेव शरैरिव भयंकरैः ।
प्रणम्य प्राणरक्षायै यतन्ते केवलं द्विषः ॥
किं नाम चित्रचरितः स्तूयते राजकुञ्जरः ।
नित्यप्रवृत्तदानोऽपि नैति यो मत्तवाच्यताम् ॥

स खलु निखिलप्रजानुरागैकप्रयोजनगुप्र(प्रगु)णीकृताजानिकागन्तुको भ(न)यगुणग्रामसमवायसाहाय्यकसमुपचीयमानसंततसमाराध्यमानदेवद्विजप्रसादनिरन्तरनिरन्तरायपरिवर्धमानसाम्राज्यलक्ष्मीविलाससुखासिकासमासन्नप्रसन्नगम्भीरनिरातङ्कनिष्कलङ्कचित्तवृत्तिर्महाराजाधिराजः श्रीमत्**सिङ्घणदेवः** (कुशली) **वेलुवल**त्रिशतान्तर्गतं श्रीमद्भगवत्या जगदम्बिकायाः प्रत्यक्षज्येष्ठादेव्या निवासं महादिव्यक्षेत्रं श्रीमत्**कुक्कनूरु**नामधेयं ग्रामं प्रसिद्धसीमासमन्वितं निधिनिक्षेपजलपाषाणारामादिसहितं त्रिभोगाभ्यन्तरमष्टभोगते-

जः स्वाम्ययुक्तं शुल्कदण्डसादकारुककरमौलिकार्हणादिसकलद्रव्योपार्जनोपेतं स(श)कनृपकालातीते च पञ्चोत्तरशताधिकसहस्रगते (११०९) शके शोभकृत्संवत्सरे आश्वयुक्ता(ज्य)मावास्याया सोमवारे व्यतीपातयोगे श्रुतशीलविद्याविनयसंपन्नेभ्यः सदाचारपरिपूतपुण्यमहिमभ्यो सहस्रसंख्यापरिमितेभ्यो नानागोत्रेभ्यो महा(हा)ब्राह्मणेभ्यो राज्ञा राजकीयैरप्यङ्गुलिप्रेक्षणीयं सर्वनमस्यं कृत्वा धारापूर्वकं परमया भक्त्या दत्तवान् । अस्य च धर्मस्य रक्षणे फलम्—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
गण्यन्ते पांसवो भूमेर्गण्यन्ते वृष्टिबिन्दवः ।
न गण्यन्ते विधात्रापि धर्मसंरक्षणे फलम् ॥

अपहरतः समर्थस्य चाप्युदासीनस्य (स्याद)त एव विपरीतं फलम् ।

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
कर्मणा मनसा वाचा यः समर्थोऽप्युपेक्षते ।
स स्यात्तदेव चण्डालः सर्वधर्मबहिष्कृतः ॥

अत एवाह रामभद्रः—

सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ॥
शक्तिव्युत्पत्तिसंपन्नविद्वच्छ्रीपादसेविना ।
रचिता**दित्यदेवेन** सेयं शासनपद्धतिः ॥

कृतिरियं त्रिभुवनविद्याचक्रवर्तिनः श्रीम**दादित्यदेव**स्य । लिखितमिदं पण्डितल**क्ष्मीधरेण** । उत्कीर्णं राजविज्ञानिना **पंद्येन** ॥ मङ्गलमहाश्रीः ॥

(इण्डिअन् आण्टिक्वेरी ४।२७५–७६)

---

(८७)

कुरुकुलवंशावतंसश्रीजनमेजयभूपालानां शासनपत्रम्।

श्रीगणाधिपतये नमः।

पान्तु वो जलदश्यामाः शार्ङ्ग(शार्ङ्ग)ज्याघातकर्कशाः।
त्रैलोक्यमण्डपस्तम्भाश्चत्वारो हरिबाहवः॥

स्वस्ति श्रीजयाभ्युदये युधिष्ठिरशके[1] प्लवङ्गाख्ये(ख्य)येकोननवति-(८९)वत्सरे सहस्यमासि अमावास्यायां सोमवासरे श्रीमन्महाराजाधिराजराजपरमेश्वरो वैयेग्रणी(?)पादगोत्रजः[2] **श्रीजनमेजयभूपः किष्किन्धानगर्यां** सिंहासनस्थः सकलवर्णाश्रमधर्मप्रतिपालकः पश्चिमदेशस्थसीतापुरवृकोदरक्षेत्रे तत्रत्यमुनिवृन्दमठस्य गरुडवाहनतीर्थश्रीमच्छिष्यैकैकयनाथैराराधितसीतारामस्य पूजार्थं कृतभूदानसाधनमस्मत्प्रपितामहयुधिष्ठिराधिष्ठितमुनिवृन्दक्षेत्रे(त्र)स्य चतुःसीमापरिमितिक्रम.पूर्वभागे—उत्तरवाहिन्यास्तुङ्गभद्रायाः पश्चिमे, दक्षिणभागे अगस्त्याश्रमसंगमादुत्तरे, पश्चिमे पाषाणनद्याः पूर्वे, उत्तरभागे—भिन्ननद्या दक्षिणे, ये(ए)तन्मध्यस्थितमुनिवृन्दक्षेत्र भवच्छिष्यपारम्परया चन्द्रार्कपर्यन्तं निधिनिक्षेपजलपाषाणाक्षिण्यागामिसिद्धसाध्यतेजःस्वाम्यसहितं स्वबुद्ध्यानुकूल्येनास्मन्मातापितॄणां विष्णुलोकप्राप्त्यर्थं हरिहरसंनिधावुपरागसमये सहिरण्येन तुङ्गभद्राजलधारापूर्वकं क्षेत्रं यतिहस्ते दत्तोऽ(त्तवान)स्म्यहम्॥ एतद्धर्मसाधनस्य साक्षिणः—

आदित्यचन्द्रावनिलानलौ च द्यौर्भूमिरापो हृदयं मनश्च।
अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तम्॥

दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम्।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम्॥

---

१. 'शतेषु षट्सु सार्धेषु त्र्यधिकेषु च भूतले। कलेर्गतेषु वर्षाणामभूवन्कुरुपाण्डवाः॥' इति राजतरङ्गिणीतो युधिष्ठिरादीना त्रिपञ्चाशदधिके वर्षशतषट्के कलियुगस्य याते सत्ता प्रतीयते, ततश्च जनमेजयराज्य(८९)सवत्सरे प्रकटा. २ 'वैयाघ्रपद्यगोत्राय साङ्कृत्यप्रवराय च। अपुत्राय ददाम्येतज्जल भीष्माय वर्मिणे॥' इति भीष्मार्घ्यदानमन्त्रे भीष्मस्य वैयाघ्रपद्यगोत्रत्वोक्तेर्जनमेजयस्यापि तद्गोत्रत्वनिश्चयात् 'वैयाघ्रपद्यगोत्रज.' इति पाठो भवेत्.

स्वदत्ताद्द्विगुणं पुण्यं परदत्तानुपालने ।
परदत्तापहारेण स्वदत्तं निष्फलं भवेत् ॥
मद्दत्ता पुत्रिका ज्ञेया पितृदत्ता सहोदरा ।
अन्यदत्ता तु जननी दत्तभूमी परित्यजेत् ॥
अन्यैस्तु छर्दितं भुद्रे(ऽ)श्वभिश्च छर्दितं न तु ।
ततः कष्टो(?) ततो नीचः स्वयं दत्तापहारकः ॥
स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत यः ।
षष्टिं वर्षसहस्राणि विष्ठाया जायते कृमिः ॥

(इण्डिअन् आण्टिक्केरी ४।३३३-३४)

---

(८८)

माढपुरशिवमन्दिरस्थः शिलालेखः[१] ।

सर्गस्थितिलयहेतोर्विश्वस्य [ब्रह्म]विष्णुरुद्राणाम् ।
मूर्तित्रयं प्रदधते संसारभिदे नमो विभवे ॥
यदुवंशभुवां राज्ञां सैह्मपुरं राज्यमायुगाद्दधताम् ।
श्रीसेनवर्मनामा राजर्षिः प्रक्रमेणासीत् ॥
तनयस्तस्य श्रीमान्नृपतिरभूदार्यवर्मनाम्नैव ।
आर्यव्रततां प्रथमं स्थापितवांस्तदनु यश्चरितैः ॥
श्री[दत्त]वर्मनामा दत्ताभयविभवविजयविध्व····सः ।
भीतार्थिकुलारिभ्यो बभूव तस्यात्मजो नृपतिः ॥
सूनुरभूत्तस्य महान्भूपालः श्रीप्रदीप्तवर्मेति ।
दर्पान्धशत्रुपृतनापतङ्गपटलीप्रदीप्ताग्निः ॥
श्रीश्वरवर्मेति सुतस्तस्याभूद्भूपतिः प्रदानेन ।
ऐश्वर्यं यः क्रि(कृ)तवान्भव इव निचये [भवा]र्थानाम् ॥

---

१. अय च लेखः प्रागेकोनविंशलेखसमानश्लोकोऽपि दातृभेदाद्भिन्न एव. अत एवाग्रमपाठोऽपि भिन्न एव.

श्री**वृद्धिवर्म**संज्ञस्तस्य बभूवात्मजः प्रवृत्तश्रीः ।
चन्द्र इव तापहारी नयनानां नन्दनो राजा ॥
स्वभुजार्जितशौर्ययशा दानवतामुपरि दृष्टसामर्थ्यः ।
श्री**सिङ्घवर्म**नामा तत्तनयो **राजसिङ्घो**ऽभूत् ॥
तस्य सुतोऽभूदाशापूरणकर्मा जनस्य तापच्छित् ।
श्री**जल**नामा नृपतिः कलियुगदावाग्निजलवर्षः ॥
श्री**यज्ञवर्म**नामा तदङ्गजोऽभून्महीपतिर्येन ।
यज्ञाज्यधूमजलदैर्नित्योत्केकाः क्रि(कृ)ताः शिखिनः ॥
पुत्रस्तस्य बभूव श्रीमान्राजर्षि**रचलवर्मे**ति ।
कृतयुगचरितेष्वचलो यश्च स्थैर्यादिगुणसाम्यात् ॥
यः समरघङ्घला[1]ख्यामन्वर्थवर्ती दधार रणरौद्रः ।
अपरामगणितसंगरकरिरदनाग्राङ्कितोरस्कः ॥
तस्य **दिवाकरवर्मा** श्रीमांस्तनयो बभूव नृपतीशः ।
यस्य दिवाकरताभूत्परतेजोभिभवधर्मेण ॥
वारणविपाणसंकटसंगरचलवारिणः श्रुता यस्य ।
अकरोदरीनशस्त्रान्सपदि महीघङ्घलभटाख्या ॥
तस्य कनीयान्भ्राता श्री**भास्कर** इत्यभून्नृपतिपालः ।
रिपुघङ्घलाभिधानं योऽवहदाजौ विजयमन्त्रम् ॥
स्वभुजार्जितपरराज्यद्रविणसदादानकर्मणः पाणेः ।
यस्यासीद्विश्रामो नतरिपुपृष्ठक्षणस्थितिषु ॥
येनाभिरुह्य पद्भ्यां पतत्रिगम्यानि शैलदुर्गाणि ।
आक्रम्य युद्धशौण्डा हस्तिकरं दापिताः क्षितिपाः ॥
तस्य गुणार्जितदेवीशब्दा श्री**कपिलवर्धन**सुताभूत् ।
राज्ञी प्राणेशा श्री**जयावली**त्येकपत्नी च ॥
तस्यास्तनया सावित्री**वेश्वरे**ति नाम्नासीत् ।
जालंधरनृपसूनोर्जाया श्री**चन्द्रगुप्तस्य** ॥

---

१. 'घङ्घल'शब्दश्च कर्कशार्थको विजय्यर्थको वा देश्या भवेत्

भर्तरि गतवति नाकं करिण[ः] स्कन्धार्द्ध[1]वास्पदमिदं सा।
तत्पुण्यायाकारयदाचार्यानुगतसत्येन॥
यावन्महीमहीधरजलनिधयो यावदिन्दुरवितारा:।
तावदिदमस्तु कीर्तिस्थानं श्रीचन्द्र[2]गुप्तस्य॥
भट्टक्षेमशिवात्मजभट्टस्कन्दादवाप्तशुभजन्मा।
भट्टवसुदेव एतां प्रशस्तिमकरोदयो[ध्ये]शः॥
अश्मनीश्वरणा(ना)गेन नागदत्तस्य सूनुना।
उत्कीर्णा सूत्रधारेण रोहीतकनिवासिना॥

(आर्कियालॉजिकल् सर्व्हे-इण्डिया १।१२–४)

---

(८९)

महासामन्तप्रचण्डनायकश्रीचन्द्रगुप्तस्य दानपत्रम्[2]।

ओम्।

स वोऽव्याद्वेधसा धाम यन्नाभिकमलं कृतम्।
हरश्च यस्य कान्तेन्दुकलया कमलंकृतम्॥
आसीन्मुरारि(तः)संकाशः कृष्णराजः[3] क्षिते[ः] पतिः।
अप्रमेयवसोर्दाता साक्षाद्धर्म इवापरः॥
शुभतुङ्ग[4]तुङ्गतुरगप्रवृद्धरेणुध्र्वैरुद्धरविकिरणम्।
ग्रीष्मेऽपि नभो निखिलं प्रावृट्कालायते स्पष्टम्॥
तस्यात्मजः श्रीध्रुवराजनामा महानुभावः प्रथितप्रतापः।
प्रसाधिताशेषनरेन्द्रचक्रः क्रमेण बालार्कवपुर्बभूव॥

---

१. इद च शिवमन्दिरं यमुनोत्तरदेशे **जौनसारबावर**नगरप्रगणान्तर्गत**माढपुरे लक्खामण्डल**नाम्ना प्रसिद्धमस्ति. २. अय च **श्रीचन्द्रगुप्तः पञ्चनद**देशान्तर्गत-**जलंधर**नगरभूपालसूनुर्मौर्यवंश्यप्राचीनचन्द्रगुप्ततो भिन्न एव. २ इद च दानपत्रं गुजरा-तदेशे कापडवणजग्रामे समधिगतम्. ३ अय च कृष्णराज' प्राचीनलेखमालाया चतुर्थले-खवर्णितराष्ट्रकूटान्वय एव भवेत्. ४. 'शुभतुङ्ग इति कृष्णराजस्य नामान्तरम्' इति चतुर्थलेखटिप्पण्यां महामहोपाध्यायाः.

शशधरकरनिकरनिभं यस्य यशः सुरनगाग्रसानुस्थैः।
परिगीयते समन्ताद्विद्याधरसुन्दरीनिवहैः॥

तस्याप्यभूद्भुवनभारभृतेः समर्थः
पार्थोपमः पृथुसमानगुणागुणज्ञः।
दुर्वारवैरिवनितातुलतापहेतु-
र्गोविन्दराज इति सुप्रथितप्रतापः॥

यस्य प्रभोश्चतुरचारुरुदारकीर्तेः
रामापरो निरुपमस्य पितुः सकाशात्।
सत्स्वप्यनेकतनयेषु गुणातिरेका-
न्मूर्धाभिषिक्तनृपसंमतमाशु राज्यम्॥

रक्षितं येन निःशेषं चतुरम्भोधिसंयुतम्।
राज्यधर्मेण लोकानां कृता तुष्टि[ः] परहृदि॥

सूनुस्तस्यातिवीरः सकलगुणगणाकारभूतो बभूव
भूपालान्कण्टकाभान्सपदि विघटितान्वेष्टयित्वा ददाह।
राज्यं यस्या(श्वा)भिमानी निजमपि चलितं बाहुवीर्यादवाप
पृथ्वीमेकातपत्रामकुरुत बलवाञ्श्री**महाराजषण्डः**॥

यस्य विभोः काराया रिपुरमणीचारुचरणलग्नानाम्।
परुषरवो निगडानामनवरतं श्रूयते लोके॥

तस्माद्बभूव राजा प्रथितयशसः **शुभतुङ्ग**नामायम्।
योऽसाव**कालवर्षा**परनामा गीयते लोकैः॥

कृष्णचरितः स एव हि हितकृतये यो बिभर्ति वर्णानाम्।
राज्यं निहताराातिः स्वभुजेन भुवं च कृष्ण इव॥

अस्य च रणप्रभावाद्**ध्रुवका**न्वयमगाद्वशं लक्ष्मीः।
पश्चाद्भूतकवीन्द्रैरनवरतं पठ्यते प्रकटम्॥

तस्मादन्वयसागरात्समभवच्छ्रीशुद्ध' '**कुंवडि**-
स्तस्माच्चापि बभूव दर्पदलनः **श्रीदेगडि**र्विद्विषाम्।

येनानेकनरेन्द्रदन्तिदलनात्प्राप्तं यशः शाश्वतं
सिंहेनेव रणाटवी[1] विरचिता निर्भीकमेकाकिना ॥
तस्माज्जातः प्रचण्डः प्रच(चु)रखरकराक्रान्तनिःशेषभूभृ-
न्नाम्ना **श्रीराजहंसः** प्रतिदिनमुदयी कश्यपाद्वा विवस्वान्।
येनानीता निजं श्रीः पुनरपि भवनं चञ्चला क्वापि यान्ती
पार्थेनेवारिचक्रप्रमथनपटुना शांभवं भव्यभावम् ॥
निर्जितसकलारिजनः **श्रीधवलप्पः** प्रसिद्धतरनामा।
धवलितभुवनो यशसा सञ्जातः पवनसूनुरिव ॥
सिघी(ही)भूय विपक्षेण गृह्यमाणं यशेप्सुना(?)।
दत्तं स्वस्वामिने येन तं निहत्याशु मण्डलम् ॥
तस्मात्**प्रचण्डः** संजातः समरे यशलम्पटः।
अक्कुवश्चापि खड्गेन विख्यातो निर्मलो भुवि ॥
सेल्लविद्याधरेणापि सेलुल्लालित(?)पाणिना।
निहत्य शत्रून्समधे(रे) यशसा(:)कुलमलंकृतम् ॥
श्रीमद्वल्लभराज्ञः(?)[2] श्रीहर्षपुरोप[ल]क्षिताद्ग्रामान्।
भुञ्जत्यकालवर्षः(?)[3] अर्धाष्टशतोपसंख्यातान् ॥

सर्वानागामिभद्रनृपतिमहासामन्तामात्यबलाधिकृतविषइ(यि)कमहत्तरान्समनुबोधयति—अस्तु वः संविदितम्—यथा श्रीखेटकहर्षपुरकासद्रह एतदर्धाष्टमयं(ष्टशतमध्ये ?) समधिगतपञ्चमहाशब्दमहासामन्त**प्रचण्डदण्ड**नायक**श्रीचन्द्रगुप्ते**[न] मया श्रीहर्षपुरार्धाष्ट[म]शतान्तःपाति[क]र्पटवाणिज्यचतुराशीतिकाप्रतिबद्धरूरिद्वादशकान्तःपातिव्याघ्रासग्रामः सवृक्षमालाकुलः सदण्डदशापराधः ससीमापर्यन्तः सकाष्ठतृणकूपतडागोपेतः सभोगभागः सहिरण्यश्चतुराघाटनोपलक्षितो घाण(स)कपलसमेतः [समभिदिश्यते]। आघाटनानि अभिलिख्यन्ते। पूर्वतः—पल्लोलाग्रामो वित्खावल्ली

---

१. 'रणाटवीविचरितात्' इति पाठो भवेत्. २. 'श्रीमद्वल्लभराज.' इति पाठो भवेत्. ३. 'भुनत्तयकालवर्षः' इति च E. Hultzsch. Ph.D. पण्डितः शोधितवान्. तथा च 'अकालवर्ष' इति वल्लभराजस्यैव नामान्तरं भवेत्

च । दक्षिणतः—केरडवल्लीग्रामो अरलुवकग्रामश्च । पश्चिमतः—नावालिका अपूवल्ली च । उत्तरतः—अम्बाउच्चग्रामः । एवं चतुराघाटनोपलक्षितो वल्लूरिकाग्रामो [1]भट्टवास्तव्यवाजिमध्यंदिनभरद्वाजसगोत्रब्रह्मचारिब्राह्मणब्रह्मभट्टाय वव्वसुताय स्नात्वोदकातिसर्गेण वलिचरुवैश्वदेवार्थं प्रतिग्रहेण प्रतिपादितः । तदर्थमस्मत्प्रदत्तधर्मदायः सर्वैरेवागामिभोक्तृभि[2]रस्मयु(दु)परोधात्पालनीयोऽनुमन्तव्यश्च ।

उक्तं च [3]रिषिव्यासेन—

षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः ।
महाहयो हि जायन्ते भूमिदानं हरन्ति ये ॥
स्वदत्ता परदत्तां वा यत्नाद्रक्ष नराधिप ।
महीं महीभृतां श्रेष्ठ दानाच्छ्रेयोनुपालनम् ॥

यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
सर्वानेवं भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ।
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो महद्भिः ॥

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥' इति ।

[चल]कमलदलाम्बुबिन्दुलोलां श्रियमवलोक्य मनुष्यजीवितं च ।
सकलमिदमशाश्वतं च बुद्ध्वा नहि मनुजैः परकीर्तयो विलोप्याः ॥

---

१. Dr. Hultzsch पण्डितस्तु 'भट्टवास्तव्यभरद्वाजसगोत्रवाजिमध्यंदिनसब्रह्मचारि' इति शोधितवान्. २. 'अस्मदनुपरोधा' इति Dr. Hultzsch पण्डितः. ३. 'रिषिर्व्यञ्जनादिश्च । 'विद्याविदाघमतयो रिषयः प्रवृद्धाः' इति बालपण्डितजातकात्' इति मुकुटः—एतदजानानेन Dr. Hultzsch पण्डितेन 'ऋषि इति पठितव्यम्' इत्युक्तम्.

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते ॥
भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ ॥
अग्नेरपत्यं [प्रथितं] सुवर्णं भूर्वैष्णवीर्भूमिसुताश्च गावः ।
लोकत्रयं तेन भवेत्तु दत्तं यः काञ्चनं गां च महीं च दद्यात् ॥
वह्निं वह्निसुतं चाम्बु पञ्चपूतं(?) प्रजापते ।
दत्त्वा सर्वरसां चैव न मर्त्यो जायते पुनः ॥
सर्वेषामेव दानानामेकजन्मानुगं फलम् ।
हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम् ॥

स्वहस्तोऽयं श्रीमद्कुकस्य श्रीधवलप्पसूनोः । शकसंवत् ८३२ वैशाख शुद्ध पौर्णमास्यां महावैशाख्या पूर्वदेवब्रह्मदायवर्जो दत्तः । लिखितमिदं शासनं कुलपुत्रकेणाम्मैयकेन नेमादित्यसुतेनेति । यदत्रोनाक्षरमधिकाक्षरं वा तत्सर्वं प्रमाणमिति व्यासतुल्योऽपि मुह्यति । स्वहस्तोऽयं श्रीचन्द्रगुप्तस्य ॥

(आर्कियालॉजिकल् सर्व्हे ऑफ् इण्डिया १।५३–६)

---

(९०)

बाणादिमहाकविवर्णितश्रीहर्ष[वर्धन]-महाराजानां दानपत्रम्[१] ।

ओम् ।

स्वस्ति महानौहस्त्यश्वजयस्कन्धावारात् **पिन्थिकायाः** महाराजश्री**नर-वर्धनः** तस्य पुत्रस्तत्पादानुध्यातः श्री**वज्रिणी**देव्यामुत्पन्नः परमादित्य-

---

१. इदं च दानपत्र ताम्रपट्टे उत्कीर्णमधुना लक्ष्मणपुरे (Lucknow Museum) वर्तते. एतच्च १८८८ ख्रिस्तवर्षीयजान्यूवरीमासे नथूपुरपरिगणान्तर्गतमधुवनग्रामे हलेन कृषता कुटुम्बिना भूमौ खातं लब्धम्. तस्य प्रतिबिम्ब Dr. J. Burgess महाशयैः प्रेषितमुपलभ्य G. Buhler Ph. D , L L. D., C. I. E महाशयैः Archeological Survey of India पुस्तके ७२–७३ पृष्ठे सव्याख्य प्रकाशितम्.

भक्तो महाराजश्री**राज्यवर्धनः**, तस्य पुत्रस्तत्पादानुध्यातः श्री**अप्सरोदे-व्या**मुत्पन्नः परमादित्यभक्तो महाराजश्री**मद[ा]दित्यवर्धनः**, तस्य पुत्र-स्तत्पादानुध्यातः श्री**महासेनगुप्ता**देव्यामुत्पन्नश्चतुःसमुद्रातिक्रान्तकीर्तिः प्रतापानुरागोपनतान्यराजो वर्णाश्रमव्यवस्थापनप्रवृत्तचक्र एकचक्ररथ इव प्रजानामार्तिहरः परमादित्यभक्तः परमभट्टारकमहाराजाधिराजश्री**प्रभाकर-वर्धनः**, तस्य पुत्रस्तत्पादानुध्यातः सितयशःप्रतानविच्छुरितसकलभुवन-मण्डलः परिगृहीतधनदवरुणेन्द्रप्रभृतिलोकपालतेजाः सत्पथोपार्जितानेक-प्रवि(व)णभूमिप्रदानसंप्रीणितार्थिहृदयोऽतिशयितपूर्वराजचरितो देव्याम-मलयशोमत्यां श्री**यशोमत्या**मुत्पन्नः परमसौगतः सुगत इव परहितैकरतः, परमभट्टारकमहाराजाधिराजश्री**राज्यवर्धनः**,

राजानो युधि दुष्टवाजिन इव श्री**गुप्तदेवा**दयः
कृत्वा येन कशाप्रहारविमुखाः सर्वे समं संयताः ।
उत्खाय द्विषतो विजित्य वसुधां कृत्वा प्रजानां प्रियं
प्राणानुज्झितवानरातिभवने सत्यानुरोधेन यः ॥

तस्यानुजस्तत्पादानुध्यातः परममाहेश्वरो महेश्वर इव सर्वसत्त्वानुकम्पी परमभट्टारकमहाराजाधिराज**श्रीहर्षः** श्रावस्तीभुक्तौ कुण्डधानीवैषयिकसोम-कुण्डिकाग्रामे समुपगतान्महासामन्तमहाराजदौःसाधसाधनिकप्रमातार(तृ)-राजस्थानीयकुमारामात्योपरिकविषयपतिभटचाटसेवकादीन्प्रतिवासिजनपदांश्च समाज्ञापयति—अस्तु वः संविदितम्—अयं सोमकुण्डकाग्रामो ब्राह्मण-वामरथ्येन कूटशासनेन भुक्तक इति विचार्य यस्तच्छासनं भङ्क्त्वा तस्मादा-क्षिप्य च स्वसीमापर्यन्तः सोद्रङ्गः सर्वराजकुलाभाव्यप्रत्यायसमेतः सर्वपरिहृ-तपरिहारो विषयादुद्धृतपिण्डः पुत्रपौत्रानुगश्चन्द्रार्कक्षितिसमकालीनो भूमि-च्छिद्रन्यायेन मया पितुः परमभट्टारकमहाराजाधिराजश्री**प्रभाकरवर्धन-देवस्य**, मातुः परमभट्टारिका महादेवीराज्ञीश्री**यशोमती**देव्याः, ज्येष्ठभ्रातृपरमभट्टारकमहाराजाधिराज**श्रीराज्यवर्धन**देवपादानां च, पुण्ययशोभि-वृद्धये सावर्णिसगोत्रच्छन्दोगसब्रह्मचारि**भट्टवातस्वामि**-विष्णुवृद्धसगोत्र-बह्वृचसब्रह्मचारि**शिवदेव**स्वामिभ्यां प्रतिग्रहधर्मणाग्रहारत्वेन प्रतिपादितो

विदित्वा भवद्भिः समनुमन्तव्यः । प्रतिवासिजनपदैरप्याज्ञाश्रवणविधेयैर्भूत्वा यथासमुचिततुल्यमेयभागभोगकरहिरण्यादिप्रत्याया अनयोरेवोपनेयाः । सेवो-पस्थानं च करणीयमिति ।

अपि च—

असत्कुलक्रममुदारमुदाहरद्भिरन्यैश्च दानमिदमभ्यनुमोदनीयम् ।
लक्ष्म्यास्तडित्सलिल·······चञ्चलाया दानं फलं परयशःप्रतिपालनं च ॥
कर्मणा मनसा वाचा कर्तव्यं प्राणिने हितम् ।
हर्षेणैतत्समाख्यातं धर्मार्जनमनुत्तमम् ॥

दूतकोऽत्र महाप्रमातार(तृ)महासामन्तयोः **स्कन्दगुप्तः** । महाक्षपट-लाधिकरणाधिकृतसामन्तमहाराजेश्वरगुप्तसमादेशाच्चोत्कीर्णं **गुर्जरेण** । [१]संवत् २०+५ मार्गशीर्षवदि ६ ॥

(आर्कियालॉजिकल् सर्वे ऑफ् इण्डिया ७२–७३)

(९१)

छिन्दवंशप्रभूतलल्लमहाराजानां प्रशस्तिपत्रम् ।

ओं नमः शिवाय ।

हेलाङ्गुष्ठाग्रपीडाभरनमदचलोत्सङ्गसंभारदूर-
भ्रश्यद्भूभारतिर्यग्वलितमणिफणामण्डले भोगिराजे ।
तत्कालोद्भ्रान्तलोकत्रितयकृतमहास्तोत्रमन्त्रावतारः
पायाद्वः पा[र्वती]शः शमितदशशिरः शौर्यवीर्यावलेपः ॥

१. अयं च २५ मितो वर्षः श्रीहर्षराज्यारम्भकालतो ज्ञेयः. श्रीहर्षराज्यारम्भस्तु ६०६ मितः खिस्ताब्दः. तथा च ६३१ मितः खिस्ताब्दो दानपत्रकालः. २. इय च प्रशस्तिः शिलायामुत्कीर्णा **पीलीभीता**भिधनगरतो विंशतिमैलमिते **गढगजान**-ग्रामे उपलब्धा Mr. H. S. Boulderson महाशयैः १८२९ खिस्ताब्दे. ततश्च G. Buhler. Ph. D., L. L. D. C. I E. महाशयै Archeological Survey of India पुस्तके सव्याख्य प्रकाशिता.

शूलक्षतद्विरददानवकुम्भमुक्तमुक्ताकलापकलितामलकण्ठकान्तिः ।
विश्वं पुनातु गिरिजा वदनावधूतचन्द्रोपनीतपरिवेषमिवोद्वहन्ती ॥

लक्ष्मीविभ्रमकेलिसद्म सुभटव्यापारलीलास्पदं
प्रख्यातक्षितिपालरत्नजलधिः श्रीराजहंसीसरः ।
सद्वीरव्रततीर्थमर्थिकुमुदप्रह्लादनेन्दुर्द्विष-
द्वंशभ्रंशदवानलो विजयतां छिन्दक्षितीशान्वयः ॥

उत्पत्तिरस्य हि पुरा च्यवनान्महर्षेर्व्यक्तव्यलीककलिते त्रिदशाधिनाथे ।
तद्दर्पनिर्दलनदत्तकठोरदृष्टेरष्टासु दिक्षु यशसैव सह प्रसिद्धा ॥

वंशेऽस्मिन्सितकीर्तिकंदलवति श्रीवीरवर्माख्यया
ख्यातोऽभूद्भुवि भूषितावनितलो राजन्यचूडामणिः ।
जन्मस्थानमिवाकलय्य कमला तुङ्गात्मनां भाविनां
भर्तॄणामवनेश्चकार चतुरा यस्यालयान्तस्थितिम् ॥

त्यागी धर्मपरः पराक्रमधनः सत्यप्रियः कीर्तिमा-
न्सन्मार्गानुगतः शुचिर्दृढमतिर्मानी व्रती नीतिमान् ।
शौर्यौदार्यविवेकधैर्यनिलयो यः संगतः सज्जनै-
र्युक्तः सर्वगुणोदयेन महतामाराधनीयोऽभवत् ॥

तस्मादत्युग्रतेजःप्रसरनियमितारातिपङ्कोपसङ्गः
श्रीमांश्चण्डप्रतापः सकलवसुमतीभूषणं भूषणोऽभूत् ।
यस्योद्योगप्रसर्पद्बलभरदलितक्ष्मातलस्थस्थवीयः-
शेषाहिश्वासशोषादगमदिरिणतां निर्जलं भोगिसद्म ॥

यत्सैन्यगन्धगजगण्डगलन्मदाम्भःसंजातचन्द्रकशतैरिव मुद्रितासु ।
दूरे विपक्षकरिणी वनदन्तिनोऽपि भूयो न वारि जगृहुः सरसीष्वरण्ये ॥

यः सेवागतराजचक्रमुकुटोद्धृष्टाङ्घ्रिपीठस्थलो
भर्ता यश्चतुरम्बुराशिरशनालंकारवत्या भुवः ।
विक्षेपैरपि यस्य ते रघुपतेराशोषिताः सिन्धवो
यस्तस्यापि महाकुलाचल इवावष्टभ्य तस्थौ भुवम् ॥

यस्यैषा राजधानी रजनिकरकराकारकान्तैर्गुणौघैः
पूर्णेवाद्यापि रम्या स्फुरति मरकतश्यामलैः काननान्तैः।
उद्यानैर्नन्दनाभैरतिविशदसुधासेकशुभ्रैः सुराणां
प्रासादैरुन्नताग्रैरमरपतिपुरीस्पर्धिनी वा विभाति ॥

तस्यानुजः समभवद्भवभक्तिनम्रः **श्रीमल्हणः** परिघपीवरबाहुदण्डः।
भ्रातुः कृपाणतुलिताहितराजचक्रं यो लीलयैव धवलो धुरमाबभार ॥

लब्ध्वा ततः स विपुलामपि राजलक्ष्मीं भक्तिं परामकृत देवगुरुद्विजेषु।
प्रीत्यै सुहृत्प्रणयिबन्धुजनेऽजनिष्ट दुष्टक्षयादतनुतातिमुदं प्रजासु ॥

तस्य प्रियापि **चुलुकी**श्वरराजवंशसंभूतिरुज्ज्वलगुणाभरणाभिरामा।
गीता जगत्य**णहिले**ति समस्तकान्तशुद्धान्तवक्त्रकमलेन्दुकला बभूव ॥

तस्यां **श्रीलल्ल**नामाजनि जनितमहामण्डलाधीशशङ्कः
शूरः कुन्देन्दुदत्तद्युतितुलितगुणालंकृताशामुखश्रीः।
योऽसौ सामन्तचक्राचलकनकगिरिर्विद्रुतारातिलक्ष्मी-
स्तिर्यङ्नेत्रान्तपाताहतभुजशिखरश्[1]**छिन्दवंश**प्ररोहः ॥

चित्रं यदस्य किल जन्मदिने समन्ताच्छ्रीमल्हणस्य भवने परमप्रमोदे।
आवेदयन्त्युदयमम्बरतः पपात भृङ्गालिमङ्गलरवैरिव पुष्पवृष्टिः ॥

नोन्निद्रा नलिनी न चार्पितमनःस्निग्धा सतां सगति-
र्नोत्फुल्लस्तबका नता वनलता सीमा समस्या न च।
नोद्दामा कविभारती न च तथा हृद्या शरत्कौमुदी
लक्ष्मीर्यस्य यथा बभूव विदुषामानन्दनिष्यन्दिनी ॥

किं जातैरपरैर्धराधिपतिभिर्मन्ये वृथा रक्षिता
येषां तिष्ठति दुर्भगेव वनिता श्रीरप्यभोग्या गृहे।
नाभूदस्ति न नापि कोऽपि भविता भूपालचूडामणि-
र्यः श्रीलल्लनरेन्द्रचन्द्रसदृशस्त्यागेन भोगेन च ॥

---

१. एतच्छिन्दवशीयभूपालवर्णनात्मकं काव्यं नैषधीयचरितकर्तृश्रीहर्षेणापि कृतं भवेत्. तथा च नैषधीयचरितसप्तदशसर्गसमाप्तौ 'यातः सप्तदशः स्वसु सुसदृशि च्छिन्दप्रशस्तेर्महाकाव्ये तद्भुवि नैषधीयचरिते' इत्युक्तं श्रीहर्षेण. नारायणेनापि 'छिन्दप्रशस्तिरपि ग्रन्थो मया कृत इति सूचितम्' इति व्याख्यायि.

आदौ संगरसंगताहितमहामातङ्गकुम्भस्थली-
सिन्दूरारुणकान्तिरुज्ज्वलयशास्तेजोभिरिद्धस्ततः ।
उत्खातारितमःप्रतापविसरैराक्रान्तदिङ्मण्डल-
स्तिग्मांशोस्तुलनां बिभर्ति भुवने यन्मण्डलाग्रोऽधुना ॥

अब्धौ मुक्तायमाना शिरसि हिमगिरेरभ्रगङ्गायमाना
व्योम्नि ज्योत्स्नायमाना दिशि दिशि करिणां कुम्भमालायमाना ।
उच्चैर्देवालयानामुपरि सितपताकायमाना यदीया
कीर्तिर्भ्रान्ता समन्तादनुनदि पुलिने राजहंसीयमाना ॥

कष्टे काले कलावप्यभिभवति जगत्कूपवापीतडागै-
रासन्नारामसत्रैः सुरसदनमठैर्मण्डितायाममुष्याम् ।
रम्यामृद्धिं वहन्त्यामतिसुजनजनानन्दिताया नगर्यां
यस्मिन्धर्मावतारे प्रकृतकृतयुगारम्भसंभावनाभूत् ॥

यः शासनान्यतिसमृद्धजनान्वितानि सीमान्तसस्यबहुलानि ददौ द्विजेभ्यः ।
पार्श्वप्रशस्ततरुपण्डमनोहराणि पुण्यानि निर्मलनदीतटवासभाञ्जि ॥

गङ्गा भगीरथेनेव येन मार्गोपदेशिना ।
स्वपुरीसंनिधौ रम्या पुण्या कटनदी कृता ॥

तस्याभवत्प्रणयिनी मधुसूदनस्य लक्ष्मीरिवामलकुलाम्बुनिधेः प्रसूता ।
सर्वावरोधनवधूमुखपद्मषण्डप्रालेयवृष्टिरपराभिधयापि **लक्ष्मीः** ॥

भक्त्या च या विनयनम्रतया च पत्युश्चेतो जहार गुणवत्यनुरागिणी च ।
रम्यं हराद्रिसुतयोरिव तत्तथा हि प्रेमापि रूढमनयोरितरेतरस्थम् ॥

आरामोद्यानवापीषु देवतायतनेषु च ।
कृतानि क्रियमाणानि यस्याः कर्माणि सर्वदा ॥

दीनानाथविपन्नेषु करुणान्वितचेतसः ।
सत्रेषु भुञ्जते यस्या विप्रसंघा दिने दिने ॥

इत्थं विविक्तमनयोः परिवर्धमानधर्मप्रबन्धविगलत्कलिकालवृत्त्योः ।
एकस्तयोरमुमकारयदिन्दुमौलेः प्रासादमद्रितनयाभवनं तथान्या ॥

सुरगृहयुगमेतत्तुङ्गकैलासशृङ्ग-
द्वितयतुलितकान्तिश्वेतमुच्चः सुधाभिः ।
वितरति हृदि नान्तर्विस्मयं कस्य वात-
प्रहतघनपताकाकम्पिताम्भोदवृन्दम् ॥
यावत्सकौस्तुभमुरो मुरमर्दनस्य शंभोः शशाङ्कशकलाभरणं शिरश्च ।
यावत्स्थिति दधति तोयधयः समस्ताः स्तादेव तावदचला भुवि कीर्तिरेषा ॥
स जयतु भुवि लल्लश्छिन्दवंशप्रवीरः
सममतिगुणवत्या कान्तया चेह लक्ष्म्या ।
रिपुगजमदपङ्कप्लाविताग्रेण येन
प्रतिरणमसिनैवालेखि दिक्षु प्रशस्तिः ॥
भूत्यै सदैव भवने कृतसंनिधाना नानाविधानि दुरितानि विनाशयन्ती ।
सापत्यदारपरिवर्गसुहृद्गणस्य श्रीलल्लमण्डलपतेरनघास्तु देवी ॥
भूषणस्य मयूतायां संबद्धा भूमिरुत्तमा ।
विधाय देवपल्लीति देवयोः प्रतिपादिता ॥
पूजासंस्कारहेतोश्च शिवयोः शासनीकृतः ।
दानादायस्य पादोऽपि श्रीलल्लेन सुकीर्तिना ॥
प्रख्यातवत्समुनिवंशसमुद्भवोऽभूद्भट्टोऽनुरूपचरितः शिवरुद्रनामा ।
तत्सूनुना विरचिताभिनवा प्रशस्तिरेषा प्रसन्नकविता किल नेहिलेन ॥
यस्य प्रसन्नसरला पदमालिकेयं प्रह्लादहेतुरधिकं सदलंकृतिश्च ।
श्रीलल्लनिर्मलगुणग्रथनाभिरामा मुक्तावलीव हृदये विदुषां चकास्ति ॥
विष्णुहरेस्तनयेन च लिखिता गौडेन करणिकेणैषा ।
कुटिलाक्षराणि विदुषा तक्षादित्याभिधानेन ॥
कन्यकुब्जागतेनापि कामदेवसुतेन च ।
उत्कीर्णा सोमनाथेन टङ्कविज्ञानशालिना ॥
संवत्सरसहस्र १०४९ मार्गवदि ७ गुरुदिने ।

(आर्कियालॉजिकल् सर्व्हे ऑफ् इण्डिया—७७-८१ पृष्ठेषु)

(१२)

वलभीप्रभोस्तृतीयध्रुवसेनमहाराजस्य दानपत्रम् ।

ओं स्वस्ति विजयस्कन्धावारात्सिरिसिम्मिणिकावासकात्प्रसभप्रणतामित्राणां मैत्रकाणामतुलबलसंपन्नमण्डलाभोगसंसक्तप्रहारशतलब्धप्रतापात्प्रतापोपनतदानमानार्जवोपार्जितानुरागादनुरक्तमौलभृतश्रेणीबलावाप्तराज्यश्रियः, परममाहेश्वर**श्रीभट्टार्का**दव्यवच्छिन्नराजवंशान्मातापितृचरणारविन्दप्रणतिप्रविधौताशेषकल्मषः शैशवात्प्रभृति खड्गद्वितीयबाहुरेव समदपरगजघटास्फोटनप्रकाशितसत्त्वनिकषस्तत्प्रभावप्रणताराति चूडारत्नप्रभासंसक्तपादनखरश्मिसंहतिः सकलस्मृतिप्रणीतमार्गसम्यक्परिपालनप्रजाहृदयरञ्जनान्वर्थराजशब्दो रूपकान्तिस्थैर्यगाम्भीर्यबुद्धिसंपद्भिः स्मरशशाङ्काद्रिराजोदधित्रिदशगुरुधनेशानतिशयानः शरणागताभयप्रदानपरतया तृणवदपास्ताशेषस्वकार्यफलप्रार्थनाधिकार्थप्रदानानन्दितविद्वत्सुहृत्प्रणयिहृदयः पादचारीव सकलभुवनमण्डलाभोगप्रमोदः परममाहेश्वरः **श्रीगुहसेनः**, तस्य सुतस्तत्पादनखमयूखसंतानविसृतजाह्नवीजलौघप्रक्षालिताशेषकल्मषः प्रणयिशतसहस्रोपजीव्यमानसंपद्रूपलोभादिवाश्रितः सरभसमाभिगामिकैर्गुणैः सहजशक्तिशिक्षाविशेषविस्मापिताखिलधनुर्धरः, प्रथमनरपतिसमतिसृष्टानामनुपालयिता धर्मदायानाम्, अपाकर्ता प्रजोपघातकारिणामुपप्लवानाम्, दर्शयिता श्रीसरस्वत्योरेकाधिवासस्य, संहताराति पक्षलक्ष्मीपरिभोगदक्षविक्रमो विक्रमोपसंप्राप्तविमलपार्थिवश्रीः परममाहेश्वरः **श्रीधरसेनः**, तस्य सुतस्तत्पादानुध्यातः सकलजगदानन्दनात्यद्भुतगुणमुदयस्थगितसमग्रदिङ्मण्डलः समरशतविजयशोभासनाथमण्डलाग्रद्युतिभासुरतरांसपीठोदूढगुरुमनोरथमहाभारः सर्वविद्यापरापरविभागाधिगमविमलमतिरपि सर्वतः सुभाषितलवेनापि सुखोपपादनीयपरितोषः, समग्रलोकागाधगाम्भीर्यहृदयोऽपि सुचरितातिशयसुव्यक्तपरमकल्याणस्वभावः खलीभूतकृतयुगनृपतिपथविशोधनाधिगतोदग्रकीर्तिः धर्मानुपरोधोज्ज्वलतरीकृतार्थसुखसंपदुपसेवानिरूढ**धर्मादित्य**द्वितीयनामा परममाहेश्वरः श्री-

शीलादित्यः, तस्यानुजस्तत्पादानुध्यातः स्वयमुपेन्द्रगुरुणेव गुरुणात्यादरवता समभिलषणीयामपि राजलक्ष्मीं स्कन्धासक्तां परमभद्र इव धुर्यस्तदाज्ञासंपादनैकरसतयैवोद्वहन् खेदसुखे(ख)रतिभ्यामनायासितसत्त्वसंपत्तिः प्रभावसंपद्वशीकृतनृपतिशतशिरोरत्नच्छायोपगूढपादपीठोऽपि परावज्ञाभिमानरसानालिङ्गितमनोवृत्तिः प्रणतिमेकां परित्यज्य प्रख्यातपौरुषाभिमानैरप्यरातिभिरनासादितप्रतिक्रियोपायः कृतनिखिलभुवनामोदविमलगुणसंहतिप्रसभविघटितसकलकलिविलसितगतिर्नीचजनारोहिभिरशेषैर्दोषैरनामृष्टात्युन्नतहृदयः प्रख्यातपौरुषास्त्रकौशलातिशयगणतिथविपक्षक्षितिपतिलक्ष्मीस्वयंग्राहप्रकाशितप्रवीरपुरुषप्रथमसंख्याधिगमः परममाहेश्वरः **श्रीखरग्रहः**, तस्य तनयस्तत्पादानुध्यातः सकलविद्याधिगमविहितनिखिलविद्वज्जनमनःपरितोषातिशयः सत्त्वसंपदा त्यागौदार्येण च विगतानुसंधानाशमाहितारातिपक्षमनोरथाक्षभङ्गः सम्यगुपलक्षितानेकशास्त्रकलालोर(लीक)रिचतगह्वरविभागोऽपि परमभद्रप्रकृतिरकृत्रिमप्रश्रयविनयशोभाविभूषणः समरशतजयपताकाहरणप्रत्यलो(?)दग्रबाहुदण्डविध्वंसितनिखिलप्रतिपक्षदर्पोदयः स्वधनुःप्रभावपरिभूतास्त्रकौशलाभिमानसकलनृपतिमण्डलाभिनन्दितशासनः परममाहेश्वरः **श्रीधरसेनः**, तस्यानुजस्तत्पादानुध्यातः सच्चरितातिशयितसकलपूर्वनरपतिरतिदुःसाधानामपि प्रसाधयिता विण(ष)याणाम्, मूर्तिमानिव पुरुषकारः परिवृद्धगुणानुरागनिर्भरचित्तवृत्तिभिः, मनुरिव स्वयमभ्युपपन्नःप्रकृतिभिः, अधिगतकलाकलापः कान्तिमान्निर्वृतिहेतुर[1]कलङ्कः कुमुदनाथः, प्राज्यप्रतापस्थगितदिगन्तरालप्रध्वंसितध्वान्तराशिः [2]सततोदितः सविता, [3]प्रकृतिभ्यः परं प्रत्ययमर्थवन्तमतिबहुतिथप्रयोजनानुबन्धमागमपरिपूर्णं विदधानः, संधिविग्रहसमासनिश्चयनिपुणः स्थानेऽनुरूपमादेशं ददद्गुणवृद्धिविधानजनितसंस्कारः साधूनां राज्य[4]शालातुरीयतन्त्रयोरुभयोरपि निष्णातः, प्रकृष्टविक्रमोऽपि करुणामृदुहृदयः, श्रुतवानप्यगर्वितः, कान्तोऽपि प्रशम(मी)स्थिरसौहृदयोऽपि निरसिता दोषवत्ताम्, उदयसमयसमुप-

१. व्यतिरेकः. २. व्यतिरेकः. ३. 'निष्णातः' इत्येतदन्तेन राज्याङ्गव्याकरणप्रसिद्धपदार्थांना श्लेषः. ४. शालातुरीयः पाणिनिः.

जनितजनतानुरागपरिपिहितभुवनसमर्थित**बालादित्य**द्वितीयनामा परममाहेश्वरः **श्रीध्रुवसेनः**, तस्य सुतस्तत्पादकमलप्रणामधरणिकषणजनितकिणलाञ्छनललाटचन्द्रशकलः शिशुभाव एव श्रवणनिहितमौक्तिकालंकारविभ्रमामलश्रुतविशेषः, प्रदानसलिलक्षालिताग्रहस्तारविन्दः, कन्याया इव मृदुकरग्रहणादमन्दीकृतानन्दविधिर्वसुंधरायाः,कार्मुके धनुर्वेद इव संभाविताशेषलक्ष्यकलापः प्रणतसामन्तमण्डलोत्तमाङ्गधृतचूडारत्नायमानशासनः परममाहेश्वरः परमभट्टारकमहाराजाधिराजपरमेश्वरचक्रवर्ति**श्रीधरसेनः**, तत्पितामहभ्रातृ**श्रीशीलादित्यस्य** शार्ङ्गपाणेरिवाङ्कजन्मनो भक्तिबन्धुरावयवकल्पितप्रणतेरतिधवलया दूरं तत्पादारविन्दप्रवृत्तया नखमणिरुचा मन्दाकिन्येव नित्यममलितोत्तमाङ्गदेशस्यागस्त्यस्यैव राजर्ष(र्षि)दाक्षिण्यमातन्वानस्य, प्रबलधवलिम्ना यशसा वलयेन मण्डितककुभा नभसि यामिनीपतेर्विडम्बिताखण्डपरिवेषमण्डलस्य, पयोदश्यामशिखरचूचुकरुचिरसह्यविन्ध्यस्तनयुगायाः क्षितेः पत्युः, **श्रीडेरभटस्याङ्कजः** क्षितिपसंहतेरनुरागिण्याः शुचियशोंशुकभृतः स्वयंवरमालामिव राज्यश्रियमर्पि(र्प)यन्त्या कृतपरिग्रहः शौर्यमप्रतिहतव्यापारमानमितप्रचण्डरिपुमण्डलमण्डलाग्रमिवावलम्बमानः शरदि प्रसभमाकृष्टशिलीमुखबाणासनापादितप्रसाधनानां परभुवां विधिवदाचरितकरग्रहणः पूर्वमेव विविधवर्णोज्ज्वलेन श्रुतातिशयेनोद्भासितश्रवणः पुनःपुनरुक्तेनेव रत्नालंकारेणालंकृतश्रोत्रः परिस्फुरत्कटकविकटकीटपक्षरत्नकिरणमविच्छिन्नप्रदानसलिलनिवहावसेकविलसन्नवशैवलाङ्कुरमिवाग्रपाणिमुद्वहन्, धृतविशालरत्नवलयजलधिवेलात्तटायमानभुजपरिष्वक्तविश्वंभरः परममाहेश्वरः **श्रीध्रुवसेनः** कुशली सर्वानेव समाज्ञापयति—'अस्तु वः संविदितम्—यथा मया मातापित्रोः पुण्याप्यायनाय **महिच्छ**[क]विनिर्गत**महिच्छक**वास्तव्यैतच्चातुर्विध्यसामान्यकौशिकसगोत्रवाजसनेयसब्रह्मचारिब्राह्मणवप्पपुत्र**भट्टिभटाय** शिवभागपुरविषये दक्षिणपट्टे **पट्टपद्रक**ग्रामः सोद्रङ्गः सोपरिकरः सभूतवातप्रत्यायः सधान्यहिरण्यादेयः सदसापराधः सोत्पद्यमानविष्टिकः सर्वराजकीयानामहस्तप्रेक्षणीयः पूर्वप्रत्तदेवब्रह्मदेयरहितः भूमिच्छिद्रन्यायेनाचन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनः पुत्रपौत्रा-

न्वयभोग्य उदकातिसर्गेण धर्मदायो निसृष्टः,यतोऽस्योचितया ब्रह्मदेयाग्रहारस्थित्या भुञ्जतः कृषतः कर्षयतः प्रति दिशतो वा न कैश्चिद्व्यासेधे वर्तितव्यम् । आगामिभद्रनृपतिभिरप्यस्मद्वंशजैरन्यैर्वा स्वनित्यान्यैश्वर्याण्यस्थिरं मानुष्यं सामान्यं च भूमिदानफलमवगच्छद्भिरयमस्मद्दायोऽनुमन्तव्यः परिपालयितव्यश्च' इति । उक्तं च—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दारिद्र्यभयान्नरेन्द्रैर्धनानि धर्मायतनीकृतानि ।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥

दूतकोऽत्र प्रमातृ**श्रीनागः** । लिखितमिदं संधिविग्रहाधिकृतदिविरपति**श्रीस्कन्धभट्ट**पुत्रदिविरपति**श्रीमदनहिलेने**ति । संवत्[1] ३००+३०+४ माघ शु० ९ स्वहस्तो मम ॥

(आर्कियालॉजिकल् सर्व्हे ऑफ् इण्डिया—८६-८८ पृष्ठेषु)

---

(९३)

दिल्लीप्रान्तस्थसारवलग्रामस्थकूप[2]प्रशस्तिः ।

स्वस्ति ॥

सर्वभीष्टफलं यस्य पदाराधनतत्पराः ।
लभन्ते मनुजास्तस्मै गणाधिपतये नमः ॥
सत्यलो नाम वः पातु साम्बवत्याम्बया सह ।
प्रसादाद्यस्य देवस्य भक्ताः स्युः सौख्यभाजनम् ॥

---

१. वलभीसंवत् ३३४= खिस्तसंवत् ६५३-६५४　२ 'अयं कूप. सारवलाख्यग्रामे दिल्लीनगरतो दक्षिणस्यां दिशि पञ्चभिर्मैलैरन्तरिते देशे वर्तते' इति J. Eggeling Ph.D. महाशयेन व्याख्यायते.

देशोऽस्ति हरियानाख्यः पृथिव्यां स्वर्गसंनिभः ।
ढिल्लिकाख्या पुरी तत्र तोमरैरस्ति निर्मिता ॥
तोमरानन्तरं यस्या राज्यं निहतकण्टकम् ।
चाहमाना नृपाश्चक्रुः प्रजापालनतत्पराः ॥
अथ प्रतापदहनदग्धारिकुलकाननः ।
म्लेच्छः सहाबदीनस्तां बलेन जगृहे पुरीम् ॥
ततः प्रभृति भुक्ता सा तुरुस्कैर्यावदद्य पूः ।
श्रीमहम्मदशाहिस्तां पाति संप्रति भूपतिः ॥
तस्यां पुर्यस्ति वणिजामग्रोतकनिवासिनाम् ।
वंशः श्रीसाचदेवाख्यः साधुस्तत्रोदपद्यत ॥
लक्ष्मीधरस्तत्तनयो बभूव लक्ष्मीधराङ्घ्रिद्वयपद्मभृङ्गः ।
देवद्विजाराधननिष्ठचित्तः समस्तभूता वनलब्धकीर्तिः ॥
लक्ष्मीधरस्य तनयौ कलिकालबाह्या-
वास्तामुभौ महिमवारिनिधी सुरूपौ ।
माहाभिधो निपुणबुद्धिरभूत्तदाद्यो
घीकाख्य उत्तमयशा अनुजस्तु तस्य ॥
माहाख्यस्याभवत्पुत्रो मेल्हानामा मनोहरः ।
श्रीधरस्यात्मजां वीरोनाम्नी (वीरानाम्नीं) भर्तृपरायणाम् ।
घीका विवाहयामास तस्यामास्तामुभौ सुतौ ॥
ज्येष्ठस्तयोः खेतलनामधेयः साधुत्वपाथोधिरनन्तशीलः ।
पैतूकनामा च लघुः समस्तगुरुद्विजाराधनशीलचित्तः ॥
अथैतयोः खेलतपैतलाख्यसाध्वोः सदा कीर्तनकर्मबुद्ध्योः ॥
इयं शुभा सारवलाभिधानग्रामान्तभूरध्यवसत्स्म चित्ते ॥
पितॄणामक्षयस्वर्गप्राप्त्यै संतानवृद्धये ।
खेतलः पैतलश्चैनं कारयामासतुः प्रहिम् ॥
वेदवस्वग्निचन्द्राङ्कसंख्येऽब्दे विक्रमार्कतः ।
पञ्चम्या फाल्गुनसिते लिखितं भौमवासरे ॥

इन्द्रप्रस्थप्रतिगणे ग्रामे **सारवले**ऽत्र तु ।
चिर तिष्ठतु कूपोऽयं कारकश्च सबान्धवः ॥
संवत् १३८४ फाल्गुन शुदि ९ भौमदिने ॥
(आर्कियालॉजिकल् सर्व्हे ऑफ् इण्डिया—९३-९४ पृष्ठेषु)

(९४)

श्रीवैज(द्य)नाथप्रशस्तिद्वयम् ।

ॐ स्वस्ति । ॐ नमो गणपतये ।

यद्यप्यहं पशुपते कुमति····एव
पर्याप्तभक्तिविवशेन मया तथापि ।
अस्यां स्तुतौ श्रवणलेह्यरसांशभाजि
गौर्या सहैव परमेश निमन्त्रितोऽसि ॥

पा[शच्छेद]न[क]र्तरि प्रण[म]तां मोहान्धकूपब्रुड-
[ल्लोक]प्रोद्धरण[क्षमे] नि[रु]पमानन्दैक[सं]दायिनि ।
दुर्गे द्वार·······हारिणि हरिर्ब्र[ह्मा]दिदेवस्तुते
भक्तिः क्षेमविधायिनि त्रिनयने न[:········ स्वा]मिनि ॥

व्यापद्वल्लि[समू]ल[पा]टन[कं]री त्वं गीयसे स[र्वदा]
[मा]ता [त्वं] जगतस्तवास्ति न मिति[: स्वे]षां महिम्नामिह ।
उक्तिः केवलमेव शोभत इयं नो देवे[मा]तेति ते
संसर्गः पि[तृ]काननैरु[पचि]तै[रा]श्रीयते च त्वया ॥

१. इद प्रशस्तिद्वय **कोटकांगरा**नगरतस्त्रिशन्मैलात्मकान्तराले पूर्वस्या दिशि वर्तमान**कीरग्रामवैजनाथग्राम**वर्ति**वैद्यनाथमन्दिरे** वर्तते. एतन्मन्दिरस्तम्भेष्वतीव प्राचीनतास्ति. परंतु १७७६-१८०८ खिस्तवत्सरवृत्तिद्वितीय**संसारचन्द्राधिप**-१७८६खिस्ताब्दकारितसस्कारतो नवीनकल्पता प्रतीयते. 'सप्तवारमस्य मन्दिरस्य सस्कारो जातः' इति तत्रत्यजनश्रुत्या '१००८ खिस्ताब्दे **नगरकोट**मागच्छतो **गजनी**वासि**महम्मद**स्य सैनिकैरस्यापि मन्दिरस्य भङ्गः कृतो भवेत्' इत्यपि नासभावि—इति Archeological Survey of India पुस्तके Dr. G. Buhler, Ph. D., L. L. D., C. I. E., महाशयः. २. ससंबुद्ध्यन्तत्वेन गौरी स्तूयते, सप्तम्यन्तत्वेन शिवः. ३. रूपकम्. ४. शिवपक्षे—'देव, माता'; गौरीपक्षे—'देवमाता'.

य[1]स्याहिमालयो[त्कर्ष]पोषिणी [मू]र्तिरुत्तमा ।
त[2]स्यानमन्ति चरणौ धन्याः केचन जन्तवः ॥

धन्यैर्नरैरु[3]ग्रवधूः सदैव त्वमुद्यसे भक्तिभराभिरामैः ।
क्ले[4]शापहारीतिमनोहराभिर्वा[ग्भि]ः क[वीना]मुपगीय[से] च ॥

आसन्नमृत्युत्वदशामुपेयुषां परेषु नास्थाममरेषु कुर्वताम् ।
सत्यं भ[5]वानी शरणाभिलाषिणां मनोरथं पूरयितुं प्रगल्भते ॥

मुहुः समुद्रासिन एव यु[द्ध]क्री[डा]निकृत्तासुरस····प···· ।
सत्यं हरेरप्युपरि त्वमेव संतिष्ठसे निष्ठुरवीर्यधाम्नः ॥

[म[6]]लादिहृदयाह्लादिद[र्श]नतो दिने दिने ।
बहुदेहान्तर[स्था]णु[स्त्व]मेव किल कथ्यसे ॥

प्रसरन्मरीचिचयचन्द्रचारुणा वदनेन राजसितरामतिश्रिणा ।
ब[7]हुशोणिमादिगुणसंपदालयौ परिपूजयन्ति चरणौ तवामराः ॥

त्रैलोक्यजनन्यां त्वयि क[8]रुणावति युज्यते नृणां भक्तिः ।
त्रैलोक्यान्तर्निलयं त्वं हि जनं नयसि परमपदम् ॥

गि[9]रिजेशाधिखिन्नोऽसि त्वं गतिर्भव सांप्रतम् ।
संसारसागराच्चेतो भीरु मे नीयतां शमम् ॥

शि[10]वायैकविनन्तव्यपुण्यपादाग्रपांसवे ।
तुभ्यं क्षु[11]भ्यद्रिपुध्वंसमहाशक्तिमते नमः ॥

चञ्चच्चापलसद्दृष्टिर्विषमेषु प्रयोजकः ।
त्रै[12]लोक्ये स्त्रीजनो योऽत्र तस्य त्वमधिदैवतम् ॥

---

१. 'यस्य, अहिमालया, उत्क०'; 'यस्या हिमालयोत्क०'. २. 'तस्य, आनमान्ति;' 'तस्याः, नमन्ति.' ३. शिवपक्षे—'उग्र, वधूरर्धनारीश्वरमूर्तौ,' गौरीपक्षे—'उग्रवधूः.' ४. 'क्लेशापहा, रीतिमनो०'; 'क्लेशापहारी, इति, मनो०'. ५. 'भवान्, ईश, रणा०'; 'भवानी, शरणा०'. ६. 'मलादिहृत्, अयाह्लादि०' ७.'बहुश , अणिमा०','बहुशोणिमा०'. ८. सप्तम्यन्तम्, संबुद्ध्यन्तं च ९. 'गिरिजेश, अधिखिन्नः'; 'गिरिजे, शाधि, खिन्नः'. १०.'शिवाय, एकविनन्तव्य०', 'शिवायै कविनन्तव्य०'. ११. चतुर्थ्यन्तम्, सबुद्ध्यन्त वा. १२. 'त्रैलोक्ये, अस्त्री, जनः'; 'त्रैलोक्ये स्त्रीजनः'.

········ता····त्रिभिर्नेत्रैर्मृ[1][डा]निशरणैषिणाम्।
वपुःश्रीमदविध्वंसं विधातुं प्रजगल्भिषे॥
आपत्कलापमेलापपरितापप्रलापिनम्।
गौरीशास्ति[2] विमोहात्कं [कस्त्रा]तुमपरः क्षमः॥
शर्वाणिमानं[3] त्वद्भक्ता यान्ति सर्वातिशायिनम्।
प्रसीद मातः संसाराच्छीघ्रमेव विमोचय॥
गाढा गजानने प्रीतिः सर्वमोहि वपुः सदा।
उद्दीपितस्मरा दृष्टिर्यस्यास्ते[4] तत्पदं नुमः॥
इति **रामेण** निरामय सममुमया यन्मया स्तुतोऽसि विभो।
श्रुत्वा तममोघीकुरु परिश्रमं परमकारुणिक॥
एकोक्त्या स्तोत्रमिदं गौरीश्वरयोः पठन्ति ये भक्त्या।
तेषामप्यभिलाषः सिध्यतु शिवयोः प्रसादेन॥

इति गौरीश्वरस्तोत्रम्।

अस्ति शीतलगभस्तिशेखर त्वत्प्रशस्तिकरणे कुतोऽर्हता।
किंतु पावकमपाक्ष तावकी भक्तिरेव जडतां भनक्ति नः॥
अद्यापि विस्मापयितार एते विद्यन्त एवेश्वरभक्तिमन्तः।
विचित्रचारित्रनिधिर्यथैष राजानको **लक्ष्मणचन्द्र**नामा॥
केदारयात्रां विरचय्य येन विशोधनीं प्राक्तनदुष्कृतस्य।
इतः परं सर्वपरस्त्रियो मे स्वसार इत्येव कृता प्रतिज्ञा॥
किमेतदाश्चर्यमवार्यवीर्यैर्यदेष योधैर्युधि दुष्प्रधर्षः।
धनुर्धराणां धुरि यो मनोभूर्बभूव तस्याप्यविधेय एव॥
अद्येश्वरा मन्दपराक्रमत्वं मत्वा विपक्षैरवधारिताज्ञाः।
वास्तव्यनारीहठसंगमेन पुराधिपत्यं सफलं विदन्ति॥
नवं वयो रूपमधिश्रि दातृता पुराधिपत्यं बहवः प्रियंकराः।
तथापि चेतः परदारवर्जि चेत्किमस्ति दुःसाधमतः परं तपः॥

---

१. मृड अनिशरणैषिणाम्; मृडानि शरणैषिणाम्. २. गौरीश अस्ति; गौरी शास्ति. ३. शर्व अणिमानम्; शर्वाणि मानम्. ४. यस्य आस्ते; यस्याः ते.

राजानकस्य प्रविशुद्धबुद्धेः पाणिः कृपाणग्रहणप्रवीणः ।
विवर्जयामास विगर्हितानि तस्यान्यनारीस्तनमर्दनानि ॥
तस्यास्ति देसे(शे)ऽत्र वणिक्प्रसिद्धः **सिद्धात्मजो मन्युकनामधेयः** ।
छिन्नेत्यविच्छिन्नमहेशभक्तेर्मातावदातचरितस्य य[स्य] ॥
यस्याहु[का]ख्योऽस्त्यविभक्तवित्तो भ्राता कनिष्ठः सुकृतैकनिष्ठः ।
व्यग्रा समग्रातिथिपूजनाय **गुल्हे**ति गर्हारहिता च भार्या ॥
भक्तिद्रुवाटे भसलेन तेन [स]भ्रातृकेन त्रिपुरान्तकस्य ।
द्वारस्थगङ्गायमुनादिमूर्तिः कृता पुरीयं सह मण्डपेन ॥
भस्त्रागर्भगृहीतसर्वविभवा नेदिष्ठदेशे क्वचि-
द्ये कुर्वन्ति गतागतानि वणिजो गण्या वराकाः क्व ते ।
धन्यो **मन्युकनामधेय** इह हि श्रीकण्ठरज्यन्मनः-
पोतप्रोतविवेकवेतनधनो मोहार्णवं तीर्णवान् ॥
देवद्विजगुरुभक्तः सौजन्यनिधिर्गुणिप्रियो दाता ।
आसुकसुतोऽस्ति विप्रो **रल्हणनामा सुशर्मपुरे** ॥
तेन दैवज्ञधुर्येण धान्यद्रोणद्वयं शिवे ।
वहमान····भूपृष्ठा**न्नवग्रामा**त्समर्पितम् ॥
इहत्येन **नवग्रामा**द्दत्ता चात्र हलार्धभूः ।
गणेश्वरेण गोविन्दद्विजपुत्रेण धीमता ॥
देपिकाङ्गजनितेन **मल्हिकासूनुना** विततवित्तशालिना ।
जीवकेन वणिजा निजा च भूः प्राङ्गणाय पुरतः शिवेऽर्पिता ॥
[या]वदे[ष] भगवा[नहर्प]तिर्व्योम कोम[लरु]चिश्च गाहते ।
मन्युकाहु[कक्रुतः] शिवालयस्तावदस्तु सममन्यसा[शा]सनः ॥
आसिकात्मज उ[दा]रधी[र्वि]सन्सूत्रधारधुरि नायकाभिधः ।
श्री**सुशर्मनगरा**दिहाययौ **सम्मनस्य** तनयश्च **ठोदुकः** ॥
तेन तेन च सहैव टङ्किता प्रोन्नता शिवपुरी समण्डपा ।
····मुद्दष्टिमनुसृत्य निर्मिता यत्र भान्ति गणवर्गमूर्तयः ॥

शृङ्गाराभृङ्गकौ यस्य पितरौ पुण्यशालिनौ ।
स प्रशस्तिमिमां चक्रे रामनामा कवीश्वरः ॥
संवत्सरेऽशीतितमे प्रसन्ने········स्य शुक्लप्रतिपत्तिथौ च ।
[श्री]म[ज्ज]यचन्द्रनरेन्द्रराज्ये रवेर्दिने रामकृता प्रशस्तिः ॥

(द्वितीया प्रशस्तिः ।)

ॐ स्वस्ति । ॐ नमः शर्वाय ।

[आशास्यं वो गजास्यो] वितरतु हरता[त्तार]कारिर्विकारं
नन्दी सानन्द[नोऽ]यं भवतु स [च] महाकालशूलस्य धर्ता ।
··········ना··········यतु कु[रुतां] वीरभद्रोऽपि भद्रं
सर्वे वोऽखर्वगर्वा विदधतु कुशलं किंकराः शंकरस्य ॥
स पातु वो महादेवो·······भक्तिचुम्बितः ।
आत्मानं मु[हु]रीक्षन्ते यत्पादनखदर्पणे ॥
काष्ठोद्दीपनकर्मठा जगति या या निर्निमेषक्षणैः
सत्पक्षैरुपजीव्यते द्विजजनं या बिभ्रती शस्यते ।
देवस्याहुतिलम्पटस्य परमा पुष्टिर्यतो जायते
ताभिमूर्तिभिरष्टभिर्भवतु वो भूत्यै भवानीविभुः ॥
एतेनैव शरत्वमभ्युपगतं प्लोषाय पूर्वं पुरां
संप्राप्ता धनुषः श्रियं तनुरियं संप्रत्यमुष्यैव च ।
व्यानम्रे हसतीव यत्सुररिपावित्थं मुहुर्विस्मया
भस्मस्मेरमुपास्महे स्मरजितः पादद्वयं तद्वयम् ॥
यद्यप्यचेतनत्वाद्गक्रमशक्तः सुरालयस्तदपि ।
अथ केन कृतोऽहमिति प्रशस्तिपृथुजिह्वया वजति ॥
जालंधराधिराजो जयति गुणानां निधिर्जयचन्द्रः ।
ईदृंशि यस्य राज्ये देवायतनानि जातानि ॥
वित्तं शिवे प्रयुक्तं येषां कालेन भवति कोटिगुणम् ।
ग[ण्यास्त ए]व वणिजः शेषैः किं स्तोकवा[र्धु]षिकैः ॥

अनेन वक्ष्यमाणेन सुकृतेन महानयौ ।
गण्यौ गणेषु भ्रातरौ भूयास्तां **मन्युकाहुकौ** ॥
तौ भ्रातरौ कृतज्ञौ याभ्यां शमदम[प]योधरयुतायाः ।
शिवभक्तिजनन्या अपि रसः समास्वादितः सार्धम् ॥
शैलस्याङ्काच्चलित्वा रुचिरनववयाः खेलतीयं सहेलं
कुल्या कन्येव यत्र स्फुरदुर(रु)लहरी **कन्दुकाविन्दुका**ख्या ।
कीरग्रामोऽभिरामो गुणगणनिलयो वर्ततेऽधित्रिगर्तं
सोऽयं राजानकेन प्रबलभुजयु[जा रक्षि]तो **लक्ष्मणेन** ॥
अतुलकुलबकुलपादपकन्दः परिपन्थिभित्पुरास्कन्दः ।
राजानकोऽत्र **कन्दः** प्रथममभूद्दुर्यमस्कन्दः ॥
बुद्धो विशुद्धबुद्धिस्तस्य सुतोऽजनयदुद्धुरं तनयम् ।
विग्रह इति कृतविरहः शत्रुवधूनां ततो जज्ञे ॥
विग्रहविग्रहजातो **ब्रह्मेति** बभूव भूवधूदयितः ।
विग्रहनिग्रहकरणे शक्तिर्यस्याभवद्रिपुषु ॥
हस्तालम्बकमुन्नताद्विलुठतामाराधितत्र्यम्बकं
शत्रुश्रीपरिचुम्बकं परतिमिस्त्रीकारचित्तान्धकम् ।
क्रान्तग्रामकदम्बकं नृपतिभिः सद्बन्धुकौटुम्बकं
स्वाकारप्रतिबिम्बकं स च कृती लेभे सुतं **डोम्बकम्** ॥
नारीमोहनयौवनं नवनवत्यागोर्मिभिः पावनं
भूभर्तुः कृतसेवनं निजभुवः सम्यक्प्रकृतावनम् ।
उद्दामद्विषदालयीकृतवनं युद्धोग्रसिंहस्वनं
पुत्रं सोऽपि समाससाद **भुवनं** शंभौ बृहत्सावनम् ॥
गुणमणिनिकुरम्बरोहणं प्रवहणमापदगाधवारिधौ ।
कृतसुभटशिरोधिरोहणं समजनयत्तनयं स **कल्हणम्** ॥
जालंधराधीश्वरपादपद्मनिश्छद्मभक्तिः प्रचुरात्मशक्तिः ।
बलोल्बणो **बिल्हण**नामधेयस्तस्यात्मजोऽजायत सद्विधेयः ॥

तनयायां सनयस्य त्रिगर्तभूभर्तृहृदयचन्द्रस्य ।
स च रामलक्ष्मणाख्यौ लक्षणिकायां सुतौ लेभे ॥
ज्येष्ठे गुणैर्गरिष्ठे बिम्बोष्ठीभिः समं द्युपुरि गोष्ठीम् ।
अधितिष्ठति निष्ठुरधी[स्तस्य] कनिष्ठोऽत्र सुप्रतिष्ठोऽभूत् ॥
त्रिगर्तनृपतीनां या पादपद्मोपजीविभिः ।
कन्दादि[भिरा]सन्दारिसंदारिभिरभुज्यत ॥
परिपालितवास्तव्यस्तव्यनिर्मलकर्मणा ।
साधुना साधुना भूमिर्लक्ष्मणेनोपभुज्यते ॥
यस्य प्रेयस्यभवन्मयतल्ले[त्य]तुलरूपभृद्रमणी ।
तस्मिन्कीरग्रामं लक्ष्मणचन्द्रेऽनुपालयति ॥
सिद्धाख्यवणिक्पुत्रौ धर्मप्रवणाविह स्थितौ कृतिनौ ।
ज्येष्ठो मन्युकनामा कनिष्ठमप्याहुकं प्राहुः ॥
भवतरुकुठारधारा प्रविषमतमजन्मभरुमरुल्लहरी ।
प्ररुरोह मोहहन्त्री मनसि तयोः शांभवी शक्तिः ॥
ताभ्यां शिवलिङ्गमिदं निरालयं वीक्ष्य वैद्यनाथाख्यम् ।
पुर्या सहितं विहितं पुरतोऽस्य च मण्डपो रचितः ॥
इति मन्युकाहुकाभ्यामुदरे स्थित्वा पुरा किलैकत्र ।
पुनरुदरसंप्रवेशप्रतिषेधविधिः स सह विहितः ॥
यद्यपि पितेव कुरुते करुणां शंभुस्तथापि पितुरधिकः ।
जन्मनिमित्तं हि पिता शशिमौलिरजन्मनो हेतुः ॥
शाहिलपाहिलकाहिलसिद्धाः स्वर्लोकगामिनः सन्तु ।
पूर्वे पुरुषाः क्रमशश्चत्वारो मन्युकाहुकयोः ॥
किं बहुना·········देषा पुरुषाणामेकविंशतिर्यातु ।
सुकृतेनानेन दिवं स्वयं च परमास्तु गतिरनयोः ॥
राजानकेन चास्मै लक्ष्मणचन्द्रेण वैद्यनाथाय ।
मण्डपिकोत्पत्तिधनाद्दत्ताः षट् प्रत्यहं द्रम्माः ॥

ग्रामात्प्रलम्बनाम्नो मात्रा राजानकस्य लक्ष्मणया ।
एकहलवाहनीया दत्ता भूमिर्महेशाय ॥
लक्ष्मणस्य सुकृतं सुकृतो यः पालयिष्यति तदन्वयधर्ता ।
तस्य पुण्यमुपयातु विवृद्धिं यो हरिष्यति स गच्छतु चाधः ॥
तैलोत्पीडनयन्त्रं कीरग्रामेऽस्ति मन्युकाहुकयोः ।
ताभ्यां तदपि शिवाय प्रदीपनिष्पत्तये दत्तम् ॥
एका च पण्यशाला ताभ्यां स्वीया शिवस्य भोगार्थम् ।
भूमिश्च हलचतुष्टययोग्या दत्ता नवग्रामात् ॥
इति येन येन यद्यत्सुकृतं विहितं शिवं समुद्दिश्य ।
इह तस्य तस्य तत्तत्तिष्ठतु यावद्धरित्रीयम् ॥
यस्याविस्मृतजननीस्तन्यसमास्वादनस्य वदनाब्जे ।
परिशुद्धकवित्वफला सरस्वती भगवती न्यवसत् ॥
श्रीभृङ्गकस्य स सुतः [काश्मी]रनृपप्रमातुरनवस्य ।
प्रथमवयाः सर[लार्थां] व्यधत्त रामः प्रशस्तिमिमाम् ॥
चवेढक्षेत्रात् हर······क्षेत्रात् क्कण[दे]वाद[ग्र]भूमि[च्छ] ॥
गुहकेन य(?) शसिभद्रो(?) ना (प्रशस्तिरुत्कीर्णा) ।
शककालगताब्दाः ७[२६] ।

(आर्कियालॉजिकल् सर्वे-पृष्ठानि ११२-११५)

---

(९५)

श्रीयशोवर्मराजतत्सुतश्रीधङ्गदेवयोः प्रशस्तिः ।

ॐ नमो भगवते वासुदेवाय ।
दधानानेकां यः किरिपुरुषसिं[होभय]जुषं
तदाकारोच्छेद्यां तनुमसुरमुख्यानजवरात् ।

---

१. इयं च प्रशस्तिः पश्चिमोत्तरदेशे बुन्देलखण्डे छटरपुरराज्ये खजुराहोग्रामे उपलब्धा डा० कीलहॉर्न (Professor F Kielhorn, Ph. D. C. I. E.) महाशयैर्व्याख्याता.

जघान त्रीनुग्राञ्जगति कपिलादीनवतु वः
स वैकुण्ठः कण्ठध्वनिचकितनिःशेषभुवनः ॥
पायासुर्बलिवञ्चनव्यतिकरे देवस्य विक्रान्तयः
सद्योविस्मितदेवदानवनुतास्तिस्त्रस्त्रिलोकीं हरेः ।
यासु ब्रह्मवितीर्णमर्घसलिलं पादारविन्दच्युतं
धत्तेऽद्यापि जगत्त्रयैकजनकः पुण्यं स मूर्ध्ना हरः ॥
देवः पातु स वः पयःकणमृति व्योम्नीव ताराचिते
दैत्यासिव्रणलाञ्छने दिविस(ष)दः संत्यज्य सर्वानपि ।
तस्मिन्नञ्जनशैलभित्तिविपुले वक्षःस्थले यस्य ताः
पेतुर्मन्दरसङ्गसंभ्रमवलल्लक्ष्मीकटाक्षच्छटाः ॥
गम्भीरोम्बुधयः शशाङ्करुचिमान्भास्वत्प्रतापोज्वलो
धीरो धात्रि महान्महीधरवराः कल्पद्रुमास्त्यागवान् ।
आकल्पादविकल्पनिर्मलगुणग्रामाभिरामः प्रभुः
सत्यं ब्रूत यदि क्वचित्पुनरभूत्तुल्यो **यशोवर्मणः** ॥
प्रधानादव्यक्तादभवदविकारादिह महा-
नहंकारस्तस्मादजनि जनितोपग्रहगणः ।
ततस्तन्मात्राणि प्रसवमलभन्त क्रमवशा-
दथैतेभ्यो भूतान्यनु भुवनमेभ्यः प्रववृते ॥
इहाद्यो विद्यानां कविरखिलकल्पव्युपरतौ
परः साक्षी देवस्त्रिभुवनविनिर्माणनिपुणः ।
स विश्वेषामीशः स्मितकमलकिंजल्कवसति-
र्महिम्ना स्वेनैव प्रथममथ **वेधाः** प्रभुरभूत् ॥
तस्माद्विश्वसृजः पुराणपुरुषादाम्नायधाम्नः कवे-
र्येऽभूवन्मुनयः पवित्रचरिताः पूर्वे **मरीच्यादयः** ।
तत्रा**त्रिः** सुषुवे निरन्तरतपस्तीव्रप्रभावं सुतं
चन्द्रात्रेयमकृत्रिमोज्वलतरज्ञानप्रदीपं मुनिम् ॥

अस्ति स्वस्तिविधायिनः स जगतां निःशेषविद्याविद-
स्तस्यात्मोपनताखिल[श्रु]तिनिधेर्वंशः प्रशंसास्पदम् ।
यत्राभून्न पराक्रमेण लघुता नो चाटुकारोद्धति-
र्नाल्पाप्यन्तरसारता न च फलप्राप्तिः क्षपायात्मनः ॥

त्रस्तत्राणप्रगुणमनसां सर्वसंपत्प्रदाना-
मुद्युक्तानां कृतकृतयुगाचारपुण्यस्थितीनाम् ।
तत्रत्यानाममलयशसां भूभुजां का प्रशंसा
येषां शक्तिः सकलधरणीध्वंसने पालने वा ॥

तत्र क्षत्रसुवर्णसारनिकषग्रावा यशश्चन्दन-
क्रीडालंकृतदिक्पुरन्ध्रिवदनः **श्रीनन्नुकोऽभून्नृपः** ।
यस्यापूर्वपराक्रमक्रमनमन्निःशेषविद्वेषिणः
संभ्रान्ताः शिरसावहन्नृपतयः शेषामिवाज्ञां भयात् ॥

यस्यानन्दितवन्दिवृन्दरचितस्तोत्रक्रियाप्रक्रमा-
संक्रान्तं बहुवैरिवर्गजयिनः कन्दर्पकल्पाकृतेः ।
नाम क्षामतनूभृतां मृगदृशां सद्यो विधत्ते पदं
स्वान्तेषु द्विषतां च राशिषु बलाद्वैक्लव्यमव्याहतम् ॥

तस्मादभूदाजिपराजितारेः **श्रीवाक्पतिर्वाक्पतितुल्यवाचः** ।
यस्यामला भ्राम्यति भानुभाभिः सहैव लोकत्रितयेऽपि कीर्तिः ॥

यस्यामलोत्पलनिषण्णकिरातयोषि-
दुद्गीततद्गुणकलध्वनिरम्यसानुः ।
क्रीडागिरिः शिखरनिर्झरवारिपात-
झात्कारताण्डवितकेकिगणः स विन्ध्यः ॥

तस्माद्विस्मयधाम्नः क्षीराब्धेश्चन्द्रकौस्तुभौ यद्वत् ।
द्वावात्मजावभूतां **जयशक्तिर्विजयशक्तिश्च** ॥

तयोर्द्वयोरप्यमितप्रतापदावाग्निदग्धा हितकाननानि ।
कर्माणि रोमाञ्चजुषः समेताः समूर्धकम्पं क्षितिपाः स्तुवन्ति ॥

तत्रानुजन्मा तनयं राहिलाख्यमजीजनत् ।
निद्रादरिद्रतां यान्ति यं विचिन्त्य निशि द्विषः ॥
भीमभ्राम्यदसि[स्रु]चि स्रवदसृक्संपादिताज्यक्रिये
ज्यानिर्घोषवषट्पदे क्रमचरत्संरब्धयोधर्त्विजि ।
अश्रान्तः समराध्वरे प्रतिहतक्रोधानि(न)लोद्दीपिते
वैरोदर्चिषि यः पशूनिव कृती मन्त्रैर्जुहाव द्विषः ॥
श्रीहर्षभूपमथ भूमिभृतां वरिष्ठः
सोऽसूत कल्पतरुकल्पमनल्पसत्त्वः ।
अद्यापि यस्य सुविकासियशःप्रसून-
गन्धाधिवाससुरभीणि दिगन्तराणि ॥
यत्र श्रीश्च सरस्वती च सहिते नीतिक्रमो विक्रम-
स्तेजः सत्त्वगुणोज्ज्वलं परिणता क्षान्तिश्च नैसर्गिकी ।
संतोषो विजिगीषुता च विनयो मानश्च पुण्यात्मन-
स्तस्यानन्तगुणस्य विस्मयनिधेः किं नाम वस्तु स्तुमः ॥
भीरुर्धर्मापराधे मधुरिपुचरणाराधने यः सतृष्णः
पापालापेऽनभिज्ञो निजगुणगणनाप्रक्रमेष्वप्रगल्भः ।
शून्यः पैशून्यवादेऽनृतवचनसमुच्चारणे जातिमूकः
सर्वत्रैवं स्वभावप्रथितगुणतया नाम [कः स्तू]यतेऽसौ ॥
सोऽनुरूपां सुरूपाङ्गः कन्छुकाख्यामकुण्ठधीः ।
सवर्णां विधिनोवाह चाहमानकुलोद्भवाम् ॥
यस्याः पतिव्रततुलामधिरोढुमीशा-
नारुन्धती गुरुतरामभिमानिनीति ।
पत्युः समीहितविधानपरापि साध्वी
कार्श्यं तथा परमगादतिलज्जितेव ॥
गौडक्रीडालतासिस्तुलितखसबलः कोशलः कोशलानां
नश्यत्कश्मीरवीरः शिथिलितमिथिलः कालवन्मालवानाम्

सीद[त्सा]वद्यचेदिः कुरुतरुषु मरुत्संज्वरो गूर्जराणां
तस्मात्तस्यां स जज्ञे नृपकुलतिलकः श्रीयशोवर्मराजः ॥

स दाता राधेयः स च शुचिवचाः पाण्डुतनयः
स शूरः पार्थोऽपि प्रथितमहिमानः किमपि ते ।
व्यतीताः किं ब्रूमो यदि पुन[रि]ह स्युः स्वचरिते
ह्रिया नम्रीकुर्युर्वदनमवलोक्यैनमधुना ॥

त्रस्तत्रातरि तत्र भूभृति नृणां क्लेशाय शस्त्रग्रहः
कामं दातरि सिद्धकेलिसुमनस्तल्पाय कल्पद्रुमाः ।
वित्तेशः परमार्थवृद्धिविधुरस्वान्तो विलासी स चे-
दास्ये तस्य सतीन्दुरुत्पलवनप्रीत्यै दृशामुत्सवे ॥

यस्योद्योगे बलानां प्रसरति रजसि व्याप्तरोदो[न्तराले]
स्वःसिन्धुर्बद्धरोधाः पिहितरुचिरभूद्भानुरादर्शरम्यः ।
सम्यग्देवेन्द्रदन्ती मुदमधित वियत्साभ्रमालोच्य हंसाः
सोत्कण्ठास्तस्थुरासीन्नयनदशशती कूणितावृत्तशत्रोः ॥

अन्योन्याबद्धकोपद्विपकलहमिलद्दन्तदण्डाभिघात-
प्रोद्यज्ज्वालाकलापप्रसृतहुतभुजि ज्याघनध्वानभीमे ।
पीतासृक्क्षीबरक्षःप्रमदकलकलह्रादरौद्रप्रहासे
धीरं भीतेव लक्ष्मीः समरशिरसि यं संभ्रमादालिलिङ्ग ॥

उत्तुङ्गाञ्जनशैलसंनिभचलन्मत्तद्विपेन्द्रस्थित-
क्रुध्यद्दुर्धरधन्विमार्गणगणप्रारब्धरक्षाक्रियम् ।
विख्यातक्षितिपालमौलिरचनाविन्यस्तपादाम्बुजं
संख्येऽसंख्यबलं व्यजेष्ट गतभीर्यश्चेदिराजं हठात् ॥

लक्ष्मच्छायाकलुषवपुषः कान्तिमद्दू[र]मि[न्दो]-
र[न्या]यत्त[स्फुरि]तविधुरा[त्सु]न्दरं चारवि[न्दात्] ।
य………………………………………
संभ्रान्ताभिः कथमपि मुखं वीक्ष्य वैरिप्रियाभिः ॥

गङ्गानिर्झरघर्घरध्वनिभयभ्राम्यत्तुरङ्गव्रजाः
सद्यःसुप्तविबुद्धकेसरिरवत्रस्यत्करीन्द्राकुलाः ।
यत्सैन्यैः प्रतिकल्पपादपमुमालूनप्रसूनोच्चयाः
प्रालेयाचलमेखलाः कथमपि क्रान्ताः शनै[र्दिग्जये] ॥
उच्च[प्रा]कारभि[त्तिस्थि]त[स]मद[शिखिक्रूर ?]........[निना ?]द-
........................श्लथ[रथ]तुरगप्राप्तवेगान्तरायः ।
यस्मिन्मध्यंदिने स्यात्तरणिरनुदिनं नीलकण्ठाधिवासं
जग्राह क्रीडया यस्तिलकमिव भुवः........कालञ्जराद्रिम् ॥
आ शस्त्रग्रहणादखण्डितमहावीरव्रतप्रक्रियै-
रा बाल्यादविलुप्तसत्य[समयै]रा पाणिपीडाविधेः ।
अश्रान्तार्थिवि[तीर्ण]पूर्णविभवैस्त....प्सिताकाङ्क्षि[भि]-
....पुलकैर्यः साधुभिः स्तूयते ॥
[नि]न्दामुपैमि पुरुषान्तरसंगमेन [शान्ति] न जातु सततभ्रमणक्रमेण ।
यस्यातिपौरुषनिरस्तमनुष्यभावे लोके समुद्गतकीर्तिरनिन्दितैव ॥
एकैवोवाह लोकेऽस्मिन्पुत्रजन्मोन्नतं शिरः ।
कञ्चुका येन धीरेण देवकीव मधुद्विषा ॥
शौ[र्यौ]दार्यनयादिनिर्म[लगु]णग्रामाभिरा[मं यशो ?]
[यस्या ?]शेष[विशुद्ध]ना[थति]लकं [गा]य[न्ति सि]द्ध[स्त्रि]यः ।
[तस्य स्तोत्रम]मित्रमर्दन[र]वेः स्पष्टप्रकाशीकृत-
त्रैलोक्यस्य सहस्रसंख्यमहसो दीपप्रदानोपमम् ॥
क्रोधोद्वृत्तान्तकभ्रूकुटिलपटुरणच्चण्डकोदण्डयष्टि-
ज्याघातस्फारघोरध्वनिचकितमनः[संभ्रमभ्रान्तदृक्षु ।
स्पष्टं नष्टेषु दूरं क्वचिदपि रिपुषु क्षत्रतेजोम्बुराशे-
र्य........र्न व्य[रंसीद्भुवनवि ?]जयि[नश्चण्डदो]र्दण्डकण्डूः ॥
[यो] लक्षव[र्म]नृपतेः शरदिन्दुकान्त-
माख्यातुमिच्छति यशःप्रस[रं] वचोभिः ।

दीपप्रभापरिचयेन विमुग्ध[बु]द्धि-
मर्ध्यंदिने दिवसनाथमुदीक्षतेऽसौ ॥

यन्नाक्रामदवक्रमानसबलिव्याजप्रयोगापत-
त्पृथ्वीलङ्घनलब्धलाघवमघच्छेदी पदं वामनः ।
लोकालोकशिरःशतप्रतिहतज्योतिर्विवस्वान्न म-
त्तस्य क्रामति तन्निशाकरमहःश्रीस्पर्धि शुभ्रं यशः ॥

धीरो दिग्विजयेषु केलिसरसीं तीव्रप्रता[पं द्]ध-
न्निःशेषद्विषदव्यथोभयतटीविन्यस्तसेनाभरः ।
मज्जन्मत्तकरीन्द्रपङ्किलजलां श्रीलक्षवर्माभिध-
श्चक्रे शक्रसमः कलिन्दतनयां जह्नोः सुतां च क्रमात् ॥

आस्थानेषु महीभुजां मुनिजनस्थाने सतां संगमे
ग्रामे पामरमण्डलीषु वणिजां वीथीपथे चत्वरे ।
अध्वन्यध्व[गस]कथासु [निलये]ऽर[ण्यौ]कसां विस्मया-
न्नित्यं [तद्गु]णकीर्तनैकमुखराः सर्वत्र सर्वे जनाः ॥

यस्यानने शरदखण्डशशिप्रसन्ने
कोपं व्यनक्ति हृदयस्थमरिप्रियाणाम् ।
सिन्दूरभूषणविवर्जितमास्यपद्म-
मुत्सृष्टहारवलयं कुचमण्डनं च ॥

तेनैतच्चारुचामीकरकलसलसद्व्योम धाम व्यधायि
भ्राजिष्णु प्रांशुवंशध्वजपट[पटना]न्दोलिता[म्भोज]वृन्दम् ।
दैत्यारातेस्तुषारक्षितिधरशिखरस्पर्धि वर्धिष्णुरागा
दृष्टे यात्रासु यत्र त्रिदिववसतयो विस्मयन्ते समेताः ॥

कैलासाद्भोटनाथः सुहृदिति च ततः कीरराजः प्रपेदे
साहिस्तस्मादवाप द्विपतुरगबलेनानु हेरम्बपालः ।
तत्सूनोर्देवपालात्तमथ हयपतेः प्राप्य निन्ये प्रतिष्ठां
वैकुण्ठं कुण्ठितारिः क्षिति[धरति]लकः श्रीयशोवर्मराजः ॥

श्रीधङ्गः स्वभुजप्रसाधितमहोनिर्व्याजराज्यस्थिति-
स्तस्मादास महोदधेरिव विधुः सूनुर्जनानन्दकृत् ।
युद्धे नश्यदरातिवर्गसुभटप्रस्तूयमानस्तुति-
र्नित्यं नम्रमहीपमौलिगलितस्रक्पूजिताङ्घ्रिद्वयः ॥
आकालंजरमा च मालवनदीतीरस्थितेर्भास्वतः
कालिन्दीसरितस्तटादित इतोऽप्या चेदिदेशावधेः ।
[आ तस्मादपि ?] विस्मयैकनिल[या]द्गोपाभिधानाद्गिरे-
र्यः शास्ति क्षितिमायतोऽर्जितभुजव्यापारलीलार्जि[ताम्] ॥
यस्त्यागविभ्रमविवेककलाविलास-
प्रज्ञाप्रतापविभवप्रभवश्चरित्रात् ।
चक्रे कृती सुमनसां मनसामकस्मा-
दस्मादकालकलिकालविरामशङ्काम् ॥
शब्दानुशासनविदा पितृमान्व्यधत्त
देद्देन माधवकविः स इमां प्रशस्तिम् ।
यस्यामलं [कवि]यशः कृतिनः कथासु
रोमाञ्चकञ्चुकजुषः परिकीर्तयन्ति ॥
संस्कृतभाषाविदुषा जय[गु]णपुत्रेण कौतुकाल्लिखिता ।
रुचिराक्षरा प्रशस्तिः करणिकजद्धेन गौडेन ॥
पाताद्भूमिपतिः पृथ्वीं त्रयीधर्मः प्रवर्धताम् ।
नन्दन्तु गोद्विजन्मानः प्रजाः प्राप्नोतु निर्वृतिम् ॥
संवत्सरदशशतेषु एकादशाधिकेषु संवत् १०११ ।
उत्कीर्णा चेयं रू[पका]र.................. ॥

श्री[विनायक ?]पालदेवे पालयति वसुधां वसुधार्नो[घ]ग[ता]स्निग्ध-[वै ?]रि[भि ?] । नमो भगवते वासुदेवाय । नमः सवित्रे ।

(आर्कियालॉजिकल् सर्वे–१२४-१२९ पृष्ठे)

(९६)

श्रीधङ्गमहाराजप्रतिष्ठापितमरकतेश्वर-महादेवप्रशस्तिः[1] ।

विष्टपविकटवटानामजायमानाय बीजभूताय ।
रुद्राय नमः पालनविलयनये निष्क्रियायापि ॥
तूर्णं घूर्णति यत्र गोत्रशिखरिव्यूहः समूहः पत-
त्यत्यावर्जितमूर्तिसर्तविरुतं कुर्वन्ककुप्कुम्भिनाम् ।
सप्ताम्भोध्यवधिप्रभूतवसुधाबन्धः कबन्धीकृत-
स्वर्गाद्रिः क्षयकाण्डताण्डवविधिः शैवः शिवायास्तु वः ॥
कस्त्वं द्वारि दिगम्बरः क्षपणकः कस्मादकस्मादहो
बाले शूलधरो धिगायुधविधि बर्हास्त्वदर्हा ननु ।
मां जानीहि महेश्वरं स्फुटमिदं वस्त्रेऽप्यभावादिति
प्रेयस्या परिहासतो विहसितं शंभोः शिवायास्तु वः ॥
पशुपतिवदनच्छद्मनि कृतवसतिः पद्मसद्मनि सदा या ।
जयति विलक्षणरूपा शुक्लाभा भारती भ्रमरी ॥
गिरिशशिरसि यच्छन्हस्तमिन्दोः कलायां
मुहुरमलमृणालीग्रासगृध्नुः शिशुत्वे ।
जयति विबुधमूर्ध्नोन्नाललीलाम्बुजेन
स्मितकुपितमृडानीताडितो नागवक्त्रः ॥
निजोपज्ञप्रज्ञाप्रसरपरिविस्फारमुकुरे
पदार्थानां सार्थः प्रतिफलति येषामवितथः ।
गिरां ग्रामो येषामधरमधिशेते स्वयमयं
नमस्तेभ्यः सद्भ्यस्तिलकितजगद्भ्यः किमपरम् ॥
कल्पादौ किल केवलं खमखिलं ध्वान्तावनद्धं ध्रुवं
शून्यं वीक्ष्य सिसृक्षतो जगदभूद्[द्रा]दमुद्रोऽनिलः ।

---

१. इयमपि प्रशस्तिस्तस्मिन्नुक्तखजूराहोग्राम एवोपलब्धा.

तत्राभूदनलोनलाज्जलमभूद्वीजादमोघाज्जले
ज्वालामालि हिरण्मयं महदभूदण्डं विभोर्ब्रह्मणः ॥
तदण्डभाण्डखण्डाभ्यां द्यां भुवं विदधे धिया ।
ब्रह्मा ब्रह्मनिधीन्पुत्रान्मरीच्यत्रिमुखान्मुनीन् ॥
मध्ये तेषां प्रहततमसां मानसानां मुनीनां
श्रीमानत्रिः प्रथितमहिमा नेत्रपात्रे प्रसूतम् ।
यस्य ज्योतिःपटलजटिलं मण्डलं वन्द्यमिन्दो-
श्चन्द्रात्रेयः समजनि मुनिस्तस्य पुत्रः पवित्रः ॥
दूरापास्तसमस्तसंशयविपर्यासप्रकामोज्ज्वल-
ज्ञानालोकविलोकिताखिलजगत्सर्गापवर्गस्थितेः ।
सर्वज्ञप्रतिमस्य तस्य कृतिनः कारुण्यपुण्यात्मनः
पारं गन्तुमनन्तदीपमहसः को वा महिम्नां क्षमः ॥
नीरन्ध्रो निरघो निसर्गसरलः सारो[त्त]राभ्यन्तरो
निर्ग्रन्थिः पृथुलाग्रभागसुभगः पर्वस्वखर्वस्थितिः ।
आम(मू)लं फलितोऽप्यसेवितविपत्क्रूरारिदावाग्निना
न म्लानिं गमितस्ततः समभवद्वंशोऽयमत्यद्भुतः ॥
आ चन्द्रं चन्द्रात्रेयवंशजाः क्षितिभुजः क्षितिम् ।
भोक्ष्यन्त्यक्षतदोर्दण्डचण्डिमानोऽत्रितेजसा ॥
ये पूर्वेऽत्र पवित्रितक्षितितलाः सत्कर्मसर्गप्रियाः
प्राणप्रार्थनयाप्यखिन्नमनसः पर्याप्तसत्यव्रताः ।
निःसिन्दूरितदुर्विनीतबलवत्सामन्तसीमन्तिनी-
सीमन्ताः पृथिवीभुजो विजयिनस्तेभ्योऽखिलेभ्यो नमः ॥
कालेनेह महावंशे प्रशंसाप्रांशुरंशुमान् ।
मुक्तामणिरिव श्रीमानन्नुकोऽभून्महीपतिः ॥
तेन विक्रमधनेन धन्विना क्रामता युधि वधाय विद्विषाम् ।
धुन्वता धनुरधिज्यमर्जुनं स्मारिता दिवि विमानगामिनः ॥

तस्मादुदारकीर्तेरजनि जनानन्दसुन्दरः श्रीमान् ।
तनयो विनयनिधानं वाक्पतिरिव वाक्पतिः क्षितिपः ॥

विद्यावदातहृदयेन हृदि प्रजाना-
मातङ्कशङ्कुमकलङ्कितविक्रमेण ।
तेनापनीय नयनिर्मललोचनेन
संकोचिताः पृथुककुत्स्थकथार्थकन्थाः ॥

तस्य क्ष्मातिलकस्य लोकतिलकः पृथ्वीपतेर्भूपतिः
स श्रीमान्विजयो जयाय जगतां जज्ञे कृतज्ञः सुतः ।
यस्योदात्तमते प्रसूतिसमये धाम्नां महिम्नां निधेः
सानन्दं सुरसुन्दरीभिरवनौ क्षिप्ताः सलाजाः अ(स्र)जः ॥

किन्नरीभिरधिकंधरं सखीराकलय्य भुजयास्य भूभुजः ।
काकलीकलमगीयत स्फुरत्प्रोथमुत्पुलकमुज्व(ज्ज्व)लं यशः ॥

विनयनतसुमित्रापत्यसंवाहितांह्रिः[1]
प्रवरहरिचमूभिः[2] क्रान्तपर्यन्तभूमिः ।
सुहृदुपकृतिदक्षो दक्षिणाशां जिगीषुः
पुनरधित पयोधेर्व(र्ब)न्धवैधुर्यमर्यः ॥

तस्मान्नृपतिसमुद्रादुदपादि नरेन्द्रचन्द्रमाः सूनुः ।
स श्रीराहिलनामा विहततमावन्दिता[भ्यु]दयः ॥

प्रसन्ने तत्र भूपाले प्रसरच्चित्रभानवः ।
ना[थ]वन्तोऽर्थिनां वा[सा]ः सरोषे द्विषदालयाः ॥

कोशपानमसिधा(वा)रयोषितां नाभिभूतजनरत्नसंपदाम् ।
पक्षपातमिषुदुष्टभूभृतः प्रापुरस्य न सुहृत्सभासदः ॥

तस्मात्तीव्रप्रतापज्वलनकवलितोत्तालभूपालतूला-
न्मूलाच्छीलद्रुमाणामनणुगुणगणालंकृतेः कीर्तिभर्तुः ।

---

१. शोभनैर्मित्रैः सुहृद्भिरपत्यैश्च; सुमित्रापत्येन लक्ष्मणेन च. २. वानरचमूभिः; अश्वैश्चमूभिश्च.

स श्रीहर्षोऽरिहर्षज्वरहरणमणिः क्षीणनिःशेषदोषः
संतोषाय प्रजानामजनि निजभुजाश्रान्तविश्रान्तकीर्तिः ॥
यं दृष्ट्वैव कृपाणपाणिमकृत व्यापारभा[रं] युधि
क्रोधाक्रान्तविलोचनो(नौ)त्पलदलभ्रूभङ्गभीमाननम् ।
उत्साहो हृदयाद्धनुः करतला[द्धा]वो मुखात्कीर्तयो
दिग्भ्यः साध्वसवेपमानवपुषां नष्टाः परेषां क्रमात् ॥
तेनाच्युतेन भीमेन व(ब)लेन कृतवर्मणा ।
समुद्रपरिखा पृथ्वी पुरी सू(शू)रेण रक्षिता ॥
अपक्षधात्रीधररक्षणक्षमः सदैव दोषाकरसङ्गभङ्गुरः ।
बहिष्कृतक्रूरभुजंगसङ्गमस्तिरस्करोति स्म स तूर्णमर्णवम् ॥
दूरा[पा]स्तप्रवरतुरगैर्दूरमुक्तातपत्रै-
र्दूरायातैः सपदि शिरसा [शा]सनं धारयद्भिः ।
तस्य द्वारि द्विरदमदनिःस्यन्दपङ्काङ्कितायां
सेधा(वा)हेतोः पुणतिपरमैराशि(सि)तं भूमिपालैः ॥
वृत्तोज्व(ज्ज्व)ला गुणाधारा महार्घा हृदयंगमा ।
हारावलीव तस्यासीत्कंछुकेति प्रियोत्तमा ॥
वर्ण्ण[ः] स्वर्ण्णरुचिर्विलोचनयुगं नीलं सचन्द्रोपलं
पाणिः शो[ण]मणिद्युतिः सचरणो दन्तच्छदो विद्रुमः ।
सद्यः सु(शु)क्तिविमुक्तमौक्तिकतलस्वच्छं [च चे]तो यतः
स्त्रीरत्नं भुवनैकभूषणमभूत्तेनेयमेका सती ॥
तस्यास्तस्य स्मरणविहिताघौघविध्वंसनायाः
सत्तीर्थायास्त्रिदशसरितः शान्तनोः पुण्यकीर्त्तेः ।
धर्माधारः पितरि सुतरां साधुरिद्धप्रभावो
भीष्मो प(य)द्वत्समजनि सुतः श्रीयशोवर्मदेवः ॥
तस्य विप्रचरणप्रणामजं शैशवे शिरसिजश्रितं रजः ।
अप्यकालपलिताकृतिं दधत्संदधावधिककामनीयकम् ॥

एकस्मै याचमानाय द्विजाय पलदः शिबिः ।
यावदर्थिजनं प्रादात्कोटिं कोटिमसौ नृपः ॥

नन्तुं भूमिलिताळिकेन सदसि व्यस्तासवे(ने)नासितुं
गन्तुं पत्रपुरःसरेण चरणैः स्थातुं च नीचैश्चिरम् ।
वक्तुं जीवजयादिशेति नियमं कर्तुं विनीतात्मना
तस्मिन्राजति(नि) राजकेन जयिनि त्रासादिदं सि(शि)क्षितम् ॥

नित्यो(त्यो)दितेन्दुभुजगाधिपधाम नित्य-
मानन्दि कुन्दकुसुमं गगनाङ्गणं च ।
तेनाद्भुतं द्वयमिदं यशशा(सा) व्यधायि
धा[त्री]तलं शि(सि)तसुधाधवलत्वचित्रम् ॥

संभवति भुवि मनुष्यः सप्ताकूपारपारदृश्वापि ।
न पुनरिह तस्य नृपतेर्गुणसागरपारगः कश्चित् ॥

गान्धारीं भजता प्रहृष्टश[1]कुनिस्वानप्रियां प्रेयसीं
[2]भीष्मद्रोणवचांस्य[3]कर्णसुखदान्याकर्ण्य संमूर्च्छता ।
नो [4]धर्मप्रभवं विरोधितवता प्राप्यापि वंशक्षयं
[सं]प्राप्ता धृतराष्ट्रता [सु]सुहृदा विद्वेषिणेत्यद्भुतम् ॥

कष्टात्षष्टिसहस्रसूनुभिरसूनुत्सृज्य खातः कृत-
स्तत्पौत्रप्रमुखैः पुनस्त्रिभिरसावम्भोभिरापूरितः ।
वृत्तान्तं सगरस्य सागरविधावाकर्ण्य तूर्णं सुधीः
स्पर्द्धावानधिकं व्यधत्त जलधेर्वै(र्बै)ल्वं तडागार्णवम् ॥

तस्येदं सा(शा)रदेन्दुद्युति[ख]रसि(शि)खरक्षुन्न(ण्ण)नक्ष[त्र]चक्रा-
च्च[क्रं रक्ष]न्नमुष्मादपथ(न)यति रथं सारथिः सप्तसप्तेः ।
यत्कुम्भः शातकुम्भस्तुहिनगिरिशिरश्चुम्बिबिम्बा(म्बा)र्कतर्कं
कुर्वन्नास्ते समस्तस्तुतमसुररिपोर्वेस्म(श्म) वैकुण्ठमूर्त्तेः ॥

---

१. शकुनयः पक्षिण ; दुर्योधनपक्षीयो वा २ भीष्मपितामहद्रोणाचार्ययोर्वचांसि; भयानकद्रोणकाकवचांसि च ३. कर्णस्य राधेयस्य; कर्णयोः श्रोत्रयोश्च न सुखं ददतीति ४. धर्मोत्पत्तिम्; युधिष्ठिरं च.

महावंस(श)समुत्पन्ना प्रसन्ना[धारि]तावनी ।
नर्मदेवाभवद्देवी पुण्या तस्य महीपतेः ॥
सदानसूया विहितागसेप्ससावरुन्धतीजीवितमप्युपासिता ।
व(ब)भौ मदान्धान्दमयन्त्यनिन्दिता यदालसाभून्न पुनः कथंचन ॥
सा देवी नरदेवाद्देवाधिपतेः स(श)चीव सच्चरित्रं तम् ।
तस्मादसूत पूतं जयन्तमिव [धं]गमङ्गभुवम् ॥
[1]यशोदानन्द[भाक् च]क्रे पूतनामारणक्रियाम् ।
जातो वृष्णिकुले कंसरिपोश्छेत्ता नरोत्तमः ॥
तस्मा[त्समुत्थि]तक्रोधान्नृसिंहा[2]न्नखलाविनः ।
हि[3]रण्यकशिपुप्राणत्राणं चक्रे न केनचित् ॥
देवालोकय कोशलेश्वरमितस्तूर्णं समाकर्ण्यता-
मादेशः क्रथनाथ सिंहलपते नत्वा व(ब)हिः स्थीयताम् ।
त्वं वि[ज्ञा]पय कुन्तलेन्द्र वदने दत्त्वोत्तरीयाञ्चलं
तस्यास्थानगतस्य वेत्रिभिरिति व्यक्तं समुक्तं वचः ॥
का त्वं काञ्चीनृपतिवनिता का त्वमन्ध्राधिपत्नी
का त्वं राढापरिवृढवधूः का त्वमङ्गेन्द्रपत्नी ।
इत्यालापाः समरजयिनो यस्य वैरिप्रियाणां
कारागारे सजलनयनेन्दीवराणां व(ब)भूवुः ॥
का त्वं कस्य किमर्थमत्र भवती प्राप्ता शशाङ्कोज्व(ज्ज्व)ला
सिद्धाः कीर्तिरहं वु(बु)धैकसुहृदः श्रीधङ्गपृथ्वीपतेः ।
भ्रान्त्वा विस्व(श्व)मशेषमागतवती स्फारीभवत्कौतुका
लोकालोकमहामहीध्रसि(शि)खरश्रेणिश्रियं वीक्षितुम् ॥
मरकतमयं तुङ्गं लिङ्गं यदर्चितमैश्वरं
त्रिदशपतिना तस्माल्लब्धं प्रसाद्य किरीटिना ।

---

१. यशोदाया आनन्दकर्ता पूतनाया मारणक्रिया चक्रे कंसाख्यरिपोश्छेत्ता. अयं तु— कशोदमानन्दं भजतीति तादृशः पवित्रनामा संग्रामक्रिया चक्रे । कंससमरिपोश्छेत्ता. २. नखैर्लुनातीत्येवशीलात्, न दुष्टान्रक्षतीत्येवशीलाच्च. ३. हिरण्यस्य कशिपोः प्राणांना च त्राणम्.

तदवनितलं तेनानीतं युधिष्ठिरपूजितं
जयति जगति श्रीधङ्गेन प्रणम्य निवेसि(शि)तम् ॥
वेस्म(श्म)न्यस्म(श्म)मयस्तेन भूपालेन प्रतिष्ठितः ।
द्वितीयो द्योतते देवः क्लेशपास(श)हरो हरः ॥
तेनायं स(श)रदभ्रसु(शु)भ्रसि(शि)खरः श्रीधङ्गपृथ्वीभुजा
प्रासा(सा)दस्त्रिदशप्रभोर्भगवतः सं(शं)भोः समुत्तम्भितः ।
यस्याभ्रंकषकालधौतकलसप्रान्तस्खलत्स्प(त्स्य)न्दनो
मेरोः सृ(शृ)ङ्गमतुङ्गमेव मनुते चित्रीयमाणोऽरुणः ॥
भक्त्या भवस्य नूनं शिल्पिस(श)रीरेषु कृतसमावेशः ।
स्वयमेव विश्वकर्मा तोरणरचनामिमां चक्रे ॥
जयति किरीटो (ध)टोऽयं हाटककोटीरनेन तुलयित्वा ।
अतुलेन तुलापुरुषाः स(श)तसों(शो) विश्राणितास्तेन ॥
षट्कर्माभिरता रताः परहिते संसु(शु)द्धवंस(श)द्वयाः
प्रारब्धाध्वरधूमधूम्रवपुषोऽप्येकान्ततो निर्मलाः ।
तेनैते धनधान्यधेनुवसुधादानेन संमानिताः
सौधेषु स्फटिकाद्रिकूटविकटेष्वारोपिता त्रा(ब्रा)ह्मणाः ॥
त्र(ब्र)ह्मसु त्र(ब्र)ह्मकल्पेषु येष्वेकत्र निवासिषु ।
दक्षिणेन तुषाराद्रि कल्पग्रामोऽपरोऽभवत् ॥
रक्षित्वा क्षितिमंवु(म्बु)रासि(शि)रस(श)नामेतामनन्यायति
जीवित्वा स(श)रदां स(श)तं समधिक श्रीधङ्गपृथ्वीपतिः ।
रुद्रं मुद्रितलोचनः स हृदये ध्यायन्ज(ञ्ज)पजाह्नवी-
कालिन्द्योः सलिले कलेवरपरित्यागादगान्निर्वृतिम् ॥
धर्माधिकारमनुसा(शा)सति सा(शा)स्त्रतोऽत्र
मित्रे सतां स्फुरितधामनि धर्मवु(बु)द्धौ ।
श्रीमद्यशोधरपुरोधसि वेधसीव
सिद्धिं जगाम जगतीपतिकीर्तिरेषा ॥

तार्कारिकः प्रवरसावरवंस(श)जन्मा
श्रीनन्दनः कविरभूत्कविचक्रवर्ती ।
तस्यात्मजः समजनि श्रुतपारदृश्वा
श्रीमांस्तपोधिकव(ब)लो व(ब)लभद्रनामा ॥
सूनुः सूनृतगीर्गिरीन्द्रमहिमा भद्रस्य तस्याभव-
द्भूपालैर्भुवि पूजितांह्रिरनघः साहित्यरत्नाकरः ।
श्रीरामो रमणीयशू(सू)क्तिरचनाचातुर्यधुर्यः कृती
तेनेयं विहिता प्रशस्तिरचना भक्त्यालये शूलिनः ॥
न संकीर्णा वर्णाः क्वचिदिह न सापत्यकलुषाः
स्थिताः कायस्थेन प्रथितकुलशीलोज्व(ज्ज्व)लधिया ।
यशःपालेनायं विदितपदविद्येन लिखितः
प्रशस्तेर्विन्याश(स)ः कृतयुगसमाचारश(स)दृशः ॥
'विज्ञानविश्वकर्त्रा धर्माधारेण सूत्रधारेण ।
च्छि(छि)च्छा(भि)धेन विदधे प्राशा[सा]दः प्रमथनाथस्य ॥
यावत्पृथ्वी सपृथ्वीधरनगरनगा दत्तमुद्रा समुद्रै-
र्यावद्भ्राजिष्णुरुष्णद्युतिरयममृतस्यन्दनः शीतरस्मि(श्मिः) ।
यावद्ब्र(ब्र)ह्माण्डभाण्डस्थितिरियमथवा स्थास्नुता स्थाणवीयः
प्राशा(सा)दस्तावदेष व्रजतु नरपतेर्दत्तकैलासहासः ॥
लिपि[ज्ञा]नवि[धि]ज्ञेन प्राज्ञेन गुणसा(शा)लिना ।
सिहेनेयं समुत्कीर्णा सद्वर्णा रूपसा(शा)लिनी ॥
संवत(त्) १०९८ श्रीखर्जूरवा[ह]के
राजश्रीधङ्गराज्ये देवश्रीमरकतेश्वरस्य प्रस(श)स्तिः सिद्धा ॥
उत्खातोच्चमहीभृतो मसृणिता मत्तद्विपानां पदै-
(र्द्धौ)र्धौताः सङ्गरसङ्गभङ्गुररिपुत्रस्यत्प्रियाश्रूत्करैः ।
दिग्भित्तीर्जयवर्मदेवनृपतिः कीर्त्यक्षरैर्योऽलिख-
त्तेनालेखि पुनः प्रशस्तिरमलैरेषाक्षरैः क्ष्माभुजा ॥

विद्वद्भिर्जयपालसी(शी)तकिरणोऽमून्यादराद्वन्दितो
गौडः प्रोल्लिखदक्षराणि कुमुदाकाराणि सर्पत्करः ।
कायस्थो जयवर्मदेवनृपतेरीशस्य बिभ्रत्कलाः
साहित्याम्बुधिबन्धुरुद्धततमो रुन्धन्ननिन्द्यद्युतिः ॥
संवत् ११७३ वैशाख सुदि ३ शुक्रे ॥

(एपिग्राफिआ इण्डिक्–पृष्ठे १४०-४७)

(९७)

श्रीकोक्कलमहाराजनिर्मापितनगरप्रशस्तिः[1] ।

ओं नमः शिवाय ।

स्फूर्य(र्ज)त्स्फारफणाकलापविकसद्भीमस्फटाभासुरं
भास्वत्तारतरातिरेकविलसच्चन्द्रार्धचिह्नीकृतम् ।
प्रोद्यल्लोलविलोचनानलमिलज्ज्वालावलीपिङ्गलं
वन्दे सुन्दरवैद्यनाथविधृतं वन्द्यं जटामण्डलम् ॥
यस्य प्रेतवनं निवासभवनं भूतैः प्रभुत्वं भृशं
भूतिर्भूषणमङ्गरागरचना प्रीतिर्युगान्तं प्रति ।
कण्ठे तिष्ठति कालकूटमशिवोऽप्येवं शिवत्वस्थितम्(वो यः स्थितः)
सर्वव्याधिहरश्चराचरधरः पायात्स वः शंकरः ॥
यं वेदान्तविदो वदन्ति मनसः संकल्पभूतं शिवं
ब्रह्मैकं परमक्षरं तमजरं तं चामरं तद्विदः ।
अन्ये तं शिवमेव बुद्धममलं त्वन्ये जिनं वामनं
तस्मै सर्वमयैक्यकारणपते सर्वाय[2] नित्यं नमः ॥
माहेन्द्रोपेन्द्ररौद्रज्वरविषममहादुष्टकष्टाभिभूता
भूतैः प्रत्यग्रभूतैः प्रतिदिनमुदितैर्यातुधानैर्गृहीताः ।
धृष्टाङ्गुष्ठप्रकोष्ठप्रकटितपटिमाटोपकुष्टप्रदुष्टा
दृष्ट्वा नश्यन्त्यनिष्टास्फुटविकटजटाजूटमेते त्वदीयम् ॥

१. इयमपि प्रशस्तिः खजूराहोग्राम एवोपलब्धा इति प्राग्दर्शितव्याख्यानत एव सर्वं व्याख्येयम् २. दन्त्यादिरपि सर्वशब्दः शिववाची.

आसीदप्रतिमा विमानभवनैराभूषिता भूतले
　लोकानामधिपेन भूमिपतिना पद्मोत्थवंशेन या ।
केनापीह निवेशिता कृतयुगत्रेतान्तरे श्रूयते
　सच्छास्त्रे पठिता पुराणपटुभिः **पद्मावती** प्रोच्यते ॥
सौधोत्तुङ्गपतङ्गलङ्घनपथप्रोत्तुङ्गमालाकुला
　शुभ्राभ्रकषपाण्डुरोच्चशिखरप्राकारचित्राम्बरा ।
प्रालेयाचलशृङ्गसंनिभशुभप्रासादसद्मावती
　भव्यापूर्वमभूदपूर्वरचना या नाम **पद्मावती** ॥
त्वङ्गत्तुङ्गतुरंगमोद्गमखुरक्षोदाद्रजः प्रोद्धतं
　यस्यां जीर्णकठोरवभ्रमकरोत्कूर्मोदराभं नभः ।
मत्तानेककरालकुम्भिकरटप्रोत्क····ष्टाद्भुतं
　युक्तं कर्दममुद्रया क्षितितलं तां ब्रूत किं संस्तुमः ॥

किं बहुना—

तस्यां ग्रहपतिवंशस्तम्बक·········प्यदूषितो जातः ।
कोटिगुणोन्नतनमितः प्रथितोऽतिबलः श्रीमान् ॥
　यश्चाभवन्निजभुजार्जितचित्रकीर्ति-
　　रुत्तम्भिता[प्त]कुलमूलतरुप्रकाण्डः ।
　भ्रूभङ्गकार्मुककटाक्षशराभिघात-
　　मा[त्त]प्रतापपरिपालितशत्रुदण्डः ॥
　यः शुभ्रविभ्रमशशाङ्ककरप्रतान-
　　कान्त्युज्ज्वलोत्पलजलप्रबलांस्तडागान् ।
　देवालयानपि हिमाचलशृङ्गतुङ्गा-
　　श्चक्रे शतक्रतुकृती स **यशोवलाख्यः** ॥
　तस्मादभूदभिमताखिलबन्धुवर्गो
　　दुर्गत्रिवर्गफलनिर्मललब्धसौख्यः ।
　सत्कीर्तिकीर्तनकथापरिगद्यमान-
　　[माहात्म्य]मोदितजनः किल **माहटाख्यः** ॥

तस्यात्मजः स्वजनसर्वजनात्क·········
शङ्कापमानपरिमार्जनसज्जकार्यः ।
मर्यादमुद्धुतगभीरिमयाब्धितुल्यै-
································ ॥

··················गु[रु]गभीर·········राशिः
श्रीमानभूत्सुकृतकृज्जयदेवनामा ॥

कान्त्या शीतकरात्समी[हित]फलावाप्तौ च कल्पद्रुमा-
दालोको दिवसाधिपादिव ततो जज्ञे सुतः सेकलः ।
विद्वानप्रतिमप्रतापतरणिः ख्यातः सतामग्रणीः
सत्यत्यागपराक्रमैकवसतिर्मानी धनैरन्वितः ॥

सद्वीरत्वादलङ्घ्यः प्रथितपृथुककुप्प्रान्तविश्रान्तकीर्ति-
स्त्यागे कर्णोपमानः कटुकपटवचोभाषणे चाप्रगल्भः ।
सद्यः सौजन्यजन्यप्रकटितमहिमारातिवर्गस्य दुर्गः
श्रीमानु············र्गो·········हित·············[से]कलोऽभूत् ॥

उद्यद्वीरगभीरराज्यजलधेः पारे समुत्तारित-
मीदृक्षेण महीभुजा निजतनुं यं प्राप्य पोतं परम् ।
श्रीसेक्कल्लमतुल्यकुल्य·································
·····························रुचिरं किं तत्र वस्तु स्तुमः ॥

तस्यानुजोऽपि सौन्दर्यमर्यादौदार्यकार्यवान् ।
यौवनेऽप्यार्यचरितः श्रीकोक्कल्लेति विश्रुतः ॥

यः सत्पात्रे ददा·······································
··················नमन्न·····वरवसनशतान्यश्वशय्यासनानि ।
छत्रोपानद्विचित्रासनभवनमहाधान्यदानान्यजस्रं
स श्रीमान्कोक्कलाख्योऽभवदिह कुमरः की·········र्मकर्मा ॥

प्रशस्तसम·······································तं
महार्हगुरुतोरणं शिखरिशृङ्गतुङ्गालयम् ।

विचित्रमतिभूषणोच्छ्रितलसन्महागोपुरं
पुरंदरपुरप्रभं पुरमचीकरत्कोक्कलः ॥
तेनायं तुहिनाचलामलमहाकूटाग्र··········
··················ऽघिगहनोत्ताराथिना कारितः ।
यस्यात्युच्छ्रितकाञ्चनाण्डकलसं मार्तण्डचण्डप्रभा-
संपर्कादभवद्वितानममलं श्रीवैद्यनाथप्रभोः ॥
यस्य द्वारेऽतिवस्तुप्रततमिव दिवो द्वारमुग्रा·······
····················गगनमिव समुड्डीय गच्छद्विभाति ।
यन्मन्ये वैद्यनाथो यदभिनवभवद्रामसंस्थापितोऽत-
स्तस्यार्थे पुष्पकं तत्प्रहितमिव····स्तोरणीभूय भाति ॥
यत्र वेदविदुषा द्विजन्मनां सा··················क्रमम् ।
षट्सु कर्मसु रतं बहुश्रुतं तेन वृन्दमनघं निवेशितम् ॥
उद्दामात्मविवेकसेकजनितश्रेयोलसत्पल्लवा
शश्व·······पोषितद्विजगणा सद्वृत्तपुष्पोज्वला।
यस्येलाविपुलालवालवलयात्सत्कीर्तिवल्ली मही-
भृद्दण्डानधिरुह्य मण्डपमिव ब्रह्माण्डमारोहति ॥
संवत् १०५८ कार्तिक्यां **श्रीकोक्कलेन** ॥

(एपिग्राफिआ इण्डिका १४९-५० पृष्ठे)

---

(९८)

गोपगिरि(ग्वालिअरदुर्ग)मार्गस्थितविष्णुमन्दिर-प्रशस्तिः[१] ।

ओम् ।

कालिन्द्याः किं जलौघो घनतिमिरनिभो जाह्नवीस्पर्धया नः
प्रोद्यातः किं न भूयो गगनतलगाति विन्ध्यसानुर्विहन्तुम् ।

---

१. इय च प्रशस्ति १८८५ खिस्ताब्दे ग्वालिअरनगर गतवता Dr E Hultzsch, Ph. D, महाशयेनोपलब्धा व्याख्याता च.

चिक्रंसोर्यस्य दृष्ट्वा चरणमतिचिरं सप्तयो नैव पूष्णो
जग्मुः क्षोभादिवोच्चैर्नभसि स मधुजिद्धन्तु वः कल्मषाणि ॥
अतिललितलाटमण्डलतिलकानन्दपुरनिर्गतो गुणवान् ।
वर्जारान्वयनागरभट्टकुमारोऽभवद्येन ॥
वाइल्लभट्टनामा तनयोऽजनि जनितजनचमत्कारः ।
न युधिष्ठिरोऽप्यकार्षीद्यः सह नकुलेन सत्प्रीतिम् ॥
परिभाषादिज्ञानं वैयाकरणस्य यस्य परमासीत् ।
कर्मोपधाविकारौ न कदाचिद्बाच(ध)कौ भूतौ ॥
सुशुभ्रतां व्याप्तदिगन्तरत्वमासाद्य दुग्धाब्धिरगाधतां च ।
जिगंसयोर्ध्वं च यशःपयोधिमाह्वास्त यस्यातितरां तरङ्गैः ॥
धनदोऽपि न प्रमत्तो ध्वस्तसमस्तसविषोऽपि न विरूपः ।
रत्नाकरोऽपि न जडो यो नाशोकोऽपि रागिष्ठः ॥
श्रीरामदेवकार्ये मर्यादाधुर्यतामलङ्घयता ।
येन विशुद्धं युद्धे निजकुलवत्प्रकटितं नाम ॥
किं बहुना यस्य गुणाः कथयितुमपि नैव यान्ति मादृक्षैः ।
मानाधिकमम्बु यतो घटकोटावपि न गृह्णाति ॥
लक्ष्मीं मुरारिर्नगजां च शंभुः शचीं यथेन्द्रोऽथ तथा सुशीलाम् ।
कुलोद्गतां कासरकीयविष्णोः सुता स कान्तां समवाप जज्ज्ञाम् ॥
व्यपगतमदमोहजालसङ्गः कृतचरितैकरतः प्रसन्नमूर्तिः ।
परिहृतखलसंगमः सुतोऽल्लः सकलकलाकुशलो बभूव ताभ्याम् ॥
न पितुर्धुरोऽधिकारी पुत्रोऽभूत्कश्चिदप्यमून्शब्दान् ।
श्रोतुमशक्तेनोहे धूर्तेन नविषयलुब्धेन ॥

---

१. 'वडनगर' इति नाम्ना सांप्रतं प्रसिद्धम्. २. चतुर्थपाण्डवेन, अप्रशस्तकुलेन च. ३. कर्मसंज्ञाधिकरणादिसंज्ञाया बाधिका. उपधाया विकारश्च बाधकत्वेन दृष्टः. अस्य तु कर्मणः कार्यस्य विकारः, उपधाया धर्मादिपरीक्षाया विकारश्च बाधको न. ४. क्षीबः, हृष्टश्च. ५. सविषाः सर्पाः, जलाशयाश्च. ६. विरूपो गरुडः, रूपहीनश्च ७. समुद्रः, रत्नखनिश्च. ८. अशोकशोकरहितः, रक्ताशोकश्च. ९. स्नेहयुक्तः, रक्तवर्णश्च.

दुग्धाब्धेरिव मूर्तिर्यस्य सदा दानवारि[1]परिपूता ।
कमला[2]लिङ्गितवपुषः प्रजापतेरिव तनुर्यस्य ॥
हर इव वृष[3]विहितास्थो दोषा[4]सङ्गं न भानुरिव मेने ।
मधुरिपुरिव यः संततमाक्रान्तविपक्ष[5]संघातः ॥
यस्य परार्था[6]सक्ता सततं परिदृश्यते मतिर्नूनम् ।
निर्लोभत्वं तस्य हि जातं खलु यत्तदाश्चर्यम् ॥
संत्यक्तपरकलत्रो[7] धर्मैकरतोऽपि सर्वदावश्यम् ।
निजवनितापरितुष्टोऽप्यभिलषितसुहृज्जनप्रमदः[8] ॥
अवलोक्य वक्त्रकमलं यस्य शशी स्वोदयेन मलविकलम् ।
कर्तुमनीशः किंचित्प्रतिक्षणं क्षीयतेऽद्यापि ॥
अकरोद्यश्च विकल्पं व्याख्यानविधौ न दानविषयेषु ।
सग्रामस्य न योऽभूत्पराङ्मुखः परकलत्रस्य ॥
स्थैर्यं वचसि न रोषे, स्पृष्टो विजयैर्न जातु कलिकलुषैः ।
यस्याभवदालस्यं पापेषु न राजकार्येषु ॥
धर्मार्जने च लोभो न कदाचित्परधनेषु विविधेषु ।
यस्य त्वविवेकित्वं मित्रेषु न बुद्धिविभवेषु ॥
दारिद्र्यं हरतार्थिनो रिपुजनाल्लक्ष्मीं मनो योषितः
रूपं पञ्चशरादगाधपयसो गाम्भीर्यमम्भोनिधेः ।
चित्रं येन विचारचारुमनसामाचारमातन्वता
सर्वत्रैव जनापवादरहितं चौर्यं प्रकाशीकृतम् ॥
कुर्वीत यदि विधाता कर्णानामपि सहस्रमहिपस्य[9] ।
श्रुत्वाथ तद्गुणौघान्वदनशतैः शक्नुयाद्वक्तुम् ॥
श्रीमदादिवराहेण त्रैलोक्यं विजिगीषुणा ।
तद्गुणान्यः परिज्ञाय कृतो गोपाद्रिपालने ॥

---

१. दानवारि सकल्पजलम्, दानवारिर्विष्णुश्च. २. कमलेन, लक्ष्म्या च. ३ धर्मः, बलीवर्दश्च. ४ दूषणानाम्, रात्रेश्च. ५. गरुडपक्ष॰, शत्रुश्च. ६. परवित्ते, उत्कृष्टेऽर्थे. ७. पर कुलीनम्, परस्येतरस्य. ८. प्रमदो हर्षः, प्रमदा अबलाश्च. ९. अहिपः, सर्पराजः.

कह्लुकदुहिता बब्बा येष्टतमामाप **सोमटां** तनयाम् ।
भट्टसुतान्या गोग्गापरा महादेवजा गौरी ॥
गोवर्धनजा **सिल्ला नन्नकतनयेसटा** च येनोढा ।
बब्बादीनां स्वस्य च पुण्यस्य विवृद्धये महता ॥
सिद्धेर्वर्त्म समं भवाब्धितरणे यद्यानपात्रं मह-
द्बीजं धर्मतरोरनन्तफलदं स्थानं श्रियः शाश्वतम् ।
टङ्कोत्कीर्णयशोनिधानमिव यन्नामाक्षरैरङ्कितं
तेनाकारि विकारशून्यमनसा विष्णोरिदं मन्दिरम् ॥
दधति जलमगाधं सागरा यावदुच्चै-
र्गिरिरयमपि वोढा यावदभ्रंकषस्य ।
शिरसि शिखरराशेः स्थेयसी श्लाघ्यरूपा
स्थगयतु भुवि कीर्ती रोदसी तावदेषा ॥
नवसु शतेष्वब्दानां द्वात्रिंशत्संयुतेषु वैशाखे ।
रम्येऽस्मिन्नेकशिले विष्णुर्भक्त्या प्रकाशितो भवने ॥

(एपिग्राफिआ इण्डिका १५६-५७ पृष्ठे)

---

(९९)

कुदारकोट[1] (गवीधुमती)ग्रामस्थितमन्दिरप्रशस्तिः[2] ।

संनिहितनील[3]कण्ठा नितम्बतटशोभिनी ससिंहगुहा[4] ।
जयति प्रालेयाचलभूरिव दुर्गा सदा सुमुखा ॥
आसीच्छ्रीहरिदत्ताख्यः ख्यातो हरिरिवापरः ।
श्रीहर्षे[5]ण समुत्कर्षं नीतोऽपि विकृतो न यः ॥

---

१. अय च ग्रामोऽधुना पश्चिमोत्तरदेशत्वेन प्रसिद्धे भूभागे **'इटावा'**परिगणे **इटावा**ग्रामत ऐशान्या दिशि चतुर्विंशतिमैलदूरे वर्तते. २ यस्मिन्पाषाणे प्रशस्तिरिय लिखिता स पाषाणोऽधुना लक्ष्मणपुरे वर्तते प्रशस्तिश्चेय Dr F. Kielhorn, Ph. D., C. I E, महाशयैर्व्याख्याता. ३. मयूर', महादेवश्च ४. सिंहेन गुहेन च सहिता, सिंहेन गह्वरेण च सहिता. ५. अयमेव **श्रीहर्षः** सप्तमख्रिस्तशतकोत्पन्नमहाकविबाणेन **हर्षचरिते** वर्णितः.

अविचलितरत्नसंचयमक्षोभितभूभृद्वधृतभुजङ्गम्।
पुरुषोत्तमस्य विसदृशमासील्लक्ष्म्यर्जनं यस्य॥
तस्याभवत्सुतनयो **हरिवर्म**नामा
श्रीमम्म इत्यपरनामकृतप्रतीतिः।
यस्मिन्रवाविव तपत्यखिलस्वबन्धु-
स्त्रीवक्त्रपङ्कजवनानि विकासमीयुः॥
यस्याद्यापि हताराातिमन्दिरोद्यानपादपान्।
दावव्याजेन दहति प्रकामं कोपपावकः॥
विशालवक्षःफलकाभिलक्ष्यप्ररूढखड्गव्रणसंनिवेशाः।
अनेकसंयद्विजयाङ्कसंख्या निखातरेखा इव यस्य रेजुः॥
[1]सरागयापि यस्यासीद्द्वयं द्रष्टुं न पारितम्।
यत्पृष्ठमरिवाहिन्या यच्च वक्षः परस्त्रिया॥
प्रजापतिं निर्मितसप्तसागरक्ष्माधरं यो लघयन्सिसृक्षया।
महाह्रदानम्बुनिधीनकल्पयत्सुराधिवासानचलांश्च कोटिशः॥
महान्तः कर्कशात्मानो बद्धमूला अपि क्षितौ।
सावज्ञमाज्ञया येन नतिं नीता महीभृतः॥
स्वप्रासादमहाभारगुरुभूततनोरिव।
यः कूपखननव्याजैः सिरा भूमेरमोचयत्॥
[2]मार्गणाभिमुखा [3]लुब्धाः समेताः फलकाङ्क्षया।
विमुखा येन रिपवः कृता न पुनरर्थिनः॥
लोके प्रथयतापूर्वं व्यवहारेषु कौशलम्।
येनार्थित्वमगत्वैव जिताः प्रत्यर्थिनः सदा॥
जनयामास यः पुत्रं त्रयीरक्षणदीक्षितम्।
श्रीतक्षदत्तनामानं नमितारिशिरोधरम्॥

---

१. सरागया मात्सर्ययुक्तया, अनुरागयुक्तया च. २ मार्गणा बाणाः, मार्गणं याच्ञा.
३. आकाङ्क्षी, व्याधश्च.

सर्वेषामभयप्रदेन सहजाः सन्तस्तथानेकशो
युद्धेऽनेन यशोर्थिना तृणमिव त्यक्ता वयं केवलम्।
इत्युच्चैः परिवृद्धमन्यव इव प्राप्यावसानान्तरं
लब्धास्त्रव्रणरन्ध्रनिर्गमपथा यस्यासवो निर्ययुः॥

रम्ये गवीधुमति संततवेदविद्या-
व्याख्यानघोषबधिरीकृतदिग्मुखेऽस्मिन्।
उच्चैरचीकरदुरुस्थिरचारुचित्रं
त्रैविद्यमन्दिरमुदारमिदं स साधुः॥

यावद्गुणाः शशिकरा इव तस्य लोक-
माह्लादयन्ति हृतसान्द्रतमःसमूहाः।
एतद्द्विजातिभवनं भुवनाभिराम-
मव्याहतादिकृतसंविधि तावदास्ताम्॥

भद्रेणैते रचिता वामनतनयेन सुचरितश्लोकाः।
ऐशानिनापि लिखिता सूत्रधृता देवदेवेन॥

बह्वृचचरणे सांकृत्यसगोत्रः सूर्यदत्तपुत्रो महासेनदत्तः। अध्वर्यु-चरणे वत्ससगोत्रो गीवत्ससोमपुत्रो जातवेदसोमः। छन्दोगचरणे कुहलसगोत्रः कुलदीपकीर्तिपुत्रो वैश्वानरकीर्तिः। बह्वृचचरणे वासिष्ठसगोत्रः उदैत(ध)रपुत्रः श्रीचन्द्रधरः। अध्वर्युचरणे औपमन्यवसगोत्रो बहुस्वामिपुत्रो बहुरूपशर्मा। छन्दोगचरणे गालवसगोत्रो धृतिगुप्तस्वामिपुत्रः..............

एतैर्महत्तमैः श्रीमत्त्रैविद्याज्ञानुपालनैः।
कारितं धाम धर्मस्थैः श्रीमम्मस्य समाज्ञया॥

(एपिग्राफिआ इण्डिका–१८०-८२पृष्ठे)

(१००)

कांगराज्वालामुखीस्तोत्रसंसारचन्द्रप्रशस्ती[1] ।

ओं नमो ज्वालामुख्यै ।

पायाज्ज्वालामुखी वः प्रणतसुरवरस्फारकोटीरकोटी-
कोटीव्याटीकमानद्युमणिसममणिश्रेणिभावेणिभाता ।
कल्पान्तक्षोभजृम्भाभररभससमारम्भसंरम्भभीम-
ज्वालामालाकरालाननलघुकवलीभूतभूतप्रपञ्चा ॥
अव्याज्ज्वालामुखी वः समरसमरसीभावसंभावनोद्य-
द्गीर्वाणव्यस्त्रवाणप्रहसितदितिभूगर्वसर्वंकषौजा ।
शौर्याहंभावसंभावितमहिषगलामग्नखड्गाग्रधारो-
दृच्छद्रक्तप्रणाली····त····रयहृतिच्छिद्रितोर्ध्वाण्डखण्डा ॥
पञ्चास्योदञ्चनप्राञ्चितचरणसरोजा सरोजासनादि-
····त्यासु त्यागशूरासुरगमरमदत्योनदत्पाञ्चजन्या ।
जन्या जन्यप्रपञ्चा प्रभवभयरुजाहारिणी हारिणी सा
वद्यावद्यानवद्यां धिय[मिय]मुदय[स्थे]म्नि वज्रेश्वरी वः ॥
साकं साकंसकंसाशमनशमनताशाविभाताविभाता
दिव्यादिव्यापट्टनाविषमविषमयक्लेशभीमाशभीमा ।
वामावामावताद्वो यतिनि यति········निरीक्षासमक्षा
जालं जालंधरं श्रीचयनचयनयोगश्रितोमाश्रितोमा ॥
देवी ज्वालामुखी वश्चिरमशुभमलं खण्डिषीष्टैधिषीष्ट
स्थामैतस्याः प्रसादात्किमपि तनु मह[श्वे]तसा संगसीष्ट ।
विद्या [वि]द्यो[ति]षीष्ट प्रकृतिमनुविदे····यिषीष्ट प्रसर्ति-
र्धीः संबोभूयिषीष्ट प्रचुरपरिमला····न्प्रकोकूयिषीष्ट ॥

---

१. इयं च प्रशस्तिः 'साहिमहम्मदे दिल्लीनगर प्रशासति (A. D. 1433-1446) निर्मितेति प्रशस्त्यन्तिमपद्येन व्यक्तम्. अत्रत्यस्तोत्रपद्यानि त्वस्फुटार्थान्येव. अत एव Dr. G. Buhler Ph. D, L. L. D., C. I. E., महाशयैरपि नवश्लोकभाषान्तरं न रचितम्.

दुर्गादुर्गार्तिवोऽव्याददलिकुलतरलां वैजयन्ती जयन्ती-
मालामालालयन्ती कलितकलिमलाविश्रुताशाश्रुताशा ।
दुर्गादुर्गार्तिवोऽव्याददलिकुलतरलां वैजयन्ती जयन्ती-
मालामालालयन्ती कलितकलिमलाविश्रुताशाश्रुताशा ॥
साव्याङ्गां सर्वदा वः कलितहरिपदादेवविद्यारसोमा
साव्याङ्गां सर्वदावः कलितहरिपदादेवविद्यारसोमा ।
साव्याङ्गा सर्वदा वः कलितहरिपदादेवविद्यारसोमा
साव्याङ्गा सर्वदावः कलितहरिपदादेवविद्यारसोमा ॥
एधन्ती(?) स्निह्यमानां वि····नु······· ति····सर्व····नी
रुद्यन्ती वो विबाध····प········या यापयन्ती सुखानि ।
पुंसः सेव्या विनत्या विजयति सुदुता कल्मषं त[क्ष्णु]वाना
शर्मेशौ········सुकर्म(?) फलमुप[चिनु]ते····लोकस्य सारम् ॥
········गासीष्ट······ ष्टं सकलकलिकलां कंसिषीष्टाशिशीष्ट(?)
श्रेयस्त्रासीष्ट दासीष्ट च निरतिशयां ·· ति···· ···पीष्ट ।
········सीष्टा····र····का ···सदन····रा गाहिषीष्टा ·······षीष्ट
स्थासीष्टास्थां धृषीष्टाहितकृति निकृषीष्टाद्य कात्यायनी ते ॥

श्रीमद्राघवचैतन्यमुनिना ब्रह्मवादिना ।
[स्तव]रत्नावली सेयं [ज्वा]लामुख्यै समर्पिता ॥

विद्वानात्रेयगोत्रः कलिमलदलनो द्राविडः **कृष्णभट्टः**
षड्दर्शि(र्शी)न्याः प्रवक्ता नृपतिसुतनुतः सोमसंस्थाभिषिक्तः ।
तस्माद्**वागीश्वराख्यः** समजनि सुधियामग्रणीर्ग्रन्थकर्ता
मीमांसापारदृश्वा स्मृति····[नि]पु[णो] यक्षविद्याप्रवीणः ॥
तत्सूनुः **कृष्णभट्टः** परनरवनितासोदरः सर्वविद्या-
पारीणः काव्यकर्ता हरिहरचरणाम्भोजभृङ्गोऽतिवेलम् ।
काशीवासी समेत्यालिखदिदमुरुभिर्लि········स्तोत्ररत्नं
ज्वालामुख्या महिम्नः कलयत तदिदं भुक्तिमुक्तिप्रधानम् ॥

वंशे जैवातृकस्याभवदवनिपतिर्मेघचन्द्रस्ततोऽभू-
द्राजा श्रीकर्मचन्द्रो गुणगणनिलयः सत्कुमुद्वत्सुधांशुः।
तस्मात्संसारचन्द्रः समजनि नृपतिः पञ्चमाब्दाभिषिक्तः
शत्रून्सर्वान्विजित्वा(?) वितरति वसुधां वेदशास्त्रार्थविज्ञः॥
कीर्तिर्यस्य तुषारहारविशदा लोकत्रयं गाहते
प्रालेयाद्रिमिषेण पन्नगपतिव्याजेन चन्द्रच्छलात्।
यन्मूर्तिश्च सतामभीष्टफलदश्चिन्तामणिः शोभते
सोऽयं भूपतिशेखरो विजयते संसारचन्द्रो नृपः॥
वीरप्रतीहारसुते वदान्ये महीपतेर्वोढरि राज्यभारम्।
रणी प्रवी(ती)हारजितारिवर्गे भवत्प्रशस्तिः परिरक्षति क्षितिम्॥
ब्रह्माण्डोक्तगुहान्तरे दृढतरं निर्माय कूर्मासनं
क्षीराम्भोनिधियोगपट्टकलिताप्युस्वा तमःकुन्तलान्।
कालं वस्तु विजित्य पश्यति परं ज्योतिः प्रतापाभिधं
श्रीमत्साहिमहम्मदस्य जयतात्कीर्तिः परा योगिनी॥
श्रीमद्गणपतिशुक्लप्रीत्या काम्बोजदेल्हस्य।
भक्त्या लेखितमेतत्स्तोत्रं सूगीकसूत्रधाराच(रेण)॥
श्रीमत्कर्मध्वजशिष्यसूर्यध्वजस्य ज्वालामुख्यै नमः।

(एपिग्राफिआ इण्डिका—१९२-१९४ पृष्ठे)

---

(१०१)

परमर्दिदेवमहामात्यसल्लक्षणकारितमन्दिरप्रशस्तिः[१]।

ओं ओं नमो भगवते वासुदेवाय।
जयन्ति बाहवः शौरेश्चतुर्वर्गफलद्रुमाः।
निर्भरश्रीपरीरम्भपर्याप्तपुलका...... ॥

---

१. इयं च प्रशस्तिः शिलायामुत्कीर्णा वटेश्वरग्रामे यमुनातीरस्थे उपलब्धाधुना लक्ष्मणपुरप्रदर्शिन्या वर्तत इति Dr. F. Kielhorn, Ph. D., C. I. E, महाशयैर्वर्ण्यते.

....टि ।
इति च्छलात्स्पृष्टपयोधिपुत्रीपयोधरः पातु रथाङ्गपाणिः ॥

अत्रेरजायत विलोचनपुण्डरीका-
द्देवो गिरीन्द्रतनयादयितावतंसः ।
वंशस्ततोऽयमु..............................
मुक्ताफलैरिव यशोभिरशोभि शुभ्रैः ॥

अस्मिन्नुद्दामदोर्दण्डखण्डितारातिमण्डलाः ।
जज्ञिरे चारुचारित्राश्चान्द्रात्रेयमहीभुजः ॥

तेष्वाविरास विलसत्करवालदण्ड-
दम्भोलिनिर्दलितशात्रवगोत्रपक्षः ।
उद्दामदर्परिपुराजबलाभिघात-
ख्यातोद्यमो **मदनवर्म**महीमहेन्द्रः ॥

सौधे सोच्छ्वसितं स्थितं सकरुणं लीलाशुको व्याहृतो
दृष्टो बाष्पजलौघरुद्धनयनं क्रीडाकुरङ्गीशिशुः ।
त्रासाद्यस्य यियासुना वनभुवं कान्ताजनेन द्विषां
प्रत्यावृत्तिनिराशमानसतया किं किं न वा चेष्टितम् ॥

सिन्दूरिताहितमतङ्गजकुम्भपृष्ठे
येनाहितोऽलिमलिनः करवालदण्डः ।
युद्धेऽरिभिर्निजविनाशविसर्पिशैघ्य
आलोकि केतुरिव नूतनसूर्यसङ्गी ॥

अजायत **यशोवर्मा** ततश्चन्द्र इवाम्बुधेः ।
योऽभवज्जगदानन्दो महेश्वरशिरोमणिः ॥

कुन्देन्दुकान्त्या त्रिजगद्विसारियदीयकीर्त्या धवलीकृतेषु ।
केशेषु जाता बत निर्जराणामभूतपूर्वा पलितस्य शङ्का ॥

आसीत्ततो नम्रनरेन्द्रमौलिरत्नप्रभापाटलपादपीठः ।
अखर्वगर्वप्रतिपक्षिसार्थदोर्दर्पमर्दी **परमर्दिदेवः** ॥

परस्परविरोधस्य तस्य राज्ये कथैव का ।
संगतं श्रीसरस्वत्योरपि येन प्रवर्तितम् ॥
प्रचलति ककुभां जयाय यस्मि-
न्हरिखुरधूतधरापरागपुञ्जः ।
कवलितरविरश्मितीव्रतापा-
दिव पिबति स्म पयांसि तोयराशेः ॥
यत्प्रतापदहने निरङ्कुशं संचरत्यपि सपत्नसद्मसु ।
उद्बभूवुरधिकं हरिन्मणिश्यामकोमलतृणानि सर्वतः ॥
अथास्ति लोकत्रितयप्रतीतं वसिष्ठगोत्रं सुकृतैकपात्रम् ।
यस्मिन्नजायन्त विशुद्धवृत्ता विप्राः पयोधाविव मौक्तिकौघाः ॥
तेषु क्रमादखिलशास्त्रसरोविहारि-
हंसोऽवतंसितशिवापतिपादपद्मः ।
लक्ष्मीधरः स्फुरितभास्वदशीतरश्मि-
सब्रह्मचारिगुणमौक्तिकसिन्धुरासीत् ॥
यदध्वरोल्लासिहुताशधूमलेखाः स्फुटानेकविभङ्गिभाजः ।
दिगङ्गनापीनपयोधरेषु विलासवेणिश्रियमाश्रयन्त ॥
अलभत जनिमस्मात्सच्चरित्रैकपात्रं
विनयसदनमेक **वत्सराजो** द्विजेन्द्रः ।
जलधिरिव गभीरः शैलवद्धैर्यसारो
मुररिपुरिव लक्ष्मीसंश्रयो यो बभूव ॥
निर्मलगुणगणवतश्च मित्रोदयमोदिनोऽम्बुजस्येव ।
शुक्लद्विजपरिभोग्या बभूव यस्यामला लक्ष्मीः ॥
आसीदशेषश्रुतिसिन्धुहंसस्तस्यात्मजो **लाहडनामधेयः** ।
पुपोष यो निर्मलवाग्विलासं रेमे च यः सज्जनमानसेषु ॥
मन्त्रिणां धुरि कलोज्ज्वलकायं यं चकार **मदनक्षितिपालः** ।
विष्टपत्रितयमेव जिगीषुः पञ्चबाण इव शीतमयूखम् ॥

कुटुम्बकुमुदप्रौढप्रमोदने पटीयसी।
तस्यासीद्द्विजराजस्य **प्रभा** हृदयवल्लभा॥
ततो बभूव द्विजराट्समक्षः **सल्लक्षण**श्चारुचरित्रपात्रम्।
अभूत्त्रिनेत्रः **परमर्दिदेवः** क्षोणीश्वरो येन विनिर्मलेन॥
राज्य····रमशेषमेव भुजयोर्विन्यस्य यस्य स्वयं
वीरश्री**परमर्दि**भूपरिवृढः प्रौढप्रमोदोदयः।
त्रस्यद्बालकुरङ्गशावकदृशामुद्दामकामस्पृशा
पत्रन्यासकलाविलासरसिकस्वान्तोऽभवत्संततम्॥
लक्ष्मीकेलिनिकेतनस्य भजतो मित्रोदयस्मेरतां
दूराधःकृतकण्टकस्य गुणिनो लोकैकतापच्छिदः।
अम्भोजस्य च तस्य च त्रिभुवने साधर्म्यमत्युज्ज्वलं
वैधर्म्ये तु पराङ्मुखः स न कदाप्यासीद्द्विजाधीश्वरे॥
प्रासादो वैष्णवस्तेन निर्मितोऽन्तर्वहन्हरिम्।
मूर्ध्ना स्पृशति यो नित्यं पद्मस्यैव मध्यमम्॥
अकारयच्च स्फटिकावदातमसाविदं मन्दिरमिन्दुमौलेः।
न जातु यस्मिन्निवसन्स देवः कैलासवासाय चकार चेतः॥
पीताम्बरं यस्य यशो बभूव सुदर्शनं यस्य वपुर्विजज्ञे।
गुणोत्करो यस्य च नन्दकोऽभूदासीत्स तस्मात्पुरुषोत्तमाख्यः॥
त्रिभुवनमहनीयवृत्तवृद्धं शिशुमपि यं **परमर्दि**पार्थिवेन्द्रः।
अनयत सचिवेषु मुख्यभावं जगति गुणा हि पुमांसमर्घयन्ति॥
अनेनाचारशुचिना ब्रह्मलोके विहारिणः।
कीर्तनं जनकस्येदमसिद्धं सिद्धिमापितम्॥
गौडान्वयैकतिलकस्य **गदाधरा**ख्यो
लक्ष्मीधरस्य तनयः कविचक्रवर्ती।
विद्यावता स परमः **परमर्दि**देव-
संधानविग्रहमहासचिवो बभूव॥

तस्यात्मजो **देवधरः** कवीन्द्रः प्रशस्तिमेतामतुलां चकार ।
अस्यानुजो **धर्मधरश्च** धीरः कुतूहलाद्वालकविर्लिलेख ॥
उच्चकार चमत्कारकारकः सर्वशिल्पिनाम् ।
....धीरो महाराजः सोमराजाङ्गभूरिमाम् ॥
शंभुश्च विष्णुश्च बिभर्ति यावज्जटाकलापं च भुजान्तरं च ।
पाथोधिजं धाम च कौस्तुभं च स्थिरास्तु कीर्तिश्च कृतिश्च तावत् ॥
पक्षत्र्यक्षमुखादित्य(१२९२)संख्ये विक्रमवत्सरे ।
आश्विनशुक्लपञ्चम्यां वासरे वासरेशितुः ॥

श्रीरस्तु ।

(एपिग्राफिआ इण्डिका–२०८-२११ पृष्ठे)

---

(१०२)

कान्यकुब्जाधीशमहेन्द्रपालराज्यसमकालिक-[१] मन्दिरत्रयप्रशस्तिः[२] ।

ओं नमो माधवाय ।

याते यामवतीपतौ शि[खरिषु क्षामे]षु सर्वात्मना
ध्वस्ते ध्वान्तरिपौ जने विघटिते स्रस्ते च तारागणे ।
भ्रष्टे भूवलये गतेषु च तथा रत्नाकरेष्वेकता-
मेको यः स्वपिति प्रधानपुरुषः पायात्स वः शार्ङ्गभृत् ॥

---

१. अस्यां प्रशस्तौ यदि समयोल्लेखो न कृतस्तथापि 'स श्रीमाञ्जयति महेन्द्रपालदेव.' इत्युक्तेर्महेन्द्रपालराज्यनिर्माणकत्वं प्रतीयते महेन्द्रपालसमयस्तु 'परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीभोजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमहेन्द्रपालदेवपादाना महीप्रवर्धमानकल्याणविजयराज्ये संवत्सरशतेषु नवसु षष्ट्यधिकेषु चतुरन्वितेषु' इति (एपिग्राफिआ-इण्डिका-पुस्तके १७३ पृष्ठमुद्रितलेखे स्फुट एव. २. प्रशस्तिरियं पाषाणलिखिता लवपुर(लाहोर)नगरीयप्रदर्शिन्या वर्तत इति व्याख्यानावसरे Dr. G. Buhler Ph. D., L L. D, C. I. E. महाशयाः.

दृष्टिः [पायात्रिजग]दखिलं शार्ङ्गिणः कान्तमूर्तेः
कान्तासभ्रूस्फुरितसुभगस्निग्धताराभिरामा ।
उद्यत्तीव्रस्मरजलनिधौ मज्जतः श्रीमुखेन्दु-
स्फारज्योत्स्ना[भव]····[रुच]ः स्मेरगण्डस्थलस्य ॥
क्षेत्रं कुरो[र्विविधपापम]लाभिघात-
दक्षं क्रियादुदयमस्तसमस्ततापम् ।
अध्यासितं मुनिगणैरुदितात्मबोध-
प्रध्वस्तगाढतिमिरप्रकटप्रमोदैः ॥
पोतः [संसारसि]न्धौ सुरपथगमने स्यन्दनः साधु[वर्ग]-
·················तवह्नेः प्रलयजलधरः संपतत्सान्द्रधारः ।
नानाव्याधिप्रबन्धप्रचुरतरतमःपङ्कविध्वंसभानु-
र्नीरं चैतत्समन्ताद्दचतु दुरित[गणं चारु] सारस्वतं वः ॥
यः शक्तः स्वकुल[मनुग्रहीतु]मृच्छा भिन्दानः परबलमानसं समन्तात् ।
स श्रीमाञ्जयति **महेन्द्रपालदेवः** शान्तारिः शशधरसुन्दरः शरण्यः ॥
आसीत्तोमरतुङ्गवंशति[लकश्चण्डप्र]तापोज्ज्वलो
राजा रञ्जितसाधुवृत्त[हृदयो दु]र्वृत्तशैलाशनिः ।
नाम्ना **जाउल** इत्यपूर्वचरितख्यातो दयालंकृति-
स्तत्त्वालोकिविलोकितक्षितिपतिव्यापारलब्धोदयः ॥
येन ज्ञातिकुलं क············[नी]तं परा संपदं
छिन्नारातिकरीन्द्रकुम्भशकलैः कृत्वोपहार भुवः ।
कीर्त्या यस्य च नाकनागनिकरव्यासङ्गतः संगमा-
द्व्योम्नश्च स्फुरदिन्दुसुन्दररुचा स्वःसिन्धुलीलायितम् ॥
प्रतिदिश[ममरा]णा मन्दिराण्युच्छ्रिताग्र-
स्थगितशशधराणि स्फारमारोपितानि ।
जगति विततभासा येन दूरं विभान्ति
स्वयश इव निरोद्धुं शङ्कवो दिङ्निखाताः ॥

तत्संतानमहोदधेः प्रमुदितप्रोद्यद्भुजङ्गाश्रया-
द्दुर्लङ्घाद्धनमौक्तिकांशुनिकरस्फारीभवत्संपदः ।
प्रख्यातादजनि स्ववंशतिलकः श्रीवज्रटाख्यः प्रभुः
प्राप्ताशेषमनोरथः शुभतरव्यापारतुङ्गोन्नतिः ॥

तस्य स्फुरदिन्दुरुचिः शौरेरिव जलधिकन्यका जाता ।
नाम्ना **मङ्गलदेवी** जाया गिरिजेव गिरिशस्य ॥

तस्मात्तस्यां **जज्जुकः** प्रादुरासीदुच्चैः शान्तः सत्सु निर्मत्सरेषु ।
क्रूरः केतुर्दुर्धरारातिचक्रे क्रुध्यत्सेनाकुञ्जरध्वानरौद्रे ॥

तस्य स्फुरन्निशितखड्गनिकृत्तशत्रो-
स्त्रस्तान्धदीननिकरोद्धरणोरुकीर्तेः ।
सद्वृत्तरक्तवनितातिलकाङ्ककल्पे
कान्ते बभूवतुरुदारशशाङ्ककान्ते ॥

एका **चन्द्रे**ति विख्याता द्वितीया **नायिके**ति च ।
विशिष्टगुणनिर्माणाद्वे(द्वे) एव सदनं श्रियः ॥

चन्द्रायाः समजनि **गोग्ग**नामधेयो धीराणां धुरि विनिवेशितो विधात्रा ।
भूनाथो द्विषदिभकुम्भभेदनिर्यन्मुक्ताभि[र्महितमहीतल]: शितासिः ॥

अ[सू]त [च वि]चक्षणं क्षतविपक्षपक्षप्रभं
प्रभाकरकरोत्करं स्वबलसैनिकाम्भोरुहाम् ।
अधर्मपरिपन्थिनं तदनु **पूर्णराजं** सुतं
स्ववंशगगनोदरे तुहिन[दीधिति **नायि**]**का** ॥

करत[ल]स्थगिताधरपल्लवाः प्रतनुकान्तिकपोलतलोदरम् ।
सिषिचुरश्रुजलैर्यदरिस्त्रियः सरलितप्रचुरालकजालकाः ॥

तस्य भ्राता गुणनिधिरभूत्सोदरो **देवराजः**
स्फूर्जत्तेजःप्रविहतपरस्फारसेनान्धकारः ।
स्थानं क्षान्तेः क्षतकलिमलः क्षिप्तरागादिदोषः
स्निग्धच्छायस्तरुरिव ततः सत्फलानम्रमूर्तिः ॥

नामापि प्रकटतरं निशम्य यस्य क्रुद्धस्य भ्रुकुटितरङ्गितानन्स्य।
दृप्तानां युधि विकसद्विगाढभासां सस्रंसे करतलतः कृपाणदण्डः॥

यद्दास्यसरसीरुहं सरसमर्थिनां पश्यतां
नितान्तमगमत्क्षणात्क्षयमुपद्रवो मानसः।
व्यघूर्णत च संभ्रमात्प्रतिभटध्वनद्दन्तिनां
घटा विघटनोन्मुखी समिति यस्य सद्यः पुरः॥

इत्युद्दामप्रकटितगुणोद्गाररम्याः क्रमेण
प्राप्तश्रीकाः शुभतरधियः साधुरक्तास्त्रयोऽपि।
विष्णोः सौधान्यतुलमहसः कारयामासुरत्र
त्रस्तास्ती[व्राद्भवजल]निधेर्दुर्गमान्मन्दबोधैः॥

गोग्गेन कारितं मध्ये **पूर्णराजेन** पृष्ठतः।
पुरतो **देवराजेन** घनान्धतमसश्छिदे॥

चतुःसमुद्रसीमाङ्कं यावदेतन्महीतलम्।
इदमायतनं तावद्विभातु सदनं श्रियः॥

धन्वन्तरि[प्र]तिनिधिः श्रुतसारमूर्तिः
सद्बन्धुर**च्युत** इति प्रकटाभिधानः।
काम्बोजजः प्रभुमनःकमलद्विरेफो
रामस्य सूनुरिह कारयिता बभूव॥

यक्षपालकनामैको द्वितीयो **गेज्जरा**भिधः।
पाटला[ख्य]स्तृती[योऽपि ग्रा]मो भोगाय कल्पितः॥

अत्रार्यैः क्ष्मानाथैः श्रेयोर्थं देहस्य।
ससारं दृष्ट्वोच्चैः कर्तव्या सद्बुद्धिः॥

स्वकुलगगनभानु.···· ······रप्रसक्तः
श्रुतविनयविदग्धो भट्टरामः किलासीत्।
प्रकृत मधुर[बन्धां मु]······ ····सास्य सूनुः
सरसललितसारां लीलयेमां प्रशस्तिम्॥

बभूव सूत्रधारोऽत्र दुर्लभादित्यसंज्ञितः।
.....................ल्लादित्येन धीमता॥

(एपिग्राफिआ इण्डिका—२४४-२४८ पृष्टे.)

---

(१०३)

बिल्हारी-खेडी-शिलालेखः।[1]

ओं नमः शिवाय।

पायाद्वः स समस्तमङ्गलनिधिः शंभोर्जटाजूटको
यस्मिँल्लोललसद्द्युमण्डलगलन्मन्दाकिनीवारिभिः।
गाढग्रन्थिनिपीडितोरगपतिप्रस्फारफुल्लत्फणा-
भीमव्यावृतवक्त्रमारुतधृतैः श्वेतातपत्रायितम्॥

अपि च।

अव्याद्वश्चन्द्रचूडस्य लोचनार्चिष्मतः शिखा।
मित्रमेष स्मरस्येति दग्धुं विधुमिवोद्गता॥

यं खेलाय षडाननः शिशुतया कृत्वाग्रहं मार्गति
ग्रन्थो यश्च दुरोदरैः पुरभिदो देव्या समं दीव्यतः।
केलीकोपकथासु येन तनुते हेतिक्रियां पार्वती
पायाद्वः स जटावतैककुसुमं शार्वः सुधादीधितिः॥

दिक्षु प्रेङ्खाभियोगप्रवलितवलनाविभ्रमाकाण्डचण्डै-
र्दोर्दण्डानां प्रकामप्रथिमभिरनिलैर्दूरमुत्सारितासु।
किंच प्रस्फारचारीनमदवनिवशाद्योम्नि याते महत्ता-
मव्यादव्याहतेच्छं त्रिपुरविजयिनस्ताण्डवाडम्बरं वः॥

वंशेऽत्र सोमसंभूतौ वाचं विक्षिपता मया।
हन्त हस्तैरुपक्रान्ता मोहेन वियतो मितिः॥

---

१. 'अय ग्रामो जबलपुरप्रान्त आसीत्' इति, 'अधुना चेयं शिला नागपुरप्रदर्शिन्या-मस्ति' इति, 'इय प्रशस्तिश्च दशैकादशखिस्ताब्दशतके निर्मिता भवेत्' इति च Dr. F. Kielhorn, Ph. D., C. I. E., महाशयाः.

वाचामुज्ज्वलिमापि नास्ति यदि मे तत्कीर्णमानोन्नते-
रस्मादेव महीयसः शशभृतो वंशात्स संपत्स्यते ।
यद्वा पश्य निसर्गकालिमभुवोऽप्याशेभदानच्छटाः
क्षीरोदन्वति किं न सगतिभृतस्तच्छायतां बिभ्रति ॥

नेत्रादत्रेर्वैरित्रीधवलनसुहृदां धाम धाम्नामुदञ्च-
ल्लोकालोकं यदापि प्रभवमतलिनध्वान्तविध्वंसहेतुः ।
सोऽयं सोमाभिधानस्तिलकयति कला मौलिमस्यैव शंभो-
रस्मादेव प्रवृत्तः किमपरमयमप्यन्वयो हैहयानाम् ॥

अस्मिंश्च वन्द्यतमतां गमिते बुधाद्यै-
राद्यैर्नृपैर्नृपतिरर्जुन इत्युदारः ।
आसीद्विषद्विपिनकर्तनकीर्तनीय-
कीर्तिच्छटाच्छुरितदीर्घदिगन्तरालः ॥

यद्वक्षस्तटताडनातितरलत्रुट्यत्पविप्रोच्छल-
ज्ज्वालामालिकरालितेन करिणा देवाधिपः क्वाप्यगात् ।
लीलोल्लालितशर्वपर्वतपतेस्तस्यापि लङ्कापते-
र्यद्वैरव्यवसायिनो यदभवत्ख्यातिप्रमाणं हि तत् ॥

दत्तात्रेय इति प्रकाममकमलालीलायितानां पदं
यो देवः स सुतप्रतिश्रुतिवचःप्रीत्या यमन्वग्रहीत् ।
के वा तद्गुणवर्णने वयमहो किं फल्गुभिर्जल्पितै-
र्मन्ये सापि च वाग्वपुर्भगवती तत्र स्फुटं मुह्यति ॥

अथ ततस्ततसत्पुरुषव्रतव्रततिपर्वततः कति नाभवन् ।
तरुणतारकराजपराजयव्यसनकीर्तिभुवः पतयो भुवः ॥

तेष्वेवं संभवत्सु क्रममनु मनुजाश्चर्यतामादधानो
धन्यानामेकसीमा समुपनतमहीमण्डलाखण्डलाभः ।
जातः कोकल्लदेवो दलदलितलतादाहदावायमानो
मानोत्तंसस्य यस्य त्रिभुवनवलयव्यापनोऽभूत्प्रतापः ॥

भुवनविजयहेतोर्मुक्तमर्यादयादः-
सदनलडितलोलैर्यद्बलैः संवलद्भिः।
अतलिनतरभारभ्रश्यदुर्वीविषीद-
त्फणफलककलापो भोगिभर्ता बभूव॥

श्यामाशङ्किभिराकुलैर्विजघटे चक्राह्वयानां द्वयै-
रम्भोदागमविभ्रमेण विदधे लास्योत्सवः केकिभिः।
भग्नालोकमकाण्ड एव च दृशामान्ध्येन लेभे पदं
यत्सेनारजसि क्रमादवनितस्तारापथे लुप्यति॥

वेलावनप्रणयिसैन्यभरे च यत्र
मज्जद्भिराकुलकुलाद्रिनिभैरिभेन्द्रैः।
संभ्रान्तमन्दरगिरेः समयस्य तस्य
कालाद्बहोः स्मरणमाप निधिर्जलानाम्॥

[यस्मि]श्च वैन्ध्यं तटमाददाने दानेद्धसेनागजमज्जनेन।
अमञ्जुशिञ्जानशकुन्तचक्रं चक्रन्द दुःखादिव वृक्षजालम्॥

जित्वा कृत्स्नां येन पृथ्वीमपूर्व
कीर्तिस्तम्भद्वन्द्वमारोप्यते स्म।
कौम्भोद्भव्यां दिश्यसौ कृष्णराजः
कौबेर्यां च श्रीनिधिर्भोजदेवः॥

बभूव तस्मादथ मुग्धतुङ्गस्तुङ्गस्त्रिलोक्यामपरो न यस्मात्।
दिशश्च यः किच विजेतुकामः कामस्तशत्रुर्न भुवं विलेभे॥

शय्या संग्रामलक्ष्म्याः परबलपरिघः पल्लवः कोपवल्ल्याः
प्रेयो दर्पस्य मित्रं सुचरितसलिलस्येन्द्रनीलप्रणालः।
शाखा शौर्यद्रुमस्य प्रसरणसरणिः शाश्वती साहसाना-
मासीद्यस्यासिरेव प्रधनपरिकरारम्भिणः प्रीतिपात्रम्॥

वल्गद्वेतालवर्गं त्रुटितनिजशिरोधारिधावत्कबन्धं
डात्कुर्वड्डाकिडिम्बं मुखबिलविलसत्संमुखोल्कामुखोल्कम्।

ग्रासाभिलाषस्वनदशिवशिवाभैरवारावरौद्रं
रौद्रं यो धाम बिभ्रत्प्रतिसमरमिति द्वेषिचक्रं चकार ॥

नभुवो निधेर्जलानामपि वसता कटकेन यस्य यातुः।
विचलद्वधूकराग्रद्विगुणितविद्रुमपल्लवा बभूवुः ॥

इह विहितविलासा वीचयो वारिराशे-
रिह स वहति वायुः केरलीकेलिकारः।
इह हरति भुजङ्गः सौरभं भूरुहाणा-
मिति मलयसमीपे यद्विचाराः प्रचेरुः ॥

य पूर्वाम्बुधिकूलपालीः पालीः समादाय च कोसलेन्द्रात्।
रोद्वासितवैरिधामा धामाधिकः खड्गपतिर्य आसीत् ॥

डीगाडमनोमनोरथकरः कर्णाटकान्ताकुच-
क्रीडाशैलतटीविहारहरिणो लाटीललाटाङ्गदः।
श्मीरीविहितस्मरव्यतिकरस्तस्मात्कलिङ्गाङ्गना-
सद्गानव्यसनी स नीतिनयनः केयूरवर्षोऽभवत् ॥

गाशापालपराजयाय जनितत्रैलोक्यशङ्कापदं
सैन्यैर्यस्य युगान्तकेलिकलनैर्दत्तप्रयाणैरपि।
। प्रोद्भूतिमवाप पांशुपटलं भूयोगृहीतद्विष-
द्वन्दीवृन्दवहद्विलोचनपयःपूरप्लुतायां भुवि ॥

यः संयति प्रकटपाटितकुम्भिकुम्भ-
मुक्ताफलप्रचयवाहमुवाह देवः।
भूयोनिपीतदृढपीडनवेगवान्त-
विद्वेषिकीर्तिकणकीर्णमिवासिदण्डम् ॥

आ कैलासादनलसलसत्पार्वतीकेलिबन्धो-
रा च प्राचः शिखरिवरतो भास्वदुद्भासभूमेः।
आरात्सेतोस्तदनु पयसामा प्रतीचोऽपि पत्यु-
र्यत्सेनानामहितनिहितानन्ततापः प्रतापः ॥

प्रेङ्खत्क्षिप्रखु(क्षु)[र]प्रघातविगलत्कीलालल्लोलोल्लस-
　द्वेतालीकरयन्त्रपीडनवशभ्रश्यत्कपालास्थिभिः ।
यस्तस्तार सविस्तरं रणभुवः कोपोत्कटाभिद्रव-
　द्भूप्रद्वेषिशिरोभिरम्बरचरीनेत्रत्रिभागार्चितैः ॥
देवो रुद्रावतारस्त्रिभुवनभवनोत्तम्भनो देव एव
　त्यागी देवः प्रमाद्यन्नृपतिनियमने नैगडं दाम देवः ।
इत्थं मद्बन्दिवृन्दैरविरलविलसच्चाटुवादं वदद्भि-
　र्यस्यास्थानस्थितानामसमसुहृदां विव्यथे चित्तवृत्तिः ॥
　भरद्वाजो नाम च्युतकलुषदोषः समभव-
　　द्य एकः सर्वेषामुपशमधनानामधिपतिः ।
　तदीयात्तेजस्तः कृतकलशवासाद्यदभव-
　　त्स वै **भारद्वाज**स्त्रिभुवनचमत्कारिचरितः ॥
त्रैलोक्यावधि यस्य कीर्तिलडितं लक्ष्मीश्च वाञ्छावधि-
　र्यत्कोपः प्रलयोपपन्नमहिमा शापेन चापेन च ।
वर्ण्यं वा नयविक्रमैकजलधेः किं तस्य यस्याभव-
　ल्लीलाखर्वितशर्वगर्वगरिमा शिष्यः **सुभद्रापतिः** ॥
　कोदण्डताण्डवनपण्डितबाहुदण्ड-
　　मुद्दण्डकाण्डभरखण्डितपाण्डुसैन्यम् ।
　यं वीक्ष्य विक्षतविपक्षपराजयाशः
　　सत्यादृतः स तपसोऽपि सुतश्चचाल ॥
　अथाक्षेपात्तेन द्रुपदविपदर्थोद्धतधिया
　　यदात्तं शापाम्भस्तरलितकराबद्धचुलुकम् ।
　पुमानासीत्तस्मिन्विजय इव साक्षादनु च तं
　　कुलं चौलुक्यानामनणुगुणसीम प्रववृते ॥
　विभवति च विसर्पच्छौर्यसौन्दर्यवर्य-
　　क्षितिधरपरिपाटीसूत्रिते तत्र गोत्रे ।

रचितचटुलचापाकृष्टिकृष्टाहितश्री-
रभवदवनिवर्मा विश्वविख्यातकर्मा ॥
पितामहो यत्खलु सिंहवर्मा पिता च यद्वीरवरः सधन्वः।
जगत्यतीवातिशयोऽमुनैव महानुभावत्वमतोऽपि यत्तु ॥
यस्य त्यागः सकलजनतापास्तदारिद्र्यमुद्रो
वेलाबन्धुक्षितिधरदरी चारितारिः प्रतापः।
ईष्टे स्पष्टं स यदि गणनां तद्गुणानां विधातुं
वाचां धेनुर्ननु भगवती भारती यस्य वश्या ॥
रुद्राणीमिव भूभृतां परिवृढो लक्ष्मीमिवाम्भोनिधिः
कालिन्दीमिव भास्करः स भगवाञ्ज्योत्स्नामिवात्रेः सुतः।
वैदेहीमिव जानकः क्रतुविधिः श्रीनोहलेत्यद्भुतं
कन्यां नाम ललाम तां स सुषुवे सामन्तचिन्तामणिः ॥
भर्तुः पुलोमतनयेव मरुद्गणानां
छायेव दृष्टतमसां महसां च पत्युः।
देवस्य सा रतिरिवेक्षुशरासनस्य
केयूरवर्षनृपतेर्दयिता बभूव ॥
देव्या तया मदजलच्छटयेव दन्ती
बालप्रवाललतयेव तटः पयोधेः।
पुष्पश्रियेव च तरुस्तडितेव मेघः
शोभां स कामपि बभार नरेन्द्रचन्द्रः ॥
निर्मापितं सुकृतसंगतये तयेद-
मभ्रंकषाग्रशिखरस्खलितोष्णरश्मि।
देवस्य मन्दिरमुमाप्रणयैकबन्धोः
स्त्यानाकृति स्वयशसामिव चक्रवालम् ॥
आकाशयानक्रमखेदितानामह्नोऽधिनाथस्य तुरंगमाणाम्।
फेनाम्बुभिर्नित्यनिषिच्यमाना मन्ये समुद्भान्ति न यत्पताकाः ॥

विटङ्कभागेषु बृहत्सु यस्य वर्षासु तुङ्गामलसारकस्य ।
आश्लेषवत्यो नवमेघमालाः पारावतालीतुलनां वहन्ति ॥
आसीन्माधुमतेयः **पवनशिव**स्तमनु जयति **शब्दशिवः** ।
ईश्वरशिवः पुनाति च तस्यान्तेवासितां सुकृती ॥
तस्मै तपोनिधानाय निपानीयाम्बिपाटकौ ।
दत्तौ विद्याधनत्वेन ग्रामवग्राम्यया तया ॥
धङ्गटपाटकपोण्डीनागबलाः खेटपाटको वीडा ।
सज्जाहली च दत्ताः स्मरारये गोष्ठपाली च ॥
ख्यातः **श्रीयुवराजदेवनृपते**(ति)स्तस्यामभूद्भूपतिः
श्रीम**ल्लक्ष्मणराज** ऊर्जितमहा भास्वानिवाभ्युन्नतः ।
भूभृत्तुङ्गशिरोभिरङ्घ्रिरुचयो यत्सेविताः श्री[चिताः]
कामं यः कमनीयसुन्दरगुणैर्नव्यैर्जिगाय श्रियम् ॥
यस्याहवे दृढनिपीडितखड्गकोटि-
निर्हारितारिकरिकुम्भसमुद्भवेन ।
वीरश्रियः क्षितितले विततं चतुष्कं
मुक्तादलेन ननु कीर्तिवधूश्चकार ॥

किं च—

सा कदम्बगुहा मान्या यत्रासीत्सिद्धसंततिः ।
तस्याः पुनरभूद्वन्द्यो **रुद्रशंभु**र्मुनीश्वरः ॥
तत्र प्रभावमहनीयतमस्य तस्य
शिष्योऽभवज्जगति **मत्तमयूरनाथः** ।
निःशेषकल्मषमषीमपहृत्य येन
संग्रामितं पुरमहो नृपतेर**वन्तेः** ॥
तस्मादभूद्भुवनमण्डनतामवाप्तो
भूपालमौलिमणिकान्तिभिरर्चितांह्रिः ।
श्रीधर्मसिन्धुरुचितामलकान्तकीर्तिः
शैवागमाम्बुनिधिपारमितस्तपोभिः ॥

अस्मात्सदाशिवः शिष्यस्तपोराशिरभून्नृपैः ।
यत्पा(स्य पा)दद्वयं वन्द्यमर्चितं शेखराम्बुभिः ॥
अस्मादभून्माधुमतेयनामा शिष्यः सुधामा फलमूलवृत्तिः ।
तपांसि तेजांसि च यत्र वासमनन्यसंक्रान्तिगुणेन चक्रुः ॥
अस्माच्चूडाशिवः शिष्यो वन्दनीयतमोऽभवत् ।
कर्मजालमलं येन नीतमस्तं मुमुक्षुणा ॥
अथ सकलगुणानामाकरस्तस्य शिष्यो
हृदयशिवसमाह्वो यद्यशोऽद्यापि वर्ण्यम् ।
नृपमुकुटनिविष्टैर्यस्य माणिक्यचक्रै-
रकृत चरणमूलं कान्तमेकान्तवन्द्यम् ॥
विद्यानां निलयेन येन सुधिया सत्यव्रतेनाधिक
श्रीमन्माधुमतेयवंशवितता कीर्तिश्चिरं वर्धिता ।
किं च क्ष्मा क्षमयाम्बुदः समतया मर्यादयाम्भोनिधि-
र्वैराग्येण जितः स्मरः स भगवान्कस्यास्पदं न स्तुतेः ॥
किं स्तूयतेऽसौ मुनिपुङ्गवोऽथवा श्रीचेदिचन्द्रो नृपतिः कृतादरः ।
सद्वृत्तदूतप्रहितैरुपायनैः प्रदर्श्य भक्तिं विधिनानिनाय यम् ॥
श्रीमल्लक्ष्मणराजोऽपि तस्मै सुतपसे स्वयम् ।
मठं श्रीवैद्यनाथस्य भक्तियुक्तः समार्पयत् ॥
स्वीकृत्यापि मुनिर्भूयो मठं श्रीनौहलेश्वरम् ।
अघोरशिवशिष्यस्य साधुवृत्तस्य दत्तवान् ॥
अथ स विहितकृत्यश्चेदिनाथः समर्थः
करितुरगसमग्रः शक्तसामन्तपङ्क्तिः ।
दिशमतिशयरम्यां संप्रतस्थे प्रतीची-
महितजनितभीतिर्दुर्निवारप्रचारः ॥
समरकृतविकारान्विक्रमेण प्रहृत्य
प्रणतनृपतिदत्तोपायनैर्वर्द्धिताङ्गः ।

हृदयनिहितवित्तैरर्थिनां पूरिताशो
　　जलनिधिजलखेलं सैन्यचक्रं चकार ॥
निमज्ज्य यो रत्ननिधौ श्रीमान्सोमेश्वरं शनैः ।
अभ्यर्च्य काञ्चनैः पद्मैरथान्यत्तु न्यवेदयत् ॥
जित्वा कोसलनाथमोड्रनृपतेराप्तस्तु यः कालियो
　रत्नस्वर्णमयः स येन विहितः सोमेश्वराभ्यर्चनम् ।
दत्त्वा यः करिवाजिशुभ्रवसनस्रक्चन्दनादीन्पुनः
　संसारश्रमशान्तयेऽतिविनतस्तुष्टाव तुष्टः प्रभुः ॥
असारं संसारं य इह मनुते कोऽपि नृपति-
　स्त्वदङ्घ्रिध्यानत्या विगलिततमास्तत्त्वनिरतः ।
न तस्य श्रीर्भूयो विकृतिकृतये जन्मविरहा-
　दिति ध्यानाविष्टः शिवमहसि चित्तं विहितवान् ॥
　श्रीशंकरगणस्तस्मादभूद्भूमीश्वरो महान् ।
　यत्पादद्वन्द्वमद्वन्द्वं द्विषद्भिरपि सेवितम् ॥
सख्ये संख्यविपक्षपक्षदलनव्यासङ्गि खड्गव्रतं
　यस्यासीद्दृढसाहसस्य सततं दानं जनानन्दकृत् ।
रूपेणाप्रतिमो मनोभवभवं दर्पं जहारोद्धतं
　यः सर्वत्र च सर्वकालमवनीनाथः स्तुतः कोविदैः ॥
यत्पादद्वयपद्मसद्म विततं भूतेरभूद्भूषितं
　भूपानां नमतां किरीटविकटप्रान्तस्थरत्नांशुभिः ।
वक्षोरत्ननिधिं समाश्रितवती लक्ष्मीः क्रमेणागता
　वीरश्रीरपरैव यस्य नृपतेः कौक्षेयधाराश्रया ॥
तस्य श्रीयुवराजदेवनृपतिर्भ्राता कनीयानभू-
　द्भूपैर्यच्चरणारविन्दपतितैर्भृङ्गैरिवा····स्थितम् ।
यः सत्यव्रतसत्त्वसूक्तिवसतिः श्रीविक्रमैकाश्रयः
　प्रायस्तस्य न सज्जनोऽपि सकलान्वक्तुं गुणाञ्शक्ष्यति ॥

दंष्ट्राकोटिविपाटनोग्रवदनः क्रूरस्वरो भास्वरो
नेत्रप्रान्तविकीर्णकोपरुधिरः पादप्रचारायुधः।
येनाक्रम्य भुजेन भूमिपतिना लाङ्गूलबद्धक्रमो
दैत्यो व्याघ्रवपुर्हतोऽतिभयदः शस्त्रीभृता पाणिना॥
कन्दर्पोऽभिनवः पुरंध्रिनयनप्रीतिप्रदोऽप्यन्यथा
यः कालः करवालकोटिविहितस्थूलेभकुम्भस्थलः।
चित्रं यच्च सरस्वतीकृतरतिः श्रीकण्ठपूजापर-
श्चातुर्वर्ण्यविचारचारुचतुरो यश्चार्थचिन्तामणिः॥
यस्योत्तुङ्गगजेन्द्रमज्जनगलद्दानाम्बुभिर्मिश्रितं
रेवावारि विविक्ततिक्तमुचितस्नानेन तन्वीजनः।
संप्राप्योरुनितम्बताडनवशव्यस्तास्तवीचीचयं
सद्वन्द्वं स्मरसौरभेण महता निर्व्याजमायोजितः॥
रामाणां कुचमण्डलेषु नियतं हारप्रकारक्रमा-
त्संपूर्णे शशिमण्डले च विमले ज्योत्स्नाछलेनोज्ज्वलम्।
मन्ये मानसवारि यस्य वितते हंसावलीविभ्रमा-
द्भ्रान्त्वाशेषमुमापतेस्तु वसतो विश्रान्तिमागाद्यशः॥
संपूज्य देवमीशानं विभवैः स्वैर्यथोचितैः।
यथागमं यथाशास्त्रं स्तोत्रं विहितवान्नृपः॥
अविचलितमनोभिर्यैस्त्वमीश क्षितीशै-
र्विभवविहितकृत्यैरिज्यसे ते कृतार्थाः।
य इह कृतविकारा मन्मथैकान्तचित्ता
भवति वरद तेषां संपदुन्माद्हेतुः॥
समदकरिघटाभिः किं किमङ्गाङ्गनाभि-
र्मदनशयनलीलां भावयन्तीभिराभिः।
कनकतुरगवासोरत्नजातैर्न कृत्यं
न हि भवति [1]भवानीवल्लभस्यार्चनं चेत्॥

---

१ इद च पद विरुद्धमतिकारित्वदोषदुष्टमिति ध्येयम्

भवति नृपतिवंशे जन्म पृथ्वी च भोग्या
　श्रुतमुचितविचारश्चारुरूपप्रभावः ।
समरविजयसंपत्तस्य[1] यो निष्प्रपञ्च-
　श्वरणयुगलमूलं संश्रितः शंकरस्य ॥
किमिह बहुभिरुक्तैर्नाथ सर्वस्य हेतु-
　र्भवतु भवति नित्यं भक्तियोगी ममैकः ।
सकलसुखविशेषाद्यस्य पीयूषवर्षः
　स्वयमनुभवगम्यो जायते त्वत्प्रसादात् ॥
भूपत्रययशोराशिवर्णनं प्रथम कृतम् ।
श्रीमता **श्रीनिवासेन श्रीस्थिरानन्द**सूनुना ॥
भूपतीनां त्रयाणा तु कीर्तिकीर्तनमुज्ज्वलम् ।
विहितं सज्जनेनाथ सुधिया **धीर**सूनुना ॥
[2]लवणखण्डिकायां (?) षोडशिका घाणके च षोडशिका ।
तैलस्य मासि मासे दिनमनु च युगायुगे च पौरस्तु ॥
पूगफलमरिचशुण्ठीप्रभृतिषु भाण्डेषु भरिकपौरस्तु ।
वीथी प्रति च कपर्दी द्यूतकपर्दास्तु शाकवार्ताकम् ॥
रसवणिजामादायस्तृणपूलकधीर्मरादि यत्किंचित् ।
दत्ते करी चतुष्टयभङ्ग तुरङ्गो द्वयं तु पौराणाम् ॥
यद्वहदन्यद्दानं किमपि च विद्याधनं तदुद्दिष्टम् ।
य·································[की]र्तयः प्रवर्तन्ते ॥
यत्र च श्रीनोहलेश्वरमठे श्रीमद**घोरशिवा**चार्योऽभूत् ।
क्वचिद्भिक्षावृत्तिः क्वचिदपि च शाकाभ्यवहृतिः
　क्वचिन्मूलाहारः क्वचिदपि च कन्दाश्च बुभुजे ।
परं ज्योतिः शैवं विगलितरजस्कान्धतमसं
　विचिन्वन्नो यातो विषविषयवेगस्य कलनाम् ॥
तेनेयं प्रशस्तिः संगतिमानीता ।

---

१. पराक्षरेण सहाश्लीलार्थकम्. २. 'पत्तनमण्डपिकाया' इति भवेत्.

श्रीत्रिपुरीसौभाग्यपुरलवणनगरदुर्लभपुरविमानपुर··· ·······
········माष्ट····षः प्रत्यहमथ रक्षितः समानेयः ।
···· ··· ······································दारुणि ॥

सुश्लिष्टबन्धघटना विस्मितकविराजशेखरस्तुत्या ।
आस्तामियमाकल्पं कृतिश्च कीर्तिश्च पूर्वा च ॥

कायस्थश्रीसीरुकस्य ।

करणिकधीरसुतेन तु नाईनाम्ना प्रशस्तिरालिखिता ।
सत्सूत्रधारसंगमतनूजनोन्नेन चोत्कीर्णा ॥

स्वकीयः···································

(एपिग्राफिआ इण्डिक् २५४-६२ पृष्ठे)

---

(१०४)

विजयसेनमहाराजकारितश्रीप्रद्युम्नेश्वरमन्दिरप्रशस्तिः[१] ।

ॐ नमः शिवाय ।

वक्षोंशुकाहरणसाध्वसकृष्टमौलि-
माल्यच्छटाहततरतालयदीपभासः ।
देव्यास्त्रपामुकुलितं मुखमिन्दुभाभि-
र्वीक्ष्याननानि हसितानि जयन्ति शंभोः ॥

लक्ष्मीवल्लभशैलजादयितयोरद्वैतलीलागृहं
प्रद्युम्नेश्वरशब्दलाञ्छनमधिष्ठानं नमस्कुर्महे ।

---

१. 'इय प्रशस्ति' शिलोत्कीर्णा Mr. C. S Metcalfe महाशयेन वङ्गदेशवर्ति-राजशाहीप्रदेशान्तर्गतदेवपाडग्रामस्यारण्यभूभागेषु ग्रावनिकरेऽलम्भि. प्रशस्तिश्चैषा महाराजविजयसेनस्य प्रद्युम्नेश्वराख्यशिवमन्दिरनिर्माणं बोधयति विजयसेनराज्यसमयश्चै-कादशशतकान्तिमभाग इति प्रतीयते' इति Dr. F Kielhorn Ph D., C. I. E., Gottingen. महाशयानामाशयः.

यत्रालिङ्गनभङ्गकातरतया स्थित्वान्तरे कान्तयो-
र्देवीभ्यां कथमप्यभिन्नतनुताशिल्पेऽन्तरायः कृतः ॥
यत्सिंहासनमीश्वरस्य कनकप्रायं जटामण्डलं
गङ्गाशीकरमञ्जरीपरिकरैर्यच्चामरप्रक्रिया ।
श्वेतोत्फुल्लफणाञ्चलः शिवशिरःसंदानदामोरग-
श्छत्रं यस्य जयत्यसावचरमो राजा सुधादीधितिः ॥
वंशे तस्यामरस्त्रीविततरतकलासाक्षिणो दाक्षिणात्य-
क्षोणीन्द्रैर्**वीरसेन**प्रभृतिभिरभितः कीर्तिमद्भिर्बभूवे ।
यच्चारित्रानुचिन्तापरिचयशुचयः सूक्तिमाध्वीकधाराः
पाराशर्येण विश्वश्रवणपरिसरप्रीणनाय प्रणीताः ॥
तस्मिन्सेनान्ववाये प्रतिसुभटशतोत्सादनब्रह्मवादी
स ब्रह्मक्षत्रियाणामजनि कुलशिरोदाम **सामन्तसेनः** ।
उद्गीयन्ते यदीयाः स्खलदुदधिजलोल्लोलशीतेषु सेतोः
कच्छान्तेष्वप्सरोभिर्दशरथतनयस्पर्धया युद्धगाथाः ॥
यस्मिन्संगरचत्वरे पटुरटत्तूर्योपहूतद्विष-
द्वर्गे येन कृपाणकालभुजगः खेलायितः पाणिना ।
द्वैधीभूतविपक्षकुञ्जरघटाविश्लिष्टकुम्भस्थली-
मुक्तास्थूलवराटिकापरिकरैर्व्याप्तं तदद्याप्यभूत् ॥
गृहाद्गृहमुपागतं व्रजति पत्तनं पत्तना-
द्वनाद्वनमनुद्रुतं भ्रमति पादपं पादपात् ।
गिरेर्गिरिमधिश्रितं तरति तोयधिं तोयधे-
र्यदीयमरिसुन्दरीसरकपृष्ठलग्नं यशः ॥
दुर्वृत्तानामयमरिकुलाकीर्णकर्णाटलक्ष्मी-
लुण्टाकानां कदनमतनोत्तादृगेकाङ्गवीरः ।
यस्मादद्याप्यविहतवसामांसमेदःसुभिक्षा-
हृष्यत्पौरस्त्यजति न दिशं दक्षिणां प्रेतभर्ता ॥

उद्गन्धीन्याज्यधूमैर्मृगशिशुरसिताखिन्नवैखानसस्त्री-
स्तन्यक्षीराणि कीरप्रकरपरिचितब्रह्मपारायणानि।
येनासेव्यन्त शेषे वयसि भवभयास्कन्दिभिर्मस्करीन्द्रैः
पूर्णोत्सङ्गानि गङ्गापुलिनपरिसरारण्यपुण्याश्रमाणि॥
अचरमपरमात्मज्ञानभीष्मादमुष्मा-
न्निजभुजमदमत्तारातिमाराङ्कवीरः।
अभवदनवसानोद्भिन्ननिर्णिक्ततत्त-
द्गुणनिवहमहिम्ना वेश्म **हेमन्तसेनः**॥
मूर्धन्यर्धेन्दुचूडामणिचरणरजः सत्यवाक्कण्ठभित्तौ
शास्त्रं श्रोत्रेऽरिकेशाः पदभुवि भुजयोः क्रूरमौर्वीकिणाङ्कः।
नेपथ्यं यस्य जज्ञे सततमियमिदं रत्नपुष्पाणि हारा-
स्ताडङ्कं नूपुरस्त्वक्कनकवलयमप्यस्य भृत्याङ्गनानाम्॥
यद्दोर्वल्लिविलासलब्धगतिभिः शल्यैर्विदीर्णोरसां
वीराणां रणतीर्थवैभववशाद्दिव्यं वपुर्बिभ्रताम्।
ससक्तामरकामिनीस्तनतटीकाश्मीरपत्राङ्कितं
वक्षः प्रागिव मुग्धसिद्धमिथुनैः सातङ्कमालोकितम्॥
प्रत्यर्थिव्ययकेलिकर्मणि पुरः स्मेरं मुखं बिभ्रतो-
रेतस्यैतदसेश्च कौशलमभूद्दाने द्वयोरद्भुतम्।
शत्रोः कोऽपि दधेऽवसादमपरः सख्युः प्रसादं व्यधा-
देको हारमुपाजहार सुहृदामन्यः प्रहारं द्विषाम्॥
महाराज्ञी यस्य स्वपरनिखिलान्तःपुरवधू-
शिरोरत्नश्रेणीकिरणसरणिस्मेरचरणा।
निधिः कान्तेः साध्वीव्रतविततनित्योज्ज्वलयशा
यशोदेवी नाम त्रिभुवनमनोज्ञाकृतिरभूत्॥
ततस्त्रिजगदीश्वरात्समजनिष्ट देव्यास्ततो-
ऽप्यरातिबलशातनोज्ज्वलकुमारकेलिक्रमः।

१. एतदीयखड्गस्य.

चतुर्जलधिमेखलावलयसीमविश्वंभरा-
विशिष्टजयसान्वयो[1] **विजयसेन**पृथ्वीपतिः ॥
गणयतु गणशः को भूपतींस्ताननेन
प्रतिदिनरणभाजा ये जिता वा हता वा ।
इह जगति विषेहे स्वस्य वंशस्य पूर्वः
पुरुष इति सुधांशौ केवलं राजशब्दः ॥
संख्यातीतकपीन्द्रसैन्यविभुना तस्यारिजेतुस्तुलां
किं रामेण वदाम पाण्डवचमूनाथेन पार्थेन वा ।
हेतोः खड्गलतावतंसितभुजामात्रस्य येनार्जितं
सप्ताम्भोधितटीपिनद्धवसुधाचक्रैकराज्यं फलम् ॥
एकैकेन गुणेन यैः परिणतं तेषां विवेकादृते
कश्चिद्धन्त्यपरश्च रक्षति सृजत्यन्यश्च कृत्स्नं जगत् ।
देवोऽयं तु गुणैः कृतो बहुतिथैर्धीमाञ्जघान द्विषो
वृत्तस्थानपुषच्चकार च रिपूच्छेदेन दिव्याः प्रजाः ॥
दत्त्वा दिव्यभुवः प्रतिक्षितिभृतामुर्वीमुरीकुर्वता
वीरासृग्लिपिलाञ्छितोऽसिरमुना प्रागेव पत्रीकृतः ।
नेत्थं चेत्कथमन्यथा वसुमती भोगे विवादोन्मुखी
तत्राकृष्टकृपाणधारिणि गता भङ्गं द्विषां संततिः ॥
त्वं **नान्यवीर**विजयीति गिरः कवीनां
श्रुत्वान्यथामननरूढनिगूढरोषः ।
गौडेन्द्रमद्रवदपाकृत **कामरूप**-
भूपं **कलिङ्ग**मपि यस्तरसा जिगाय ॥
शूरंमन्य इवासि **नान्य** किमिह स्वं **राघव** श्लाघसे
स्पर्धा **वर्धन** मुञ्च **वीर** विरतो नाद्यापि दर्पस्तव ।
इत्यन्योन्यमहर्निशप्रणयिभिः कोलाहलैः क्ष्माभुजां
यत्कारागृहयामिकैर्नियमितो निद्रापनोदक्रमः ॥

---

१. जयेन सार्थकः.

पाश्चात्यचक्रजयकेलिषु यस्य याव-
द्गङ्गाप्रवाहमनुधावति नौविताने ।
भर्गस्य मौलिसरिदम्भसि भस्मपङ्क-
लग्नोज्झितेव तरिरिन्दुकला चकास्ति ॥

मुक्ताः कार्पासबीजैर्मरकतशकलं शाकपत्रैरलाबू-
पुष्पै रूप्याणि रत्नं परिणतिभिदुरैः कुक्षिभिर्दाडिमानाम् ।
कूष्माण्डीवल्लरीणां विकसितकुसुमैः काञ्चनं नागरीभिः
शिक्ष्यन्ते यत्प्रसादाद्बहुविभवजुषां योषितः श्रोत्रियाणाम् ॥

अश्रान्तविश्राणितयज्ञयूपस्तम्भावलीं द्रागवलम्बमानः ।
यस्यानुभावाद्भुवि संचचार कालक्रमादेकपदोऽपि धर्मः ॥

मेरोराहतवैरिसंकुलतटादाहूय यज्वामरा-
न्व्यत्यासं पुरवासिनामकृत यः स्वर्गस्य मर्त्यस्य च ।
उत्तुङ्गैः सुरसद्मभिश्च विततैस्तल्लैश्च शेषीकृतं
चक्रे येन परस्परस्य च समं द्यावापृथिव्योर्वपुः ॥

दिक्शाखामूलकाण्डं गगनतलमहाम्भोधिमध्यान्तरीयं(पं)
भानोः प्राक्प्रज्यगद्रिस्थितिमिलदुदयास्तस्य मध्याह्नशैलम् ।
आलम्व(म्ब)स्तम्भमेकं त्रिभुवनभवनस्यैकशेषं गिरीणां
स **प्रद्युम्नेश्वरस्य** व्यधित वसुमतीवासवः सौधमुच्चैः ॥

प्रासादेन तवामुनैव हरितामध्वा निरुद्धो मुधा
भानोद्यापि कृतोऽस्ति दक्षिणदिशः कोणान्तवासी मुनिः ।
अन्यामुच्छपथोऽयमृच्छतु दिशं विन्ध्योऽप्यसौ वर्धतां
यावच्छक्ति तथापि नास्य पदवीं सौधस्य गाहिष्यते ॥

स्रष्टा यदि स्रक्ष्यति भूमिचक्रे सुमेरुमृत्पिण्डविवर्तनाभिः ।
तदा घटः स्यादुपमानमस्मिन्सुवर्णकुम्भस्य तदर्पितस्य ॥

वि(बि)लेशयविलासिनीमुकुटकोटिरत्नाङ्कुर-
स्फुरत्किरणमञ्जरीच्छुरितवारिपूरं पुरः ।

चखान पुरवैरिणः स जलमग्नपौराङ्गना-
　　स्तनैणमदसौरभोच्चलितचञ्चरीकं सरः ॥
उच्चित्राणि दिगम्बरस्य वसनान्यर्धाङ्गनास्वामिनो
　　रत्नालंकृतिभिर्विशेषितवपुःशोभाः शतं सुभ्रुवः ।
पौराढ्याश्च पुरीः श्मशानवसतेर्भिक्षाभुजोऽस्याक्षयां
　　लक्ष्मीं स व्यतनोद्दरिद्रभरणे सुज्ञो हि सेनान्वयः ॥
चित्रक्षौमैभचर्मा[1] हृदयविनिहितस्थ(स्थू)लहारोरगेन्द्रः
　　श्रीखण्डक्षोदभस्माकरमिलितमहानीलरत्नाक्षमालः ।
वेषस्तेनास्य तेने गरुडमणिलतागोनसः कान्तमुक्ता-
　　नेपथ्यन्तस्थिरिच्छासमुचितरचनः कल्पकापालिकस्य ॥
बाहोः केलिभिरद्वितीयकनकच्छत्रं धरित्रीतलं
　　कुर्वाणेन न पर्यशेषि किमपि स्वेनैव तेनेहितम् ।
किं तस्मै दिशतु प्रसन्नवरदोऽप्यर्धेन्दुमौलिः परं
　　स्वं सायुज्यमसावपश्चिमदशाशेषे पुनर्दास्यति ॥
　　　प्रस्तोतुमस्य परितश्चरितं क्षमः स्या-
　　　　त्प्राचेतसो यदि पराशरनन्दनो वा ।
　　　तत्कीर्तिपूरसुरसिन्धुविगाहनेन
　　　　वाचः पवित्रयितुमत्र तु न प्रयत्नः ॥
　　यावद्वास्तोष्पतिपुरधुनी भूर्भुवःस्वः पुनीते
　　　यावच्चान्द्री कलयति कलोत्तंसतां भूतभर्तुः ।
　　यावच्चेतो गमयति सतां श्वेतिमानं त्रिवेदी
　　　तावत्तासां रचयतु सखी तत्तदेवास्य कीर्तिः ॥
　　　निर्णिक्तसेनकुलभूपतिमौक्तिकाना-
　　　　मग्रन्थिलग्रथनपक्ष्मलसूत्रवल्लिः ।

१. 'चित्रक्षौमैरिभचर्म यत्र' इत्यादिरीत्या सकलविशेषणव्याख्यानं कृत्वा 'कल्पकापालिकस्येच्छासमुचितरचनो वेषस्तेन सेनान्वयेन तेने'—इत्यर्थ

एषा कवेः पदपदार्थविचारशुद्ध-
बुद्धेरुमापतिधरस्य कृतिः प्रशस्तिः ॥
धर्मप्रणप्ता **मनदासनप्ता** बृ(बृ)हस्पतेः सूनुरिमां प्रशस्तिम्।
चखान वारेन्द्रकशिल्पिगोष्ठीचूडामणी **राणकशूलपाणिः** ॥

(एपिग्राफिआ इण्डिक्—३०७-११ पृष्ठे)

---

(१०५)

श्रीवीरवर्ममहिषीश्रीकल्याणदेवीनिर्मापित-निर्जरकूपप्रशस्तिः[१]।

ओं ओं सिद्धिः।

अर्धमीशतनोर्दृष्ट्वा शिलोच्चयसुताहृतम्।
ई[र्ष्य]येव कृशा शीर्षे पातु वोऽमरवाहिनी ॥
स्मरैकमित्रं नयनप्रमोदो जीयाच्छिरोभूषणमिन्दुमौलेः।
इन्दुर्यतः श्रीचपलत्वदोषनोदी धरायामुदियाय वंशः ॥
कुम्भोद्भवः कर्णपयोधिपाने प्रजेश्वरो नूतनराज्यसृष्टौ।
तत्रास विद्याधरगीतकीर्तिः **श्रीकीर्तिवर्म**क्षितिपो जगत्याम् ॥
सल्लक्षणो मालवचेदिलक्ष्मीलुं[टा]कखड्गः क्षितिपश्च तस्मात्।
जयैकधामा **जयवर्म**देव[स्ततसा]च्च राज्यं प्रशशाम [धी]रः ॥
पृथ्वीवर्माभवत्तस्माद[थ] राजा पृथूपम।
ततोऽपि **मदनः** क्ष्माभृद्राज्येऽभूद्रिपुमन्मथः ॥

---

१ Sir A. Cunningham महाशयानुसारेण लेखोऽय कालञ्जरनामग्रामतो नैर्ऋतदिग्वर्तमानाजयगढाख्यगिरिदुर्गेऽस्ति कालञ्जरग्रामश्च Greenwitch नगरत ८०–२० मिते पूर्वरेखाशे, २४–५४ मिते उत्तराक्षाशेऽस्ति लेखश्चाय शिलाया देवनागराक्षरैरसस्कृतभाषायामेव वर्तते लेखनिर्मितिसमयस्तु लेखान्ते सवत् १३१७ A. D. १२६१ इति स्फुट एव।' इति Professor F. Kielhorn. Ph. D., C. I. E., Gottingen महाशया

अथाभव[च्छ्रीप]**रमर्दि**राजो बालोऽपि नेता रिपुवीरहन्ता।
[साम्रा]ज्य[ल]क्ष्मीर्यमिहानुरक्ता पतिंवरेवाशु समाजगाम॥
त्रैलोक्यवर्मक्षितिपोऽथ राज्यं [शशास दु]र्गप्रविधानवेधाः।
तुरुष्ककुल्याम्बुधिमग्नधा[त्री] समुद्धृतिं विष्णुरिव प्रतन्वन्॥
रणाजिरे कृत्तरिपुप्रवीरप्रियाप्तिसंमोदितनाकक[न्यः]।
तस्यात्मजो **वीर**[मही]महेशो जयत्यसौ निर्मलवीरधर्मः॥
तार्क्ष्येण[1] वल्गन्विहरन्वृषेण[2] दुष्टप्रहन्ता रिपुराशिभेत्ता।
किं विष्णुरीशः किमु वेति दृष्टो जयत्यसौ विश्वजनैर्नमस्यः॥
दधीचिवंशेऽद्भुतसत्य[धा]मा श्री[**चा**]**दलो**ऽभूद्द्विजजन्मवन्द्यः।
अथास्य साक्षादिव वीरधर्मो[र्म] **श्रीपाल** इत्यास शु[सु]तो वरिष्ठः॥
मूर्द्धाभिषिक्तैरपि वन्दनीयो **महेश्वर**स्तत्तनयो बभूव।
यं राजमानं वृष[ली]लयैव यथार्थनामानमुदाहरन्ति॥
गोविन्दराजक्षितिपालपुत्री तेनोपयेमे सुचरित्रशी[सी]मा।
लोकोत्तरैर्या चरितैः प्रपूज्या शिवेव नित्यं पतिदेवतानाम्॥
नाम्ना [**वेस**]**लदेवी**ति सौन्दर्यगुणशालिनी।
कल्याणदेवीति सुता तस्या-अथ यशस्विनी॥
सेयं सदा श्रीरिव कैटभारेः **श्रीवीर**[राज्ञो] महिषीत्वमाप्ता।
मनोहरै[ः स्वैः] चरितैरुदारैर्बभूव पुण्यैः परिकीर्तनीया॥
किं व[र्ण्य]ते चारुचरित्र[सी]मा विशुद्धकीर्तिप्रथिता जगत्याम्।
या सत्यवाचा भुवनप्रसिद्धं धर्मप्र[भुः] तं सहसा जिगाय॥
तेषां वं[शत]मावशिष्ठदयिता स्थाणो शरीरार्धकं
भ्राजिष्णुं गिरिजां नमन्ति किल ते गङ्गापि तैः संस्तुता।
ते [काम]प्रमदास्तुतिव्यवसिता येषां न दृग्गोचरा
[सत्याद्यैः] प्रथिता गुणैः शुचितनुः कल्याणदेवी [गि]रा।
[आयुः] श्रीवयसां स्थितिं कमलिनी[प]त्रोल्लसद्वारिण-
स्तुल्यां प[ण्य]नत[भ्रुवो] निपति[ता] मोहान्धकारे घने।

---

१. 'तार्क्ष्यस्तु स्यन्दने वाहे गरुडे' २. 'वृषेण धर्मेण सौरभेयेण.'

[एकां] कीर्तिलतां विलोक्य सुचिरं स्थाखुं तदुत्पत्तये
सत्यौदार्यगुणा· ·· ·मचिरात्कल्याणदेवी [गिरा] ॥
[स्थली] मथेयं व(ब)लिश[स्त्र]गु[प्तां] निश्चित्य चक्रे कृपया परीता।
जीवातवे पूर्ण[त]नुं पयोभि· सुधोपमैर्निर्जरकूपमेनम् ॥
सा पा[त्रं] प्रददावे[कं] निर्जरस्य यशस्विनी।
पुण्य[मे]तत्प्रय(पा)याश्च मण्डपं रुचिरं व्यधात् ॥
सागरोपमकासारं [महाशे]खर[म]न्दिरम् ।
[नां]दीपुरे [च]कारासौ यशोधवलितावनिः ॥
वत्सराजकवे पौत्रो **हरिपाल**कवेः [सु]त· ।
रत्नपाल इमां शुद्धा प्रशस्तिमकरोद्बुध· ॥
सागरेन्द्वग्निसुधांसु(शु)मिते विक्रमवत्सरे ।
उच्चकार विसु(शु)द्धात्मा विदग्धो **राम**[नाम]कः ॥

संवत् १३१७ रा श्रीजे(त)नव्यापारे ॥ श्रीमद्वीरवर्मराज्ये ॥ वैशाष-(ख)शुदि १३ गुरौ ॥ ०००००००००००

(एपिग्राफिआ इण्डिक्—३२७-२८ पृष्ठे)

---

(१०६)

भोजवर्मकोशाध्यक्षसुभटस्य पूर्वजानां देवालयस्य च प्रशस्तिः[1] ।

ओं नमः केदाराय ।

गङ्गातरङ्गतरलीकृतसर्पराज-
वे[ष्टा]य चारुशशिखण्डविभूषणाय ।

---

१. अय च द्वितीयो लेख. शिलोत्कीर्णस्तत्रैव (अजयगढे) F. Kielhorn. Ph. D महाशयेन सव्याख्य प्रकाशित लेखसमयश्च भोजवर्मराज्यकाल. विक्रमसंवत् १३४५ A D. 1300 लेखश्चाय भोजवर्मकोशाध्यक्षस्य सुभटाख्यस्य देवालयनिर्माण सूचयन्सुभटपूर्वजाना वृत्त प्रकाशयति

कन्दर्पदर्पशमनाय सुरार्चिताय
केदाररूपवि[धृ]ताय नमः शिवाय ॥

षट्त्रिंशतिः करणकर्मनिवासपूता
आसन्पुरः परमसौख्यगुणातिरिक्ताः ।
तन्मध्यगा विबुधलोकमता वरिष्ठा
टक्कारिका समजनि स्पृहणीयकल्पा ॥

सर्वोपकारकरणैकनिधेः स्वकीय-
वंशस्य पात्रसुभगस्य द्विजाश्रयस्य ।
कल्पावसानसमयस्थितये पु[री]यां
वास्तु स्वयं समधिगम्य समाससाद ॥

तस्यां श्रुतेर्निनदसङ्घनिनादितायां
वास्तव्यवंशभविनंकरणास्त आसन् ।
आशाः समस्तभुवनानि यदीयकीर्त्या
पूर्णानि हंसधवलानि विशेषयन्त्या ॥

विद्याश्चतुर्दश कला. सकलाः समीयुः
पद्माभिराममिव वल्लभमायताक्ष्य. ।
यं गर्भसंस्थमविलम्बितमद्वितीयं
दुःखं वियोगजमसंवृतमुद्वहन्त्यः ॥

तद्वंशत स उदपादि नरेश्वरेण
गण्डाह्वयेन युधि दुर्जयतां गतेन ।
जाजूकसंज्ञ इति ठक्कुर[ध]र्मयुक्त
सर्वाधिकारकरणेषु सदा नियुक्तः ॥

आराध्य तं नृपतिमण्डलमण्डनैकं
देवं गदाधरमिवाच्युतवासमाद्यम् ।
कायस्थवंशनलिनीगणतादिनेशो
ग्रामं **दुगौड**मपि ताम्रकमाशु लेभे ॥

तत्संततौ सकलवाङ्मयपारदृश्वा
भूभूषणं निशिपतेरिव कान्तिभर्ता।
मोहान्धकारकुहरेषु निपातहर्ता
माहेश्वरः समभवत्सुकृताभिसर्ता॥
यः पीतशैलविषयेषु महीपतीनां
चूडामणिं समनु[से]व्य समार्जयच्च।
श्री**कीर्तिवर्म**नृपतिं विशिषाभिधानं
कालञ्जरस्य पिपलाहिकया समेतम्॥
तस्मिन्कुले महति सज्जनलोकजुष्टे
गङ्गाधरः समुदभूत्सचि[वो]ऽभिरामः।
नूनं विचार्य **परमर्दि**नरेश्वरेण
युक्तः स [कञ्चुकि]तया परया तु धीरः॥
जौणाधरस्तदनुजः सहकर्मचारी
सदारतः समरकर्मणि मोक्षकारी।
तौ वीरमार्गमनुसृत्य गिरौ गरिष्ठे
कालञ्जरे युयुधतुर्**विशिखा**[कु]लेन॥
तथैव **मालाधर**नामधेयस्तस्य द्वितीयोऽजनि वीरमुख्यः।
सुरैः सदाकल्पतरुप्रसूनैरभ्यर्चितो यः समरेषु रेमे॥
क्रमेण तस्मिन्प्रबभूव धीर **आल्हू** प्रतोलीरुचिराधिकारः।
येनावरुद्धे कलुषे वृषेण सदैव रेमे रभसेन दुर्गे॥
तस्यात्मजश्चापि बभूव रम्यः शुभान्वितः **शोभन**नामधेय।
चित्रैश्चरित्रैः ककुभां मुखानि यश्चित्रयामास शुचिर्गुणौघैः॥
विद्यानिधानं तनयश्च तस्य विद्याधरैस्तुल्यतनुर्बभूव।
यस्मिन्नृपो **वीदन**नामधेयौ(ये) विन्यस्य राज्यं सुमनाः सदैव॥
वशं पुराम्येति जनस्य चित्तं **त्रैलोक्यवर्म**क्षितिपस्य [चा]त्र।
इतीव **वाशेरचिता**भिधानो बभूव पुत्रोऽस्य गुणैरुदारः॥

कार्यक्षमं तं विगणय्य राज्या(जा)दुर्गे **जयाख्ये** विशिषाधिकारे।
नियोज्य तस्मै व्यतरत्प्रसिद्धं ग्रामं सदा **व[र्म]वरी**ति नाम्ना ॥

तस्मिन्मनोरममयं सुरसद्म वापीं
वास्तव्यवंशतिलक सुजलां च रम्याम्।
विज्ञाय देहमचिरं चिरतां सिसृक्षुः
प्राचीकरत्तदनुया(पा)धिकलेवरेण ॥

तत्रायं परिपन्थिपार्थिवचमूकुक्षेषु दावानलो
द्वैराज्यं जनयत्तमप्रतिहतं कृत्वा कृतान्तातिथिम्।
भोजूकं युधि युद्धदुर्मदनिधिं **वाशेक**नामा सुधी-
र्भूयो येन महीशवंशतिलक**स्त्रैलोक्यवर्मा** कृतः ॥

स्फीतं राज्यमकण्टकं गुणिगणाक्रान्तातिसर्वास्पदं
दानेनोज्वलवद्विधाय विधिवत्सीमाः समस्ता अपि।
तेनालम्भि महीधरे **जयपुरे** कैलासवासोपमे
वासो वासववासदर्पदलनो रम्यप्रतोलीकृते ॥

अस्यानुजः पुण्ययशा उदार **आनन्द**नामा प्रथितः पृथिव्याम्।
सदैव लोकं मदयन्तमाराद्यं सत्यनामानमुदाहरन्ति ॥
भियामभूमिं विगणय्य चैनं दुर्गाधिकारे नृपतिः प्रचक्रे।
आज्ञाकरान्पल्लिनिवासिनोऽयं चकार भिल्लान्सबरान्पुलिन्दान् ॥

तस्यात्मजोऽभवद[सौ] **रुचिरा**भिधानो
विद्यासु तासु सकलासु शुचिः कलासु।
यो लीलयैव विहरन्समराङ्गणेषु
तीव्रानरातिनिवहान्कुणितामनैषीत् ॥

दुर्गे जयाख्ये प्रबलासुरौघविध्वंसनीं स्तोत्रपरम्पराभिः।
दुर्गां स्तुवन्नेष सदैव भक्त्या कृताञ्जलिः पुण्यतमामुपास्ते ॥
गुणैरुदारः सुकृतैकचारः पापापहारः सुजनैकसारः।
[श]स्त्रास्त्रविद्यानिपुणः प्रवीणः कलासु रेजे स सदा यशस्वी ॥

तस्यात्मजो **गोपति**नामधेयो विद्यावदातो नृपतिप्रपूज्यः ।
श्रियां गिरां चाप्यविरोधवासो वन्द्यः सतां साधुजनैकसेव्यः ॥

तस्यानुजन्मा **महिपाल**नामा सौन्दर्यशौर्यप्रवरो रराज ।
यं वीक्ष्य लज्जावनतो मनोभूः सदैव चित्तेषु तिरोबभूव ॥

जयति तदनुजन्मा श्रीविलासैकसौधः
सुकृतिजनवरिष्ठो वाग्मिनामग्रणीश्च ।
नृपतिसमितिदक्षः श्लाघनीयस्वभावः
सुभट इति च नाम्ना कीर्तनीयस्वरूपः ॥

परोपकारप्रतिबद्ध[कां]क्ष प्रारब्धकार्याधिगतार्थसिद्धिः ।
श्री**भोजवर्म**क्षितिपस्य सोऽभूत्कोशाधिकाराधिपतिः सदैव ॥

सर्वाभारधुरंधरोऽपि सुभटो विश्वासविद्यास्थिति
श्रीमद्भोजमहीमहेन्द्रसचिवः प्रख्यातकीर्तिर्गुणैः ।
निर्मर्यादपरोपकारनिरत सौजन्यमुद्रानिधि-
र्भाण्डागारपतिश्चिरं विजयते धर्मैकबुद्धिर्भृशम् ॥

लोक शोक [दुःखत्रयी]मन्दिरं
दोला[न्दो]लनचञ्चल धनमिद स्वल्पायुषो मानुषाः ।
धर्मः केवल एव देहविरहे देहान्तर गच्छतो
गन्ता [त्या]गविधेरसंभवतया देवालय क्रीयताम् ॥

ततो जाता महाप्राज्ञा महिपालसुतास्त्रयः ।
कीर्तिपालो बृहत्कीर्तिः कुमारो मारसंनिभ ॥

....

(अपूर्णोऽयं लेखः)

(एपिग्राफिआ इण्डिक्—३३३-३५ पृष्ठे)

(१०७)

सिद्धान्तशिरोमण्याद्यनेकग्रन्थनिर्मातृश्रीमद्-भास्कराचार्यवंशप्रशस्तिः[1] ।

ओं नमो गणाधिपतये ।

सिद्धं दि[वा]करसुधाकरभूमिपुत्र-
श्वेतांशुपुत्रगुरुशुक्रश[नैश्वरा]···· ।
···· ·····स्य· · द्ध······ ········
संरक्षणानि गगनेचरचारवो व ॥

उद्भट[बु]द्धिर्भाट्टे सांख्येऽसंख्यः स्वतं[त्र]धीस्तन्त्रे ।
वेदेऽनव[द्य]विद्योऽनल्पः शिल्पादिषु कलासु ॥

स्वच्छन्दो यश्छन्दसि शास्त्रे वैशेषिके विशेषज्ञः ।
यः श्रीप्रभाकरगुरुः प्राभाकरदर्शने कविः काव्ये ॥

[ब]हुगुणगणितप्रभृतिस्कन्धत्रितये त्रिनेत्रसमः ।
विबुधाभिवन्दितपदो जयति **श्रीभास्कराचार्यः** ॥

श्रीमद्यदुवंशाय स्वस्त्यस्तु समस्तवस्तुसहिताय ।
विश्वं यत्र त्रातुं जातो विष्णुः स्वयं त्वस्तम् ॥

गर्जद्गूर्जरकुञ्जरोत्कटघटासंघट्टकण्ठीरवो
लाटोरस्ककपाटपाटनपटुः कर्णाटहृत्कण्टकः ।
श्रीमा**न्भिल्लम**भूपतिः समभवद्भूपालचूडामणि-
स्तत्रार्तान्ध्रपुरंध्रिकान्तसुखहृच्छ्री**जैत्रपालो**ऽभवत् ॥

---

१. प्रशस्तिलेखोऽय पाषाणखण्डोत्कीर्णः खानदेशान्तर्गतचालीसगांवतो दक्षिणपश्चिमायां वर्तमाने निर्जने पटनाख्ये ग्रामे भग्ने भवानीमन्दिरे डॉक्टर्-भाऊ-दाजी-महाशयैरुपलब्ध प्रसिद्धज्योतिर्विच्छ्रीमद्भास्कराचार्यपौत्रो यदुवशीयसिहणाख्यस्य राज्ञ प्रधानगणकश्चङ्गदेवेति नामा स्वपितामहविरचितसिद्धान्तशिरोमण्यादिग्रन्थप्रचाराय मठमेकमविस्थापयामासेतिवृत्त लेखेनानेन सुव्यक्तीक्रियते समयश्च लेखान्ते व्यक्त एव.

लक्ष्मीकान्तलवः प्रतारि[त]भवः श्रीजैत्रपालोद्भवः
सङ्ग्रामाङ्गण[सं]चितातिविभवः शास्ता भुवः **सिङ्घणः**।
पृथ्वीशो मथुराधिपो रणमुखे काशीपतिः पाति[तो]
येनासावपि यस्य भृत्यबटुना हं[मी]रवीरो जितः॥
अवततार पुरा पुरुषोत्तमो यदुकुले जगतीहितहेतवे।
जयति सोऽयमिमां सकलामिलामवति मा **पतिसिंहम**हीपतिः॥

अथ भृत्यान्वयवर्णनम्।

श्रीमद्भास्करवंशाय भव्यं भूयात्स भूपतिः।
निकुम्भो यत्र संभूतो **रा[मो]** यस्यान्वयेऽभवत्॥
तत्रासीन्नृपतिर्जितक्षितिपतिर्ध्यातैकलक्ष्मीपति-
र्देवब्राह्मणवन्दने त[त]मतिः श्री**कृष्णराजा**ह्वयः।
शौ[र्यौ]दार्यविवेकविक्रमगुणैस्तुल्यो न येनापरः
प्राप्तं पाण्डवपुंगवार्जितपदं तद्धर्मराजेति यत्॥
आसङ्गप्रभवस्ततस्ततमतिः प्राप्तप्रतापोन्नति-
र्वीरो वैरवधूविधूनितशिरा यः श्री**न्द्रराजा**ह्वयः।
तस्यासीत्तनयः सतां सविनयः सामन्तसीमन्तिनी-
वैधव्यव्रतसद्गुरुर्गुरुगणः सत्पुण्यपण्यापणः॥
चतुरस्तुरगारूढो रेवन्त इव **गोवनः**।
सौन्दर्यदर्पकन्दर्पो यं दृष्ट्वानङ्गतां गतः॥
श्रीगोवनासं[स्तुत रत्न] सिन्धोरुद्भूतमूर्तिस्ततपुण्यकीर्तिः।
जितारिचक्रः क्षितिपालचक्रः श्री**सोइदेवः** स्तुतवासुदेवः॥
शरणागतवज्रपञ्जरः परनारीषु सदा सहोदरः।
व्रतसत्यपथे युधिष्ठिरः सततं वैरिवधूभयज्वरः॥
स षोडश [श]तग्रामदेशं दुर्गपुरान्वितम्।
सोइदेवे दिवं याते शास्ति तस्यानुसंभवः॥
त्यागे सूर्यसुनोपमोऽर्जुनसमः शौर्ये निकुम्भान्वये
विख्यातः क्षितिपालभालतिलकः श्री**गोवन**स्यात्मजः।

श्रीमत्सिङ्घणदेववैरिकरटो कण्ठीरवो यत्करो
नन्द्यान्नन्दसुनन्दने [तत]मतिर्हेमाडिदेवश्चिरम् ॥
शाण्डिल्यवंशे कविचक्रवर्ती त्रिविक्रमोऽभूत्तनयोऽस्य जातः।[1]
यो भोजराजेन कृताभिधानो विद्यापतिर्भास्करभट्टनामा ॥
तस्माद्गोविन्दसर्वज्ञो जातो गोविन्दसंनिभः।
प्रभाकरः सुतस्तस्मात्प्रभाकर इवापरः ॥
तस्मान्मनोरथो जातः सतां पूर्णमनोरथः।
श्रीमन्महेश्वराचार्यस्ततोऽजनि कवीश्वरः ॥
तत्सूनुः कमिवृन्दवन्दितपद सद्वेदविद्यालता-
कन्दः कंसरिपुप्रसादितपदः सर्वज्ञविद्यासदः।
यच्छिष्यैः सह कोऽपि नो विवदितुं दक्षो विवादी क्वचि-
च्छ्रीमान्भास्करकोविदः समभवत्सत्कीर्तिपुण्यान्वितः ॥
[2]लक्ष्मीधराख्योऽखिलसूरिमुख्यो वेदार्थवित्तार्किकचक्रवर्ती।
क्रतुक्रियाकाण्डविचारसारविशारदो भास्करनन्दनोऽभूत् ॥
सर्वशास्त्रार्थदक्षोऽयमिति मत्वा पुरादतः।
जैत्रपालेन यो नीतः कृतश्च विबुधाग्रणीः ॥
तस्मात्सुतः सिङ्घणचक्रवर्तिदैवज्ञवर्योऽजनि चङ्गदेवः।
श्रीभास्कराचार्यनिबद्धशास्त्रविस्तारहेतोः कुरुते मठं यः ॥
भास्कररचितग्रन्था· सिद्धान्तशिरोमणिप्रमुखाः।
तद्वंश्यकृताश्चान्ये व्याख्येया मन्मठे नियमात् ॥

---

१. अनेनैव त्रिविक्रमभट्टेन विरचितेषु ग्रन्थेषु दमयन्तीकथापरपर्याया नलचम्पूरुपलब्धा. तत्र च शाण्डिल्यवशीयानूचानान् श्लेषेण संवर्ण्य 'तेषा वशे विशदयशसा श्रीधरस्यात्मजोऽभूद्देवा[त्रेमा]दित्य स्वमतिविकसद्वेदविद्याविवेक । उत्कल्लोलां दिशि दिशि जना कीर्तिपीयूषसिन्धु यस्याद्यापि श्रवणपुटकै· कूणिताक्षा· पिबन्ति ॥ तैस्तैरात्मगुणैर्येन त्रिलोक्यास्तिलकायितम्। तस्मादस्मि सुतो जातो जाड्यपात्र त्रिविक्रमः॥' इति पितामह पितरमात्मान च प्रस्तौति स्मायं त्रिविक्रम·. २. अनेनैव लक्ष्मीधरसूरिवरेण भास्कराचार्यविरचितग्रन्थाना व्याख्या निर्मिता.

श्रीसोइदेवेन मठाय दत्तं हेमाडिना किंचिदिहापरैश्च ।
भूम्यादि सर्वं प्रतिपालनीयं भविष्यभूपैर्बहुपुण्यवृद्ध्यै ॥

स्वस्ति श्रीशाके ११२८ प्रभवसंवत्सरे श्रावणमासे पौर्णमास्यां चन्द्रग्रहणसमये श्रीसोइदेवेन सर्वजनसंनिधौ हस्तोदकपूर्वकं निजगुरुरचितमठायायस्थानं दत्तम् ॥

(इतोऽग्रे देशभाषा—)

(एपिग्राफिआ इण्डिक् ३४१–४३ पृष्ठे)

(१०८)

नारोदग्रामीयवापीप्रशस्तिः[1][2] ।

ओं नमः शिवाय ।

प्रावृषेण्यनवाम्भोदगर्जितौर्जित्यजिन्ति व ।
वैनायकानि निघ्नन्तु निर्विघ्नं बृंहितान्यघम् ॥
प्रसन्नौजस्विमधुरव्यक्ताव्यक्तस्वरूपभाक् ।
देवता वाक्सरिद्भेदैर्मुदे स्ताद्वः सरस्वती ॥
संपूर्णाङ्गमशेषकल्मषमुषः संपन्नमप्यादरा-
द्दूरं पादतलावघट्टननमत्कैलासनश्यत्स्थिति ।
सानन्दं युगपत्सुरासुरसभासंरम्भदत्तव्यथ
शंभोर्लास्यपरिग्रहस्य दिशतु श्रेयांसि वः स्थानकम् ॥
चरणभरावनतावनिविनमत्कमठोरुकर्पराभोगा ।
नाट्यस्य धूर्जटेर्धुरि वर्णपरिप्वष्कणी जयति ॥

---

१. अय च नारोद (रानोद) ग्राम. पुरातनो विशीर्णश्च गोपगिरि(ग्वालीयर)राज्ये झाँसी गूना मध्यदेशस्थो नरवरग्रामात् दक्षिणस्या दिशि ४५ मीलदूरे वर्तते.
२. 'प्रशस्तिश्चेय पाषाणोत्कीर्णा Dr. Fuhrer साहिवेन तत्र गत्वा तत्प्रतिबिम्बद्वय च समानीय मह्यमदायीति समयश्चास्या नैव व्यक्ततयाज्ञातोऽपि पूर्वेतिहासपर्यालोचनया ११ शतकस्यारम्भात्मक इति प्रतीयते' इति च Professor F. Keilhorn Ph. D. C I. E. महाशया एतद्भूमिकाया प्रकाशितवन्त

उत्क्षिप्तो दण्डपादो ग्रहगणमुडुभिः सार्धमुत्तम्भ्य भूयः
प्रायाद्यावत्स्वसीमामपरपदभरभ्रष्टपृष्ठा क्व भूमिः।
इत्थं दौस्थ्येऽपि रङ्गे गगनतलचलच्चारिकाचारवृत्ते-
स्त्रायन्तां वस्त्रिसंध्यं त्रिपुरविजयिनस्ताण्डवक्रीडितानि॥

भक्त्योपसन्नं स्थिरभक्तिगम्यः पद्मासनं दारुवनेऽतिरम्ये।
विधाय यज्ञं विधिना विधिज्ञः किलानुजग्राह पुरा पुरारिः॥

यच्छन्नफलं विपुलनिर्वृतिबीजमुच्चैः
पूर्वोत्तरं विपुलवर्धितभूरिशाखः।
तस्मादपूर्व उदभून्मुनिवंश एष
निर्ग्रन्थिरन्तरतिसारतरोऽस्तरन्ध्रः॥

तस्मिन्मुनिः सकललोकनमस्यमूर्ति-
रिन्दूपमः प्रतिदिनं समुदीयमानः।
श्रीमानभूद्भुवि **कदम्बगुहाधिवासी**
तस्माच्च **शङ्खमठिकाधिपतिर्मुनीन्द्रः**॥

तेरम्बिपालः प्रमथाधिपस्य तुलां दधत्कामजयोदयेन।
ततोऽभवद्भूरितपास्ततोऽपि सत्ख्याति**रामर्दकतीर्थनाथः**॥

तस्मा**त्पुरंदरगुरु**र्गुरुवद्गरिम्णः
प्रज्ञातिरेकजनितस्य बभूव भूमिः।
यस्याधुनापि विबुधैरितिकृत्यशंसि
व्याहन्यते न वचनं नयमार्गविद्भिः॥

वन्द्यः कोऽपि चकास्त्यचिन्त्यमहिमा तुल्यं मुनिर्भास्वता
राजन्नुत्तमशब्दपूर्वशिखराभ्यर्णे प्रकीर्णद्युतिः।
दीक्षार्थीति वचो निशम्य सुकृती चारोक्तमुर्वीपति-
र्यस्येहानयनाय यत्नमकरोच्छ्रीमान**वन्तिः** पुरा॥

गत्वा तपस्यन्तमुपेन्द्रपूर्वे पुरे तदा **श्रीमदवन्तिवर्मा**।
भृशं समाराध्य तमात्मभूमिं कथंचिदानीय चकार पूताम्॥

अथोपसद्याप्य च सम्यगैशीं दीक्षां स दक्षो गुरुदक्षिणार्थम् ।
निवेद्य यस्मै निजराज्यसारं स्वजन्मसाफल्यमवाप भूपः ॥
स कारयामास समृद्धिभाजं मुनिर्मठं सन्मुनिरत्नभूमिम् ।
प्रसिद्धमावारिधि मेरुकल्पं श्रीमत्पुरे **मत्तमयूर**नाम्नि ॥
पुनर्द्वितीय स्वयमद्वितीयो गुणैर्मुनीन्द्रो **रणिपद्र**सञ्ज्ञम् ।
तपोवनं श्रेष्ठमठं विधाय प्रष्ठ· प्रतिष्ठां परमां निनाय ॥

आसीदतः **कवचपूर्वशिवा**भिधानो
लोकप्रिय· कवचवद्दृढदुष्टशक्तिः ।
यः सर्वतो वहति संयति संयताङ्गो
दार्ढ्यं गुणाढ्यमिति कामशरैरभेद्यः ॥

सदाशिवस्तस्य च शिष्य आसीत्सदा शिवः सर्वजनस्य शान्त्या ।
तपोवनं यो **रणिपद्र**नाम प्रसाधयामास तपःसमृद्ध्या ॥
अस्मादनल्पादुदयाद्रिकल्पाल्लब्धोदयोऽभूत्**हृदयेश**संज्ञः ।
आचार्यसूर्यस्तमसां विदार्य प्रकाममौदार्यमहार्यवीर्यः ॥

निरवधि वर्धते न च बिभर्ति पुरो लघुभावमात्मनः
प्रसरति दिङ्मुखेषु न च चलति मनागपि मार्गसंस्थितेः ।
स्फुरति समस्तवर्णरुचितं न च मुञ्चति चारुशुभ्रता-
मलमधुनापि यस्य कृतिनोऽद्भुतमित्थमहर्निशं यशः ॥

यस्यात्मेन्द्रियनिग्रहे निजगुरुस्थानान्यलंकुर्वत·
प्रीति· पात्रपरिग्रहे च दधत· साधूपभोग्याः श्रिय· ।
स्वभ्यस्ताखिलशास्त्रनिर्मलमतेरासीत्स एकः परं
कान्यैः स्वोदरपूर्तिमात्ररतिभिस्तृष्णाभिभूतैः कथा ॥

यदि गुणकीर्तनमधुना निःशेषं तस्य साधु विवृणोमि ।
तद्वक्तुं कीर्तिमिमां नावसर· प्रस्तुतां तदलम् ॥

औदार्याद्गुरुभारदुर्वहधुरानिर्व्यूढवीर्योदयः
शिष्य· शिष्यवतां विशेषक इव प्रस्तावमुख्यः सताम् ।

श्रीमान्व्योमशिवाह्वयः समभवत्तस्यापि तादृक्पुन-
र्यादृग्भूरिभिरुग्रमद्भुततमैस्तैस्तैस्तपोभिर्भवेत् ॥
श्लाघ्यं जन्म जगत्रयेऽपि दधतः शेषस्य तस्य क्षमा-
मस्य व्योमपदादिमन्त्ररचनाख्याताभिधानस्य च ।
उद्धर्तुं विपदि प्रजां गुरुभरव्यापारदत्तात्मनो
यस्योद्रिक्तपरोपकारकरुणामालं प्रवृत्तेः फलम् ॥
यस्योच्चैश्चरितं चिरात्पुलकभृद्गण्डस्थलश्रेणिभि-
र्मञ्जुव्यञ्जित[म]न्द्रतारगमकैः संगीयते किन्नरैः ।
सूर्याचन्द्रमसोः समं प्रतापः प्रध्वंस्य दूरं तम-
स्तस्यास्याद्भुतकर्मणः किमपरैः स्तोत्रैर्विचित्रैरपि ॥

द्रढिष्ठसदनुष्ठानो म्रदिष्ठमितभाषितः ।
योऽन्वतिष्ठत्प्रतिष्ठावत्प्रष्ठः सद्व्रतिनां व्रतम् ॥

यः संयमस्य विनयस्य नयस्य सम्य-
क्पुण्यस्य चारुचरितस्य च कीर्तनस्य ।
एकत्र वस्तुमिति सद्गुण[सं]··· [स्य]
त्वष्ट्रा प्रतिश्रयगृहं गृहिणेव जज्ञे ॥
सर्वत्र निर्वृतिक[रे]ण निरन्तरेण
लब्धोदयेन धवलेन दिगायतेन ।
वर्धिष्णुनाधिकमलंकृतमेतदिन्दो-
र्द्योतेन यस्य च गुण[प्रस]रेण विश्वम् ॥

लोकालोकान्तरालभ्रमणपरिणतावर्तवेगप्रवृत्ति-
र्वातूलोत्काललीलां द्रुतगति तुलयन्व्यासदिक्चक्रवालः ।
निर्धूयाशेषविश्वाक्रमणपटुरजःपावनैर्वर्तनैर्द्या-
माराद्श्वश्चुवानस्तपस उदगमद्यस्य दूरं प्रतापः ॥
येनेदं पुरमापदन्धतमसे मग्नं नियोगाद्विधेः
सत्कीर्त्या रणिपद्रसं[ज्ञम]चिरादुद्धृत्य यत्याश्रमम् ।

भूपृष्ठं शशिनेव निर्मलतरस्फारस्फुरत्तेजसा
सर्वानन्द्युदयेन पौरसहितं नीतं पुनस्ताः श्रियः ॥
स्फारैर्धान्यहिरण्यरत्ननिवहैर्निःशेषमन्तर्बहि-
स्त्वङ्गत्तुङ्गतुरङ्गमैर्मदभरोद्धृत्तैश्च गर्जद्गजैः ।
स्वस्थानस्य विशीर्णविद्रुममठस्योद्दामलक्ष्मीभृतो
भूभागास्तपसा पुनर्नवरुचः संरेजिरे यस्य च ॥
सा श्लाघ्या वसतिः स एव विषयस्ते प्राणिनस्ता दिशः
सा भूर्भूमिपतिः स एव किमतस्ते ते प्रदेशाः परम् ।
यत्रास्तेयमशेषसत्त्वहितकृत्कृत्यप्रवृत्तः स्वयं
पुण्यानां प्रगुणीकृतोऽवनिसृजा पुञ्जो वपुष्मानिव ॥
यद्वाचां मनसां च गोचरमतिक्रान्तेन भूम्नान्वितं
यद्गीतं गुणगर्वितैर्दिविषदां दारैरदभ्रादरम् ।
यत्सत्त्वज्वलितैः प्रचण्डतपसां तेजोभिरुन्मीलितं
तन्नान्यत्र चरित्रमुन्नतमतावत्रैव तावत्स्थितम् ॥
पुरा योषित्सङ्गादनिभृतनिजाक्षं भगवता
विजिग्ये यः कामस्त्रिपुररिपुणाविष्कृतरुषा ।
निरुद्धाक्षः क्षान्त्या तमयमजयत्सङ्गरहितः
सुचीर्णानां स्याद्वा किमिह तपसां दुष्करमिति ॥
स्फारास्फालनघातनिर्दयदलद्गम्भीरभेरीरव-
व्याजेनोज्जगुरा कुमारचरितात्सद्ब्रह्मचर्यं तपः ।
यस्याराधयतस्त्रिसंध्यमधुतध्यानस्थितेर्धूर्जटिं
चैतन्योज्झितवृत्तयोऽपि समये सद्धूपवेलोत्सवाः ॥
स्तुल्यं स्यात्किमिहास्य नाम चरितं न स्थाणुपुण्यार्थिना
मा बाल्यात्सहकीर्तिसंचिततपस्तेजः समुत्तेजितम् ।
यस्यौच्चैरलघून्नमद्गुणगुरुब्रह्माण्डमाडम्बर-
व्यग्रैर्द्राक्शतरुद्रबाहुपरिघैः संधार्यते यत्नतः ॥

सिद्धान्तेषु महेष एष नियतो न्यायेऽक्षपादो मुनि-
गम्भीरे च कणाशिनस्तु कणभुक्शास्त्रे श्रुतौ जैमिनिः ।
सांख्येऽनल्पमतिः स्वयं च कपिलो लोकायते सद्गुरु-
र्बुद्धो बुद्धमते जिनोक्तिषु जिनः को वाथ नायं कृती ॥

यद्भूतं यदनागतं यदधुना किंचित्क्वचिद्वर्धते
सम्यग्दर्शनसंपदा तदखिलं पश्यन्प्रमेयं महत् ।
सर्वज्ञः स्फुटमेष कोऽपि भगवानन्यः क्षितौ संकरो
धत्ते किंतु न शान्तधीर्विषमदृग्रौद्रं वपुः केवलम् ॥

अस्मिन्नुद्दामधाम्नि प्रचुरतरतपःसीम्नि विख्यातनाम्नि
सर्वानन्युक्त[सा]म्नि क्षितिभृदुरुभरस्पर्धिपुष्यद्गरिम्णि ।
संपन्नप्रेम्णि सत्सु स्वयशसि निहितस्फारसारप्रथिम्नि
विद्योत्सर्पन्महिम्नि त्रिभुवनतिलके के गुणा हन्त न स्युः ॥

संलीनं मुख एव शाक्यकरिणामत्यूर्जितं गर्जितं
त्रासाद्यस्य च जैनजम्बुकशतैर्दुर्व्याहृतं संहृतम् ।
सोढं जातु न जैमनीयहरिणैर्लीलाकृतं हुंकृतं
तस्यान्यद्गगनेशकाननपतेः किं स्यात्स्तुतं प्रस्तुतम् ॥

यस्योच्चकैः स्फुरति संतमसं निरस्य
तेजः परं प्रतिनिशं प्रतिवासरं च ।
अन्यः स एष ननु चन्द्रमसो रवेश्च
चन्द्रावदातचरितः सुतरां चकास्ति ॥

यस्यामलं स्फुरति सद्गुणरत्नवृन्द-
मानन्दकारि जगतां जलताविहीनम् ।
श्री**व्योमशंभु**जलधिः स खलु व्युदस्त-
तृष्णः सतां समभवद्भुवि कोऽप्यपूर्वः ॥

माधुर्यं विनयो नयोऽनलसता त्यागः क्षमा प्रश्रयः
स्थैर्यं धैर्यमहार्यवीर्यकलितं सद्ब्रह्मचर्यं तपः ।

इत्यादि प्रचिनोमि चेतसि चिरं यद्यत्किमप्यादरा-
तत्तत्स[र्व]मचिन्त्यमस्य महतः कस्यास्तु वाचां पथि ॥
रेजुः सज्जनरक्तभावजननान्या सिन्धुवेलावधे-
श्चित्रं तस्य यशांसि कुन्दकलिकाक्रोडप्रभाभाञ्ज्यपि ।
तस्यायं खलु देवतायतनवान्वापीनिवेश. शुभः
सोद्यानः प्रथते स्वकीर्तिविभव. साक्षादिवानश्वरः ॥

शिवयुग्ममुमादेवीनाथ्येश्वरविनायकौ ।
स मठं मन्दिरै रम्यैरयमेतान्यचीकरत् ॥

प्रतिक्षपं या प्रतिबिम्बतां गते सुनिर्मले वारिणि तारकागणे ।
कुमुद्वतीसङ्गसमुज्झिताप्यलं विभाति विष्वक्कुमुदैरिवाचिता ॥
प्रासादमाधुर्यनिकामहृद्यं विराजते यत्र गभीरमम्भ. ।
विडम्बयत्सत्कविकाव्यबन्धं विशुद्धवर्णाहितचारुशोभम् ॥
शैलात्मजाभक्तिपरप्रयातपौराङ्गनानूपुरशिञ्जितेन ।
प्रतिक्षणं या कलहंसनादभ्रमं विधत्ते श्रुतिपेशलेन ॥
धृतोदपात्रावनताङ्गनानां मुखैर्विचित्राधरपल्लरम्यैः ।
तोयं गतैर्या प्रतिबिम्बनेन भृ[शा]रविन्देव बिभर्ति शोभाम् ॥
अपूर्वविन्यासविशेषकेण विभूषिता या दयितेव दृष्टा ।
सोपानमालावलिचारुमध्या नानन्दयत्कस्य मनो मनोज्ञा ॥

प्रासादा यत्र भासन्ते कुन्देन्दुकुमुदोज्ज्वलाः ।
श्रीव्योमेशमहीव्यापियशोबीजाङ्कुरा इव ॥

या नीलकण्ठेन तटोपकण्ठं कृतास्पदा धाम परं सुखस्य ।
प्रासादरम्या रमणीयभूमिः पुरा पुरारे' सदृशी चकास्ति ॥
यत्सन्निधौ सान्द्रसुधासितिम्ना प्रासादमालानुदिनं विभाति ।
भयेन 'भानोः परिणाममेत्य ज्योत्स्ना स्थितेवामरसद्ममूर्त्या ॥
अम्भोनिधिस्तुङ्गतुषारशैलैः सम्यग्विराजेद्यदि कूललीनैः ।
तेनोपमीयेत तदा स्फुटं या समुन्नतैर्नाकिगृहैर्विभान्ती ॥

अमुक्तमुक्ताफलचारुकान्ति तोयं सदैव प्रतिभाति यत्र ।
अमूर्ततावाच्यमसोढुकाममुच्चैरभून्मूर्तमिवान्तरिक्षम् ॥
शरन्निशेवामलचन्द्रकान्त्या सरोजलक्ष्म्येव सरोजलर्द्धिः ।
अलंकृता चारुतया व्यधत्त या निर्वृतिं कस्य न दृश्यमाना ॥
या सर्वदा नोज्झति यन्निकामं सत्सूपकारं च गभीरतां च ।
जलैरनल्पैर्भृशमास्थितापि फलं तदेतद्धि कुलीनतायाः ॥
मृगाङ्कबिम्बे प्रतिमागते या स्फुरत्तरङ्गाङ्गुलिभिर्विलोले ।
स्वचारुसौन्दर्यविलोकनाय धृतामलादर्शतयेव भाति ॥
स्थिराणि तुङ्गानि स्थिरोज्ज्वलानि निरन्तराण्यार्जवसुन्दराणि ।
सतां मनांसीव सदानुकूलं विभान्ति यस्याः सुरमन्दिराणि ॥
इदं नभः किं द्रवता कुतोऽस्य किं वामृत तत्कथमत्र चित्रम् ।
अह्नाय यत्रेति वितर्कयु[क्तो] जलं न निश्चेतुमलं जनौघः ॥
सन्मीनभूमिर्भवतु प्रकामं मनोरमा द्यौर्बहुवारिदा च ।
तथापि सामान्यगुणादुदस्ता यया विचित्रां रचनां दधत्या ॥
जित्वारिषड्वर्गमनर्थमूलं धर्मे रताः सन्तु सदैव सन्तः ।
यस्यामितीवाह सुरालयाली निलीनपा[राप]तमन्द्रनादैः ॥
रङ्गात्तरङ्गातिमनोरमभ्रू रथाङ्गनामोरुपयोधरा या ।
दिक्षु क्षिपन्ती शफरीकटाक्षानचूचुरत्पान्थदृशं प्रियेव ॥
यदस्ति किंचित्क्वचिदप्यनिन्द्यमानन्दहेतुर्जगतीह वस्तु ।
तदेकदेशे निखिलं विधाय या वेधसोच्चैर्घटितेव रम्या ॥
कुवलयमतीव वापीं विभूषयति यदतिसुप्रसिद्धमदः ।
चित्रमिदं तु विचित्रा या कुवलयमप्यलंकुरुते ॥
स्थिरा सैषा वापी गगनशशिमौलेर्भगवतो
भवत्वाचन्द्रार्कं प्रथिततपसो भूरियशसः ।

---

१ जलैर्जडै. २. 'मीनो राश्यन्तरे झषे' ३ प्रचुरमेघा प्रचुरजलदायिनी च
४. 'स्यादुत्पल कुवलयम्' इत्यमर' ५. भूमिमण्डलम्

यदीये भातीयं शरदमलचन्द्रांशुधवला
सुराणां सद्मालो विकटतटपृष्ठे शिखरिणी ॥
वापीतो निकटं यः पादपमारोपयिष्यति [व्रात्य]ः ।
याता स पञ्चपातकयुक्तः खलु दुस्तरे निरये ॥
पञ्चैव तेषामिह पातकानि स्वप्स्यन्ति खट्वासु शठा मठे ये ।
येऽभ्यन्तरे मूढधियो रजन्यां दास्यन्त्यनार्या वसतिं च नार्याः ॥
प्रशस्ता देवसंलापपूर्वदत्ताह्वयेन या ।
विहिता मुख्यशब्दार्था सा [मुदेऽस्तु सतामियम्] ॥
देवदत्तसुतेनैषा हरदत्तेन वर्णिता ।
वापीप्रशस्तिका रम्या जेज्जाकेनोदखोटि च ॥
रुद्रेण लिखिता ॥

(एपिग्राफिआ इण्डिक्—३५४-६१ पृष्ठे)

---

(१०९)

विजयनगराधीशमहाराजश्रीकृष्णराय-वितीर्णग्रामप्रशस्तिः[१] ।

श्रीकृष्णदेवराय श्रीशुभमस्तु ।

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शंभवे ॥
कल्याणायास्तु तद्धाम प्रत्यूहतिमिरापहम् ।
यद्गजोऽप्यगजोद्भूतं हरिणापि च पूज्यते ॥

---

१ प्रशस्तिलेखस्यास्य मुख्यादर्शः शून्यीभूतविजयनगरनगरत पश्चिमोत्तरे प्रदेशे तुङ्गभद्रातरङ्गिणीतटनिकटवर्तिहैम्यनामकग्रामे शिवमन्दिरे मण्डपाभिमुखस्थशिलाखण्डे उत्कीर्णो लभ्यते। स चाय लेखो Dr Pigson महाशयै· फोटूग्राफयन्त्रेणादर्शप्रतिकृती-कृत. Mr. Fleet महाशयैः प्रकाशितोऽपि पुन E Hultzschमहाशयैः स्फुटानु-वादपूर्व व्यक्तीकृतः. समयस्त्वस्याः प्रशस्तेरन्ते १४३० (1509 A.D) शकाब्दात्मकः स्फुट एव.

अस्ति क्षीरमयाद्देवैर्मथ्यमानान्महाम्बुधेः ।
नवनीतमिवोद्भूतमपनीततमो महः ॥
तस्यासीत्तनयस्तपोभिरतुलैरन्वर्थनामा **बुध**:
पुण्यैरस्य **पुरूरवा** भुजबलैरायुर्द्विषां निघ्नतः ।
यस्यायुर्नहुषोऽस्य तस्य पुरुषो युद्धे **ययातिः** क्षितौ
ख्यातस्तस्य तु **धुर्वसु**र्वसुनिभः श्री**देवयानी**पतेः ॥
तद्वंशे **देवकी**जानिर्दिदीपे **तिम्म**भूपतिः ।
यशस्वीतुलुवेन्द्रेषु यदोः कृष्ण इवान्वये ॥
ततोऽभूद्बुक्कमाजानि**रीश्वर**क्षितिपालकः ।
अत्रासमगुणभ्रंशं मौलिरत्नं महीभुजाम् ॥
पद्माक्षो बलिजिन्निजैस्त्रिभुवनाक्रान्तिक्षमैर्विक्रमै[:]
शङ्खं चक्रमपि श्रयन्निजकरे श्री**देवकीनन्दनः** ।
भूत्वाप्यद्भुतमीश्वरोऽयमिति या भूयस्तरां पप्रथे
भूतिं चाखिलपूज्यतामतिभृशं भूभृत्सुतामाश्रितः ॥
भूवासैकपरोऽपरो रविरिव प्राप्तोदयोऽहर्निशं
यो मन्देहरिपूनहन्कविबुधोपेतोऽनपेतो रणात् ।
आपूर्वापरवारिराशि नितरामासेतु हेमाचलं
विख्यातो विहसंश्च यो वितरणैर्व्यद्योतत द्योतरून् ॥
सरसादुद्भूत्तसान्नरसावनिपालकः ।
देवकीनन्दनात्कामो देवकीनन्दनादिव ॥
कावेरीमाशु बध्वा(द्ध्वा) बहलजलरयां तां विलङ्घ्यैव शत्रुं
जीवग्राहं गृहीत्वा समिति भुजबलात्तं च राज्यं तदीयम् ।
कृत्वा श्रीरङ्गपूर्वं तदपि निजवशे पट्टणं यो बभासे
कीर्तिस्तम्भं निखाय त्रिभुवनभवनस्तूयमानापदानः ॥
चेरं चोलं च पाण्ड्यं तमपि च म[धु]रावल्लभं मानभूषं
वीर्योदग्रं तुरुष्कं **गजपति**नृपतिं चापि जित्वा तदन्यान् ।

आगङ्गातीरलङ्काप्रथमचरमभूभृत्तटान्तं नितान्तं
ख्यातः क्षोणीपतीनां स्रजमिव शिरसां शासनं यो व्यतानीत् ।
विविधसुकृतोद्दामे रामेश्वरप्रमुखे मुहु-
र्मुदितहृदयः स्थाने स्थाने व्यधत्त यथाविधि ।
बुधपरिवृतो नानादानानि यो भुवि षोडश
त्रिभुवनजनोद्गीतं स्फीतं यशः पुनरुक्त[यन्] ॥
तिप्पाजीनागलादेव्यो· कौसल्याश्रीसुमित्रयो· ।
देव्योरिव **नृसिंह्ये**(हे)न्द्रात्तस्मा[त्पं]क्तिरथादिव ॥
वीरौ विनयिनौ रामलक्ष्मणाविव नन्दनौ ।
जातौ **वीरनृसंह्ये**(हे)न्द्र**कृष्णरा**[**य**महीपती] ॥
वीरश्री**नारसिंह्य**(ह·) स विजयनगरे रत्नसिंहासनस्थः
कीर्त्या नीत्या निरस्यन्नृ[गनलनहुषा]नप्यव[न्या]मथान्यान् ।
आ सेतोरा सुमेरोरवनिसुरनुत स्वैरमा चोदया[द्रे-
रा पाश्चात्याच]लात्तादखिलहृदयमावर्ज्य राज्यं शशास ॥
नानादानान्यका[र्षीत्कनकस]दसि [यः श्री]विरूपाक्षदेव-
स्थाने श्रीकालहस्तीशिशुरपि नगरे वेङ्क[टा]द्रौ च का[ञ्च्याम्] ।
श्रीशैले शोणशैले महति हरिहरेऽहोबले सङ्गमे च
श्रीरङ्गे कुम्भघोणे [ह]त[तम]सि महानन्दितीर्थे निवृत्तौ ॥
गोकर्ने(र्णे) रामसेतौ जगति तदितरेष्वप्यशेषेषु पुण्य-
स्थानेष्वार[ब्धना]नाविधबहलमहादानवारिप्रवाहै· ।
यस्योदञ्चत्तुरङ्गप्रकरखुररजःशुष्यद[म्भोधिम]ग्न-
क्ष्माभृत्पक्षच्छिदोद्यत्तरकुलिशधरोत्कुण्ठिता कुण्ठिताभूत् ॥
ब्रह्माण्डं विश्वचक्रं [घट]मुदितमहाभूतकं रत्नधेनुं
स[प्तां]भोधिं च कल्पक्षितिरुहतिलकं काञ्चनीं कामधेनुम् ।
स्वर्न(र्ण)क्ष्मां यो हिरण्याश्वरथमपि तु[लापू]रुषं गोसहस्रं
हेमाश्वं हेमगर्भं कनककरिरथं पञ्चलाङ्गल्यतानीत् ॥

प्रा[ज्यं] प्रशा[स्य] निर्विघ्नं राज्यं द्यामिव शासितुम् ।
तस्मिन्गुणेन विख्याते क्षितेरिन्द्रे [दिवं ग]ते ॥
[ततोऽ]प्य[वा]र्यवीर्यः श्रीकृष्णरायमहीपतिः ।
बिभर्ति मणिकेयूरनिर्वि[शेषं] महीं [भुजे] ॥
कीर्त्या यस्य समन्ततः प्र[सृत]या विश्वं रुचैक्यं व्रजे-
दित्याशङ्क्य [पुरा पुरारिरभवद्भा]लेक्षणः प्रायशः ।
पद्माक्षोऽपि च[तु]र्भुजोऽजनि चतुर्वक्त्रोऽभवत्पद्म[भू]
काली [खड्गमधाद्रमा] च [कमलं] वी[णां] स्ववेणीकरे ॥
शत्रूणां वासमेते ददत इति रुषा किंनु सप्ताम्बुरासी(शी)-
न्नानाशे(से)नातुरङ्गत्रुटितवसुमतीधूलिकापालिकाभिः ।
संशोष्य स्वैरमेतत्प्रतिनिधिजलधिश्रेणिका यो विधत्ते
ब्रह्माण्डस्वर्न्न(र्ण)मेरुप्रमुखनिजमहादानतोयैरमेयैः ॥
मद्वृत्तामर्थिसार्था[.] श्रियमिह सुचिरं भुञ्जतामित्यवेत्य
प्राय[ः]प्रत्यूहहेतोस्तपनरथगतेरालयं देवतानाम् ।
तत्तु दि(त्तद्दिग्)जैत्रवृत्त्यापि च विरुदपदैरङ्कितस्तत्र तत्र
स्तम्भाञ्जातप्रतिष्ठाञ्व्यतनुत भुवि यो भूभृदभ्रंकषाग्रान् ॥
[कां]चीश्रीशैलशोणाचलकनकसभावेङ्कटादिप्रमुख्ये-
ष्वावर्त्यावर्त्य सर्वे[ष्व]तनुत विधिवद्भूयसे श्रेयसे यः ।
देवस्थानेषु तीर्थेष्वपि कनकतुलापूरुषादीनि नाना-
दानान्येवो[प]दानैरपि सममखिलैरागमोक्तानि तानि ॥
रोषकृतप्रतिपार्थिवदण्डः शेषभुजः क्षितिरक्षणशौण्डः ।
भाषेगे तप्पुवरायरगण्डस्तोषकृदर्थि[षु] यो रणचण्डः ॥
राजाधिराज इत्युक्तो यो राजपरमेश्वरः ।
मूळारायरगण्डश्च पररायभयंकरः ॥
हिन्दुरायसुरत्राणो दुष्टशार्दूलमर्दनः ।
गजौघगण्डभेरुण्ड [इ]त्यादिविरुदान्वितः ॥

आलोकय महाराज जय जीवेति वादिभिः।
अङ्गवङ्गकलिङ्गाद्यै[ः] राजभिः सेव्यते च यः॥

स्तुत्यौदार्यसुधीभिः स विजयनगरे रत्नसिं[हासनस्थ]ः
[क्ष्मा]पालान् कृ[ष्ण]रायक्षितिपतिरधरीकृत्य नीत्या नृगादी[न्]।
आ पूर्वाद्रेर[थ]ास्त [क्षि]तिधरकटकादा च हेमाचलान्ता-
दा सेतोरर्थिसार्थिसार्थश्रियमिह बहलीकृत्य कीर्त्या समिन्धे॥

इह किल जगति निखिलकविकुलाभिनन्द्यमानौदार्यधैर्यादिजनितयशः-पूरकर्पूरपूरितब्रह्माण्डकरण्डेन समरचण्डेन विहसितनृगनलनहुषनाभागदुन्धुमारमान्धातृभरतभगीरथदशरथरामादिचरितेन कृतभूसुरत्राणेन परिभूतसुरत्राणेन गजपतिगजकूटपाकलेन विदि(तनाना)कलेन वदनविजिताम्भोजेन भोजेनापरेण काव्यनाटकालंकारमर्मज्ञेन धर्मज्ञेन प्रतिवर्षप्रवर्ति[त]कनकवसन्तमहोत्स[वे]न सवेन कृतार्थितविप्रसार्थे[न] सार्थेन निखिलनृपतिमूर्धन्येन धन्येन **नागाम्बिकानरस**नृपनन्दनेन निखिलहृदयानन्देन समरमुखविजयेन विजयेन दिशां विजयनगरे सिंहासनमारुह्य शासता सकलां भुवं भुजविजितसाम्परायेण कृष्णदेवमहारायेण भुवनमरणसावधानाय श्रीविरूपाक्षाभिधानाय वितीर्णविनतजनहेमकूटाय हेमकूटायतनशालिने शूलिने मधुरफलपूपादिहृद्याय नैवेद्याय सिंगेनायकनहल्लीतिविख्यातनामा चतुरसीमाभिरामो ग्रामो दत्तो वित्तोपकारिणा रवितनयानुकारिणा रङ्गमण्डपोऽपि विरचितस्तस्यैव देवस्य तेनैव प्रकटितनरजनुषा प्रसूनध[नु]षा॥

तदिदमवनीवनीपकविनुतधरायस्य[1] कृष्णरायस्य।
शासनमतिवलशासनतरुकरदानस्य [सापद]ानस्य॥

स्वस्ति श्रीविजयाभ्युदयशालिवाहनशकवर्ष १४३० संदु मेले नडव शुक्लसंवत्सरद माघ शु० १४ लु श्रीमन्महाराजाधिराजराजपरमेश्वरश्रीवीरप्रतापश्रीवीरकृष्णरायमहाराजरुपट्टाभिषेकोत्सवपुण्यकालदल्लु श्रीविरूपाक्षदेवर (इत्यादि देशभाषायामपि सर्वं प्रागुक्तमनूदितम्।)

(एपिग्राफिआ इण्डिक्—३६३-६६ पृष्ठे)

---

१. धराया आय' प्राप्ति'

(११०)

महाराजयशःकर्णदेवानां प्रशस्तिः[१]।

ओं नमो ब्रह्मणे।

जयति जलजनाभस्तस्य नाभीसरोजं
जयति जयति तस्माज्जातवानब्जसूतिः।
अथ जयति स तस्यापत्यमत्रिस्तदक्ष्ण-
स्तदनु जयति जन्म प्राप्तवानब्धिबन्धु॰॥
अथ बोधनमादिराजपुत्रं गृहजामातरमब्जबान्धवस्य।
तनयं जनयांबभूव राजा गगनाभोगतडागराजहंसः॥
पुत्र पुरूरवसमौरसमाप सूनु-
र्देवस्य सप्तजलराशिरसायनस्य।
आसीदनन्यसमभाग्यशतोपभोग्या
यस्योर्वशी च सुकलत्रमिहोर्वरा च॥
अत्रान्वये किल शताधिकसप्तिमेध-
यूपोपरुद्धयमुनोक्तविविक्तकीर्तिः।
सप्ताब्धिरत्नरसनाभरणाभिराम-
विश्वंभराशुभरतो **भरतो** बभूव॥
हेलागृहीतपुनरुक्तसमस्तशस्त्रो
गोत्रे जयत्यधिकमस्य स **कार्तवीर्यः**।
अत्रैव **हैहय**नृपान्वयपूर्वपुंसि
राजेति नाम शशलक्ष्मणि चक्षमे यः॥

---

१. इय प्रशस्तिश्च Professor F. Kielhorn Ph. D., C. I. E. महाशयै Dr Burgess, Mr. Fleet, and Colonel J T. Temple महाशयसमत्या व्याख्याता, एतत्प्रशस्त्याधारशिला नागपुरे वर्तते. अस्या. प्रशस्तेरन्ते खण्डितत्वेन यद्यपि समयो न ज्ञायते, तथापि **यशःकर्ण**महाराजसूनु**गयकर्ण**-धर्मपत्न्या॰ श्रीमत्या **अल्हणदेव्याः** प्रशस्तेः समाप्तौ चेदि(चदेली)राज्यसंवत्सरस्योपलब्ध्या लेखस्यास्यापि समयः समासन्नतया A. D. 1122 वत्सरात्मक. प्रतीयते.

स हिमाचल इव कलचुरिवंशमसूत क्षमाभृतां भर्ता।
मुक्तामणिभिरिवामलवृत्तैः पूतं महीपतिभिः॥

तत्रान्वये नयवतां प्रवरो नरेन्द्र
पौरंदरीमिव पुरीं त्रिपुरीं पुनानः।
आसीन्मदान्धनृपगन्धगजाधिराज-
निर्माथकेसरियुवा **युवराजदेवः**॥

सिंहासने नृपतिसिंहममुष्य सूनु-
मारूरुपन्नवनिभर्तुरमात्यमुख्याः।
कोकल्लमर्णवचतुष्टयवीचिसंघ-
संघट्टरुद्धचतुरङ्गचमूप्रचारम्॥

इन्दुप्रभां निन्दति हारगुच्छं जुगुप्सते चन्दनमाक्षिपन्ती।
यत्र प्रभौ दूरतरं प्रयाते वियोगिनीव प्रतिभाति कीर्तिः॥

मरकतमणिपट्टप्रौढवक्षा स्मिताक्षो
नगरपरिघदैर्घ्यं लङ्घयन्दोर्द्वयेन।
शिरसि कुलिशपातो वैरिणा वीरलक्ष्मी-
पतिरभवदपत्यं यस्य **गाङ्गेयदेवः**॥

स वीरसिंहासनमौलिरत्नं स **विक्रमादित्य** इति प्रसिद्धः।
यस्मादकस्मादपवर्गमिच्छन्नकुच्छल कुं स्वजितां बभार॥

प्राप्ते प्रयागवटमूलनिवेशबन्धौ
सार्धं शतेन गृहिणीभिरमुत्र मुक्तिम्।
पुत्रोऽस्य खड्गदलितारिकरीन्द्रकुम्भ-
मुक्ताफलैः स ककुभोऽर्जति **कर्णदेवः**॥

कनकशिखरवेल्लद्वैजयन्तीसमीर-
ग्लपितगगनखेलत्खेचरी चक्रखेद.।
किमपरमिह काश्यां यस्य दुग्धाब्धिवीची-
वलयबहलकीर्तिः कीर्तनं कर्णमेरुः॥

अग्र्यं धाम श्रेयसो वेदविद्या वल्लीकन्दः स्वःस्रवन्त्याः किरीटम् ।
ब्रह्मस्तम्भो येन **कर्णावती**ति प्रत्यष्ठापि क्ष्मातलब्रह्मलोकः ॥

अजनि कलचुरीणां स्वामिना तेन हूणा-
न्वयजलनिधिलक्ष्म्यां श्रीम**दावल्लदेव्याम्** ।
शशभृदुदयस(श)ङ्काक्षुब्धदुग्धाब्धिवेला-
सहचरितयसः(शः)श्रीः श्री**यसः(शः)कर्ण**देवः ॥

[चन्द्रार्कदीप]वति पर्वतराजपूर्ण-
कुम्भावभासिनि महाब्धिचतुष्कमध्ये ।
चक्रे पुरोहितपुरस्कृतिपूतकर्मा
धर्मात्मनोऽस्य हि पितैव महाभिषेकम् ।

न खलु स[मदगो]ष्ठी पक्षपातस्य पात्रं
न खलु कलुषचर्याकज्जलो[द्रावकश्च] ।
कलयति कलिनामन्युद्गमं यस्त्रिजा(या)मा
तमसि जयति जम्बूद्वीपरत्नप्रदीपः ॥

चिन्तामणि[कृष्ण](?) सु(शु)क्तियुग्मक्रोडे स्याद्यदि कामधेनुदुग्धम् ।
दृश्येत दृशोस्तस्य दातुः सादृश्यं धवलारुणेक्षणस्य ॥

यः ककुप्कुञ्जरालानस्तम्भसब्रह्मचारिणः ।
[आसा(शा)न्ते]षु जयस्तम्भानुदस्तम्भयदुच्चकैः ॥

यो ब्रह्मणां पाणिषु पञ्चषाणि दाता निधत्ते पयसः पृषन्ति ।
तैरेव तृष्णामवधूय ते च रत्नाकरेऽपि प्रथयन्त्यव[ज्ञाम्] ॥

महीभर्ता महादानैस्तैस्तुलापुरुषादिभिः ।
गरिम्णा [मे]रुरत्यर्थं कृतार्थयति योऽर्थिनः ॥

स्वर्गराजगजदन्तरुचीनि क्षीरनीरनिधिसं(शं)खसु(शु)चीनि ।
सा(शा)ङ्गि[वेष]फणिकञ्चुकभांसि स्फीततां दधति यस्य यसां(शां)सि ।

अन्ध्राधीशमरन्ध्रदोर्विलसितं स्वच्छन्दमुच्छिन्दता
येनाभ्यर्च्यत भूरिभिः स भगवान्भीमेस्व(श्व)रो [भूष]णैः ।

यस्या[व]र्ण[यदात्त]नृत्यलहरीद्रु(?)वल्गिगोदावरी
[वीर्याण्यु]न्मदहंसनादमधुरैः स्रोतःस्वरैः सप्तभिः ॥
कुर्वन्मही ब्राह्मणसादरिक्षत्रतिव (ब)ह्र्णः ।
शा(सा)र्धं परसु(शु)रामेण यः स्पर्धामधिरोहति ॥
स च परमभट्टारकमहाराजाधिराजपरमेस्व(श्व)रश्रीवामदेव···· ····
······ ···· ·· ····· ·········· ······(इतोऽग्रे त्रुटितम् ।)

(एपिग्राफिआ इण्डिका २ । ३-५)

(१११)

श्रीमद्यशःकर्णमहाराजसुतगयकर्णमहाराजधर्मपत्न्याः श्रीमदल्हणदेव्या दानपत्रम्[1] ।

ओं नमः शिवाय ।

कल्याणितामविकलां भवता तनोतु
भाले कलानिधिकला शशिशेखरस्य ।
एकैव या प्रथमसार्थगता द्वितीया
बुद्धिं प्रदोषविरहेऽपि करोति नित्यम् ॥
किं मालाः कुमुदस्य किं शशिकलाः किं धर्म्यकर्माङ्कुराः
किं वा कञ्चुकिकञ्चुकाः किमथवा भूत्युद्गमा भान्त्यमी ।
इत्थं नाकिवितर्किताः शिवशिरःसंचारिनाकापगा-
रिङ्गद्वल्गुतरङ्गभङ्गिततयः पुण्यप्रपाः पान्तु वः ॥
भूतं सद्विभु यद्विभाति भुवनं यद्विभ्रमाद्यज्जग-
न्नेत्रानन्दकरं धराश्रयरसाद्यन्यत्वहेतुश्च यत् ।

---

१. दानपत्रमिदं Professor F. Kielhorn, Ph. D., C. I. E., Gottingen, महाशयैः पुनः प्रकाशितम्, अस्य समाप्तौ चेदि(चदेरी)राजधानीसंवत्सराणां ९०७ (A. D. 1156) लिखितत्वान्नात्र समये विवादः.

यद्गन्धोद्धुरधाम यच्च यजते शीतं यदेकान्ततः
सस्पर्शं यदरूपमेभिरवताद्युष्माञ्शरीरैः शिवः ॥
शक्तिहेतिपरप्रीतिहेतुश्चन्द्रकचर्चितः ।
ताण्डवाडम्बरं कुर्यान्नीलकण्ठः प्रियाणि वः ॥
विघ्नौघसंतमससंहरणाय शक्तं
मुक्तं कलङ्ककलया शकलं सुधांशोः ।
कुन्दावदाततरदन्तमिषाद्दधानं
श्रेयः परं दिशतु वः सदयं द्विपास्यः ॥
रूपैरनेकैर्व्यवहारजातमातन्वती पातु सरस्वती वः ।
यल्लेशलालित्यलवादपि स्यात्संसत्सु पुंसां गरिमा गरीयान् ॥
गोत्रे रात्रिकरस्य भूपतिरभूद्बिभ्रत्सहस्रं करा-
न्प्रत्येकं त्रिजगन्मनोविनयने रात्रिंदिवं जागृविः ।
तेजोभिर्जगतीभृतां परिभवी **नाम्नार्जुनः** संस्मृते-
र्यस्याद्याप्यधिगम्यते वसु गतं नीतं च चौरैश्चिरम् ॥
तस्यान्वये समभवन्प्रथितः पृथिव्या
नाथः कथाद्भुततमापि वृथा न यस्य ।
कोकिल्लदेव इति बिभ्रदु[दार]रूपं
नाम त्रिलोकसुखसंजननैकधाम ॥
निर्जित्योर्जितगर्वपर्वतभृतः प्रत्यर्थिपृथ्वीभुजः
प्राप्तानन्तयशा बभूव नृपति**र्गाङ्गेयदेव**स्ततः ।
थ्वी येन विधाय मेरुमतुलं कल्पद्रुमेणार्थिनां
स्वर्गादूर्ध्वमधःस्थितापि विबुधाधारे समापादिता ॥
पुण्यामृतेन संसिक्ता शुद्धसत्त्वप्रवर्धिता ।
यत्कीर्तिव्रततिः सर्वं व्याप ब्रह्माण्डमण्डपम् ॥
तेनाजनि महीपालः **कर्णः** स्वर्णेन कुर्वता ।
पूर्णतृष्णार्णवानर्थिस्वार्थानर्थितकीर्तिना ॥

पाण्ड्यश्चण्डिमतां मुमोच मुरलस्तत्याज गर्व[ग्र]हं
[कु]ङ्गः सद्गतिमाजगाम चकपे वङ्गः कलिङ्गैः सह ।
कीरः कीरवदास पञ्जरगृहे हूणः प्रहर्षं जहौ
यस्मिन्राजनि शौर्यविभ्रमभरं बिभ्रत्यपूर्वप्रमे ॥
अस्मद्भर्तृपराभवेन सकलां भुङ्क्ते [भुवं] यामसौ
तामेतां तनवामहे तनुतराकारामितीव स्त्रियः ।
यत्प्रत्यर्थिमहीभुजां नयनजैर्बाष्पैः पयोधीन्व्यधुः
स्फारात्त्रलमहोर्मिभिः पुनरमी तं वर्ध[यांच]क्रिरे ॥
चम्पारण्यविदारणोद्धतयशःशुभ्रांशुना भासय-
न्नाशाचक्रमवक्रभावहृदयः क्ष्मापालचूडामणिः ।
तस्माज्जन्म समाससाद विशदं श्रीमान्**यशःकर्ण** इ-
त्यौदार्याद्ध[निकी]चकार विबुधान्यः प्रेक्ष्य सर्वानपि ॥

तस्मादशेषगुणरत्ननिधेरगाधा-
द्भूवल्लभः समभवद्**गयकर्णदेवः** ।
यस्य प्रतापतपनोऽप्यरिसुन्दरीणां
शोकार्णवोदयनिदानपदं प्रपेदे ॥
द्युतिजितहरितालः श्रीलताकल्पशालः
पृथुतरगुणमालः शत्रुवर्गैककालः ।
विमलितरणभालः कान्तकीर्त्या श(स)टालः
शिततरकरवालः सोऽभवद्भूमिपालः ॥
अस्ति प्रसिद्धमिह गोभिलपुत्रगोत्रं
तत्राजनिष्ट नृपतिः किल **हंसपालः** ।
शौर्यावसज्जितनिरर्गलसैन्यसंघ-
नम्रीकृताखिलमिलद्रिपुचक्रवालः ॥
तस्याभवत्तनुभवः प्रणमत्समस्त-
सामन्तशेखरशिरोमणिरञ्जिताङ्घ्रिः ।

श्रीवैरिसिंहवसुधाधिपतिर्विशुद्ध-
बुद्धेर्निधिर्न परमर्थिजनस्य चोच्चैः ॥
स वैरिसिंहोऽप्यनयद्रिपूणां कुलानि गम्भीरगुहागृहाणि ।
स्वयं च तेषामधिशय्य चक्रे पुराणि दूरावजितालकानि ॥
तस्मादजायत समस्तजनाभिवन्द्य-
सौन्दर्यशौर्यभरभङ्गुरिताहितश्री ।
पृथ्वीपतिर्विजयसिंह इति प्रवर्ध-
मानः सदा जगति यस्य यशःसुधांशु ॥
तस्याभवन्मालवमण्डलाधिनाथोदयादित्यसुता सुरूपा ।
शृङ्गारिणी श्यामलदेव्युदारचरित्रचिन्तामणिरर्चितश्रीः ॥
मेनायामिव शंकरप्रणयिनी क्षोणीभृतां नायका-
द्वीरिण्यामिव शुभ्रभानुवनिता दक्षात्प्रजानां सृजः ।
तस्माद्ल्हणदेव्यजायत जगद्रक्षा क्षमाद्भूपते-
रेतस्यां निजदीर्घवंशविशदप्रेङ्खत्पताकाकृतिः ॥
विवाहविधिमाधाय गजंकर्णनरेश्वरः ।
चक्रे प्रीतिं परामस्यां शिवायामिव शंकरः ॥
शृङ्गारशाला कलशी कलानां लावण्यमाला गुणपण्यभूमिः ।
असूत पुत्रं गयकर्णभूपादसौ नरेशं नरसिंहदेवम् ॥
अस्य श्रीनरसिंहदेवनृपतेः प्रोद्यन्यशश्चन्द्रमा
दिग्भित्तीर्विदधातु बन्धुरसुधासंभारगर्भा इव ।
भूभर्तारमवाप्य चैनमुचितं प्रीति तथा प्राप्तुया-
त्पूर्वेषां न यथा मनागपि महाक्षोणीभृतां ध्यायति ॥
अस्यानुजो विजयतां जयसिंहदेवः
सौमित्रिवत्प्रथमजेद्धुतरूपसेव ।
यो मेघनादबहुमायमहातिकाय-
सैन्यं द्विषामभिभवन्नह-[ह]-प्रहस्तः ॥

अकारयन्मन्दिरमिन्दुमौलेरिदं मठेनाद्भुतभूमिकेन ।
सहामुना श्रीनरसिंहदेवप्रसूरसावल्हणदेव्युदारा ॥
व्याख्यानशालामुद्यानमालामविकलाममूम् ।
अकारयत्स्वयं शंभुप्रासादालीद्वयं निजैः ॥
देवायास्मै वैद्यनाथाभिधाय प्रादादेवी जाउलीपत्तलायाम् ।
ग्रामं नाम्ना नामनुण्डीति सर्वादायै' सार्द्धं चारुचर्चाप्रसिद्ध्यै ॥
नर्मदादक्षिणे कूले पर्वतोपत्यकाश्रये ।
तथा परमदाद्ग्रामं नाम्ना मकरपाटकम् ॥
लाटान्वयः पाशुपतस्तपस्वी श्रीरुद्रराशिर्विधिवद्वच(द्धि)धत्ताम् ।
स्थानस्य रक्षाविधिमस्य तावद्यावन्निमीते भुवनानि शंभुः ॥
मौनान्वये भार्गववैतहव्यसावेतसेति प्रवरत्रयाढ्ये ।
महेश्वराख्याद्धरणीधरोऽभून्नाम्ना गरिम्णा यशसा श्रिया च ॥
कोमलकान्तिसटालेनोच्चैः स्नेहातिभारभरितेन ।
दीर्घमनोज्ञदशेन त्रिभुवनदीपायितं येन ॥
पृथ्वीधरस्तस्य सुतः समस्तगम्भीरशास्त्रार्णवपारदृश्वा ।
प्रशस्तिमेतामलिखद्यदीयैर्दिङ्मण्डली शिष्यगणैर्विजिग्ये ॥
एतत्स्यावरजस्तर्कनिष्णातोद्भुतनैपुणः ।
प्रशस्तिमकरोदेतां सूरिः शशिधराभिधः ॥
असूत्रयदिदं सर्वं विश्वकर्मविधानवित् ।
पीथेसमभिधः सूत्रधारः पृथ्वी पृथुर्यथा ॥
सूत्रधाराग्रणीबालसिंहसूनुर्महीधरः ।
शिलां तथाकरोद्वर्णैर्नभस्तारकितं यथा ॥
संवत् ९०७ मार्गसुदि ११ रवौ

(एपिग्राफिआ इण्डिक् २।१०-१३.)

(११२)

शत्रुंजयाचलबिम्बसप्तमोद्धार[1]प्रशस्तिः।

ॐ स्वस्ति श्रीगुर्जरधरित्र्यां पातसाहश्रीमहिमूदपट्टप्रभाकर-पातसाहश्रीमदाफरसाहपट्टोद्योतकारक-पातसाहश्रीश्रीश्रीश्रीश्रीबाहदरसाहविजयराज्ये संवत् १५८७ वर्षे राज्यव्यापारधुरंधरपानश्रीमझादषानव्यापारे श्रीशत्रुंजयगिरौ श्रीचित्रकूटवास्तव्य। दो० करमाकृतसप्तमोद्धारसक्ता प्रशस्तिर्लिख्यते—

स्वस्ति श्रीसौख्यदो जीयाद्युगादिजिननायकः।
केवलज्ञानविमलो विमलाचलमण्डनः॥

श्रीमेदपाटे[2] प्रगटप्रभावे भावेन भव्ये भुवनप्रसिद्धे।
श्रीचित्रकूटो[3] मुकुटोपमानो विराजमानोऽस्ति समस्तलक्ष्म्याः॥
सन्नन्दनो[4] दातृसुरद्रुमश्च[5] तुङ्गः सुवर्णोऽपि विहारसार.।
जिनेश्वरस्नात्रपवित्रभूमिः श्रीचित्रकूटः सुरशैलतुल्यः॥
विशालसालक्षितिलोचनाभो रम्यो नृणां लोचनचित्रकारी।
विचित्रकूटो गिरिचित्रकूटो लोकस्तु यत्राखिलकूटमुक्तः॥

तत्र श्रीकुम्भराजोऽभूत्कुम्भोद्भवनिभो नृप.।
वैरिवर्ग(?)समुद्रो हि येन पीतः क्षणात्क्षितौ॥
[त]त्पुत्रो राजमल्लोऽभूद्राज्ञां मल्ल इवोत्कट।
सुतः संग्रामसिंहोऽस्य संग्रामविजयी नृपः॥
तत्पट्टभूषणमणिः सिंहेन्द्रवत्पराक्रमी।
रत्नसिंहोऽधुना राजा राजलक्ष्म्या विराजते॥

इतश्च गोपाह्वगिरौ गरिष्ठः श्रीवप्पभट्टिप्रतिबोधितश्च।
श्रीआमराजोऽजनि तस्य पत्नी काचिद्बभूव व्यवहारिपुत्री॥

---

१ इय प्रशस्तिश्च Mr. Cousens महाशयैरुपलब्धा G Buhler, Ph. D, L. L D, C I E., महाशयैर्व्याख्याता २ 'मेवाड' इति नाम्नाधुना प्रसिद्धे ३ 'चितौड' इति नाम्ना प्रसिद्धोऽय पर्वत ४ सता नन्दनः नन्दनाख्यवनयुक्तश्च. ५. दातार एव सुरद्रुमा यत्र, दातारः सुरद्रुमा यत्रेत्यादिरीत्या व्याख्येयम्

तत्कुक्षिजाता किल राजकोष्ठागाराह्वगोत्रे सुकृतैकपात्रे ।
श्रीउश(श्श)वंशे विशदे विशाले तस्यान्वयेऽमी पुरुषाः प्रसिद्धाः॥

श्री**सरणदेव**नामा तत्पुत्रो **रामदेव**नामाभूत् ।
लक्ष्मीसिंहः पुत्रोत(त्रस्त)त्पुत्रो **भुवनपाला**ख्यः ॥
श्री**भोजराज**पुत्रो........**रसिंहा**ख्य एव तत्पुत्रः ।
षेताकस्तत्पुत्रो **नरसिंह**स्तत्सुतो....... .... ॥

तत्पुत्र**स्तोला**ख्यः पत्नी तस्या(स्य) प्रभूतकुलजाता ।
तारादे परनाम्नी **लीलू** पुण्यप्रभापूर्णा ।

तत्कुक्षिसमुद्भताः ष(ट्)पुत्राः कल्पपादपाकाराः ।
[धर्मा]नुष्ठानपराः श्रीव(म)न्तः श्रीकृतोऽन्येषाम् ॥

प्रथमो **रत्ना**ख्यसुत. **सम्यक्त्वोद्योत**कारकः कामम् ।
श्रीचित्रकूटनगरे प्रासादः [कारितो] येन ॥

तस्यास्ति **कोमला** पा(क)ल्पवल्लीव विशदा सदा ।
भार्या **रजमलदेवी** पुत्र[ः] श्री**रङ्गनामासौ** ॥

भ्रातान्य. **पोमाह्वः** पतिभक्ता दानशीलगुणयुक्ता ।
पद्मापाटमदेव्यौ पुत्रौ **माणिक्यहीराह्वौ** ॥

बन्धुर्गणस्तृतीयभार्या गुणरत्नराशिविख्याता ।
गडरागारतदेव्यौ पुत्रो **देवा**भिधो ज्ञेयः ॥

तुर्यो **दशरथ**नामा भार्या तस्यास्ति देवगुरुभक्ता ।
देवल[दू]रमदेव्यौ पुत्र· **केल्हा**भिधो ज्ञेयः ॥

भ्रातान्यो **भोजा**ख्यो भार्या तस्यास्ति सकलगुणयुक्ता ।
भावलहर्षमदेव्यौ पुत्रः **श्रीमण्डणो** जीयात् ॥

सदा सदाचारविचारचारुचातुर्यधैर्यादिगुणै· प्रयुक्तः ।
श्रीकर्मराजो भगिनी च तेषां जीयात्सदा **सूहवि**नामधे[या] ॥
कर्माख्यभार्या प्रथमा **कपूर[ा]** देवी पुन· **कामलदे** द्वितीया ।
श्रीभीषजीकस्वकुलोदयाद्रिसूर्यप्रभः कामलदेविपुत्रः ॥

श्रीतीर्थयात्राजिनबिम्बपूजा पदप्रतिष्ठादिकवर्मपुर्या।
सुपात्रदानेन पवित्रमात्राः सर्वेदशाः सत्पुरुषाः प्रसिद्धाः॥

श्रीरत्नसिंहराज्ये राज्यव्यापारभारधौरेयः।
श्रीकर्मसिंहदक्षो मुख्यो व्यवहारिणां मध्ये॥
श्रीशत्रुंजयमाहात्म्यं श्रु[त्वा] सद्गुरुसंनिधौ।
तस्योद्धारकृते भावः कर्मराजस्य [ह्य]चभूत्॥
आगत्य गौर्जरे देशे विवेकेन नरायणे।
वसन्ति विबुधा लोकाः पुण्यश्लोका इवाद्भुताः॥
तत्रास्ति श्रीधराधीशः श्रीमद्बाहदरो नृपः।
तस्य प्राप्य स्फुरन्मानं पुण्डरीके समाययौ॥
राज्यव्यापारधौरेयः षानः श्रीमान् मझादकः।
तस्य गेहे महामन्त्री रवाख्यो नरसिंहकः॥
तस्य सन्मानमुत्प्राप्य बहुवित्तव्ययेन च।
उद्धरः सप्तमस्तेन चक्रे शत्रुंजये गिरौ॥

श्रीपादलिप्तललनासरशुद्धदेशे
सद्वाद्यमङ्गलमनोहरगीतना[दैः]।
श्रीकर्मराजसुधिया जलया[त्रि]कायां
चक्रे महोत्सववरः सुगुरूपदेशात्॥

चञ्चच्चङ्गमृदङ्गरङ्गरचनाभेरीनफेरीरवा-
वीणा[वंश]विशुद्धनालविभवासाधर्मि [वात्सल्य]कम्।
वस्त्रालंकृति[हेम]तुङ्गतुरगादीनां च स[द्व]र्षण-
मेवं विस्तरपूर्वकं गिरिवरे बिम्बप्रतिष्ठापनम्॥

विक्रमसमयातीते तिथिमितसंवत्सरेऽश्ववसु(१५८७)वर्षे।
शाके जगत्रिबाणे (१४५३) वैशाखे कृष्णषष्ठ्यां च॥

मिलिताः सूरयः संघा मार्गणमुनिपुङ्गवाः।
वहमाने धनुर्लग्ने प्रतिष्ठा कारिता वराः॥

लावण्यसमयाख्येन पण्डितेन महात्मना।
स[प्त]मोद्धारसक्ता च प्रशस्तिः प्रकटीकृता॥

श्रीमद्बा[हदर]क्षितीशवचनादागत्य शत्रुंजये
प्रासादं विदधाप्य(?) येन वृ····ा····द्बिम्बमारोप्य च।
उद्धारः किल सप्तमः कलियुगे चक्रेऽथ ना········
जीयादेष सदोशवंशमुकुट· श्रीकर्मराजश्चिरम्॥

यत्कर्मराजेन कृतं सुकार्यमन्येन केनापि कृतं हि तन्नो।
यन्म्लेच्छराज्ये[ऽपि नृपा]ज्ञयैवोद्धारः कृत· सप्तम एष येन॥
स········र्याणि बहूनि संघे कुर्वन्ति भव्या· परम[त्र] काले।
कर्माभिधानव्यवहारिणैवोद्धारः कृतः श्रीविमलाद्रिशृङ्गे॥
श्रीचित्रकूटोदयशैलशृङ्गे कर्माख्यभानोरुदयान्वितस्य।
शत्रुंजये बिम्बविहारकृत्य[कर्माव]लीयं स्फुरतीति चित्रम्॥
श्रीमेदपाटे विषये निवासिनः श्रीकर्मराजस्य च कीर्तिरु[ज्वला]।
देशेष्वनेकेष्वपि [सचरत्य]हो ज्योत्स्नेव चन्द्रस्य नभोविहारिण॥

दत्तं येन पुरा धनं बहु सुरत्राणाय तन्मानतो
यात्रा येन [नृ]णां च संघपतिना शत्रुंजये कारिता।
साधूनां सुगमैव सा च विहिता चक्रे प्रतिष्ठार्हता-
मित्थं वर्णनमुच्यते कियदहो श्रीकर्मराजस्य तु॥

येनोद्धारः शुभवति नगे कारित· पुण्डरीके
स्वात्मोद्धारो विशदमतिना दुर्गतस्तेन चक्रे।
येनाकारि प्रवरविधिना तीर्थनाथप्रतिष्ठा
प्राप्तास्तेन त्रिभुवनतले सर्वदैव प्रतिष्ठा॥

सौम्यत्वेन निशामणिर्दिनमणिस्तीव्रप्रतापेन च
वंशोद्दीपनकारणाद्गृहमणिश्चिन्तामणिर्दानतः।
धर्माच्छ्राद्धशिरोमणिर्मदविषध्वस्त(स्ता)न्मणिर्भोगिनः
एकानेकमयो गुणैर्नवनवैः श्रीकर्मराजः सुधीः॥

तोलासुतः सुतन[यो] विनयोज्ज्वलश्च
　　लीलूसुकुक्षिनलिनीशुचिराजहंसः ।
संमानदानविदुरो मुनिपुंगवानां
　　सद्बुद्धबान्धवयुतो······कर्मराजः ॥
कर्मी श्रीकर्मराजोऽयं कर्मणा केन निर्ममे ।
तेषां शुभानि कर्माणि यैर्दृष्टः पुण्यवानसौ ॥
अथधीशः पुण्डरीकस्तु महादेवा(वः) कपर्दिराट् ।
श्राद्धश्रीकर्मराजस्य सुप्रसन्ना भवन्त्वमी ॥
श्रीशत्रुंजयतीर्थोद्धारे ।

(इतः परं देशभाषा—)

(एपिग्राफिआ इण्डिका २।४२-४७)

---

(११३)

सौवर्णिकसाहश्रीतेजःपालोद्धृतविमलाचल[पट्ट]न-श्रीआदीशमूलप्रासादप्रशस्तिः ।

ॐ नमः ।

श्रेयस्वी प्रथमः प्रभुः प्रथिमभाग्नैपुण्यपुण्यात्मना-*
　　मस्तु स्वस्तिकरः सुखाब्धिमकरः श्री····देवः स वः ।
पद्मोल्लासकरः करैरिव रविर्व्योम्नि क्रमाम्भोरुह-
　　न्यासैर्यस्तिलकीबभूव भगवाञ्शत्रुंजयोऽनेकशः ॥
श्रीसिद्धार्थनरेशवंशसरसीजन्माब्जिनीवल्लभः
　　पायाद्वः परमप्रभावभवनं **श्रीवर्धमानः** प्रभुः ।
उत्पत्तिस्थितिसंहृतिप्रकृतिवाग्यद्वीर्जगत्पावनी
　　स्वर्वापीव महाव्रतिप्रणयभूरासीद्रसोल्लासिनी ॥
आसीद्वासववृन्दवन्दितपदद्वन्द्वः पदं संपदां
　　तत्पट्टाम्बुधिचन्द्रमा गणधरः श्रीमान्सुधर्माभिधः ।

यस्यौदार्ययुता प्रहृष्टसुमना अद्यापि विद्यावती
धत्ते संततिरुन्नतिं भगवती वीरप्रभोर्गौरिव ॥
श्रीसुस्थितः सुप्रतिबुद्ध एतौ सूरी अभूतां तदनु क्रमेण ।
याभ्यां गणोऽभूदिह कोटिकाह्वश्चन्द्रार्यमभ्यामिव सुप्रकाशः ॥
तत्राभूद्वज्रिणां संघः श्रीवज्रर्षिगणाभिधः ।
मूलं श्रीवज्रशाखाया गङ्गाया हिमवानिव ॥
तत्पट्टाम्बरदिनमणिरुदितः श्रीवज्रसेनगुरुरासीत् ।
नागेन्द्रचन्द्रनिर्वृतिविद्याधरसंज्ञकाश्च तच्छिष्याः ॥
स्वस्वनामसमानानि येभ्यश्चत्वारि जज्ञिरे ।
कुलानि काममेतेषु कुलं चान्द्रं तु दिद्युते ॥
भास्करा इव तिमिरं हरन्तः ख्यातिभाजनम् ।
भूरयः सूरयस्तत्र जज्ञिरे जगतां मताः ॥
बभूवुः क्रमतस्तत्र श्रीजगच्चन्द्रसूरयः ।
यैस्तपाविरुदं लेभे बाणसिद्ध्यर्क(१२८५)वत्सरे ॥
क्रमेणास्मिन्गणे हेमविमलाः सूरयोऽभवन् ।
तत्पट्टे सूरयोऽभूवन्नानन्दविमलाभिधाः ॥
साध्वाचारविधिः पथः शिथिलितः सम्यक्श्रियां धाम यै-
रुद्दध्रे स्तनसिद्धिसायकसुधारोचि(१५८२)र्मितेऽनेहसि ।
जीमूतैरिव यैर्जगत्पुनरिदं तापं हरद्भिर्भृशं
सश्रीकं विदधे गवां शुचितमैः स्तोमैः रसोल्लासिभिः ॥
पद्माश्रयैरलमलंक्रियते स तेषां
प्रीणन्मनांसि जगतां कमलोदयेन ।
पट्टः प्रवाह इव निर्जरनिर्झरिण्याः
शुद्धात्मभिर्विजयदानमुनीशहंसैः ॥
सौभाग्यं हरि[1]सर्वपर्वहरणं रूपं च रम्भापति-[2]
श्रीजैत्रं शतपत्रमित्र[3]महसां चौरं प्रतापं पुनः ।

१ हरि: सूर्यः २. रम्भापतिरिन्द्रः ३ शतपत्रमित्रः सूर्यः.

येषां वीक्ष्य सनातनं मधुरिपुस्वःस्वामिधर्मांशवो
　जाताः काममपत्रपाभरभृतो गोपत्वमाप्तास्त्रयः ॥
तत्पट्टः प्रकटः प्रकामकलितोद्द्योतस्तथा सौधव-
　त्सस्नेहैर्यतिराजहीरविजयस्नेहप्रियैर्निर्ममे ।
सौभाग्यं महसा भरेण महतामत्यर्थमुल्लासिनां
　बिभ्राणः स यथाजनिष्ट सुदृशां कामप्रमोदास्पदम् ॥
देशाद्गुर्जरतोऽथ सूरिवृषभा आकारिताः सादरं
　श्रीमत्साहिअकब्बरेण विषयं मेवातसंज्ञं शुभम् ।
शा""""जपाणयोऽवतमसं सर्वं हरन्तो गवा
　स्तोमैः सूत्रितविश्वविश्वकमलोल्लासैर्नभोऽर्का इव ॥
चक्रुः फतेपुरम""""""""""""""""भौम-
　दृग्युग्मकोककुलमाप्तसुखं सृजन्तः ।
अब्देऽङ्कपावकनृप(१६३९)प्रमिते स्वगोभिः
　सोल्ला""""""""""म्बुजकाननं ये ॥
दामेवाखिलभूपमूर्धसु निजामाज्ञां सदा धारय-
　ञ्श्रीमान्साहिअकब्बरो नरवरो देशेष्वशेषेष्वपि ।
षण्मासाभयदानपुष्टपटहोद्घोषानघध्वंसिनः
　कामं कारयति स हृष्टहृदयो यद्वाक्कलारञ्जितः ॥
यदुपदेशवशेन मुदं दधन्निखिलमण्डलवासिजने निजे ।
मृतधनं च करं च सुजीजिआभिधमकब्बरभूपतिरत्यजत् ॥
यद्वाचा कतकाभया विमलितः स्वान्ताम्बुपूरः कृपा-
　पूर्णः शाहिरनिन्द्यनीतिवनिताक्रोडीकृतात्मात्यजत् ।
शुल्कं त्यक्तुमशक्यमन्यधरणीराजां जनप्रीतये
　तद्वाग्नीडजपुञ्जपूरुषपशूंश्चामूमुचद्भूरिशः ॥
यद्वाचां निचयैर्मुधाकृतसुधास्वादैरमन्दैः कृता-
　ह्लादः श्रीमदकब्बरः क्षितिपतिः संतुष्टिपुष्टाशयः ।

---

१. गावो धेनवः चक्षूंषि किरणाश्च.

त्यक्त्वा तत्करमर्थसार्थमतुलं येषां मनःप्रीतये
जैनेभ्यः प्रददौ च तीर्थतिलकं शत्रुंजयोर्वीधरम् ॥
यद्वाग्भिर्मुदितश्चकार करुणास्फूर्जन्मना पौस्तकं
भाण्डागारमपारवाङ्मयमयं वेश्मेव वाग्दैवतम् ।
यत्संवेगभरेण भावितमतिः शाहिः पुनः प्रत्यहं
पूतात्मा बहु मन्यते भगवतां सद्दर्शनो दर्शनम् ॥
यद्वाचा तरणित्विषेव कलितोल्लासं मनःपङ्कजं
बिभ्रच्छाहिअकब्बरो व्यसनधीपाथोजिनीचन्द्रमाः ।
जज्ञे श्राद्धजनोचितैश्च सुकृतैः सर्वेषु देशेष्वपि
[वि]ख्यातोऽर्हतभक्तिभावितमतिः श्री**श्रेणिक**क्ष्मापवत् ॥
लुम्पाकाधिप**मेघजी**ऋषिमुखा हित्वा कुमत्याग्रहं
भेजुर्यच्चरणद्वयीमनुदिनं भृङ्गा इवाम्भोजिनीम् ।
उल्लासं गमिता यदीयवचनैर्वैराग्यरङ्गोन्मुखै-
र्जाताः स्वस्वमतं विहाय बहवो लोकास्तपासंज्ञकाः ॥
आसीच्चैत्यविधापनादिसुकृतक्षेत्रेषु वित्तव्ययो
भूयान्यद्वचनेन गुर्जरधरामुख्येषु देशेष्वलम् ।
यात्रा गुर्जरमालवादिकमहादेशोद्भवैर्भूरिभिः
संघैः सार्धमृषीश्वरा विदधिरे शत्रुंजये ये गिरौ ॥
तत्पट्टमब्धिमिव रम्यतमं सृजन्तः
स्तोमैर्गवां सकलसंतमसं हरन्तः ।
कामोल्लसत्कुवलयप्रणया जयन्ति
स्फूर्जत्कला **विजयसेन**मुनीन्द्रचन्द्राः ॥
यत्प्रतापस्य माहात्म्यं वर्ण्यते किमतः परम् ।
अस्वप्नाश्चक्रिरे येन जीवन्तोऽपि हि वादिनः ॥
सौभाग्यं विषमायुधात्कमलिनीकान्ताच्च तेजस्विना(ता)-
मैश्वर्यं गिरिजापतेः कुमुदिनीकान्तात्कलामालिना(ता)म् ।

माहात्म्यं धरणीधरान्मखभुजां गाम्भीर्यमम्भोनिधे-
　　रादायाम्बुजभूः प्रभुः प्रविदधे यन्मूर्तिमेतन्मयीम् ॥
ये च श्रीमदकब्बरेण विनयादाकारिताः सादरं
　　श्रीमल्लाभपुरं पुरंदरपुरं व्यक्तं सुपर्वोत्करैः ।
भूयोभिर्व्रतिभिर्बुधैः परिवृता वेगादलंचक्रिरे
　　सामोदं सरसं सरोरुहवनं लीलामराला इव ॥
अर्हन्तं परमेश्वरत्वकलितं संस्थाप्य विश्वोत्तमं
　　साक्षात्साहिअकब्बरस्य सदसि स्तोमैर्गवामुद्यतैः ।
यैः संमीलितलोचना विदधिरे इत्यक्षशूरैः श्रिया
　　वादोन्मादभृतो द्विजातिपतयो भट्टा निशाटा इव ॥
श्रीमत्साहिअकब्बरस्य सदसि प्रोत्सर्पिभिर्भूरिभि-
　　र्वादैर्वादिवरान्विजित्य समदान्सिंहैर्द्विपेन्द्रानिव ।
सर्वज्ञाशयतुष्टिहेतुरनघो दिश्युत्तरस्यां स्फुर-
　　न्यैः कैलास इवोज्ज्वलो निजयशःस्तम्भो निचख्ने महान् ॥
दत्तं साहसधीरहीरविजयश्रीसूरिराजां पुरा
　　यच्छ्रीसाहिअकब्बरेण धरणीशक्रेण तत्प्रीतये ।
तच्चक्रेऽखिलमप्यबालमतिना यत्साज्जगत्साक्षिकं
　　तत्पत्रं फुरमाणसंज्ञमनघं सर्वा दिशो व्यानशे ॥
किं च गोवृषभकासरकान्ता कासरा यमगृहं नहि नेयाः ।
मोच्यमेव मृतवित्तमशेषं वन्दिनोऽपि हि न च ग्रहणीयाः ॥
यत्कलासलिलवाहविलासप्रीतचित्ततरुणा जनतुष्ट्यै ।
स्वीकृतं स्वयमकब्बरधात्रीस्वामिना सकलमेतदपीह ॥
चोलीबेगमनन्दनेन वसुधाधीशेन संमानिता
　　गुर्वी गुर्जरमेदिनीमनुदिनं स्वर्लोकबिब्बोकिनी ।
सद्वृत्ता महसां भरेण सुभगा गाढं गुणोल्लासिनी
　　ये हारा इव कण्ठमम्बुजदृशां कुर्वन्ति शोभास्पदम् ॥

इतश्च

आभूरान्वय[प]द्मपद्मसवया(?) ओकेशवंशेऽभव-
च्छ्रेष्ठी श्रीशिवराज इत्यभिधया सौवर्णिकः पुण्यधीः ।
तत्पुत्रोऽजनि सीधरश्च तनयस्तस्याभवत्पर्वतः
[का]लाह्वोऽजनि तत्सुतश्च तनुजस्तस्यापि वाघाभिधः ॥
तस्याभूद्दूछिआभिधश्च तनुजः ख्यातो रजाईभव-
स्तस्याभूच्च सुहासिणी[ति] गृहिणी पद्मेव पद्मापतेः ।
इन्द्राणीसुरराजयोरिव जयः पुत्रस्तयोश्चाभव-
त्तेजःपाल इति प्रहृष्टसुमनाः पित्रोर्मनः प्रीतिकृत् ॥
कामस्येव रतिर्हरेरिव रमा गौरीव गौरीपते-
रासीत्तेजलदे इति प्रियतमा तस्याकृति········ ।
भोगश्रीसुभगौ गुरौ प्रणयिनौ शश्वत्सुपर्वादरौ
पौलोमीत्रिदशेश्वराविव सुखं तौ दंपती भेजतुः ॥
वैराग्यवारिनिधिपूर्णनिशाकराणा
तेषां च हीरविजयव्रतिसिन्धुराणाम् ।
सौभाग्य[भा]ग्यपरभागविभासुराणां
तेषां पुनर्विजयसेनमुनीश्वराणाम् ॥
वाग्भिः सुधाकृतसुधाभिरुदञ्चिचेताः
श्राद्धः स शोभनमना भजति स्म भावम् ।
श्रीसं[घभ]क्तिघनदानजिनेन्द्रचैत्यो-
द्धारादिकर्मसु भृशं सुकृतिप्रियेषु ॥

(विशेषकम्)

ग्रहैः प्रशस्तेऽह्नि सुपार्श्वभर्तुरनन्तभर्तुश्च शुभा प्रतिष्ठाम् ।
सोऽचीकरत्षड्युगभूपवर्षे[1] हर्षेण सौवर्णिकतेजपालः ॥
आदावार्षभिरत्र तीर्थतिलके शत्रुंजयेऽचीकर-
सै(चै)त्यं शैत्यकरं दृशोर्मणिगणस्वर्णादिभिर्भासुरम् ।

---

१. अङ्कानां वामतो गत्या १६४६ मिते वर्षे इत्यर्थः.

अत्रान्येऽपि भुजार्जितां फलवतीमुच्चैः सृजन्तः श्रियं
प्रासादं तदनुक्रमेण बहवश्चाकारयन्भूभुजः ॥
तीर्थेऽत्र साधु**करमा**भिधो धनी सिद्धिसिद्धितिथि(१५८८)संख्ये ।
चैत्यमचीकरदुक्के**रानन्दविमल**मुनिराजाम् ॥
तं वीक्ष्य जीर्णं भगवद्विहारं स तेजपालः स्वहृदीति दध्यौ ।
भावी कदा सोऽवसरो वरीयान्यत्रात्र चैत्यं भविता नवीनम् ॥
अन्येद्युः स्वगुरूपदेशशरदा कामं वलक्षीकृत-
स्वान्ताम्भाः स वणिग्वरः पुरवरे श्रीस्तम्भतीर्थे वसन् ।
तीर्थे श्रीमति तुङ्गतीर्थतिलके शत्रुंजयेहगृहो(?)-
द्धारं कर्तुमना अजायततमां साफल्यमिच्छन्श्रियः ॥
अत्र स्यात्सुकृतं कृतं तनुमतां श्रेयः श्रियां कारणं
मत्वैवं निजपूर्वजव्रजमहानन्दप्रमोदाप्तये ।
तीर्थे श्री**विमलाचले**ऽतिविमले मौलेऽर्हतो मन्दिरे
जीर्णोद्धारमकारयत्स सुकृती कुन्तीतनूजन्मवत् ॥
शृङ्गेण भिन्नगगनाङ्गणमेतदुच्चै-
श्चैत्यं चकास्ति शिखरास्थितहेमकुम्भम् ।
हस्तेषु हस्तमितमुच्चमुपैति नाक-
लक्ष्मीं विजेतुमिव काममखर्वगर्वाम् ॥
यत्रार्हदोकसि जिताग(म)रकुम्भिकुम्भाः
कुम्भा विभान्ति शरवेदकरेन्दु(१२४५)संख्याः ।
किं सेवितुं प्रभुमयुः प्रचुरप्रताप-
पूरैर्जिता दिनकराः कृतनैकरूपाः ॥
उन्मूलितप्रमदभूमिरुहानशेषा-
न्विश्वेषु विघ्नकरिणो युगपन्निहन्तुम् ।
सज्जाः स इत्थमभिधातुमिवेन्दुनेत्राः(२१)
सिंहा विभान्त्युपगता जिनधाम्नि यत्र ॥

योगिन्यो यत्र शोभन्ते चतस्रो जिनवेश्मनि ।
निषेवितुमिवाक्रान्ताः प्रतापैरागता दिशः ॥
राजन्ते च दिशां पाला⋯⋯यत्रार्हदालये ।
मूर्तिमन्तः किमायाता धर्मा संयमिनाममी ॥

द्वासप्ततिः श्रियमयन्ति जिनेन्द्रचन्द्र-
  बिम्बानि देवकुलिकासु च तावतीषु ।
द्वासप्तते श्रितजनालिकलालतानां
  किं कुड्मलाः परिमलैर्भुवनं भरन्त ॥

राजन्ते यत्र चत्वारो गवाक्षा जिनवेश्मनि ।
विरञ्चेरिव वक्राणि विश्वाकारणहेतवे ॥
यत्र चैत्ये विराजन्ते चत्वारश्च तपोधना ।
अमी धर्माः किमायाताः प्रभूपास्त्यै वपुर्भृत ॥

पञ्चालिकाः श्रियमयन्ति जिनेन्द्रधाम्नि
  द्वात्रिंशदिन्द्ररमणीभरजैत्ररूपा ।
ज्ञात्वा पतीनिह जिने किमु लक्ष्मणक्ष्मा-
  राजां प्रिया निजनिजेशनिभालनोत्का ॥

द्वात्रिंशदुत्तमतमानि च तोरणानि
  राजन्ति यत्र निजधाम्नि मनोहराणि ।
किं तीर्थकृद्दशनलक्ष्मि(क्ष्म)मृगेक्षणाना-
  मन्दोलनानि सरलानि सुखासनानि ॥

गजाश्चतुर्विंशतिरद्रितुङ्गा विभान्ति शस्ता जिनधाम्नि यत्र ।
देवाश्चतुर्विंशतिरीशभक्त्यै किमागताः कुञ्जररूपभाजः ॥
स्तम्भाश्चतुःसप्ततिरद्रिराजोत्तुङ्गा विभान्तीह जिनेन्द्रचैत्ये ।
दिशामधीशैः सह सर्व इन्द्राः किमाप्तभक्त्यै समुपेयिवास ॥

रम्यं नन्दपयोधिभूपति(१६४९)मिते वर्षे सुखोत्कर्षकृ-
  त्साहाय्याज्जसुठक्कुरस्य सुकृतारामैकपाथोमुचः ।

प्रासादं **वछिआ**सुतेन सुधिया शत्रुंजये कारितं
दृष्ट्वाष्टापदतीर्थचैत्यतुलितं केषां न चित्ते रतिः ॥
चैत्यं चतुर्णामिह धर्ममेदिनीभुजां गृहं प्रीणितविश्वविष्टपम्।
शत्रुंजयोर्वीभृति नन्दिवर्धनाभिधं सदा यच्छतु वाञ्छितानि वः ॥
.... यः प्रभाभरविनिर्मितनेत्रशैत्ये
चैत्येऽत्र भूरिरभवद्विभवव्ययो यः।
ज्ञात्वा वदन्ति मनुजा इति **तेजपालं**
कल्पद्रुमत्ययमनेन धनव्ययेन ॥
शत्रुंजये गगनबाणकला(१६५०)मितेऽब्दे
यात्रां चकार सुकृताय स **तेजपालः**।
चैत्यस्य तस्य सुदिने गुरुभिः प्रतिष्ठा
चक्रे च **हीरविजया**भिधसूरिसिंहैः ॥
मार्तण्डमण्डलमिवाम्बुरुहां समूहः
पीयूषरश्मिमिव नीरनिधेः प्रवाहः।
किंकिव्रजः सलिलवाहमिवातितुङ्गं
चैत्यं निरीक्ष्य मुदमेति जनः समस्तः ॥
चैत्यं चारु चतुर्मुखं कृतसुखं श्री**रामजी**कारितं
प्रोत्तुङ्गं **जसुठक्कु**रेण विहितं चैत्यं द्वितीयं शुभम्।
रम्यं **कुंअरजी**विनिर्मितमभूच्चैत्यं तृतीयं पुन-
र्मूलश्रेष्ठिकृतं निकामसुभगं चैत्यं चतुर्थं तथा ॥
एभिर्विश्वविसारिभिर्द्युतिभरैरत्यर्थसंसूत्रितो-
द्द्योतो दिक्ष्वखिलासु निर्जरपतिः स्वर्लोकपालैरिव।
श्रीशत्रुंजयशैलमौलिमुकुटं चैत्यैश्चतुर्भिर्युतः
प्रासादोऽङ्गिमनोविनोदकमलाचैत्यं चिरं नन्दतु ॥
वस्ताभिधस्य वरसूत्रधरस्य शिल्पं
चैत्यं चिरादिदमुदीक्ष्य निरीक्षणीयम्।

शिष्यत्वमिच्छति कलाकलितोऽपि विश्व-
कर्मास्य शिल्पिपटले भवितुं प्रसिद्धः ॥
सदाचाराब्धीनां कमलविजयाह्वानसुधियां
पदद्वन्द्वाम्भोजभ्रमरसदृशो हेमविजयः ।
अलंकारैराढ्यां स्त्रियमिव शुभां यां विहितवा-
न्प्रशस्तिः शस्तैषा जगति चिरकालं विजयताम् ॥

इति सौवर्णिकसाहश्रीतेजपालोद्धृतविमलाचलपट्टनश्रीआदीशमूलप्रासादप्रशस्तिः श्रेय·······

बुधसहजसागराणां विनेयजयसागरोऽलिखद्वर्णैः ।
शिल्पिभ्यामुत्कीर्णा माधवनानाभिधानाभ्याम् ॥

(एपिग्राफिआ इण्डिक् २।५०-५९)

---

(११४)

साहश्रीपद्मसिंहकारितशत्रुंजयतीर्थप्रासादप्रशस्तिः ।

ॐ

स्वस्ति श्रीवत्सभर्तापि न विष्णुश्चतुराननः ।
न ब्रह्मा यो वृषाङ्कोऽपि न रुद्रः स जिनः श्रियै ॥

संवत् १६७५ वर्षे शाके १५४१ प्रवर्तमाने

समग्रदेशशृङ्गारहाल्लारतिलकोपमम् ।
अनेकेभ्यगृहाकीर्णं नवीनपुरमुत्तमम् ॥
अभ्रंलिहविहाराग्रध्वजांशुकहतातपम् ।
रूप्यस्वर्णमणिव्याप्तचतुष्पथविराजितम् ॥

(युग्मम्)

---

१. सर्वा अपि शत्रुजयतीर्थस्थप्रशस्तयो डॉक्टर बूलर (G. Buhler, Ph. D, C. I. E,) महाशयैरैव व्याख्याताः. शत्रुजयश्च 'पालीटाना'प्रान्ते वर्तते इत्यपि त एव निर्णीतवन्तः. २. नवनगरं हाल्लारदेशान्तर्गत 'काठिआवार'मध्ये वर्तते.

तत्र राजा प्रशास्ति श्रीजसवन्ताभिधो नृपः।
यामश्रीशत्रुशल्याह्वकुलाम्बरनभोमणिः॥
यत्प्रतापाग्निसंतापसंतप्त इव तापनः।
निर्माति जलधौ नित्यमुन्मज्जननिमज्जने॥

(युग्मम्)

बभूवुः श्रीमहावीरपट्टानुक्रमभूषणाः।
श्रीअञ्चलगणाती(धी)शा आर्यरक्षितसूरयः॥
तत्पट्टपङ्कजादित्याः सूरिश्रीजयसिंहकाः।
श्रीधर्मघोषसूरीन्द्रा महेन्द्रसिंहसूरयः॥
श्रीसिंहप्रभसूरीशाः सूरयोऽजितसिंहकाः।
श्रीमद्देवेन्द्रसूरीशाः श्रीधर्मप्रभसूरयः॥
श्रीसिंहतिलकाह्वाश्च श्रीमहेन्द्रप्रभाभिधाः।
श्रीमन्तो मेरुतुङ्गाख्या बभूवुः सूरयस्ततः॥
समग्रगुणसंपूर्णाः सूरिश्रीजयकीर्तयः।
तत्पट्टेऽथ सुसाधुश्रीजयकेशरिसूरयः॥
श्रीसिद्धान्तसमुद्राख्यसूरयो भूरिकीर्तयः।
भावसागरसूरीन्द्रास्ततोऽभूवन्गणाधिपाः॥
श्रीमद्गुणनिधानाख्यसूरयस्तत्पदेऽभवन्।
युगप्रधानाः श्रीमन्तः सूरिश्रीधर्ममूर्तयः॥
तत्पट्टोदयशैलाग्रप्रोद्यत्तरणिसंनिभाः।
जयन्ति सूरिराजः श्रीयुजः कल्याणसागराः॥
श्रीनव्यनगरे वास्युपकेशज्ञातिभूषणः।
इभ्यः श्रीहरपालाह्व आसील्लालणगोत्रकः॥
हरीयाख्योऽथ तत्पुत्रः सिंहनामा तदङ्गजः।
उदेसीत्यथ तत्पुत्रः पर्वताह्वस्ततोऽभवत्॥
वच्छनामाथ तत्पत्नी चाभूद्वाच्छलदेविका।
तत्कुक्षिमानसे हंसतुल्योऽथामरसंज्ञकः॥

लिङ्गदेवीति तत्पत्नी तदौरस्यास्त्रयो वराः ।
जयन्ति **श्रीवर्धमान-चांपसी-पद्मसिंहकाः** ॥
अतः परं विशेषतः साहि**वर्धमान-साहिपद्मसिंह**योर्वर्णनम्—
गाम्भीर्येण समुद्राभौ दानेन धनदोपमौ ।
श्रद्धालुगुणसंपूर्णौ बोधिना श्रेणिकोपमौ ॥
प्राप्तश्री**याम**भूपालसमाजबहुलादरौ ।
मन्त्रिश्री**वर्धमान**श्री**पद्मसिंहौ** सहोदरौ ॥
महेला वर्धमानस्य **वन्ना**देवीति विश्रुता ।
तदङ्गजावुभौ ख्यातौ **वीराख्यविजपालकौ** ॥
वर्णिनी **पद्मसिंह**स्य रत्नगर्भा **सुजाणदे** ।
श्रीपाल-कुंरपालाह्व-रणमल्लास्तदङ्गजाः ॥
एवं स्वतन्त्रयुक्ताभ्यामनल्पोत्सवपूर्वकम् ।
साहिश्रीवर्धमानश्रीपद्मसीभ्यां यथादरात् ॥
प्रागुक्तवत्सरे रम्ये माधवार्जुनपक्षके ।
रोहिणीभे तृतीयायां बुधवासरसंयुजि ॥
श्रीशान्तिनाथमुख्यानां जिनानां चतुरुत्तरा ।
द्विशती प्रतिमा हृद्या भारिताश्च प्रतिष्ठिताः ॥

(युग्मम्)

पुनर्निजबहुद्रव्यसफलीकरणाकृतेः ।
श्रीनव्यनगरेऽकारि प्रासादः शैलसंनिभः ॥
द्वासप्ततिजिनौकोभिर्वेष्टितश्च चतुर्मुखैः ।
कैलासपर्वतोत्तुङ्गैरष्टाभिः शोभितोऽभितः ॥

(युग्मम्)

साहिश्रीपद्मसिंहेनाकारि शत्रुंजयोपरि ।
उत्तुङ्गतोरणः श्रीमान्प्रासादः शिखरोन्नतः ॥
यं दृष्ट्वा भविकाः सर्वे चिन्तयन्ति स्वचेतसि ।
उच्चैर्भूतः किमेषोऽद्रिर्दृश्यतेऽभ्रंलिहो यतः ॥

येन श्रीतीर्थराजोऽयं राजते सावतंसकः।
प्रतिमाः स्थापितास्तत्र श्रीश्रेयांसमुखार्हताम् ॥

तथा च संवत् १६७६ वर्षे फाल्गुनसितद्वितीयायां तिथौ दैत्यगुरुवासरे रेवतीनक्षत्रे श्रीमतो नव्यनगरात्साहिश्रीपद्मसीकेन श्रीभरतचक्रवर्तिनिर्मितसंघसदृशं महासंघं कृत्वा श्रीअञ्चलगणाधीश्वरभट्टारकपुरंदरयुगप्रधानपूज्यराजश्रीपकल्याणसागरसूरीश्वरैः सार्धं श्रीविमलगिरितीर्थवरे समेत्य स्वयंकारितश्रीशत्रुंजयगिरिशिरःप्रासादे समहोत्सवं श्रीश्रेयांसप्रमुखजिनेश्वराणां सन्ति बिम्बानि स्थापितानि। सद्भिः पूज्यमानानि चिरं नन्दन्तु।

यावद्विभाकरदिवाकरभूधरार्य-
रत्नाकरध्रुवधराः किल जाग्र(ग्र)तीह।
श्रेयांसनाथजिनमन्दिरमत्र ताव-
न्नन्दत्वनेकभविकौघनिषेव्यमानम् ॥

वाचकश्रीविनयचन्द्रगणीनां शिष्यमु०देवसागरेण विहिता प्रशस्तिः।

(एपिग्राफिआ इण्डिका–२।६४-६६)

---

(११९)

पारीक्षश्रीसोमचन्द्रजननीश्रीहीरबाईकारित-जिनमन्दिरजीर्णोद्धारप्रशस्तिः।

संवत् १६८३ वर्षे पातिसाहजिहांगीरश्रीसलेमसाहभूमण्डलाखण्डलविजयराज्ये श्रीचक्रेव(श्व)रीयै नमः ॥ ओम् ॥ महोपाध्यायश्री५हेममूर्तिगणिसद्गुरुभ्यो नमः।

ओं नमः।

स्वस्ति श्रीः शिवशंकरोऽपि गणमान्सर्वज्ञशत्रुंजयः
शर्वः शंभुरधीश्वरश्च भगवान्गौरो वृषाङ्को मृडः।
गङ्गोमापतिरस्तकामविकृतिः सिद्धैः कृतातिस्तुती
रुद्रो यो न परं श्रियै स जिनपः श्रीनाभिभूरस्तु मे ॥

उद्यच्छ्रीरजडः कलङ्करहितः संतापदोषापहः
सौम्यः प्राप्तस····यामितकलः सुश्रीर्मृगाङ्कोऽव्ययः ।
गौरानोमृतसूरपास्तकलुषो जैवातृकः प्राणिनां
चन्द्रः [कोऽपि] जयत्यहो जिनपतिः श्रीवैश्वसैनिर्महान् ॥
त्यक्त्वा राजीमती यः स्वनिहितहृदयानेकपत्नीः ····पां
सिद्धिस्त्री भूरिरक्तामपि बहु चकमेऽनेकपत्नीमपीशः ।
लोके ख्यातस्तथापि स्फुरदतिशयवान्ब्रह्मचारीति नाम्ना
स श्रीनेमिर्जिनेन्द्रो दिशतु शिवसुखं सात्वतां योगिनाथः ॥
चञ्चच्छार[द]चन्द्रचारुवदनश्रेयोविनिर्यद्वच
पीयूषौघनिषेकतो विषधरेणापि प्रपेदे द्रुतम् ।
देवत्वं सुकृतैकलभ्यमतुलं यस्यानुकम्पानिधेः
स श्रीपार्श्वजिनेशितास्तु सततं विघ्नच्छिदे सात्वताम् ॥
यस्य श्रीवरशासनं क्षितितले मार्तण्डबिम्बायते
यद्वाक्यं भवसिन्धुतारणविधौ पोतायते देहिनाम् ।
यद्ध्यानं भविपापपङ्कदलने गङ्गाम्बुधारायते
श्रीसिद्धार्थनरेन्द्रनन्दनजिनः सोऽस्तु श्रिये सर्वदा ॥

अथ पट्टावली—

श्रीवर्धमानजिनराजपदक्रमेण
श्री**आर्यरक्षित**मुनीश्वरसूरिराजाः ।
विद्यापगाजलधयो विधिपक्षगच्छ-
संस्थापका यतिवरा गुरवो बभूवुः ॥
तच्चारुपट्टकमला····लराजहंसा-
श्चारित्रमञ्जुकमलाश्रवणावतंसाः ।
गच्छाधिपा बुधवरा **जयसिंहसूरि**-
नामान उद्यदमलोरुगुणावदाताः ॥
श्री**धर्मघोष**गुरवो वरकीर्तिभाजः
सूरीश्वरास्तदनु पूज्य**महेन्द्रसिंहाः** ।

आसंस्ततः सकलसूरिशिरोवतंसाः
सिंहप्रभाभिधसुसाधुगुणप्रसिद्धाः ॥
तेभ्यः क्रमेण गुरवो जिनसिंहसूरि-
गोत्रा बभूवुरथ पूज्यतमा गणेशाः ।
देवेन्द्रसिंहगुरवोऽखिललोकमान्या
धर्मप्रभा मुनिवरा विधिपक्षनाथाः ॥
पूज्याश्च सिंहतिलकास्तदनु प्रभूत-
भाग्या महेन्द्रविभवो गुरवो बभूवुः ।
चक्रेश्वरीभगवतीविहितप्रसादाः
श्रीमेरुतुङ्गगुरवो नरदेववन्द्याः ॥
तेभ्योऽभवन्गणधरा जयकीर्तिसूरि-
मुख्यास्ततश्च जयकेसरिसूरिराजः ।
सिद्धान्तसागरगणाधिभुवस्ततोऽनु
श्रीभावसागरगुरूरुगुणा अभूवन् ।
तद्वंशपुष्करविभा(का)सनभानुरूपाः
सूरीश्वराः सुगुणशेवधयो बभूवुः ॥
षट्पदी ॥

तत्पट्टोदयशैलशृङ्गकिरणाः शास्त्राम्बुधेः पारगा
भव्यस्वान्तचकोरलासनलसत्पूर्णाभचन्द्राननाः ।
श्रीमन्तो विधिपक्षगच्छतिलका वादीन्द्रपञ्चानना
आसन्श्रीगुरुधर्ममूर्तिगुरवः सूरीन्द्रवन्द्याङ्घ्रयः ॥
तत्पट्टेऽथ जयन्ति मन्मथभटाहंकारशर्वोपमाः
श्रीकल्याणसमुद्रसूरिगुरवः कल्याणकन्दाम्बुदाः ।
भव्याम्भोजविबोधनैककिरणाः सज्ज्ञानपाथोधयः
श्रीमन्तोऽत्र जयन्ति सूरिविभुभिः सेव्याः प्रभावोद्यताः ॥

श्रीमालज्ञातीयमन्त्रीश्वरश्रीभण्डारीतत्पुत्रमह० श्रीअमरसीसुतमह० श्रीकरणतत्पुत्रसाश्रीधन्नातत्पुत्रसाहश्रीसोपातत्पुत्रसा० श्रीवन्ततद्भार्या

उभयकुलानन्ददायिनी वाईश्रीसौभाग्यदे तत्कुक्षिसरोराजहंससाहश्रीरूप-
तद्भगिनी उभयकुलानन्ददायिनी परमश्राविका हीरवाई पुत्रपारीक्षश्रीसो-
मचन्द्रप्रभृतिपरिकरयुतया संवत् १६८३ वर्षे माघसुदी १३ त्रयोदशी-
तिथौ सोमवासरे श्रीचन्द्रप्रभस्वामिजिनमन्दिरजीर्णोद्धारः कारितः ॥

(एपिग्राफिआ इण्डिक्—२।६८–७१)

---

(११६)

विग्रहराजमहाराजसमकालिकाल्लटकारितहर्ष-नाथप्रासादप्रतिष्ठाप्रशस्तिः[१]।

[ओं नमः शिवा]य ॥

सर्वविघ्नशम[नं सुरार्चितं] पूर्वमेव शिवयोस्तनूभवम् ।
भुक्तिमुक्तिपरमार्थसिद्धिदं तं नमामि वर[दं गजाननम्] ॥
.... कुलितमानसै ।
स्तूयमानस्तु सद्देवैः पातु वस्त्रिपुरान्तकः ॥
पादन्यासावनुन्ना नमति वसुमती शेषभोगावलग्ना
[बा]हूत्क्षेपैः स.............................. केचन्द्रैः ।
भिन्नावस्थं समस्तं भवति हि भुवनं यस्य नृत्ते प्रवृत्ते
स श्रीहर्षाभिधानो जयति पशुपतिर्दत्तविश्वानुकम्पः ॥
सव्ये शूलं त्रिशिखमपरे दोष्णि [भि]क्षाक[पालं]
भूषा..................भुजग कण्ठिका नीलकण्ठे ।
नेदृग्वेषस्त्रिनयन मया क्वापि दृष्टो विचित्र
इत्थं गौर्या प्रहसितहरः सस्मितः पातु युष्मान् ॥

---

१. लेखोऽय पाषाणमयशिलोत्कीर्णे **जयपुर**राष्ट्रान्तर्गतशेखावाटीविषये **शीकर**-राजधानीतो दक्षिणे जयपुरतश्च वायव्यकोणे हर्षनाम्नो गिरेः शृङ्गे देवालये १५३४ ई-शाब्दे Dr. G E Rankin and Sergeant E Dean महाशयाभ्यामुपलभ्य Asiatic Society सभायै प्रेषित । स च F Keilhorn Ph. D. C. I. E महाशयेन व्याख्यात

वेगोद्धूतार्यमादिग्रहगगनतलं व्यश्नुवाना जलौघै-
न्यक्कुर्वाणा स[मुद्रान्] क्षयवलितजलानूर्मिमालासहस्रैः ।
देयादभ्यर्थितं वः शशधरधवला स्वर्धुनी चन्द्रमौले-
मौलौ लीलां वहन्ती स्फुटविकटजटाबन्धने चीरिकायाः ॥
चञ्चचन्द्रार्कतारं भुवननगनदीद्वीपसिन्धुप्रपञ्चं
विश्वं देवासुराहिप्रमथमुनिवरैर्यक्षमर्त्यैः सनाथम् ।
यस्येच्छाशक्तिभावादसदपि सकलं जायते लीयते च
सोऽव्याद्वो हर्षदेवो भुवनविरचनासूत्रधारोऽप्रमेयः ॥
नूनं बाणाग्निदग्धत्रिपुरसुररिपुर्जातहर्षः सहर्षै-
रिन्द्राद्यैर्देववृन्दैः कृतनतिनुतिभिः पूज्यमानोऽत्र शैले ।
योऽभून्नाम्नापि हर्षो गिरिशिखरभुवोर्भारतानुग्रहाय
स स्ताद्वो लिङ्गरूपो द्विगुणितभवनश्चन्द्रमौलिः शिवाय ॥
निर्यन्नेत्राण्डभाण्डानणुदहनरुचिप्लोषसंभ्रान्तसत्त्वं
प्रान्तज्वालावलीढद्रुमबहलमहाधूमधूम्रायिताशम् ।
संरम्भारम्भभीमस्वनमसमशरोच्छेदि यस्याशशङ्के
दृष्ट्वा देवैः स्वरूपं किमियमसमये संहृतिर्बोभुवे[ति[1]] ॥
देवः पुरधगध्यास्ते यमभ्रंकषमुच्चकैः ।
हर्षख्यातिः स हर्षाख्यो गिरिरेष पुनातु वः ॥

शूरस्येदं(स्यैष) श्लोकं(कः) ।

गाङ्गं नो निर्झराम्भः प्रवहति न शुभा नन्दनोद्यानलक्ष्मीः
सद्रत्नस्वर्णशृङ्गामलविविधरुचो नैव [सौधास्त]थात्र ।
अन्यां धत्ते तथापि श्रियमतिशयिनीमेष शैलोऽद्वितीयां
साक्षाच्छंभुर्यदास्ते तदपि हि परमं कारणं रम्यतायाः ॥
अष्टमूर्तिर्यमध्यास्ते सिद्धचष्टकविभुः स्वयम् ।
महिमा भूधरस्यास्य परमः कोऽपि [विद्यते] ॥

---

१. 'बोभुवे[य]' इति पूरणेऽर्थोऽस्फुटः । 'बोभुवा' इति यङ्लुगन्तम्

एतत्स्वर्णाण्डकान्तिप्रवरतममहामण्डपाभोगभद्रं
प्रान्तप्रासादमालाविरचितविकटापाण्डुपुत्राभिरामम् ।
मेरो: शृङ्गोपमानं सुघटितवृषसत्तोरणद्वाररम्यं
नानासद्भोगयुक्तं जयति भगवतो हर्षदेवस्य हर्म्यम् ॥
आद्यः श्रीगूवकाख्याप्रथितनरपतिश्चाहमानान्वयोऽभू-
च्छ्रीमन्नागा····लोकप्रवरनृपसभालब्धवीरप्रतिष्ठः ।
यस्य श्रीहर्षदेवे वरभवनमयी भौतली कीर्तिमूर्ति-
र्लोकेऽद्यापि स्थिरैषा प्रतपति परमै ·············· ॥
पुत्रः श्रीचन्द्रराजोऽभवदमलयशास्तस्य तीव्रप्रतापः
सूनुस्तस्याथ भूपः प्रथम इव पुनर्गूवकाख्यः प्रतापी ।
तस्माच्छ्रीचन्दनोऽभूत्क्षितिपतिभयदस्तोमरेशं सदर्पं
हत्वा रुद्रेनभूपं समरभुवि [ब]लाद्ये[न लब्धा] जयश्रीः ॥
ततः परमतेजस्वी सदा समरजित्वर ।
श्रीमान्वाक्पतिराजाख्यो महाराजोऽभवत्सुत: ॥
येनादैन्यं स्वसैन्यं कथमपि दधता वाजिवल्गा मुमुक्षु
प्रागेव त्रासितेभ्यः सरसि करिरटड्डिण्डिमैडि ······ ।
वन्यक्ष्माभर्तुराज्ञां समदमभिवहन्नागतोऽनन्तपार्श्वे-
क्ष्मापालस्तन्त्रपालो दिशि दिशि गमितो ह्रीविषण्णः प्रसन्नः ॥
शूरस्येदम् ।
लोकैर्यो हि महीतले ननु हरिश्चन्द्रोपमो गीयते
त्यागैश्वर्यजयेषु कीर्तिरमला धर्मश्च यस्योज्ज्वल ।
येनादायि हराय मन्दिरकृते भक्त्या प्रभूत वसु
श्रीमद्वाक्पतिराजसूनुरसम: श्रीसिंहराजोऽभवत् ॥
हैममारोपितं येन शिवस्य भवनोपरि ।
पूर्णचन्द्रोपमं स्वीयं मूर्त यश ······डकम् ॥
····तोमरनायकं सलवणं सैन्याधिपत्योद्धतं
युद्धे येन नरेश्वराः प्रतिदिशं निर्नाशिता जिष्णुना ।

कारावेश्मनि भूरयश्च विधृतास्तावद्धि यावद्गृहे
तन्मुक्त्यर्थमुपागतो रघुकुले भूचक्रवर्ती स्वयम् ॥
श्रीमान्विग्रहराजोऽभूत्तत्सुतो वासवोपमः।
वंशलक्ष्मीर्जयश्रीश्च येनैते विधुरोद्धृते ॥
श्रीसिंहराजरहिता किल चिन्तयन्ती
भीतेव संप्रति विभुर्ननु को ममेति।
येनात्मबाहुयुगले चिरसंनिवासं
संधीरितेति ददता निजराज्यलक्ष्मीः ॥
येन दुष्टदमनेन सर्वतः साधिताखिलमही स्वबाहुभिः।
लीलयैव वशवर्तिनी कृता किंकरीव निजपादयोस्तले ॥
यस्य चारु चरितं सता सदा शृण्वतां जगति कीर्तितं जनैः।
हृष्टिजातघनरोमकं[टका] जायते तनुरलं मुहुर्मुहुः ॥
मुक्ताहारैः सुतारैः प्रतरलतुरगैश्चारुवस्त्रैश्च शस्त्रैः
कर्पूरैः पूगपूरैर्मलयतरुवरैर्हेमभारैरपारैः।
उद्यद्दानैः समानैश्चलकुलगिरिभिर्दन्तिवारैः सदारै-
र्निर्व्याजै. प्रातिर·······भिरिति भृतैः प्राभृतैर्य. सिषेवे ॥
छत्रधारावरग्रामो द्वितीयः शंकराणकः।
तेनेमौ हर्षनाथाय भक्त्या दत्तौ सशासनौ ॥
श्रीमद्दुर्लभराजेन योऽनुजेन विभूषितः।
लक्ष्मणेनेव काकुत्स्थो विष्णुनेव हलायुधः ॥
महाराजावली चासौ शंभुभक्तिगुणोदया।
श्रीहर्षः कुलदेवोऽस्यास्तस्माद्दिव्यः कुलक्रमः ॥
अनन्तगोचरे श्रीमान् पण्डित **औत्तरेस्व(श्व)रः**।
पञ्चार्थलकुलाम्नायी **विश्वरूपो**ऽभवद्गुरुः ॥
दीक्षाजातमलध्वंसविस्फुरज्ज्ञाननिर्मलः।
प्रशस्ताख्योऽभवच्छिष्यस्तस्य पाशुपतः कृती ॥

भा····रक्तोऽभवत्तस्य शिष्यो द्वि(हि) नामतोऽल्लटः।
वार्गटिकान्वयोद्भूतसद्विप्रकुलसंभवः॥
हर्षस्यासन्नतो ग्रामः प्रसिद्धो राणपल्लिका।
सांसारिककुलाम्नायस्ततो यस्य विनि[र्गमः]॥
अल्लटच्छद्मना नन्दी शिवासन्नस्थितिक्रमः।
श्रीहर्षाराधने नूनं स्वयं मर्त्यमवातरत्॥
आजन्म ब्रह्मचारी दिगमलवसनः संयतात्मा तपस्वी
श्रीहर्षाराधनैकव्यसनशुभमतिस्त्यक्तसंसारमोहः।
आसीद्यो लब्धजन्मा भवतरणधियां·······सुबन्धु-
स्तेनेदं धर्मवित्तैः सुघटितविकटं कारितं हर्षहर्म्यम्॥
अस्मिश्चन्द्राङ्कशैले गगनपथलिहोत्तुङ्गशृङ्गेऽप्रमेयं
हर्म्यं श्रीहर्षनामप्रथितपशुपतेः सद्विमानोपमानम्।
दृष्ट्वा सद्भोगयुक्तं बहुसुरभवनं कारितं येन ·····
नासाध्यं किंचिदस्ति स्फुटमिति तपसो निःस्पृहाणां यतीनाम्॥
आसीन्नैष्ठिकरूपो यो दीप्तपाशुपतव्रतः।
ती[व्र]वेगतपोजातपुण्यापुण्यमलक्षयः॥
सदा शिवसमाकारस्तस्येश्वरसमद्युतेः।
भावद्योतोऽभवच्छिष्यः संदीपितगु[रुक्र]म॥
गुरोराज्ञामयं प्राप्य प्रतिष्ठासोः शिवालयम्।
यथाप्रारब्धकार्याणामङ्गीकृतभरोऽभवत्॥
पुरस्तात्पर्वतस्याधस्त्रितयं येन कारितम्।
सत्कूपो वापिका दिव्या गोप्रपा घटितोपलैः॥
सदैव वहमानेन कूपेन स्वादुवारिणा।
वाटिकासेच········ प्रपाभरणं तथा॥
सत्पुष्पैरर्चनं शंभोः पयःपानं गवामपि।
कार्यद्वयमिदं सारं दर्शितं पुण्यकाङ्क्षिणाम्॥

दिगम्बरं जटा भस्म तल्पं च विपुलं मही।
भिक्षा वृत्तिः करः पात्रं यस्यैतानि परिग्रहः ॥
शिवभवनपु·························रं
तदखिलमुपलौघैः पूरयित्वा गभीरम्।
समतलसुखगम्यं प्राङ्गणं तेन कान्तं
मसृणतरशिलाभिः कारितं बन्धयित्वा ॥
वीरभद्रसुतः ख्यातः सूत्रधारोऽत्र **चाण्डसिव** (?)।
विश्वकर्मेव सर्वज्ञो वास्तुविद्या··············॥
येन निर्मितमिदं मनोहरं शंकरस्य भवनं समण्डपम्।
[स]र्वदेवमयचारुतोरणं स्वर्गखण्डमिव वेधसा स्वयम् ॥
गङ्गाधरवरभवने करणिक**श्रीरुक्क**सुतेन भक्तेन।
अक्रियतेयं सुगमा प्रशस्तिरिह **धीरनागेन** ॥
यावच्छंभो··············नसुरनदीचन्द्रलेखापतित्वं
यावल्लक्ष्मीर्मुरारेरुरसि विलसति द्योतते कौस्तुभं च।
गायत्री यावदास्ते सततमुपनता प्रेयसी ब्रह्मणोऽन्ते
कैलासाकारमेतत्प्रतपतु भवनं हर्षदेवस्य तावत् ॥
अ········तः शंभुः कथं कालस्य गोचरः।
हर्म्यनिर्माणकालस्तु यथादृष्टो निबध्यते ॥
संवत् १०१ [३?] आषाढशुदि १३ शंभोः प्रासादसिद्धिः ॥
जा(या)तेऽब्दानां सहस्रे त्रिगुणनवयुते(१०२७) सिंहराशौ गतेऽर्के
शुक्ला यासीत्तृ[तीया] शुभकरसहिता सोमवारेण तस्याम्।
आदिष्टः शंभुनासौ ध्रुवममलपदं दित्सुना शुद्धसत्त्वं
लब्धा(ब्ध्वा) वैदेहभावं शिवभवनमभिप्रस्थितो **ह्लल्लटो**ऽद्य ॥

स्वस्ति संवत् १०३० आषाढशुदि १५ निरुद्धं यथालब्धशासना ········त्रैव लिख्यते। महाराजाधिराजश्री**सिंहराजः** स्वभोगे तूनकूपक-द्वादशके सिंहगोष्ठम्, तथा पट्टबद्धकविषये त्रैकलककेशानकूपौ, सरःकोट्ट-

विषये कण्हपल्लिकाम्, एवं ग्रामांश्चतुरश्चन्द्राङ्कशिखरोपरि.................. [भ]गवते श्रीहर्षदेवाय पुण्येऽहनि श्रीमत्पुष्करतीर्थे स्नात्वा स्नपनार्चनविलेपनोपहारधूपदीपपर्वयात्रोत्सवार्थमा शशाङ्कतपनार्णवस्थितेर्यावच्छासनत्वेन प्रददौ ।

तथैतद्भ्राता श्रीवत्सराजः स्वभोगावाप्तजय[पु]रविषये कर्दमखातग्राममदाच्छासनेन ।

तथा **विग्रहराजेन** शासनदत्तग्रामद्वयमुपरि लिखितमास्ते ।

तथा श्रीसिंहराजात्मजौ **श्रीचन्द्रराजश्रीगोविन्दराजौ** स्वभोगावाप्तपट्टबद्धकविषये दर्भकक्षविषये ....संख्येन स्वहस्ताङ्कितशासनौ.......... के पाटकद्वयं पल्लिकाग्रामौ भक्त्या वितेरतुः ॥

श्रीसिंहराजीयदु साध्यश्री**धंधुकः** खट्टकूपविषये स्वभुज्यमानमयूरप[द्रं] ग्रामं स्वाम्यनुमतः प्रदत्तवान् ॥

.... हिलात्मजः श्री**जयनराजः** स्वभुज्यमानकोलिकूपकग्रामं भक्त्या हर्षदेवाय शासनेन दत्तवान् ॥ तथा समस्तश्रीभम्मह[दे]श्या शाकंभर्या लवणकूटकं प्रति विंशोपकमेकं दत्तम् । तथोत्तरापथीयहेडाविकानां .... [घ]ोटकं प्रति द्रम्म एको दत्त । पुण्यात्मभिर्दत्तानि देवभुज्यमानक्षेत्राणि यथा—मद्रापुरिकाया पि[प्प]लवारिकाक्षेत्रम्, निम्बडिकाग्रामे दर्भटिकाक्षेत्रम्, मरुपल्लिकायां [झा]टक्षेत्रम्, [ह]र्षे लाटक्षेत्रम्, ... लावणपद्रे सेक्यकक्षेत्रम्, तथात्रैव द्विहलिकानन्दिसोमके बृहद्धलमिति ॥

सर्वानेतान्भाविनो भूमिपालान्भूयो भूयो याचते रामभद्र. ।
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥

(एपिग्राफिआ इण्डिका २।११९–१२५)

(११७)

श्रीपरमारान्वयभूषणश्रीनरवर्मदेवकारितमन्दिर-प्रशस्तिः[1]।

ओं नमो भारत्यै ॥

प्रसादौदार्यमाधुर्यसमाधिसमतादयः।
युवयोर्ये गुणाः सन्ति वाग्देव्यौ तेऽपि सन्तु नः ॥
एक एव भुवनत्रयेऽपि स श्रीपतिर्भवतु वो विभूतये।
यस्य मध्यमपदश्रितोऽप्यमी भास्करप्रभृतयश्चकासति ॥
जातिं वृत्तं च बि[भ्राणा] गुणालंकारचारवः।
सरसाश्च प्रसीदन्तु सूक्तयः सूरयश्च नः ॥
दुर्धरारिपुरभङ्गभीषणो भूरिभूतिसविशे[षभूषणः]।
[रा]जराजकृतसत्क्रियः क्रियाद्वह्निवंशसदृशः शिवः शिवम् ॥
जाता महार्णवोत्पन्ने ब्रह्माण्डशुक्तिसंपुटे।
महेश[स्यार्चि]ता मुक्ता जयन्त्यम्भोजयोनयः ॥
वैराग्यं च सरागतां च नृशिरोमालां च माल्यानि च
व्याघ्रानेकपचर्मणी च वसने चाहींश्च हारादि च।
यद्भूतिं च विलेपनं च भजते भीमं च भव्यं च त-
द्दिश्याद्रूपमुमारमारमणयोर्भुक्तिं च मुक्तिं च वः ॥
वैश्वरूप्यं सम[भ्य]स्य मीनाद्याकृतिकैतवात्।
स्वाभिन्ननिर्मिताशेषविश्वो विष्णुः पुनातु वः ॥
अस्ति प्रस्तगिरीन्द्रगर्वगरिमा नीलाश्मसानूल्लस-
त्कान्तिव्रातविडम्बिताम्बरतलः श्रीमान्नगेन्द्रोऽर्बुदः।
यस्य व्योमतलोद्विलङ्घिशिखरप्राग्भारपद्माकर-
प्रेङ्खत्पद्मपरागचक्रमितरब्रह्माण्डखण्डायते ॥

---

१. 'प्रशस्तिरियं पाषाणशिलोल्लिखिता नागपुरप्रदर्शन्या वर्तते' इति Dr. F. Kielhorn, Ph. D, C. I E महाशया वदन्ति

देवैरावृतमभ्रमण्डलमिदं मर्त्यैश्च भूमण्डलं
कृत्वा धर्मतुलायमानवपुषो यस्यान्तयोर्न्यस्य च ।
जाने यावदवैतुमिच्छति विधिः किं शुद्धमित्येतयो-
रूर्ध्वं तावदगादमर्त्यशिखरिस्तम्भान्नभोमण्डलम् ॥

लेभे विभिद्य जलधिप्रधिभूमिचक्र-
माकाशचक्रमपि येन दिगन्तनेमि ।
संसारवर्त्मनि महाविषमे निषण्ण-
भग्नोन्नतैकतटविश्वरथाक्षलक्ष्मीः ॥

तस्मिन्वेदविदां वरः स भगवानाकाशगङ्गापयः-
पूरप्लावितकान्तकोमलतटेऽतिष्ठद्वसिष्ठो मुनिः ।
यस्त्रेतानलधूमवर्तियमुनां प्रीत्यै पितुर्ब्रह्मणो
गङ्गासंगमसिद्धये समनयद्ब्रह्माण्डखण्डं प्रति ॥

विद्यामहासरिदुपान्तविवर्तिघोर-
संसारसैकतविषक्तमसक्तमेते ।
यस्य त्रिलोकरथमुत्पथसंप्रवृत्त-
मुत्तारयन्ति शतशोऽप्युपदेशधुर्याः ॥

आयातस्य कदाचन क्षितिपतेराच्छिन्दतः कौशिक-
स्यातिथ्योचितवस्तुजातजननादानन्दिनीं नन्दिनीम् ।
निर्जेता कुपितेन तेन हविषा संहर्षिताद्वर्हिषो[1]
वीरः श्रीपरमार इत्यनुपमः सत्याभिधानोऽभवत् ॥

राज्यवर्धनविशालधर्मभृत्सत्यकेतुपृथुकीर्तिपार्थिवः ।
वर्धतेऽयमहिमांशुचन्द्रमःसंततिप्रतिकृतिर्यदन्वयः ॥

वराजरामराजितोऽनलोद्भवः स भारतः ।
ग्रहेन्द्रचन्द्रयोरिव व्यजायतायमन्वयः ॥

---

१ वह्नेः.

वंशेऽस्मिन्वैरिसिंहः क्षितिपतिरभवद्भूरिभूतिप्रभाव-
प्रागल्भ्यौदार्यशौर्यप्रचयपरिचयप्राज्यसौराज्यसिद्धिः।
नम्रक्ष्मापालभालस्थलदलितलुलत्कान्तकोटीरकोटि-
त्रुट्यन्माणिक्यचक्रस्थपुटितमणिमत्पादपीठोपकण्ठः॥
सर्वाशाविजयप्रयाणसमये यस्येन्द्रनीलप्रभै-
र्मायूरातपवारणैः शुशुभिरे नष्टावकाशा दिशः।
सर्पन्मत्तकरीन्द्रचक्रचरणप्राग्भारदीर्णस्थिरा
रन्ध्रोद्भूतविषण्णशेषसविषश्वासावरुद्धा इव॥
पाताले वडवामुखानलमिषात्पृथ्वीतले च स्फुर-
त्सौवर्णाचलकैतवाद्दियति च ब्रह्माण्डखण्डच्छलात्।
[च]ञ्चत्काञ्चनचक्रवालवलयव्याजाच्च दिङ्मण्डले
यस्याद्यापि समुल्लसत्यविचलीभूतः प्रतापानलः॥
स्वर्लोकेषु च विद्विषत्क्षितिषु च व्यालेन्द्रगेहेषु च
स्वाराजं च रिपुव्रजं च मुरजिन्नागाधिराजं च यः।
ऐश्वर्येण च विक्रमेण च धराभारक्षमत्वेन च
न्यक्कुर्वंश्च पराभवंश्च समतिक्रामंश्च पृथ्वीमपात्॥
तस्माद्वैरिनृपावरोधनवधूवैधव्यदुःखोद्भव-
द्बाष्पाम्भःकणशान्तकोपदहनः श्रीसीयकोऽभून्नृपः।
आविर्भावितनूतनस्थितिरयं ब्रह्माण्डखण्डच्छला-
द्यस्याद्यापि विलोक्यते वियदधो धूमः प्रतापानलः॥
अनुगगनमुदस्थुः स्थूलमुक्तोच्चया ये
यदसिदलितकुप्यत्कुम्भिकुम्भस्थलेभ्यः।
सततमपि पतन्तस्तेऽद्य यावन्न पृथ्वीं
पृथुलतरलताराव्याजभाजो भजन्ते॥
अत्याश्चर्यमदृष्टमश्रुतमिदं कस्मै समाचक्ष्महे
को न्वेतत्प्रतिपद्यते च तदपि प्रस्तूयते कौतुकात्।

उद्धृत्यापि वसुंधरामसदृशीं लब्ध्वापि लक्ष्मी च यः
कुर्वन्कार्यमनेकशः सुमनसामागान्न वैकुण्ठताम् ॥
तस्माद्वैरिवरूथिनीबहुविधप्रारब्धयुद्धाध्वर-
प्रध्वंसैकपिनाकपाणिरजनि श्रीमुञ्जराजो नृपः ।
प्रायः प्रावृतवान्पिपालयिषया यस्य प्रतापानलो
लोकालोकमहामहीध्रवलयव्याजान्महीमण्डलम् ॥
यस्मिन्सर्पति लीलयापि ललितैः सैन्यैः समुज्जृम्भितं
वाहव्यूहविसारिधूलिपटलव्यालुप्तदिग्मण्डलैः ।
अत्यद्री[न्द्र]करीन्द्र[संच]यपदप्रेङ्खोलनोच्छृङ्खल-
प्रेङ्खच्छृङ्खलनादनिर्भरभृतब्रह्माण्डभाण्डोदरैः ॥
यन्निस्त्रिंशनिरस्तमस्तकतया लब्ध्वान्यथा दुर्लभं
देवत्वं स्वकबन्धमु[द्ध]तमधो दृष्ट्वा भटैर्वेष्टितम् ।
संहर्षात्पततो विमानशिखरादाश्लिष्य कण्ठे हठा-
द्वीरा[न्संग]ररागिणो रुरुधिरे संभूय सिद्धाङ्गनाः ॥
तस्यासीदथ पार्थिवः पृथुयशाः श्रीसिन्धुराजोऽनुजः
स्फूर्जद्वाडवपावकस्फुट[म]ह.[सौन्द]र्यशौर्यानलः ।
यः संग्रामयुगान्तवल्गितभुजादुर्वातदूरोल्लस-
त्कल्लोलायितमण्डलाग्रप[ट]लेनामज्जयद्भूभृतः ॥
व्रजति जयिनि यत्रामित्रजातेन जज्ञे
तरलतुरगवेगोद्धूतभूरेणुराजिः ।
विकटकरटिभारभ्रष्टभूपृष्ठरन्ध्रा-
दुदित इव समन्तादन्तकालाग्निधूमः ॥
गाम्भीर्यं प्रलयार्णवस्य च बलं कल्पान्तवातस्य च
स्थेमानं कमठेशितुश्च [गुरु]तां [ब्रह्माण्ड]भाण्डस्य च ।
तेजः कालहुताशनस्य च महीयस्त्वं द्युचक्रस्य च
स्वीकृत्येव विनिर्मितं यमविदुः प्रत्याजि पृथ्वीभुजः ॥

१. देवानाम्, धीमतां च. २ विष्णुताम्, निश्चयेन कुण्ठता च

तत्सूनुर्भुवनैकभूषणमभूद्भूपालचूडामणि-
श्छायाडम्बरचुम्बितांह्रिकमलः श्रीभोजदेवो नृपः ।
यस्याद्या[पि] स[माश्र]यन्ति चरणौ शक्रासना[ध्या]सिनः
स्पर्धाबन्धविनम्रनिर्जरनटत्कोटीरकोटित्विषः ॥

रटत्पटहपाटवप्रकटझर्झरस्फूर्जित-
स्फुरड्डमरुडम्बरोड्डमरडिण्डिमोड्डामरा ।
स्फुटत्करटकुञ्जरप्रपदसंपतत्संभ्रम-
भ्रमद्भवन[म]भ्रमज्जग[ति] यच्चमूरुच्चकैः ॥

वैकुण्ठः कमलासनाय चतुरास्याय स्वयंभूः पुनः
पञ्चास्याय हराय शंभुरपि षड्वक्राय पुत्राय च ।
सेनानीरपि दन्दशूकपतयेऽजस्रं सहस्राननाद्यापि स्पृहयत्यमर्त्यसमितौ यत्कीर्तिमुत्कीर्तयन् ॥

तस्मिन्वासवबन्धुतामुपगते राज्ये च कुल्याकुले
मग्नस्वामिनि तस्य बन्धुरुदयादित्योऽभवद्भूपतिः ।
येनोद्धृत्य महार्णवोपममिलत्कर्णाटकर्णप्रभु-
मुर्वीपालकदर्थितां भुवमिमां श्रीमद्वराहायितम् ॥

यस्मादुग्रतरप्रताप[पवनो]पारूढदुर्दर्शता-
सादृश्योत्थरविभ्रमादभिमुखैः प्रापञ्चि यैः पञ्चता ।
मन्ये सोऽयमिति प्रतीतिविततामर्षप्रकर्षेण ते
भि[त्त्वा] भास्करमण्डलं रिपुभटाः प्रापुः परां निर्वृतिम् ॥

एकस्यां समितौ विलोक्य विजयं यस्यापरस्यां स्तुव-
..................तां समर्थयति दृग्जिह्वासहस्रद्वये ।
किंत्वानन्दनिमीलितेक्षणतया श्रौतैः सुखैर्वञ्चित-
श्चक्षुःकर्णमकर्णमप्यहिपतिः स्वीयं वपुर्निन्दति ॥

पुत्रस्तस्य जगत्त्रयैकतरणेः सम्यक्प्रजापालन-
व्यापारप्रवणः प्रजापतिरिव श्रीलक्ष्मदेवोऽभवत् ।

नीत्या येन मनुस्तथानुविदधे नासौ न वैवस्वतः
सर्वत्रापि सदाप्यवर्धत यथा कीर्तिर्न वैवस्वतः ॥
संभूय म्रियतां गुरुर्बलभराद्भूः कूर्मराजादयः
सद्यो नश्यत [वा द्रु]तं नमत वा प्रत्यर्थिपृथ्वीभुजः।
चक्षुर्मङ्क्षु पिधीयतामनिमिषाः पांसुः पुरा पूरय-
त्येवं व्याहरति प्रयाणपटहो यस्य स्वनच्छद्मना ॥
यस्मिन्सर्पति बान्धवोऽपि विधुरैः पूर्वैः परित्यज्यते
कल्याणस्य कथापि कातरतया नापेक्ष्यते दक्षिणैः।
आशावल्लिरसत्फलेति विकलैर्निश्चीयते पश्चिमै-
र्मर्तुं केवलमुत्तमैर्नृपतिभिर्द्वेधाप्ययोध्यास्यते ॥
प्रयाति यस्मिन्प्रथमं दिशं हरेर्जिहीर्षयानन्यसमानदन्तिनाम्।
यथाविशङ्कौडपतेः पुरंदर[स्तथा] शशङ्के सहसा पुरंदरः ॥
उत्साहोन्नतिसन्निमित्तजनिताजस्रप्रयाणाक्रमे-
णाक्रम्य त्रिपुरीं रणैकरसिकां वि[ध्वं]स्य विद्वेषिणः।
येनावास्यत विन्ध्यनिर्झरमरुत्संचारचारूल्लस-
ल्लोलोद्यानलतावितानवसतौ रेवोपकण्ठस्थले ॥
जातानि जन्यश्रममार्जितानि बीजानि यत्कुञ्जरमञ्जनानि।
तटाचलोच्चाटनतत्पराया रेवाप्रवाहोर्मिपरम्परायाः ॥
ये व्यालोलकरालनिर्झरकराः कुम्भायमानोन्नम-
त्कूटान्ताः कटकान्तमागविगलद्दानायमानाम्भसः।
प्रायस्तेऽपि विरोधिसिन्धुरधिया यद्वाहिनीवारणै-
रुन्मीलन्मदमेदुरैर्बिभिदिरे विन्ध्यस्य पादाचलाः ॥
स्फार[त्वक्सा]रवारस्थगितगुरुतटीकूटकुट्टाकटङ्क-
प्रायप्रेङ्खत्खुराग्रत्वरित[ह]रिचमूचक्रच[ङ्क्र]म्यमाणाः।
येनालङ्घ्यन्त सेनाकरिकरटतटोद्दामदानाम्बुगन्ध-
व्याविद्धागण्यवन्यद्विपकुलपटलध्यामला विन्ध्यपादाः ॥

ये दिक्सिन्धुरबन्धवः क्षयमरुल्लोलाद्रिस[त्ता]भृतः
क्रीडाक्रोडकुटुम्बका[न्ति]जलमुक्सब्रह्मचर्याजुषः ।
यत्सेनानृपगन्धसिन्धुरमरुन्मैत्रीविहस्तीकृतै-
स्तैरप्यङ्गकलिङ्गकुञ्जरकुलैर्युद्धा[य] बद्धोऽञ्जलिः ॥
देवा(वोऽ)सौ पुरुषोत्तमः स भगवानाशिश्रिये यः श्रिया
येनेदं बलिवैरिबन्धविधिना विश्वं समाश्वासितम् ।
येनाधारि वसुंधरेति दधतः सानन्दमन्दाक्षतां
यस्य प्राच्यपयोनिधौ बुधजनैर्व्याजस्तुतिः प्रस्तुता ॥
ये कल्पानलधूममण्डलनिभाः कादम्बिनीविद्विषः
संवर्तोल्लसितान्धकारसुहृदस्तुत्यद्वियद्बान्धवाः ।
............[आहव]श्रमनुदे पा[थो]वगाहोद्यतै-
र्यत्सामन्तमतङ्गजैरधरितास्तेऽप्य[म्बु]धेरूर्मयः ॥
कुम्भसंभवसोदर्ये यत्रापाचीमुपाच्छति ।
चोलाद्यैर्नी[च]कै[र्भूत्वा] विन्ध्यबान्धवता दधे ॥
लीलाम्भःप्लवने यदीयपृतनासामन्तसीमन्तिनी-
श्रोणि[श्रे]णि[विशी]र्यमाणर[श]नामुक्ताः पतन्ति स्म याः ।
ताभिः संप्रति पप्रथे नु पृथिवीं यत्ताम्रपर्णीपयः
पश्याद्यापि तदेव पाण्ड्यनृपते[र्जी]वातवे [जा]य[ते] ॥
स्वामिन्नेष स सेतुरत्नभवतो रामस्य यो मारुति-
प्रायोपाहृतशैलशृङ्गरचितो वर्धि[ष्णुविन्ध्या]यते ।
इत्यादृत्य कुतूहलेन कथितं तज्ज्ञैरवज्ञाय यः
सेनाहास्तिकसेतुनैव विदधे द्वीपान्तरोपक्रमम् ॥
अथावभज्योभयथा यमाशां यस्या[नघे] सर्पति सैन्यसङ्घे ।
अभूत्स्वकीयां ककुभं व्यपायाद्वोपायितुं पाशभृदप्यपाशः ॥
मैनाकप्रमुखा वसन्ति कुहचित्कालाग्निरास्ते क्वचि-
त्सन्ति क्वापि तिमिंगिलप्रभृतयः कुत्रापि शेते हरिः ।

एतद्वेत्ति न कोऽपि यत्र जलधौ तस्याप्यशेषं पय·
[पीत्वा] यत्करिभिः कृतैकचुलकैस्तैस्तैरगस्त्यायितम् ॥
यैः सभूय तिमिंगिलप्रभृतिभि· संसर्पिणस्तन्वते
पोताधानसबन्धुता शिखरिणो मैनाकमुख्या अपि ।
भ्राम्यन्मन्दरडम्बराणि दधिरे तैरप्यशेषेऽम्बुधौ
यत्सेनागजराज[पीव]रकरा····· ·· नोच्छृङ्खलैः ॥
अथातितिक्षोरिव राजराजमन्यं तदाशा प्रति यस्य धातुः ।
द्विधापि भीत्युज्झितवित्तपाशैर्भूपैः प्रतीपैर्विभवैर्बभूवे ॥
आरामा समरा मरावपि तदा पुन्नागपूगादिम-
द्रुल्मान्तर्वनदेवतायितजयश्रीमद्यश.पादपाः ।
यस्यासन्भुजदण्डच[ण्डि]मलसल्लीलासिलक्षीकृत-
क्षोणीपालकपालमण्डलगलत्कीलालकुल्याकुलाः ॥
खेलोत्खाततुरुष्कदत्तविलसद्वाहावलीवेल्लन-
क्लाम्यत्कुङ्कुमकेसराधिकमृदौ वङ्क्षूपकण्ठस्थले ।
येनावास्य सरस्वतीसविधतासाधिक्यवाक्पाटव-
श्चाद्वनुत्कट[प]त्रिपञ्जरगतः कीराधिपोऽध्याप्यत ॥
तेन व्यापुरमण्डले सुकृतिना यस्मै ग्रहेन्द्रग्रहे
यद्ग्रामद्वयमग्रिमेण विधिना विश्राणितं श्रद्धया ।
तद्भ्राता **नरवर्मदेव**नृपतिः पश्चात्परी(रा)वर्त्य त-
द्ग्रामं **मोखलपाटका**ख्यमदिशद्देशत्रयस्येच्छया ॥
तेन स्वयंकृतानेकप्रशस्तिस्तुतिचित्रितम् ।
श्रीमल्लक्ष्मीधरेणैतद्देवागारमकार्यत ॥

सं ११६१

ओं

हंहो बुधाः साधु समुत्सहध्वं कुशाग्रकल्पा च धियं विदध्वम् ।
मध्यस्थभावं च समाश्रयध्वं सुखं च नः सूक्तिसुधामुपाध्वम् ॥

वन्दनीयावुभौ सूक्तिश्रोतारौ तौ विपश्चितौ ।
यावश्रु मुञ्चतः सान्द्रमानन्दालस्यनिर्भरौ ॥

(एपिग्राफिआ इण्डिका २।१८२-८८)

---

(११८)

अरितरुदवयादवश्रीभिल्लममहाराजशासनपत्रम्[1] ।

ओं [नमः] शिवाय ।

स्वस्ति शकनृपका[ला]तीतसंवत्सरशतेषु नवसु द्वाविंशत्यधिकेष्वङ्कतोऽपि संवत्सराः ९२२ ॥

त्रयमपि भुवनानामीषदुन्मेषमात्रा-
त्प्रभवति लयशेषं यन्निमेषादुपैति ।
अतिशयितचरित्रो योगिनामप्यगम्यः
स इह जयतु देवश्चारुच[न्द्राङ्क]मौलिः ॥
भुव[न]भवनहेतुर्दुष्कृताम्भोधिसेतु-
र्विहितमदनमाथः पार्वतीप्राणनाथः ।
निहतमरुदरीशः पातु भिल्लममीशः
करतलकृतशूलः सर्वदा चन्द्रचूलः ॥
युगस्यादौ शं[भु]र्भुवनमसृज.........
द्भवन्मूर्तिस्त्रेधा मुररिपुविरिञ्चिप्रभवतः ।
विरिञ्चेः संभूतः सकलमरुतां योनिरमलो
मरीचिर्या(र्य)त्की[र्ति]र्भ्रमति भुवने कुन्दविशदा ॥
अतृ(त्रि)नामाभवत्तस्मात्सूनुः सत्यपरायणः ।
तत्सूनुर्रिन्दुराख्यातो जगदानन्दमन्दिरम् ॥

---

१. इद शासन ताम्रपत्रत्रये समुल्लिखितं मुम्बईप्रान्तस्थअहमदनगरप्रान्तस्थसगमनगराख्ये ग्रामे Mr. H Cousens महाशयै. समुपलभ्य Archæological Survey of Western India नामकसभाप्रकाशनीयग्रन्थे प्रकाशितमासीत्.

.... ।

.... ॥

ततोऽभवन्निर्मलसोमवंशजो विशालभूपालगुणालयं हि यः ।
पुरूरवा भूपतिरर्धमासनं सदा सुरेन्द्रस्य बभाज लीलया ॥

अभूदायुस्तस्मान्नृपतिरमरैर्वन्द्यचरितो
हठाक्रान्तारातिप्रणतचरणाम्भोजयुगलः ।
ततो जातो यस्मान्नघुषनृपतिर्लाञ्छनमिषा-
ल्लिलेख स्वस्या[ख्यां] स्वभुजविजयी चन्द्रफलके ॥

अजनि नघुषभूपाद्भूमिपालो **ययाति**-
स्त्रिदशमहितकीर्तिर्वीरलक्ष्मीविलासः ।
किमिव गुणगणोऽसौ व[र्ण्य]ते तस्य सान्द्या(यस्मा)-
ज्जगदवननिमित्तं यादवानां प्रसूतिः ॥

अभवदिह ययाते सज्जनानन्दकारो
यदुनृपतिरशेषाक्रान्तदायादचक्रः ।
सकलविबुधवृन्दैर्वन्दितोऽसौ मुरारि-
र्जगदवननिमित्तं यस्य वंशे प्रसूत. ॥

एतस्माद्यदुवंशतः समभवद्भूपालचूडामणि-
र्भूपालः कलिकालकल्मषलवैर्नालोकितो भूतले ।
ख्यातः **सेउणचन्द्र** एव सहसा नाम्ना निजेनाह्वयं
यो लोकं निजमण्डलं च समदारातीभकण्ठीरवः ॥

प्रख्यातोऽसौ सद्गुणैर्यो विशालसंग्रामोद्यद्दुर्दमारातिकालः ।
जातस्तस्मादष्टमीचन्द्रभालः सूनुः श्रीमान्**धाडिख्यो(यप्पो)** नृपालः ॥

तदनु विबुधवृ[न्दान]न्दसंदोहसीमा
समदमदन····[मानि]नीमानचौरः ।
असमस· · ··· योरिकालानलोऽभू-
त्तत इह····[रे]न्द्रो भूतले **भिल्लवाख्यः** ॥

[ननु] किमिह कवीनां तस्य वर्ण्यं हि न स्या-
त्कुमुदविशदकीर्तेर्भू[तले]ऽप्यापि यस्य ।
रुचिरकनकभासोद्भासिनीमाबबन्ध
प्रतिदिनमिह देवः पट्टिकां सोमनाथः ॥

तस्माज्जातः सुतो राजा राजा राजीवलोचनः ।
राजेव राजते योऽत्र प्रजानन्दकरः सदा ॥

तस्माद्**वन्दिग**भूपतिः समभवद्भूपालचूडामणि-
र्यः सौभाग्यमहोदधिर्मृगदृशां कन्दर्पदर्पोद्धतः ।
राजा दीर्घभुजद्वयः पृथुलसद्वक्षस्थलः संगरे
क्रूरारिप्रमदेभदर्पदलनः श्रीकृष्णराजानुगः ॥

श्री**धो**[र]प्यमहानृपस्य दुहिता श्री**वोदिय**[**व्वा**]भिधा
शंभोः शैलसुतेव कैटभरिपोर्लक्ष्मीरिव प्रेयसी ।
यस्यासीत्कुमुदावदातयशसः स्तूपायमा[नं] यया
[ना]मावेश्वरमीशवेश्म विहितं कैलासलीलाहरम् ॥

[खे]नारातिकरालकालरचनाचण्डासिदण्डेन यो
हत्वा **मुञ्ज**[ञ्ज]महानृपप्रणयिनीं संग्रामरङ्गाङ्गणे ।
लक्ष्मीमम्बुधिमेखलावलयित[क्ष्मा]वर्तिनीं प्रापय-
द्भूपश्री**रणरङ्ग**भीमभवने साक्षात्कुलस्त्रीव्रतम् ॥

अधिष्ठानं **सिन्दीन**[ग]रममरस्वर्गवदिदं
सदा मूर्ता लक्ष्मीर्वसति भवने यस्य मुदिता ।
मनः शंभोः पादाम्बुरुहयुगले ध्याननियतं
यदोर्वंशे भूपाचरितमभवं चा[रु]महसः ॥

हिमगिरिशिखरसदृशमिह राजति सुरपुरवर्त्मसंनिभं
हतपुर[म]थननियतकैलासगिरिस्पृहमंशुमसत्प्रभम् ।
पुञ्जितयश इवेन्दुकुन्द[द्यु]ति भूतलतिलकसुन्दरं
विजयाभरणनाथाभिधमभिनवगिरीशमन्दिरम् ॥

समधिगतपञ्चमहाशब्दमहासामन्तद्वारवतीपुरपरमेश्वरैकशङ्खध्वनिबधिरितदिगन्तरालविजयतूर्यारवसंत्रासितजितरिपुसमूहविष्णुवंशोद्भवभवचरणाराधनैकतत्परमनस्विनीमानोन्मूलनकन्दर्पदर्पोद्धताराातिनिष(सू)दनसंग्रामरामकन्दुकाचार्यसेल्लविडेगविजयाभरणेत्यादिसमस्तराजावलीविराजितश्रीमद्भिल्लमराजा 'अन्तःशून्यः कदलीगर्भवदसारः संसारः, व्याधिजरामरणसाधारणं शरीरम्, प्रबलपवनकम्पितनलिनीदलगततुषारतले च धनायुषी यौवनं च, तथा च कृतत्रेताद्वापरयुगेभ्योऽत्यर्थं दानफलं कलौ युगे पुनः शंसन्ति ।

न तथा सफला विद्या न तथा सफलं धनम् ।
यथा तु मुनयः प्राहुर्दानमेकं कलौ युगे ॥

अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
लो[क]त्रयं तेन भवेत्प्रदत्तं यः काञ्चनं गां च महीं च दद्यात् ॥

आस्फोटयन्ति पितरः प्रवल्गन्ति पितामहा ।
भूमिदोऽस्मत्कुले जातः स नः संतारयिष्यति ॥

भूमिदानं सुपात्रेषु सुतीर्थेषु सुपर्वणि ।
अगाधापारसंसारसागरोत्तारणं भवेत् ॥

धवलान्यातपत्राणि दन्तिनश्च मदोद्धताः ।
भूमिदानस्य पुष्पाणि फलं स्वर्गः पुरंदरः ॥'

इति पराशरवत्सकुत्साङ्गिरसगौतममनुयाज्ञवल्क्यमुनिवचनान्यवधार्य मया दृढतरविरक्तबुध्या(द्ध्या) मातापित्रोरात्मनश्च श्रेयोर्थिना हि मया ब्राह्मणानां ग्रामो दत्तः । श्रीसिन्दीनगरान्तःपातिवाजिकाण्वशाखिने गौतमगोत्राय ········ होपाध्या[या]य · ·तारणै उपाध्यायसुताय, तथा वाजिकाण्वशाखाय कौण्डिन्यगोत्राय [विद्याध]रैआय श्रीधरै उपाध्यायसुताय, तथा व(ब)ह्वृचशाखाय भरद्वाजगोत्राय म[हलपै]आय वि[द्वः] पैयसुताय, तथा वाजिमाध्यंदिनशाखाय कौण्डिन्यगोता(त्रा)य [महल]पैआय इन्दपैयसुताय, तथा व(ब)ह्वृचशाखाय देवपैयाय अल्लपैसुताय,

तथा [छन्दो]गप्रभाकरदीक्षिताय, तथा मित्रायणीवच्छपैयः, तथा अन्ध्रपम्यणैयः, तथा माध्यंदिन[गु]हिसपैयः, तथा छन्दोगग्गलः सोम्मैयसुतः, तथा माध्यंदिनमह्लपैयः, तथा व(ब)ह्वृचराजदौवारिकमह्लपैयः, तथा व(ब)ह्वृचसंगलः, तथा करहाटवप्पलः, तथा वाजिकाण्वनिम्वैयः, तथा व(ब)ह्वृचनेवपैयः, तथा व(व)ह्वृचशाखाय कौशिकगोत्राय विक्कपैयाय श्रीधरैसुताय, तथा [धो]प्पलाय कौशिकगोत्राय व(ब)ह्वृचशाखिने, तथा व(ब)ह्वृचशाखाय अण्णलैआय, तथा व(ब)ह्वृचशाखाय दन्दपैआय काल्पैसुताय, तथा पौग्वदेवः अल्लपैसुताय एवममीषां द्विजानां पितृपैतामहोपार्जितं मातुलिङ्गीतटसमावासितं अर्जुनोण्टिकाग्रामं तथा लघु अर्जुनोण्ढीग्राम-लघुवब्वुलवेद्रग्राम[द्व]याभ्यन्तरं सवृक्षमालाकुलं चा(च)तुःसीमापर्यन्तं साष्टादशप्रकृत्योपेतं वापीकूपतडागारामसहितं सतृणकाष्ठपाषाणोपेतं श(स)कलसमस्तोपेतम् । ग्रामस्याघाटाः लिख्यन्ते—पूर्वत. संग्गमनगरम्, दक्षिणतश्चिखलीग्रामः, पश्चिमतः जम्बलेनिम्वग्रामः, उत्तरतः वब्बुलवेद्रतृ(त्रि)ग्रामी, एवं चाचतुराघाटविशुद्धं सर्वाभ्यन्तरसिद्धया पुत्रपौत्रादिसंतत्योपेतानां चन्द्रार्कं यावत्प्रतिपालनीयम् । एवमन्वयजां(जानां) बन्धूनामपि [भुञ्जानानां भो]जयतां कृषतां कर्षापयतां वा यथेष्टं प्रतिदिशतां प्रतिदेशयतां केनापि स्वश्रे(?) बाधा न करणीया ।

उक्तं च मुनिभिः—

यानीह दत्तानि पुरा नरेन्द्रैर्धनानि धर्मार्थयशस्कराणि ।
निर्माल्यमालाप्रतिमानि तानि को नाम साधुः पुनराददीत ॥

व(ब)हुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

सद्यो दानं निरायासं सायासं तस्य पालनम् ।
एवं हि ऋषयः प्राहुर्दानाच्छ्रेयोनुपालनम् ॥

दत्त्वा भूमिं भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्रः ।
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥

इत्यर्थितोऽपि यः कलिकालवस(शा)ल्लोभाभिभूतो यः पूर्वदानमपहरिष्यति स पञ्चमहापातकैरुपपातकैर्युतो रौरवादिषु नरकेषु पच्यमानो दुष्कृतमनुभविष्यति।

तथा च व्यासभट्टारकः प्राह—

'स्वदत्तां परदत्ता वा यो हरेत वसुंधराम्।
स विष्टाया कृमिर्भूत्वा कृमिभि सह पच्यते॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिनः।
महाहयो हि जायन्ते भूमिदानापहारकाः॥
तडागाना सहस्रेण वाजिमेधशतेन च।
गवां कोटिप्रदानेन भूमिहर्ता न शुद्ध्यति॥'

इति महर्षिवचनान्यवधार्य आगन्तुकराजभि· धर्मलोपभयेन प्रतिपालनीयम्।

मद्वंशजा परमहीपतिवंशजा वा
पापादपेतमनसो भुवि भाविभूपा।
ये पालयन्ति मम धर्ममिमं समग्रं
तेषां मया विरचितोऽञ्जलिरेष मूर्ध्नि॥

सा(शा)वेरीसंवत्सरीयभाद्रपदामावास्यायाम्। श्रीनासिकीय अरुणासवै(वे)द्यमहातीर्थे परमव्रती(तो)पवासनियमयुक्तेन स्त्री(श्री)भिल्लमराजेन सूर्यग्रहणे ग्रामोऽयं प्रदत्तः॥ लिख(खि)तमिदं शासनपट्टं स्थाननियमेन राजनियमेन च मया केशवै उपाध्यायेनेति

यदक्षरं परिभ्रष्टं मात्राहीनं च यद्भवेत्।
क्षा(क्ष)न्तुमर्हथ विद्वासः कस्य न स्खलते मन.॥
यदत्रोनाक्षरमधिकं वा तत्सर्वे प्रमाणमिति॥

(एपिग्राफिआ इण्डिका २।२१७–२२१)

(११९)

खेलरीग्रामस्थहरिब्रह्मदेवमन्दिरप्रशस्तिपत्रम्[१]।

ॐ श्रीगणपतये नमः॥

सकलदुरितहर्ताभीष्टसिद्धिप्रकर्ता
निगमसमुपगीतः शेषयज्ञोपवीतः।
ललितमधुकरालीसेविता गण्डपाली-
तटभुवि गणराजः पातु वो विघ्नराजः॥
वेदानाराध्य वेधाः पठति भगवतीं यामनायस्तचित्तः
श्रीकण्ठस्यापि नादैरपहरति मनः पार्वती किंनरीभिः।
हारा नारायणस्योरसि रहसि रणत्कङ्कणा यद्भुजाः स्युः
सद्यः सत्काव्यसिद्ध्यै स्फुरतु कविमुखाम्भोरुहे भारती सा॥
ब्रह्मादयो द(दि)विषदः श्रुतिवाक्यदृष्ट्या
ध्यायन्ति यं पुरुषमात्मविदोऽप्यमूर्तम्।
पापानि यत्स्मरणतो विलयं प्रयान्ति
नारायणः स्फुरतु चेतसि सर्वदा वः॥
अहिहयनृपवंशे शंभुभक्तोऽवतीर्णः
कलचुतिरिति शाखां प्राप्य तीव्रप्रतापः।
निजभुजगुरुदर्पाद्योऽरिंदुर्गाण्यजैषी-
द्रणभुवि दश चाष्टौ **सिंहणक्षोणिपालः**॥
अभवदवनिपालस्तत्सुतो **रामदेवः**
समरशिरसि धीरो येन **भोणिङ्गदेवः**।
मणिरिव फणिवंशस्याहृतः कोपदृष्ट्या
तरुणतरणितेजःपुञ्जराजत्प्रतापः॥

---

१. 'अयं च खेलरीग्रामो रायपुरग्रामतः पञ्चचत्वारिंशन्मैलात्मके पूर्वस्यामन्तराले वर्तते' इति Dr. F. Kielhorn, Ph. D, C. I. E., महाशयाः.

तत्पुत्रः शत्रुहन्ता जगति विजयते चन्द्रचूडस्य भक्तः
श्यामः कामाभिरामो मनसि मृगदृशामुद्भटानां कृतान्तः।
सर्वेषां याचकानां स्फुरदमरतरुर्वाक्पतिः पण्डितानां
गीतज्ञानां द्वितीयो भरत इव नृपः श्रीहरिब्रह्मदेवः॥
तद्राजधानी नगरीगरिष्ठा [1]खल्वाटिका राजति वाटिकाभिः।
सुरालया यत्र हिमालयाभा विभान्ति शृङ्गैरतिशुभ्रतुङ्गैः॥
भूदेवा यत्र वेदाध्ययनमनुरताः स्वस्तिमन्तो वसन्ति
श्रीमन्त श्रीविलासैरमरपरिवृढं राजराजं हसन्तः।
कामिन्य कामदेवं त्रिपुरहरदृशा दग्धमुज्जीवयन्त्य.
प्रोद्यद्दोर्मूलकान्त्या स्मितमधुरगिरा भ्रूलताडम्बरेण॥
मोची तत्रेन्दुरोचीरुचिरतरयशा कर्मनिर्माणदक्षः
सौजन्याढ्यग्रजन्मानुचर इव जसीनामधेयस्य पौत्रः।
नानाधर्माभिलाषी गुणनिधिशिवदासाभिधानस्य पुत्र.
श्रीमन्नारायणस्य स्मरणविमलधी राजते देवपालः॥
नारायणस्यायतनं स्वशक्त्या भक्त्या महत्या सह मण्डपेन।
निर्मापितं तेन परत्र चात्र तस्मै हरिर्यच्छतु वाञ्छितार्थम्॥
हरिचरणसरोजध्यानपीयूषसिन्धु-
प्रसरदलघुवेलास्फालकेलीरसेन।
सरसकविजनानां निर्मितेयं प्रशस्ति-
र्मनसि रसविधात्री मिश्रदामोदरेण॥
वहति जगति गङ्गा यावदादित्यपुत्र्या
स्फुरति वियति तारामण्डलाखण्डलेन।
तरणिरमरसद्मच्छद्मना तावदेषा
जयतु जयतु मोचीदेवपालस्य कीर्तिः॥
श्रीवास्तव्यान्वयेनैषा प्रशस्तिरमलाक्षरा।
लिखिता रामदासेन पण्डिताधीश्वरेण च॥

१ 'खेलरी' इति नामास्या एव भवेत्

स्वस्ति श्रीसंवत् १४७० वर्षे शाके १३३४ षष्ट्याब्दयोर्मध्ये प्लवनामसंवत्सरे माघसुदि ९ शनिवासरे रोहिणीनक्षत्रे शुभमस्तु सर्वजगतः । सूत्रधाररत्नदेवेन ॥

(एपिग्राफिआ इण्डिका—२।२३०-२३१)

---

(१२०)

[१]दुबकुण्डग्रामस्थजिनमन्दिरशासनपत्रम् ।

ओं नमो वीतरागाय ॥

आ········द्री····ट················टना[घटपा]दपीठं लुठ-
न्मन्दारस्रगम[न्द]गुञ्ज[द]लि[म]न्निष्ठचूतसांराविणम् ।
[त]त्पा··············वद्ध[च]····रसु·····················[तां]
सं········द्वेगमिवाकरोत्स ऋषभस्वामी श्रिये स्तात्सताम् ॥
वि[बि]भ्रा[णो] गुण[सं]ह[तिं] हततमस्तापो निजज्योतिषा
[यु]क्तात्मापि जगन्ति संगतजयश्चक्रे सरागाणि यः ।
उन्माद्यन्मकर[ध्व]जोर्जितगजग्रासोल्लसत्केसरी
संसारोग्रगदच्छिदेऽस्तु स मम श्रीसा(शा)न्तिनाथो जिनः ॥
जाड्यं सस्व(शश्व)दखण्डितक्षयमपि क्षीणाखिलोपक्ष[यं]
साक्षादीक्षितमक्षिभिर्दधदपि प्रौढं कलङ्कं तथा ।
चिह्नत्वाद्यदुपान्तमाप्य सततं [जातस्तथा]नन्दकृ-
च्चन्द्रः सर्वजनस्य पातु विपदश्चन्द्रप्रभोऽर्हन् स नः ॥
सो(शो)कानोकहसंकुलं रतितृणश्रेणिप्रणश्य[त्क्रम]-
········[त्मा]ध्वगपूगमुद्धतमहामिथ्यात्ववातध्वनिः ।

---

१. अय दुबकुण्डग्रामो ग्वालियरनगरतः षट्सप्ततिमैलात्मके नैर्ऋतभागेऽन्तराले कुनुनद्या वामभागेऽरण्यान्यां वर्तत इति Dr. F. Kielhorn, Ph. D., C. I. E , महाशयाः.

यो रागादिमृगोपघातकृतधीर्ध्यानाग्निना भस्मसा-
द्भावं कर्मवनं निनाय जयतात्सोऽयं जिनः सन्मतिः ॥
प्रसाधितार्थगुर्भव्यपङ्कजाकरभास्करः ।
अन्तस्तमोपहो वोऽस्तु गोतमो मुनिसत्तम. ॥
श्रीमज्जिनाधिपतिसद्वदनारविन्द-
मुद्गच्छदच्छतरवो(बो)धसमृद्धगन्धम् ।
अध्यास्य या जगति पङ्कजवासिनीति
ख्यातिं जगाम जयतु सु(श्रु)तदेवता सा ॥
आसीत्कच्छपघातवंशतिलकस्त्रैलोक्यनिर्यद्यशः-
पाण्डुश्रीयुवराजसूनुरसमद्युद्भीमसेनानुगः ।
श्रीमा[न]र्जुनभूपति· पतिरपामप्याप यत्तुल्यतां
नो गाम्भीर्यगुणेन निर्जितजग[द्ध]न्वी धनुर्विद्यया ॥
श्रीविद्याधरदेवकार्यनिरत. श्रीराज्यपालं हठा-
त्कण्ठास्थिच्छिदनेकबाणनिवहैर्हत्वा महत्याहवे ।
[डिण्डीरा]वलिचन्द्रमण्डल[मि]लन्मुक्ताकलापोज्वलै-
स्त्रैलोक्यं सकलं यशोभिरचलैर्योऽजस्रमापूरयत् ॥
यस्य प्रस्थानकालोत्थितजलधिरवाकारवादित्रशब्दा
वेगान्निर्गच्छदद्रिप्रतिमगजघटाकोटिघण्टारवाश्च ।
संसर्पन्तः समन्तादहमहमिकया पूरयन्तो विरेमु-
र्नो रोदोरन्ध्रभागं गिरिविवरगुरूद्यत्प्रतिध्वानमिश्राः ॥
दिक्चक्राक्रमयो[ग्य]मार्गणगणाधारानेकान्गुणा-
नच्छिन्नाननिशं दधद्विधुकलासंस्पर्धमानद्युतीन् ।
[सू]नुच्छिन्नधनुर्गुणं विजयिनोऽप्याजौ विजित्यो[र्जि]तं
जातोऽस्माद्भीमन्युरन्यनृपतीनामान्यमानस्तृणम् ॥

---

१. त्रैलोक्यनिर्यद्यशाश्चासौ पाण्डुरेव श्रिया राज्यलक्ष्म्या युतत्वाद्युवराजः तस्य सूनुः, त्रैलोक्यनिर्यद्यशसा पाण्डुश्रीयुक्तस्य युवराजनाम्नोऽपत्यम्. २ असमद्युतो भीमसेनस्य, भीमायाः सेनाया वानुग

यस्यास्त्य[द्भुत]वाहवाहनमहाशस्त्रप्रयोगादिषु
　प्रावीण्यं प्रविकत्थितं पृथुमति**श्रीभोज**पृथ्वीभुजा।
च्छत्रालोकनमात्रजातभयतो दृप्तारिभङ्गप्रद-
　स्यास्य स्याद्गुणवर्णने त्रिभुव[ने] को लब्धवर्णः प्रभुः॥
तुरगखरखुराग्रोत्खात[धात्री]समुत्थं
　स्थगयदहिमरश्मेर्मण्डलं यत्प्रयाणे।
प्रचुरतररजोन्याशेषतेजस्वितेजो
　हृतिमचिरत एवा[शं]सतीवानिवारम्॥ १२॥
शरदमृतमयूखप्रेङ्खदंशुप्रकाश-
　प्रसरदमितकीर्तिव्याप्तदिक्चक्रवालः।
अजनि **विजयपालः** श्रीमतोऽस्मान्महीशः
　शमितसकलधात्रीमण्डलक्लेशलेशः॥
भयं यच्छत्रूणां त्रिदशतरुणीवीक्षितरणे
　क्रमेणाशेषाणां व्यतरदसदप्यात्मनि सदा।
सतोऽप्यंश(?)न्नादादव[नि]वलयस्याधिकमतो
　बुधानामाश्चर्यं व्यतनुत नरेन्द्रो हृदि च यः॥
तस्माद्विक्र[म]कारिविक्रमभरप्रारम्भनिर्भेदित-
　प्रोत्तुङ्गाखिलवैरिवारणघटोद्यन्मां[स]कुम्भस्थलः।
श्रीमान्**विक्रमसिंह**भूपतिरभूदन्वर्थनामा समं
　सर्वाशाप्रसरद्विभासुरयशःस्फारत्स्फुरत्केसरः॥
बालस्यापि विलोक्य यस्य परिघाकारं भुजं दक्षिणं
　क्षीणाशेषपराश्रयस्थितिधिया वीरश्रिया संश्रितम्।
सर्वाङ्गेष्ववगूहनाग्रहमहंकारादहंपूर्विका-
　राज्यश्रीरकृताधिगस्य विमुखी सर्वान्यपुंवर्गतः॥
अत्यन्तो दृप्तविद्विट्तिमिरभरभिदि च्छादितानी[ति] तारा-
　चक्रे विष्वक्प्रकाशं सकलजगदमन्दावकाशं दधाने।

निष्पर्यायं दिगास्यप्रसरदुरुक[राका]न्तधात्रीधरेन्द्रे
यस्मिन्राजांशुमालिन्यहह सति वृथैवैष कोऽन्योंऽशुमाली ॥

यद्दिग्जये वरतुरङ्गखुराग्रसङ्ग-
क्षुण्णावनीवलयजन्यरजोभिसर्पत् ।
विद्वेषिणां पुरवरेषु तिरोहितान्य-
वस्तूत्करं प्रलयकालमिवादिदेश ॥

तस्य क्षितीश्वरवरस्य पुरं समस्ति
विस्तीर्णशोभमभितोऽपि **चडोभ**संज्ञम् ।
प्राप्तेप्सितक्रयसमग्रदिगागताङ्गि-
व्यावर्ण्यमानविपणिव्यवहारसारम् ॥

आसीज्ज्ञायसपूर्विनिर्गतवणिग्वंशाम्बरामीशुमान्
जासूकः प्रक[टाक्षता]र्थनिकरः श्रेष्ठी प्रभाधिष्ठित· ।
सम्यग्दृष्टिरभीष्टजैन[च]रणद्वंद्वार्चने यो ददौ
पात्रौघाय चतु[र्विधं] त्रिविबुधो दान युतः श्रद्धया ॥

श्रीमज्जिने[श्वर]पदाम्बुरुहद्विरेफो
विस्फारकीर्ति[ध]वलीकृतदिग्विभागः ।
पुत्रोऽस्य वैभवपदं **जयदेव**नामा
सीमायमानचरितोऽजनि सज्जनानाम् ॥

रूपेण शीलेन कुलेन सर्वस्त्रीणां गुणैरप्यपरै शिरःसु ।
पदं दधानास्य बभूव भार्या **यशोमती**ति प्रथिता पृथिव्याम् ॥

तस्यामजीजनदसा**वपिदाहडा**ख्यौ
पुत्रौ पवित्रवपुराजितचारुमूर्ती ।
प्राच्यामिवार्कशशिनौ समय समस्त-
संपत्प्रसाधकजनव्यवहारहेतू ॥

प्रोन्माद्यत्सकलारिकुञ्जरशिरोनिर्दारणोद्यद्यशो-
मुक्ताभूषितभूरभूरपिभिया(?)न्नोन्मार्गगामी च यः ।

सोऽदाद्विक्रमसिंहभूपतिरतिप्रीतो यकाभ्यां युग-
श्रेष्ठः श्रेष्ठिपदं पुरेऽत्र परमे प्राकारसौधापणे ॥
आसीद्विशुद्धतरबोधचरित्रदृष्टि-
निःशेषसूरिनतमस्तकधारि[ता]ज्ञः ।
श्रीलाटवागटगणोन्नतरोहणाद्रि-
माणिक्यभूतचरितो **गुरुदेवसेनः** ॥
सिद्धान्तो द्विविधोऽप्यबाधितधिया येन प्रमाणध्वनि-
ग्रन्थेषु प्रभवः श्रियामवगतो हस्तस्थमुक्तोपमः ।
जातः **श्रीकुलभूषणो**[1]ऽखिलविपद्वासोगणग्रामणीः
सम्यग्दर्शनशुद्धबोधचरणालंकारधारी ततः ॥
रत्नत्रयाभरणधारणजातशोभ-
स्तस्मादजायत स **दुर्लभसेनसूरिः** ।
सर्वं श्रुतं समधिगम्य सहैव सम्य-
गात्मस्वरूपनिरतोऽभवदिद्धधीर्यः ॥
आस्थानाधिपतौ वु(बु)धा[दवि]गुणे श्री**भोजदेवे** नृपे
सभ्येष्वम्बरसेनपण्डितशिरोरत्नादिषूद्यन्मदान् ।
योऽनेकाञ्शतशो व्यजेष्ट पटुताभीष्टोद्यमो वादिनः
शास्त्राम्भोनिधिपारगोऽभवदतः श्री**शान्तिषेणो** गुरुः ॥
गुरुचरणसरोजाराधनावाप्तपुण्य-
प्रभवदमलवु(बु)द्धिः शुद्धरत्नत्रयोऽस्मात् ।
अजनि **विजयकीर्तिः** सूक्तरत्नावकीर्णा
जलधिभुवमिवैतां यः प्रशस्तिं व्यधत्त ॥
तस्मादवाप्य परमागमसारभूतं
धर्मोपदेशमधिकाधिगतप्रबोधाः ।
लक्ष्म्याश्च बन्धुसुहृदां च समागमस्य
मत्वायुषश्च वपुषश्च विनश्वरत्वम् ॥

१. निखिलदिगम्बरगणे ग्रामणीः.

आरब्धाधर्मकान्तारविदाहः साधुदाहडः।
सद्विवेकश्च **कूकेकः सूर्पटः** सुकृते पटुः॥
तथा **देवधरः** शुद्धः धर्मकर्मधुरंधरः।
च[न्द्रा]लिखितनाकश्च महीचन्द्रः शुभार्जनात्॥
गुणिनः क्षणनाशिश्रीकलादानविचक्षणाः।
अन्येऽपि श्रावकाः केचिदकृते धनपावकाः॥
किंच **लक्ष्मणसंज्ञो**ऽभू... **हदेवस्य** मातुलः।
गोष्ठिको जिनभक्तश्च सर्वशास्त्रविचक्षणः॥
शृङ्गाग्रोल्लिखिताम्बरं वरसुधासान्द्रद्रवापाण्डुरं
सार्थं श्रीजिनमन्दिरं त्रिजगदानन्दप्रदं सुन्दरम्।
संभूयेदमकारयन्गुरुशिरःसंचारिकेत्वंव(म्ब)र-
प्रान्तेनोच्छलतेव वायुविहतेर्द्यामादिश[त्पश्य]ताम्॥

अथैतस्य जिनेश्वरमन्दिरस्य निष्पादनपूजनसंस्काराय कालान्तरस्फुटितत्रुटितप्रतीकारार्थं च महाराजाधिराजश्री**विक्रमसिंहः** स्वपुण्यरासे(शे)रप्रतिहतप्रसरं परमोपचयं चेतसि [नि]धाय गोणी प्रति विंशोपकं गोधूमगोणीचतुष्टयवापयोग्यक्षेत्रं च महा[चक्र]ग्रामभूमौ रजकद्रहपूर्वदिग्भागवाटिकां वापीसमन्वितां प्रदीपमुनिजनशरीराभ्यञ्जनार्थं करघटिकाद्वयं च दत्तवान्। तच्चाचन्द्रार्कं महाराजाधिराजश्रीविक्रमसिंहोपरोधेन

'व(ब)हुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥'

इति स्मृतिवचनान्निजमपि श्रेयः प्रयोजनं मन्यमानैः सकलैरपि भाविभिर्भूमिपालैः प्रतिपालनीयमिति

लिले**खोदयराजो** यां प्रशस्तिं शुद्धधीरिमाम्।
उत्कीर्णवाञ्शिलाकूट**स्तील्हण**स्तां सदक्षराम्॥

संवत् ११४९ भाद्रपदसुदि ३ सोमदिने मङ्गलं महाश्रीः॥

(एपिग्राफिआ इण्डिका—२।२३७-२४०)

(१२१)

सुप्रसिद्धमथुरान्तर्गतकेशववप्रोपलब्धविष्णुमन्दिर-प्रशस्तिः[१]।

ॐ गणपतये नमः ॥

दिश्यात्स वः कैरवकु[ड्मलाभः श्रे]यांसि दन्तो द्विरदाननस्य ।
विजित्य विघ्नानिव·······शङ्के मुखे समाधातुमुपाहितो यः ॥
शौरेः कज्जलकान्तिरस्त्वसिलता भूत्यै चिरं वः करा-
त्कालिंदीव समुद्गता सरभसं या स्वर्धुनीस्पर्धया ।
यत्रान्तर्जलमानुषीव कमला डिण्डीरपिण्डोपमः
कम्बुर्बिम्बितमम्बरं कमलिनीकिंजल्कपुञ्जायते ॥
स वोऽवतु ज[नार्दन]ः सकलदैत्यदर्पार्दनो
महानरकमर्दनः प्रचुरचौरसंतर्दनः ।
समस्तभुवनाकरः सकलचक्रभूषाकरो
धृतामरमहाभरस्तृणवदुद्धृतक्ष्माधरः ॥
इति प्रथममेव ।
शाखासंततिसंनिरुद्धसकलप्रोद्दामदिग्मण्डलः
श्लाघ्यः पान्थसमाश्रयो द्विजकुलैः संसेव्यमानोऽधिकम् ।
क्षोणीमण्डलमण्डनं बहुतरप्रख्यातपर्वक्रमः
श्रीमानस्ति समुन्नतः क्षितितले राजन्यवंशो महान् ॥
सौजन्यामृतवारिधिर्गुरुगुणग्रामप्रकामावधिः
श्रीमान्धर्मनिधिर्नयैकनिपुणक्षुण्णाध्वचक्रप्रधिः ।
तत्राभूत्कलिकालकल्मषमषीप्रक्षालनैकश्रमो
मान्यः क्षत्रियवर्गमौलितिलकः श्रीसिंहराजाह्वयः ॥

---

१. इय प्रशस्तिः 1150 A. D समयोत्कीर्णा Dr. A. Fuhrer महाशयेन केशवसंज्ञकमथुरास्थमृत्कूटत उपलभ्य प्रेषिता Dr. G. Buhler, Ph. D., LL. D., C. I. E. महाशयेन शोधयित्वा प्रकाशिता.

दानेन लक्ष्मीर्विनयेन विद्या भावेन भक्तिः क्षमया च शक्तिः ।
सत्येन सूक्तिः सुकृतेन मूर्तिरलंकृतालंकृतिना च येन ॥

तस्याभूत्तनयो नयोन्नतमति· श्रीतेजराजाह्वयः
सद्धर्मैकरुचिः शुचिर्गुरुगुणग्राही विवेकाकरः ।
यश्चित्रं पुरुषोत्तमोऽपि विदितो धत्ते न वैकुण्ठता-
मैश्वर्येऽप्यभुजंगमो न तरलो यो नायकोऽपि स्फुटम् ॥

तस्मात्सूनुरजायतोज्ज्वलतरप्रख्यातकीर्त्युच्चयः
श्रीमानासिक इत्युदारमहिमा देवद्विजार्चारतः ।
विद्वद्वाञ्छितपूर्तिकल्पविटपी न्यायैकनिष्ठः परं
········ ·· रोमणिर्विमलधीर्धीर· सतां संमतः ॥

शंभुः शैलसुतामिव श्रियमिव श्रीशार्ङ्गपाणिः प्रभुः
पौलो[मीमिव] वृत्रहाम्बुधिरिव स्रोतस्विनी जाह्नवीम् ।
शीतांशुः किल रोहिणीमिव मुनिर्मान्यामिवारुन्धतीं
स श्रीमान्हरिकण्ठजामुदवहत्सद्भक्तिभ[रान]ताम् ॥

तस्यां तेन सुतो जज्ञे जज्जः सज्जनभूषणम् ।
रामो दशरथेनेव कौ[स]ल्यायामुदारधीः ॥

कुम्भैरम्भः कलयितुमलं वा[रि]धेः कस्य शक्तिः
को वा गङ्गापुलिनसिकतास्ताः परिच्छेतुमीशः ।
नक्षत्रालीं दिवि गणयितुं कोऽङ्गुलीभिः समर्थः
तस्य स्तोतुं सकलमथवा क प्रगल्भो गुणौघम् ॥

चन्द्रः कथंचित्समवाप्य वृद्धिं पक्षं किलैकं विमलं करोति ।
जज्जः पुनर्भूतलपार्व[णेन्दु] द्वावेव पक्षौ विमलौ विधत्ते ॥

सङ्ग· साधुभिरेव कोपशमने शक्तिश्च धर्मे मति-
र्दानेऽभ्यासविधि· परोपकृतये कार्यं गुरूणां नतिः ।
[भक्तिः] श्रीपुरुषोत्तमाङ्घ्रियुगले गोष्ठी समं पण्डितै-
र्जज्जस्यासिकसंभवस्य सुमते· किं किं न लोकोत्तरम् ॥

काय: परोपकृतिभिः सुकृतो[च्चयेन
बु]द्धिर्मुरारिचरणस्मरणेन चेतः।
लक्ष्मीरपि प्रणयिवाञ्छितपूरणेन
सत्येन वागपि च येन कृता कृतार्था॥
श्रीमान्त्रिस्सिकनामधेयविदितो राजन्यवंशोद्गत-
स्तस्यासावुपयेमिवान्दुहितरं धर्माभिधानां सतीम्।
शीलाचारविभूषणां शुभगुणां भर्तृव्रतां संमतां
तस्यां पुत्रचतुष्टयं समभवद्धर्मोपपन्नं तत॰॥
तस्यानुजो गुणनिधिर्गुणिनां वरिष्ठः
ख्यातः सुरद्विजगुरूचितभक्तियुक्तः।
गाम्भीर्यसत्यनयदानविवेकबुद्धिः
श्रीआसिकात्मजसुनिर्मलपज्जनामा॥
अवन्तराजतनयां भार्यामुदवहत्सतीम्।
तस्यां स जनयामास.................. ॥
संसारं हरिभक्तिसारमखिलं विज्ञाय गोष्ठीजनैः
सार्धं धर्मधुरां चिराय वहता जज्जेन निर्मापितम्।
विष्णोर्हर्म्यमनल्पशिल्परचनावैचित्र्यपात्रं वह-
त्स्वर्गङ्गानिललोलितध्वजपटं शुभ्राभमभ्रंलिहम्॥
सौव:सैन्धवमन्धकान्तकजटाजूटाटवीनाटक-
क्रीडादुर्ललितस्थितिस्थिरतरं यावत्पवित्रं पयः।
सध्रीची सुचिरं फणीश्वरफणारत्नाङ्कुराणां क्षि[ति-
र्यावत्त]ावदिहास्तु मन्दिरमिदं लक्ष्मीपतेः शाश्वतम्॥
अत्र गोष्ठीकृतां नामानि—
मुत्तिकात्मजधर्म्मीह रामस्तिलहस्य नन्दनः।
पेइचित्तक..................णो वस्सिकात्मजः॥
मङ्गपुत्रो नारदश्च जासिको माहवाङ्गजः।
ढोलसूनुर्वसन्तश्च कलस्यात्मजधन्तुक॰॥

सोभरात्मा महीपालः..................नः ।
फुल्लोरी सडसंभूतो देधरो माधवात्मजः ॥
सोढलो रामपालस्य सेल्हणो राजिकोद्भवः ।
एते गोष्ठी समागम्य पुत्रपौत्रादि............काः ॥
अथातो लिख्यते वृत्तिर्देवदेवस्य चक्रिणः ।
संप्रदत्ता नरेन्द्रेण पुरवासिजनेन च ॥
द्वे गृहे वीथयः षट् च वाटिका देवहेतवे ।
गोणीप्रसृतिरन्नस्य मानोन्मानरसादिका ॥
यन्त्रे यन्त्रे पली.......चा.......पुष्पमालिकात् ।
मापकाच्च चतुर्थोऽशो यः कश्चिन्मापको भवेत् ॥
यः कश्चिद्धरते वृत्तिं न ददाति च मानवः ।
स गच्छेन्नरकं घोरं यावदाभूतसंप्लवम् ॥
अस्याः प्रशस्तेः कर्तारौ बुधौ पालकुलद्धरौ ।
क्षन्तव्यं सर्वविबुधैर्न्यूनान्यूनं विचारतः ॥

संवत् १२०७ कार्तिकपौर्णमास्यां महाराजाधिराज..................ज-यपालदेवविजयराज्ये उत्कीर्णा सोमलसूत्र[धारे]ण ॥

(एपिग्राफिआ इण्डिका—२।२७६-२७९)

(१२२)

श्रीमहाराजाधिराजश्रीकर्णदेवानां शासनपत्रम्[१] ।

ॐ नमः शिवाय ॥

निर्गुणं व्यापकं नित्यं शिवं परमकारणम् ।
भावग्राह्यं परं ज्योतिस्तस्मै सद्ब्रह्मणे नमः ॥

---

१. इद शासनपत्रं श्रीकर्णमहाराजेन वेणीनदीतीरे स्वपितृश्राद्धकरणसमये दत्तग्रामस्य लिखित श्रीवाराणस्या प्राचीनदुर्गान्तर्गतप्राचीनकूपतो निःसृतम्. सा नदी चाधुना जबलपुरतो दक्षिणस्या दिशि ४० मीलप्रमिते नागपुरतः पूर्वस्या दिशि ३० मील-प्रमिते देशे वहति. शासनान्तलिखितसमयश्चेदिराजधान्या वर्तते इति हेतोः २४९ योगेन ईश संवत् १०४२ भवति—इति Professor F. Kielhorn, Ph. D., C. I. E. महाशयाः.

यद्द्वेधा स्थितमव्ययं परमपि जो(ज्यो)तिश्चिदंशुप्रभं
सूर्याख्यस्य च भास्वरप्रभृतयो यस्य स्फुरन्त्यूर्मयः।
सर्वज्ञान[म]यो बभूव भगवांस्तस्मान्मनुर्मानसो
यस्मात्सृष्टिरभूदियं गुणवती स्त्रीपुंनिमित्ता ततः॥
देवः **श्रीकार्तवीर्यः** क्षितिपतिरभवद्भूषणं भूतधात्र्या
हेलोत्क्षिप्ताद्रिबिम्ब्यत्तुहिनगिरिसुताश्लेषसंतोषितेशम्।
दोर्दण्डाकाण्डसेतुप्रतिगमितमहापूररेवाप्रवाह-
व्याधौतत्र्यक्षपूजागुरुजनितरुषं **रावणं** यो बबन्ध॥
यस्य भ्रूभङ्गभीता दद(ध)ति नृपतयः क्लिष्टमावे(रे) प्रतिप(ष्ठां)
आ कैलासात्सहेलं हरवृषभसमुत्खातशृङ्गाग्रभित्तेः।
आ च प्राचः समुद्रात्सुरसरिदतुलस्थूलमुक्तावलीका-
दाम्भोधेर्दक्षिणाच्च स्फुरदतुलमणेः सेतुसीमन्तभाजः॥
तद्वंशप्रभवा नरेन्द्रपतयः ख्याताः क्षितौ **हैहया**-
स्तेषामन्वयभूषणं रिपुमनोविन्यस्ततापानलः।
धर्मध्यानधनानुसंधितसुखः शश्वत्सतां सौक्ष(ख्य)कृ-
त्प्रेयान्सर्वगुणाङ्कितप्रभुतया श्रीमानभूत्**कोक्कलः**॥
सम्यक्शास्त्रविचारणा प्रतिदिनं धर्माय योगाय च
इष्टापूर्तपरोपकारकृतये यस्यार्थसक्ता मतिः।
आनृण्याधिगमाय दाननिरतिः सद्वंशपुष्टेस्तथा
ज्ञानाभ्यासवशान्मुमुक्षुपदवीमन्ते च यः प्राप्तवान्॥
भोजे वल्लभराजे श्रीहर्षे चित्रकूटभूपाले।
शंकरगणे च राजनि यस्यासीदभयदः पाणिः॥
शचि(ची)मिवेन्द्रः कमलामुपेन्द्रो नगेन्द्रकन्यामिव चन्द्रमौलिः।
चन्देलवंशप्रभवां सुशीलां **नट्टाख्यदेवीं** स तु पर्यणैषीत्॥
उद्दामदर्पद्विषतो जयन्तं कंदर्पमापीनघनस्तनीनाम्।
अजीजनत्स स्थितये जनस्य तस्यां महाशक्तिधरं कुमारम्॥

नाम्ना प्रसिद्धो भुवनत्रयेऽपि **प्रसिद्धपूर्वो धवलः** स राजा ।
वोढुं धुरं यो गुरुहारहा····योऽन्यान्नृपेन्द्रान्करदीचकार ॥
एकैकं ददता भुजंगमनिशं स्वं जीवितं रक्षता
भक्ष्यार्थं गरुडाय नागपतिना न्यक्कार उन्मीलितः ।
चारित्राय ददौ जलं सुरपतिर्गच्छन्नहल्यामृतौ
वन्ध्याया भुवनत्रयेऽप्ययमभूदौचित्यवृत्तेः पदम् ॥

किं वापरेण—
होहिन्ति एत्थ वंसे पुरिसा एहइयगारवमहग्घा ।
इअ हाविऊण जेणं पालीण परिग्गहो गहिओ ॥
[भविष्यन्ति अत्र वंशे पुरुषा अत्यधिकगौरवमहार्घाः ।
इति ज्ञात्वा येन दिशां परिग्रहो गृहीतः ॥]
तत्सूनुः ख्यातकर्मा दिगिभकरनिभाजानुबाहुर्महात्मा
भूमेर्भर्ता बभूव क्षतरिपुनृपति**र्बालहर्षः** सुजन्मा ।
यं सद्वृत्तानुरागानुकृतकृतयुगाचारमाश्रित्य जात-
स्त्यक्तान्योन्योपमर्दस्थिरवसतिरपास्तारिवर्गस्त्रिवर्गः ॥
धन्योऽत्र दाशरथिरेव रिपुर्दशास्यो
यस्याभवत्किमपरं समरोत्सवाय ।
भ्रूभङ्गभग्नसकलद्विषतो धिगस्मा-
नात्मानमाहवरसादिति यो मुमोच ॥
सत्यव्रतैकनिरतस्य युधिष्ठिरस्य
तस्यानुजः प्रथितबाहुबलो बभूव ।
दुर्योधनारिबलवीरवधैकधन्वी
पार्थोऽपरः कलियुगे **युवराजदेवः** ॥
भूभारक्षमदृक्श्रुतिप्रणयिनीमालम्बमानस्तनुं
कुर्वाणः समरेऽपि नाकपथगानागच्छतो विद्विषः ।
विख्यातां भुवि भूरिमार्गगमनामुच्चैर्दधद्वाहिनीं
यः साक्षात्परमेश्वरः समभवत्सम्यक्शिवाराधनात् ॥

तस्मादभूल्लक्ष्मणराजदेवः पुण्यैर्जनानां जनितव्यवस्थः।
अवाप्य यं धर्ममिव क्षितीशं चिराय लेभे जनता सुखानि॥

यः सत्यस्य निधिः श्रियां च सरणिः साम्रा च धाम्ना च यो
　यो दाता च दयालुरेव च पदं कीर्तेश्च नीतेश्च यः।
तस्यासीत्परमेष दूषणकणः कारुण्यपुण्यात्मनः
　पात्रापात्रविवेचनं न यदभूत्सर्वस्वदानेष्वपि॥

श्रीशंकरगणदेवस्ततोऽभवत्सकलभुवनतलतिलकः।
शासति वसुधां यस्मिन्पलायितं क्वापि कलिनापि॥

　असौ निस्त्रिंशता यत्र वक्रत्वं पलितागमे।
　रथचक्रेषु चारित्वं वायौ स्वच्छन्दचारिता॥

तस्यानुजोऽभूद्युवराजदेवः पतिः क्षितेः क्षत्रकूलप्रसूतिः।
यस्यासिधाराजलधौतमूर्तेश्चिरं स्थिरासीच्चपलापि लक्ष्मीः॥

　अर्थिसार्थावधिस्त्यागः सेसं(शौर्यं) शूरजयावधिः।
　यशसां धर्मराशेश्च नावधिर्यस्य भूपतेः॥

श्रीमांस्ततोऽजायत जातकीर्तिः काकल्लदेवो वसुधैकनाथः।
यन्मण्डलाग्रो रिपुमण्डलानि पुरो दधातीति यथार्थशब्दः॥

　नम्रं कार्मुकवत्कृतं नियमितं तूणीरवत्पृष्ठतः
　　काष्ठासु क्षणमात्रदृष्टविहितभ्रान्तं च दोर्दण्डवत्।
　कृत्वा साधु परिच्छेदेन रहितं सम्यक्करे स्थापितं
　　शत्रूणामखिलं कुलं नरपतिश्रेष्ठेन येनासिवत्॥

　काकल्ल[ख्य]नृपादपास्तसकलक्षोणीविप······
　　क्षीरक्षालितहारगौरगुणभूर्गाङ्गेयदेवोऽभवत्।
　यस्याजायत केवलं रणमुखे कौक्षेयकोऽग्रेसर-
　　स्तत्रैव प्रतिबिम्बितं पुनरभूदालाव······· ॥

　अगुनेज्लोजलोलेति(?) क्षा(ख्या)तं यदिह दुर्यशः।
　लक्ष्म्या तदधुना धौतं दिव्यमादाय तद्वपुः॥

ख्यातः सत्यतया स धर्मतनयस्त्यागेन वैरोचनिः
शौर्येणेन्द्रसुतो न चैतदभवत्स[त्यं] गता(मतं) [चे]तसि ।
एकस्मिन्नितयं कलौ समधिकं गाङ्गेयदेवे नृपे
दृष्ट्वा निश्चितमेव तैरवितथं पूर्वे यथोक्ता नृपाः ॥
तस्यात्मजः कर्ण इवावतीर्णः **कर्णः** पृथिव्यां प्रथितप्रभावः ।
यस्याभिषेकश्रवणाद्विषद्भिर्नष्टं प्रहृष्टं द्विजमित्रवर्गैः ॥
यत्कीर्तिलतया दूरं प्रसरन्त्या दिने दिने ।
ब्रह्माण्डमण्डपाभोगः स्वल्पतामुपनीयते ॥
स्वयं समुत्सृजन्नर्थानर्थिसार्थेष्वचिन्तितान् ।
कोऽप्येष भूषणं भूमेर्जङ्गमः कल्पपादप. ॥
शक्तित्रयैकनिलयस्य गुणाकरस्य
धर्मात्मनः स्तुतिपदं किमिहास्ति किंचित् ।
आशास्यते परमिदं कृतिभिः सदैव
राजन्वती वसुमती भवतैव भूयात् ॥

तदेव गुणगणालंकृतशरीरः ····गसमावासितश्रीमद्विजयकटकात्परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीवामदेवपादानुध्यात(तृ)परमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वरत्रिकलिङ्गाधिपतिश्रीमत्**कर्णदेवः** कुशली महादेवी महाराजपुत्रं महामन्त्रिणो महामात्या महासंधिविग्रहिका महाधर्माधिकरणिका महाक्षपटलिका महाकरणिका महाप्रतीहारो महासामन्तो महाप्रमातारो महाश्वसाधनिको महाभाण्डागारिको महाध्यक्ष एतानन्याश्च कीर्तिताकीर्तिताश्च यथार्हं मानयति बोधयति समाज्ञापयति—विदितमस्तु भवताम्— यथा [हृपाथा]कासि[भूस्य]न्त[र्ग]त[सु]सिग्राम. साम्रमधूकः सगर्तस्थलजलोषरः सर्वाकरखनिप्रभृतिसमुत्पत्तिसमेतश्चतुराघाटसीमापर्यन्तः **वेसाल**ग्रामविनिर्गताय **कोसि**(कौशि)कगोत्राय ओदलदेवरातविश्वामित्रत्रिप्रवराय वाजसनेयशाखाय महप्रनप्त्रे **वा[म]न**नप्त्रे **नारायण**पुत्राय पण्डित**श्रीविश्वरूपाय** इहैव पितुः श्रीमद्गाङ्गेयदेवस्य संवत्सरे(र)श्राद्धे फाल्गुनबहु-

ळपक्षद्वितीयायां शनैश्चरवासरे वेण्यां स्नात्वा भगवन्तं देवदेवं त्रिलोचन-मशनसंभारप्रकल्पितपञ्चोपचारप्रपञ्चेन परया भक्त्या समभ्यर्च्यासमश्रद्धया श्राद्धं विधायोभयभोगेन(दकसर्गेण) शास[न]त्वेन संप्रदत्तः । अतः श्रीमत्कर्णदेवपादा[ः] सुसीग्रामनिवासिनः समस्तजनपदान्समादिशन्ति— विदितमस्तु भवताम्—यथा ग्रामोऽयमस्माभिः शासनत्वेन प्रदत्त इति मत्वा भागभोगकरहिरण्यदण्डादायकरोत्पत्तिप्रभृतिसमस्तराजप्रत्यादाया अस्योपने-तव्या इति तदपचिकीर्षया मध्ये वातेनापि न गन्तव्यमिति अभ्यर्थना—

सर्वानेतान्भाविनो राजपुत्रान्भूयो भूयो याचते रामभद्रः ।
सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ॥

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

अस्मिन्वंशे द्वि[तीयोऽ]पि यश्चान्यो नृपतिर्भवेत् ।
तस्यापि हस्तलग्नोऽहं शासनं न व्यतिक्रमेत् ॥

यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥

अश्वमेधसहस्रेण राजसूयशतेन च ।
गवां कोटिप्रदानेन भूमिहर्ता न शुध्यति ॥

सुवर्णमेकं गामेकां भूमेरप्येकमङ्गुलम् ।
हरन्नरकमाप्नोति यावदाहूतसंप्लवम् ॥

संवत् ७९३ फाल्गुनवदि ९ सोमे ॥

(एपिग्राफिआ इण्डिका—२।३०५-३१०)

(१२३)

श्रीगङ्गाधरकारितकासारप्रशस्तिः[1] ।

ओं नमः सरस्वत्यै ॥

एकत्रोन्नतगात्रगौरवभरात्मासे तथा नम्रता-
मन्यत्र श्रियमुद्वहत्यतिलघुं तुङ्गे भुजङ्गेश्वरे ।
वक्षःसंमुखसंभृतस्तनतटीसङ्गोपसर्पत्सुखं
निद्रा···· ··द्····दधातु दयितामाश्लिष्य विश्वंभरः ॥

देवो जीयात्रिलोकीमणिरयमरुणो यन्निवासेन पुण्यः
शाकद्वीपः स दुग्धाम्बुनिधिवलयितो यत्र विप्रे मगाख्या ।
वंशस्तत्र द्विजानां भ्रमिलिखिततनोर्भास्वत स्वाङ्ग········
शाम्बो यानानिनाय स्वयमिह महितास्ते जगत्यां जयन्ति ॥

तेषां य· प्रथम· समस्तनिगमज्ञानात्मविद्यापदं
बुध्या व्याप्टत एव नित्ययजनव्यापारपारीणया ।
भारद्वाजमुनिर्बभूव भुवनोद्धाराभिपाती तप·
·· ····यस्य मुखे मगद्विजमहावंशावतंसोपमः ॥

गोत्रं च तस्य शतशाखमभूदभूत-
पूर्वैस्तपोभिरथ सुप्रसरैर्यशोभिः ।
यत्रापरे परमतत्त्वविदोऽनवद्य-
विद्यावदातमतय· पतयो द्विजानाम् ॥

कालेना·· ··· विलुप्तविलसद्विद्याधने धन्विनां
वीराणां धुरि चक्रपाणिरभवद्दामोदरस्यात्मजः ।
यो वाल्मीकिरिवावतारितगिराधार स विश्वस्थि[ते]-
र्वंशस्या·······चतुर्मुख इव व्यासो गुणिग्रामणी· ॥

---

१. इय च प्रशस्तिर्गयापरिगणान्तर्गतगोविन्दपुरे नरसिंहमालिनो गृहत आनीय Sir A Cunningham महाशयेन प्रेषिता Dr Fleet महाशयेन मम पार्श्वे प्रेषिता इति Professor F. Kielhorn, Ph. D., C. I. E, महाशया वदन्ति

अतिस्थिरा पृथु[तरा य]त्कीर्तिगरिमास्पदम् ।
दिक्चक्रं यदि नारूढा तद्भ्रमत्यन्यथा कथम् ॥

जातौ **वासवकेशवा**विव सुतौ तस्मात्प्रसन्नामरौ
मारीचादिव कश्यपादुपचितां धर्तुं कुले सत्क्रियाम् ।
ज्यायांस्तत्र **मनोरथो दशरथ**स्तस्यानुजन्मा [ययो]-
र्विद्याचारशुचित्वशीलविलसत्कीर्त्या पवित्रं जगत् ॥

मुख्यत्वेन सतां यशोभिरखिलोद्गीतैः स्वकर्णश्रुतैः
सन्मित्रोपगमेन तैरतिभृतैर्भोगैरयत्नोपगैः ।
भ्रात्रोरत्र ययोर्नरेन्द्रनिहितैः सप्रेमभिः प्रश्रयैः
श्यामानि द्विषदाननानि विदधे शुभ्रोऽप्यदभ्रो गुणः ॥

तौ भ्रातरावतितरां सहजोदितेन
प्रेम्णा परस्परमनोहरणाभिरामौ ।
सौहार्दहृद्यचरितेषु ययोरधीरः
कालोऽपि न स्खलितमाप कलिः कदाचित् ॥

आनीतौ निजराज्यमुज्ज्वलयितुं यत्नात्प्रतीतात्मना
संवासाय नरेश्वरेण शिबिरं श्री**वर्णमानेन** तौ ।
तस्याज्ञामवलम्ब्य तत्कुलमिदं ताभ्यामपि प्रापितं
कांचित्कोटिमनुत्तरां गुणभुवः कीर्तेर्विभूतेरपि ॥

आ सिन्धोर्गणनीयगौरवगुणेनैकेन सेव्येऽनयो-
स्तस्मिन्मानपतेर्महीयसि गृहे प्रापि प्रतीहारता ।
अन्येनापि पुनर्मह····कधुरा व्यस्तेति विस्तारिणा-
वेतौ सत्त्वनयैर्बभूवतुरिह प्रज्ञैकविज्ञानिकौ ॥

गत्वा श्रीपुरुषोत्तमं····वयोर्हृद्यः प्रतिष्ठास्पदं
पारावारतटे पटीयसि लसच्चन्द्रग्रहानेहसि ।
सर्वस्वं वितताार तर्पितपितृस्तोमः करोल्लासितै-
स्तोयैर्यः पिहितस्य पर्वणि विधोः साहाय्यमाप क्षणम् ॥

सातत्यान्नित्यकृत्याहुतिभिरपचितौ चन्द्रमौलेस्त्रिकालं
न्यस्ताभिर्यस्य शैवागममहितमहामन्त्रपूतान्तरस्य ।
एनः स्वेनोज्जगार त्रिजगति विदितादाश्रया[श]त्वदोषा-
दिद्धं धूमच्छलेनोज्ज्वलरुचिरचिरान्निहुतं होमवह्निः ॥
श्वेतार्धे तं श्रयति [पितृभी]त्यात्मनो [निष्प्रभार्धे]
धत्तेऽनन्तप्रमि[तिरमि]तां शक्तिमुन्मुक्ततर्कम् ।
यस्यैश्वर्यं प्रथयति विभोः कर्तुरित्यद्भुतश्री-
र्भ्रान्ति लोकस्थितिषु भजते भूयसी धर्मकीर्तिः ॥
यस्य श्रीमगधेश्वरो नयवशान्नीतिप्रयोगाखिल-
प्राग्भारानुभवैरचुम्बितमतिर्व्यासाभिधानं व्यधात् ।
राजास्थानसरःसरोरुहमिति स्वैरं पुरः क्ष्माभृतां
गीतो **नूतनकालिदास** इति यः कालेषु वैतालिकैः ॥
यः सन्मन्त्रिषु चातुरीपरिचयैर्वाचस्पतिः प्रस्तुत-
प्रज्ञासर्गविरिञ्चिरुच्चचरितैरौचित्यचिन्तामणिः ।
सद्भावप्रभवो गभीरिमगृहं रत्नत्रयीतात्त्विको
भाषासु प्रतिभाप्रभुः कविकलासंदर्भगर्भेश्वरः ॥
सेरापारपरोपकारपरमः प्रेमोपचारोत्तर-
व्याहारैर्जनतानुरागरचनाचातुर्यचर्यागुरुः ।
धौरेयः सुधियां सुधानिधिकलामौलेः सदाराधन-
ध्याने जन्म निजं निनाय सुजनः स्वान्तेन शान्तेन यः ॥
पत्नी तस्य मनोरथस्य कृतिनश्चारित्र्यमुद्रापदं
धौडीदेशनरेशशुद्धसचिवश्रीदेवशर्मात्मजा ।
मू[र्ता] स[त्य]मरुन्धतीव जगतां वन्द्या सतीनां धुरि ।
श्रीमच्छंकर [आ]वि[रं]कुर[यि]तुं सत्पुण्यबीजान्यभूत् ॥
नापत्यं चिरमापतुर्यदुचितं तेनैव तौ दम्पती
संपत्तावपि नूनमन्वभवता संतापमन्तस्ततः ।

मामाराधयतं सुधेयमरतिर्भावी सुतस्तेन वां
गत्वेति स्वयमादिदेश गिरिशः स्वप्ने समीपं भयोः ॥
सुप्रीतयोर्भगवतो मम नामधेय-
माधेयमस्य पुनरित्यनुशासनेन ।
स्वाराधितस्मरहरस्वरमानुरूपो
रूपानुमेयसुनयस्तनयोऽजनिष्ट ॥
गङ्गाधराख्यः स ततो जितात्मा यः शैशवाद्विश्वजनीनवृत्तः ।
विवर्धमान. परलोकभीत्या सदात्मनीनं नयमाततान ॥
अभवदनुजो **महीधर** इति पुत्रौ श्रीमनोरथादुदितौ ।
[1]**आशीर्वराभिनन्दौ हरिहरपुरुषोत्तमौ** दशरथात्तु ॥
सत्कल्पप्रवणाः श्रुतिप्रणयिनः शिक्षाभिरुद्भासिताः
सज्ज्योतिर्गतयो निरुक्तविशदाश्छन्दोविधौ साधवः ।
ख्याता व्याकरणक्रमेण विदुषामत्युच्चधीशीलना-
द्वेदाङ्गप्रतिमाः षडेव भुवने ते बिभ्रति भ्रातरः ॥
तदन्तरे **माननरेन्द्रचन्द्रमाः** स **रुद्रमानो**ऽजनि येन भूभुजा ।
स्वमेदिनीमण्डलमादिकोलवद्बलादमित्राम्बुनिधेः समुद्धृतम् ॥
पाणि[र्दानचणः प्रभौघ]लह[री] वक्त्रं च यस्य स्वयं
मर्यादास्थितिमान्स एव जगता जीवातवश्चेत्कृताः ।
तत्किं कल्पलताद्यहीन्द्रकमठौ सा चित्रभानुद्वयी
पद्मेन्द्र(न्दू) निधयोऽम्भसामिति विधेर्धिक्प्रक्रियागौरवम् ॥
सूक्ष्मं दिक्करिदन्तकोटिमटितुं क्रान्तौ गिरीणां लघु
व्याप्तुं व्योम पृथु स्थिताविह दिशि प्रोत्तं वशिश्रान्तिषु ।

---

१ इद विशेषणवाचक प्रतीयते, तथापि वक्ष्यमाणश्लोके 'षडेव भ्रातर.' इत्युक्ति-संवादेनोभयोर्नामत्वेन व्याख्येयम् Dr F. Kielhorn, Ph. D, C I. E, महाशयास्तु "All these six men, Manoratha and Das'aratha and their four sons" इति वदन्ति.

क्षीराब्धीन्दुसुधादिषु प्रभवति ब्रह्माण्डगर्भाद्बहि-
र्नियात्यस्ति यथेत्थ(च्छ)मीश्वरगुणैरित्यद्भुतं यद्यशः ॥

युद्धे बद्धोत्सवरिपुभटश्रेणि········: सदा यो
बन्धुः शुद्धो विपदि विसरत्कार्यनिर्याससीमा।
श्रेयान्सभ्यः सदसि विशदे विश्वविश्वासपात्रं
पातुं मित्रं हृदयमितरत्तस्य **गङ्गाधरो**ऽभूत् ॥

आचाराभरणः सुभाषितचणः सन्नीतिरत्नापणः
प्रागल्भीरमणः प्रशान्तकरणः कारुण्यपारायणः।
यः सौजन्यनिधिः स्थितावनुपधिः सख्यस्य मुख्यो विधि-
र्धीरत्वेऽनवधिर्विधूतवितथव्याधिर्धियां शेवधि. ॥

गौडराजसुहृदो **जयपाणे**राधिकारिकपदोपपदस्य।
आत्मजामुदवहत्सुभगायाः पेशलां स किल **पासलदेवीम्** ॥

आक्रान्तो न वृषः कदापि गतये यस्मिन्नहीनाङ्गना
रौद्री नाद्रियते स्थितिर्न गणितास्ता गोत्रभित्संकथाः।
अन्योन्यास्यविलासवञ्चितदृशोरेकं वपुर्बिभ्रतो-
स्तत्प्रायः शिवयोरपीदमनयोर्दाम्पत्यमत्यादृतम् ॥

संतोषार्जवधैर्यसंयमदमानुक्रोशशान्तिक्षमा-
मैत्रीसत्यसमाधिमग्नमनसो नारायणैकात्मनः।
दम्भद्रोहविमोहलोभममतामात्सर्यमायामद-
द्वेषेर्ष्यादिनिसूदनस्य चरिते यस्यात्र साक्षी जनः ॥

तेनात्र दुःशकमसीम सहस्रकृत्वः
कृत्यं स्वभर्तुरुचितोन्नतये समाप्य।
आबाल्ययौवनमसुप्रतिरोधि बन्धु-
लोकस्य चेतसि चमत्कृतिराचितैव ॥

यस्याद्वैतशते स्वयं विरचिते किंचित्कवित्वश्रम.
स ब्रह्मोपनिषत्कथास्वधिगमः शुद्धो विरुद्धोऽथवा।

भाव्यः सूरिभिरेव चित्रकवितायासस्तुतो दुष्करे
　　भारत्याः कुरुतेऽपरान्निजगुणप्रस्तावनां केन सः ॥
धा····वर्तवशाद्विसृत्वरतरुप्रासादसद्मादिक-
　　व्यक्ताकारकदम्बमम्बरमनु स्वेनोद्भवत्यभ्रियम् ।
स्थित्वा तत्क्षणतो विपन्नमपुनर्भावाद्यथेदं तथा
　　मत्वैव त्रिजगन्ति येन जनितः सत्कर्मधर्मादर. ॥
पुण्योत्पत्तिनिमित्तमत्र निजयोः पित्रोः पवित्रात्मना
　　कीर्त्या तेन तयोश्चिरं रचयता शुभ्रातपत्रं जगत् ।
कासारोऽयमकारि पारदरसच्छायाभृतामम्भसां
　　यस्मिन्नूर्मिमिषाद्यशस्तदमलं मूर्तं नरीनृत्यते ॥
　　स्वकीर्त्या सरसस्तस्य प्रतिष्ठासमयोत्सवे ।
　　शुभ्राम्बरपरीधानं जगत्तेनात्र कारितम् ॥
आकाशः पवनः कृशानुरुदकं धात्रीति लोकत्रयो
　　मूर्त्या ब्रह्म विवर्तमानमयते यावद्विचित्रां गतिम् ।
नेत्रश्रोत्रमनःप्रसादसदने तावत्सतामादरा-
　　दुन्निद्रां मुदमान्तरेषु कुरुतां कीर्तिप्रशस्ती इमे ॥
　　क्व शक्तिव्युत्पत्तिव्यतिकरविरोधेन सुलभाः
　　　　कवीनां पन्थानस्तदिह ननु केषामनुगमः ।
　　स्वपूर्ते त्वेतस्मिन्सुजनजनितोऽनुग्रहगुणः
　　　　प्रशस्तौ प्राशस्त्यं वितरति स गङ्गाधरगिराम् ॥
नन्देषुव्योमेन्दु(१०५९)समे शकाब्दे रुद्रात्मजश्चोद्धरणस्य नप्ता ।
इमां शिलाशिल्पिवरः प्रशस्तिं स शूलपाणिः स्वयमुच्चखान ॥

शाक १०५९ ॥

(एपिग्राफिआ इण्डिका-

KÂVYAMÂLÂ. 80.

THE

PṚÂCHÎNA-LEKHA-MÂLÂ

OR

A COLLECTION OF

Ancient Historical Records.

Vol. III.

EDITED BY

PAṆḌIT BHAVADATTA S'ÂSTRÎ,

Son of

MAHÂMAHOPÂDYÂYA PANDIT S'IVADATTA

AND

KÂS'ÎNÂTH PÂNDURANG PARAB.

PRINTED AND PUBLISHED

BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR OF JÂVAJÎ DÂDÂJÎ'S 'NIRNAYA-SÂGARA' PRESS.

BOMBAY.

1903

Price 1 Rupee.

(Registered according to Act XXV of 1867)

(All rights reserved by the Publisher)

काव्यमाला. ८०.

प्राचीनलेखमाला ।

(तृतीयो भागः ।)

जयपुरमहाराजाश्रितमहामहोपाध्यायपण्डितदुर्गाप्रसादद्दारककेदारनाथ-
कृपाङ्गीकृतशोधनकर्मणा
महामहोपाध्यायपण्डितशिवदत्तशर्मतनूजपण्डितभवदत्तशास्त्रिणा,
मुम्बापुरवासिपरबोपाह्वपाण्डुरङ्गात्मजकाशीनाथशर्मणा च
संशोधितः ।

स च
मुम्बय्यां निर्णयसागराख्ययन्त्रालये तदधिपतिना मुद्राक्षरैरङ्कयित्वा
प्राकाश्यं नीतः ।

१९०३

(अस्य ग्रन्थस्य पुनर्मुद्रणादिविषये सर्वथा निर्णयसागरमुद्रायन्त्रालयाधिपते-
रेवाधिकारः ।)

मूल्यमेको रूप्यकः ।

प्राचीनलेखमालाया अनुक्रमणी ।

लेखाङ्काः ।		पृष्ठम् ।
१२५.	दूधपानीघाटे श्रीमदुदयमानराज्यप्राप्तिप्रशस्तिलेखः	१
१२६.	कामरूपविषयाधीश्वरश्रीवैद्यदेवमहाराजानां शासनप्रशस्तिः	४
१२७.	कान्यकुब्जाधीश्वरश्रीमदनपालतनयश्रीगोविन्दचन्द्रमहाराजपुत्राणां शासनपत्रम्.	९
१२८.	मोकलमहाराजकारितशिवमन्दिरप्रशस्तिः	१२
१२९.	श्रीकुन्तीमाधवभगवन्मन्दिरस्तम्भोत्कीर्णा प्रशस्तिः	२४
१३०.	श्रीशीलादित्यमहाराजनिर्मापितवापीप्रशस्तिपत्रम्	३४
१३१.	मल्लिदेवमन्यसत्यमहाराजयोः प्रशस्तिपत्रम्.	३९
१३२.	श्रीवेङ्कटपतिरायशासनपत्रम्	४५
१३३.	श्रीकर्णमहाराजानां शासनपत्रम्	५२
१३४.	बाईश्रीहरीरकारितवापीप्रशस्तिः	५८
१३५.	दीर्घसीनगरीस्थितवनपतिमहाराजकरितनाट्यशालाप्रशस्तिः	५९
१३६.	श्रीकाटयवेममहाराजधर्मपत्नीमल्लाम्बिकाकारितमार्कण्डेयशिवालयाग्रहारप्रशस्तिः	६१
१३७.	श्रीसुन्दरपाण्ड्यमहाराजकारितश्रीरङ्गनाथभूषणादिप्रशस्तिः	६५
१३८.	अनन्तवर्ममहाराजकारिततडाकप्रतिष्ठाप्रशस्तिः....	७०
१३९.	श्रीवीरबुक्कमहाराजभ्रातृजश्रीसंगममहाराजानां शासनपत्रम्	७१
१४०.	श्रीवीरबुक्कमहाराजप्रपौत्रवीरविजयमहाराजपुत्रश्रीदेवरायमहाराजानां शासनपत्रम्	७६
१४१.	श्रीमाधववर्ममहाराजानां शासनपत्रम्	८०
१४२.	धारानगराधीश्वरजयसिंहमहाराजानां शासनम्.....	८३
१४३.	श्रीअन्नवेमभूपतेः शासनपत्रम्....	८५
१४४.	श्रीजायचमूपतिकारितगणपतीश्वरप्रतिष्ठाशासनम्	८८
१४५.	श्रीवेमहाराजमहिषीगणपाम्बादत्ताग्रहारप्रशस्तिः	९३

लेखाङ्काः । पृष्ठम् ।

१४६. सायणमाधवाश्रयश्रीबुक्कमहाराजतनयहरिहरमहाराजशासनम् ९६
१४७. इन्द्रवर्मणोऽच्युतपुरोपलब्धशासनम् १०१
१४८. श्रीगुणार्णवसूनुदेवेन्द्रमहाराजानां चिककोलग्रामोपलब्धं शासनम् १०२
१४९. श्रीवेङ्कटपतिदेवमहाराजदत्तकूनियुरग्रामशासनम् १०४
१५०. श्रीमदन्नवेममहाराजदत्तवेमपुराग्रहारशासनम् ११६
१५१. द्वितीयपुलिकेशिन्नपराभिधानश्रीसत्याश्रयमहाराजानां शासनपत्रम् ११९
१५२. गुर्जरदेशाधिपतिश्रीगोविन्दराजमहाराजानां शासनपत्रम् १२१
१५३. अल्लपडोड्डुराज्ञस्ताम्रपत्रम् १२३
१५४. वीरतोडमहीपतेस्ताम्रपत्रम् १३२
१५५. श्रीमज्जायमहाराजानां शिलालेखः १४४
१५६. तृतीयकृष्णमहाराजानां दानपत्रम् १४८
१५७. अमरनाथमन्दिरस्तम्भोत्कीर्णशासनद्वयम् १५२
१५८. काङ्करोलीग्रामीयराजसागराख्यतडागस्थो लेखः १५८
१५९. काङ्करोलीग्रामीयराजसागराख्यतडागस्थो लेखश्चतुर्थः १६२
१६०. आदिनाथजैनमन्दिरस्थस्तम्भशिलालेखः १६५
१६१. निकुम्भवंशीयश्रीमद्गोवनमहीपालानां दानपत्रम् १६६
१६२. प्रशान्तरागापरनामधेयश्रीमद्दद्दमहाराजानां तृतीयं दानपत्रम् १६९
१६३. वलभीप्रभोर्महाराजगुहसेनस्य दानपत्रम् १७१
१६४. वलभीप्रभोः श्रीधरसेनमहाराजानां द्वितीयं दानपत्रम् १७३
१६५. वलभीप्रभोः श्रीधरसेनमहाराजानां तृतीयं दानपत्रम् १७५
१६६. वलभीप्रभोः श्रीधरसेनमहाराजानां चतुर्थं दानपत्रम् १७८
१६७. वलभीप्रभोः श्रीखरग्रहमहाराजानां दानपत्रम् १८१

लेखाङ्काः ।　　　　　　　　　　　　　　　　　　　　　　　　पृष्ठम् ।

१६८. गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैनमन्दिरस्थः प्रथमः शिलालेखः १८५

१६९. गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैनमन्दिरस्थो द्वितीयः शिलालेखः १८७

१७०. गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैनमन्दिरस्थ-स्तृतीयः शिलालेखः १९०

१७१. गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैनमन्दिरस्थ-श्चतुर्थः शिलालेखः १९४

१७२. गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैनमन्दिरस्थः पञ्चमः शिलालेखः १९७

१७३. गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैनमन्दिरस्थः षष्ठः शिलालेखः २००

प्राचीनलेखमाला ।

(१२५)

दूधपानीघाटे श्रीमदुदयमानराज्यप्राप्तिप्रशस्तिलेखः[1] ।

ओम् ।

श्रीरात्मदेहप्रतिमासहस्रमालोक्य भोगी[न्द्रफ]णामणिस्थम् ।
ई[र्ष्याकु]ला करतलेन हरेः प्रहा[र] मुल्ला[सय]न्ती भवतु [श्रि]ये वः ॥
बभूव पूर्वं मगधाधिराजः श्रीआदिसिङ्घो(सिंहो)ऽरिगजैकसिङ्घः(सिंहः) ।
पराक्रमैर्यः प्रथितोऽद्वितीयः श्रीमज्ज[रासं]ध इव द्वितीयः ॥

अस्यां भ्र[म]रशाल्मल्यां छिङ्गलायां [त]थैव च ।
नभूतीष[ण्ड]के चापि बभूवाधिपतिः पुरा ॥
अथ कस्मिंश्चि[त्स]मये वणिजो भ्रातरस्त्रयः ।
तामलिप्ति[म]योध्याया ययुः पूर्वं वणिज्यया ॥
भूयः प्रतिनिवृत्तास्ते स्वमावासं यियासवः ।
प्रयोजनेन केनापि चिरं चक्रुरिह स्थितिम् ॥
सुवर्णमणिमाणिक्यमुक्ताप्रभृति यैर्धनम् ।
वित्तपस्पर्धयेवासीदपर्यन्तमुपार्जितम् ॥
सर्वभूताश्रयाः सत्यदयादाक्षिण्यशालिनः ।
स्रष्टार इव लोकस्य त्रयः क्षितिमुपागताः ॥

---

१. लेखोऽयं गयाक्षेत्रतो दक्षिणस्यां दिशि हजारीबागप्रान्ते दमदमापार्श्वे दूधपानीघाटे A. Cunningham महाशयेनोपलब्धः Professor F. Kielhorn, Ph. D., C. I. E. महाशयेन व्याख्यातः. स्पष्टतया कालनिश्चयो न जातः.

कैलासः कठिनः कलङ्कमलिनश्चन्द्रस्तुषाराचलः
प्रायस्तीक्ष्णकरप्रहारविवशो नित्यं गलत्येव हि।
तारल्यं च समाश्रिता गुणवतो(युता) हारा इति प्रायशो
येषामत्र बभूव निर्मलगुणैः शीलस्य नैवोपमा॥
दातृत्वेन समो बभूव न पुरा कर्णोऽपि येषामसौ
शौर्येणापि जगज्जिगीषुरगमन्नैवार्जुनस्तुल्यताम्।
ये चासह्यपराक्रमक्रमपदाक्रान्तत्रिलोकीतला
वीरानाहवमूर्धसु प्रबलिनः पङ्कूनिवोच्चिक्षिपुः॥
दिक्कामिनीतनुविलेपनचन्दनानि
राज्यश्रियः स्तनतटीविकटांशुकानि।
अद्यापि चन्द्रकरहारतुषारभांसि
सर्वा दिशो धवलयन्ति यशांसि येषाम्॥
विद्यासमुन्नतगुणा अपि न [स्मयान्धा]
नम्राः सुदूरमथ चोन्नतमूर्तिभाजः।
निस्त्रिंशनिष्ठुरकराः कृपयाकुलाश्च
ये चार्थिकल्पतरवः शिवशौरिभक्ताः॥
स श्रीमानादिसिङ्घो(सिंहो)ऽथ कदाचिदटवीमिमाम्।
प्रारब्धी खेलनोद्युक्तः प्रविवेशावनीश्वरः॥
आदिदेश समाहूय स पल्लीत्रितयाज्जनम्।
यूयमद्यावलगकमस्मभ्यं ददताश्विति॥
अत्रत्यस्तत्समाकर्ण्य [तूर्णं] बलपरिग्रहः।
वणिजां भ्रातरं ज्येष्ठमुदयमानमुपागमत्॥
राज्ञोऽवलगनार्थाय तमभ्यर्थ्य प्रयत्नतः।
प्रेषयामास तं सोऽपि वल्लभोऽभून्महीपतेः॥
अल्पैरहोभिरनुभूय नृपप्रसादं
श्रीपट्टबन्धमधिगम्य ततः क्रमेण।

श्रीआदिसिङ्घ(सिंह)नृपतिं परिबोध्य तेन
संमानितो भ्रमरशाल्मलिपल्लिलोकः ॥
तुष्टास्ततो भ्रमरशाल्मलिवासिनस्ते
भूयस्तमागतमुपेत्य जनाः प्रणम्य।
राजा भव त्वमिह पालय पल्लिमेता-
मित्यादि तत्परधियोऽभिदधुस्तमुच्चैः ॥
एवं नाम भवत्विति प्रतिवचस्तस्मात्समाकर्ण्य ते
तस्मै राज्यपदं ददुः क्षितिभृताप्याज्ञापितास्तत्कृते।
सोऽस्मिन्विक्रमखण्डितारिसुभटश्रेणिः श्रुतार्थश्चिरं
राज्यं निर्जितसर्वपल्लिरकरोन्नाम्नोदयाख्यो नृपः ॥
यस्य त्यागनयान्वयोन्नतिगुणग्रामाधिपत्यार्जितां
कीर्तिं चन्द्रकरावदातसुभगामद्यापि सोत्कण्ठिताः।
गेहासीनसुराङ्गनाजनकृतप्रीतिं सुरेन्द्रालय-
प्रान्तप्रोत्थितकल्पपादपतले गायन्ति सिद्धस्त्रियः ॥
आगत्योदयमानस्तु तैरेवाभ्यार्थितस्तदा।
पल्लीद्वयेऽपि राज्यार्थं भ्रातरौ विससर्ज सः ॥
श्रीमाञ्छ्रीधौतमानाख्यः प्रख्यातो [न]भूतिषण्डके।
वश्यात्मोदयमानस्य चिरं राज्यमचीकरत् ॥
प्रचण्डसुभटाटोपः खण्डितामित्रमण्डलः।
अभूदजितमानोऽपि च्छिङ्गलायां महीपतिः ॥
पत्युर्भ्रमरशाल्मल्याच्छिङ्गला[न]भूतिषण्डकौ।
वश्यौ बभूवतुः पूर्वमेवमेतौ यथाक्रमम् ॥
आरभ्योदयमानमादिपुरुषं गोत्रक्रमोऽयं महा-
नस्माकं परिवर्धमानमहिमेत्यालोक्य ते पूर्वजाः।
असद्वोत्रभवात्कदाचिद''''नाद्वचु(?)त्थानिकं स्यादिदं
सत्पल्लीद्वयमित्यवेत्य चखनुः(?) प्राशस्त्यवर्णानिमान् ॥

यावत्क्रान्तमरीचिरेचकचयव्याप्तत्रिलोकोच्छ्रयं
चक्रं चक्रधरो बिभर्ति गिरिशो यावद्भवानीपतिः ।
यावल्लोकसिसृक्षयाकुलमिलच्चिन्तालसश्चात्मभू-
र्गोत्रस्योदयमानदेवनृपतेस्तावत्स्थितिर्दृश्यताम् ॥

(एपिग्राफिआ इण्डिका—२।३४५-३४७)

(१२६)

कामरूपविषयाधीश्वरश्रीवैद्यदेवमहाराजानां शासनप्रशस्तिः[1] ।

ओं नमो भगवते वासुदेवाय । स्वस्ति ॥
अम्बरमानस्तम्भः कुम्भः संसारबीजरक्षायाः ।
हरिदन्तरमितमूर्तिः क्रीडापोत्री हरिर्जयति ॥
एतस्य दक्षिणदशो वंशे मिहिरस्य जातवान्पूर्वम् ।
विग्रहपालो नृपतिः सर्वाकारर्धिसंसिद्धः ॥
यस्य वंशक्रमेणाभूत्सचिवः शास्त्रवित्तमः ।
योगदेव इति ख्यातः स्फुरद्दोर्दण्डविक्रमः ॥
तस्योर्जस्वलपौरुषस्य नृपतेः **श्रीरामपालो**ऽभव-
त्पुत्रः पालकुलाब्धिशीतकिरणः साम्राज्यविख्यातिभाक् ।
तेने येन जगत्त्रये जनकभूलाभाद्यथावद्यशः
क्षोणीनायकभीमरावणवधाद्युद्धार्णवोल्लङ्घनात् ॥
यस्य शुद्धसचिवः पुराभवद्बोधिदेव इति तत्त्वबोधभूः ।
विश्व(ष्व)गेव विदितोऽद्भुतैर्गुणैरुज्झितात्मसदृशः क्षितावयम् ॥
अस्य **प्रतापदेवी** पत्नी धर्मर्द्धिकीर्तिविश्रान्तिः ।
आसीदसीमकान्तिः संतोषस्याकृतिः पत्युः ॥

---

१ प्रशस्तिरियं Mr R H. Brereton महाशयेन वाराणस्यध्यक्षेण लब्धा Mr. Arthur Venis, M. A. महाशयेन वाराणसीविश्वविद्यालयाध्यक्षेण प्रकाशिता.

अभूदमुष्यां तनयोऽस्य विश्रुतः श्रीवैद्यदेवः परया श्रिया युतः।
यदुच्छलत्कीर्तिश(स)रोवरोद[रे] पद्माङ्कुराभः शिवभूधरोऽभवत्॥
दैवज्ञेषु च तर्ककेषु च जनुर्दिष्टस्य दिष्टिश्रुते-
रत्नस्वप्नधृतीर्झटित्यरिभटैरुन्मुच्य संमूर्छितम्।
किं चैतन्निजबन्धुवृन्दनयनप्रोद्भूतहर्षाम्बुभिः
पारक्यप्रसरप्रतापदहनस्याभूद्विनिर्वापणम्॥
सोऽयं रामनरेन्द्रजस्य सचिवः साम्राज्यलक्ष्मीजुषः
प्रख्यातस्य कुमारपालनृपतेश्चित्तानुरूपोऽभवत्।
यस्यारातिकिरीटहाटककृतप्रासादकण्ठीरव-
ग्रासत्रासवशादपैष्यति विधोर्बिम्बाङ्करूपी मृगः॥
सचिवसमाजश(स)रोजतिग्मभानुः प्रसरयशोम्बुधिरेष वैद्यदेवः।
सहजवदान्यतयैव चम्पकेशः सुजनमनःकुमुदेषु शीतरश्मिः॥
यस्यानुत्तरवङ्गसंगरजये नौवाटहीहीरव-
त्रस्तैर्दिक्करिभिश्च यन्न चलितं चेन्नास्ति तद्गम्यभूः।
किं चोत्पातुककेनिपातपतनप्रोत्सर्पितैः शीकरै-
राकाशे स्थिरता कृता यदि भवेत्स्यान्निष्कलङ्कः शशी॥
गौडेशस्य कुमारपालनृपतेर्दोर्वीर्यतेजस्पते-
स्त्रैलोक्योदरपूरिभूरियशसः प्रज्ञानवाचस्पतेः।
सप्ताङ्गक्षितिपाधिपत्वमभितः संचिन्तयन्नुग्रधीः
प्राणेभ्योऽप्यतिबन्धुरस्य सचिवः सोऽभूद्गुणिग्रामणीः॥
एतादृशो हरिहरिद्भुवि सत्कृतस्य
श्रीतिङ्ग्यदेवनृपतेर्विकृतिं निशम्य।
गौडेश्वरेण भुवि तस्य नरेश्वरत्वे
श्रीवैद्यदेव उरुकीर्तिरयं नियुक्तः॥
स्रजमिव शिरस्यादायाज्ञां प्रभोरुरुतेजसः
कतिपयदिनैर्दत्वा जिष्णुः प्रयाणमसौ द्रुतम्।

तमवनिपतिं जित्वा युद्धे बभूव महीपति-
निजभुजपरिस्पन्दैः साक्षाद्दिवस्पतिविक्रमः ॥

एतस्य प्रवरप्रयाणसमये पांशूत्करैः स्थण्डिल-
प्राये व्योमतलेऽर्कसप्तिकगणैर्लब्धोऽङ्घ्रियानश्रमः।
किं चाक्षिद्वयगोपनेन करयोरन्यक्रियास्वक्षमः
सुत्रामा नयनानिमीलनकरं कर्म स्वकं निन्दति ॥

दोर्दण्डारणिजे हविर्भुजि भटव्रातेन्धनैरेधिते
संग्रामाध्वरपूजिते रिपुशिरःश्रेणीलसच्छ्रीफलैः।
कृत्वा होमविधिं परक्षितिभुजा दत्त्वाथ पूर्णाहुतिं
लब्धोदग्रयशो महत्फलमसौ श्रीवैद्यदेवो बभौ ॥

यदुरुसमरमध्यात्खड्गघातोत्पतद्भिः
परसुभटशिरोभिर्व्योम कीर्णं निरीक्ष्य।
झटिति विसरराहुव्य(व्यू)हधीबिभ्यदर्कः
स्वरुचमपि रजोभिः प्रोञ्छयन्स्वं जुगोप ॥

चन्द्रस्योद्भवभूर्महीध्रस(श)रणं सत्त्वप्रधानाशयः
पात्रश्रीमहितः स्फुरद्रसमयः सोऽयं गभीरः परः।
रत्नानां निलयः श्रियः कुलगृहं स्वान्तस्थितश्रीपतिः
स्यादेवं सदृशोऽम्बुधेर्यदि जलाधारोऽथवा लङ्घितः ॥

ज्ञानैर्गीष्पतिरूर्जितैर्दिनपतिः सत्पौरुषैः श्रीपति-
र्धैर्यैरम्बुपतिर्धनैर्धनपतिर्दानैः स चम्पापतिः।
किं चैतेऽपि गिरोपमानविषयाः प्रायः प्रसिद्धेर्बला-
द्ब्रूमः किंतु वयं स्वयं स्वसदृशः सर्वैर्गुणानां गणैः ॥

यस्य श्रीबुधदेव इत्यनुजभूः श्रीरामभद्रानुज-
प्रायस्तत्तदसीमनिर्मलगुणैर्धर्मर्द्धिशीलर्द्धिभूः।
दानैः शोभनपल्लवैर्द्विजकुलप्रीतिप्रदानैरपि
ख्यातः कल्पमहीरुहप्रतिकृतिर्दोर्वीर्यचञ्चद्यशाः ॥

अथाभवत्कौशिकसंज्ञको मुनिर्मुनीन्द्रमुख्यो निजगोत्रपूरुषः।
पयोजजन्मास्यचयभ्रमश्रमाद्यदास्यपद्मे तु सुखं गिरा स्थितम् ॥
एतद्वंशे महति **भरतः** प्रादुरासीद्विजाति-
भविग्रामे प्रविसरयशाः शासनोऽग्रे वरेन्द्याम्।
आस्तामन्यद्गुणगणसमाख्यानमाख्यानमात्रा-
द्यन्नाम्नोऽपि स्फुटति निखिलः कण्णिशानां(किल्बिषाणां)प्रपञ्चः॥
अस्य विप्रतिलको **युधिष्ठिरः** पुत्र इत्यभवत्सुधीश्वरः ॥
शास्त्रवेदपरिशुद्धबोधभूः श्रोत्रियत्वविलसद्यशोनिधिः ॥
पाईति धर्मपत्नी धीरवरस्यास्य चित्तविश्रान्तिः।
अ[ा]सीदसीमकान्तिः शीलौदार्यश्रियां वसतिः ॥
पूर्वपूर्वजनुर्जन्मकर्मपाकादभूत्सुतः।
तस्यैतस्यां द्विजाधीशपूज्यः श्री**श्रीधरः** परः ॥
तीर्थेषु भ्रमणाच्छ्रुताध्ययनतो दानात्तथाध्यापना-
द्यज्ञानां करणाद्व्रतैकचरणात्सर्वोत्तरः श्रोत्रियः।
प्रातर्नक्तमयाचितोपवसनैर्येन स्वयं गुग्गुलो-
राकर्षाद्वरदः कृतोऽत्र हि कलौ श्री**सोमनाथः** प्रभुः ॥
कर्मब्रह्मविदां मुख्यः सर्वाकारतपोनिधिः।
श्रौतस्मार्तरहस्येषु वागीश इव विश्रुतः ॥
एतस्मै शासनं प्रादाद्वैद्यदेवक्षितीश्वरः।
वैशाखे विशु(षु)[व]त्यां च स्वर्गार्थं हरिवासरे ॥

स्वस्ति हंसाकाञ्चीसमावासितश्रीमज्जयक(स्क)न्धावारात्परममाहेश्वरः परमवैष्णवः महाराजाधिराजः परमेश्वरः परमभट्टारकः श्रीमान्**वैद्यदेवदेवः** कुशली श्री**प्राग्ज्योतिषभुक्तौ कामरूपमण्डले वाडाविषये** भट्टगङ्गाधर-भुक्त**कशा(स)न्तिवाडामन्दरा**ग्रामीययथाप्रधानप्रतिवासिचट्टभट्टविसयि-लंकादिजनपदान् कर्षकांश्च यथात्यागं मानयति बोधयति समादिशति वः—'मतमस्तु भवताम्—'एतद्ग्रयं चतुःसीमावच्छिन्नं परिबोधशुद्धम्

१. अद्धशें तु सर्वत्र सीमाशब्दस्तालव्यादिरेव दृश्यते.

अचट्टभट्टप्रवेशं सजलस्थलं भूच्छिद्रं चाकिंचित्करग्राह्यं चतुर्थाब्द सं वैशाखप्रथमादिना गुग्गुली श्रीश्रीधरशर्मणे चतुःशतिकं शासनीकृत्य प्रदत्तमस्माभिः । तदेतस्मिन्विधेया भवेत' इति । सं ४ सूर्यगत्या वैशाखदिने १ नि ॥०॥ सन्तिवडामन्दराग्रामयोरेकीभूयाष्टसीमान्तिनयकृतः । पूर्वदिशस्तावद्दिग्दाण्डिधरमादाय यावत् पश्चिमकूलसीमा । ऐशानदिशः शिङ्गिआधरसीमालेङ्गवडाभोग्येकंसपलभू १॥ उत्तरदिशः कोण्ठुवाडोङ्गीनडजोलीनवधरासीमा । शिखडाशिलगुडिभोग्यं किंचिदतिक्रम्य जयरातिपोला उणैपोलाविरामादाय वायव्यदिशः पिपामुण्डा अश्वत्थसीमा अझडाचौवोल वुडिपोखि रिपूर्वधरकुलाचापडि अष्टबलपुराणधर्मालि पश्चिमायावत् । पश्चिमदिशः सीमा किंचिद्धरक्रित्वा नैर्ऋत्यदिशो धम्मालिमादाय नैपोशृङ्गारयो विवादभूमेर्वाव्यर्धमादाय लच्छुवडास्थितैकवाटीसमेतघाटचम्पकः सीमा वेलवणीपटानवपल । दक्षिणदिशः कुम्भकारभोग्यबहिःसीमा कोण्टोहाडाद्धवोलयावत् हेलावणामुण्डमादाय दिग्दाण्डि यावत् अग्निदिशः सीमा । एवमष्ट सीमा द्वितीयपटकस्य चतुर्दशपङ्क्त्याः(?) ॥

सन्तिपाटकसंज्ञं तु मन्दराग्रामसंयुतम् ।
व(वा)डाविषयसंबद्धं भूच्छिद्रेणेति निश्चयात् ॥
सर्वायोपायसंयुक्तं करोपस्करवर्जितम् ।
यावचन्द्रार्कसंभोग्यं यावदिच्छाक्रियाफलम् ॥
जलस्थलखिलारण्यवाटगोवाटसंयुतम् ।

कोष्ठ(ष्टे) यश्च करिस्य(ष्य)ति स्वयमिदं यः कारयिस्य(ष्य)त्यसौ
पुत्रादिक्षयमभ्युदीक्ष्य निरये कल्पान्तरं स्थास्यति ।
यः श्लाघ्यः परिपा[लयि]स्य(ष्य)ति सुतैर्वित्तैः स वर्धिस्य(ष्य)ते
स्वर्लोकं परिभुज्य यास्यति चिराद्विष्णोर्वरेण्यं पदम् ॥
यावद्भास्करहिमकरताराभूधरप[यो]धिवसुधाद्याः ।
तावद्विलश(स)तु नृपतेः कीर्तिः श्रीवैद्यदेवस्य ॥
इमां राजगुरोः पुत्रः श्रीमुरारेर्द्विजन्मनः ॥
पद्मागर्भोद्भवश्चक्रे प्रस(श)स्तिं श्रीमनोरथः ॥

देवोऽयं रिपुचक्रविक्रमकथाप्रत्यर्थिदोर्विभ्रमः
शश्वद्विश्वपरिश्रमन्नवनवोन्मीलद्यश[ा]ः **श्रीधरः** ।
एतस्मै मुदितो द्विजातिपतये धर्माधिकारार्पित-
श्री**गोनन्दन**कोविदैकवचसा प्रादादिदं सा(शा)सनम् ॥
कर्णभद्रेण भद्रेण शिल्पिनानल्पबुद्धिना ।
ताम्रं विनयनम्रेण निर्मितं साधुकर्मणा ॥

एतादृशे मुनिवचनानि भवन्ति—

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्टायां कृमिर्भूत्वा पच्यते पितृभिः सह ॥
गामेकां स्वर्णमेकं वा भूमेरप्यर्धमङ्गुलम् ।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम् ॥
बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

(एपिग्राफिआ इण्डिका—२।३५०–३५४)

---

(१२७)

कान्यकुब्जाधीश्वरश्रीमदनपालतनयश्रीगोविन्द-चन्द्रमहाराजपुत्राणां शासनपत्रम्[१] ।

ॐ नमो भगवते वासुदेवाय ।

तमाद्यं सर्वदेवानां दामोदरमुपास्महे ।
त्रैलोक्यं यस्य वक्त्रीव क्रोडान्तःस्थं वलित्रयी ॥
वंसे(शे) **गाहडवालाख्ये** बभूव विजयी नृपः ।
महीमलसुतः श्रीमान्नलनाभागसंनिभः ॥

---

१. पत्रमिद Mr. R. F. Brereton महाशयेन वाराणस्यध्यक्षेण Arthur Venis M. A. संज्ञकस्य वाराणसीविश्वविद्यालयाध्यक्षस्य पार्श्वे प्रेषित तेन च प्रकाशितम्.

याते श्रीभोजभूपे विबुधवरवधूनेत्रसीमातिथित्वं
श्रीकर्णे कीर्तिशेषं गतवति च नृपे क्ष्मात्यये जायमाने।
भर्त्तारं यं धरित्री त्रिदिवविभुनिभं प्रीतियोगादुपेता
त्राता विश्वस्य पूर्वं समभवदिह स क्ष्मापतिश्चन्द्रदेवः॥

तस्मादभूद्रि(द्वि)षदिलापतिदन्तिसिंहः
क्षोणीपतिर्मदनपाल इति प्रसिद्धः।
येनाक्रियन्त वभु(बहु)शः समरप्रबन्धाः
संनर्तितप्रहतशत्रुकबन्धबन्धाः॥

तस्मादजायत नरेश्वरवृन्दवन्द्य-
पादारविन्दयुगलो ज्वलितप्रतापः।
क्षोणीपतीन्द्रतिलको रिपुरग(ङ्ग)भङ्गी
गोविन्दचन्द्र इति विश्रुतनामकीर्तिः॥

तिष्ठतो यस्य दोःस्तम्भे मत्तशौर्यैकदन्तिनः।
धनुर्गुणकिणश्रेणी मदराजीव लक्ष्यते॥

संवत्सहस्रैके द्विषष्ट्युत्तरशताभ्यधिके कार्तिकपौर्णमास्यां भौमे दिने। अङ्के[ना]पि संवत् ११६२ [कार्तिक]सुदि [१]५ भौमे अद्येह श्रीमद्विष्णुपुरावासितश्रीविजयकटके सकलकल्मषक्षयकारिण्यां गङ्गायां स्नात्वा यथाविधानं मन्त्रदेवऋषिमनुष्यभूतपितॄंस्तर्पयित्वा सूर्यं भट्टारकं संपूज्य भगवन्तं महेश्वरं समभ्यर्च्य विश्वाधारं वासुदेवं समाराध्य मन्त्रपूतं भु(हु)तवहं हुत्वा पञ्चालदेशे जीआवतीपत्तलायां उसिथाग्रामे समस्तविषयसा(पा)र्श्ववर्तिसमस्तमहत्तमजनपदान्संबोधयति समाज्ञापयति—यथा ग्रामोऽयं मया स्वसीमातृणयूतिगोचरपर्यन्तः सजलस्थलः साम्रमधूकः सगर्तोषरपाषाणः सनदीवनलोहलवणाकरः सदशापराधदण्डः साकाशपातालः स्वसीमाचतुराघाटविशुद्धान्तः पूर्वदत्तदेवब्राह्मणवर्जितः नलिनीदलगतजलवत्तरलतरं प्राणिनां जीवितं विज्ञाय करिकलभकर्णाग्रविलसितचपलां लक्ष्मीं विलोक्य जलबुद्बुदाकारं यौवनं परिज्ञाय कदलीदण्डवत्संसारमसारतरं समाकलय्य साविथदेशनिर्गताय वाजसनेयशाखामृगाय[१] बन्धु-

लगोत्राय बन्धुलाघमर्षणविश्वामित्रत्रिप्रवराय दीक्षित**नागानन्द**पौत्राय दीक्षित**पुरवास**पुत्राय यजुर्वेदविद्यानलिनीविकासनप्रत्यक्षभास्कराय दीक्षित**वील्हाका**य श्रद्धाविशुद्धमनसा महाराजपुत्रश्रीमद्गोविन्दचन्द्रदेवेन कुशपूतहस्तोदकेन कार्तिक्यां निमित्ते सम्यगाजू(हू)यास्मै ब्राह्मणाय मातापित्रोरात्मनश्च यशःपुण्यविवृद्धये चन्द्रार्कोदधिक्षितिपवनाम्बराणि यावच्छासनीकृत्य प्रदत्तः । मत्त्वा यद्दीयमानभागभागकूटकदशवधविंशतिछवथाकेरे(?)तुरुष्कदण्डप्रभृतिसर्वादायान् तत्सर्वमस्मै निवेदनीयम् ।

ये यास्यन्ति महीभृतो मम कुले किंवा परस्मिन्पुर-
स्तेषामेष मयाञ्जलिर्विरचितो नादेयमस्मात्कियत् ।
दूर्वामात्रमपि स्वधर्मनिरता दत्तं सदा पाल्यतां
वायुर्वास्यति तप्स्यति प्रतपनः श्रुत्वा मुनीनां वचः ॥

अथात्र पौराणिकाः श्लोकाः—

भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ ॥
योऽर्चितं प्रतिगृह्णाति ददात्यर्चितमेव वा ।
तावुभौ गच्छतः स्वर्गं नरकं तु विपर्यये ॥
बहुदि(भि)र्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवत्तत्र(वान्तप्र)तिमानि तानि को नाम साधुः पुनराददीत ॥

असत्कुलं परमुदारमुदाहरद्भि-
रनै(न्यै)श्च दानमिदमचाणु(भ्यनु)मोदनीयम् ।
लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया
दानं फलं परयशःपरिपालनं च ॥

षंख(शङ्खं) भद्रासनं छत्रं वराश्वा वरवारणाः ।
भूमिदानस्य चिह्नानि मसं(फलं) [स्वर्गः] पुरंदर ॥

स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्टायां कृमिर्भूत्वा पितृभिः सह मोदते ॥
प्रतीहारगौतमश्च जागूकश्च पुरोहितः ।
जननी राल्हदेवी च वील्हणश्च महत्तकः ॥
एषां संमतिं प्राप्य सम्यग्लिखितवानिदम् ।
नाम्ना विजयदासाख्यः शासनं राजसंमतम् ॥

(एपिग्राफिआ इण्डिका—२।३५९-३६१)

---

(१२८)

[१]मोकलमहाराजकारितशिवमन्दिरप्रशस्तिः ।

ॐ नमः शिवाय ।

सिद्धार्थामरसुन्दरीकरवलत्सिन्दूरधारारुण-
श्रीगण्डस्थलमण्डलीयुगलसद्दानाम्बुपूरोज्ज्वलः ।
संध्याभ्रच्छुरिताग्रसानुनिपतन्नाकापगौघद्वयः
स्वर्णोर्वीभृदिव प्रयच्छतु शिवं देवो गजास्योऽव्ययम् ॥
वेदा वागिति शिष्टतामुपगतो यः कर्मणामीक्षिता
साक्षी तत्प्रतिभूः पुनर्भवति सन्सिद्धार्थसंदर्शनः ।
जात्यैवैषु विनश्वरेषु सकलं दाता विविक्तः फलं
देवः स्वस्तिकरः परः स सततं स्तादेकलिङ्गाभिधः ॥
भूमीभृत्स्वयमेधितस्थितिरियं गुर्वी नगा बन्धवो
विन्ध्योऽगस्त्यचरित्रतो न चकितः प्रास्थापयद्ब्राह्मणान् ।
कन्या मान्यतमा महोत्सवविधावित्येकमन्त्रोक्तितो
यामानीनयदर्चनाय गिरिजा विन्ध्यालया सावतात् ॥

---

१. अस्य प्रशस्तिभूतस्याधारभूता शिला मेवाडदेशान्तर्गतचित्रकूटनगरस्थशिवमन्दिरे उपलभ्यते. अस्याः प्रतिलेखः Dr. A. Fuhrer महाशयैः कृतः Dr. Burgess महाशयैः मह्यं दत्त इति Professor F. Kielhorn, Ph. D., C. I. E., महाशयाः.

कालिन्दीतटकुञ्जबद्धवसतिः सेयं प्रिया राधिका
सर्तव्यं ननु रुक्मिणी न भवती हुं चारुहासिन्यसि ।
युक्तं ना[सि] कलावती सुविदितं त्वं सत्यभामेऽन्यथा
नोक्तासीति विनिह्नुतोक्तमुदितश्लेषोऽच्युतः पातु वः ॥
स्फारन्यायोऽन्ववायो गुहिलनरपतेरस्ति जाग्रत्प्रशस्ति-
र्व्यस्तीभूतान्तरायो वसतिरिह युगे धर्म्यकर्मोदयस्य ।
शश्वद्यागानुरागे(ग)स्थिरविमलनिधौ भूरिभोगोनभागां
भूयो नूनां विधत्ते सपदि शतमखी यत्र संभूय शक्रः ॥
वाक्सेतोरचलन्मतिर्दिशि दिशि प्रख्यातमानोन्नति-
र्निर्यान्निखनवाहिनीपरिवृतो नानाधनैकाकरः ।
अत्यक्तक्षितिविग्रहो मुनिकथागीतादिगोत्रस्थिति-
र्विन्ध्यो बन्धुरबन्धुतां वितनुते यस्योपपन्नश्रियः ॥
वंशे तत्रारिसिंहः क्षितिपतिरजनि क्षत्रनक्षत्रलक्ष्मी-
वीक्षादक्षोरुयुत्क्ष्माबहुलजरजनिध्वंसभास्वद्गभस्तिः ।
विन्ध्यावन्ध्यप्रदेशस्फुरदमलखनिव्यक्तरत्नाकरत्व-
स्फारश्रीमेदपाटक्षितिब(व)लयवलद्दुग्धपाथोदचन्द्रः ॥
नरपतिररिसिंहः शस्त्रशास्त्रोपदेष्टा
वितरणरणकर्णो विश्वविख्यातवर्णः ।
स्फुरदमलगुणौघः पुण्यगण्योरुनामा
नयविनयविवेकोद्यानपुंस्कोकिलः सन् ॥
बिभ्यत्सिंहपदादमुष्य सकरी नूनं मघोनो यतो
बाजी सत्र(त्र)हविस्तताध्वरभुवं नोच्चैःश्रवा गच्छति ।
आहूतः कथमेरु वाहनमृते देवाग्रणीर्वृत्रहा
मेघं वाहनमातनोदयमतः सद्धोमधूमोद्भवम् ॥
कीर्तिः कौतुकिनी दिगन्तमगमत्कर्पूरपूरोज्व(ज्ज्व)ला
खेलन्ती निजवासिताभ्रमवशादालिङ्गिता दिग्गजैः ।

क्षीराम्भोनिधिगाहनं तु विधिना कृत्वादरादुत्थिता
ब्रह्मादीननुयोक्तुमुत्तमगुणस्यास्य प्रगल्भा दिवम् ॥
विशिष्टजनसंगतौ व्यतरदेकलक्ष्यं यत-
स्ततोऽधिकतरं यशोऽलभत भोजभूमीपतिः ।
अयं कथमदःसमः कविभिरुच्यते वाददा-
द्विशेषविधिनान्वहं विविधलक्षभोजानपि ॥
निर्व्रीडो न महेश्वरो न कठिनो नाचेतनश्चिन्तितं
दातानेकगवीश्वरः परिवृढो नो भारती दुर्भगा ।
सेनानीर्न विपक्षसंगतिरतो नोच्चैःश्रवा वा हयो
नारामः कतिचित्तरुः कथमदः पुर्याः स धुर्या दिवः ॥
शूरः सूनृतवागनूनविभ[वो] वंशावतंसः सुत-
स्तस्य न्यक्कृतरत्नसानुगरिमा हम्मीरवीरो जयी ।
विख्यातः स्मररूपजित्वरवपुर्लक्ष्मीनिवासाच्युतो
वाग्देवीचतुराननो रिपुकुलप्लोषोग्ररूपो महान् ॥
हम्मीरः किल वैभवोचितविधिर्दित्सुः सहस्रं गवा-
मित्याकर्ण्य सहस्रगू रविशचीनाथौ भयं जग्मतुः ।
शश्वत्तद्रहसि स्थितान्मुररिपोः श्रुत्वा सहस्रं पुन-
र्धेनूनां समुपागतावतिमुदा तद्दानमेवेक्षितुम् ॥
कर्णादीनतिशय्य दिग्जयविधावादाय दिङ्मण्डली-
दण्डं दूरमपास्य कालमसकृद्दाता स्वयं दक्षिणाम् ।
इत्याकर्ण्य जनश्रुतीः परिभवं स्वं शङ्कमानोऽन्तकृ-
द्द्रष्टुं न क्षमते प्रजा मनुनये यस्मिन्महीं शासति ॥
प्रासादमासादितशातकुम्भकुम्भं वसद्देवमचीकरद्यः ।
अचीखनत्सागरकल्पमल्पेतरत्सरश्चूतवनीभिरिद्धम् ॥
संग्रामग्रामभूमौ सदिदमसिलता संगता पञ्चशाखे
सच्छाये श्यामलाङ्गी क्षतजजलवलत्पुष्टिरिष्टप्रचारा ।

चित्रं सूते विकोशा कुसुममतिमहत्कीर्तनीयं दिगन्ते
धा[म्ना]म्नाता नितान्तं दलयति नियतं वारणाङ्के पतन्ती ॥
हम्मीरवीरो रणरङ्गधीरो वाङ्माधुरीतर्जितकेकिकीरः ।
धराधवालंकरणैकहीरस्तत्तद्बनीभूषितसिन्धुतीरः ॥
एतत्पाणौ कृपाणी द्विषदसुपवनाहारतोषं दधाना
कालाकारोरगीव स्फुरति सचकितं वीक्षिता भीतिहेतुः ।
नाधः काये कथंचिद्दशति बहुमता नो बिभीते विपक्षा-
स्त्वर्गे वासं क्ष[ता]नां वितरति रमते न द्विजिह्वेन चित्रम् ॥
पायं [पायं सुपीनः] परभटरुधिरं तन्महीगर्भजाता
खड्गः कालः कुतोऽयं कथमियमपरा कीर्तिरस्युज्व(ज्ज्व)लास्य ।
एकेनास्नायि नूनं रुददरिवनितानेत्रतोयेऽञ्जनाढ्ये
तासामुद्वर्तितेयं मृदुभुजब(व)लयस्वच्छचूर्णैरजस्रम् ॥
उद्यत्प्रौढप्रतापानलमुषितमहाबिम्बशेषो विवस्वा-
न्पश्चादुद्दामकीर्तिच्छुरिततरतनुः शीतरश्मित्वमेति ।
शङ्के रूपान्तरं स्वं कलयति स वपुर्भेदभीतो रणक्ष्मा
धीरे हम्मीरवीरे प्रति परसुभटान्संगरे संमुखस्थान् ॥
कुर्वन्पद्मे जनुः स्वं विधिरिति विधिद्दग्दष्टसृष्टप्रदिष्टो
नो पङ्के जन्मदोषं व्यजगणदतुलं तस्य रक्तेतरस्य ।
भूत्वा हम्मीरदेवक्षितिपतियशसः स्वच्छवर्णोपमेयो
गन्ता पुण्योपमानं दिशि दिशि सुचिरं सत्कवीनां सुखेषु ॥
गौरो गौरीशहासादपि रुचिररुचिश्चन्दनाच्चन्द्रतो वा
कान्त्या कर्णाटकान्तासितदशन[च]तुष्कानुमेया सुगेया ।
शेषस्याशेषवेषस्फुरदमृतरुचश्चारुसौन्दर्यधुर्या
कीर्तिर्यस्येन्दुमूर्तेः किल चरति दशाशान्तविश्रान्तयात्रा ॥
तस्मात्क्षेत्रमहीपतिः समभवत्ख्यातो गुणाम्भोनिधिः
शौर्यौदार्यमहत्व(त्त्व)सत्व(त्त्व)महितो धर्मो वपुष्मानिव ।

शक्रार्धासनभाजि येन जनके रत्नाकरालंकृति-
भूर्भुक्ता जितपूर्वराजगिरिमप्राप्तप्रभाशालिना ॥
हृदि विनिहितरामो योऽस्त्रविद्याभिरामो
मदनसदृशमूर्तिर्विश्वविख्यातकीर्तिः ।
समरहतविपक्षो लीलया दत्तलक्ष्मी-
र्नयनजितसरोजः प्रक्रियाक्रान्तभोजः ॥
संग्रामे दन्तिदन्तज्वलनकणमुचि प्रोल्लसद्वीरयोध-
स्फारोन्मुक्ताशुगालीनिबिडकवलिताशेषकाष्ठान्तराले ।
जित्वा दुर्गे समग्रं नरपतिमहितं साधुवादस्य सम्य-
क्स्तम्भं योधाद्धरित्र्यामरिकलपतगश्रेणिचण्डप्रदीपः ॥
आक्रान्ता वृषपुंगवेन विलसद्भासा चतुर्भिः पदैः
सम्यग्वीक्षणपालिता नवनवप्राप्तप्रकर्षोदया ।
प्रासोष्टामरनैचिकीव बहुशो रत्नान्यनर्घ्याणि गौः
शूरे कीर्तिपयो धराशतमखे यस्मिन्महीं शासति ॥
कीर्तिक्षीरोदपूरे बहुविधबिरुदप्रोल्लसद्वीचिमाले
कृष्णः शेतेऽस्य खड्गः सुखमुरुसमरे शेषमासाद्य शत्रोः ।
दृश्यन्ते राजहंसा दिशि दिशि न ततो मानसे लीयमानाः
सीदत्पक्षा विलक्षाः स्फुरति न कमलोन्मेषितापेक्षितैषाम् ॥
अस्यासिः कालरात्रिः स्फुरति किल भवन्मण्डले वैरि........
........[प्रो]द्भासिवेश्मप्रभवदहिभयं भूतराजोरुतापम् ।
पद्मोद्बोधो न चैषां भवति विघटते चक्रयो[गो] नियोगा-
द्भूरिर्जागर्ति भित्तिः पतति निजपथो नोज्झितः पक्षपातः ॥
भ्रातः कल्पतरो किमात्थ भगवन्हेमाचल श्रूयतां
कर्तुं क्षेत्रमहीपतिः प्रयतते दानानि पुण्याशयः ।
वर्ते[ऽहं स्व?]करे गृहाङ्गणभुवि त्वं वर्तसे नित्यशः
क्रीडार्थं यदि [वा] ददाति हि तदा वक्तुं क ईष्टे जनः ॥

इत्थं दानकथा मिथो विजयते चिन्तामणिस्वर्गवी-
मुख्यानामपि दानशास्त्रविलसन्नाम्नाममुष्य प्रभोः ।
उन्मीलच्छरदम्बुजामलदलस्वच्छायताक्षिस्फुर-
त्कोणस्थायुकमित्रवैरिपरिषत्संपद्विपद्वर्त्मनः ॥
माद्यद्वेतण्डचण्डध्वनिभरविगलद्वीरवर्गोरुधैर्ये
स्फूर्जत्कोदण्डदण्डप्रपतदिषुचयच्छन्नसैन्येऽप्यनन्ये ।
जन्ये प्राणैकपण्ये गणयति न गणं विद्विषां पुण्यराशि-
र्धन्यः क्षेत्रक्षितीशः प्रतिभटनृपतिक्ष्माकराकृष्टिदृष्टिः ॥
मूर्च्छालं तु जडीभवच्छ्रुतिपथं संशुष्कितैकत्वचं
मीलन्तं च मुहुर्मुहुः शिथिलितं यान्तं न [वा] सुस्थितम् ।
दारिद्र्योपहतं विबोधयति यद्दुष्टाहिदष्टं यथा
जाप्यं कर्णपथाश्रितं सुविमलं यन्नाममन्त्राक्षरम् ॥
तत्सूनुः किल लक्षसिंहनृपतिः ख्यातो गुणग्रामणी-
रुद्यद्दानफलामलार्जुनयशोवल्लीमतल्लीतरुः ।
यत्तेजःशिखिनो [वि]पक्षवनितानेत्राम्बुजातद्युतेः
काष्ठान्ताक्रमणं [झ]टित्यनुदिनं नाभूद्विचारास्पदम् ॥
रामः किं जितदूषणः सुभरतो रामानुरागास्पदं
शत्रुघ्नः किमु लक्ष्मणोदयभरः सुग्रीव इद्धाङ्गदः ।
तारावल्लभ उत्तमेन वपुषालंकारमा[या]दतो
यो रामायणनायकैकतनुतां द्रष्टुं विधात्रा कृतः ॥
दानादुद्दामसामा शरणगतजनत्राणपाषाणसीमा
भीमासीमैकधामा शतमखपुरतो विद्विषा गीतनामा ।
अक्षामारामदामा मखमुखविलसद्धूमधूमोच्चसामा
सल्लक्ष्माशेषरोमा धरणिसुरतरुर्लक्षसिंहः स धीमान् ॥
वैरिक्षोणीन्द्रमत्तद्विरदमदनुदः सिंहतः शुद्धसारा-
दारादुद्गीतकीर्तेरमरपुरभिष[क्रान्ति]निर्णीतमूर्तेः ।

दाने माने कृपाणे यशसि महसि [वा] साधुवाण्यां कृपाण्यां
वीराल्लक्षक्षितीशाज्जगति न हि परः ख्यातिभक्तिः सु[भु]क्तिः ॥
नीतिप्रीतिभुजार्जितानि [लक्ष]शो रत्नानि यत्नादयं
दायं दायममायया व्यतनुत ध्वस्तान्तरायां गयाम् ।
तीर्थानां करमाकलय्य विधिनान्यत्रापि युङ्क्ते धनं
प्रौढग्रावनिबद्धतीर्थसरसीजाग्रद्यशोऽम्भोरुहः ॥
संग्रामेषु गतागतानि विद[ध]ल्लक्षं परैर्लक्षितो
दत्वा(त्त्वा) लक्षमपि स्व[यं न] तनुते संतोषमब्जेक्षणः ।
कुर्वाणः किल कानकीमपि तुलां तत्खण्डबिम्बच्छला-
[ल्ल]क्षं स्वां तनुमातनोदिति नृपो लक्षप्रथोऽजायत ॥
दाने हेम्नस्तुलायां मखभुवि बहुधा शुद्धिमापादि[ता]नां
भास्वज्जाम्बूनदानां कुतुकिजनभरैस्तर्किता राशयोऽस्य ।
संग्रामे लुण्टितानां प्रतिनृपमहसां राशयस्ते किमेते
विन्ध्यं बन्धुं समेतुं किमु समुपगताः साधु हेमाद्रिपादाः ॥
रुद्धाशेषपदां शकाधिपकरव्यग्रीभवज्जीवनां
धीरोऽमूमुचदर्जुनीमिव गयां मायाविमुक्ताशयः ।
धर्मश्चास्य समस्तलोकमहितः [का]ष्ठां परामागतो
निः[सत्त्वी ?]कृतधर्मराजवसतेः पद्मालयासद्मनः ॥
मत्तुल्या [न]नु नाभवत्किल तुला पूर्वेति गर्वं तुला-
मुष्य क्षोणिपतेर्ध्रुवं कृतवतो गर्वासहिष्णोः पुरः ।
तस्यास्तस्य मुदानुदां विदधता धीरेण दत्तापरा-
सौ मानादधिकाधिकीकृतविधिः सद्यो वियद्घाटका ॥
संख्यातुं कथमीशते कविजना दानानि नानाविधा-
न्यस्याकृष्टसमस्तराजवसुधावित्तस्य चित्तोन्नतेः ।
लब्धा नोद्विजते वनीपकगणान्दत्वा(त्त्वा) न यत्कीर्तये-
त्पात्रं प्राप्य मुदान्वितस्तृणतुलां स्वर्णं समारोपयेत् ॥

तस्य क्ष्मावलयं नयेन नयतः संतोषमायु[ष्म]तः
संभूतः स्मरसुन्दरो गुरुनतः पुत्रः सुधीर्मोकलः।
शक्त्या भूभृति दारुणं वितनु[ते] यत्तत्कुमारः पुरः
सर्वज्ञोऽस्ति यतस्ततोऽचलभुवो नाथस्तु पित्रा कृतः॥
प्रासादा बहुशः समुन्नतियुजः क्षोणीभुजा कारिताः
शुभ्यन्मूर्धसु राजमानकनकप्रस्फारकुम्भश्रियः।
नागेन्द्रा नु शिरःसु हाटकघटाना[धा]य लोलत्सुधा-
न्यातुं नाकमिवोत्थिता मखभुजां पीयूषपानोत्सुकाः॥
अङ्गाः संप्राप्तभङ्गाः स्मृतघनविटपाः कामरूपा विरूपा
वङ्गा गङ्गैकसङ्गा गतविरुदमदा जातसादा निषादाः।
चीनाः संग्रामदीनाः स्खलदसिधनुषो भीतिशुष्कास्तुरुष्का
भूमीपृष्ठे गरिष्ठे स्फुरति महिमनि क्ष्मापतेर्मोकलस्य॥
मूर्धा सिन्दूररेखाशतमखधनुषा राजमाना गभीरं
कुर्वन्तः शब्दमुच्चै रदरुचिचपलाः स्निग्धतन्वा कचाभाः।
संग्रामग्रामयाता रिपुकरिजलदाः प्राप्तकालोपयोगा
यस्येषुव्रातभिन्नाः खलु रुधिरजलं भूरि वर्षन्ति सद्यः॥
अस्य प्रौढप्रयाणक्षणरणर[ण]कह्रेषमाणोरुमान-
स्फूर्जद्गर्वार्वव[र्ये]क्रमणभरभवद्धूलिधारान्धकारम्।
ना[शं ने]ता विवस्वानिति तु विरमतु ध्वस्तनेत्रप्रकाशः
स्वानश्वानस्ववर्णान्यदि परिचिनुते तत्स भाग्यं महीयः॥
वासो नाशासु भास्वत्कररुचिररुचाभासितास्वस्य वैरा-
त्पारावारान्तरायादपि नहि गमनं दूरमस्मादकस्मात्।
सेवाहेवाकमेवाचरत बहुमतं दत्त वित्तं नितान्तं
[मं]त्रोऽमात्यैरकारि प्रतिविमतसदो भूपतेर्मोकलस्य॥
प्रुष्टप्रौढारिवर्गप्रथितपुरब(व)लद्धूमधूमप्रचारै-
धूम्रं ब्र[ब्र]ह्माण्डभाण्डोदरमतिविपुलं वीक्ष्य दक्षेषु मुख्यः।

कीर्त्यालेपं सुधोत्थं कलयति बलवान्दिग्वधूकिंकराभि-
स्तारावद्बिन्दुवृन्दच्छुरणबहुरुचा योऽम्बरेणावृताभिः ॥
नेता पातोत्तराज्ञां यवननरपतिं लुण्टिताशेषसेनं
पेरोजं कीर्तिवल्लीकुसुममुरुमतिर्योऽकरोत्संगरस्थः ।
पल्लीशाक्रान्तिवार्ता कलयति कलया कीर्तिता यस्य हेलां
पञ्चास्यस्येव माद्यद्गजदलनरुचेर्लीलया रङ्कुभङ्गः ॥
आरूढः सविता तुलां कलयति द्राङ्नीचतां कन्यया
दूरं मुक्तपरिग्रहो बहुरुचा चित्रोल्लसद्धस्तया ।
धीरोऽयं पदमुत्तमं तु विधिना प्राप्तस्तुलां गाहते
कन्याभिर्म्रियतेतमां क्षितिभुजां श्रीमोकलक्ष्मापतिः ॥
मानत्राणमना मनागपि मनोरन्यूननीतिव्रतो
नो जानाति निजप्रतापमतुलं सिंहो यथा विक्रमम् ।
मन्ये भास्वरहेमराशिमिषतो धाता तुलायामधा-
देतस्मादपि सोऽगमच्च गुरुतामद्यापि जा[ना]ति किम् ॥
दृष्ट्वा हाटककोटिकूटमतुलं दानाय मानाधिकं
सद्यः शोधित[सूत्र]तैकमतयः संशेरते शाब्दिकाः ।
शक्रप्रार्थितहेमदे सुरतरौ किं किं नु चिन्तामणौ
हेमाद्रौ शकलीकृते किमु तुलाशब्दस्तु संकेतितः ॥
दीव्यत्तद्वीरतुङ्गत्तरतुरगवरव्रातजातोरुवात-
क्षुभ्यत्तत्क्ष्मोत्थरेणुक्षतनयनरुजाव्यग्रसूताः खरांशोः ।
मन्दायन्ते गतेश्वास्तत इव वनिता वैरिणां तद्दिनानां
यामाञ्जानन्ति दीर्घानवितथविरुदे मोकलेन्द्रे रणस्थे ॥
को वा नो वेद विद्वांश्वरमयुगकलावेकपादेव धर्मः
खञ्जन्नष्टावलम्बः किल चरतु कथं पीनपङ्के जनेऽस्मिन् ।
सोऽयं सद्वंशयष्टिं बहिरबहिरथो शुद्धसारोपपन्नं
प्राप्य श्रीमोकलेन्द्रं प्रविशति विपुलां मण्डलीं पण्डितानाम् ।

नूनं द्यूतविधावधान्मखभुजामीशः सुमेरुं पणं
गण्यस्तत्र मनस्विनां व्यजयत श्रीमोकलक्ष्मापतिः।
तादृक्षाः क[थ]मन्यथावनितले हेम्नाममी राशयो
नैषां दानविधावमुष्य च मनःपीडाकलापि क्वचित्॥
वह्नावह्नाय सर्पिःपतननवरुचौ भूमिधूमायमाने
दूनां····म[क्षि?]पन्तौ कथमुपकुरुते यागभागो मघोनः।
पुण्येनास्यैव जाने दिनमणिरयते सत्कराणां सहस्रं
बिभ्रत्सद्योऽस्ततन्द्रः स्थगयति विधिना योऽयमक्ष्णां सहस्रम्॥
आरुह्यामलमण्डलोऽकृत तुलां यः पुष्करद्योतनं
पुण्यश्रीः स कथं तथा प्रथमतो गण्यो न तेजस्विनाम्।
निष्पङ्का करलालिता वसुमती सद्राजहंसा यतो
व(ब)न्धूनामुदयस्ततस्तदुदये स्यात्संपदामौचिती॥
पारावारस्य वेलातटनिकटमनु प्राप्तशैलाधिवासा
शत्रुश्रेणी समग्रा निवसति सततं भीतभीता नितान्तम्।
जेतुं यात्रादसीया यदि भवति तदा वाजिराजीखुराग्र-
त्रुट्यत्क्ष्माधूलिधारा स्थलयति जलधिं पारयानाय तस्य॥
आसाद्यातिथिमाश्रयं त्रिजगतां श्रीद्वारकानायकं
प्रासादं रचितोपचारमकरोद्भूमीपतिर्मोकलः।
देवेनाम्बुजबान्धवेन चकितं यो वीक्षितः शङ्कया
विन्ध्याद्रेर्गिरिसत्तमस्य नियतं मुक्तस्य वाग्बन्धनात्॥
यस्य प्रत्युप्तकर्मद्रवदखिलमहाधातुसंभारधारा-
पातक्ष्मातापशुष्यद्गलबिलविलसल्लोललालः फणीन्द्रः।
व्याचष्टे स्पष्टमिष्टं ध्रुवमयमधुना भाष्यमाभाष्य शिष्यं
स श्रीभर्तुः पुरस्ताज्जयति क्ष्मापतिर्मोकलेन्द्रस्य कीर्तेः॥
सोढुं नेशः पयोधिः क्षणमपि विरहं द्वारकानाथ(य)कस्य
प्रेम्णा पादोपमूलं स्वयमुपगतवान्यत्तडागच्छलेन।

नोदन्या कुम्भयोनेरतिपततितरामन्तरेणैनमेष्य-
ञ्शापान्तं मे विदध्यादयमिति विनयाद्विन्ध्य एवानयद्यम् ॥
विन्ध्यस्कन्धैकबन्धुर्निजविततिभरादन्धुतानीतसिन्धु-
र्नीरक्रीडत्पुरंध्रिप्रसभकुचतटाघातसीदत्तरङ्गः ।
संतुष्यत्तोयजन्तुर्विविधनगनदीवेगसंरोधतन्तुः
सन्सेतुर्नेतुरस्य स्फुरति वसुमतीसिद्धिहेतुः सुकेतुः ॥
अमुष्य धरणीभृतो विषयमध्यवर्ती महा-
दरीवृतवपुष्टया [वि]वृतदूरगम्भीरतः ।
म[हो]दर इवापरः परममानगम्यान्तरः
पवित्रतरकीर्तनो जयति चित्रकूटाचलः ॥
जायन्तां नाम कामं कुलधरणिभृतः सप्तशृङ्गौघतुङ्गा
वैचित्र्या चित्रकूटं तुलयितुमनलं तीर्थभूतप्रदेशम् ।
मा भूवन्निर्झरिण्यो मदुदितजनुषो नीचगामानशौण्डः
शृङ्गे यः क्षीरवारांनिधिमधिततरामुद्यदम्भोजवासम् ॥
उद्दामग्रावनिर्यज्झरभरकणिकाजातसेकातरेक-
स्निह्यच्छालप्रवालप्रभवदुरुतराभोगसूनप्रसूतात् ।
मध्वासारादपारादुप[हृ]तजनुषो दाववह्नेर्निदाघे
विष्वद्रीचो वनानि प्रसभपरिभवं नेह शैले विदन्ति ॥
एतस्मिन्सरिदस्ति निर्मलजला यस्यां निवापाञ्जला-
वुन्मीलत्तिलजातपातकवलव्यग्राः शफर्यश्चलाः ।
क्रीडासंभ्रमविस्मृतान्सुबहुशो मज्जद्वधूनामहो
नेत्राणीव विलोपिकज्जलकणांश्चेतुं स्फुरन्ति स्फुटम् ॥
लङ्का किं नाम दुर्गं जलनिधिरचिता यत्र सा काल[काका ?]
[प्रा]वृट्का[ले] विवर्गैरपि गलितमदैर्या न्रियेतेति मानी ।
यो धत्ते क्षीरवारांनिधिमुपरि परै राजहंसैरगम्य-
स्तद्दुर्गं चित्रकूटो जयति वसुमतीमण्डनं भूतिभूमिः ॥

सौभाग्यैकमहौषधिर्भगवती यस्मिन्भवानी स्वयं
जागर्ति प्रियसंनिधानवसतिः साध्वीजनानां गुरुः ।
देवः सोऽपि समस्तनाकरमणीसंतानदामव्रज-
प्रश्च्योतन्मकरन्दबिन्दुसुरभिप्रस्फारनृत्याङ्गणः ॥
सेवाहेवाकिदेवस्तुतहरचरितप्रोल्लसद्भावसंप-
त्सद्यःस्विद्यद्भवानीकृतसुखवसनस्फारसौरभ्यहारि ।
यद्वारि प्रातिभाव्यं वहति मृगदृशां मज्जतीनामजस्रं
पातिव्रत्ये समन्तात्समधिकसुभगंभावुकत्वेऽपि शश्वत् ॥
गिरिः कैलासो यद्दशमुखभुजोच्छासनदिना-
द्गलन्मूलस्थामा प्रभवति न नाथ्यं विषहितुम् ।
प्रदेशप्राग्भारप्र[कृ]तिरमणीये तदधुना
समाधीशः श्रीमानिह वसति गौरीसहचरः ॥
एकैकग्रावतावत्कृतिमुषितमहासर्वकर्मीणमानं
कृत्वा प्रासादमाशामुखमुकुरमतिव्योमसीमानमस्य ।
यस्याशेषोपचारक्षमधनमुदितारी.....................
द्धीरः श्रीमोकलेन्द्रो धनपुरमुचितं ग्राममायामिसीमम् ॥
अब्दे बाणाष्टवेदक्षितिपरिकलिते विक्रमाम्भोजबन्धोः
पुण्ये मासे तपस्ये सवितरि मकरं याति जीवे घटस्थ ।
पक्षे शुक्लेतरस्मिन्सुरगुरुदिवसे चार्यमर्क्षे तृतीया-
तिथ्यां देवप्रतिष्ठामयमकृततरां मोकलो भूमिपालः ॥
उन्मीलद्यागयात्रोद्यतसुरतरुणीगीतसंग्रामधामा
सुत्रामा यावदीष्टे त्रिदशपरपरीपालनस्पष्टनीतिः ।
पर्यायोपात्तभूनां स्फुरति दशशती शेषमूर्ध्नां च याव-
त्तावत्प्रस्फारलक्ष्मीरवतु वसुमतीं मोकलेन्द्रस्य बाहुः ॥
श्रीमद्दशपुरज्ञातिर्भट्टविष्णोस्तनूद्भवः ।
नाम्नैकनाथनामायमलिखत्कृतिमुज्व(ज्ज्व)लाम् ॥

अनेकप्रासादैः परिवृतमतिप्रांशुकलशं
गिरीशप्रासादं व्यरचयदनूनैरनुचरैः।
मनाख्यो विख्यातः सकलंगुणवान्वीजलसुतः
सुतः शिल्पी जातो गुणगणयुतो वीसल इति ॥
अतिप्रशस्तैरलिखत्प्रशस्तिं वर्णैरवर्णेन बहिष्कृतैर्यः।
श्रीमत्समाधीशमहेश्वरस्य प्रसादतोऽसौ चिरजीविनोऽस्तु ॥
वी[जलस्य] सुतः शिल्पी मनाख्यः सूत्रधारकः।
तस्यात्मजेन वीसेन प्रशस्तिरियमुत्कृता ॥
रुचिराक्षरमुत्कीर्णा प्रशस्तिरियमुज्व(ज्व)ला)।
लिलेख वीसलः शिल्पी समाधीशप्रसादतः ॥
संवत् १४८९ वर्षे माघसुदि (३) गुरुदिने.......

(एपिग्राफिआ इण्डिका—२।४१०–२१)

---

(१२९)

[1]श्रीकुन्तीमाधवभगवन्मन्दिरस्तम्भोत्कीर्णा प्रशस्तिः।

श्रीकान्तस्य निजोदरान्तरचरद्ब्रह्माण्डखण्डावन-
व्यापाराभिरतस्य वेद[शिर]सामावासभूमेर्हरेः।
नाभ्यम्भोरुहगह्वरापवरकादाविर्बभूवात्मभू-
र्भूतादिप्रकटप्रपञ्चरचनादक्षः पुराणोऽव्ययः ॥
तत्पादाम्बुरुहान्महेन्द्रविनुताज्जज्ञे चतुर्थान्वय-
स्त्रैलोक्यैकगुरोर्हरेः पदतलाद्गङ्गाप्रवाहो यथा।
तस्मिन्विस्मितसूरिसंहतिनुतोऽभूदिन्द्रसेनो नृपो
राजा धर्मसुतेन संगरविधि[:] प्रीतेन पुत्रीकृतः ॥

---

१. प्रशस्तिरियं गोदावरीतीरे पिठापुरनाम्नि ग्रामे कुन्तीमाधवनामकविष्णुमन्दिरमस्ति तत्र स्तम्भे उत्कीर्णेयमस्ति. सा च पृथ्वीश्वरदेवमहीपालल्लेखिता वर्तते इति. इयं च E. HULTZSCH, PH. D. महाशयैः प्रकाशिता.

प्रीतिः श्वेतातपत्रं कनकविरचितं दण्डमाखण्डलाभो
व्योम्नि क्षौमं वितानं सकलनृपजनप्रार्थ्यसिंहासनार्धम्।
नानावादित्रशङ्खध्वनिभिरभिनुतां मङ्गलालत्तिकां च
प्रादाद्धर्मात्मजोऽस्मात्तुहिनचयसिते चामरे चारुरूपे ॥
अशेषसुखसंभोगभागधेयैकभा[ज]नम्।
मध्यदेशेऽभवत्तस्य स्थानं कीर्तिपुरं महत् ॥
सोऽयं धर्मनृपालदत्तनिखिलक्ष्मापालचिह्नश्रियं
राजत्प्राज्ययशोवितानरुचिभिर्भूमण्डलं मण्डयन्।
कुर्वन्सर्वसुधीधियः प्रमुदितास्तारागणैर्वावृतो
राजाराजत चातुरङ्गपृतनासंवेष्टितोऽस्मिन्पुरे ॥
यातेषु केषुचिदशेषधराधिपेषु तद्वंशजेषु विजितारिपराक्रमेषु।
जज्ञे नयज्ञजनसंसदि कीर्तनीयः शास्ता समस्तजगतामथ कीर्तिवर्मा ॥
तद्वंशो मल्लवर्माभूत्तत्सुतो रणदुर्जयः।
वैरिणो रणरङ्गस्थमीक्षितुं यं न सेहिरे ॥
ततो निखिलभूपालमौलिलालितशासनः।
कीर्तिवर्माभवत्तस्य पुत्रोऽभूद्रणदुर्जयः ॥
तत्पुत्रः कीर्तिवर्मा
अनेकहस्त्यश्वपदातिवर्गविनिर्जितारातिकुलः कलावान्।
शशास पृथ्वीं प्रथितप्रतापस्तदात्मजो मल्लनृपोऽतिवीरः ॥
अथ त्रिनेत्रेण स पल्लवेन विधाय मैत्रीं विधिवद्विधिज्ञः।
जिगीषया दक्षिणदेशमुच्चकैः प्रतस्थिवानास्थितसिंहविक्रमः ॥
सोऽयं गङ्गकलिङ्गवङ्गमगधान्नन्ध्रान्पुलिन्दान्नृपा-
न्वीरः कुन्तलकेरलक्षितिपतीन्गौडान्सपाण्ड्याधिपान्।
जित्वा भोजमराटलाटकटकान्दैत्यानिवाखण्डलो
राजाभ्राजत षट्सहस्रजगतीमासाद्य सत्यव्रतः ॥
विविधविभवराजद्राजसंघाभिरामं
निधिनिचयसमेतं सिद्धविद्याधराढ्यम्।

पुरमिव धनदस्य श्रीनिवासैकभूमि-
धनदपुरसमाख्यं तस्य राज्ञो बभूव ॥
तत्रायं धनदपुरे मुरारितुल्यः कल्याणैः स्वकुलपरम्परानुयातैः ।
कौन्तेयात्समधिगतैर्महीपचिह्नैः संयुक्तोऽशिषदवनीं स मल्लभूपः ।
तत एऋयवर्मा ततः कुडियवर्मा
तस्मान्मल्लमहीपतिः प्रतिबल[ध्वा]न्तौघधर्मद्युति-
र्जातोऽभून्निजखड्गखण्डितमहाचण्डाशनिः शाश्वतः ।
यो लोके गुणयोगतः पिड्डुवरादित्याभिधानं ययौ
दुष्प्रापं त्रिदशैरशेषजगतामीशैः समस्तैरपि ॥
तस्मादभूत्कुडियवर्मनृपः प्रमाथी
वैरिक्षितीशमदमानमनोरथानाम् ।
यद्युद्धभूमिषु मनीषितपूरुषाप्त्यै
गीर्वाणवारवनिता मुदिताश्चरन्ति ॥
तत्राखिलमहीचा[रु]पद्माकरसमृद्धिदः ।
विमलादित्यदेवोऽभूच्चालुक्यान्वयभूषणम् ॥
तस्याखिलक्षितिपमौलिकिरीटकोटि-
रत्नप्रभानिकरकान्तपदद्वयस्य ।
संग्रामभूमिषु चकार चिरं जिगीषोः
साहाय्यकं कुडियवर्मनृपोऽति[वी]रः ॥
ततः साहाय्यसंतुष्टः कुड्यवर्ममहीभृते ।
विमलादित्यभूपालो गुड्डवारद्वयं ददौ ॥
राजराजस्तु तत्पुत्रो राजराज इव स्वयम् ।
निखिलैश्वर्यहृष्टात्मा राजशेखरसंश्रयः ॥
सोऽयं सूर्यकुलामृतार्णवभवामम्मङ्गयम्बां सतीं
राजेन्द्रप्रियपुत्रिकां नृपवर[ः] श्रीराजराजस्तदा ।
नानाभूतसमस्तलोकविभवप्राप्तिप्रधानास्पदं
त्रैलोक्यैकगुरुर्यथा सरसिजां तत्रोपमेये हरिः ॥

अजनि निजभुजोद्यद्विक्रमाक्रान्तविश्व-
क्षितिभरणसमर्थः श्रीकुलोत्तुङ्गचोडः।
दिनकरमिव ताभ्यां यं कराकृष्यमाणा
प्रथित[ब]हलभासं राजलक्ष्मीः सिषेवे ॥
तस्मादाविरभूद्वीरो वीरचोडः प्रतापवान्।
कुमारः कुपितारातिराजन्यमदभञ्जनः ॥
श्रीकुलोत्तुङ्गचोडोऽपि पालयन्सकलामिलाम्।
वीरचोडकुमाराय प्रददौ वेङ्गिमण्डलम् ॥
कुब्ज्यवर्ममहीपालः परिपाल्य वसुंधराम्।
स्वराज्यभारमखिलं स्वपुत्रे स नियुक्तवान् ॥
एरयोऽभून्नृपस्तस्माद्धृत्रशत्रुपराक्रमः।
ततोऽभवन्नन्निराजः संहृतारातिसंहतिः ॥
तस्य प्रपञ्चितसमञ्चितपुण्यकीर्तेः पञ्चाभवन्निजभुजार्जितराज्यभाजः।
पुत्राः पवित्रचरिता विदुराख्यगण्डगोङ्कक्षमाधिपतिमल्लयपण्डसंज्ञाः ॥
तेषां गोङ्कमहीपालः पालयन्नन्ध्रमण्डलम्।
श्रीकुलोत्तुङ्गचोडाज्ञां दधानोऽप्यधिकं बभौ ॥
पुत्रस्तस्य समस्तराजनिकरप्रोद्यत्किरीटद्युति-
श्रेणिः शोणपदस्य गोङ्कनृपतेः श्रीचोडभूपोऽजनि।
यद्बाहायुगपालिता वसुमती स्वास्थ्यं परं व्यानशे
रामे राजनि राजलोकविनुते यावत्सुखं मेदिनी ॥
तस्य गोङ्कक्षितीशस्य भ्रातुर्गण्डस्य धीमतः।
बभूव विदुरो नाम तनयो विनयान्वितः ॥
अथ मथितवैरियूथे प्रथितगुणे वीरचोडनरपाले।
शासति राज्यं वेङ्गीमण्डलमाखण्डलोपमे रेजे ॥
तस्याखिलारिनरपालसमूहराज-
लक्ष्मीकचग्रहणलम्पटदक्षहस्तः।

श्रीवीरचोडनृपतेर्विदुरक्षितीशः
साचिव्यमाचरदयं चतुरप्रतापः ॥
विदुरो वीरचोडस्य शासनानुचरश्चिरम् ।
पाण्ड्यदेवं जिगायाजौ सामन्तगणसंयुतम् ॥
तस्मै श्रीवीरचोडक्षितिपतिरखिलक्ष्माभृतां विस्मिताना-
मग्रे सिंहासनार्धं सकलनृपजनप्रार्थितं संदिदेश ।
देशं चाशेषसस्यप्रचुरफलयुतं सिन्धुयुग्मान्तराख्यं
प्रादात्प्रीतस्य भूयो विदुरनृपतये पातितारातिराजे ॥
अथ पृथुतरकीर्तिः श्रीकुलोत्तुङ्गचोडः
परनृपकुलमाथं गोङ्कभूपालपुत्रम् ।
सुतमिव परिगृह्यागर्हणीयस्वभावं
स्वतनयजनचिह्नैश्चोडभूपं युयोज ॥
ततश्चोडमहीपाय सूनवे स नृपोत्तमः ।
प्रीतः षोडशसाहस्रं प्रददौ वेङ्गिमण्डलम् ॥
सोऽयं चोडक्षितीशः प्रतिनृपतिकुलोन्मूलनाभीलभीमः
श्रीमद्वेङ्गीधरित्रीमभिमतफलदां पालयञ्छैलधीरः ।
रेजे राजीवराजन्निजनयनयुगो योगगम्ये पुराणे
पुष्णन्विष्णावभीक्ष्णं निखिलनृपजनाभ्यर्चितो भक्तियुक्तिम् ॥
तस्य त्रिवर्गसहचर्यतिमात्रपूर्णे
तारापतिप्रतिमवक्त्ररुचिः प्रियाभूत् ।
लक्ष्मीरिवाक्षयगुणा पतिदेवतानां
गुण्डाम्बिका धुरि सदा परिकीर्तनीया ॥
ताभ्यां शचीवासवसन्निभाभ्यामशेषलोकस्थितिहेतुभूतः ।
श्रीगोङ्कभूपोऽजनि राजलोककिरीटकोटीविलसन्निदेशः ॥
यद्युद्धेऽभिमुखा हताः किल पुरा देवत्वमाप्ता द्विषः
श्रुत्वा वारिधरध्वनी[न्] घनपथे लोकान्तरस्था अपि ।

तद्युद्धोद्यमभूरिभैरवबृहद्भेरीरवाशङ्कया
कार्येष्वीप्सितसिद्धिमस्य नितरामाशीर्भिराशासत ॥
येनाखिलक्षितितलत्रिदशालयानां
कूटेषु हाटकमया घटिता विरेजुः ।
कुम्भाः स्वकीयजयघोषणसंप्रयुक्त-
स्तम्भा इवाभ्रचर[सं]स्तुतकीर्तिनैव ॥
येन श्रीमद्भीमनाथस्य चक्रे शार्क्कं धाम प्रस्थितायाः स्वकीर्तेः ।
हेम्नो भूम्ना पादविन्यासहेतोः प्रासादाग्र्यं व्योमनि श्रेणिकेव ॥
यस्य श्रीकालहस्त्यद्रिमहेन्द्राचलमध्यगाः ।
भूपाः पुण्यप्रवीणस्य किङ्करा गोङ्कभूपतेः ॥
तस्य त्रिलोकगणनीयगुणाभिरामा
रामाजनेषु रमणीयविशेषमूर्तिः ।
सर्वाम्बिका तनुमती वसुधेव साक्षा-
द्क्षीणपुण्यनिचया खलु धर्मपत्नी ॥
जातस्ताभ्यां परपुरजयी शूलपाणेरिवांशो
विद्वत्संघस्तुतशुभगुणो जन्मभूमिः कलानाम् ।
यन्नामैवाखिलरिपुकुलोत्सादकृन्मन्त्र उक्तो
दातार्थिभ्योऽर्थितगुरुतरं वीरराजेन्द्रचोडः ॥
येनाम्भोराशिभीमभ्रमितजलमिलद्ग्राहपाठीनसंघ-
प्रेङ्खत्कल्लोलमालाकलुषमनिमिषैः खातमादौ सरस्तत् ।
निःशेषं शोषयित्वावधि जलधिजलं कुम्भयोनिर्यथाद्यो(?)
भीमो भीतिं वितन्वन्द्रुतमितजगतां रावणो राघवेण ॥
यस्याविखण्डितविजृम्भितपुण्डरीक-
खण्डप्रभापटलपाण्डुतरेण नित्यम् ।
संछादिता वसुमती यशसा बभास
छत्रेण मौक्तिकमयेन विभूषितेव ॥

येनाराधनसाधनानि दधिरे भीमेश्वरस्यालये
सौवर्णान्यतिदीप्ररत्ननिकरैर्हेमप्रभा चार्पिता ।
यस्त्वक्षीणसुवर्णभारघटितं सद्रुक्मपीठस्थितं
कृत्वेन्द्रादिगणान्गुणैरतिययौ श्रीभीमनाथं मुदा ॥

कनत्कनकसंदोहकृतं मकरतोरणम् ।
योऽदाद्बालेन्दुचूडाय दाक्षारामनिवासिने ॥

विद्युल्लतेव जगतीतलसंचरिष्णु-
रानन्ददा शशिकलेव सतां नितान्तम् ।
अक्काम्बिकेति तरुणीजनरत्नभूता
जाया स तस्य जगतीपतिसत्तमस्य ॥

जातस्ताभ्यां शिवाभ्यामिव सकलजगद्रक्षणैकान्तदक्षैः
साक्षाद्देवः कुमारः सकलनृपकलाकोविदो गोङ्कभूपः ।
यद्वैरिक्षोणिपालाः क्षणमपि निखिले क्ष्मातले नाप्तवन्तः
पादन्यासावकाशं वियति विदधिरे धाम तद्योग्यरूपाः ॥

यमर्थिसार्थाभिमतार्थदं क्षितौ क्षीणारिभूपालमवेक्ष्य नूनम् ।
स्वस्थोऽभवत्कल्पकभूरुहश्चिरं राजेन्द्रचोडप्रियपुत्रमुच्चैः ॥

संजीवनीव सकलस्य जनस्य नित्यं
रक्षाविधानचतुराभवदस्य पत्नी ।
लोकेषु यच्चरितमेव वदन्ति सन्तः
शास्त्रं नियामकमशेषसतीजनस्य ॥

या पर्वतापरमहीनृपवंशदुग्ध-
रत्नाकरादुदभवज्जगतां भवाय ।
पद्मालयेव हरिपादसरोजसक्ता
जायाम्बिकानिखिलसंपदवाप्तिहेतुः ॥

आस्थानमण्डपमखण्डितभोगभोग्यं
स्तम्भैः स्फुरत्परिकरैर्हरिनीलकान्तैः ।

श्रीपीठनामनि पुरे वसतोऽकरोद्या
कुन्तीमनोरथपथास्तिकरस्य विष्णोः ॥
प्राकारगोपुरमनोहरमेतदीयं
निर्माय देवनिलयं कमलालयं या ।
सुस्थाप्य तत्सहितमच्युतमर्हणाभि-
राराधयन्त्यभिमतानि फलान्यवाप्नोत् ॥
श्रीसिंहगिर्यधिपतेः परमस्य पुंसो
भक्तार्तिकर्तनविधानगृहीतमूर्तेः ।
हेमाङ्गनाम निखिलश्रुतिसारवेद्यं
प्रत्यक्षमक्रियत चारु यया जनस्य ॥
भास्वत्स्फाटिकशैलशृङ्गरुचिषु प्रोद्यत्प्रभामण्डला
डिण्डीरद्युतिदेवधामशिखरेष्वास्थापिता भूरिशः ।
सौवर्णः कलधौतभूध्रशिखरासीनस्य भानोर्ध्रुवं
बभ्रुर्विभ्रममभ्रचारिविनुताः कुम्भा गुणाढ्या यया ॥
ताभ्यां श्रीपृथिवीश्वरः स्वयमिवाशेषस्थितेः कारणं
देवः श्रीपृथिवीश्वरोऽजनि जनप्रस्तूयमानोदयः ।
यस्मिन्राजनि रक्षति क्षितितलं क्षीणारिवर्गे जनो
व्युत्पत्तिं रिपुचोरवादिषु न च प्राप्नोति शब्देष्वपि ॥
यस्यातिनिर्मलतरेण परीतमेत-
द्ब्रह्माण्डमाशु यशसा नितरां विभाति ।
धूमाङ्कधौतकलधौतकरण्डभाण्ड-
मध्यप्रविष्टमिव विष्टपवल्लभस्य ॥
यं गन्धसिन्धुरसमं सततप्रवृत्त-
दानार्द्रदक्षिणकरं किल वीक्ष्य नूनम् ।
दिक्कुम्भिनो निखिलभूभरणैकदक्षं
व्रीडामवाप्य खलु पाण्डुरतां भजन्ते ॥

ग्रामा विद्वज्जनेभ्यो विविधफलभरानम्रकम्रेद्धसस्या-
स्तीर्णास्तूर्णं तटाकास्तटवनकुसुमामोदितार्णः प्रपूर्णाः ।
देशे देशेऽब्धितुल्याः पृथुतरयशसा खानिता येन शश्व-
द्दत्ताश्चैवार्थसंघाः प्रियवचनसमं सूरिसंघेभ्य एव ॥
यात्राप्रारम्भशुम्भत्पटहपटुतरध्वानमाकर्ण्य तूर्णं
हित्वा देशां दिगन्तान्भयचकितदृशो व्याप्य यस्यारिसंघाः ।
किंस्वित्संवर्तमेघध्वनिरुत विकटप्रस्फुटत्काण्डघोषः
किं वा कल्पान्तवायुक्षुभितमिति मुहुश्चिन्तयन्तो भ्रमन्ति ॥
धर्मे धर्मजसंनिभेन जलधिस्तुल्योऽपि गाम्भीर्यतः
सन्मर्यादतया महत्त्वगुणतो रत्नाकरत्वादपि ।
क्षुभ्यत्पङ्ककलङ्ककल्मषतनुः क्षारस्वभावस्तुलां
नाम्नोद्धासुरमूर्तिनाखिलजगत्सेव्येन येनान्वहम् ॥
नित्यालंकृतसत्पथो बुधजनप्रार्थ्योदयोऽभीष्टदो
भक्तानामतुलप्रतापमहिमव्याप्ताखिलक्ष्मातलः ।
विश्वं लोकमनश्वरैर्निजकरैः पद्माकरं नन्दय-
ञ्श्रीपृथ्वीश्वरभूपतिर्विजयते भूमण्डले सूर्यवत् ॥
माता तस्य महीयसः सुरतरुच्छायेव संसेविना-
मिष्टार्थां ददती सती भगवते वेदान्तविद्यात्मने ।
श्रीधाम्ने नवखण्डवाडविदितं प्रोल्नाटिदेशे मुदा
विश्वस्य क्षितिमण्डलस्य तिलकं शालेयसंशोभितम् ॥
नागव्योमेन्दुरूपप्रमितशकशरन्मेषसंक्रान्तिकाले
पुण्ये पुण्यप्रवीणा विविधफलकुलालंकृतं ग्रामवर्यम् ।
श्रीपीठस्थाय शश्वच्छ्रुतिनिकरशिरोवर्तिने माधवाय
प्रादाद्वोङ्कक्षितीशप्रियतरमहिषी विष्णवे जायमाम्बा ॥

शकवर्षंबुलु ११०८ गुनेण्टि मेषसंक्रान्तिनिमित्तमुन श्रीपीठापुरमुन श्रीकुन्तीमाधवदेवरकुं प्रोलु नाटिलोनि नवखण्डवाड अनियेडि ऊरु गृहक्षेत्रारामसहितमुगानखण्डमुन्नु श्रीमन्महामण्डलेश्वरवेलनाटिकुलोत्तुङ्ग-

राजेन्द्रचोडयराजुल कोडकुलु श्रीमन्महामण्डलेश्वरकुलोत्तुङ्गमन्मगोङ्करा-जुल महादेवुलु जायमदेवुलु हविर्बल्यर्चनार्थमुन्नित्यनैमित्तिकमासोत्सवसं-वत्सरोत्सवार्थमुन्नु गीतनृत्तवाद्यादिविविधभोगार्थमुङ्गानाचन्द्रार्कमुगानिच्चि-रि। तत्र स राजराजपरमेश्वरो राजपुरंदरः परममाहेश्वरः श्रीगोङ्कभूप-प्रियतनयः समधिगतसकलशास्त्रनयः पृथ्वीश्वरदेवमहीपालः खण्डितवि-रोधिमण्डलः प्रोलुनाटिविषयवासिनो राष्ट्रकूटप्रमुखान्सकुटुम्बिनः सर्वान्स-माहूय मन्त्रिपुरोहितसेनापतियुवराजदौवारिकादिसमक्षमित्थमाज्ञापयति— अस्मन्मात्रा जायममहादेव्या प्रोलुनाण्टिविषये नवखण्डवाडनामा ग्रामो गृ-हक्षेत्रारामसहितो खण्डः श्रीपिठापुरवासिने भगवते श्रीकुन्तीमाधवदेवाय हविर्बल्यर्चनार्थं नित्यनैमित्तिकमासोत्सवसंवत्सरोत्सवाद्यर्थं गीतनृत्त-वाद्यादिविविधभोगार्थं च दत्त इति विदितमस्तु वः । अस्य ग्रामस्य सीमानः पूर्वतः पेरावुगड्डु सीमा। आग्नेयत इन्दुरावसु सीमा । दक्षिणतः सूरे गुण्डगड्डु सीमा। नैर्ऋततः डोङ्किसूडियालु सीमा । पश्चिमतः कोम्मिनायकुचेडवु तूर्पूगड्डु सीमा। वायव्यतः वङ्कुविगरुवु सीमा । उत्तरतः पुट्टलत्रोव एङ्गड्डु सीमा । ऐशतः सब्बालरावि सीमा । ई धर्मुवुनकुनेब्बरु विघ्नमु सेसिरेनि वारु पञ्चमहापातकमु सेसिन पापमुनं बोदुरु गं(ग)कडत वेयि गोवुलनुं वेवुरु ब्राह्मलनु बन्धिच्चिन पाप-मुनं बोदुरु।

बहुभिर्वसुधा दत्ता बहुभिश्चानुपालिता।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः॥

इति व्यासवचनाच्चायं धर्मः परिपालनीयः।

शत्रुणापि कृतो धर्मः पालनीयं प्रयत्नतः।
शत्रुरेव हि तच्छत्रुर्धर्मशत्रुर्न कस्यचित्॥

तस्मादयं धर्मः सर्वैः परिपालनीयः।

श्रीपृथ्वीश्वरभूपालनिदेशवशवर्तिना ।
अय्यपिल्लार्यवर्येण कृता शासनपद्धतिः ॥

श्रीपिठापुरमुन कण्टाचारलिखितम् ॥

(एपिग्राफिया इण्डिका—४ । ३९-४७)

---

(१३०)

श्रीशीलादित्यमहाराजनिर्मापितवापीप्रशस्तिपत्रम् ।

ओं स्वस्ति । विजयस्कन्धावारात् खेटकवासकात् प्रसभप्रणतामित्राणां मैत्रकाणामतुलबलसंपन्नमण्डलाभोगसंसक्तप्रहारशतलब्धप्रतापात्प्रतापोपनतदानमानार्जवोपार्जितानुरागादनुरक्तमौलभृतः श्रेणीबलावाप्तराज्यश्रियः परममाहेश्वरश्रीभटार्कादव्यवच्छिन्नराजवंशान्मातापितृचरणारविन्दप्रणतिप्रविधौताशेषकल्मषः शैशवात्प्रभृति खड्गद्वितीयबाहुरेव समदपरगजघटास्फोटनप्रकाशितसत्त्वनिकषस्तत्प्रभावप्रणतारातिचूडारत्नप्रभासंसक्तपादनखरश्मिसंहतिः सकलस्मृतिप्रणीतमार्गसम्यक्परिपालनप्रजाहृदयरञ्जनान्वर्थराजशब्दो रूपकान्तिस्थैर्यगाम्भीर्यबुद्धिसंपद्भिः स्मरशशाङ्काद्रिराजोदधित्रिदशगुरुधनेशानतिशयानः शरणागताभयप्रदानपरतया तृणवदपास्ताशेषस्वकार्यफलः प्रार्थनाधिकार्थप्रदानानन्दितविद्वत्सुहृत्प्रणयिहृदयः पादचारीव सकलभुवनमण्डलाभोगप्रमोदः परममाहेश्वरः **श्रीगुहसेन**स्तस्य सुतस्तत्पादनखमयूखसंतानविसृतजाह्नवीजलौघप्रक्षालिताशेषकल्मषः प्रणयिशतसहस्रोपजी-

---

१. अस्याः प्रशस्तेराधारभूत संपुटितं ताम्रपत्र काठियावाडदेशे गोहिलवाडप्रान्ते महुवापरिगणे लुसंडीग्रामे एकस्मिन्गृहे गोबन्धनाय कीलकखननसमये एकेन ब्राह्मणेन लब्धमासीत्. एतच्च ताम्रपत्र गुर्जरभाषायां संक्षिप्तभूमिकां रचयित्वा Mr. Vajeshankar G. Oza महाशयेन Professor Bühler महाशयपार्श्वे प्रेषितमासीत्. अनेन च महाशयेन Th. von Schtscherbatskoi, Ph. D. एतन्महाशयपार्श्वे प्रेषितमासीत्. अनुपदोक्तमहाशयेन Mr. Vajeshankar G. Oza महाशयेन च संशोध्य व्याख्याय च प्रकाशितम्. समयश्चास्य गुप्तसंवत् ३५० (A. D. 669-70).

व्यमानसंपद्रूपलोभादिवाश्रितः सरभसमाभिगामिकैर्गुणैः सहजशक्तिशि-
क्षाविशेषविस्मापिताखिलधनुर्धरः प्रथमनरपतिसमतिसृष्टानामनुपालयिता
धर्मदायानामपाकर्ता प्रजोपघातकारिणामुपप्लवानां दर्शयिता श्रीसरस्वत्यो-
रेकाधिवासस्य संहताराातिपक्षलक्ष्मीपरिभोगदक्षविक्रमो विक्रमोपसंप्राप्त-
विमलपार्थिवश्रीः परममाहेश्वरः **श्रीधरसेन**स्तस्य सुतस्तत्पादानुध्यातः
सकलजगदानन्दनात्यद्भुतमण्डलाग्रद्युतिभासुरतरांसपीठोदूढगुरुमनोरथम-
हाभारः सर्वविद्यापरापरविभागाधिगमविमलमतिरपि सर्वतः सुभाषितल-
वेनापि सुखोपपादनीयपरितोषः समग्रलोकागाधगाम्भीर्यहृदयोऽपि सुच-
रितातिशयसुव्यक्तपरमकल्याणस्वभावः खिलीभूतकृतयुगनृपतिपथविशोध-
नाधिगतोदग्रकीर्तिः धर्मानुपरोधोज्ज्वलतरीकृतार्थसुखसंपदुपसेवानिरूढ-
धर्मादित्यद्वितीयनामा परममाहेश्वरः **श्रीशीलादित्य**स्तस्यानुजस्तत्पादा-
नुध्यातः स्वयमुपेन्द्रगुरुणेव गुरुणात्यादरवता समभिलषणीयामपि राज-
लक्ष्मीं स्वधासक्तां परमभद्र इव धुर्यस्तदाज्ञासंपादनैकपरतयैवोद्वहन्
खेदसुखरतिभ्यामनायासितसत्त्वसंपत्तिः प्रभावसंपद्वशीकृतनृपतिशतशिरो-
रत्नच्छायोपगूढपादपीठोऽपि परावज्ञाभिमानरसानालिङ्गितमनोवृत्तिः प्रणति-
मेकां परित्यज्य प्रख्यातपौरुषाभिमानैरप्यरातिभिरनासादितप्रतिक्रियोपायः
कृतनिखिलभुवनामोदविमलगुणसंहतिः प्रसभविघटितसकलकलिविलसि-
तगतिः नीचजनाधिरोहिभिरशेषैर्दोषैरनामृष्टात्युन्नतहृदयः प्रख्यातपौरुषास्त्र-
कौशलातिशयगणतिथविपक्षक्षितिपतिलक्ष्मीस्वयंग्राहकप्रकाशितप्रवीरपुरुष-
प्रथमसंख्याधिगमः परममाहेश्वरः **श्रीखरग्रह**स्तस्य तनयस्तत्पादानुध्यातः
सकलविद्याधिगमविहितनिखिलविद्वज्जनमनःपरितोषातिशयः सत्त्वसं-
पदा त्यागौदार्येण च विगतानुसंधानाशमाहितारातिपक्षमनोरथाक्षभङ्गः
सम्यगुपलक्षितानेकशास्त्रकलालोकचरितगह्वरविभागोऽपि परमभद्रप्रकृति-
रकृत्रिमप्रश्रयविनयशोभाविभूषणः समरशतजयपताकाहरणप्रत्ययोदग्रबा-
हुदण्डविलङ्घितनिखिलप्रतिपक्षदर्पोदयः स्वधनुःप्रभावपरिभूतास्त्रकौश-
लाभिमानसकलनृपतिमण्डलाभिनन्दितशासनः परममाहेश्वरः **श्रीधरसेन**-
स्तस्यानुजस्तत्पादानुध्यातः सच्चरितातिशयितसकलपूर्वनरपतिरतिदुःसाध्या-

नामपि प्रसाधयिता विषयाणां मूर्तिमानिव पुरुषकारः परिवृद्धगुणानुराग-निर्भरचित्तवृत्तिभिर्मनुरिव स्वयमभ्युपपन्नः प्रकृतिभिरधिगतकलाकलापः कान्तिमान्निर्वृतिहेतुरकलङ्कः कुमुदनाथः प्राज्यप्रतापस्थगितदिगन्तराल-प्रध्वंसितध्वान्तराशिः सततोदितः सविता प्रकृतिभ्यः परं प्रत्ययमर्थवन्त-मतिबहुतिथप्रयोजनानुबन्धमागमपरिपूर्णं विदधानः संधिविग्रहसमासनि-श्चयनिपुणः स्थानेऽनुरूपमादेशं ददद्गुणवृद्धिविधानजनितसंस्कारः साधूनां राज्यशालातुरीयतन्त्रयोरुभयोरपि निष्णातः प्रकृष्टविक्रमोऽपि करुणामृदुहृ-दयः श्रुतवानप्यगर्वितः कान्तोऽपि प्रशमी स्थिरसौहृदोऽपि निरसिता दोषवतामुदयसमयसमुपजनितजनतानुरागपरिपिहितभुवनसमर्थितप्रथित-बालादित्यद्वितीयनामा परममाहेश्वरः **श्रीध्रुवसेन**स्तस्य सुतस्तत्पादपद्म-प्रणामधरणिकषणजनितकिणलाञ्छनललाटचन्द्रशकलः शिशुभाव एव श्रवणनिहितमौक्तिकालंकारविभ्रमामलश्रुतिविशेषः प्रदानसलिलक्षालिताग्र-हस्तारविन्दः कन्याया इव मृदुकरग्रहणादमन्दीकृतानन्दविधिर्वसुंधरायाः कार्मुके धनुर्वेद इव संभाविताशेषलक्ष्यकलापः प्रणतसामन्तमण्डलो-त्तमाङ्गधृतचूडारत्नायमानशासनः परममाहेश्वरः परमभट्टारकमहाराजाधि-राजपरमेश्वरचक्रवर्ती **श्रीधरसेन**स्तत्पितामहभ्रातृ**श्रीशीलादित्य**स्य शा-र्ङ्गपाणेरिवाङ्गजन्मनो भक्तिबन्धुरावयवकल्पितप्रणतेरतिधवलया दूरं तत्पा-दारविन्दप्रवृत्तया नखमणिरुचा मन्दाकिन्येव नित्यममलितोत्तमाङ्गस्या-गस्त्यस्येव राजर्षेर्दाक्षिण्यमातन्वानस्य प्रबलधवलिम्ना यशसां वलयेन मण्डमण्डितककुभा नभसि यामिनीपतेर्विडम्बिताखण्डपरिवेषमण्डलस्य पयोदश्यामशिखरचूचुकरुचिरसह्यविन्ध्यस्तनयुगायाः क्षितेः पत्युः **श्रीडे-रभटस्या**ङ्गजः क्षितिपसंहतेरनुरागिण्याः शुचियशोंशुकभृतः स्वयंवरमा-लामिव राज्यश्रियमर्पयन्त्याः कृतपरिग्रहः शौर्यमप्रतिहतव्यापारमानमित-प्रचण्डरिपुमण्डलं मण्डलाग्रमिवालम्बमानः शरदि प्रसभमाकृष्टशिलीमु-खबाणासनापादितप्रसाधनानां परभुवां विधिवदाचरितकरग्रहणः पूर्वमेव विविधवर्णोज्ज्वलेन श्रुतातिशयेनोद्भासितश्रवणः पुनः पुनरुक्तेनेव रत्ना-

लंकारेणालंकृतश्रोत्रः परिस्फुरत्कटकविकटकीटपक्षरत्नकिरणमविच्छिन्नप्रदानसलिलनिवहावसेकविलकसन्नवशैवलाङ्कुरमिवाग्रपाणिमुद्वहन् धृतविशालरत्नावलयजलधिवेलातटायमानभुजपरिष्वक्तविश्वंभरः परममाहेश्वरः **श्रीध्रुवसेन**स्तस्याग्रजोऽपरमहीपतिस्पर्शदोषनाशधियेव लक्ष्म्या स्वयमतिस्पष्टचेष्टमाश्लिष्टाङ्गयष्टिरतिरुचिरतरचरितगरिमपरिकलितसकलनरपतिरतिप्रकृष्टानुरागरसरभसवशीकृतप्रणतसमस्तसामन्तचक्रचूडामणिमयूखखचितचरणकमलयुगलः प्रोद्दामोदारदोर्दण्डदलितद्विषद्वर्गदर्पः प्रसर्पत्पटीयःप्रतापप्लोषिताशेषशत्रुवंशः प्रणयिपक्षनिक्षिप्तलक्ष्मीकः प्रेरितगदोत्क्षिप्तसुदर्शनचक्रः परिहृतबालक्रीडोऽनधःकृतद्विजातिरेकविक्रमप्रसाधितधरित्रीतलोऽनङ्गीकृतजलशय्योऽपूर्वपुरुषोत्तमः साक्षाद्धर्म इव सम्यग्व्यवस्थापितवर्णाश्रमाचारः पूर्वैरप्युर्वीपतिभिस्तृष्णालवलुब्धैर्यान्यपहृतानि देवब्रह्मदेयानि तेषामप्यतिसरलमनःप्रसरमुत्संकलानानुमोदनाभ्यां परिमुदितत्रिभुवनाभिनन्दितोच्छ्रितोत्कृष्टधवलधर्मध्वजप्रकाशितनिजवंशो देवद्विजगुरुं प्रति यथार्हमनवरतप्रवर्तितमहोद्रङ्गादिदानव्यसनानुजातसंतोषोपात्तोदारकीर्तिपङ्क्तिपरम्परादन्तुरितनिखिलदिक्चक्रवालः स्पष्टमेव यथार्थधर्मादित्यापरनामा परममाहेश्वरः **श्रीखरग्रह**स्तस्यानुजन्मनः कुमुदखण्डश्रीविकासिन्या कलावतश्चन्द्रिकयेव कीर्त्या धवलितसकलदिङ्मण्डलस्य खण्डितागुरुविलेपनपिण्डश्यामलविन्ध्यशैलविपुलपयोधराभोगायाः क्षोण्याः पत्युः **श्रीशीलादित्यस्य** सूनुर्नवप्रालेयकिरण इव प्रतिदिनसंवर्धमानकलाचक्रवालः केसरीन्द्रशिशुरिव राजलक्ष्मीमचलवनस्थलीमिवालंकुर्वाणः शिखण्डिकेतन इव रुचिमच्चूडामण्डनः प्रचण्डशक्तिप्रभावश्च शरदागम इव प्रतापवानुल्लसत्पद्मः संयुगे विदलयन्नम्भोधरानिव परगजानुदय एव तपनबालातप इव संग्रामे मुष्णन्नभिमुखानामायूंषि द्विषतां परममाहेश्वरः **श्रीशीलादित्यः** कुशली सर्वानेव समाज्ञापयति—अस्तु वः संविदितम् । यथा मया मातापित्रोः पुण्याप्यायनाय द्वीपविनिर्गततच्चातुर्विद्यसामान्यडौण्डव्यसगोत्रवाजसनेयिसब्रह्मचारिब्राह्मणधनपतिपुत्रब्राह्मणभट्टीश्वराभ्यां सोदरभ्रा-

तृभ्यां सुराष्ट्रेषु मधुमतीद्वारे देसेनकग्रामे पूर्वसीम्नि पञ्चपञ्चाशद्भूपादावर्तपरिसरा वापी। यस्या आघाटनानि—पूर्वतः पिञ्छकूपिकावहः, दक्षिणतः ब्राह्मणबावप्रत्ययक्षेत्रं मल्लतटाकश्च, अपरतः ग्रामनिपानकूपकः, उत्तरतः मूलवर्मपाटकग्रामसीमा, तथा पूर्वदक्षिणसीम्नि कविट्टिकाक्षेत्रखण्डं सप्ततिभूपादावर्तपरिमाणम्, यस्य पूर्वतः विशालपाटकग्रामसीमा, दक्षिणतः शिवत्रात इज्जतग्रामसीमा, अपरतः विशालपाटकग्रामसीमा, उत्तरतः विशालपाटकग्रामसीमा, तथा एतत्सीम्नि द्वितीयक्षेत्रखण्डमुच्चासंज्ञितनवतिभूपादावर्तपरिमाणम्, यस्य पूर्वतः विशालपाटकग्रामसीमा, दक्षिणतः विशालपाटकग्रामसीमा, अपरतः पिञ्छकूपिकावहः, उत्तरतः थेरकसत्कौटुम्बक्षेत्रम्, तथा पूर्वसीम्नि तृतीयखण्डं विंशतिभूपादावर्तपरिमाणम्, यस्य पूर्वतः माणइज्जिका नदी, दक्षिणतः बप्पकप्रकृष्टक्षेत्रम्, अपरतः ब्राह्मणस्कन्दसत्कब्रह्मदेयक्षेत्रम्, उत्तरतः ईश्वरप्रत्यक्षेत्रम्, एवमिदमाघाटनविशुद्धं वापीसमन्वितं क्षेत्रखण्डत्रयं सोद्रङ्गं सोपरिकरं सभूतवातप्रत्यायं सधान्यहिरण्यादेयं सदशापराधं सोत्पद्यमानविष्टिकसर्वराजकीयानामहस्तप्रक्षेपणीयं पूर्वप्रत्तदेवब्रह्मदेयरहितं भूमिच्छिद्रन्यायेनाचन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनं पुत्रपौत्रान्वयभोग्यमुदकातिसर्गेण धर्मदायो निसृष्टः । यतस्तयोः समुचितया ब्रह्मदेयस्थित्या भुञ्जतोः कर्षतोः कर्षयतोः प्रदिशतोर्वा न कैश्चिद्व्यासेधे वर्तितव्यम्। आगामिभद्रनृपतिभिरप्यस्मद्वंशजैरन्यैर्वा अनित्यान्यैश्वर्याण्यस्थिरं मानुषं सामान्यं च भूमिदानफलमवगच्छद्भिरयमस्मद्दायोऽनुमन्तव्यः परिपालयितव्यश्चेति । उक्तं च—

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य सदा फलम् ॥
यानीह दारिद्र्यभयान्नरेन्द्रैर्धनानि धर्मायतनीकृतानि ।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
षष्टिं वर्षसहस्राणां स्वर्गे तिष्ठति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥

दूतकोऽत्र राजपुत्रध्रुवसेनः।

लिखितमिदं संधिविग्रहाधिकृतदिविरपतिश्रीस्कन्दभटपुत्रदिविरपति-श्रीमदनहिलेनेति। सं. ३००।५० फाल्गुन व. ३ स्वहस्तो मम।

(एपिग्राफिया इण्डिका—४।७६-८१)

---

(१३१)

मल्लिदेवमन्मसत्यमहाराजयोः प्रशस्तिपत्रम्[१]।

श्रीभर्तुर्नाभिगम्भीरसरःसरसिजादभूत्।
पद्मभूर्भूतलोकानामेकस्मादुद्भवो यतः॥
मानसस्तस्य पुत्रोऽत्रिरत्रेरमृतदीधितिः।
सोमश्चूडामणिः सोमवंशकर्ता ततो बुधः॥
ततः पुरूरवा नाम चक्रवर्ती सुविक्रमः।
तस्मादायुरभूत्तस्मान्नहुषोऽथ पुरुस्ततः॥

ततो जनमेजयस्ततः प्राचीशस्तस्मात्संयातिः सार्वभौमस्ततो महाभीमः। इत्थमनेकनरपतिषु गतेषु पाण्डुर्नाम नरपतिरुद्बभूव। पुत्रास्तस्य धर्मभीमार्जुननकुलसहदेवाः पञ्चेन्द्रियवत्पञ्च स्युर्विषयग्राहिणः। तत्र—

येनादाहि विजित्य खाण्डवमठो गाण्डीविना वज्रिणं
युद्धे पाशुपतास्त्रमन्धकरिपोश्चालावि(भि)दैत्यान्बहून्।
इन्द्रार्धासनमध्यशायि जयिना यत्कालकेयादिका-
ञ्जित्वा स्वैरमकारि वंशविपिनच्छेदः कुरूणां विभोः॥

ततोऽर्जुनादभिमन्युस्ततः परीक्षित्ततो जनमेजयस्ततः क्षेमकस्ततो नरवाहनस्ततः शतानीकस्तत उदयनस्तत्प्रतिवि(भृ)तिष्वविच्छिन्नसंतानेष्वयोध्यासिंहासनासीनेष्वेकोनषष्टिचक्रिवर्तिषु गतेषु तद्वंश्यो **विजयादित्यो** नाम राजा विजिगीषया दक्षिणापथं गत्वा त्रिलोचनपल्लवमधिक्षिप्य दै-

---

१. इयं च प्रशस्तिः पीठापुरग्रामे कुन्तीमाधवमन्दिरस्थकीर्तिस्तम्भे दक्षिणभागे प्रारब्धा पूर्वभागे समाप्ता चोपलभ्यते सेय E. Hultzsch, Ph. D. महाशयेन प्रकाशिता. (1195-96 A. D.)

वदुरीहया लोकान्तरमगमत्। तस्मिन्काले महादेव्यन्तर्वत्नी पुरोहितेन सार्धं मुडिवेमुनामाग्रहारमुपगम्य तद्वास्तव्येन **विष्णुभट्ट**सोमयाजिना दुहितृनिर्विशेषमभिरक्षिता सती नन्दनं **विष्णुवर्धन**मसूत। तस्य कुमारस्य मानव्यसगोत्रहारितीपुत्रद्विपक्षक्रमोचितानि कर्माणि कारयित्वा तमवर्धयत्। स च मात्रा विदितवृत्तान्तः सन्निर्गत्य चालुक्यगिरौ नन्दां भगवतीं गौरीमाराध्य कुमारनारायणगणांश्च संतर्प्य श्वेतातपत्रैकशङ्खपञ्चमहाशब्दपालिकेतनप्रतिडक्कवराहलाञ्छनपिञ्छचकुन्तसिंहासनमकरतोरणकनकदण्डगङ्गायमुनादीनि स्वकुलक्रमागतानि निक्षिप्तानीव साम्राज्यचिह्नानि समादाय कडम्बगङ्गादिभूपान्निर्जित्य सेतुनर्मदामध्यं सार्धसप्तलक्षं दक्षिणापथं पालयामास। तस्य पल्लवान्वयजातमहादेव्यां **विजयादित्यः** सुतोऽभूत्। ततः **पुलकेशी** ततः **कीर्तिवर्मा** ततः **सत्याश्रयविष्णुवर्धनौ** तयोर्ज्येष्ठः कुन्तलराजलक्ष्मीमग्रहीत्। इतरो वेङ्गीभुवं सोऽयम्। स्वस्ति श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारितीपुत्राणां कौशिकीवरप्रसादलब्धराज्यानां मातृगणपरिपालितानां स्वामिमहासेनपादानुध्यातानां भगवन्नारायणप्रसादासादितवरवराहलाञ्छनक्षणवशीकृतारातिमण्डलानामश्वमेधावभृथस्नानपवित्रीकृतवपुषां चालुक्यानां कुलमलंकरिष्णुः **सत्याश्रयवल्लभेन्द्रस्य भ्राता** कुब्जविष्णुवर्धनोऽष्टादश वर्षाणि वेङ्गीदेशमपालयत्। तत्सुतो **जयसिंहवल्लभ**स्त्रयस्त्रिंशतं तदनुज **इन्द्रराजः** सप्त दिनानि तत्सुतो **विष्णुवर्धनो** नव वर्षाणि तत्सूनुर्**मङ्गियुवराजः** पञ्चविंशतिम् एवमविच्छिन्नचालुक्यक्षितिपालपरम्परया।

बभूव श्रीनिधी राजा राजराजमहीपतिः।
स्वनीत्या पालयत्युर्वीं स रत्नाकरमेखलाम्॥

अपि च।

कुले यदूनामजनिष्ट राजा हरिप्रभो हैहयनामधेयः।
ततः कृतार्थीकृतबन्धुलोकः कृती कृतज्ञः कृतवीर्य आसीत्॥
रोचिष्णुरथचक्रेण क्रान्तविश्वो यथा रविः।
स्फुरत्करसहस्रेण कार्तवीर्यस्ततोऽजनि॥

जीवत्युदारे सितकीर्तिमात्रकलेवरे भूयसि भूपवर्गे।
ततस्ततोत्तुङ्गजगद्विभूतिरभीरभून्मुम्मडिभीमभूपः ॥
वल्लीव तन्वी तस्यासीच्छद्विदेवी वराङ्गना।
तयोरग्रसुतो वेन्नभूपालोऽस्यानुजः सुखी ॥
श्रीमान्राजपङ्कक्ष्मानाथः कोनमण्डलाधीश्वः।
उपयेमे यः कुलजे लक्ष्मीतोण्डाम्बिके देव्यौ ॥
लक्ष्मीमुम्मडिभीमेशं राजेन्द्रचोडभूभुजम्।
असूत तोण्डमाम्बा च सुतं सत्यमहीपतिम् ॥

सोऽयं **राजेन्द्रचूडभूपतिः** स्वपितामहेन श्रीमद्राजाधिराजराजेन्द्रचोडप्रसादाल्लब्धानि सिंहासनप्रतिढक्कापिञ्छकुन्तैकशङ्खाद्यखिलसाम्राज्यचिह्नानि समादाय वेङ्गीभुवो भर्ताभवत्।

दग्ध्वा यः प्रबलप्रतापवडवासप्तार्चिषा विद्विषः
प्राप्तो विक्रमरुद्रतां निजकरस्पष्टीकृताशेषभूः।
लोकस्वस्वसमस्तवृत्तिरगमद्यो **हैहयादित्यतां**
यातो यः खलु गण्डवेण्डडुवतां प्रोत्खण्डितारिश्रिया ॥
तस्याभवत्कुलस्त्रीणां विष्णोर्लक्ष्मीरिव प्रिया।
मैलारदेवी महिषी योषिल्लोकविभूषणम् ॥
अस्याः सुतानां पञ्चानां ज्वलत्पञ्चाग्नितेजसाम्।
अग्रजो **वेतभूपालो मल्लिदेवनृपो**ऽनुजः ॥
वेतभूपालकाज्जातौ गङ्गाश्रीबिम्बमावयोः।
सितकीर्ती सुतौ **मन्मचोडसूर्यक्षितीश्वरौ** ॥
निजकार्मुकनिर्मुक्तबाणनिर्मूलितद्विषौ।
सौभ्रात्रभुजवीर्याभ्यामुभौ राघवलक्ष्मणौ ॥
नृपकुलतिलको यः **कोनराजेन्द्रचोडः**
कृतसकलसुकृत्यो गण्डवेण्डडुवनाम्ना।
द्विभुजमिह सह प्राकारकं कारयित्वा
शिवमलमत शैलं मण्डपं भीमनाथे ॥

तस्याग्रावरजन्मानौ जगद्विदितविक्रमौ ।
श्रीमन्मुम्मडिभीमेशसत्याश्रयमहीपती ॥
विभज्येमां भुवं भूयः पालयामासतुः स्वयम् ।
निजप्रतापदग्धारिमण्डलाधीशमण्डलौ ॥
तयोर्मुम्मडिभीमेशाल्लोकभूपालकोऽजनि ।
लोकालोकान्तरालानि शोभयन्निजतेजसा ॥
सत्येशाद्बलिनौ जातौ बलकृष्णसमौ नृपौ ।
श्रीमद्राजपण्डुश्रीकोनभीमक्षितीश्वरौ ॥
जातो राजपण्डोश्च पार्वतीवल्लभाद्भुवः ।
भर्ता श्रीवल्लभाधीशः क्षालयन्कलिकल्मषम् ॥
अनन्तरं पितुः श्रीमान्निजसिंहासनस्थितः ।
सोऽयं **लोकमहीपालः** पालयामास मेदिनीम् ॥
तथा **श्रीभीमभूपालः** पितुः सत्यमहीपतेः ।
राज्यलक्ष्मीं भुवा सार्धं दध्रे साक्षादिवाच्युतः ॥

धीरप्रद्वेषियोषिद्गणविरहजलापारधारास्त्यजन्ती
स्वज्योतिर्जालदग्विभ्रमविहितमहामोहमग्नांस्तदीशान् ।
आलिङ्ग्यालिङ्ग्य कण्ठेष्वथ तदसुसमं सर्ववित्तं हरन्ती
भाति प्रौढाङ्गनेव स्वकरदृढगृहीतापि यत्खड्गवल्ली ॥

तयोरनन्तरं क्षोणीमक्षतं परिरक्षतः ।
मल्लिदेवमहीपालवल्लभे(वे)शविशांपती ॥

यः प्रौढक्षितिपालमौलिमुकुटालंकारसिंहासनः
प्रोद्वृत्तारिपुरापरत्रिपुरहा भूधूर्धरः श्रीधरः ।
यश्चाशेषकलाकलापविभवः क्ष्माभारतीवल्लभः
संपद्भोगपुरंदरः क्षितिभृतां **श्रीमल्लिदेवाधिपः** ॥

श्रीवल्लभमहीपाल उण्डिकामनृपात्मजाम् ।
उपयेमेऽग्रमहिषीमचमाम्बेति विश्रुताम् ॥

तस्यामजनयत्पुत्रौ वंशवार्धिसुधाकरौ।
मन्मसत्यमहीपालपण्डुनामक्षितीश्वरौ ॥

अपि च।

स्वश्रीबाहुलताधृतासिलतिकामात्रैकमित्रो युधि
श्रीहस्तस्थितवारिराशिरशनालीलाब्जराज्यश्रियाम्।
सत्यो नित्यरतो मतिप्रणिहितप्रत्यग्रनीतिः श्रुति-
स्मृत्युत्पादितधर्मकर्मनिरतानुष्ठाननिष्ठापरः ॥

चतुर्दश समाः श्रीमत्पुरुविक्रमचक्रिणि।
वल्लभक्षोणिपाले च राज्यं कृत्वा दिवं गते ॥
ततस्तदात्मजः **श्रीमान्मन्मसत्यमहीपतिः**।
पितुः सिंहासनारूढः प्रौढारिवडवानलः ॥
अर्थिसंदोहमन्दारः कामिनीमकरध्वजः।
प्रतिक्षत्रियनक्षत्रप्रभाविभ्रमभानुमान् ॥
अक्षीणगुणमाणिक्यधीगभीरमहार्णवः।
ब्रह्माण्डमण्डनाखण्डकीर्तिधामसुधाकरः ॥
समस्तभुवनाधारधीरताकाञ्चनाचलः।
अनन्तकान्तिसंतानलक्ष्मीलक्ष्मीनिकेतनः ॥

सोऽयं **मल्लिदेव**क्षितिपतिर्यश्चैष वल्लभेन्द्रस्य तनयः **मन्मसत्येश्वरः**, उभौ सह संभूय गुद्दवादिविषयराष्ट्रकूटप्रमुखान्कुटुम्बिनः सर्वान्समाहूये-त्थमाज्ञापयतः। विदितमस्तु श्रीगुद्दवादिविषये ओदियूरुनामग्रामोऽस्माभिः श्रीपीठापुरीनिवासिने श्रीकुन्तीमाधवदेवाय सर्वकरपरिहारेण दत्त इति।

अपि च।

गाढारूढो निरूढोन्नतिधनधनितप्रौढविद्वेषिसाल-
स्कन्धास्कन्धान्तराणि स्फुरदसुलतिकाजिह्वया विद्धमृद्धम्।
पायं पायं तदीयात्यलघुलसदसुस्पर्शनं शोचते य-
द्बाहुर्भोगेन्द्रलीलः प्रधनभुवि कुलोत्तुङ्गपृथ्वीश्वरस्य ॥

मातां या जायमाम्बा सकलकुलसतीसत्तमोत्तुङ्गकीर्ति-
मूर्तीभूता गरुत्मद्ध्वजपदजलजद्वन्द्वसद्राजहंसी।
या श्रीमन्मन्मगोङ्कक्षितिपवरविभोर्धर्मपत्नी तयोच्चैः
स्वस्याः सद्भक्तिसाक्षीकृतविमलशिला मन्दिरालंकृतायाः॥

शकवर्षंवुलु गुनेंदि मेषसंक्रान्तिनिमित्तमुन श्रीपिठापुरमुन श्रीकुन्तीमाधवदेवरकुगुद्द्वादिलीनि ओदियूरनियेडि ऊरु गृहक्षेत्रारामसहितमु गलानखण्डमुनु श्रीमन्महामण्डलेश्वरकोनमल्लिदेवराजुनु वल्लभराजु कोड्कुमन्मसत्ति राजुनु हविर्वल्लचर्चनार्थमु नित्यनैमित्तिकमासोत्सवसंवत्सरोत्सवार्थमुनु गीतनृत्यवाद्यादिविविधभोगार्थमुंगानिच्चिरि अस्य ग्रामस्य सीमानः पूर्वतः वलेंगुएगुदयसीमा। आग्नेयतः वेलेगुनएनिक अलमुन भोडतातकालिय सीमा। दक्षिणतः श्रीपादमुल्लुपल्लि सीरिपुरमुन मय्यनिकुट्ट वेमुगुण्डय सीमा। कोल्कुरु कु नल्लंजेवु कोम्मुन गुण्डय पट्टि वच्चि। नैर्ऋततः एनुंगुदल कोप्पल्लि पोलसुन मय्यनकुट्टन पुल्लिगुट्टय सीमा। पश्चिमतः कोप्पल्लि तुर्पुन कवलगुंट्टल सीमा। वायव्यतः चनुपकत्य वयलि केशवचंदुचेवु तुर्पुन गट्टयवु गट्टय सीमा। उत्तरतः संप्पर पोलमुन भीमराजुचेवु दक्षिणमु गट्टय सीमा। उप्पुटे नु नक्कलकालियं गलसिन मंय्यनिकुट्टु मेरगानु वच्चि। ऐशानतः उप्पुटेटि दक्षिणमुन गट्टु वट्टि वच्चि वेलेग्गुन प्रेमुलवक्कय सीमा। ई धम्मवुनकुनेव्वरु विलंबमु सेसिरेनि वारुपच्चमहापातकमु सेसिन पापमुनं वोदुरु गंग्गकत वेयि कविललनु वेवुरु ब्राह्मणुलनु वधिंच्चिन पापमुनं वोदुरु।

बहुभिर्वसुंधरा दत्ता बहुभिश्चानुपालिता।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्॥
स्वदत्तां परदत्तां वा यो हरेत्तु वसुंधराम्।
षष्टिवर्षसहस्राणि विष्ठायां जायते क्रिमिः॥

इति व्यासवचनाच्चायं धर्मः परिपालनीयः।

शत्रुणापि कृतो धर्मः पालनीयः प्रयत्नतः ।
शत्रुरेव हि शत्रुर्न धर्मः शत्रुर्न कस्यचित् ॥

तस्मादयं धर्मः सर्वैः परिपालनीयः ।
श्रीपीठापुरमुनकंटाचार्यलिखितम् ॥

(एपिग्राफिया इण्डिका—४ । ८७-९३)

---

(१३२)

श्रीवेङ्कटपतिरायशासनपत्रम्[१] ।

यस्य संपर्कपुण्येन नारीरत्नमभूच्छिला ।
यदुपास्यं सुमनसां तद्वस्तुद्वन्द्वमाश्रये ॥
यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम् ।
विघ्नं निघ्नन्ति भजतां विष्वक्सेनं तमाश्रये ॥
जयति क्षीरजलधेर्जातं सव्येक्षणं हरेः ।
आलम्बनं चकोराणाममरायुष्करं महः ॥

पौत्रस्तस्य **पुरूरवा बुध**सुतस्त**स्यायु**रस्यात्मजः
संजज्ञे **नहुषो ययाति**रभवत्तस्माच्च **पूरु**स्ततः ।
तद्वंशे **भरतो** बभूव नृपतिस्तत्संततौ **शंतनु**-
स्तत्तुर्यो **विजयोऽभिमन्यु**रुदभूत्तस्मात्**परीक्षि**त्ततः ॥
नन्दस्तस्याष्टमोऽभूत्समजनि नवमस्तस्य राज्ञश्च**ळिक्क**-
क्ष्मापस्तत्सप्तमः श्रीपतिरुचिरभवद्राजपूर्वो नरेन्द्रः ।

---

१. इद शासनपत्र ताम्रपत्रे लिखितं प्रथम Sir Walter Elliot महाशयेन मषीचिह्नित प्रतिकृतम्. तत्रैकं तु Dr. Burgess महाशयतः, अपरं तु Dr. Fleet महाशयतः प्राप्तम्. यद्यपि Dr. Burnell महाशयकृतसंक्षिप्तव्याख्यानसहितोऽय लेखः प्राक् Indian Antiquary द्वितीयभागे मुद्रित॰, तथापि विजयनगरराज-कुलमधिकृत्य दाक्षिणात्यग्रन्थकर्तृपण्डितवरश्रीमदप्पयदीक्षितसमयनिर्णयायात्र पुनर्मुद्रितः, इति E. Hultzsch, Ph. D. महाशयाः प्रकाशकाः. (A. D. 1601)

तस्यासीद्द्विज्जलेन्द्रो दशम इह नृपो वीरहेमाळिराय-
स्तार्तीयीको मुरारौ कृतनतिरुदभूत्तस्य मायापुरीशः ॥
तत्तुर्योऽजनि तातपिन्नममहीपालो निजालोकन-
त्रस्तामित्रगणस्ततोऽजनि हरन्दुर्गाणि सप्ताहितात् ।
अह्नैकेन च सोमिदेवनृपतिस्तस्यैव जज्ञे सुतो
वीरो राघवदेवराडिति ततः श्रीपिन्नमोऽभून्नृपः ॥
आरवीटिनगरीविभोरभूदस्य बुक्कधरणीपतिः सुतः ।
येन साळुवनृसिंहराज्यमेधमानमहसा स्थिरीकृतम् ॥
स्वःकामिनीः स्वतनुकान्तिभिराक्षिपन्तीं
बुक्कावनीपतिलको बुधकल्पशाखी ।
कल्याणिनीं कमलनाभ इवाब्धिकन्यां
वल्लाम्बिकामुदवहद्बहुमान्यशीलाम् ॥
सुतेव कलशाम्बुधेः सुरभिलाशुगं माधवा-
त्कुमारमिव शंकरात्कुलमहीभृतः कन्यका ।
जयन्तममरप्रभोरपि शचीव बुक्काधिपा-
च्छुतं जगति वल्लमालभत रामराजं सुतम् ॥
सहस्रैः सप्तत्या सहितमपि यः सिन्धुजनुषां
सपादस्यानीकं समिति भुजशौर्येण महता ।
विजित्यादत्तेऽस्मादवनिगिरिदुर्गं विभुतया
विधूतेन्द्रः कासप्पो(प्प)डयमपि विद्राव्य सहसा ॥
कन्दनवोलिदुर्गमुरु कन्दळदभ्युदयो
बाहुबलेन यो बहुतरेण विजित्य हरेः ।
संनिहितस्य तस्य चरणाम्बुषु भक्ततया
ज्ञातिभिरर्पितं सुधयति स्म निषेव्य विषम् ॥
श्रीरामराजक्षितिपस्य तस्य चिन्तामणेरर्थिकदम्बकानाम् ।
लक्ष्मीरिवाम्भोरुहलोचनस्य लक्काम्बिकामुष्य महिष्यलासीत् ॥

तस्याधिकैः समभवत्तनयस्तपोभिः
श्रीरङ्गराजनृपतिः शशिवंशदीपः ।
आसन्समुल्लसति धामनि यस्य चित्रं
नेत्राणि वैरिसुदृशां च निरञ्जनानि ॥

सतीं **तिरुमलाम्बिकां** चरितलीलयारुन्धती-
प्रथामपि तितिक्षया वसुमतीयशो रुन्धतीम् ।
हिमांशुरिव रोहिणीं हृदयहारिणीं सद्गुणै-
रमोदत सधर्मिणीमयमवाप्य वीराग्रणीः ॥

रचितनयविचारं **रामराजं** च धीरं
वरतिरुमलरायं वेङ्कटाद्रिक्षितीशम् ।
अजनयत स एतानानुपूर्व्या कुमारा-
निह **तिरुमल**देव्यामेव राजा महौजाः ॥

सकलभुवनकण्टकानरातीन्समिति निहत्य स **रामराजवीरः** ।
भरतमनु भगीरथादिराजप्रथितयशाः प्रशशास चक्रमुर्व्याः ॥

व्यराजत श्री**वरवेङ्कटाद्रिराजः** क्षितौ [1]लक्ष्मणचारुमूर्तिः ।
ज्याघोषदूरीकृतमे[2]घनादः कुर्वन्[3]सुमित्राशयहर्षपोषम् ॥

त्रिषु श्रीरङ्गक्ष्मापरिवृढकुमारेष्वधिरणं
विजित्यारिक्ष्मापांस्**तिरुमल**महाराजनृपतिः ।
महौजाः साम्राज्ये सुमतिरभिषिक्तो निरुपमे
प्रशास्त्युर्वीं सर्वामपि तिसृषु मूर्तिष्विव हरिः ॥

यशस्विनामग्रसरस्य यस्य पट्टाभिषेके सति पार्थिवेन्दोः ।
दानाम्बुपूरैरभिषिच्यमाना देवीपदं भूमिरियं दधाति ॥

अनन्तरं तत्तनयः प्रतीतश्चकास्ति हस्तापजितद्युशाखी ।
श्री**वेङ्गळांबा**चिरपुण्यराशिः श्री**रङ्गरायः** श्रितभागधेयः ॥

---

१. सौमित्रिवत् लक्षणैर्वा. २. इन्द्रजित्, स्तनितं वा. ३. दशरथपत्न्याः, शोभन-मित्राणा वा.

यथाविधि महीसुरोत्तमकृताभिषेकोत्सवे
यदीयकरवारिदे कनकवृष्टिदे सर्वतः ।
यशोमयतरङ्गिणी दशदिगन्तरे जृम्भते
सतां प्रशमितोऽभवत्कृपणतोरुदावानलः ॥

विद्वत्त्राणपरायणस्तदनुजः श्रीवेङ्कळांबापुरा-
पुण्योत्कर्षफलोदयस्तिरुमलश्रीदेवरायात्मभूः ।
संतानद्रुरिव स्थितः सुरगुरौ साम्राज्यसिंहासने
सर्वां शास्ति नयेन वेङ्कटपतिश्रीदेवरायः क्षमाम् ॥

यथा रघुकुलोद्वहः स्वयमरुन्धतीजानिना
स्वगोत्रगुरुणा सुधीतिलकतातयार्येण यः ।
यथाविधि यशस्विना विरचिताभिषेकक्षणा-
द्विभिद्य यवनाशरान्विजयते प्रशासन्महीम् ॥

श्रीवेङ्कटाम्बा वरराघवाम्बा पेदोपमाम्बा च कृष्णमाम्बा ।
कोडाम्बिका देव्य इमा भजन्ते शक्तित्रयी नीतिदया यथेमम् ॥

यस्यातिप्रथितौजसो रणमुखे सेनाभटैरुद्भटैः
साटोपाहृतसैन्धवद्विपघटाशस्त्रातपत्रादिमः ।
निर्विण्णो मलिकीभरामतनुभूः संप्राप्य गेहं महे-
मेन्दः सन्महमन्दशाहु रयते सार्थाभिधामन्वहम् ॥

यस्मिन्नङ्गदनिर्विशेषमखिलामुर्वीं भुजे बिभ्रति
प्रीताः पन्नगमण्डलाधिपकुलक्षोणीभृतो निर्भराः ।
यस्मै भूवलयैकधूर्वहकलामाशंसमानाः सदा
सेवन्ते वृषशैलतामधिगताः श्रीवेङ्कटाद्रीश्वरम् ॥

वाराशिगाम्भीर्यविशेषधुर्यश्चौरासिदुर्गैकविभाळवर्यः ।
पराष्टदिग्रायमनः प्रकामभयंकरः शार्ङ्गधरान्तरङ्गः ॥

हतरिपुरनिमेषानोकहो याचकानां
होसविरुदरगण्डो रायराहुत्तमिण्डः ।

महितचरितधन्यो मंनियान्सामुलादि-
प्रकटितबिरुदश्रीः पाटितारातिलोकः ॥
सारवीररमया समुल्लसन्नारवीदिपुरहारनायकः।
कुण्डलीश्वरमहाभुजः श्रयन्मण्डलीकधरणीवराहताम् ॥
वेङ्गत्रिभुवनीमल्लः संख्यक्षितिकलार्जुनः।
उरिगोलसुरत्राणो हरिगोचरमानसः ॥
राज्ञां वरो रणमुखरामभद्र इति श्रुतः।
वर्णितबिरुदो नाना वर्णश्रीमण्डलीकगण्ड इति ॥
आत्रेयगोत्रजानामग्रसरो भूभुजामुदारयशाः।
अतिबिरुदतुरगघट्टो मतिगुरुरारट्टमगधमान्यपदः ॥
शल्यारिनीतिशाली कल्याणपुराधिपः कलाचतुरः।
चाळिक्कचक्रवर्ती माणिक्कमहाकिरीटमहनीयः ॥
एविरुदरायराहुतवेश्यैकभुजङ्गबिरुदमत्तश्रीः।
रम्यतरकीर्तिरोड्डियरायदिशापट्टबिरुदघोषेण ॥
औषधिपत्युपमायितगण्डस्तोषणरूपजितासमकाण्डः।
भाषेगेतप्पवरायगण्डः पोषणनिर्भरभूनवखण्डः ॥
राजाधिराजबिरुदो राजराजसमाहितिः।
मूरुरायरगण्डाङ्को मेरुलङ्घियशोभरः ॥
परदारेषु विमुखः पररायभयंकरः।
शिष्टसंरक्षणपरो दुष्टशार्दूलमर्दनः ॥
अरीभगण्डभेरुण्डो हरिभक्तिसुधानिधिः।
इत्यादिबिरुदैर्बन्दितत्या नित्यमभिष्टुतः।
जय जीवेति वादिन्या जनिताञ्जलिबन्धया ॥
काम्बोजभोजकालिङ्गकरहाटादिपार्थिवैः।
प्रतीहारपदं प्राप्तैः प्रस्तुतस्तुतिघोषणः ॥
सोऽयं नीतिजितादिभूपतिततिः सुत्रामशाखी सुधी-
सार्थानां भुजतेजसा स्ववशयन्कर्णाटसिंहासनम्।

आसेतोरपि चाहिमाद्रि विमतान्संहृत्य शासन्मुदा
सर्वोर्वी प्रचकास्ति वेङ्कटपतिश्रीदेवरायाग्रणीः ॥
शक्तिनेत्रकळम्बेन्दु(१५२३)गणिते शकवत्सरे।
प्लवसंवत्सरे पुण्ये मासि वैशाखनामनि ॥
पक्षे वलक्षे पुण्यर्क्षे पुण्यायां द्वादशीतिथौ।
श्रीवेङ्कटेशपादाब्जसंनिधौ श्रेयसां निधौ ॥
श्रीमच्छ्रीवत्सगोत्राय वरापस्तम्बसूत्रिणे।
यशस्विने यजुःशाखाध्यायिनेऽभीष्टदायिने ॥
यजनादिमषट्कर्मभजनात्पावनात्मने।
नित्यनैमित्तिकाचारनिर्मलस्वान्तवृत्तये ॥
मृष्टान्नदानसंतुष्टशिष्टाचारद्विजन्मने।
अष्टादशपुराणार्थहृष्टाशयसरोरुहे ॥
अवताराय वाल्मीकेरंशाय च बृहस्पतेः।
राजन्यास्थानरत्नाय रक्षिताशेषबन्धवे ॥
सूर्यदेवार्यभट्टस्य पौत्रायामिततेजसे।
उर्पूटूरनन्तभट्टपुत्रायातियशस्विने ॥
तिरुवेंगळनाथार्यपौराणिकविपश्चिते।
पडवीडुमहाराज्ये पुळुवूर्कोट्टके स्थितम् ॥
अरुगुन्नपरन्दागिसीमालक्ष्मीविभूषणम्।
पेरिंतिमिरिनाडुत्थं कलवेपत्तुशोभितम् ॥
अरुगुन्नमहाग्रामप्राचीभागमुपाश्रितम्।
संप्रोल्लसत्कूरपाडिदक्षिणस्यां दिशि स्थितम् ॥
श्रीचातूर्सत्रवाड्योस्तु पश्चिमाशामुपाश्रितम्।
तिमिरिग्रामराजस्य कौबेरीं दिशमाश्रितम् ॥
ज्वरहर्लिंगसमुद्रायप्रतिनामसमन्वितम्।
विळापाकाख्यसुग्रामं शोभितं शोभनैर्गुणैः ॥

सर्वमान्यं चतुःसीमासहितं च समन्ततः ।
निधिनिक्षेपपाषाणसिद्धसाध्यजलान्वितम् ॥
अक्षिण्यागामिसंयुक्तमेकभोज्यं सभूरुहम् ।
वापीकूपतटागैश्च कच्छारामैश्च संयुतम् ॥
पुत्रपौत्रादिभिर्भोज्यं क्रमादाचन्द्रतारकम् ।
दानाधमनविक्रीतियोग्यं विनिमयोचितम् ॥
परीतः प्रयतैः स्निग्धैः पुरोहितपुरोगमैः ।
विविधैर्विबुधैः श्रौतपथिकैरधिकैर्गिरा ॥
ख्यातानुकूलगोत्राब्धिसुधांशोर्महसां प्रभोः ।
शिवादिवादिमूर्धन्यशिवशास्त्राभिमानिनः ॥
महादेवमहीदेवप्रतिष्ठानिरतस्य ह ।
बल्लाळरायभूपालमनोभीतिप्रदायिनः ॥
विद्वज्जनहृदम्भोजकुलाभ्युदयभास्वतः ।
श्रीनेल्लूरिवीराख्यक्षेत्रस्थानवतः सदा ॥
वीरप्पनायकक्ष्मापपौत्रस्यामित्रकर्षिणः ।
वेल्लूरिवोमनृपतेः पुत्रस्यातियशस्विनः ॥
श्रीमतो **लिङ्ग**भूपस्य विज्ञप्तिमनुपालयन् ।
श्रीवीरवेङ्कटपति[1]महारायमहीपतिः ॥
सहिरण्यपयोधारापूर्वकं दत्तवान्मुदा ।
विद्वान्वेङ्कलभट्टाख्यो **रामया**भिधसूरिणे ॥
सभापतिवरायास्मै शिल्पिने **कामयाय** च ।
दत्तवान्भागमेकं तद्भोगाष्टकसमन्वितम् ।
शासनोल्लेखनद्रव्यनिमित्ताय द्वयोरपि ॥

---

१. 'अयं कुवलयानन्दमकरोदप्पदीक्षितः । नियोगाद्वेङ्कटपतेर्निरुपाधिकृपानिधेः ॥' इति कुवलयानन्दसमाप्तिलेखतो ज्ञायते कुवलयानन्दाद्यनेकग्रन्थनिर्माता अप्पदीक्षितोऽस्यैव वेङ्कटपतेराश्रित इति. तेनास्य समय एव कुवलयानन्दादिनिर्मातुरप्पदीक्षितस्य समय इति.

श्रीवेङ्कटपतिरायक्षितिपतिवर्यस्य कीर्तिधूर्यस्य।
शासनमिदं सुधीजनकुवलयचन्द्रस्य भूमहेन्द्रस्य॥
वेङ्कटपतिरायगिरा सरसमभाणीत्सभापतेः पौत्रः।
कामकोटिसुतो रामकविः शासनवाङ्मयम्॥
श्रीवेङ्कटपतिरायक्ष्मापतिदेशेन कामयाचार्यः।
गणपयतनयः शासनमलिखदिदं वीरणानुजस्ताम्रम्॥

दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम्।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम्॥
स्वदत्ताद्विगुणं पुण्यं परदत्तानुपालनम्।
परदत्तापहारेण स्वदत्तं निष्फलं भवेत्॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम्।
षष्टिवर्षसहस्राणि विष्ठायां जायते क्रिमिः॥
एकैव भगिनी लोके सर्वेषामेव भूभुजाम्।
न भोज्या न करग्राह्या विप्रदत्ता वसुंधरा॥

सामान्योऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः॥

(एपिग्राफिआ इण्डिका–४।२७२–२७८)

---

(१३३)

श्रीकर्णमहाराजानां शासनपत्रम्।

स जयति जगदुत्सवप्रवेशप्रथनपरः करपल्लवो मुरारेः।
लसदमृतपयःकणाङ्कलक्ष्मीस्तनकलशाननलब्धसंनिवेशः॥
जयति च गिरिजाकपोलबिम्बादधिगतपक्षविचित्रितां सभित्तिः।
त्रिपुरविजयिनः प्रियोपरोधाद्धृतमदनाभयदानशासनेव॥

---

१. सातारानगरप्रान्तवर्ति करहाडग्रामे कस्यचिज्जीर्णगृहस्य भूमेः खननसमये लिब्धान्येतानि ताम्रपत्राणि पुणेनगरस्थानन्दाश्रमाध्यक्षेण आपटे इत्युपाख्येन हरिनारायणशर्मणा प्रेषितानि. तत्स्थमिद शासनम्, इति डा० रा० गो० भाण्डारकर महाशयाः प्रकाशका. (शकसं० ८८० A. D. 958.)

श्रीमानस्ति नभस्तलैकतिलकस्त्रैलोक्यनेत्रोत्सवो
देवो मन्मथबान्धवः कुमुदिनीनाथः सुधादीधितिः ।
निःशेषामरतर्पणार्पिततनुप्रक्षीणतालंकृते-
र्यस्यांशः शिरसा गुणप्रियतया नूनं धृतः शंभुना ॥

तस्माद्विकासनपरः कुमुदावलीनां
दोषान्धकारदलनः परिपूरिताशः ।
ज्योत्स्नाप्रवाह इव दर्शितशुद्धपक्षः
प्रावर्तत क्षितितले क्षितिपालवंशः ॥

अभवदतुलकान्तिस्तत्र मुक्तामणीनां
गण इव यदुवंशो दुग्धसिन्धूयमाने ।
अधिगतहरिनीलप्रोल्लसन्नायकश्री-
रशिथिलगुणसङ्गो भूषणं यो भुवोऽभूत् ॥

उद्वृत्तदैत्यकुलकन्दलशास्तिहेतु-
स्तत्रावतारमकरोत्पुरुषः पुराणः ।
तद्वंशजा जगति तुङ्गयशःप्रभावा-
स्तुङ्गा इति क्षितिभुजः प्रथिता बभूवुः ॥

क्षितितलतिलकस्तदन्वये च क्षतरिपुदन्तिघटोऽजनिष्ट रट्टः ।
तमनु च सुतराष्ट्रकूटनाम्ना भुवि विदितोऽजनि राष्ट्रकूटवंशः ॥

तस्मादरातिवनिताकुलचारुहार-
नीहारभानुरुदगादिह दन्तिदुर्गः ।
एकं चकार चतुरब्ध्युपकण्ठसीम
क्षेत्रं य एतदसिलाङ्गलभिन्नदुर्गः ॥

सुस्निग्धां घनपत्रसंचयकृतच्छायां मनोहारिणी-
मूढोदारफलां समाश्रितजनश्रान्तिव्यपोहक्षमाम् ।
यश्चालुक्यकुलालवालवलयादुद्धृत्य लक्ष्मीलतां
सिक्तां दन्तिमदाम्बुभिः स्थिरपदासक्तिं स्ववंशेऽकरोत् ॥

तस्मादपालयदिमां वसुधां पितृव्यः
श्रीकृष्णराजनृपतिः शरदभ्रशुभ्रैः ।
यत्कारितेश्वरगृहैर्वसुमत्यनेक-
कैलासशैलनिचितेव चिरं विभाति ॥

गोविन्दराज इति तस्य बभूव नाम्ना
सूनुः स भोगभरभङ्गुरराज्यचिन्तः ।
आत्मानुजे निरुपमे विनिवेश्य सम्य-
क्साम्राज्यमीश्वरपदं शिथिलीचकार ॥

श्वेतातपत्रत्रितयेन्दुबिम्बलोलोदयाद्रेः कलिवल्लभाख्यात् ।
ततः कृतारातिमदेभभङ्गो जातो जगत्तुङ्गमृगाधिराजः ॥

तत्सूनुरानतनृपो नृपतुङ्गदेवः
सोऽभूत्स्वसैन्यभरभङ्गुरिताहिराजः ।
यो मान्यखेटममरेन्द्रपुरोपहासि-
गीर्वाणगर्वमिव खर्वयितुं व्यधत्त ॥

चालुक्यवंशं दहता यदीयप्रतापवह्नेरभिलब्धजन्मा ।
ब्रह्माण्डभाण्डोदर·········नाद्यापि विश्रान्तिमुपैति शब्दः ॥

तस्योर्त्तर्जितगुर्जरो हृतहटल्लाटोद्भटश्रीमदो
गौडानां विनयव्रतार्पणगुरुः सामुद्रनिद्राहरः ।
द्वारस्थाङ्गकलिङ्गगाङ्गमगधैरभ्यर्चिताज्ञश्चिरं
सूनुः सूनृतवाग्भुवः परिवृढः श्रीकृष्णराजोऽभवत् ॥

अभूज्जगत्तुङ्ग इति प्रसिद्धस्तदङ्गजः स्त्रीनयनामृतांशुः ।
अलब्धराज्यः स दिवं विनिन्ये दिव्याङ्गनाप्रार्थनयेव धात्रा ॥

तन्नन्दनः क्षितिमपालयदिन्द्रराजो
यद्रूपसंभवपराभवभीरुणेव ।
मानात्पुरैव मदनेन पिनाकपाणि-
कोपाग्निना निजतनुः क्रियते स्म भस्म ॥

तस्माद्**मोघवर्षो** रौद्रधनुर्भङ्गजनितबलमहिमा।
राम इव रामणीयकमहानिधिर्दशरथाज्जातः॥

क्षिप्रं दिवं पितुरिव प्रणयाद्गतस्य
तस्यानुजो मनुजलोकललामभूतः।
राज्यं दधे मदनसौख्यविलासकन्दो
गोविन्दराज इति विश्रुतनामधेयः॥

सोऽप्यङ्गनानयनपाशनिरुद्धबुद्धि-
रुन्मार्गसङ्गविमुखीकृतसर्वसत्त्वः।
दोषाप्रकोपविषमप्रकृतिः श्लथाङ्गः
प्रापत्क्षयं सहजतेजसि जातजाड्ये॥

सामन्तैरथ **रट्ट**राज्यमहिमालम्बार्थमभ्यर्थितो
देवेनापि पिनाकिना हरिकुलोल्लासैषिणा प्रेरितः।
अध्यास्त प्रथमो विवेकिषु **जगत्तुङ्गा**त्मजोऽमोघवा-
क्पीयूषाब्धिर**मोघवर्ष**नृपतिः श्रीवीरसिंहासनम्॥

धर्मे मनुः समरकर्मणि कार्तवीर्यो
वीर्ये बलिर्जनमनोहरणे दिलीपः।
उच्चैश्चिरंतनयशांसि हरन्नपीत्थं
वृद्धेषु नम्रचरितो विनयेन योऽभूत्॥

किमिव सुकृतराशेर्वर्ण्यते तस्य चित्रं
युधि रिपुभिरशेषैर्वीक्षितो भज्यमानैः।
वियति निकटवर्ती यस्य जातः सहायः
प्रणतहरिविरिञ्चाभ्यर्चितश्चन्द्रमौलिः॥

श्रीकृष्णराजनृपतिस्तस्मात्परमेश्वरादजनि सूनुः।
यः शक्तिधरः स्वामी कुमारभावे व्यभूद्भुवने॥
....महतसहस्रभुजो भुजद्वयाकलितसमदरामेण।
.......................गुरुरपि येन सहस्रार्जुनो [विजि]तः॥

श्रीरट्टराज्यपुरवररक्षापरिखां मदेन यस्याज्ञाम्।
विपुलां विलङ्घयन्तः स्वयमपतन्द्रोहिणोऽधस्तात्॥
येन मधुकैटभाविव पुनरुन्मग्नौ जनोपमर्दाय।
श्रीवल्लभेन निहतौ भुवि दन्तिगबप्पुगौ दुष्टौ॥
रच्छामल्लविषद्रुममुदस्य निहितेन योऽकृत सनाथाम्।
भूतार्यपुण्यतरुणा वाटीमिव गङ्गपाटीं च॥
परिवलिताण्णिगपल्लवविपत्तिरासीन्न विस्मयस्थानम्।
विस्फुरति यत्प्रतापे शोषितविद्वेषिगाङ्गौघे॥
यस्य परुषेक्षिताखिलदक्षिणदिग्दुर्गविजयमाकर्ण्य।
गलिता गुर्जरहृदयात्कालञ्जरचित्रकूटाशा॥
अनमन्नापूर्वापरजलनिधिहिमशैलसिंहलद्वीपात्।
यं जनकाज्ञावशमपि मण्डलिनश्चण्डदण्डभयात्॥
स्निग्धश्यामरुचा प्रलम्बभुजया पीनायतोरस्कया
मूर्त्या कीर्तिलताहितामृतजलैर्वृत्तैश्च सत्त्वोद्भवैः।
ज्ञात्वा यं पुरुषोत्तमं भरसहं विश्वंभराभ्युद्धृतौ
शान्ते धाम्नि लयं गतः प्रशमिनामाद्यः कृतार्थः पिता॥
वृत्ते नृत्तसुराङ्गने सरभसं दिव्यर्षिदत्ताशिषि
श्रीकान्तस्य नितान्ततोषितहरे राज्याभिषेकोत्सवे।
यस्याबद्धकरग्रहोद्यमभवत्कम्पानुरागोदया-
द्दिक्कन्याः स्वसमर्पणार्थमभवल्लग्नानुकूल्यप्रियाः॥
लुप्ताः केऽपि निजास्पदाद्गुणभृतः केचित्प्रतिष्ठापिताः
केऽप्यन्योन्यविभेदतो विरलिताः केचित्तु संश्लेषिताः।
येनाप्यूर्जितशब्दतन्त्रपतिना वर्णा इवोच्चावचां
नीता मण्डलिनो दशां सुमहतः सिद्धिं पदस्येच्छता॥
कृत्वा दक्षिणदिग्जयोद्यतधिया चौलान्वयोन्मूलनं
तद्भूमिं निजभृत्यवर्गपरितश्चेरन्मपाण्ड्यादिकान्।

येनोच्चैः सह सिंहलेन करदान्सन्मण्डलाधीश्वरा-
न्यस्तः कीर्तिलताङ्कुरप्रतिकृतिस्तम्भश्च रामेश्वरे ॥

स च परमभट्टारकश्रीमहाराजाधिराजपरमेश्वरश्रीमदमोघवर्षदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमदकालवर्षदेवः पृथ्वीवल्लभश्रीमद्वल्लभनरेन्द्रदेवः कुशली सर्वानेव यथासंबध्यमानकान्राष्ट्रपतिविषयपतिग्रामकूटमहत्तरयुक्तकोपयुक्तकान्समादिशति—अस्तु वः संविदितम्। यथा शकनृपकालातीतसंवत्सरशतेष्वष्टस्वशीत्यधिकेषु कालयुक्तसंवत्सरान्तर्गतफाल्गुनबहुलत्रयोदश्यां बुधे दक्षिणादिङ्मण्डलानि भृत्येभ्यो जीवनं कर्तुं मण्डलेश्वरसर्वस्वानि प्रतिग्रहीतुं कालप्रियगण्डमार्तण्डकृष्णेश्वराद्यायतनानि निष्पादयितुं मेल्पाटीसमावासितश्रीमद्विजयकटकेन मया करहाटीयवल्कलेश्वरस्थानपतिकरञ्जखेटसंततिविनिर्गतेशानशिवाचार्यशिष्याय महातपस्विने सकलशिवसिद्धान्तपारगाय **गगनशिवाय** कार्तिक्यां संकल्पितसकलतपोधना(या)सनाच्छादननिमित्तं **करहाटविषयप्रतिबद्धकल्लिद्वादशा**कान्तर्गतः **कंकें**नामा ग्रामः सवृक्षमालाकुलः सधान्यहिरण्यादेयः सदण्डदोषदशापराधः सर्वोत्पत्तिसहित आचन्द्रार्कं नमस्यो मया दत्तः। यस्य पूर्वतः **कन्हवन्ना** नदी। दक्षिणतः **पेन्डुरे**। पश्चिमतः **आढेंनामा** ग्रामः। उत्तरतः सैव कन्हवन्ना नदी। एवं चतुराघाटविशुद्धं **कंकें**संज्ञकं ग्रामं **गगनशिवस्य** कृषतः कर्षयतो भुञ्जतो भोजयतो वा न केनचिद्व्याघातः कार्यः। यश्च करोति स पञ्चभिरपि महापातकैः संयुक्तः स्यात्। उक्तं च—

षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥

सामान्योऽयं धर्मसेतुर्नराणां काले काले पालनीयो भवद्भिः।
सर्वानेवं भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः ॥

योस्यग्गेन लिखितमिति ॥

(एपिग्राफिआ इण्डिका—४।२८२–२८६)

(१३४)

बाईश्रीहरीरकारितवापीप्रशस्तिः ।[1]

नमः सृष्टिकर्त्रे ।

नमोऽपां पतये तुभ्यं सर्वजीवनरूपिणे ।
वरुणाय नमस्तुभ्यं नमः सुकृतसाक्षिणे ॥
जयति जगत्त्रयजननी कुण्डलिनी नामतः परा शक्तिः ।
सुरनरवन्दितचरणा वापीरूपात्मना सततम् ॥
नमामि विश्वकर्माणं सफलाभीष्टदायकम् ।
कृपातो यस्य सर्वे स्युः कर्म कर्तुं क्षमा नराः ॥

स्वस्ति । श्रीगुर्जरधरिण्यां श्रीमदहिम्मदाबादनगरे पातुसाहश्रीश्रीश्रीमहमूदविजयराज्ये राज्ञोऽन्तःपुरद्वारि सर्वाधिकारिणी बाईश्रीहरीरनाम्नी श्रीनगरादीशानदिगाश्रितहरीरपुरमध्ये चतुर्दिगायातानेकतृषातुरमनुष्यपशुपक्षिवृक्षादिचतुरशीतिलक्षजीवोपभोगाय परमेश्वरप्रीत्यर्थं संवत् १५५६ वर्षे शाके १४२१ प्रवर्तमाने पौष शुदि १३ सोमे वापीं कारयामास । यस्यामगाधामृतपानीयराशिमवलोक्य क्षीरोदधिर्निवासमकरोदिव । सा स्वेदजाण्डजोद्भिज्जजरायुजपोषणार्थमाचन्द्रार्कं स्थिरा भूयात् । तत्र व्ययीकृतद्रव्यसंख्या ३२९००० सर्व० ।

महमूदमहीपालमन्त्रिमुख्या प्रतापिनी ।
धर्मार्थिनो हरीराख्या वापीमिमामचीकरत् ॥
चतुष्पथे चरच्चारुचतुर्दिग्जनसंकुले ।
आचन्द्रार्कमियं वापी मधुरा पीयतां जनैः ॥

---

१. अयं प्रशस्तिलेखो यद्यपि Dr. Burgess महाशयकृतमषीप्रतिकृतिमाश्रित्य Mr H. B. Blochmann M. A. महाशयेन Indian Antiquary ग्रन्थे प्रकाशितो हरि वामन महाशयेनेङ्ग्लिशभाषयानूदितश्च, तथापि बहुशोऽशुद्ध दृष्ट्वा स्वयमेव मषीप्रतिकृतिं कृत्वा पुनरत्र प्रकाशितः इति Rev. J. E. Abbott प्रकाशकाः. A. D. 1499.

दुर्गाणि पुण्यानारामाञ्शतशश्च जलाशयान्।
पदे पदेऽन्नसत्राणि धनिनः सन्ति शोभनाः॥
महाधनव्ययं कृत्वा विश्वोपकृतिहेतवे।
बाईश्रीहरीरनाम्नी वापीमिमामचीकरत्॥

वापीनिर्माणेऽधिकारी परमेश्वराज्ञापालकमलिक श्रीविहामद। तथा गजधरवैश्य सूत्र० वीरा तथाज्ञाकर सू० देवा श्रीगिरणामहं सायाआ तथा महंवीरा॥

(एपिग्राफिआ इण्डिका—४।२९८–२९९)

---

(१३५)

दीर्घसीनगरीस्थितवनपतिमहाराजकारित-नाट्यशालाप्रशस्तिः।

शक संवत् ९९७. A. D 1075.

आसीद्गङ्गान्ववायक्षितिपतितिलको **राजराज**क्षितीशः
क्ष्मापालप्रौढमौलिप्रकरमणिरुचिप्रस्फुरत्पादपीठः।
योऽरातिक्षत्रचक्रक्रथनकरभुजापालिताशेषपृथ्वी-
चक्रश्चक्रायुधाभो दधदुरसि रमां वाचि वाचामधीशः॥
तस्यान्वयागतमहाप्रतिहारिमुख्यः
संस्तम्भिताखिलविरोधिनराधिपौजाः।
गोकर्णसूनुरवनीसुरवंशभानु-
रात्रेयगोत्रमहितो महनीयकीर्तिः॥
वनपतिरिति नाम्ना तस्य गाम्भीर्यशौर्या-
खिलजगदुपकारैर्न्यग्बभूव प्रचेताः।

---

१. अयं प्रशस्तिलेखो **गञ्जाम्**परिगणे **कलिङ्गपतम्**नामकत उत्तरस्यां दिशि मीलचतुष्टयान्तरे **दीर्घसी**पर्वतान्तिके आयतशिलायां वर्तते. ततो Dr. Hultzsch महाशयेन मसीचिह्नीकृतो दत्तः. तत्र प्राक् संस्कृतभाषा, तत आन्ध्रभाषेति G. V. Ramamûrti, Parlakimedı महाशयाः.

अधिकमभिमतात्तद्दानमालोक्य चिन्ता-
मणिरिह न विदद्रे यत्तदश्मत्वहेतोः ॥
आजावसौ चोडनृपस्य सेनामहावनस्याश्वमृगाकुलस्य ।
मत्तेभसारद्रुमपूर्णितस्य दावानलोऽभूच्चलमूर्तिगण्डः ॥
तेनाजौ चोडसेनावनदवदहनेनाशुगप्राशशस्त्री
निस्त्रिंशज्वालकेनोत्कलगजतुरगानीकिनीनाथभूजा ।
निर्दग्धा भग्नमूला निपतितशिरसश्छिन्नबाहूरुशाखा
दृश्यन्तेऽद्यापि भूतेश्चय इव धवलैरस्थिभिर्जीर्णमांसैः ॥
जित्वा मुहुर्वेङ्गिधराधिनाथं तस्याजहाराखिलवस्तुराशिम् ।
दृद्दार्णवस्तेन यमाय दूतः प्रस्थापितो दिग्जयकीर्तनाय ॥
जित्वैवं भूमिपालान्वनपतिरवनावात्मनः कीर्तिवल्लीं
शाकाब्दे शैलपद्मप्रभवनिधियुते दीर्घरस्यां नगर्याम् ।
दुर्गादेव्यालयस्याभरणमिव पुरः स्थापयामास गुर्वीं
श्रीमाञ्छ्रीनाथवीर्यः स्थगितदशदिशां नाट्यशालाच्छलेन ॥
दीपमखण्डं प्रादान्मण्डलिकः सोऽतिचण्डदोर्दण्डः ।
तस्यामेव समायां तस्यै देव्यै सुरेशपूज्यायै ॥

[श्रीशकुनेण्डलु भूसतिपै शैलनन्दाब्जभवसंख्यनोन्द वेङ्गि देशंबु गिमिडियु गोसिलगिड्डि सिंगिदेशंबु म····योड्डदेशमनङ्ग जनिनभूपालुरननिनोड्चे चलमूर्तिगण्डण्डै नेगडिन मण्डलिकुण्डु भूसुरवंशुण्डु वासवनिभभोगि वणपति सौजन्यगुणयुतुण्डु दीर्घासि भगवति देवि देवालयमुन मुंदट गड्डुघनतरमुग मण्डपमेत्तिचे भण्डनविजयुण्डु गण्डगोपालुण्डखण्डवर्तिदीविय वेट्टेनदेविकिनव्वेलं दन मनोवल्लभि वनजनेत्रि दीविय वेट्टें वन्नावतियुनु साक्षुलिनशशुतालगलयत्तकुनु मुदमुन गगनभूमिचन्द्रखरकरोद कशिखि मारुतात्ममूर्तिमहिषमथनि यिष्टपूर्तेफलमुलेखकालंवुनुमेच्चुतोडं दमकुनिच्चुचुणु] ॥

(एपिग्राफिआ इपिडका—४।३१५-३१७)

(१३६)

श्रीकाटयवेममहाराजधर्मपत्नीमल्लाम्बिकाकारित-मार्कण्डेयशिवालयाग्रहारप्रशस्तिः[1]।

शक संवत् १३३३. A. D 1411.

विश्वंभरोऽव्याद्भूदारः केलिपल्वलिताम्बुधिः ।
विश्वंभराभवत्सापि येनोद्वाहमवाप्य भूः ॥
भवतां भवतां नागः शांकरिः शंकरोऽन्वहम् ।
दानेन सुरभिः स्वस्य दानेन सुरभिश्च यः ॥
शिरोरत्नं शंभोः शशधरकिशोरः कलयता-
दलंकारे गौर्या मुकुरति रते दीपति च यः ।
बिसाङ्कुरभ्रान्त्या गगनतटिनीहंसपटली
मुहुश्चञ्चूघर्षाद्विमलविमलस्तेजित इव ॥
अस्ति स्वस्तिमदाद्यमध्वरभुजामम्भोजनाभं मह-
स्तन्नाभीकमलादभूत्रिजगतां निर्माणकर्मक्षमः ।
मुख्यो विश्वसृजां चिरंतनगिरां विश्रामघण्टापथ-
स्तस्यासन्मुखबाहुसक्थिपदतो वर्णाः क्रमेणोदिताः ॥
पुंसस्तस्य पुरातनस्य चरणाम्भोजातजातं कुलं
स्वल्पाचारविधानतोऽपि विमलं शुद्धस्वभावादिदम् ।
आसीत्किं च कलौ युगे नृपतयः प्रायेण यत्रोदिता-
स्तेजः शौर्यवदान्यताप्रभृतिभिर्युक्ता गुणैः प्राभवन् ॥
तत्र पण्टकुलं नाम प्रभूतं बहुशाखिनि ।
तराविव फलं रम्यवृत्तं सरसमुज्ज्वलम् ॥

---

१. एतत्प्रशस्तिलेखाश्रयताम्रपत्राणि त्रिंशद्वर्षपूर्वं गोदावरीपरिगणान्तर्गते डामलापुरम्नाम्नि वसतौ प्राचीनगृहखननकाले मोक्कपटलरजप्पनाम्ना लब्धानि. ताम्रपत्राणीदानी मद्रासविचित्रवस्तुसंग्रहशालायां वर्तन्ते इति J. Ramayya B. A., B. L., प्रकाशकाः.

तत्रासीद्वेमभूपालः कुले विबुधरञ्जकः ।
पयोधाविव संतानो राजरत्नोद्भवाकरे ॥

श्रीमान्वेममहीपतिः स विदधे पातालगङ्गातटे
श्रीशैले जगनोब्बगण्डबिरुदः सोपानवीथीं शुभाम् ।
यासौ दीव्यति दिव्यसोमनगरारोहोद्यतानां नृणां
निश्रेणिः परिकल्पितेव नितरामा ब्रह्मकल्पस्थिरा ॥

यस्मिन्निःसीमभूदानख्यातिसौभाग्यशालिनि ।
द्विजैर्न बहु मन्यन्ते बलिभौवनभार्गवाः ॥

अनवोतप्रभुस्तस्मादजायत भुजायतः ।
महासेनो महादेवादिवारातिकुलान्तकः ॥

अनवोतमहीपतौ धरित्रीं परितो बिभ्रति पन्नगेन्द्रमुख्याः ।
चिरमुच्छ्वसिता लघूकृते स्वे भरणे जीवनमस्य संस्तुवन्ति ॥

तस्यानुजः सुजननोऽस्ति वसन्तरायो
वीरानवेमनृपतिः क्षुरिकासहायः ।
यस्मिन्महीमवति सार्थमभूच्चिराय
नामावनौ सुमनसां बहुशो वदान्ये ॥

हेमाद्रिदाननिरते यस्मिन्ननवेमभूपतौ मुदितान् ।
अवलोक्य भूमिदेवान्देवाः स्पृहयन्ति भूमिवासाय ॥

यस्मिन्किरति वसन्ते दिशि दिशि कामोत्सवेषु कर्पूरम् ।
अधिवासितपरिधानानुभवज्ञोऽभूच्चिराय गिरिशोऽपि ॥

कुमारगिरिभूपोऽभूदनवोतविभोः सुतः ।
जयन्तो वासवस्येव प्रद्युम्न इव शार्ङ्गिणः ॥

कोण्डवीडुरिति ख्याते पुरे स्थित्वा कुलागते ।
कुमारगिरिभूपोऽयं चिरं भूमिमपालयत् ॥

तुला पुरुषरत्नस्य श्रीकुमारगिरेः कुतः ।
तुलापुरुषमुख्यानि महादानानि योऽतनोत् ॥

आसीदमात्यरत्नं **काटयवेम**प्रभुस्तस्य।
अतिसुरगुरुभार्गवमतिरतिभार्गवविजयविजयविख्यातिः॥
सिंहासने निधायासौ **कुमारगिरि**भूवरम्।
अतेजयन्महातेजाः श्रीकृष्ण इव धर्मजम्॥
कुमारगिरिभूनाथो यस्मै विक्रमतोषितः।
प्रादात्प्राचीं भुवं राजमहेन्द्रनगरीमुखाम्॥
नप्ता **काट**महीभुजो गुणगणोदारस्य **मार**प्रभोः
पौत्रः **काटयवेम**भूमिरमणः श्री**वेम**पृथ्वीपतेः।
दौहित्रः पुनर**न्नवोत**नृपतेर्धात्रीशचूडामणे-
र्जामाता जयति क्षितिं चिरमव**न्दोड्डाम्बिका**नन्दनः॥
काटयवेमकटाक्षे प्रभवति सदये च निर्दये च तथा।
गजपतिमुखनृपतीनां चित्रं मुक्तातपत्रता भवति॥
भूपालान्नमयन्प्रजाः नियमयन्कान्ताजनं कामय-
न्भूदेवान्नमयन्नरीन्विरमयन्मित्राणि विश्रामयन्।
कीर्तिं स्वां भ्रमयन्नघानि शमयन्धर्मं समायामय-
न्सोऽयं **वेम**महीपतिर्विजयते **काटा**वनीशात्मजः॥
अभूत्**काटयवेम**स्य जाया **मल्लाम्बिका** सती।
अशेषगुणसंपूर्णा पातिव्रत्यधुरंधरा॥
राजद्राजमहेन्द्रनामनगरे गोदावरीतीरगं
मार्कण्डेयशिवालयं पतिहिता **मल्लाम्बिका** धार्मिका।
कृत्वा शुद्धसुवर्णरत्नखचितं ब्रह्मप्रतिष्ठास्तथा
सत्राण्यध्वनि च प्रपा विजयतेऽनेकांस्तटाकानपि॥
श्री शाके गुणरामविश्वगणिते कार्तिक्यहेऽब्दे खरे
प्रादात्**काटयवेमयः** स्ववनितामल्लाम्बिकानामतः।
ग्रामं मल्लवरं **नृसिंह**विदुषे काण्वद्विजायादरा-
दाचन्द्रार्कमुदर्कलालसमतिः सैश्वर्यभोगाष्टकम्॥

कोनदेशेऽग्रहारोऽयं भाति मल्लवराधिपः।
तीरे च वृद्धगौतम्याः पुण्यो मुक्तीश्वरान्तिके॥
अप्पयार्यस्य पौत्रोऽस्य नृसिंहः काश्यपान्वय।
अन्नदानपरो नित्यमहीबलतनूभव॥
यथाविभागमत्राशान्विधाय ज्ञातिभिः सह।
अधीतकाण्वशाखाध्वा भुङ्क्ते धन्यो यथासुखम्॥

[ईवूरि पोलमेर सोमल्लु तूर्पुन तोत्तडिमूडि पोलमेर पुत वत्तुलमुप्पडितोंटमार्मिड्लु मोदलुगा वोयि मल्लायम्मगारिकोमरगिरिपुरपु पोलमेर पुंत मोचेनु। दक्षिणानु। आकोमरगिरिपुरपु पोलमेरवुडे वृद्धगौतमि मोचेनु। पड्डमटनु वृद्धगौतमि। उत्तराननु। विद्यावृद्धतीर्थमनिवृद्धगौतमिलोनि गुमि मोदलुगा वच्चिन तोत्तडिमूडि पोलमेर पुत वत्तुलसुप्पडितोंटमार्मिड्लु मोचेंनु]

पालनसुकृतस्य चापहरणदोषस्य च प्रकाशनाय केचन पुरातनाः श्लोका लिख्यन्ते—

दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम्।
दानात्स्वर्गमवाप्नोति पालनादच्युत पदम्॥
शत्रुणापि कृतो धर्मः पालनीय प्रयत्नत।
शत्रुरेव हि शत्रु स्याद्धर्म शत्रुर्न कस्यचित्॥
स्वदत्ता परदत्ता वा यो हरेत वसुंधराम्।
षष्टिवर्षसहस्राणि विष्ठाया जायते क्रिमिः॥
तटाकानां सहस्रेण चाश्वमेधशतेन च।
गवा कोटिप्रदानेन भूमिहर्ता न शुध्यति॥
न विषं विषमित्याहुर्ब्रह्मस्व विषमुच्यते।
विषमेकाकिन हन्ति ब्रह्मस्व पुत्रपौत्रकम्॥

किंचैतद्दातृवचनम्—

कर्तव्यवित्काटयवेमभूप कृताञ्जलि प्रार्थयते नृपालान्।
एष्यान्भवद्भिः परिपालनीयो धर्मो ममाय दयया धिया वा॥

श्रीरामचन्द्रेणाप्येवमुक्तम्—

सामान्योऽयं धर्मसेतुर्नृपाणां काले काले पालनीयो भवद्भिः ।
सर्वानेवं भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्रः ॥

कृतं श्रीवल्लभेनेदं शासनं सद्विकासनम् ।
कण्वगोत्रेण पुत्रेण लक्ष्मीश्रीवल्लभार्ययोः ॥

श्रीवराहो रक्षतु । मङ्गलमहाश्रीश्रीश्रीजेयुन् । वेसु व्राळु ॥

(एपिग्राफिआ इण्डिका—४।३२१–३२५)

---

(१२७)

श्रीसुन्दरपाण्ड्यमहाराजकारितश्रीरङ्गनाथभूषणादिप्रशस्तिः[१] ।

हरिः ओम् । स्वस्ति श्री—

येनासौ करुणामनीयत दशां श्रीरङ्गपद्माकरं
कृत्वा तं भुवनान्तरप्रणयिनं कर्णाटदोषाकरम् ।
भूयोऽप्यत्र जगत्त्रयीबहुमतां लक्ष्मीमवस्थापय-
न्देवः सुन्दरपाण्ड्यभानुरुदयं लेभे प्रतापोष्मलम् ॥

दत्तैर्नैकतुलाधिरोहविधिना रङ्गेश्वरस्यालयं
देवः श्रीमधुरामहेन्द्रनृपतिर्जाम्बूनदैर्निर्ममे ।
अस्योत्तुङ्गभुजाद्रिभासुरयशश्चन्द्रोदयव्यञ्जिका
सध्येवानिशमीक्ष्यते नवजपारक्ता यदंशुच्छटा ॥

आच्छाद्य राजतपनः कनकैर्विमानं
रङ्गे हरेस्तदपदानभुवा स्वनाम्ना ।
अस्थापयत्परममा प्रणवात्सुवर्णे
तस्मिन्पुमांसममले मनसीव योगी ॥

---

१ इयं प्रशस्तिः त्रिचनापल्लिपरिगणे श्रीरङ्गमुद्वीपे रङ्गनाथमन्दिरद्वितीयप्राकारस्य पूर्वभित्तौ समुपलभ्य Mr V Venkayya M A नामकेन मत्प्रथमप्रतिनिधिना प्रेषिता—इति प्रकाशकाः E Hultzsch Ph D महाशयाः ।

कोशादात्ता क्षितिपतिरवि काठकक्षोणिभर्तु-
मौला प्रादान्मरकतमयीं शार्ङ्गिणे रङ्गधाम्ने ।
लीना तस्योरसि महति या लीलयोपेत्य पश्चा-
दालिङ्गन्त्या परिकलयते दीर्घतासाम्यमुर्व्या. ॥

देवाय रङ्गपतये नरदेव भास्वा-
नस्पर्शयन्मणिमय मुकुट महौजा' ।
यस्य त्विषा दिनमणेरिव तारकाणा
शान्ता रुचि शयनभोगिफणामणीनाम् ॥

अकृत कनकवर्मच्छादित रङ्गभर्तु
शयनमुरगराज शार्ङ्गिणो राजसूर्य ।
विलसति विहरन्त्या य समन्तेन पत्या
कवचित इव लक्ष्म्या कौङ्कुमैरङ्गरागै ॥

प्रत्यादिष्टसुमेरुशृङ्गविभव विश्वोत्तरक्ष्मापति
श्रीरङ्गे नरसिंहधाम विदधे कार्तस्वर गोपुरम् ।
यस्मिन्नक्तमुदीर्णभासुरमहस्तोमे मुहूर्तं गत
पर्याप्ताकृतिरेव भास्करमिव प्राप्त शशी दृश्यते ॥

घोरद्वैरथखिन्नकाठकपुरीसपत्समाकर्षिणा
देवेनेन्दुकुलोद्भवेन विदधे सर्वोत्तरक्ष्माभृता ।
विष्वक्सेनविमानमक्षतनभ संचारवेलोन्मिष-
द्रोचि सचयवञ्चितद्युमणिना हेम्नातिभूम्ना वृतम् ॥

कृतस्य नृपभास्वता रिपुकिरीटहेमोच्चयै-
रनेकमणिशोभिनो मरकतोरणस्यान्तरे ।
हरिर्विरचितासिको जयति रङ्गधामाश्रय-
स्तपात्ययपयोधर त्रिदशकार्मुकावेष्टितम् ॥

विष्णोरुद्भुजसुन्दरस्य विदधे वेश्म क्षितीन्द्रार्यमा
कोशागारविलुण्ठितै क्षितिभुजा कोटीरहेमोच्चयै ।

अद्याप्यन्तिकभूरमुष्य बहलैर्यत्तेजसामुद्गमै-
रुत्सङ्गस्थविदीर्णदैत्यरुधिरव्याप्तेव विद्योतते ॥
रङ्गेश्वराय क्षितिपालसूर्य प्रालम्बमुक्तास्रजमुन्नतश्री ।
भीतेन शक्रेण किरीटभङ्गात्सुरद्रुम दत्तमिवोपनिन्ये ॥
मूर्त यश स्वमिव सुन्दरपाण्ड्यदेवो
मुक्तामय व्यधित रङ्गपतेर्वितानम् ।
यस्य प्रभाभिरनुयाति तदीयमौलि-
र्भागीरथीपरिगत मुकुट पुरारे ॥
क्रमुकपनसमोचानालिकेराम्रमुख्यै
कनकनिचयक्लृप्तैर्नैकरूपै फलौघै ।
मुदमकृत मुरारेरेकरूपापि रङ्गे
मरकतपृथिवीभृत्सभवा भक्तिवल्ली ॥
नृपतिरविरुदार सचरन्मेरुतुङ्ग
व्यरचयदधिरङ्ग शातकुम्भ शताङ्गम् ।
तडिदभिसरणश्रीर्व्योम्नि यस्य प्रभाभि
शरदवतरणेऽपि प्राप्यते वारिवाहै ॥
सर्वोत्तीर्णमहीपतिर्मधुरिपोर्देवस्य जेता द्विषा
विस्तीर्णामतनिष्ट हाटकमयीं रङ्गे प्रपा जगमाम् ।
अष्टाना ककुभा मुखेषु युगपत्तत्कीर्तिचन्द्रोदय
विष्वग्विस्फुरितैर्मयूखविसरै सध्येव या शसति ॥
रङ्गास्पदप्रणयिन परमस्य पुसो
हैम सुपर्णमकरोत्क्षितिपालसूर्य ।
यस्याग्रजन्मन इव प्रभया स्फुरन्त्या
सपद्यते जगति शश्वदहर्मुखश्री ॥
आसञ्जयन्नृपरवि शयितस्य रङ्गे
कसद्विषो वपुषि काञ्चनमन्तरीयम् ।

यस्यांशुभिः कवचितेन हिरण्यगर्भे
भूयो निषण्णमिव नाभिगतेन धात्रा ॥
उच्चैः प्रभावलयमूर्जितकान्ति हैम
प्रादत्त रङ्गपतये नरपालसूर्यः ।
आभाति यत्तदुपकण्ठगतं प्रफुल्ल-
मन्तस्तमालमिव रम्यमशोकषण्डम् ॥
नृपतपनवितीर्णामास्थितो हैमपीठीं
विविधमणिविचित्रां बिभ्रदुच्चैः प्रभां च ।
जयति धृतमरुत्वत्कार्मुकं रङ्गनाथ
कनकशिखरशृङ्गस्थायिनं कालमेघम् ॥

चैत्रे मासि चकार राजतपनो यात्रोत्सवं रङ्गिनं
श्लाघ्यं कान्तिमयैस्तथाद्भुतमयैः सपन्मयैर्वासरैः ।
नन्दन्त्येव हि ते न विस्मयपदं ये बिभ्रते चेतना-
माचैतन्यभृतोऽपि यत्र दधते वृक्षा विकासं परम् ॥
कर्तुं रङ्गनिवासिनं कमलया साकं विहारोत्सवं
हेम्ना सुन्दरपाण्ड्यदेवनृपतिर्नावं नवां निर्ममे ।
पद्मोर्चिःखचिते कवेरतनयारोधोरुहैः शाखिभि-
र्मन्दारद्रुमषण्डमण्डिततटामन्वेति मन्दाकिनीम् ॥
शौर्यानीतैर्नरपतिरवि शार्ङ्गिणो रङ्गभर्तु-
स्तस्तारोच्चैः कनकनिचयैरान्तरं सप्तसालम् ।
वेलाचक्रं विजयजनुषा तस्तरे यः स्वधाम्ना
स्कन्धावारीकृतवसुमतीसीमसालायमानम् ॥
क्लृप्तं सुन्दरपाण्ड्यभूमिपतिना यद्रङ्गभर्तुः पुरो
देवस्याभ्यवहारमण्डपमभूद्विस्तीर्णमायाभवत् ।
तेनैव प्रतिपादितस्य हरता पृथ्वीपतीनां धनं
सौवर्णस्य परिच्छदस्य तदलं नासीदवस्थापने ॥

आपादचूडमकरोन्नरपालसूर्यो
रङ्गेशितुर्वपुषि रत्नविभूषणानि ।
यैरस्य वक्षसि निविष्टपदापि पद्मा
रत्नाकर भवति भूय इव प्रविष्टा ॥
धर्मद्विष समिति सुन्दरपाण्ड्यदेवे
निर्मथ्य पालयति विश्वमधिज्यचापे ।
विष्णोर्विभूषणमभूदमुना वितीर्ण
रङ्गालयस्य तपनीयमय तनुत्रम् ॥
इच्छा सुन्दरपाण्ड्य उन्नतिमतीं बिभ्रत्स्वया सञ्ज्ञया
निष्पाद्याभ्यवहारवारयुगल निष्कम्पसपत्तिकम् ।
सपूर्ण विदधे गभीरमुदर रङ्गेशितु शार्ङ्गिणो
यस्याभूद्भुवनैश्चतुर्दशभिरप्यापूरण दुर्लभम् ॥
आतन्वतान्वहमनेकतुलाधिरोह
रङ्गेन्द्रधाम्नि नरदेवदिवाकरेण ।
हेम्नामसशयमभङ्क्ष्यत मेरुरर्थे
तत्केतुलक्षणमधास्यत चेन्न मीनम् ॥
मही मह पति प्रतिनरेन्द्रलोकादिव
प्रतापरविमण्डलान्यपहृतानि दोर्विक्रमै ।
सुवर्णपरिकल्पितान्यतिमहान्ति पात्राण्यदा-
त्कवेरगिरिकन्यकापुलिनशायिने शार्ङ्गिणे ॥
सर्वानप्रणतान्निपात्य नृपतीन्सिंहासनेभ्यो हठा-
त्तैर्निर्माय समाहृतैर्मन इव स्व प्राशु सिहासनम् ।
भूभृद्भानुरदत्त रङ्गपतये यत्प्राप्य लक्ष्मीसख
सोऽय मेरुतटीजुष सतडितो मेघस्य धत्ते श्रियम् ॥
हेमाच्छादनराज इत्यधिगतप्रख्यातनाम्नो हरे-
र्हैमस्योरगसूदनस्य शयनागारस्य चाधिश्रिय ।

त्रीणि स्वर्णमयानि राजतपनश्चक्रे विमानानि यै
श्रीरङ्ग स इवाभिषेकनिभृतैरुद्भासते मौलिभि ॥

(एपिग्राफिआ इण्डिका—३।११-१४)

---

(१३८)

अनन्तवर्ममहाराजकारिततडाकप्रतिष्ठाप्रशस्तिः[1] ।

ओम् ।

स्वस्त्यमरपुरानुकारिण सर्वर्तुसुखरमणीयाद्विजयवत कलिङ्गनगरवासकान्महेन्द्राचलामलशिखरप्रतिष्ठितस्य सचराचरगुरो सकलभुवननिर्माणैकसूत्रधारस्य शशाङ्कचूडामणेर्भगवतो गोकर्णस्वामिनश्चरणयुगलप्रणामाद्विगतकलिकलङ्कोऽनेकाहवसक्षोभजनितजयशब्द प्रतापावनतसमस्तसामन्तचक्रचूडामणिप्रभामञ्जरीपुञ्जरञ्जितनिजनिस्त्रिंशधारोपार्जितवरचरण सितकुमुदकुन्देन्दुयशा ध्वस्तारातिकुलाचलो नयविनयदयादाक्षिण्यशौर्यौदार्यसत्यत्यागादिगुणसपदाधारभूतो परममाहेश्वरो मातापितृपादानुध्यातो गङ्गामलकुलतिलको महाराजश्रीराजेन्द्रवर्मसूनु श्रीअनन्तवर्मदेव कुशली तिरिकट्टुविषये मेदेलाकग्रामनिवासिन कुटुम्बिन समाज्ञापयति—विदितमस्तु भवताम्—'ग्रामोऽय होम्बरबलवास्तव्यवाजसनेयकौशिकगोत्रविष्णुदेवसूनुश्रीधरभट्टाय वेदवेदाङ्गतत्त्वज्ञाय तटाकप्रतिष्ठायामुदकपूर्वक कृत्वा सूर्यग्रहोपरागे दत्त । अत्र सीमालिङ्गानि कथ्यन्ते—पूर्वस्या दिशि वनराजिकापाषाण, आग्नेय्या पाषाण, दक्षिणस्या चठेरनदी, नैर्ऋत्या तेन्तलिवृक्षपङ्क्ति' वनराजिका, पश्चिमस्या गुराटाक. पाषाण, वायव्या कलुञ्जातटाक' पाषाण, वारुण्या (कौवेर्या) गर्त, ऐशान्या वटवृक्ष वनराजिका त्रिकूट ।

---

१ इय प्रशस्ति विजगापट्टम्परिगणे शृङ्गवरपुकोटनिकटस्थस्य आल्मण्डाग्रामस्य सनिधौ प्राप्य Mr W A Willock I. C S महाशयेन प्रेषितेषु त्रिषु ताम्रपत्रेषु लिखिता वर्तते—इति प्रकाशका E Hultzsch Ph D महाशया

अत्र व्यासगीतानि भवन्ति—

बहुभिर्वसुधा भुक्ता राजभि सगरादिभि ।
यस्य यस्य यदा भूमी[1] तस्य तस्य तदा फलम् ॥
स्वदत्ता परदत्ता वा यो हरेत वसुधराम् ।
स विष्ठाया[2] कृमिर्भूत्वा पितृभि सह पच्यते ॥

लिखित दुर्गप्परहस्येण(?) उत्कीर्णमक्षशालिना ॥ गाङ्गेयवशप्रवर्धमानविजयराज्यसवत्सरशतानि त्रीणि चतुरोत्तराणि ॥

(एपिग्राफिआ इण्डिका ३।१८–२०)

---

(१३९)

श्रीवीरबुक्कमहाराजभ्रातृजश्रीसंगममहाराजानां शासनपत्रम्[3]।

हरेर्लीलावराहस्य दष्ट्रादण्ड स पातु व ।
हेमाद्रिकलशा यत्र धात्री छत्रश्रिय दधौ ॥

अस्ति प्रस्तूयमानप्रबलनिजभुजाखर्वगर्वानुरोधि-
स्वाधीनोदारसारस्थगितरिपुनृपोद्दामसग्रामशक्ति ।
राजा राजन्यकोटिप्रणतिपरिलुठन्मौलिमाणिक्यरोची-
राजीनीराज्यमानस्फुरदुरुचरणाम्भोरुह संगमेन्द्रः ॥

तस्मादुदभवन्पञ्च तनया शौर्यशालिन ।
कल्पावनिरुहा पूर्व कलशाम्बुनिधेरिव ॥

---

१ भूमीशब्दे 'कृदिकारात्–' इति डीष सभवेन साधुत्वसभवेऽपि तदजानाना प्रकाशकवरा E Hultzsch Ph D महाशयास्तु 'भूमिस्तस्य' इति पाठ कल्पयन्ति स्म २ 'स्वविष्ठाया' आदर्शे। 'श्वविष्ठाया' प्रकाशकशोधित ३ इद शासनपत्र Mr R Sewell महाशयेन सूचित Dr C D Macleane महाशयेन Dr Hultzsch महाशयनिकटे प्रेषितम् उक्तमहाशयेन मन्निकटे प्रेषितम्—इति प्रकाशका H Krishna Sastri महाशया

आदौ हरिहरक्ष्माभृदथ कम्पमहीपति ।
ततो बुक्कमहीपाल. पश्चान्मारप-मुद्‌पौ ॥
तत्र राजा हरिहरो धरणीमसिचच्चिरम् ।
सुत्रामसदृशो येन सुरत्राण पराजित ॥
तस्यानुजश्चिरमशाद्धात्री कम्पणभूपति' ।
याथार्थ्यमभजन्नाम यस्य कम्पयितुर्द्विषाम् ॥
जयन्तयिव जम्भारे प्रद्युम्नयिव शार्ङ्गिण ।
तनय समभूद्वीरस्तस्य संगमभूधर ॥

यस्य दृष्टिमुदयद्दयारसामर्थिनामभिमतानुबन्धिनीम् ।
हन्त नूनमनुयान्ति सस्पृह कर्णकल्पतरुकामधेनव ॥
यद्भुजाश्रयणजातकौतुका नापर जयरमाभिवृण्वती ।
सयुगानि समुपेयुषी चिरादासिधारमनुतिष्ठति व्रतम् ॥
यद्यश प्रसरणेन भूयसा ह्लादमीयुषि पर जगत्त्रये ।
अश्नुते विफलता न चन्द्रमा केवल कुमुदिनीविकासनात् ॥

श्रीमान्प्राक्प्रत्यगब्धिद्वितयपरिवृढ सैष भाषातिलङ्घि-
क्षुद्रक्ष्माभृद्भुजङ्ग प्रतिभटधरणीपालसेनाविबाळ (?) ।
माद्यन्नागाश्वमर्त्याधिपतिगजघटापञ्चवक्त्रोऽभियाती-
त्युद्घुष्यन्ते यदीया स्फुटमिह बिरुदा. सतत बन्दिवृन्दै. ॥

इत्थ सर्वगुणोपरञ्जनकलामीदृग्विधामेयुष-
स्तस्य क्षोणिपतेरपारयशसस्तत्त्वोपदेशक्रियाम् ।
कर्तुं कामपि वासनामुपनयन्कारुण्यवारानिधिः
श्रीमान्सनिधिमादधत्पशुपति श्रीकण्ठनाथात्मना ॥

माहेश्वराणा तत्त्वाना मान्ये यस्मिन्प्रदर्शके ।
प्राचामदर्शि नाथाना प्रायेण नवता भुवि ॥
यत्पादानतिमात्रेण यतीना मुक्तिरन्तिके ।
क्रियते तपसा किं तु केवल कायशोषणम् ॥

कैवल्यपदवीद्वारकवाटोद्घाटकर्मणि ।
कटाक्षा कुञ्चिका यस्य काङ्क्षता तत्र निर्वृतिम् ॥
स कदाचित्प्रियं शिष्य संगमेन्द्रमुपस्थितम् ।
न्यदिशद्देशिको दृष्ट्या निर्भरप्रेमगर्भया ॥
अग्रहार कमप्यत्र त्वया दापयितु मम ।
प्रीतिरस्ति तत कश्चिद्ग्रामो राजन्प्रदीयताम् ॥
इति तस्य गुरोराज्ञामीशिता धरणीभृताम् ।
अग्रहीदञ्जलि प्रश्नन्नवनम्रेण मौलिना ॥
पाकाख्यो विषयोऽस्त्यपारमहिमा प्राच पयोधेस्तटे
तस्मिन्विक्रमसिंहमित्यपि पुर धत्ते ललामश्रियम् ।
तस्याप्युत्तरतस्त्रियोजनमिताद्देशात्स्फुरत्युज्ज्वलो
ग्रामो विट्टरकुंटमित्यमुमदाद्राजा गुरो' प्रीतये ॥
शाकाब्दे नागशैलद्युमणि(१२७८)परिमिते दुर्मुखाब्दे तृतीये
मासि श्रीसंगमेन्द्रो गुरुहितनिरत. सगमे चन्द्रभान्वो ।
प्रादात्प्रत्यब्दकाले निजपितुरमरत्वाप्तये विद्रगुण्ड-
ग्रामं त्रिशन्मिताभ्य. श्रुतिपथनिरताभ्यो महीदेवताभ्य ॥
विद्रगुण्डमितीह प्रथितापरनामशालिनस्तस्य ।
प्रकटयति स्म यमीन्द्र[ ] प्राय श्रीकण्ठपुरमिति प्रख्याम् ॥
आ पूसलपाडभुवोऽप्पा मल्लेकुण्डसंज्ञिकासारात् ।
आ पापटपुटसविधादा वा लवणप्रभूतिकुल्याया ॥
इति प्राग्दक्षिणप्रत्यगुदीचीना दिशा क्रमात् ।
अस्याग्रहाररत्नस्य सीमासधिः प्रदर्शित ॥
देशोऽभून्मुलिकिप्रथामधिगतस्तत्रास्ति पुष्पाचलो
नाम स्थानमनुत्तम पुररिपोस्तस्योत्तरस्या दिशि ।
पेन्नाया स्फुट उत्तरत्र च तटे सिंकेसरीति श्रुत
ग्राम पूर्वमदापयन्नुपकराद्ग्रामोपहार गुरु ॥

आ सिन्धोर्वर्केराख्याया आ च जम्पूशिलोच्चयात् ।
आ वादरनदीकूलादा च केतनिकुण्टत ॥
अस्य ग्रामस्य चतसृष्वाशास्विति किल क्रमात् ।
सीमासधिरभिज्ञेय सीमाभिर्गुणसपदाम् ॥
तत्रैको हरितान्ववायजनुषेऽनन्ताय भागस्ततो
वाध्र्यश्वान्वयजन्मने द्विजनुषे द्वौ पेद्दिभट्टाय च ।
भारद्वाजकुलोद्भवाय तदनु द्वावेल्लयाख्याजुषे
हारीताय च वल्लभाय मुनये दत्तस्तथैक पुन ॥
कौण्डिन्याय च बोमयाय विदुषे भागस्तथैकस्तत
कौण्डिन्याय तु माधवाय धरणीदेवाय चैकस्तथा ।
भाग कूचयभूसुराय कृतिने श्रीवत्सगोत्राय च
श्रीवत्सान्वयसभवाय च तथा श्रीरुद्रयाख्याभृते ॥
भूय कौशिकवशलब्धजनुषेऽनन्ताय भाग श्रुत-
श्चैक काश्यपगोत्रक्लृप्तजनुषे भाग कुमाराय च ।
भागः कौशिकवशजाय च तथा श्रीमश्वयाख्याभृते
कोऽप्यन्य कपिगोत्रजाय महते श्रीदेवयायेतर ॥
अन्य कश्चिदहोभ(ब)लाय च भरद्वाजान्वयोद्भूतये
श्रीवत्सान्वयजन्मनेऽपि च पर श्रीमल्लयार्याय च ।
भारद्वाजकुलोद्भवाय तु पुन श्रीराघवायेतरो
दत्तो ह्यन्यतमस्तु कौशिकजनुर्भाजे नृसिहाय च ॥
भाग काश्यपवशभद्रजनुषे श्रीपेद्दयार्याय च
श्रीमद्गोतमवशशेखररुचे श्रीपिन्नयाख्याय च ।
कौण्डिन्यान्वयमल्लयाथ च भरद्वाजान्वयश्रेयसे
सभूताय च विट्ठलाय पुनरित्येकैकमेवार्पित ॥
दत्तो विश्रुतकाश्यपान्वयभुवे श्रीतिप्पयार्याय त-
द्गोत्रोद्भूतिजुषे तथाप्यल्लुरिति ख्याताय वीताहसे ।

नागाख्याय च धीमते गुरुभरद्वाजाभिजन्मस्पृशे
वाधूलाय च सर्वनाम वहते भागोऽयमेकैकश. ॥
श्रीशालावतवंशजाय नृहरिप्रख्याय दत्ता पुन
शाण्डिल्याय च भूसुराधिपतये श्रीगिर्यभिख्याजुषे ।
श्रीकण्ठाय च काश्यपान्वयभुवे कौण्डिन्यगोत्रश्रिते
लक्ष्मीदेवविपश्चिते तदितरे भागास्तथैकैकश ॥
सद्वृत्तोदारमुक्तामयभरितवपुर्नित्यसौगुण्यगण्य-
क्षेत्रालकारभूत शमितकटुमनस्तापवह्निप्रकाश ।
आद्यो वर्ण प्रसिद्धिं श्रयति खलु यत शाश्वतावासरम्य
स श्रीकण्ठाग्रहार. स्फुरतु विगलितत्रासमाचन्द्रवासम् ॥
इति भोगनाथसुधिया [1] संगमभूपालनर्मसचिवेन [2] ।
श्रीकण्ठपुरसमृद्ध्यौ शासनपत्रेषु विलिखिता श्लोका ॥
सामान्योऽय धर्मसेतुर्नृपाणा काले काले पालनीयो महद्भि ।
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्र ॥
एकैव भगिनी लोके विप्रदत्ता वसुधरा ।
न भोग्या न करग्राह्या विप्रदत्ता वसुधरा ॥
स्वदत्ता परदत्ता वा यो हरेत वसुंधराम् ।
षष्टिर्वर्षसहस्राणि विष्ठाया जायते क्रिमि ॥

---

१ अय **सायण-माधव**योर्भ्राता प्रतीयते, तथा च **पराशरमाधवीये**—
'**श्रीमती** जननी यस्य सुकीर्तिर्**मायणः** पिता ।
सायणो भोगनाथश्च मनोबुद्धी सहोदरौ ॥
बौधायनं यस्य सूत्र शाखा यस्य च याजुषी ।
भारद्वाजं कुल यस्य सर्वज्ञ स हि **माधव**. ॥' इत्युपलभ्यते

२ अस्यैव **संगम**महाराजस्य राज्यसमये **माधवीयधातुवृत्ति**र्माधवसहोदरसायणेन विरचिता अतएव—'**कम्प**राजसुत**सगम**महाराजमन्त्रिणा **मायण**पुत्रेण **माधव**सहोदरेण **सायणे**न विरचिताया माधवीयधातुवृत्तौ' इति प्रतिगणसमाप्तौ समुपलभ्यते

स्वदत्ताद्द्विगुण पुण्य परदत्तानुपालनम् ।
परदत्तापहारेण स्वदत्त निष्फल भवेत् ॥
न विष विषमित्याहुर्ब्रह्मस्वो विषमुच्यते ।
विषमेकाकिन हन्ति ब्रह्मस्व' पुत्रपौत्रकम् ॥
एवं विज्ञाय यो राजा पालयेत्पृथिवीसुरान् ।
साम्राज्यलक्ष्मीसंपन्न स भूमौ सुखमेधते ॥

॥ श्रीविरूपाक्ष ॥

श्रीकण्ठपुरसपूर्त्यै श्रीविरूपाक्षसज्ञया ।
लिखित संगमेन्द्रेण पत्रे पञ्चाक्षरो मनुः ॥
श्रीकण्ठनाथ ॥ मङ्गलमहा० श्री श्री श्री श्री श्री ॥

(एपिग्राफिआ इण्डिका—३।२४-३२

---

(१४०)

श्रीवीरबुक्कमहाराजप्रपौत्रवीरविजयमहाराजपुत्र-श्रीदेवरायमहाराजानां[1] शासनपत्रम् ।

भूयस्यै भवता भूत्यै भूयादाश्चर्यकुञ्जर ।
विहारविपिन यस्य विदुर्वेदान्पुराविद' ॥
क्षेम व प्रचुरीकुर्यात्क्षोणीमभ्युद्वहन्नयम् ।
क्रोडाकृतेरभूद्यस्य क्रीडापल्वलमम्बुधि' ॥
अस्ति क्षीरार्णवोद्भूतमपापुष्पमनुत्तमम् ।
अम्लान यदनिर्माल्यमाधत्ते शिरसीश्वर ॥
सदामोदनिधेस्तस्य सतानो यदुसंज्ञया ।
अभूदाश्चर्यमाधुर्यं वसुधायास्तप फलम् ॥

---

१ 'इद शासनपत्र विल्लूरपरिगणे सत्यमङ्गलम्ग्रामे अरुणाचलसंनिधौ गर्तस्थितं Mr H. Le Fanu I C S महाशयेन गृहीत्वा मत्पार्श्वे प्रेषितम्' इति Dr E Hultzsch Ph D महाशया प्रकाशका

संगमो नाम राजासीत्सारभूते तदन्वये ।
प्रजाना य समस्ताना प्रमोदो मूर्तिमानिव ॥
सर्वरत्ननिधेस्तस्य सम्राडासीत्तनूभुवाम् ।
मध्ये बुक्कमहीपालो गणीनामिव कौस्तुभ' ॥
अहीनभोगससक्तिरसौ राजशिखामणि ।
गोप्ता हरिहरं गौर्या कुमारमुदपादयत् ॥
य. षोडशमहादानमहामण्डपकर्मणा ।
भवन कृतवान्सर्व भुवन कीर्तियोषित ॥
तस्य मल्लाम्बिकाजानेरुदभूदुन्नतो गुणैः ।
प्रतापदेवरायाख्य पुत्र सुत्रामविक्रम ॥
कर्णतालानिलैर्यस्य करिणा समराङ्गणे ।
तुलुष्कास्तुरगारूढास्तूलानामभजन्दशाम् ॥
हेमाम्बिकाया तस्यासीत्तनयो विनयोन्नत ।
विद्यानिधिर्विशेषज्ञो वीरो विजयभूपति ॥
प्रतापकीर्तिलतयो प्रभोर्यस्य समिद्धयो ।
पुष्पाणि तडितस्ताराः पुष्पवन्तौ च तौ फले ॥
दयानिधेरभूत्तस्य देवी नारायणाम्बिका ।
शौरेरिव महालक्ष्मी शकरस्येव पार्वती ॥
पुत्ररूप तयो' श्लाघ्य पूर्वजन्मतप फलम् ।
देवरायमहीपालो दाता विजयते भुवि ॥
कलिकालानलज्वालाजालग्लपितकन्दल ।
दाताम्बुधारया यस्य भ्रियते धर्मपादप. ॥
यस्य प्रतापतपने यशश्चन्द्रे च जाग्रति ।
सदैव कमलोल्लासः सदा कुवलयोत्सवः ॥
कृते पृथुरभूद्रामस्त्रेताया द्वापरेऽर्जुन. ।
विभाति यः कलौ धीर. क्षितावेकधनुर्धर' ॥

सौन्दर्यसारे कदर्पं सर्वानन्दे सुधाकरम् ।
क्रीडारसेषु य कृष्ण कीर्तयन्ति कवीश्वरा ॥
राजाधिराजस्तेजस्वी यो राजपरमेश्वर ।
भाषातिलङ्घिभूपालभुजङ्गबिरुदोज्ज्वल ॥
मूरुरायरगण्डाङ्क पराजयभयकर ।
हिन्दुरायसुरत्राणो बन्दिवर्गेण वर्ण्यते ॥
प्रतापदेवरायेण प्रख्यातेनानुजन्मना ।
महेन्द्रस्येव यस्य श्रीरुपेन्द्रेण प्रकाशते ॥
श्रीतुङ्गभद्रापरिखे नगरे विजयाह्वये ।
पित्र्य सिंहासन प्राप्य सागरान्ता महीमवन् ॥
पुण्यश्लोकाग्रणी श्रीमान्देवरायमहीपति ।
तुङ्गभद्रानदीतीरे श्रीविरूपाक्षसंनिधौ ॥
तत्त्वलोके (१३४६) शकस्याब्दे क्रोधिसवत्सरे शुभे ।
आषाढामातिथौ पुण्ये सोमवारविराजिते ॥

मरकतनगरप्रान्ते—

आन्दनाडाह्वये देशे चिटेयाख्यूरुसज्ञकम् ।
ग्राम त नामधेयेन कृत्वालकृतमात्मनः ॥
निधिनिक्षेपवार्यश्मसिद्धसाध्यादिसयुतम् ।
अखण्ड सीमभिर्जुष्ट निरुपाधिकमञ्चितम् ॥
आचन्द्रतारक धारापूर्वक दक्षिणान्वितम् ।
अग्रहारममुं प्रादाद्भूसुरेभ्य प्रतापवान् ॥
दत्तोऽयमग्रजन्मभ्यो देवरायमहीभुजा ।
आचन्द्रतारक भूमावग्रहारः सुमेधसाम् ॥

अस्य वृत्तिभाजोऽग्रजन्मान. कथ्यन्ते—

भारद्वाजकुलोत्तस कृष्णदेवस्य नन्दन. ।
ऋक्शाखापारगः श्रीमाञ्छिङ्गार्यो गुणोन्नतः ॥

प्राज्ञो नरहरिः श्रीमान्नागपो विट्टपः सुधीः।
संकणार्यो नरप[ति]सूरिर्वल्लभकोविद ॥
शिङ्गपार्यस्य तनया सहजा विनयोन्नता ।
भारद्वाजो नरहरिर्विरूपाक्षस्य नन्दन ॥
ऋक्शाखापारदृश्वानो भारद्वाजकुलोद्वहा ।
एकैकवृत्तिभाजोऽस्मिन्नित्यमष्टौ द्विजोत्तमा ॥
अष्टावस्याग्रहारस्य वृत्तय परिकल्पिता· ।
प्राच्यादिदिक्षु सीमान कथ्यन्ते देशभाषया ॥
[· ·····]

आभि· सीमाभिरास हरिहयमहिमा दत्तवानग्रहार
विप्रेभ्यो वेदविद्भ्यो विमलतरयशा देवरायक्षितीन्द्र· ।
आलोकालोकशैलादखिलधरणिभृन्मस्तकन्यस्तपाद
प्रीत्या पृथ्वी समस्तामवतु चिरमिमा दिक्षु दीव्यत्प्रताप ॥

एकैव भगिनी लोके सर्वेषामेव भूभुजाम् ।
न भोज्या न करग्राह्या विप्रदत्ता वसुंधरा ॥
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम् ।
दानात्स्वर्गमवाप्नोति पालनादच्युत पदम् ॥
स्वदत्ता परदत्ता वा यो हरेत वसुधराम् ।
षष्टिर्वर्षसहस्राणि विष्ठाया जायते क्रिमि· ॥

सामान्योऽय धर्मसेतुर्नृपाणा काले काले पालनीयो महद्भि· ।
सर्वानेतान्भाविन· पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्र ॥

श्री श्री श्री श्री श्री ॥ श्रीविरूपाक्ष ॥

(एपिग्राफिआ इण्डिका—३।३७–३९)

(१४१)

श्रीमाधववर्ममहाराजानां शासनपत्रम् ।

ओं स्वस्ति ।

इन्दोर्धौतमृणालतन्तुभिरिव श्लिष्टैः करैः कोमलै-
र्बद्धाहेररुणैः स्फुरत्फणमणेर्दिग्धप्रभासोऽशुभिः ।
पार्वत्याः सकचग्रहव्यतिकरव्यावृत्तबन्धश्लथा
गङ्गाम्भःप्लुतिभिन्नभसकणिकाः शम्भोर्जटा पान्तु वः ॥
श्रीमानुच्चैर्नभस्तो गुरुरचलपते क्षोभजिद्य क्षमाया
गम्भीरस्तोयराशेरथ दिवसकराद्भास्वदालोककारी ।
ह्लादी सर्वस्य चेन्दोस्त्रिभुवनभवनप्रेरकश्चापि वायो
राजेन्द्रः स्थाणुमूर्तिर्जयति कलिमलक्षालनो माधवेन्द्रः ॥
प्रांशुर्महेभकरपीवरचारुबाहु
कृष्णाश्मसचयविभेदविशालवक्षाः ।
राजीवकोमलदलायतलोचनान्तः
ख्यातः कलिङ्गजनतासु पुलिन्दसेनः ॥
तेनेत्थं गुणिनापि सत्त्वमहता नेष्टं भुवो मण्डलं
शक्तो यः परिपालनाय जगतः को नाम स स्यादिति ।
प्रत्यादिष्टविभूत्सवेन भगवानाराधितः शाश्वत-
स्तच्चित्तानुगुणं विधित्सुरदिशद्वाञ्छा स्वयंभूरपि ॥
स शिलाशकलोद्भेदे तेनाप्यालोक्य धीमता ।
परिकल्पितसद्वंशः प्रभुः शैलोद्भवः कृतः ॥

---

१. इदं शासनं येषु ताम्रपत्रेषु सलिखितं वर्तते तानि ताम्रपत्राणि मद्रासप्रान्ते गंजामपरिगणे गम्सूराधिकारे बागुदाग्रामे एकस्मिन्क्षेत्रे मृद्भाण्डनिहितानि भूमिगर्तस्थानि समुपलब्धानि Mr E C Johnson, I C S, (Collector, Ganjam)महाशयेन Dr Hultzsch महाशयपार्श्वे प्रेषितानि सांप्रतं Government Central Museum, Madras, स्थाने वर्तन्ते इति संशोधकाः F. Kielhorn, Ph. D, C. I. E. महाशयाः

शैलोद्भवस्य कुलजो **रणभीत** आसी-
द्येनासकृत्कृतभिया द्विषदङ्गनानाम् ।
ज्योत्स्नाप्रबोधसमये स्वधियैव सार्ध-
माकम्पितो नयनपक्ष्मजलेषु चन्द्र ॥

तस्याभवद्विबुधपालसमस्य सूनु
श्रीसैन्यभीत इति भूमिपतिर्गरीयान् ।
य प्राप्य नैकशतवैरिघटाविघट्टि-
लब्धप्रसादविजय मुमुदे धरित्री ॥

तस्यापि वंशेऽथ यथार्थनामा जातो **यशोभीत** इति क्षितीश ।
येन प्ररूढोऽपि शुभैश्चरित्रैर्मृष्ट कलङ्क कलिदर्पणस्य ॥

जात' स तस्य तनय' सुकृती समस्त-
सीमन्तिनीनयनषट्पदपुण्डरीक ।
श्रीसैन्यभीत इति भूमिपतिर्महेभ-
कुम्भस्थलीदलनदुर्ललितासिधार ॥
जातेन येन कमलाकरवत्स्वगोत्र-
मुन्मीलितं दिनकृतेव महोदयेन ।
सक्षिप्तमण्डलरुचश्च गता प्रणाश-
माशु द्विषो ग्रहगणा इव यस्य दीप्त्या ॥
कालेयैर्भूतधात्रीपतिभिरुपचितानेकपापावतारै-
र्नीता येषा कथापि प्रलयमभिमता कीर्तिपालैरजस्रम् ।
यज्ञैस्तैरश्वमेधप्रभृतिभिरमरा लम्भिता तृप्तिमूर्वी-
मुद्दृप्तारातिपक्षक्षयकृतिपटुना श्रीनिवासेन येन ॥
कैङ्गोदकृतनिकेतः शरन्निशाकरमरीचिसितकीर्तिः ।
स **श्रीमाधववर्मा** रिपुमानविघट्टन कुशली ॥

गुड्डविषये श्रीसामन्तमहासामन्तमहाराजराजानकराजपुत्रदण्डनायका-न्तरङ्गकुमारामात्योपरिकतदायुक्तकविषयपतिवैश्वासिकपत्तलकादीन्ब्राह्मणपू-

ज्ञानपदानन्याश्च वर्तमानभविष्यतो व्यवहारिण' साधारणान्यथार्ह दतेत्यो-
[बोध्यो)पदर्शयति । विदितमस्तु भवतामेतद्विषयसबन्धखदिरपाट्टके
:पिणो ग्राम, स्वपित्रोरात्मनश्च पुण्याभिवृद्धये सूर्यग्रहोपरागे तैत्तिरीयच-
ाय हारितगोत्राय त्र्यार्षेयाङ्गिरसाम्बरीषयौवनाश्वेति युवनाश्ववदम्बरी-
ादङ्गिरस्वत् वामणस्य नप्त्रे आदित्यदेवस्य सूनवे भट्टवामणाय सलिल-
रापुर सर अकरीकृत्य प्रतिपादितस्तदेषामाचन्द्रार्ककालमुपभुञ्जानाना
ंगौरवान्न केनचिद्विघाते वर्तितव्यम् । अपि च ।

विद्युद्विलासतरलामवगम्य सम्य-
ग्लोकस्थिति यशसि सक्तमनोभिरुच्चै, ।
नित्य परोपकृतिमात्ररतैर्भवद्भि
र्द्धर्माभिराधनपरैरनुमोदितव्यम् ॥

उक्त च मानवे धर्मे—

बहुभिर्वसुधा दत्ता राजभिः सगरादिभि, ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
स्वदत्ता परदत्ता वा यो हरेत वसुधराम् ।
स विष्ठाया कृमिर्भूत्वा पितृभि' सह पच्यते ॥
मा भूदफलशङ्का व परदत्तेऽपि पार्थिवा ।
स्वदानात्फलमानन्त्य परदत्तानुपालने ॥
षष्टिं वर्षसहस्राणि स्वर्गे मोदति भूमिद ।
आक्षेप्ता चानुमन्ता च तान्येव नरके वसेत् ॥
लिखितोपेन्द्रसिंहोऽत्र तनय कुण्डभोगिन ।
लाञ्छित जयसिहेन उत्कीर्ण दड्डिभोगिना ॥
सम्यगाराधितस्वामिप्रसादः श्रेष्ठदूतक ।
गङ्गभद्रो ' " प्रातिहार्ये व्यवस्थित ॥

(एपिग्राफिआ इण्डिका—३।४३–४६)

(१४२)

धारानगराधीश्वरजयसिंहमहाराजानां शासनम्[1] ।

ॐ

जयति व्योमकेशोऽसौ य सर्गाय बिभर्ति ताम् ।
ऐन्दवीं शिरसा लेखा जगद्वीजाङ्कुराकृतिम् ॥
तन्वन्तु व स्मरारातेः कल्याणमनिशं जटा ।
कल्पान्तसमयोद्दामतडिद्वलयपिङ्गला ॥

परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीवाक(क्प)तिराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीसिन्धुराजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीभोजदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरश्रीजयसिंहदेव॰ कुशली ॥ पूर्णपथकमण्डले मक्कुलाग्रामद्विचत्वारिंशदन्त पातिभीमग्रामे समुपगतान्समस्तराजपुरुषान्ब्राह्मणोत्तरान्प्रतिनिवासिपट्टकिलजनपदादींश्च समादिशति—अस्तु वः संविदितम् । यथा—श्रीमद्धारावस्थितैरस्माभि॰ स्नात्वा चराचरगुरु भगवन्तं भवानीपतिं समभ्यर्च्य संसारस्यासारता दृष्ट्वा

वाताभ्रविभ्रममिदं वसुधाधिपत्य-
मापातमात्रमधुरो विषयोपभोग॰ ।
प्राणास्तृणाग्रजलबिन्दुसमा नराणा
धर्मः सखा परमहो परलोकयाने ॥

---

१ इद शासन ययोस्ताम्रपत्रयोर्लिखित वर्तते ते ताम्रपत्रे नर्मदानिकटस्थे मान्धातान्तरीपे नीमारपरिगणे समुपलब्धे Mr Consens (Superintendent of the Archæological Survey of Western India) महाशयेन यत्नाधिक्येन प्रतिबिम्बीकृते Dr Hultzsch महाशयेन मम समीपे प्रैषि इति संशोधकवरा Dr F Kielhorn, Ph D, C I E महाशया॰॰

अमत्ससारचक्राग्रधाराधारामिमा श्रियम् ।
प्राप्य ये न ददुस्तेषा पश्चात्ताप पर फलम् ॥

इति जगतो विनश्वर स्वरूपमाकलय्योपरिलिखितग्रामोऽय स्वसीमातृणगोचरयूतिपर्यन्तः सहिरण्यभागभोग सोपरिकर, सर्वादायसमेतश्च श्रीअमरेश्वरे पट्टशालाब्राह्मणेभ्यो भोजनादिनिमित्त मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धयेऽदृष्टफलमङ्गीकृत्य चन्द्रार्कार्णवक्षितिसमकाल यावत्परया भक्त्या शासनेनोदकपूर्व प्रतिपादित इति मत्वा तन्निवासिपट्टकिलजनपदैर्यथादीयमानभागभोगकरहिरण्यादिक देवब्राह्मणभुक्तिवर्जमाज्ञाश्रवणविधेयैर्भूत्वा सर्वमेभ्य समुपनेतव्यम् । सामान्य चैतत्पुण्यफलं बुद्ध्वास्मद्वशजैरन्यैरपि भाविभोक्तृभिरस्मत्प्रदत्तधर्मदायोऽयमनुमन्तव्य पालनीयश्च । उक्त च—

'बहुभिर्वसुधा भुक्ता राजभि, सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीहदत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तिप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
अस्मत्कुलक्रममुदारमुदाहरद्भि-
रन्यैश्च दानमिदमभ्यनुमोदनीयम् ।
लक्ष्म्यास्तडित्सलिलबुद्बुदचञ्चलाया
दान फल परयशःपरिपालन च ॥
सर्वानेतान्भाविनः पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्र, ।
सामान्योऽय धर्मसेतुर्नृपाणा काले काले पालनीयो भवद्भि, ॥'
इति कमलदलाम्बुबिन्दुलोला श्रियमनुचिन्त्य मनुष्यजीवित च ।
सकलमिदमुदाहृत च बुद्ध्वा नहि पुरुषै, परकीर्तयो विलोप्या, ॥

इति सवत् ११११२ आषाढवदि १३ । स्वयमाज्ञा । मङ्गल महाश्रीः । स्वहस्तोऽय श्रीजयसिंहदेवस्य ॥

(एपिग्राफिआ इण्डिका—३।४८-५०)

(१४३)

श्रीअन्नवेमभूपतेः शासनपत्त्रम्[1] ।

अविघ्नमस्तु ।

अव्याद्विभु किरिवपुर्भुवमुद्धरन्य
शेषस्फटामणिसहस्रगतस्वबिम्ब. ।
सुव्यक्तमाश्रितजनाय तदादरेण
स्वीय विभाति कथयन्निव सर्वगत्वम् ॥
शभोर्हेरिफणारत्नै कर्तुं हार समुत्सुक ।
तानि स्पृशन्पितुर्वक्ष पश्यन्पातु गजानन. ॥
सा चन्द्ररेखा जयति श्रीकण्ठस्य जटास्थिता ।
या धत्ते पार्वतीभालफलकश्रियमुज्ज्वलाम् ॥
विष्णोर्नाभिसरोजाताज्जात सरसिजासन ।
तदाज्ञया जगत्सर्व ससर्ज सचराचरम् ॥
यत्र चतुर्थो वर्ण शौरे. पदपद्मसंभवो जयति ।
यस्य सहजा स्रवन्ती त्रिभिः प्रवाहै पुनाति भुवनानि ॥
तस्मिन्नभूदिन्दुरिवाम्बुराशौ प्रोलक्षितीशो जगदेकपाल. ।
कलानिधेर्यस्य निजावतार सतर्पणायैव सदा बुधानाम् ॥
तस्य पुण्योदयाज्जात सुपुत्र प्रोलभूपतेः ।
वेमावनीश्वरो नाम पुण्यश्लोको नृपाग्रणी ॥
यस्मिन्नृपे शासति धर्मशीले महोत्सवान्प्राप्य महीवधूटी ।
स्वीय हरिश्चन्द्रनृपालमुख्यैर्वियोगदु.ख सहसा मुमोच ॥

---

१ इद शासन येषु ताम्रपत्त्रेषु लिखितमस्ति तानि ताम्रपत्त्राणि गोदावरीनिकटे अमलापुरमूपरिगणे वनमल्लीग्रामे एकस्या जीर्णकल्पभूमौ खनकेनोपलब्धानि Mı P V S, Gopalam महाशयेन ज्ञात्वा Aıchæologıcal survey, Madras सज्ञकस्याधिकारिणे निवेदितानि स्वामिना Vıssapragad Krıshnayya महाशयेन मद्रासस्वामिने समर्पितानि साप्रत मद्रासप्रदर्शिन्या वर्तन्ते इति सशोधका Dr E Hultzsch, Ph D महाशया . २ 'हरि' भवेत्

हेमाद्रिदानान्यकरोदशेषाण्यभुङ्क्त भूमिं द्विजभुक्तशेषाम् ।
य सततीं सप्त चकार तस्य किं वर्ण्यते वेमविभोश्चरित्रम् ॥

सोपानानि विधाय वेमनृपतिः पातालगङ्गापथे
स्तम्भस्त्व निजधर्मशासनविधे. श्रीशैलमेवानयत् ।
आस्थाने सुरसिद्धसयमिगणैरासेव्यमान. सदा
वक्रैस्तत्पुरुषादिभि कवयते देवो यदीय यश. ॥

आसीदप्रतिमप्रतापमहिमा हेमाद्रिदानव्रती
वीरश्रीपतिरन्नवोतनृपतिर्वेमक्षितीशात्मज ।
बाहाखड्गवशादशाद्वसुमतीमेकातपत्रश्रिय
यश्चक्रे च यश.प्रवाहनिवहैस्त्रैलोक्यमेकार्णवम् ॥

जित्वा महीं जिष्णुरिव स्वशक्त्या दत्त्वाग्रहारान्धरणीसुतेभ्य. ।
कृत्वा कृतार्थं निजबन्धुवर्गं जने. फल प्राप स भूमिपाल ॥

तस्यानुजन्मा **जगनोब्बगण्डः** कीर्तिप्रियो भूपतिर**न्नवेमः** ।
वृत्तिर्यदीया भुवि मात्रिकाभूद्धर्मार्थकामाचरणोद्यतानाम् ॥

श्री**कोंडवीटी**पुरिराजधान्या सिंहासनस्थे सति यत्र राज्ञि ।
महोग्रसिंहासनवन्महीध्रान्व्रजन्ति सेर्ष्या इव वैरिभूपाः ॥

यत्खड्गफलके च्छाया स्फुरन्त्यतिविनिर्मला ।
अनन्तक्षोणिपालाना भाग्यरेखा इवाहृताः ॥

तेनान्नवेमक्षितिपेन दानक्षात्रैकतानेन महोन्नतेन ।
चतुर्दिगन्ता धरणी कृतासीदपारिजाता च सपारिजाता ॥

खड्गो जिष्णु शुचि काल क्रव्यात्पाशी प्रभञ्जन. ।
श्रीदो भीमोऽन्नवेमस्य धत्ते दिक्पालडम्बरम् ॥

केचिद्देशाधिपत्य कतिचन शिबिकाचामरच्छत्रशोभा
केचिद्राज्य स्वकीय कतिचन विभवैरग्रहारानुदारान् ।
विन्दन्ते लोकरक्षाविधिमहितमहाभागधेयेऽन्नवेम-
क्षोणीपाले सभाया सकलगुणनिधौ रत्नसिंहासनस्थे ॥

क्षुरिकाकलिवेताल' कर्पूरवसन्तरायबिरुदाङ्क ।
नि'सीमभूमिदान श्रीनिधिरनवेमभूपतिर्जयति ॥

अन्नवेमप्रभोर्लक्ष्मीर्विबुधाना विभूतये ।
तस्यैव कीर्तये जाता तेषामपि सरस्वती ॥

शाकाब्दे गगनाश्रविश्व(१३७०)गणिते सिद्धार्थिसवत्सरे
माघे कृष्णचतुर्दशी शिवतिथौ वीरान्नवेमप्रभु ।
प्रादादिमडिलंकसञ्ज्ञमतुल कृत्वाग्रहारोत्तम
ग्राम लोहितगोत्रजाय विदुषे श्रीइम्मडीन्द्राय स ॥

नीतो मन्त्रीश्वरो विद्यागोष्ठीषु विबुधाग्रणी ।
मित्र हितोपदेशेषु भूभुजामिम्मडीश्वर ॥

स इम्मडीन्द्रः सकलार्थवेदी मानाधिको मल्लयमन्त्रिसूनु' ।
लब्ध्वाग्रहार लसदन्तरात्मा प्रादात्तदर्ध धरणीसुरेभ्य ॥

वीराध्यापकमहित गौतमकन्याप्रवाहपरिवीतम् ।
भाति बहुसस्यशोभितमिम्मडिलकान्नवेमपुरमनघम् ॥

अथ सीमानिर्णय.—

क्रिहेवीपश्चिमश्वत्था प्राच्या यामे तु दिङ्मुखे ।
प्रख्याग्रा मागणाश्वत्थभुग्गुल्लसदवेश्मनो. ॥

ऋज्वी या माध्यमा च्छाया प्रतीच्या दिशि गौतमी ।
उदीच्यामपि कौड्डूरीकौड्डेपूडीवटान्तरम् ।
सीमा इम्मडिलकस्य ग्रामस्य परिकीर्तिता. ॥

अथ पुराणवचनानि—

दानपालनयोर्मध्ये पालन परम यशः ।
दानात्स्वर्गमवाप्नोति पालनादच्युत पदम् ॥

स्वदत्ताद्द्विगुण पुण्य परदत्तानुपालनम् ।
परदत्तापहारेण स्वदत्तं निष्फल भवेत् ॥

न विष विषमित्याहुर्ब्रह्मस्वं विषमुच्यते।
विषमेकाकिनं हन्ति ब्रह्मस्व पुत्रपौत्रकम्॥

रामचन्द्रेण उदीरित च—

सामान्योऽय धर्मसेतुर्नृपाणा काले काले पालनीयो भवद्भि.।
सर्वानेवभाविन पार्थिवेन्द्रान्भूयोभूयो याचते रामचन्द्रः॥

श्रीमत्रिलोचनार्यः सुकवि. कविवशदीपको जयति।
अनवेमनृपतिदत्तस्येम्मडिलङ्कस्य शासन कृतवान्॥

महानटजटाछटानटदमन्दमन्दाकिनी-
कलक्कणितकङ्कणव्रजविजृम्भिवाग्गुम्फन।
कवि' कविकुलोद्भवो भुवनभव्यदिव्योदय
शिवागमविशारदो जयति शारदावल्लभ'॥

श्रीमत्रिपुरान्तक.। अनवेमु व्राछु॥

(एपिग्राफिआ इण्डिका—३।६०–६३)

---

(१४४)

श्रीजायचमूपतिकारितगणपतीश्वरप्रतिष्ठाशासनम्[1]।

श्रीकान्त श्रियमातनोतु भवता क्रोडाकृतिर्वारिधे-
रज्ञात्वाशु समुद्धृता लघुतयोद्धर्तुं क्षितिं दंष्ट्रया।
यस्तावद्ववृधे निपीडिततनुर्ब्रह्माण्डखण्डे भृश
स्वस्थानस्थितियाचनोचितपदैस्तुष्टाव यावन्न सा॥

---

१ इद च शासन किष्टनापरिगणे मसुलीपट्टम् वान्दरताळुकामध्ये टलगडा-देवीनिकटे गणपेश्वरम्ग्रामे दुर्गाम्बामन्दिरसमुखे वर्तमानस्य पाषाणस्तम्भस्य त्रिषु पश्चिमदक्षिणपूर्वभागेषूल्लिखितम् एतस्य समाप्तेरनन्तर पूर्वभागे उत्तरभागे चापराणि चत्वारि स्वल्पशासनानि समुल्लिखितानि इद शासन Mr G Mackenzie महाशयेन Manual of the Kistna District पुस्तके २१४ पृष्ठे Mr R Sewell महाशयेन च List of Antiquities ग्रन्थे प्रथमभागे ५४ पृष्ठे प्रकाशितम् इति E Hultsch महाशया प्रकाशकवरा' शकसवत् ११५३ (1232 A D) समयस्तु व्यक्त एव

जयति शिरसि शंभोरिन्दुलेखा मयूखै-
रमृतविसरसारैः क्षालयन्ती जगन्ति ।
शिशिरविशदगङ्गावारिभृज्जूटभास्व-
त्कनककलशलग्ना राजतीव प्रणाली ॥
गजास्य पातु वो यस्य भान्ति दानान्तिकालिन ।
महाद्रिनिर्झरोपान्तकान्तनीलोपला इव ॥
अस्त्युर्जित काकतिवंशजाना नरेश्वराणा कुलराजधानी ।
अन्ध्रावनीमण्डनमन्मकोण्डनामाभिराम नगर धरित्र्याम् ॥
तत्र स्थित प्रोलधराधिनाथ स्वबाहुवीर्येण धरा ररक्ष ।
यस्य प्रतापज्वलने समन्ताच्छत्रुक्षितीशा शलभा बभूवु ॥
केचिन्मन्तनगुं[ड]वत्क्षितिभृत खड्गेन निष्खण्डिता
केचित्तैलपदेववद्गजहय युद्धाजिरे त्याजिता ।
केचिद्दूरमपोहिता समरतो गोविन्ददण्डेशव-
त्केचित्स्वस्वपदेषु येन निहिताश्चोडोदयक्ष्मेशवत् ॥
तस्मात्प्रोलनरेशान्मुप्पलदेव्यां बभूवतु पुत्रौ ।
रिपुनृपमदेभसिंहौ [रु]द्रमहादेवभूप[तीं] ख्यातौ ॥
पितु परोक्षे वसुधा शशास रुद्रक्षमाभृद्भुवनैकवीरः ।
यस्य प्रतापोल्बणदाववह्नि प्रत्यर्थिपृथ्वीशवन ददाह ॥
उन्मृष्टानि पुराणि येन कथयन्त्यापूर्य तत्तज्जनै-
स्तत्तन्नामभिरोरुगल्लुनगरे निर्मापिता वाटिकाः ।
किंच स्वेषु कृतेषु तेष्वथ पुरेष्वापूर्य नूत्नैर्जनै
श्रीरुद्रेश्वरसज्ञया विरचिताः प्रख्यातदेवालयाः ॥
पोषणैस्तोषणैर्दण्डै पालनैरुपलालनैः ।
सवर्धिताः प्रजा येन पित्रेव धरणीभृता ॥
दिव गते रुद्रनृपे बभार भुव महादेवविभुर्विनेशु' ।
प्रतापभाना[वु]दिते यदीये तेजासि भानाविव भूपतीनाम् ॥

तस्मान्महादेवमहामहीशाद्बय्याम्बिकायामभवत्प्रभावान् ।
सर्वसहासर्वधुरीणपाणि कुलप्रदीपो **गणपत्यधीश** ॥
यस्योन्मत्तगजेन्द्रगण्डविगलद्दानाम्बुवृष्टिप्लुते
त्वङ्गत्तुङ्गतुरङ्गनिष्ठुरखुरै कृष्टे तथानेकधा ।
युत्क्षेत्रे रिपुहस्तिमस्तकगलन्मुक्तौघ[बी]जाकृते
जाताः कीर्तिलताः शशाङ्कविशदा वेल्लन्ति दिग्भित्तिषु ॥
निज[भु]जविजिताना निर्जिताना परैर्वा
शरणमुपगताना सोमसूर्यान्वयानाम् ।
निखिलनरपतीनामाश्रय. सन्सदा य.
प्रतिदिनपरिवृद्धप्राज्यराज्यो विभाति ॥
अस्य भृत्य. प्रियो भाति गणपत्यवनीभृत. ।
श्रीमज्जायचमूनाथ. कथ्यतेऽय तदन्वयः ॥
विक्रान्तिमानय्यकुले प्रसिद्धे प्रादुर्बभूवात्र कलौ स **भीमः** ।
दु शासनः शासित एव शत्रुर्दुर्योधनोऽयोधि सुखेन येन ॥
भुवोऽवतसे वेलनाण्डुदेशे क्रोय्यूरुसज्ञं कुलसन्निवासम् ।
ग्राम स **भीमो** धनदोपमानश्चकार वित्तैरलकोपमानम् ॥
रच्याम्बिकाया प्रबभूवुरस्मात्ते **जिल्लनारायणसूरयाख्या** ।
शक्तिप्रभेदैरिव यैस्त्रिभिश्च जिगाय शत्रून्भुवि **चोडिभूपः** ॥
जिल्लः समुल्लासितबाहुवीर्यः **कन्नारदेवं** समरे विजित्य ।
लेभे निजेशाच्छिबिकातपत्राद्यशेषचिह्नैर्ध्वजिनीपतित्वम् ॥
तस्यानुज. सततमेव भर्तुर्**नारायणः** कार्यपरायणोऽभूत् ।
यश्चोडिभूपस्य रिपूनशेषाश्चकार भृत्यान्नयविक्रमाभ्याम् ॥
य कृष्णवेणीलवणाब्धिसङ्गे द्वीप पुरैतद्धनदेन सृष्टम् ।
परैर्दुराप वसता मनोज्ञं चकार दुर्गं प्रभुणा नियुक्तः ॥
पूर्णाभ्यर्णतटाकवा प्लुतलसच्छालीक्षुकेदारक
नानापुष्पफलाभिशोभितमहारामाभिरामस्थलम् ।

सौधाट्टालकहर्म्यगोपुरबृहत्प्राकारभास्वत्पुर
द्वीप भूपनिवासयोग्यमकरोद्य प्रागसेव्य नृणाम् ॥
चोडसमुद्रतटाक **चोडेश्वरधाम** चात्र हि द्वीपे ।
यश्चक्रे पतिनाम्ना **भीमेश्वरमन्दिरं** च पितृनाम्ना ॥
अत्रैव प्रासादान्विष्णोश्च करालभैरवस्यापि ।
यश्चाकरोन्मनोज्ञान्चण्डुलदेव्या महाकाल्या. ॥
अथ **वङ्कुळ**नामग्रामे यश्चाकरोत्पितुर्नाम्ना ।
भीमसमुद्रतटाक **भीमेश्वर**नाम रम्यशिवभवनम् ॥
नारायणाय तस्मै पौरुषपरितोषित पति प्रादात् ।
द्वीपस्याधिपतित्व स्वामित्व चापि **गोण्डु**पल्लीनाम् ॥
अर्थार्जकमतिशूर ज्ञात्वा देशाधिकारधौरेयम् ।
चक्रे सेनाधिपमपि **नारायण**मेव चोडिनरनाथ. ॥
तस्माज्जाता' ख्यातनारायणाख्या**न्नाराम्बा**या सूनवो भानुभास ।
चोडिर्भीमः पिन्नचोडिर्यशस्वी नाम्ना **ब्रम्म**श्चेति चत्वार एते ॥
अपामधीशा इव वाडवाश्रया प्रभोरुपाया इव कार्यसाधका ।
करा इवाश्लिष्टरमा मुरद्विषो विभान्ति चत्वार इमे भटोत्तमाः ॥
चोडपृथ्वीशभूपस्य च[तु]राशाजयावहा ।
अभूवन्बाहुवीर्येण चत्वारो भटपुगवा ॥
विष्णो श्रीरिव गीरिवाम्बुजभुव शभोरिवाद्रे सुता
कामस्येव रति. शचीव सुरपस्योषेव शोचिष्पते. ।
शीतांशोरिव रोहिणी गुणनिधे. श्री**पिन्न**[चो]**डि**प्रभो-
र्द्दामाम्बा कुलपालिका समभवद्धौरर्थिना कामधुक् ॥
नाराम्बा पेरमाम्बा च सुते जाते तयोरुभे ।
पुत्रास्त्रयोऽभवन्पृथ्व**जायनारायणा**ह्वया ॥
भ्रातृषु त्रिषु तेष्वेष मध्यमोऽप्युत्तमो गुणै' ।
राजते **जायसैन्येश**. पाण्डवेष्विव मध्यम. ॥

कालेऽस्मिन्नृपशेखरो गणपतिक्षोणीपतिर्लीलया
जित्वा चोलकलिङ्गसेवणबृहत्कर्णाटलाटाधिपान् ।
रक्षन्दक्षिणसिन्धुविन्ध्यनगयोर्मध्यक्ष्मामण्डल
सद्वीप वेलनाण्डुदेशमखिल स्वायत्तमेवाकरोत् ॥
स्त्रीरत्नपुरत्नगजाश्वरत्ननानाशिलारत्नचय समन्तात् ।
आहृत्य चास्मद्वेलनाण्डुदेशात्प्रावेशयत्स्व पुरमेव भूपः ॥
अथ रूपविलासविभ्रमैरसमाने भुवनत्रयेऽप्ययमू ।
गणपत्यवनीपतिर्व्यधाद्दयिते नारमपेरमाह्वये ॥
तदनुजमतिसौम्याकारमाकारलक्ष्म्यै
सुविनयनयदाक्ष्यस्थैर्यगाम्भीर्यशौर्यै. ।
शिशुमपि गरिमाण प्रापित जायनाख्य
नरपतिरभिनन्द्य स्वानुचर्ये न्ययुङ्क्त ॥
तत' प्रसन्नश्चरितैर्मुदास्मै प्रादात्क्षितीश खलु जायनाय ।
आन्दोलिकाछत्रसनाथचिह्नं सेनाधिपत्य गजसाधनित्वम् ॥
सुरेश्वरेणेव निजेश्वरेण सेनाधिपत्याधिकृतो विभाति ।
जायः कुमारो विबुधै परीत' सप्राप्तशक्ति. परवीरहन्ता ॥
यस्यासिधारा प्रबलाहिताना देवाङ्गनासङ्गमनैकदूती ।
यन्नीतिरन्यक्षितिपाललक्ष्मीसधानदूती निजवल्लभस्य ॥
शत्रूनशेषान्समरेषु शूरान्गिलिष्यत खड्गमु[ख]स्य यस्य ।
यो वैरिगोधूमघरट्टनाम्ना व्यराजत प्राक्बल स जात. ॥
क्षीणत्व प्रतिपक्षमेति नितरामेको द्विजाधीश्वर
प्राय. क्षीणवसु प्रयाति वसुमत्पार्श्वे सदैको बुध. ।
मूढ. सन्कतिचिद्दिनान्यनुदयो ह्येक कविर्वर्तते
मद्दान किमितीव य श्रुतिगताद्दानस्तवाल्लज्जते ॥
सपदितैर्यथावत्सुतकृतिनिधिवनविवाहसुरगेहैः ।
सततदाकैर्य. सप्तभिरेतै. संतानवान्भवति ॥

सोऽय जायचमूपतिर्गणपतिक्षोणीशनाम्ना स्वय
सद्भक्त्या गणपेश्वराह्वयमहादेवस्य लिङ्गाकृते ।
द्वीपेऽस्मिन्स्वपितामहेन रचिते नारायणेनोन्नत
प्रासादान्निरमापयद्ध्रुवममु कैलासशैलोपमम् ॥
गुणशरभवमितशाके खरवर्षे माधवे सिते गौर्या ।
तिथ्या व्यधात्प्रतिष्ठा जायः श्रीगणपतीश्वरस्यास्य ॥

दिवि गणपतीश्वरश्रीमहादेवरकु पदिनेनिमिदि विषयमुल उभय नाना देसियु नगेगडडनिच्चिन आयमु कलमुन बद्द चिन्नमु ॥ गणपतिदेवमहाराजुलकु बुण्यमुगानु जायपनायकुडु पेट्टिन वृत्तुलु । एनुब ꠳ तनु पुट्लु ३। पेद्दमद्दालिनि पुट्लु ३ । कु꠳द्दालिनि पुट्लु २ । अयनपूण्डिनि पुट्लु २। नेन्तलकोडूरनु पुट्लु २। मूनिकोंडनु पुट्लु २ । चीकुलपल्लिनि पुट्लु २। कौडिप꠳तनु पुट्लु २। पचुब꠳ पुट्लु २। चेवेडुन पुट्लु २। दोनेपूडिनि पुट्लु ४। कारमूरनु पुट्लु २। ओडपागुल पेट्टिन पोलमु । कौतेपल्लिनि पुट्लु २। त्रेंकटि पुट्लु २। जायपनायकुण्डु अखण्डदीपमुनकुं वेट्टिन मोदालु २९ ॥

(एपिग्राफिआ इण्डिका—३।८४-८९)

---

(१४५)

श्रीबेतमहाराजमहिषीगणपाम्बादत्ताग्रहारप्रशस्तिः ।

इष्टार्थप्राप्तिसतुष्टै प्रणुत नाकिना गणै. ।
आर्यं विघ्नतमः सूर्यं गणेश भजतानिशम् ॥

---

१ अस्याश्च प्रशस्तेर्लेख किसनापरिगणे गन्टूरप्रान्ते येनमदलग्रामे एकस्मिन्स्तम्भे उत्कीर्णोऽस्ति तत्समयो यद्यपि लेखेनैव स्फुटस्तथापि गणपतिमहाराजसत्ता शक सवत् ११५३ प्रभृति ११७२ पर्यन्तमासीत्, अतश्च तत्सनिधाने एव तत्पुत्र्या गणपाम्बिकाया अपि भवेदित्यनुमीयते, अतोऽय लेख खिस्तत्रयोदशशताब्द्यामुत्कीर्णो भवेदिति सभाव्यते स चाय लेख पूर्व Colonel Colin Mackenzie महाशयवरसग्रहत Mr Gordon Mackenzie महाशयवरेण गृहीत्वा म्यान्युअल आफ् दी किसना डिस्ट्रिक्ट् नाम्नि पुस्तके मुद्रापित इति E Hultzsch, Ph D महाशयवरा .

क्रीडाक्रोडाकृतेर्विष्णोर्दंष्ट्रादण्डो जयत्यसौ ।
धात्री हेमाद्रिकलशा यत्र च्छत्रानुकारिणी ॥
स्वस्ति श्रीकाकतीशाना वशो जगति विश्रुतः ।
यत्र जाता धरित्रीशा क्षोणीरक्षासु शिक्षिता ॥

तत्रासीत्प्रथितोरुविक्रमचण **प्रोल**क्षितीशाग्रणी
क्षात्रै शत्रुकुलान्तक परिपरैः सन्नीतिशास्त्रोज्ज्वलः ।
यस्याद्यापि विशालविश्रुततरक्रूरप्रतापोज्ज्वल-
ज्योति.खण्ड इव प्रचण्डकिरण. खेलत्ययं खे रवि. ॥

जातो **माधव**भूपतिर्गुणगिरिस्तस्मान्महीवल्लभा-
द्य सुप्त्वा सुमहाहवे गजवधूकुम्भद्वयस्योपरि ।
प्रख्याताप्सरस' स्तनद्वयतटे प्राबोधि योधाग्रणी-
र्लोके ख्यातविशालनिर्मलयशा वीरश्रियामाश्रयः ॥

संजातस्तस्य पुत्रस्त्रिभुवनतिलको विक्रमाद्वैतवादी
दृप्यद्राजन्यचूडामणिमकुटतटीनर्तिताज्ञाप्रचण्ड ।
बुद्धेर्विश्रामभूमि**र्गणपति**र्नृपति पार्वतीशप्रसाद-
प्राप्तप्रख्यातसपज्जितभुवनरमारक्षिताशेषलोकः ॥

यत्कीर्तेः सकला दिश परिजनाः क्रीडासरास्यर्णवाः
मेरु केलिमहीधर प्रविलसल्लीलावन नन्दनम् ।
तत्तारापतिबिम्बमेव मुकुर हर्म्यं च रोदोन्तर
सोऽय **श्रीगणप**क्षितीशतिलक. क्षोणीभृतामग्रणी. ॥

क्षीराम्भोधिनिभात्तस्माद्भूपाद्गाम्भीर्यसभृतात् ।
गणपाम्बा समुद्भूता साक्षाल्लक्ष्मीरिवापरा ॥

नीतिः सा विनुता विवेकविभवोद्भूति' श्रियामुन्नतिः
सत्पूजाभिरति समग्रविनय. शभौ च भक्तिः परा ।
एतस्या गणपाम्बिकानिजतनौ पुण्या वरेण्या गुणा.
सर्वे किं सहजा जयन्ति किमु वा सकेतभाजो भृशम् ॥

श्रीधान्याङ्कपुराधीश केतराज इति श्रुतः ।
अखण्डमण्डलाधीशो राजासीद्राजशेखर ॥
कोन्नातवाडीविषयाधिनाथ श्रीकेतराज क्षपितारिवर्ग' ।
धर्म यदीय प्रथित त्रिलोक्यामद्यापि सर्वे गणशो गृणन्ति ॥
वेर्णायां दक्षिणे भागे येन धर्मस्वरूपिणा ।
महाग्रहारतिलका सप्ततिर्विप्रसात्कृता ॥
आसीत्तस्यात्मजो राजा रुद्रराज इति श्रुत ।
यत्कीर्तिकान्ता शुद्धापि चित्र दिक्पाललालिता ॥
तेजोध्वस्ताखिलरिपुतमा रुद्रभूपोदयाद्रे-
रुद्यन्नुच्चै क्षितिधरलसन्मस्तकन्यस्तपाद ।
आशापूरप्रगुणवसुमान्वैबुधै सस्तुतोऽय
सार्थं सम्यग्जयति नितरा बेतभूपालसूर्य. ॥
सेयं पुण्यतनुर्विधाय विधिवच्छ्रीमद्विवाहोत्सव
बेतक्ष्मापतिशेखराय गणपक्षोणीश्वरेणादरात् ।
दत्ता श्रीगणपाम्बिका गिरिसुतेवेशाय लक्ष्मीर्यथा
लक्ष्मीशाय विशालविश्रुतगुणैर्गौर्या च लक्ष्म्या समा ॥
तया सार्धं महाराज्य कृत्वा धर्मं च शाश्वतम् ।
याते बेतक्षमानाथे धन्ये देवेन्द्रससदम् ॥
श्रीधान्याङ्कपुरेऽमरेश्वरविभो. श्रीमद्विमानोपरि
सौवर्णा. कलशा ययातिमहसः सम्यक्प्रतिष्ठापिताः ।
निर्मायात्र पुरेऽपि बेतनृपतेर्नाम्ना विभोर्मन्दिर
भर्त्तासौ शिवलोकशाश्वतसुखावासोत्सव प्रापित. ॥
भर्त्तुर्बेतमहीभर्त्तुस्तादृक्सुकृतसिद्धये ।
शम्भोरायतन कृत्वा प्राकारपरिशोभितम् ॥
तस्मिन्नायतने सौम्ये सौवर्णकलशोज्वले ।
बेतेश्वरमहादेवप्रतिष्ठा विहिता तया ॥

तस्य रङ्गाङ्गभोगार्थं तयासौ दत्त उत्तमः ।
ग्राम. समग्रसस्याढ्यो बेनदेवीति विश्रुत. ॥
श्रीधान्याङ्कपुरे रम्ये महालक्ष्मीस्वरूपया ।
गणपाम्बामहादेव्या अन्यच्च सुकृत कृतम् ॥
गृहान्द्वादश सपाद्य वृत्तीश्चापि च पुष्कलाः ।
द्वादशादित्यसकाशा विप्रा सरक्षितास्तया ॥
गणपक्षितिनाथस्य पितुर्नाम्नापि निर्मितम् ।
गणपेश्वरमिति ख्यात देवतायतन तया ॥
तस्मै रङ्गाङ्गभोगार्थं गणपेशाय शभवे ।
ग्रामो दत्तो महादेव्या चिन्तापाडुरिति श्रुत ॥
यद्धस्तौ हरपूजनैकनिरतौ यस्याश्च दृष्टिश्रुती
शभोरन्वहकारितोत्सवलसत्सगीतसक्ते सदा ।
इत्थ या दिवसान्सुख गमयति प्राज्येऽपि राज्ये स्थिता
तन्नूनं गणपाम्बिका गिरिसुता तस्या' स्तुतौ क. प्रभु ॥

(एपिग्राफिआ इण्डिका—३।९६-१०१)

---

(१४६)

सायणमाधवाश्रयश्रीबुक्कमहाराजतनयहरिहरमहाराज-शासनम् ।

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शभवे ॥
हरेर्लीलावराहस्य दष्ट्रादण्ड. स पातु वः ।
हेमाद्रिकलशा यत्र धात्री च्छत्रश्रिय दधौ ॥

---

१ 'अस्य शासनलेखस्याधारभूतानि त्रीणि ताम्रपत्राणि Sir Walter Elliot महाशयेनानायितानि Dr Fleet महाशयेन Dr Hultzsch महाशयसमीपे प्रेषितानि तेन महाशयेन प्रसिद्ध्यर्थं मह्य दत्तानि इति प्रकाशकवरा V Venkayya M. A महाशया

हेमाम्भोरुह किंजल्कपुञ्जपिञ्जरिताङ्घ्रये ।
विघ्नेश्वराय विघ्नाना निहन्त्रे विदधे नम ॥

विष्णोरादिवराहस्य मूर्तिर्नित्य श्रियेऽस्तु व ।
धात्री महति दंष्ट्राग्रे धत्ते यस्तु श्रिया सह ॥

यद्दंष्ट्राङ्कुरगा हि भूरिह सता कर्माणि वेदार्थिना
तैर्नन्दन्त्यमरा हरि कुलगुरुस्तेषा तदीया घना ।
ते वर्षन्ति भवन्ति सर्वलतिकासस्यानि वृष्ट्या प्रजा-
स्तैर्नन्दन्ति पितामहप्रणिहितास्तस्मै नम पोत्रिणे ॥

आसीत्त्रैलोक्यजीवातुरानन्द इव मूर्तिमान् ।
परमेश्वरकोटीरप्रथमाभरण शशी ॥

तदन्वये महातेजा यदुरासीन्महीपति ।
सोमवश्या यत श्लाघ्याद्यादवा इति विश्रुता ॥

तस्मिन्यदुकुले श्लाघ्ये सोऽभूच्छ्रीसंगमेश्वर ।
येन पूर्वविधानेन पालिता सकला प्रजा. ॥

यद्यश'पुण्डरीकस्य कर्णिका कनकाचल ।
मकरन्दप्रवाहोऽभून्महामन्दाकिनी नदी ॥

तस्य श्रीसगमेन्द्रस्य पुत्रोऽभूत्पुण्यवैभवात् ।
वीरश्रीमङ्गलादर्शो वीरश्री[१]भुक्कभूपति ॥

[२]सप्तार्चिरलस लोका अभुजङ्गविभूषणम् ।
वदन्त्यनुग्रनामान शिव यं भुक्कभूपतिम् ॥

यत्कीर्तिलक्ष्म्याः क्रीडन्त्या ब्रह्माण्ड रत्नमण्डप. ।
मुक्ताच्छत्रं शशाङ्कस्तु दीप. शुक्रदिवाकरौ ॥

---

१ अन्येषु लेखेषु सायणमाधवरचितग्रन्थेषु च 'बुक्क' इति तृतीयादिरेवोपलभ्यते
२ सप्तार्चिषा वह्निना लस्यते शिव , राजा तु क्रोधाग्नयेऽलस आलस्यवान् सर्पालंकार-शोभित शिव , राजा तु न विटसहचारी शिवस्य तु उग्र इति नाम वर्तते, राज्ञो नाम तु नोग्रम्

धर्मेण रक्षति क्षोणी वीरश्रीबुक्कभूपतौ ।
निरातङ्का भयात्तस्मिन्नित्यभोगोत्सवा प्रजा ॥
गौरीसहचरात्तस्मात्प्रादुरासीन्महेश्वरात् ।
शक्त्या प्रतीत स्कन्दांशो राजा हरिहरेश्वर. ॥
सर्ववर्णाश्रमाचारप्रतिपालनतत्परे ।
तस्मिंश्चतु समुद्रान्ता भूमिः कामदुघाभवत् ॥
सिंहासनजुषस्तस्य कीर्त्या भान्ति दिशो दश ।
उदयाद्रिगतस्येन्दोर्ज्योत्स्नयेव कलानिधे. ॥
तुलापुरुषदानादिमहादानानि षोडश ।
कृतवान्प्रतिराजन्यवज्रपातात्तवैभव ॥

श्रीमद्राजाधिराजराजपरमेश्वर', पूर्वदक्षिणपश्चिमोत्तरसमुद्राधीश्वर, अनिवारित, दुष्टराजराजन्यभुजङ्गवैनतेय, शरणागतवज्रपञ्जर, कलिकालधर्म, कर्णाटकलक्ष्मीकर्णावतस, चतुर्वर्णाश्रमपालक, कुलगिरितटलिखितघोषण, रणरङ्गभीषण, परराजराजीवसुधाकर, परनारीसहोदर', पुण्यश्लोकप्रहर्ष, शार्दूलमदभञ्जन, चेरचोलपाण्ड्यस्थापनाचार्य, वेदभाष्यप्रकाशक:, वैदिकमार्गस्थापनाचार्य', कर्मोपेताध्वर्यु., राजकल्याणशेखर,

सिद्धसारस्वतेत्यादिविरुदावलिभूषित,
स खलु श्रीवीरप्रतापहरिहरदेवमहाराय

धात्रीनेत्रगुणक्षपेश्वर(१३२१)मिते श्रीशालिवाहे गते
शाके गोत्रधच(²)प्रेमादिनि तिथौ(²) मास्यूर्जके नामनि ।
पक्षे तत्र वलक्षके बुधदिने श्रीपौर्णमास्या तिथौ
काले पुण्यमहत्तरे शुभकरे सोमोपरागे वरे ॥
श्रीतुङ्गभद्रापरिखे नगरे विजयाह्वये ।
पम्पाया भास्करक्षेत्रे श्रीविरूपाक्षसंनिधौ ।

---

१ A D 1399 बोध्य. २. 'प्रमाथिनि' स्यात्.

चन्द्रगिरिमहाराज्ये प्राज्ये पैयूरिकोट्टके ॥
नलट्टुरिपाळेंसीमाख्ये मेगुणावलनाडुके ।
तोण्डीरमण्डले ख्याते विद्वद्भिरुपशोभिते ॥
चिरुवापुर्युदग्भागे पनप्पाकस्य दक्षिणे ।
नैर्ऋत्यामरणीनद्यास्तोरनल्लूरिपश्चिमे ॥
स तत्रासीद्ग्रामवरो ग्रामो नल्लूरिसञ्ज्ञित. ।
पार्श्वकेदारजनुषा यो रेजे सस्यसपदा ॥
उमारमाकलत्राभ्यां सहितौ शिवकेशवौ ।
यळगोविल्लनीलद्दषनामानौ यत्र तिष्ठत ॥
पुर सावणराजीय प्रतिनाम्नेति विश्रुतम् ।
वृत्तिद्वादशसयुक्त तमिम ग्राममुत्तमम् ॥
सर्वमान्य चतु सीमासयुत च समन्तत ।
निधिनिक्षेपपाषाणसिद्धसाध्यजलान्वितम् ॥
अक्षिण्यागामिसयुक्तमष्टभोग्य सभूरुहम् ।
वापीकूपतटाकैश्च कच्छारामैश्च शोभितम् ॥
पुत्रपौत्रादिभिर्भोग्य क्रमादाचन्द्रतारकम् ।
दानस्याधमनस्यापि विक्रयस्यापि चोचितम् ॥
अदाद्ग्रामवर रम्य श्रीनल्लूरिति सञ्ज्ञितम् ।
औमळाध्वरिवर्याय सानुजाय विपश्चिते ॥
श्रीभरद्वाजगोत्रीयवरनारायणात्मज ।
आर्च औमळयज्वा तु षड्वृत्तिमिह चाश्नुत ॥
तस्यानुजो महातेजा श्रुतिसागरपारग. ।
नृसिहयज्वा च कृती वृत्तिषट्कमवाप्तवान् ॥
परीत* प्रयतै स्निग्धै पुरोहितपुरोगमै. ।
विविधैर्विबुधैः श्रौतपथिकैरधिकैर्गिरा ॥

वीरः श्रीवरबुक्कभूपतनयः क्ष्मापालचूडामणि
प्रेङ्खत्कीर्तिविभूषितत्रिभुवन. स्फूर्जत्प्रतापोदय ।
आचन्द्रार्कमगारवद्वसुमतीमाचक्रवालाचल
श्रीमानाहवराघवो हरिहरः स्वा पालयत्यन्वहम् ॥
स भूयो याजको धीमान्कोटिशाराध्यनन्दन ।
शासनश्लोककर्ता वै मल्लनाराध्यवृत्तिक ॥
तच्छासनमिद स्वामिशासनेन विलेखितम् ।
शासनाचार्यवर्येण मुद्दणेन च शिल्पिना ॥
स्वदत्ताद्द्विगुण पुण्य परदत्तानुपालनम् ।
परदत्तापहारेण स्वदत्त निष्फल भवेत् ॥
स्वदत्ता परदत्ता वा यो हरेत वसुधराम् ।
षष्टिं वर्षसहस्राणि विष्टाया जायते क्रिमि ॥
एकैव भगिनी लोके सर्वेषामेव भूभुजाम् ।
न भोज्या न करग्राह्या विप्रदत्ता वसुधरा ॥
सामान्योऽय धर्मसेतुर्नृपाणा काले काले पालनीयो भवद्भि ।
सर्वानेतान्भाविन पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्र ॥
मद्वशजा' परमहीपतिवशजा वा
ये वशजा सततमुज्ज्वलधर्मचित्ता ।
मद्धर्ममेव परिपालनमुद्वहन्ति
तत्पादपद्मयुगल शिरसा वहामि ॥
श्रीविरूपाक्ष ॥

(एपिग्राफिआ इण्डिका—३।१२०–१२४)

(१४७)

इन्द्रवर्मणोऽच्युतपुरोपलब्धशासनम् ।

ॐ स्वस्ति । सर्वर्तुरमणीयाद्विजयकलिङ्गनगरात्सकलभुवननिर्माणैकसूत्रधारस्य भगवतो गोकर्णस्वामिनश्चरणकमलयुगलप्रणामादपगतकलिकलङ्को विनयनयसपदामाधार स्वासिधारापरिस्पन्दाधिगतसकलकलिङ्गाधिराज्यश्चतुरुदधितरङ्गमेखलावनितलप्रविततामलयशा अनेकसमरसक्षोभजनितजयशब्दो गाङ्गामलकुलप्रतिष्ठ प्रतापातिशयानामितसमस्तसामन्तचूडामणिप्रभामञ्जरीपुञ्जरञ्जितशरणो मातापितृपादानुध्यात परममाहेश्वर श्रीमहाराजेन्द्रवर्मा वराहवर्तन्या सिद्धार्थकग्रामे सर्वसमवेतान्कुटुम्बिन समाज्ञापति—विदितमस्तु वो यथास्मिन्ग्रामे राजतटाकक्षेत्रे हलस्य भूश्छेदीकृत्य सर्वकरपरिहारेणाचन्द्रार्कप्रतिष्ठ कृत्वा मातापित्रोरात्मनश्च पुण्याभिवृद्धये गौतमसगोत्राय छन्दोगसब्रह्मचारिणे दुर्गशर्मणे मातृभट्टारिकापादाना तटाकप्रतिष्ठापनमुदगयन उदकपूर्वमस्माभि सम्प्रदत्ता, तद्विदित्वा स्वभूमिमनुपालयतान्न केनचित्परिबाधा कार्या । सीमालिङ्गानि—पूर्वेण राजतटाकपाली, सैव दक्षिणेन, पश्चिमेन परिपाट्या वल्मीकत्रयम्, उत्तरपाल्या कपाटसध्युपरि पाषाण , तत सेष्टकोऽन्य पाषाण, ततो धिमारतरुद्वयम्, तत कारकवृक्षश्चेति । तटाकोदकबन्धमोक्षे न केनचिद्विघात कार्य इति भविष्यद्राजभिश्चाय दानधर्मोऽनुपाल्य । तथा च व्यासगीता श्लोका —

> बहुभिर्वसुधा दत्ता बहुभिश्चानुपालिता ।
> यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

---

१ अस्य शासनस्याधारभूतानि ताम्रपत्राणि गञ्जामपरिगणे मुखालिङ्गम्ग्रामसमीपस्थे अच्युतपुरग्रामे मल्लप्रगद्सूर्यप्रकाशरावमहाशयस्य गृहे सुरक्षिता न्यासन् तानि च परलाकिमेदीग्रामनिवासि Mr G V Ramamurti महाशयबोधितानि गञ्जमपरिगणाध्यक्षेणानाय्य मह्य दत्तानि अधुना त्वस्मत्प्रार्थनात स्ताम्रपत्रस्थानैव मद्राजनगरप्रदर्शिन्यां स्थापितानि वर्तन्ते—इति प्रकाशकवरा E Hultzsch, Ph D महाशया

षष्टि वर्षसहस्राणि मोदते दिवि भूमिद ।
आक्षेप्ता चानुमन्ता च तान्येव नरके वसेत् ॥
स्वदत्ता परदत्ता वा यत्नाद्रक्ष युधिष्ठिर ।
मही महिमता श्रेष्ठ दानाच्छ्रेयोनुपालनम् ॥ इति ।

वर्धमानविजयराज्यसवत्सरा सप्ताशीति ८७ चैत्रामावास्याम् । इद विनयचन्द्रेण भानुचन्द्रस्य सूनुना शासन राजसिहस्य लिखित स्वमुखाज्ञया ॥

(एपिग्राफिआ इण्डिका—३।१२८–१२९)

---

(१४८)

श्रीगुणार्णवसूनुदेवेन्द्रमहाराजानां चिककोलग्रामोपलब्धं शासनम्[१] ।

ॐ स्वस्ति । सकलवसुमतीतलतिलकायमानात्सर्वर्तुसुखरमणीयाद्विजयवतकलिङ्गनगरान्महेन्द्राचलामलशिखरप्रतिष्ठितस्य चराचरगुरो' सकलभुवननिर्माणैकसूत्रधारस्य भगवतो गोकर्णस्वामिनश्चरणकमलयुगलप्रणामाद्विगलितकलिकलङ्को गाङ्गामलकुलतिलको निजनिस्त्रिंशधारोपार्जितसकलकलिङ्गाधिराज्य प्रविततचतुरुदधितरङ्गमेखलावनितलामलयशा अनेकाहवसक्षोभजनितजयशब्द प्रतापावनतसमस्तसामन्तचक्रचूडामणिप्रभामञ्जरीपुञ्जरञ्जितचरण परममाहेश्वरो मातापितृपादानुध्यातो नयविनयशौर्यौदार्यसत्यत्यागसपदामाधारभूत. श्रीगुणार्णवसूनुर्महाराज' श्रीमान्देवेन्द्रवर्मा क्रोष्टुकवर्तन्या सरउमटम्बे पोप्पङ्किग्रामे सर्वसमवेतान्कुटुम्बिनः समाज्ञापयत्यस्ति । विदितमस्तु भवता यथास्माभिरय ग्राम सर्वकरभरै.

---

१. अस्य शासनस्याधारभूत ताम्रपत्रत्रय चिकाकोलग्रामे गञ्जामपरिगणस्योपकलेक्टरपदवीकस्य महाशयस्य कार्यालये प्राप्त Mr C J Weir I C S. महाशयेन तत्रत्यकार्यकारिणा मम समीपे प्रेषितम् अधुना च मद्रासप्रदर्शिन्यां वर्तते—इति शोधकवरा E Hultzsch, Ph. D महाशया

परिहृत्याचन्द्रार्कप्रतिष्ठमग्रहार कृत्वोदकपूर्वं मातापित्रोरात्मनश्च पुण्याभिवृद्धये माघमास्युदगयने शुद्धाष्टम्या कलिङ्गानगरवास्तव्येभ्यश्छन्दोगसब्रह्मचारिभ्य कृष्णात्रेयसगोत्रेभ्यो वेदवेदाङ्गपारगेभ्यो च्छरम्पशर्मभवशर्मशिवशर्मविष्णुशर्मसोमशर्मकुमारशर्मभ्यो भ्रातृभ्य सप्रदत्त । तदेव विदित्वा यथोचितभागभोगमुपनयन्त सुख प्रतिवसथ इति । अस्य ग्रामस्य सीमाविधयो भवन्ति—पूर्वस्या दिशि विषयगर्ता गता, दक्षिणस्या दिश्यपि गर्तैव, पश्चिमस्या दिशि पोप्पङ्गिकपर्वतोदक सायदकपर्वतोदक च यत्रैकीभूय वहति यावद्दक्षिणदिक्स्था गर्तेति, उत्तरस्या दिशि कोशम्बवृक्षगिणिगिणिवृक्षौ, तत कुरुडुम्बिग्रामस्य च सीमा, ततस्तिन्दुकवृक्ष, पुनरपि तिन्दुक, कुब्जजम्बूवृक्षवेणुगुल्मसहित कदम्बवृक्ष, अत पुरुषच्छायया यावत्पूर्वदिक्स्था विषयगर्तेति ॥ भविष्यतश्च राज्ञ प्रज्ञापयति धर्मक्रमविक्रमाणामन्यतमयोगादवाप्य महीमनुशासद्भिरय दानधर्मोऽनुपालनीय । व्यासगीताश्चात्र श्लोका भवन्ति—

'बहुभिर्वसुधा दत्ता राजभि सगरादिभि ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
स्वदत्ता परदत्ता वा यत्नाद्रक्ष युधिष्ठिर ।
महीं महिमता श्रेष्ठ दानाच्छ्रेयोऽनुपालनम् ॥
षष्टिं वर्षसहस्राणि स्वर्गे मोदति भूमिद ।
आक्षेप्ता चानुमन्ता च तान्येव नरके वसेत् ॥' इति ।
अपूर्वनटवश्येन मातृचन्द्रस्य सूनुना ।
लिखित पल्लवचन्द्रेण शासन स्वमुखाज्ञया ॥

महत्तरशवरनन्दिप्रत्यक्षमिति । प्रवर्धमानविजयराज्यसवत्सरशत त्र्यशीति १८३ श्रावणे मासि दिने विंशे, उत्कीर्णं खण्डिचन्द्रभोगिकतनयेन सर्वचन्द्रेणेति ॥

(एपिग्राफिआ इण्डिका—३।१३१–१३३)

(१४९)

श्रीवेङ्कटपतिदेवमहाराजदत्तकूनियुर्ग्रामशासनम्[1]।

यस्य सपर्कपुण्येन नारीरत्नमभूच्छिला।
यदुपास्य सुमनसा तद्वस्तुद्वन्द्वमाश्रये॥
यस्य द्विरदवक्त्राद्या॰ पारिषद्या पर शतम्।
विघ्न निघ्नन्ति भजता विष्वक्सेन तमाश्रये॥
जयति क्षीरजलधेर्जात सर्व्येक्षण हरे।
आलम्बन चकोराणाममरायुष्कर महः॥
पौत्रस्तस्य पुरूरवा बुधसुतस्तस्यायुरस्यात्मज
सजज्ञे नहुषो ययातिरभवत्तस्माच्च पूरुस्तत॰।
तद्वंशे भरतो बभूव नृपतिस्तत्सततौ शंतनु-
स्तत्तुर्यो विजयोऽभिमन्युरुदभूत्तस्मात्परीक्षित्तत॥
नन्दस्तस्याष्टमोऽभूत्समजनि नवमस्तस्य राज्ञश्चलिक्क-
क्ष्मापस्तत्सप्तम श्रीपतिरुचिरभवद्राजपूर्वो नरेन्द्र।
तस्यासीद्विज्जलेन्द्रो दशम इह नृपो वीरहेमालिराय-
स्तार्तीयीको मुरारौ कृतनतिरुदभूत्तस्य मायापुरीश॰॥
तत्तुर्योऽजनि तातपिन्नमहीपालो निजालोकन-
त्रस्तामित्रगणस्ततोऽजनि हरन्दुर्गाणि सप्ताहितात्।
अह्नैकेन स सोमिदेवनृपतिस्तस्यैव जज्ञे सुतो
वीरो राघवदेवराडिति तत श्रीपिन्नमोऽभून्नृपः॥
आरवीटिनगरी विभोरभूत्तस्य बुक्कधरणीपति सुत।
येन साळुवनृसिंहराज्यमप्येधमानमहसा स्थिरीकृतम्॥

---

१ 'अस्य शासनस्याधारभूतानि सप्त ताम्रपत्राणि तिन्नवेल्लीपरिगणस्य अम्बा॰समुद्रताळुकाया कूनियुर्ग्रामवास्तव्यब्राह्मणस्य सन्ति, Dr Hultzsch महाशय-पार्श्वे निरीक्षणाय Mr T Varada Rao महाशयेनोक्तपरिगणोपाकलेक्टर-सञ्ज्ञकेन प्रेषितानि, इति H Krishna S'âstri महाशया प्रकाशयन्ति, लेख कालस्तु १५५६ शक (1478 A D) रूप॰ स्फुट एव लिखित

स कामिनी' स्वतनुकान्तिभिराक्षिपन्तीं
बुक्कावनीपतिलको बुधकल्पशाखी ।
कल्याणिनीं कमलनाभ इवाब्धिकन्या
बल्लाम्बिकामुदवहद्बहुमान्यशीलाम् ॥
सुतेव कलशाम्बुधे सुरभिलाशुग माधवा-
त्कुमारमिव शकरात्कुलमहीभृत कन्यका ।
जयन्तममरप्रभोरपि शचीव बुक्काधिपा-
च्छ्रुत जगति वल्लभालभत रामराजं सुतम् ॥
श्रीरामराजक्षितिपस्य तस्य चिन्तामणेरर्थिकदम्बकानाम् ।
लक्ष्मीरिवाम्भोरुहलोचनस्य लक्काम्बिकामुष्य महिष्यलासीत् ॥
तस्याधिकै समभवत्तनयस्तपोभि
श्रीरङ्गराजनृपतिः शशिवशदीप ।
आसन्समुल्लसति धामनि यस्य चित्र
नेत्राणि वैरिसुदृशा च निरञ्जनानि ॥
सतीं तिरुमलाम्बिकां चरितलीलयारुन्धती-
प्रथामपि तितिक्षया वसुमतीयशो रुन्धतीम् ।
हिमाशुरिव रोहिणीं हृदयहारिणीं सद्गुणै-
रमोदत सधर्मिणीमयमवाप्य वीराग्रणी ॥
रचितनयविचार रामराजं च धीर
वरतिरुमलरायं वेङ्कटाद्रिक्षितीशम् ।
अजनयत स एतानानुपूर्व्यात्कुमारा-
निह तिरुमलदेव्यामिव राजा महौजा ॥
सकलभुवनकण्टकानरातीन्समिति निहत्य स रामराजवीर ।
भरतमनुभगीरथादिराजप्रथितयशा प्रशशास चक्रमुर्व्याः ॥
त्रिषु श्रीरङ्गक्ष्मापरिवृढकुमारेष्वधिरण
विजित्यारिक्ष्मापास्तिरुमलमहाराजनृपति ।

महौजा साम्राज्ये सुमतिरभिषिक्तो निरुपमे
प्रशास्त्युर्वीं सर्वामपि तिसृषु मूर्तिष्विव हरिः ॥

यशस्विनामग्रसरस्य यस्य पट्टाभिषेके सति पार्थिवेन्दोः।
दानाम्बुपूरैरभिषिच्यमाना देवीपदं भूमिरियं दधाति ॥

सामादयो विधिमुखादिव सत्यवाचः
सामाद्युपायनिवहा इव सायुगीनात्।
रामादयो दशरथादिव राजमौले-
स्तस्मादमेययशसस्तनया बभूवुः ॥

राजा ततोऽभूद्रघुनाथनामा श्रीरङ्गरायः श्रितपारिजातः।
श्रीरामराजः शिशिरांशुरुर्व्यां विख्यातिमान्वेङ्कटदेवरायः ॥

श्रीरङ्गरायः सहजेषु तेषु पारंगतो नीतिपयःपयोधेः।
अष्टासु दिक्षु प्रथितस्य लेभे पट्टाभिषेकं पेनुगोण्डराज्ये ॥

अथ श्रीवेङ्कटपतिर्देवरायो नयोज्ज्वलः।
अवनीमशिषत्कीर्त्या दिशो दश विशोभयन् ॥

तज्ज्यायसः सुरद्रुमलज्जावहचरितरामराजविभोः।
जातस्तिरुमलराजः ख्यातः श्रीरङ्गरायोऽपि ॥

तयोः श्रीरङ्गरायस्य तनया विनयाधिकाः।
अजायन्त दयावन्तः श्रुतवन्तो यशस्विनः ॥

श्रीरङ्गरायनृपतेस्तनयेषु तेषु
पारं गिरामधिगतः कविपुंगवानाम्।
रत्नेषु कौस्तुभ इवाम्बुधिसंभवेषु
श्रीरामरायनृपतिः सुचिरं व्यलासीत् ॥

पूर्वं विश्रुतरामराजनृपतेः श्रीरामभद्राकृते
कल्याणोदयशालिनस्तनुभवाः पञ्च प्रपञ्चावने।
दक्षा नीतिपथानुगाः समभवन्क्षीरापगाकामिनो
गीर्वाणालयभूरुहा इव बुधश्रेणीष्टदानोत्सुकाः ॥

आज्ञाविजितसुग्रीवा आज्ञावनकृताग्रहा ।
सर्वे ते विबुधग्राह्या गुणै रुचिरविग्रहा ॥
विख्यातचर्येषु नृपेषु तेषु श्रीरङ्गराज शिशिरांशुरुर्व्या· ।
विश्वत्रये विश्रुतकीर्तिरासीत्सौरेषु शालेष्विव पारिजात ॥
यद्भेरीघनभाकृतिश्रवणतो भीत्या महत्या रण-
प्रत्यर्थिक्षितिपै· पलायनपरैर्मुक्ता लुठन्त श्रमात् ।
कान्ताराभरणीभवन्ति कलशच्छत्रध्वजाङ्काञ्चिता-
न्युन्मार्जन्त्यधिभू(?)पदानि तदनुव्रज्याभिया किं हया· ॥
श्रीरङ्गराजस्य तपोविशेषै सतोषिणः शेषगिरीश्वरस्य ।
कारुण्यभूम्ना कमनीयशोभौ पुत्रावभूता पुरुहूतभोगौ ॥
पेदवेङ्कटेन्द्रपिनवेङ्कटाधिराडिति नामकौ प्रकृतिपालनोत्सुकौ ।
[1]खरदूषणप्रहतिदक्षिणावुभौ [2]देदत (?) प्रमोदमिव रामलक्ष्मणौ ॥
श्रीशाली पेदवेङ्कटेन्द्रनृपतिर्ज्येष्ठो वयोभिस्तयो·
शौर्यौदार्यगभीरताधृतिकलापूर्वैश्च सर्वैर्गुणै· ।
यस्यारातिनृपालभेदनकलायात्रासु सेनारज-
पूरैर्भूर्जलधिर्भवेदिति हरिश्चित्तेऽस्य धत्ते स्थितिम् ॥
शृङ्गारराज्यास्पददिव्यमूर्त्या वङ्गारमाम्बारमया समेत ।
विभात्यसौ वेङ्कटभूमिपाल शच्येव शक्रो रमयेव शौरि· ॥
श्रीरङ्गराजेन्द्रकुमारकेऽस्मिन्वीरोत्तमे वेङ्कटदेवराये ।
पट्टाभिषिक्ते पेनुगोण्डराज्ये तदाभिषिक्ता· सुधियोऽपि हेम्ना ॥
यथा रघुकुलोद्वह· स्वयमरुन्धतीजानिना
स्वगोत्रगुरुणा सुधीतिलकतातयार्येण यः ।
यथाविधि यशस्विना विरचिताभिषेकः क्षणा-
द्विभिद्य यवनाशरान्विजयते प्रशासन्महीम् ॥

---

१ खरदूषणौ राक्षसौ, खरं दूषण च, २ 'अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्' इति परिभाषाश्रयणात्परस्मैपदम्

वाराशिगाम्भीर्यविशेषधुर्यश्चौरासिदुर्गैकविभालवर्य ।
पराष्टदिग्रायमनःप्रकामभयंकर शार्ङ्गधरान्तरङ्ग ॥
सारवोररमया समुल्लसन्नारवीटिपुरहारनायक ।
कुण्डलीश्वरमहाभुज श्रयन्मण्डलीकधरणीवराहताम् ॥
आत्रेयगोत्रजानामग्रसरो भूभुजामुदारयशा ।
अतिविरुदतुरगधट्टो मतिगुरुरारट्टमगधमान्यपद ॥
सोऽय नीतिजिताद्रिभूपतितति सुत्रामशाखी सुधी-
सार्थाना भुजतेजसा स्ववशयन्कर्णाटसिंहासनम् ।
आ सेतोरपि चाहिमाद्रि विमतान्सहृत्य शासन्मुदा
सर्वोर्वी प्रचकास्ति वेङ्कटपतिश्रीदेवरायाग्रणी॰ ॥
ऋतुबाणकळवेन्दु(१५९६)गणिते शकवत्सरे ।
भावाभिधानके वर्षे मासि वैशाखनामनि ॥
पक्षे वळक्षे पुण्यर्क्षे पौर्णमास्या महातिथौ ।
श्रीवेङ्कटेशपादाब्जसनिधौ श्रेयसा निधौ ॥
नानाशाखाभिधागोत्रसूत्रेभ्य शास्त्रवित्तया ।
विख्यातेभ्यो द्विजेन्द्रेभ्यो वेदविद्भ्यो विशेषतः ॥
श्रीमत्तिर्वडिराज्यस्थ मुळिळ्भाङ्ग इति श्रितम् ।
श्रीमद्वीरवनल्लूरुमाघाणि इति शोभितम् ॥
ताम्रपर्णीमहानद्या दक्षिणस्या दिशि स्थितम् ।
कारुकुर्चिमहाग्रामात्प्राच्या दिशि च सस्थितम् ॥
श्रान्तमङ्गलसीमाया दक्षिणाशामुपाश्रितम् ।
श्रीशेखरान्महादेविग्रामात्पश्चिमत॰ स्थितम् ॥
पर्वतोदग्महामार्गादुत्तराशामुपाश्रितम् ।
कारुकुर्च्या पञ्चदशकुल्याया क्षेत्रयुग्मगम् ॥
ग्राम च सर्वसस्याढ्य द्विषष्टिगणसयुतम् ।
मुद्दुकृष्णापुरमिति प्रतिनाम्ना सुशोभितम् ॥

कूनियूरिति विख्यात गृहारामोपशोभितम् ।
सर्वमान्य चतु'सीमासहित च समन्तत ॥
निधिनिक्षेपपाषाणसिद्धसाध्यजलान्वितम् ।
अक्षिण्यागामिसयुक्त गणभोज्य सभूरुहम् ।
पुत्रपौत्रादिभिभोज्य क्रमादाचन्द्रतारकम् ॥
आसीत्काश्यपसततेर्घनतप सतुष्टविश्वेश्वर-
स्वैरानुग्रहभाजनाद्गुणनिधे श्रीनागपृथ्वीपते ।
विद्वन्म[illegible]तार्थकृतिमूर्धन्यादवन्यां महा-
वीराणा धुरि विश्वनाथधरणीसंक्रन्दनो मानित ॥
तस्मादजायत धनेशसमानधर्मा
धर्मानुशासितधरातलजीवलोक ।
आख्यानुरूपविजितारिनृपालमौलि-
विख्यातिमाञ्जगति कृष्णपिनायकेन्द्र ॥
तस्याजनिष्ट ततकीर्तिमह समेत
श्रीवीरपेन्द्रधरणीतलशीतभानु ।
आमोदन कुवलयस्य तथा बुधाना-
मालम्बन शिथिलितारिमनोविनोद ॥
तस्योदभूद्विश्वपनायकेन्द्र प्रतीपभूपालतम सुधाशु' ।
श्रीमुद्दुकृष्णप्रभुरस्य जज्ञे प्रतापवान्मेरुसमानधैर्य ॥
तस्यास्ता मुद्दुवीरप्रभुतिरुमलभूपालकौ नन्दनौ द्वौ
मीनाक्षीसुन्दरेशस्थिरतरकरुणापूरधारानिधानौ ।
आकैलासाद्रिसेतुप्रथितनिजयशोभासमानौ यदीया-
प्याज्ञा राज्ञा किरीटस्फुरितमणिमयालङ्कृतिर्माननीया ॥
अथ तिरुमलभूपो मन्त्रिमुख्यैरनेकै
सकुतुकमभिषिक्त सर्वराज्याधिपत्ये ।

समधिककृपयासौ सुन्दरेशस्य लब्ध्वा
धरणितलमशेष राजते भूतलेन्द्र ॥

एतस्य परदुर्वारभुजविक्रमशालिन ।
भोगे भूलोकसुत्राम्णस्त्यागे भूकल्पशाखिन ॥
करीन्द्रारोहमात्रेण गिरीन्द्रारूढविद्विषः ।
लङ्घिते नगरे जेतु लङ्घितार्णववैरिण ॥
कन्यान्नस्वर्णभूदानै. काल्क्षेप वितन्वत ।
जयन्तचन्द्रकन्दर्पजयसौन्दर्यशालिन ॥
श्रीमत्तिरुमलेन्द्रस्य विज्ञप्तिमनुपालयन् ।
श्रीवीरवेङ्कटपतिर्महारायमहीपति. ॥
स हिरण्यपयोधारापूर्वक दत्तवान्मुदा ।
वृत्तिमन्तोऽत्र लिख्यन्ते विप्रा वेदान्तपारगा ॥
वेङ्कटाद्रीन्द्रतनयो भारद्वाजी च याजुष ।
क्षेत्र स लब्धवानेक रघुनाथाभिधो मखी ॥
लक्ष्मीनृसिहयज्वेन्द्र( ) सुत. श्रीवत्सगोत्रज ।
लक्ष्मीनरहरिर्यज्वा वृत्तिमर्धाधिकामगात् ॥
गोत्रे हरितसे जात प्राप्तस्तिम्मरसात्मज. ।
वेङ्कटाद्रिद्विजोऽप्येका वृत्ति याजुषिकोत्तम ॥
आत्रेयगोत्र सप्राप्तोऽप्याश्वलायनसूत्रवान् ।
सदाशिवसुत क्षेत्र त्रिपाद ध्रुवमीश्वरः ॥
श्रीरङ्गराजपुत्र कनकसभापतिरतीव मेधावी ।
कौशिककुलप्रभूतोऽगृह्णाद्वृत्तिद्वय यजुर्वेदी ॥
प्रतीतकौशिकान्वयायसिन्धुबन्धुचन्द्रमा-
श्चिर धरातले ऋचा धुरधर स बन्धुमान् ।
अनन्तभट्टनन्दनोऽपि चाय्यभट्टभूसुर-
स्त्रिपादयुक्तवृत्तिपञ्चक समेत्य शोभते ॥

काश्यपान्वयज श्रीमानापस्तम्बी च लब्धवान्।
तिरुमलार्यसुतो मल्लभट्टो वृत्तिं स एकिकाम् ॥
मारुभट्टसुतो भारद्वाजी याजुषिकोत्तम ।
वेङ्कटाद्रिवर श्रीमान्वृत्तिमेका समश्नुते ॥
अरुणाद्रिसुतो भारद्वाजी ऋग्वेदवानयम्।
यल्लप्पभूसुर क्षेत्र प्राप्तवानर्धमत्र तु ॥
काश्यपान्वयजो लब्ध्वा यजुर्वेदी विराजते।
भ्रान्तीश्वरो महान्वृत्तिमर्धामप्पलयात्मभू ॥
आश्वलायनसूत्रोऽय भारद्वाजान्वयी सुत ।
श्रीवेङ्कटपतेरेका वृत्तिं नागरसोऽश्नुते ॥
भारद्वाजकुलोद्भूतोऽप्यर्धं याजुषिकोत्तम ।
क्षेत्र रघुपतेः सूनुरळगाद्रिरिहाश्नुते ॥
श्रीवत्सगोत्रगोविन्दसुतो घटलयाभिध ।
ऋग्वेदवानय प्राप्य त्रिपादा वृत्तिमेधते ॥
आत्रेयगोत्रजोऽगृह्णात्सामवेदाब्धिपारग. ।
श्रीनिवासात्मजो वृत्तिद्वय नरहरिर्महान् ॥
आत्रेयगोत्रज सोमनाथो याजुषिकोत्तम ।
नरसंघट्टपुत्रोऽय क्षेत्रेणार्धेन राजते ॥
अनन्तभट्टपुत्रोऽसौ श्रीनिवासोऽतिधार्मिक ।
कौशिकान्वयजोऽप्येक (।) क्षेत्र याजुषिकोऽग्रहीत् ॥
काश्यपान्वयभूषोऽयमापस्तम्बी महायशा· ।
वेङ्कटय्यसुत क्षेत्र सिद्धयोऽप्येकम(।)श्नुते ॥
बसवावधानिन पुत्रो नागादीक्षितशेखर ।
भारद्वाजी च ऋक्छाखी क्षेत्रमर्धं प्रपेदिवान् ॥
जातो हरितसे वशे यजुर्वेदी समेयिवान्।
कोलहस्तिसुत. क्षेत्र त्रिपाद भुवमङ्गयः ॥

वत्सगोत्रभव सत्याषाढसूत्रोऽपि चैककम् ।
श्रीनल्लपेरुमाळसूनुराारूरः क्षेत्रमश्नुते ॥
सजात काश्यपे श्रीमान्यजु शाखी समेयिवान् ।
नरसिंहात्मज क्षेत्र पादत्रयमहोबल ॥
काश्यपान्वयजो वृन्दावननाथसुतोत्तम· ।
ऋक्छाखी नड्नार्भट्टः क्षेत्रमर्धं स लब्धवान् ॥
सिङ्गपेरुमाळ्नन्दनोऽयं वेङ्कटतप्पभूसुर· ।
क्षेत्रद्वय च ऋग्वेदी अयत्यात्रेयगोत्रज· ॥
यजुर्वेदविदा श्रेष्ठो भारद्वाजकुलोद्भव ।
पेद्दिभट्टसुतो नीलकण्ठो वृत्त्यार्धयाश्नति ॥
श्रीवत्सगोत्रभू· सोमाभट्टजो याजुषोत्तम ।
श्रीमाँल्लक्ष्मणशास्त्रीन्द्र क्षेत्रमर्धं समश्नुते ॥
आपस्तम्बी च गोविन्ददीक्षितः कौशिकान्वय ।
कृष्णंभट्टोऽपि केदारमर्धं लब्ध्वा समेधते ॥
पेरुभट्टसुतस्तिम्मावधानी याजुषोत्तम ।
भारद्वाजकुलोद्भूतो वृत्तिमर्धां समेयिवान् ॥
कौशिकान्वयवॉल्लिङ्गावधानी मल्लुभट्टज· ।
आपस्तम्बी च केदारमर्धं प्राप्य विशोभते ॥
पुत्रो नरहरेरापस्तम्बी शेषाद्रिभूसुर ।
शालावतसगोत्रोऽयं क्षेत्रद्वयमिहाश्नुते ॥
भारद्वाजान्वये जातो यल्लुभट्टस्य नन्दन ।
नारसिंहो यजुर्वेदी वृत्तिमेकामिहाश्नुते ॥
श्रीमान् तिरुमलभट्टोऽपि जातो हरितसे कुले ।
नागाभट्टसुत· क्षेत्रमेक लब्ध्वा विजृम्भते ॥
कौण्डिन्यवशसभूत कृष्णभागवतोत्तम· ।
केदारेण त्रिपादेन कुबेर इव राजते ॥

लिङ्गावधानिन' पुत्रो भारद्वाजी च याजुष ।
रामलिङ्गावधानीन्द्र क्षेत्रमेकमिहाश्नुते ॥
आत्रेयगोत्रजो गङ्गाधरयज्वात्मजोऽश्नुते ।
यजुर्वेदी श्रीनिवासशास्त्री केदारमर्धकम् ॥
शेषाद्रिनन्दनस्तिम्मावधानी याजुषोत्तम ।
भारद्वाजकुले जातस्त्रिपादा वृत्तिमश्नुते ॥
यल्लयज्वसुतो लक्ष्मीनरसिंहबुधोऽग्रहीत् ।
आपस्तम्बी महानेक क्षेत्रमात्रेयगोत्रवान् ॥
आत्रेयगोत्रजोऽप्याळ्वार्सुत श्रीवेङ्कटेश्वरः ।
क्षेत्रमेक त्रिपाद् च लब्धवानृग्विभूषण ॥
आत्रेयगोत्र ऋग्वेदी श्रीमानीश्वरनन्दन ।
क्षेत्र कळप्परान्पादत्रय प्राप्य समेधते ॥
विश्वामित्रकुले जात ऋक्शाखी चाय्यपो महान् ।
अनन्तकृष्णतनयो वृत्तिमर्धामिहाश्नुते ॥
पेरियतिरुवडिः श्रीमाश्चोक्कनाथमखीन्द्रज ।
धनजयान्वयी क्षेत्रद्वयमृग्वेदवानगात् ॥
आत्रेयवश्य ऋक्शाखी नारायणवरात्मज ।
श्रीरामभट्टः केदारमेकमासाद्य वर्धते ॥
आपस्तम्बी भरद्वाजवश्य शिङ्गिरिनन्दन ।
नारायणोऽप्यर्धवृत्ति समेत्य धनदायते ॥
गिरियप्यकुमारोऽय श्रीवेङ्कटपतिर्महान् ।
श्रीवत्सगोत्री ऋक्शाखी वृत्तिमेका प्रपेदिवान् ॥
लब्ध्वारुणगिरेः पुत्र सूर्यनारायणोऽश्नुति ।
कौण्डिन्यवशज क्षेत्रमेक याजुषिकोत्तम. ॥
तिरुवेङ्कडनाथस्य पुत्रो वडमलोऽश्नुते ।
वत्सगोत्रभव क्षेत्रमेक याजुषिकोत्तम ॥

कौण्डिन्यगोत्रजोऽनन्तनारायणसुतोऽश्नुते ।
रामाभट्टवरः क्षेत्रमेक याजुषिकोत्तम ॥
तस्यानुजो राघवश्च क्षेत्रमेक स लब्धवान् ।
यल्लयो रङ्गयश्चैव वेङ्कटाद्रिश्च वेङ्कपः ॥
चत्वार क्षेत्रमेक तु वर्धन्ते प्रतिगृह्य ते ।
कौण्डिन्यवशज' सत्याषाढसूत्र समेयिवान् ॥
वेङ्कटाद्रिवर क्षेत्रत्रय गणपतेः सुत ।
रघुनाथमखी व्यासरायभट्टसुतोऽश्नुते ॥
वृत्तिमेका सामवेदी भारद्वाजकुलोद्भव. ।
नारायणोऽनन्तभट्टसुत सङ्कृतिगोत्रज ॥
लब्धवानर्धकेदार श्रीबोधायनसूत्रवान् ।
धर्मराजो वत्सगोत्री पादक्षेत्रमिहाश्नुते ॥
नारायणो राघवस्य सुतो भार्गवगोत्रज ।
प्राप्तवानर्धकेदार धीमाञ्जैमिनिसूत्रवान् ॥
आपस्तम्बी भरद्वाजवश्यो भास्करभट्टज ।
सूर्यनारायणः सोऽय वृत्तिमेका समश्नुते ॥
शिङ्गिरेर्नन्दनश्चोकावधानी याजुषोत्तम ।
लोहितान्वयभूरर्धां वृत्तिमासाद्य वर्धते ॥
चिदम्बरावधानी च श्रीमान्वरदभट्टज ।
कौशिकान्वयवानापस्तम्बी वृत्त्यार्धयाञ्चति ॥
आत्रेयवशजो रामावधानी याजुषोत्तम ।
जगन्नाथकुमारोऽयमर्ध क्षेत्रमिहाप्तवान् ॥
कौशिकान्वयजो रामचन्द्रभट्टसुतोऽश्नुते ।
श्रीनिवासद्विजोऽप्येक क्षेत्र याजुषिकोत्तम ॥
श्रीमानगस्त्यविबुधोऽप्यर्धवृत्तिमिहाश्नुते ।
अर्धवृत्ति कोण्डवीटिरामलिङ्गबुधोऽग्रहीत् ॥

आत्रेयागोत्रजः सर्वनाथो दीक्षितशेखरः ।
अर्धवृत्तिं समासाद्य ऋक्शाखी धनदायते ॥
एते सर्वे द्विजश्रेष्ठाः पूर्वोक्तं ग्राममुत्तमम् ।
श्रीकर्नाटककुल्यायास्तीरस्थतरुशोभितम् ॥
भट्टवृत्तिं विना सर्वदेवदायसमन्वितम् ।
कपटाजोलेसहितं तिरुतुवलयान्वितम् ॥
मदुप्परयुतं कीळेक्कळिप्यलसमन्वितम् ।
कारुकुर्च्यर्धयुक्तपञ्चमावुसमन्वितम् ॥
तत्तद्दिक्षु स्थितश्रीमद्ग्रामनाङ्कितसीमकम् ।
स्थितं दक्षिणवाहिन्याः कुल्यायाः पश्चिमे तटे ॥
कारुकुर्च्याः पूर्वनीचवाटिकायास्तु पूर्वतः ।
सर्वमान्यतया लब्ध्वा जयन्त्या चन्द्रतारकम् ॥
ग्रामदेवतकु कोनि विडिचिन क्षेत्र अर्धम् ।
श्रीवेङ्कटपतिरायक्षितिपतिवर्यस्य कीर्त्तिधुर्यस्य ।
शासनमिदं सुधीजनकुवलयचन्द्रस्य भूमहेन्द्रस्य ॥
वीरवेङ्कटरायोक्त्या प्राह पौत्रः सभापतेः ।
कामकोटिसुतो रामकविः शासनवाङ्मयम् ॥
श्रीवीरणाचार्यवरेण्यपौत्रो वराच्युतार्यो गणपार्यपुत्रः ।
सूक्त्यालिखद्वेङ्कटरायमौलेः पद्यानि हृद्यान्यथ शासनस्य ॥
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम् ।
दानात्स्वर्गमवाप्नोति पालनादच्युतं पदम् ॥
स्वदत्ताद्द्विगुणं पुण्यं परदत्तानुपालनम् ।
परदत्तापहारेण स्वदत्तं निष्फलं भवेत् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
षष्टिं वर्षसहस्राणि विष्ठायां जायते क्रिमिः ॥
एकैव भगिनी लोके सर्वेषामेव भूभुजाम् ।
न भोज्या न करग्राह्या विप्रदत्ता वसुंधरा ॥

सामान्योऽय धर्मसेतुर्नृपाणा काले काले पालनीयो भवद्भिः ।
सर्वानेतान्भाविन पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्र. ॥

श्रीवेङ्कटेश ॥

(एपिग्राफिआ इण्डिका—३।२४०-२५१)

---

(१५०)

श्रीमदन्नवेममहाराजदत्तवेमपुराग्रहारशासनम्[१] ।

श्रीमान्वराहवपुरावहतु श्रिय वो
येनाशु कौतुकवतोद्वहता धरित्र्या ।
दष्ट्राभिघातपरिकम्पितमेरुशृङ्ग-
निर्मुक्तरत्ननिकरैरुदपादि रेखा ॥

अरविन्दनाभिचरणारविन्दतो जगता हिताय जनिमाप काचन ।
सुरलोकसिन्धुरिव जातिरुज्ज्वला गुणगौरवेण गणनीयजीवना ॥

अभूत्तस्या जातौ गुणगणनिधिः प्रोलनृपति
प्रतापाढ्ये यस्मिन्सुरतरुवितार वितरति ।
जना सर्वे सद्यश्च्युतविविधवृत्तिव्यतिकरा'
सम धर्मे कामे मतिमविहता सन्यधिषत ॥

तस्माज्जज्ञे वेमभूपः प्रतापी वीर, साक्षान्मूर्तिशालीव धर्म ।
दुर्वृत्ताना यो द्विषा निग्रहत्य क्षोणी कृत्स्ना रामभोज बुभोज ॥

हेमाद्रिणा सप्रतिपादिताना दानव्रताना विधिवद्विधाता ।
निस्सीममुर्वीं द्विजसात्स कृत्वा तद्भुक्तशेषा स्वयमन्वभुङ्क्त ॥

मेरुमन्दरकैलासानारुरुक्षुर्महामति ।
सोपानपङ्क्ति श्रीशैले व्यतनोद्वेमभूपति ॥

---

१ एतच्छासनपत्रत्रय E Hultzsch, Ph D महाशयेन Sir Walter Elliot महाशयस्य लेखद्वयात् Dr Fleet महाशयप्रेषितात् सशोध्य प्रकाशितम् शासनसमयस्तु शककाल १२९६ (1218 A D) मित स्फुट एव लिखित

नस्य शासितुरुभौ बभूवतू राम‌लक्ष्मणनिभौ तनूभवौ।
अन्नवोतनृपति प्रतापवानन्नवेमनृपतिश्च जित्वर· ॥
पितुरनन्तरमग्र्यगुणोऽग्रज समधिगत्य स राज्यमकण्टकम्।
वसुमतीमखिला परिपालयन्सुचरितै समचेष्ट महद्यश· ॥
येनाग्रहारा बहवो वितीर्णा हेमाद्रिदानानि कृतानि येन।
तीर्थेषु सत्राणि ततानि येन येन प्रजा साध्वनुरञ्जिताश्च ॥
तदनन्तरमन्नवेमभूप पितृसिहासनमुन्नतोऽधिरूढः।
अखिलानरिभूपतीन्महात्मा सुरसिंहासनमध्यरोहयद्द्राक् ॥
महादानादिदानाना यस्मिन्सम्यग्विधातरि।
चिराय तत्तद्विधयश्चरितार्थत्वमाययु ॥
कीर्त्ति दिगम्बरा दृष्ट्वा यस्य प्रियतमा जना।
एष सर्वस्वमर्थिभ्यो दत्तवानिति मन्वते ॥
सोऽयं वसन्तरायाङ्क कस्तूरीचन्द्रचन्दनै।
न केवला भुव द्या च क्षिप्तैर्गन्धवतीं व्यधात् ॥
यद्वसन्तोत्सवक्षिप्तभूरिकर्पूररेणुभि।
यशसा किंतु तस्यासीद्धवल जगता त्रयम् ॥
श्रीपल्लवत्रिनेत्राङ्क श्रीशैलात्पूर्वत स्थितम्।
श्रीकोण्डवीटिनगर सोऽयं शास्ति परतप ॥
तस्यान्नवेमचन्द्रस्य लक्ष्मीरिव सहोदरा।
श्रीनल्लनूङ्कभूपस्य महिषी विष्णुतेजस ॥
वेमसानीति विख्याता सप्तसतानशालिनी।
नित्य हेमाद्रिकल्पोक्तदानव्रतविधायिनी ॥
शाकाब्दे रसरत्नभानु(१२९६)गणिते ग्रस्ते विधौ राहुणा
कार्तिक्या विजयेश्वरस्य पुरत श्रीगौतमीरोधसि।
विप्रेभ्य परमन्नवेमनृपति श्रीवेमसान्याः स्वसु
पुण्यार्थं नड्डुपूरसञ्ज्ञमददाद्ग्राम स कोणस्थले ॥

साष्टैश्वर्यं साष्टभोग दत्तो विंशतिभागवान् ।
तस्या नाम्नाग्रहारोऽय भाति वेमपुराह्वयः ॥

अस्य ग्रामस्य प्रतिग्रहीतार —तल्लाभट्टः, तिप्पयार्यः, दोचयार्य, एते हरितगोत्रा । देवरभट्ट, शिङ्गयभट्ट, माचयार्य', एते कौशिकगोत्रा । मुम्मडियार्य, लक्कनार्य, एतौ श्रीवत्सगोत्रौ । प्रभाकरभट्ट, नागयभट्टः, वासुदेवार्य, एते काश्यपगोत्रा । पेरुमाणिभट्टः, लोहितगोत्र'। राघवभट्ट', कोण्डयार्य', एतौ भारद्वाजगोत्रौ । इम्मडियार्य, आत्रेयगोत्र । अय्यदेवरार्य, मल्लिनाथार्य, एतौ गार्ग्यगोत्रौ । वल्लभार्य, नरहरिभट्ट, एतौ कामकायतगोत्रौ । लक्कनार्य, कौण्डिन्यगोत्र ॥ अस्य ग्रामस्य सीमान —तूर्पुनकु मुप्पल्ले पुन्त । आग्नेयानकु । पाञ्चालवरपु मुप्यल्ले रेण्डु पुन्तल कूटमि । दक्षिणानकु । आग्नेयननुण्डि पङ्डमळ्ळ वोयि अन्तनुत्तर वोयि अनन्तनुण्डि पङ्डमळ्ळ वोयि अन्तट दक्षिणमुखमैन पुट्टलतोडिकण्डु दुळ्ळ मेट्टु पुन्त । अन्दुण्डिगोदावरिदाङ्कानु सेडकोटि मेडितापुन्त । नैर्ऋत्यानकुन्नु पङ्डमटिकिन्नि गोदावरि । वायव्यानकु । गोदावरिनुण्डि तूर्पमुखमै वच्चिन गट्टुन्नु प्रेमलकुण्टानु । उत्तरानकु । मेडितापपुन्तानु । कोम्मेपाडानु । अट्टे नल्लम्बल्लि पुन्त । ईशान्यानकुन्नु नलम्वल्लि पुन्त ॥

यावन्ति लाङ्गलमुखेन रजासि भूमे-
भासा निधेर्दुहितुरङ्गजरोमकाणि ।
तावन्ति शकरपुरे स युगानि तिष्ठे-
द्भूमिप्रदानमिह य कुरुते मनुष्यः ॥
आस्फोटयन्ति पितरो वल्गन्ति च पितामहा' ।
भूमिदोऽस्मत्कुले जातो योऽस्मान्सतारयिष्यति ॥
स्वदत्ताद्विगुण पुण्य परदत्तानुपालनम् ।
परदत्तापहारेण स्वदत्त निष्फल भवेत् ॥
स्वदत्ता परदत्ता वा यो हरेत वसुधराम् ।
षष्टिं वर्षसहस्राणि विष्ठाया जायते क्रिमिः ॥

सामान्योऽय धर्मसेतुर्नृपाणा काले काले पालनीयो भवद्भि ।
इत्थ सर्वान्भाविन पार्थिवेन्द्रान्भूयो भूयो याचते रामचन्द्र ॥
अनवेमभूपति पाञ्चालवरणु वोलमन्दु ईवूरि पोलान गलयनु धार
वोसि इञ्चिन क्षेत्र खम् ॥

(एपिग्राफिआ इण्डिका—३।२८८-२९१)

---

(१५१)

द्वितीयपुलिकेशिन्नपराभिधानश्रीसत्याश्रयमहाराजानां शासनपत्रम्।

जयति जगता विधातुस्त्रिविक्रमाक्रान्तसकलभुवनस्य ।
नतन ण • • णनखाशुजटिल पद विष्णो ॥

मानव्यसगोत्राणा हारितिपुत्राणा चलुक्यानामन्ववाये वाताप्याः प्रथमविधातुरनेकाध्वरावभृथस्नानसमार्द्रीकृतपुण्यमूर्ते सर्वमङ्गलायतनस्य वल्लभनृपते कीर्त्या युक्तस्य कीर्तिवर्मण पुत्र समनुष्ठितपतिदेवताव्रत कमलालयाविपुलपयोधरविलुप्तचन्दनालेप सुरेन्द्रमन्दिरजातकिन्नराङ्गनापतीयमानविमलकीर्ति खरदनकुलिशविभिन्नरिपुहृदयोद्गतरुधिरधारास्नपितमस्तकमत्तमातङ्गोदयपर्वततरुणरवि निगृहीतदुष्टजन परिगृहीतविद्वत्सखोऽनुगृहीतभृत्यवर्ग करगतखड्गोत्कृत्तपरनृपदन्तिदन्तोत्थितवह्निशिखोद्दीपितरणभूमि वरयुवतिनयनसायकैकलक्ष्यो विविधशास्त्रार्थतत्त्वविचारक्षमसूक्ष्मबुद्धिश्चलुक्यकुलतिलक सर्वसद्गुणाश्रयो रिपुदरिद्रः श्रीसत्याश्रयोऽनामय

पदं न्यस्य शत्रूणा शौर्येणोपरि पार्थिव ।
प्रकृत्या पुश्चलीं लक्ष्मीं सतीव्रतमकारयत् ॥

---

१ 'अस्य लेखस्याधारभूत ताम्रपत्रद्वय पण्डित-भगवानलाल-इन्द्रजि-महाशयेनाह दर्शित तदेव स्वीयव्याख्यापत्रसनाथ 'बॉम्बे एशियाटिक् सोसाइटी' मन्त्रिपार्श्वे प्रेषितमासीत् ~~इदानीम्पुस्त~~कालये व्याख्यापत्ररहित तदुपलभ्य स्वय व्याख्याय प्रकाशयामि' इति J. F Fleet महाशया

स महीपतिरवरेतिकाविषयवासिन समाज्ञापयति—यथाय मम मातुलः समधिगतार्यमार्गोन्मार्ग स्वविक्रमक्रयक्रीतविशालकीर्तिवितानन‍द्ध-सर्वदिगन्तर· सेन्द्रकाणा तिलकभूत परममाहेश्वर **श्रीवल्लभसेनानन्द-राजः** । तेन राज्ञा मातापित्रोरात्मनश्च पुण्योपचयार्थं आत्रेयसगोत्राय **कृष्णस्वामिसूनवे महेश्वरायेष्टयज्ञाय आम्रवटवकग्राम**·, तथा **वारुवे-न्नायामवञ्चपल्यां** विशतिश्चाटभटदूतराजपुरुषाणामप्रवेशनीयम्—द्वयमे-तत्प्रादात् ।

विदिता सन्तु राजान सर्वे मद्वशसभवा. ।
अन्ये च पृथिवीपाला. सामन्ताश्च महीतले ॥
य कश्चित्पृथिवीपालो भोगमस्य निवर्तयेत् ।
महता पातकाना तु कर्तुस्तस्य फल भवेत् ॥

उक्त च—

बहुभिर्वसुधा भुक्ता राजभि सगरादिभि ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
षष्टि वर्षसहस्राणि स्वर्गे मोदति भूमिद· ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
पूर्वदत्ता द्विजातिभ्यो यत्नाद्रक्ष युधिष्ठिर ।
मही महीमता श्रेष्ठ दानाच्छ्रेयोनुपालनम् ॥
स्वदत्ता परदत्ता वा यो हरेत वसुधराम् ।
स्वविष्ठाया कृमिर्भूत्वा पितृभि· सह पच्यते ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधु· पुनराददीत ॥
फालकृष्टा मही दद्यात्सबीजा सस्यमालिनीम् ।
यावत्सूर्यकृतालोकास्तावत्स्वर्गे महीयते ॥

स्वस्त्यस्तु लेखकवाचकश्रोतृभ्य । ओम् ।

(एपिग्राफिआ इण्डिका—३।५१–५२)

(१५२)

गुर्जरदेशाधिपतिश्रीगोविन्दराजमहाराजानां शासनपत्रम्[१] ।

ओम् । शकनृपकालातीतसंवत्सरशतेषु सप्तसु पञ्चत्रिंशत्यधिकेषु पौषशुद्धसप्तम्या अङ्कतोऽपि संवत्सरशतानि ७३५ नन्दनसंवत्सरे पौषशुद्धतिथि ७ अस्यां संवत्सरमासपक्षदिवसपूर्वायां परमभट्टारकमहाराजेन्द्रराजपरमेश्वर शरच्छशाङ्ककिरणनिर्मलयशोंशुकावगुण्ठितमेदिनीयुवतिभोक्ता प्रभूतवर्ष: श्रीवल्लभनरेन्द्रो गोविन्दराजनामा

जगत्तुङ्गतुङ्गतुरगप्रवृद्धरेणूर्ध्वरुद्धरविकिरणम् ।
ग्रीष्मेऽपि नभो निखिलं प्रावृट्कालायते स्पष्टम् ॥
रक्षता येन निःशेषं चतुरम्बुधिसंयुतम् ।
राज्यं धर्मेण लोकानां कृता तुष्टिः परा हृदि ॥
भ्राता तु तस्येन्द्रसमानवीर्यः श्रीमान्भुवि क्ष्मापतिरिन्द्रराजः ।
शास्ता बभूवाद्भुतकीर्तिसूतिस्तद्दत्तलाटेश्वरमण्डलस्य ॥
सूनुर्बभूव खलु तस्य महानुभाव:
शास्त्रार्थबोधसुखलालितचित्तवृत्तिः ।
यो गौणनामपरिवारमुवाह पूर्वं
श्रीकर्कराजसुभगव्यपदेशमुच्चैः ॥
सुवृषस्थोऽनुजस्तस्य सततं सेवितो बुधैः ।
गोविन्दराजो भूपालः साक्षाच्छंभुरिवापरः ॥
फलोन्मुखैरापतितैर्विदूरतः समं समन्ताद्गुणपक्षपातिभिः ।
महाहवे दानविधौ च मार्गणैर्न कुण्ठितं यस्य सदैव मानसम् ॥

---

१ लेखस्यास्याधारभूतं ताम्रपत्रत्रयं खानदेशप्रान्तस्थशाहाडेतालुकाया तोरखेडे-'ग्रामवास्तव्य देवराव-बिन-बलवन्तराव-कदम्बाण्डे जाहागीरदार-महाशयात् Mr C G Dodgson I C S (Bombay) महाशयेन प्राप्तं मत्सन्निधौ प्रेषितमधुना मया-[illegible]' इति J F Fleet I C S Ph D C I E महाशया

२ आर्यानुरोधेन तकारद्वित्वं कविना न कृतमासीत्.

तद्दत्त **सीहरक्खी**द्वादशके प्रभुज्यमाने **सल्लुकिक**विकलङ्कवंशप्रसूतो मूर्द्धाभिषिक्तो दुर्वारवैरिवनितातुलतापहेतुरनेकदर्पितारातितरुप्रभञ्जनो मातरिश्वा शरच्छशाङ्ककिरणकुन्दकुसुमस्फटिकावदातसमाननिर्मलयशा. श्री**मणिनाग**पौत्र श्री**राजादित्य**सुतः परमब्रह्मण्य समधिगताशेषमहाशब्दमहासामन्त. । सोऽय श्री**बुद्धवर्षः** सर्वानेव भाविभूमिपालाननुबोधयति—

अस्तु व. सविदितम्—यथा मया मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये ऐहिकामुष्मिकफलावाप्त्यर्थं बलिचरुवैश्वदेवाग्निहोत्रक्रतुक्रियाद्युत्सर्पणार्थं **बदरसिद्धि**चातुर्विद्यसामान्यवाजसनेयमाध्यदिनब्रह्मचारित्रिप्रवरलावायनसगोत्रब्राह्मण**सोमाय सर्वदेव**पुत्राय, तथा ब्राह्मण**नाहर**गोत्तमसगोत्र**महेश्वर**पुत्र , तथा **द्रोण**वार्ष्णेयसगोत्रशर्मपुत्र , तथा **सोम**कात्यायनसगोत्रवप्पुकसुत , तथा **लकुटिः** आग्नेयसमानसगोत्र. **सर्वदेव**सुत , तथा **सर्वदेव**मुद्गलसगोत्र , तथा **नेवः**, तथा तत्सुतो **गोवः**, तथा **भौल्लः** वत्ससगोत्र., तथा **द्रोणशर्म** , तथा **अणहादित्यः**, तथा **नासेणः**, तथा **गोवः** गोतमसगोत्रो **द्रोण**सुत', तथा **आदित्यः** पाराशरसगोत्रः तथा **लिम्बादित्यः** आग्नेयसमानसगोत्र , तथा **योगः** शाण्डिल्यसगोत्र., तथा **अग्निशर्म** , तथा **नेवारेवः** मुद्गलसगोत्र , तथा **नागः** माधरसगोत्र , तथा **नाणसरः**, तथा **रेवासमः**, तथा **भौल्लः** यौगनसगोत्र., तथा **नेवादित्यः** भरद्वाजसगोत्र', तथा **ईश्वरः** कौषसगोत्र., तथा वप्पस्वामी, तथा **गोवशर्मः** वार्ष्णेयसगोत्र , तथा **शिवादित्यः**, तथा **देवहटः**, तथा **सीहः** लावायनसगोत्र., तथा **नन्हः** कात्यायनसगोत्र , तथा **मातुशूरः**, तथा **महेश्वरः** आग्नेयसमानसगोत्रः, तेन आत्माशो **नैन**दौहित्राय दत्त., तथा **लल्लः** भरद्वाजसगोत्र , तथा तस्यैव भ्राता **जज्जुकः**, तथा **दत्तः** शौण्डानसगोत्र., तथा **अग्निशर्मा** आग्नेयसमानसगोत्र , तथा **नेवादित्यः**, तथा **सम्बीरः** कौशसगोत्रः, तथा **जज्जुकः** वार्ष्णेयसगोत्र , तथा **आदित्यः** गोतमसगोत्र , तथा **आदित्यचीहल्लकः** सोमसुत., तथाग्निशर्मा मुद्गलसगोत्रः, तथा **रेव** आग्नेयसमानसगोत्र ,

सीहरक्खीद्वादशान्तर्गतगोवट्टनाभिधानो ग्राम सहिरण्यादानसदण्ड-दासापराध ससीमापर्यन्त सतीर्थ, मेखुत्रलीकप्रावेशुक समस्तराजकी-यानामहस्तप्रक्षेपणीयो भूमिच्छिद्रन्यायेनाद्य विजयसप्तम्यामुदकातिसर्गेण प्रतिपादित । यतस्ततोऽस्य न कैश्चिद्व्यासेधे प्रवर्तितव्यम् । आगामिभद्रनृ-पतिभिरप्यनित्यान्यैश्वर्याणि, अस्थिर मानुष्यम्, सामान्य च भूमिदानफ-लम्, तदपहरणपाप च, अवगच्छद्भिरयमस्मद्दायोऽनुमन्तव्य परिपालनी-यश्च । उक्त च महर्षिभि.—

'बहुभिर्वसुधा भुक्ता राजभि सगरादिभि. ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिद ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥' इति ।

ओम् । लिखित मया लेखककृष्णेन नन्नपुत्रेण ॥

(एपिग्राफिआ इण्डिका—३।१४–१७)

---

(१५३)

अल्लयडोड्डुराज्ञस्ताम्रपत्रम्[1] ।

लक्ष्मीं पक्ष्मलिता तनोतु भवता लक्ष्मीपति सतत
केलीकोलतनु समस्तजगता रक्षाविधौ दक्षिण. ।
स्नेहार्द्रां धरणीं निजैकरमणीं कर्तुं रसादुद्वह-
स्तत्सश्लेषकुतूहलात्पुलकितो य. स्तब्धरोमाभवत् ॥
अस्तु महो हस्तिमुख स्वस्तिकर व समस्तजनिहेतु ।
यत्कटरटदलिमाला विलसति हरिनीलहारसमलक्ष्मी ॥

---

१ इद ताम्रपत्र **गोदावरी**प्रान्ते **रामचन्द्रपुर**ग्रामत ५ मीलदूरे **कोंकगुड**ग्रामे इष्टिकागर्ते आसीत् तत्पत्रम् Mr S H Wynne महाशयै Dr Hultzsch महाशयद्वारा मद्राससग्रहालये प्रेषितम् तदादाय G V Ramamurti, B A महाशयवरा प्रकाशितवन्त समयश्चास्य A D 1431 इति.

कलापतेस्ता कलयामि बाला कला कलङ्केन विभिन्नरूपाम् ।
यदन्तरस्यन्दिसुधार्द्रमौलिर्मृत्युंजय पीतविष शिवोऽभूत् ॥

अस्ति प्रशस्तमहिमा पुरुष. प्रमाण-
स्तस्य क्रमान्मुखभुजोरुपदादभूवन् ।
वर्णा द्विजप्रभृतय पदपद्मजाना
वशेष्वभूज्जगति पण्टकुल प्रतीतम् ॥

तत्रासीन्महितो महीपतिलको मान्य सतामुन्नत-
स्त्यागी दोड्डमहीपति सुकृतवान्पोल्वोलगोत्राग्रणी. ।
दानैर्यस्य विनिर्जितो मतियुतै साम्याय कल्पद्रुमो
मौनी वल्कलसवृत सुरगण भक्त्या भजत्यादरात् ॥

श्रीयन्नबोलप्रभुकोटयाल्लभूमीश्वरास्तस्य सुता प्रसूता. ।
सत्येन सत्वेन जयेन धर्मतनूजभीमार्जुनतुल्यरूपा ॥

तेषा कनिष्ठोऽपि च जन्मनाभूज्ज्येष्ठो गुणैरल्लधरानरेन्द्र. ।
चन्द्रोऽप्यदोषाकरतामुपेत. सौम्योऽपि भूनन्दनता प्रयात. ॥

प्रतापभानौ प्रकट यदीये विजृम्भिते वैरिविलासिनीनाम् ।
मुखाम्बुजातानि मुहु स्वकीया विकासलीला विसृजन्ति चित्रम् ॥

शचीव शक्रस्य शिवेव शभो पद्मेव सा पद्मविलोचनस्य ।
वेमाम्बिका चोडकुलेन्दुभीमभूपात्मजाभून्महितास्य जाया ॥

श्रीवेमभूमीश्वरवीरभद्रभूनाथदोड्डक्षितिपान्नभूपा ।
अल्लाडभूपस्य सुता अभूवन्गुणैर्यथा पङ्क्तिरथस्य पुत्रा ॥

गुणै स तेषा निजजन्मना च ज्यायानभूदल्लयवेमभूप ।
रामो यथा रम्यगुणाभिराम. स्वसोदराणा निजभक्तिभाजाम् ॥

-- वेमप्रभो राजमहेन्द्रनामा रामाभिरामाजनि राजधानी ।
अनेकमातङ्गतुरङ्गपूर्णा शशाङ्कसकाशविराजिसौधा ॥

धर्मानुन्नमयन्रिपून्विनमयन्राज्यश्रिय वर्धय-
न्पाप संशमयन्प्रजाश्च रमयन्विद्वज्जनान्स्थापयन् ।

कीर्तिं संरचयन्दिशासु निखिलक्षोणीभृतामाश्रयो
राजा राजमहेन्द्रनामनगरे वेमेश्वरो जृम्भते ॥
तस्यानुजो राजमहेन्द्रराज्यपट्टाभिषिक्तो विलसत्प्रताप ।
त्यागश्रिया संभृतवीरभद्र श्रीवीरभद्रक्षितिपो विभाति ॥
अल्लनृपवीरभद्रं विभवसमुद्र वितीर्णतरुभद्रम् ।
पूजामोदितरुद्र बलजितबलभद्रमाहुरतिभद्रम् ॥
आकारजितजयन्तौ जगति जयन्तौ द्विषोश्वरेवन्तौ ।
अमितदयागुणदान्तौ वेमेश्वरवीरभद्रभूकान्तौ ॥
राज्ञोस्तयो रम्यगुणोऽनुजात श्रीदोड्डभूपो विजितारिभूपः ।
विभाति कर्पूरवसन्तराय सग्रामभीमो जगनीब्बगण्ड ॥
आनम्रक्षितिपालकम्रमुकुटप्रप्रोतनानामणि-
च्छायाबालरविप्रभापटलिकादीव्यत्पदाम्भोरुह ।
दिक्कान्ताकुचचन्दनायितयश सपूर्णरोदोऽन्तभू-
रल्लादक्षितिपात्मजो विजयते दोड्डक्षमानायक ॥
धारामण्डलभञ्जनीसुरडिकाख्यातेऽत्र दोड्डप्रभौ
वाह लङ्घयति द्विधा त्रिगुणिताष्टारत्निमात्रा भुवम् ।
चित्र किं नु तदीयकीर्तिरबलारोहत्यहो दिग्गजा-
न्सूर्याश्वान्विषमानुपर्युपरि च प्रक्रीडति प्रत्यहम् ॥
भुवनत्रितये धवले विशदैर्यत्कीर्तिपूरकर्पूरै ।
चित्र चकोरयूना दिवापि संभवति चन्द्रिकामोद ॥
धाटीघोटिखुराग्रखण्डितमहीधूलीकरालीकृत-
प्रान्तभ्रान्तनतारिवीरपटले श्रीदोड्डभूमीश्वरे ।
चित्र शत्रुनृपा निमज्य विमले तत्खड्गधाराजले
प्रोन्मज्जन्त्यमराङ्गनाकुचतटीसघट्टिगङ्गाजले ॥
कदाचिदर्धोदयपुण्यकाले दोड्डक्षितीशोऽर्चितपार्वतीशः ।
दानानि रम्याणि विधाय गङ्गातटेऽग्रहारानपि दातुमैच्छत् ॥

श्रीशाके करबाणविश्वगणिते साधारणे वत्सरे
पौषेऽर्धोदयनाम्नि पुण्यसमये कौन्तेयगङ्गातटे ।
ग्रामं गुम्पिणिनामकं सहलिकं सैश्वर्यभोगाष्टकं
विप्रेभ्योल्लपदोड्डभूपतिरदादाचन्द्रमातारकम् ॥

अनवरतक्रतुरचनासमोदितभूमिदेवदेवेन्द्रम् ।
तं ग्रामं निजनाम्ना कृतवानल्लाडरेड्डिदोड्डवरम् ॥

वृत्तिमन्तो द्विजवरा लिख्यन्ते सांप्रतं क्रमात् ।
अत्राग्रहारतिलके सर्वेऽप्येकैकभागिनः ॥

ब्रह्मा यजुषि शास्त्राणां व्याख्याता नृपपूजितः ।
गौतमः श्रीशिङ्गयज्वपेरुमाडिमखी सुखी ॥

षड्दर्शनीव्याक्रियाभिर्जिह्वा यस्य विजृम्भते ।
पन्नालकोम्मयप्राज्ञः कौण्डिन्यो यजुरुज्ज्वलः ॥

श्रीशिङ्गमद्वेदिपौत्रो मीमांसाशब्दतर्कभूः ।
साहित्यसीमा हरितः शिङ्गयार्यो महोदयः ॥

षड्दर्शन्यादिविद्यानां यस्य जिह्वा विहारभूः ।
मल्लावमाधवसुधीः कौण्डिन्यो यजुषां पटुः ॥

मीमांसामांसलः शब्दपटुतर्केऽपि कर्कशः ।
आत्रेयो यजुषि प्रौढः श्रीकः 'भरतः सुधीः ॥

षड्दर्शनी नर्तकीव जिह्वाग्रे यस्य नृत्यति ।
इङ्गुवुश्रीमल्लुभट्टः शौनको यजुषां निधिः ॥

व्याख्याताखिलशास्त्राणामन्नदो राजपूजितः ।
हरितो गुडिमेट्टश्रीसर्ववेदवमखीश्वरः ॥

अप्तोर्यामकृतः पुत्रः कोत्तुरप्प्ययज्वनः ।
विद्यान्वितः श्रीहरितः श्रीमामिडिमखी सुखी ॥

वेदशास्त्रपुराणेषु वेदव्यास इवापरः ।
वैष्णवः काश्यपो वल्लभार्यनारायणः सुधीः ॥

विद्योतन्ते मुखे यस्य विद्या' सर्वा विजृम्भिता ।
सरस्वतीप्रोलुभट्ट कौण्डिन्यो राजपूजित ॥
साङ्गाग्रवेदनिशित. शास्त्रकाव्यादिभव्यधी ।
चरित्रेण च गोत्रेण वसिष्ठो रामय सुधीः ॥
भारद्वाजोऽग्रवेदाग्र्य क्रमधाडीगुणार्णव ।
श्रीमानन्नमयज्वेन्द्र शिङ्गयार्यः स दीक्षितः ॥
ययुर्जटादेशचर्चाद्यवधानप्रचण्डधी ।
श्रीये " यावधानीन्द्र कौण्डिन्योऽप्ययवर्यभू' ॥
चित्रावधानी यजुषि शौनको विस्सयार्यभू' ।
इङ्गुवुश्रीमञ्चनावधानीन्द्रो मखदीक्षित ॥
यजु सामार्णवौ येन निपीतौ कपिगोत्रभू ।
गुण्टूरिनागयद्वेदी साध्वरौद्गात्रभाग्यवान् ॥
गोलपल्यप्पयार्याब्धिचन्द्र श्रीवत्सगोत्रज ।
अनन्तार्यः साङ्गयजुष्यापस्तम्ब इवापर ॥
पोनुङ्गोटिपोतिभट्टो यजु'क्रमविशारद ।
आत्रेय सुयशा मानी पोतयार्यतनूभव. ॥
कौशिक' श्रीयाद्वनिनरहर्यार्यगोपयः ।
अग्रवेदक्रमावृत्तिभाग्यवानाश्वलायनः ॥
वेल्धेविश्रीकेशवार्यः काश्यप शिङ्गयात्मजः ।
श्रीमान्साङ्गयजुर्ब्रह्मा गुणी सर्वोपकारकः ॥
श्रीवत्स श्रीकन्दुगुलमाधवार्यसुतोऽप्पयः ।
यजु'क्रमप्रौढियुक्तो दाता श्रीमान्गुणप्रिय' ॥
कौण्डिन्य श्रीवोनगिरिमाधवार्याब्धिचन्द्रमा. ।
नृसिंहशिष्टः सुजनो यजुर्वेदचतुर्मुख ॥
श्रीयाकुनूरिनागार्यशिष्टो विष्णुतनूभवः ।
यजुरस्खलिता वृत्ति. कौशिको विनयोन्नतः ॥

पामलपाटिनरहरिर्धीर श्रीरामयार्यतनुजात ।
कौशिकगोत्रो गुणवान्यजुरावृत्त्या समस्तबुधनन्द्य. ॥
हरितः कलुवकश्रीवल्लभद्वेदिशेखर ।
प्रतापवानृग्यजुषो· पूर्तकृन्मल्लयात्मज ॥
श्रीयंपदौभलद्वेदी हरितो गङ्गयार्यजः ।
ऋग्यजु.श्रौतशास्त्रज्ञ सलक्षणजटापटु· ॥
भारद्वाजो देवरपुनरहर्यार्यनन्दन ।
शूराध्येता यजुर्वेदे श्रीमान्गणपति सुधी ॥
सुन्दिलकृष्णभट्टस्य सुतो नरहरि सुधी. ।
भारद्वाजो यजुर्वेदपटुराचार्यकीर्तिमान् ॥
भारद्वाज पेद्दयार्य कोल्लूरंनमभट्टज. ।
रम्याग्रवेदनिपुणो दयावान्दीक्षितो महान् ॥
काश्यप श्रीशिङ्गरेमीय· · यार्यतनूभव ।
पोतयार्यो यजुर्वेदमहावृत्तिमता वर ॥
श्रीकोगण्टिकोटार्यपुत्र शाण्डिल्यगोत्रजः ।
माचनार्यो यजुर्वेदजटावल्लभनामवान् ॥
श्रीकोण्डयपेद्दार्यसत्पुत्रो हरितान्वयः ।
श्रीयल्लाडार्यविप्रेन्द्रो यजुर्वेदविदा वर· ॥
आदित्यार्यसुतः शुद्धभारद्वाजो यजुःपटुः ।
श्रीमान्बोन्दिलपाटिश्रीपेद्दयार्यो महायशा ॥
श्रीमानपूरिदेचार्यपुत्रो गङ्गयकोविद ।
आत्रेयो यजुरावृत्तिविख्यातो विप्रनन्दितः ॥
कोन्दादिपोचनार्यस्य सूनुरात्रेयगोत्रज. ।
श्रीपोतनार्यो गुणवानद्वितीयो यजु क्रमे ॥
गौतमश्रीकामयार्यतनयो नयभूषण ।
श्रीतम्मयार्यो मतिमान्यजुरध्यापकोत्तम ॥

रामपल्लिकूचनार्यस्य सूनुः श्रीवत्सगोत्रज ।
तिप्पयार्यो यजु प्रौढ शब्दकाव्यादिभव्यधी. ॥
शाण्डिल्यो जल्लिपल्लिश्रीशिङ्गयार्यसुत कृती ।
स्वप्नेऽप्यभङ्गाध्ययन प्रोलयार्यो यजु क्रमे ॥
रम्योदयो राजुकोण्डपेद्दिभट्टो यजु कृती ।
यास्कान्वयो गौतमार्यजात सर्वज्ञतान्वित ॥
वसिष्ठश्चोटिपेद्दिश्रीमल्लयार्यतनूभव ।
जल्लिपल्लिनृसिंहार्यो यजु श्रुतिविशारद' ॥
ऋग्वेदाध्ययने दक्षो वल्लूरिमश्चनात्मज ।
भारद्वाज शिङ्गयार्यः सपदुन्नतकीर्तिमान् ॥
वङ्कुण्टलकामार्यगर्भपुण्योदय सुखी ।
भारद्वाजो वल्लभार्यश्रौती यजुषि शातधी ॥
नर्लूरिश्रीमल्लयार्यो मल्लयार्यतनूभव ।
वाधूलो ब्राह्मणवृत्तियुक्त ऋग्वेदपारग. ॥
श्रीयर्तङ्करिकामार्यो भारद्वाज सुलक्षण' ।
यजुर्वेदालय. पुत्रो वल्लभार्यस्य वल्लभ ॥
उण्डूकोण्डलपेद्दार्यकुमारो गौतमान्वय ।
श्रीयन्नमार्यो विनयी यजु श्रुतिविशारद' ॥
कौण्डिन्य कञ्चरे पल्लिनारायणतनूभव ।
यजुरावृत्तिसिंह श्रीनरसिंहसुधीः सुधी' ॥
हरितो मारट्टूरिश्रीकृष्णमार्यशुभोदय ।
अध्वर्यु[ ] श्रुतिविख्यातस्तिप्पनार्यो दयापर ॥
भारद्वाज सुब्रुवीटियल्लयार्यप्रियात्मजः ।
श्रीमाचनार्यो यजुषि क्रमावृत्तिविचित्रधी ॥
काश्यपो विश्रुतोऽध्वर्यु' श्रुतौ मल्लेलगङ्गनः ।
श्रीमल्लयार्यसंजातो धैर्यगाम्भीर्यभूषित ॥

श्रीकोण्डश्रीनृसिंहार्यतनय' श्रीदयान्वितः ।
चिट्टनार्यः कण्वगोत्रो यजुर्वेदधुरधर. ॥
श्रीमण्डवेल्लिनागार्यतनय' **केशवः** सुधी ।
काश्यपो निशितः शुक्लयजुर्वेदे गुणोन्नत' ॥
काश्यपो **मण्डवेल्लिश्रीवल्लभार्य**सुत कृती ।
विद्वाञ्शतपथी **कामयार्यः** शुक्लयजु पटु ॥
गुडिवाडानमार्यस्य कुमार कौशिकान्वय ।
पोतार्यः शुक्लयजुषा कान्त शान्तो गुणप्रिय. ॥
नून्तकिश्रीगङ्गनार्यगर्भरत्नमुदारधी ।
कौण्डिन्य **सूरयबुधः** सशुक्लयजुरञ्चित' ॥
गुणी कलम ख्यातकोम्मयामात्यनन्दन' ।
कौण्डिन्यो **माचमन्त्रीशो** राजकार्यधुरधर ॥
वल्लूरय्यलुमन्त्रीशो गुणवान्कीर्तिभूषण' ।
आपस्तम्बो राजमान्य कौण्डिन्यः शिवभक्तिमान् ॥
गुडियश्रीशिङ्गनार्यः कौण्डिन्यो यजुषा पटु. ।
विद्वान्सगीतसाहित्यशास्त्रमार्गविचक्षणः ॥
श्रीवोन्ताप्पयविप्रेन्द्र कौण्डिन्यो राजवल्लभः।
प्रियवादी यशोहारी सुखवान्सुजनप्रिय ॥
मौनभार्गवगोत्र. श्रीकेसपार्यतनूभव ।
येꣳवश्रीगोपणार्यो गुणवान(ा)श्वलायन ॥
चेꣳवुश्रीयप्पयार्यतनयो **विस्सया**ह्वय ।
काश्यपान्वयसजातो यजुर्वेदी महामतिः ॥
प्रसन्नवल्लभहरेर्ब्रह्मनागेश्वरस्य च ।
अत्राग्रहारे ललिते दत्त वृत्तिद्वय द्वयोः ॥
अग्रहारवरस्यास्य ग्रामग्रासार्थमुत्सुक' ।
प्रादादन्नवरग्राम कृत्स्न श्रीदोड्डभूपति. ॥

औभळामात्यतनय नारनाख्यस्य मन्त्रिण ।
खण्डिकान्नवरेऽत्रास्ति सार्धखारिचतुष्टयम् ॥
अस्य ग्रामस्य सीमानो दिक्षु पूर्वादिषु क्रमात् ।
सर्वेषा सुप्रबोधाय लिख्यन्ते देशभाषया ॥

"अल्लाडरेड्डिदोड्डवरपु सीमानिर्णयमु । ईशान्यादि कौन्तेयमध्यमादि दक्षिणमुखमै धरिमीद पुन्तदण्डनु पलवेलपोलसधि नन्दिकम्बाननुण्डि कोन्तमेर वच्चि मेडितापवक दक्षिणमुखमै कोन्तमेर वच्चिमळ्ळियु मेडितापवङ्कनु पश्चिममुखमै कोन्तमेर वच्चि राप्पटि दक्षिणमुखमै नावुलकु वच्चि आपुन्ते पट्टि वखङ्कलदाङ्का वच्चि माळ्ळि पडुमळ्ळ मुखमै ताळळकु वच्चि कोटिकि वेळिळ आनडुस पट्टुकोनि आग्नेयमुखमै कोन्तमेर वच्चि तूळ्ळुपु मुखमै रावुल पुन्तने कलसि चक्का दक्षिणमुखमै ऊरिवाकिटि तूळ्ळुपु पडुमटिल गलसि तूळ्ळपुमुखमै कोन्तमेर वच्चि दक्षिणमुखमै रेण्डु पेद्दतुम्मल नडुमङ्गानु रेण्डूळळ नडुमु वाङ्गु वट्टुकोनि चिन्तलतूळ्ळ पुनङ्गा देवरपल्लि ऊरि मुदटि वयटिकि वेळिळ पुट्टचायकु वच्चेनु तूर्पुसीमकु अन्तनुण्डि दक्षिणसीमकु पश्चिममुखमै ऊरि दक्षिणपु पुन्तनडुमु वट्टुङ्कोनि वखङ्कल पुट्टकु—" [इत्यादि देशभाषया।]

आरामैरभिरामैर्भूदेवै. सपन्मनोहरै. ।
आदिकुन्तातटे भाति ग्रामो **दोड्डवरो** महान् ॥

अल्लाडभूमीश्वर**दोड्डभूपो** भविष्यत प्रार्थयते नृपालान् ।
ममैष धर्म. परिपालनीय सौजन्यतो वा सुकृतेच्छया वा ॥

स्वदत्ताद्द्विगुण पुण्य परदत्तानुपालनम् ।
परदत्तापहारेण स्वदत्त निष्फल भवेत् ॥
दानपालनयोर्मध्ये दानाच्छ्रेयोऽनुपालनम् ।
दानात्स्वर्गमवाप्नोति पालनादच्युत पदम् ॥
स्वदत्ता परदत्ता वा यो हरेत वसुधराम् ।
षष्टिं वर्षसहस्राणि विष्ठाया जायते कृमि. ॥

एकैव भगिनी लोके सर्वेषामेव भूभुजाम्।
न भोग्या न करग्राह्या विप्रदत्ता वसुंधरा॥
गामेका रत्तिकामेका भूमेरप्येकमङ्गुलम्।
हरन्नरकमाप्नोति यावदाभूतसंप्लवम्॥
न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम्॥

(एपिग्राफिआ इण्डिका—५। ५७-६६)

(१५४)

वीरचोडमहीपतेस्ताम्रपत्रम्[1]।

श्रीमाञ्जगत्रयमिदं हरिरादिदेवः
स्रष्टुं विरिञ्चिमसृजन्निजनाभिपद्मात्।
तस्मादभूत्किल महामुनिरत्रिरत्रेः
सोमो महेश्वरशिखान्तकृतप्रतिष्ठः॥

तस्माद्बुधस्ततश्चक्रवर्ती पुरूरवास्तस्मादायुस्ततो नहुषस्ततो ययातिस्ततः पूरुस्ततो जनमेजयस्ततः प्राचीशस्ततः सैन्ययातिस्ततो हयपतिस्ततः सार्वभौमस्ततो जयसेनस्ततो महाभौमस्तस्मादैशानकस्ततः क्रौधाननस्ततो देवकिस्तस्मादृभुकस्तस्मादृक्षकस्ततो मतिवरस्ततः कात्यायनस्ततो नीलस्ततो दुष्यन्तस्ततो भरतस्ततो भूमन्युस्ततो हस्ती ततो विरोचनस्तस्मादजमीलस्ततः संवरणस्ततः सुधन्वा ततः परिक्षित्ततो भीमसेनस्ततः प्रदीपनस्ततः शंतनुस्ततो विचित्रवीर्यस्ततः पाण्डुराजस्ततः पाण्डवास्तेषु वशकरादर्जुनादभिमन्युस्ततः परिक्षित्ततो जनमेजयस्ततः क्षेमुकस्ततो नरवाहनस्ततः शतानीकस्तस्मादुदयनस्ततः

१ एतदाधारभूतं ताम्रपत्रं **मद्रासप्रदर्शिन्या** Dr. Hultzsch महाशयसमीपे प्रेषितम्, तदेव च पिठ्ठपुरराजेन Mr. D. F. Carmichael चीफ्सिक्टरमहाशयोपान्ते प्रहितम्। तेन च तत्परीक्षार्थे Dr. Burnell महाशयवरनिकटे प्रेषितम्। तदेवादाय H. Krishna Shashtri B. A. महाशयेन प्रकाशितम्। समयश्चास्य शकसंवत् १००१ (A. D. 1079) स्फुट एव।

प्रभृत्यवच्छिन्नसंतानेष्वयोध्यासिंहासनासीनेष्वेकान्नषष्टिचक्रवर्तिषु गतेषु तद्वंश्यो **विजयादित्यो** नाम राजा विजिगीषया दक्षिणापथं गत्वा त्रिलोचनपल्लवमधिक्षिप्य दैवदुरीहया लोकान्तरमगमत्। तस्मिन्सकुले पुरोहितेन वृद्धामात्यैश्च सार्धमन्तर्वत्नी तस्य महादेवी **मुडिवेमु**नामाग्रहारमुपगम्य तद्वास्तव्येन **विष्णुभट्ट**सोमयाजिना दुहितृनिर्विशेषमभिरक्षिता सती **विष्णुवर्धनं** नन्दनमसूत। सा च तस्य कुमारकस्य कुलक्रमोचितानि कर्माणि कारयित्वा तमवर्धयत्। स च मात्रा विदितवृत्तान्तो निर्गत्य चलुक्यगिरौ नन्दां भगवतीं गौरीमाराध्य कुमारनारायणमातृगणांश्च सतर्प्य श्वेतातपत्रैकशङ्खपञ्चमहाशब्दादीनि कुलक्रमागतानि निक्षिप्तानीव साम्राज्यचिह्नानि समादाय कडम्बगङ्गादिभूमिपान्निर्जित्य सेतुनर्मदामध्यं दक्षिणापथं पालयामास।

तस्यासीद्विजयादित्यो विष्णुवर्धनभूपते।
पल्लवान्वयजाताया महादेव्याश्च नन्दनः॥

तत्सुतः **पुलकेशिवल्लभः**। तत्पुत्रः **कीर्तिवर्मा** तस्य तनयः श्रीमतां सकलभुवनसंस्तूयमानमानव्यसगोत्राणां हारीतिपुत्राणां कौशिकीवरप्रसादलब्धराज्यानामश्वमेधावभृथस्नानपवित्रीकृतवपुषां चालुक्यानां कुलमलंकरिष्णोः **सत्याश्रयवल्लभेन्द्र**स्य भ्राता **कुब्जविष्णुवर्धनो**ऽष्टादश वर्षाणि वेङ्गिदेशमपालयत्। तत्सुतो **जयसिंहवल्लभ**स्त्रयस्त्रिंशतम्। तदनु **इन्द्रभट्टारकः** सप्त दिनानि, तत्सुतो **विष्णुवर्धनो** नव वर्षाणि, तत्सूनुर्**मङ्गियुवराजः** पञ्चविंशतिम्, तत्पुत्रो **जयसिंह**स्त्रयोदश, तदवरजः **कोकिलिः** षण्मासान्, तस्य भ्राता **विष्णुवर्धन**स्तमुच्चाट्य सप्तत्रिंशतं वर्षाणि, तत्पुत्रो **विजयादित्यो**ऽष्टादश, तत्तनयो विष्णुवर्धनः षट्त्रिंशतम्, तत्सुतो नरेन्द्रमृगराजोऽष्टाचत्वारिंशतम्, तत्सुतो **विष्णुवर्धनः** षट्त्रिंशतम्, तत्सुतो **नरेन्द्रमृगराजो**ऽष्टाचत्वारिंशतम्, तत्सुतः **कलिविष्णुवर्धनो**ऽध्यर्धवर्षम्, तत्सुतो **गुणगविजयादित्य**श्चत्वारिंशतं वर्षाणि, तद्भ्रातुर्विक्रमादित्यस्य तनयश्चालुक्यभीमस्त्रिंशतम्, तत्सुतः **कोल्लभिगण्डविजयादित्यः** षण्मासान्, तत्सुतो**ऽम्मराजः** सप्त वर्षाणि, तत्तनयं बालमुच्चाट्य **ताडपो** मासमेकम्, तं जित्वा **विक्रमादित्य** एकादश मासान्, तत्ताडपराजसुतो **युद्धमल्लः**

सप्त, तमुच्चाट्य देशादम्मराजानुजो **राजभीमो** द्वादशम्, तत्सूनुर**म्मराजः** पञ्चविंशतिम्, तस्य द्वैमातुरो **दाननृप**स्त्रीणि, ततः सप्तविंशति वर्षाणि दैवदूरीहया वेङ्गिमहिरनायकाभवत्। ततो दानार्णवसुतः **शक्तिवर्म**नृपो द्वादशवर्षाणि भुवमपालयत्।

ततस्तदनुजः सप्त वत्सरान्भूतवत्सलः।
विमलादित्यभूपालः पालयामास मेदिनीम्॥

तत्तनयो नयशाली जयलक्ष्मीधाम **राजराजनरेन्द्रः**।
चत्वारिंशतमब्दानेकं च पुनर्महीमपालयदखिलाम्॥

यो रूपेण मनोभवं विशदया कान्त्या कलानां निधिं
भोगेनापि पुरंदरं विपुलया लक्ष्म्या च लक्ष्मीधरम्।
भीमं भीमभुजाबलेन विहसन्भाति स्म भास्वद्यशाः
श्रीमत्सोमकुलैकभूषणमणिर्दीनैकचिन्तामणिः॥

राजासावनुरूपरूपविभवामम्मङ्गनाम्ना भुवि
प्रख्यातामुपयच्छत स विधिवद्देवीं जगत्पावनीम्।
या जह्नोरिव जाह्नवी हिमवतो गौरिव लक्ष्मीरिव
क्षीरोदाद्दिवसेशवंशतिलकाद्राजेन्द्रचोडादभूत्॥

पुत्रस्तयोरभवदप्रतिघातशक्ति-
निःशेषितारिनिवहो महनीयकीर्तिः।
गङ्गाधराद्रिसुतयोरिव कार्तिकेयो
राजेन्द्रचोड इति राजकुलप्रदीपः॥

भासामुन्नतिहेतुं प्रथमं वेङ्गीश्वरत्वमध्यास्य।
यस्तेजसा दिगन्तानाक्रमति सहस्रभानुरुदयमिव॥

उद्यच्चण्डतरप्रतापदहनप्लुष्टाखिलद्वेषिणा
सर्वान्केरलपाण्ड्यकुन्तलमुखान्निर्जित्य देशान्बलात्।
आज्ञा मौलिषु भूभृतां भयरुजा चित्तेषु दुर्मेधसां
प्रीतिः सत्सु दिशासु कीर्तिरतुला येनार्पितो जृम्भते॥

भोगीशाभीलभोगप्रतिमनिजभुजा भर्त्सितात्यन्तबिभ्य-
न्नानाभूपाललोकप्रहितबहुविधानर्घरत्नाभिरामम् ।
धत्ते मौलिं पराद्ध्यों महति नृपकुले य' कुलोत्तुङ्गदेवो
देवेन्द्रत्वादनूने सुरपतिमहिमा चोडराज्येऽभिषिक्त ॥

हस्तभ्राजितशङ्खचक्रजलज य राजनारायण
लोक स्तौति स सूर्यवशतिलकाद्राजेन्द्रदेवार्णवात् ।
संभूता मधुरान्तकीर्तिविदिता नाम्नापरेण स्वय
लक्ष्मीमुद्वपति स लोकमहिता देवी जगत्पावनीम् ॥

गाङ्गौघा इव निर्मला' कृततमोध्वसा दिनेशा इव
क्षोणीन्ध्रा इव भूभरश्रमसहाजातास्तयो सूनव ।
तन्मध्ये नयविक्रमैकनिलय श्रीराजराज प्रति
प्रीत्या वाचमिमामवोचत पिता सर्वोर्वराधीश्वरः ॥

वत्स वेङ्गीमहीराज्य मया दिग्विजयैषिणा ।
मत्पितृव्ये पुरा न्यस्त विजयादित्यभूभुजि ॥

स च पञ्चदशाब्दानि पञ्चाननपराक्रम ।
मही रक्षन्महीनाथो दिव देवोपमो गत. ॥

कुलक्रमगता धीर धुर वेङ्गीभुवो वह ।
बाला अपि स्वकार्येषु क्षमास्तेजस्विन खलु ॥

इत्युक्त्वा ता धुर दत्ता गुरुणा चक्रवर्त्तिना ।
प्रसह्य तद्वियोगोऽपि विनयाद्वहति स्म स' ॥

श्रीपादसेवासुखतो गुरूणा न जातु राज्य सुखमित्यवेक्ष्य ।
सरक्ष्य वेङ्गीभुवमेकमब्द भूय स पित्रोरगमत्समीपम् ॥

तदनुजमथ धीर वीरचोडं कुमारं
गुणमिव तनुबद्ध विक्रम चक्रवर्ती ।
उदयमिव रविस्त्व प्राप्य वेङ्गीश्वरत्व
वितनु शिरसि पाद भूभृतामित्यवोचत् ॥

इत्याशिष समुपगम्य नृपादवन्ध्या
मातुस्तदग्रजनृपद्वितयात्क्रमेण।
आनम्य तामवरजै प्रणतः कुमार'
सृष्टः स्वदेशगमनाय स तै कथंचित्॥

शत्रुध्वान्तमपास्य राजनिकरानाच्छाद्य धाम्ना परा-
न्दुर्वृत्तान्विनिवर्त्य भूकमलिनीं कृत्वा तथा नन्दिनीम्।
प्रारूढो जननाथनामनगरी हर्म्योदयाद्रिं विभु-
र्वेङ्गीभूतलभूषण नृपसुतो बालार्कबिम्बद्युतिः॥

शाकाब्दे शशिखाम्बरेन्दुगणिते सिंहाधिरूढे रवौ
चन्द्रे वृद्धिमति त्रयोदशतिथौ वारे गुरोर्वृश्चिके।
लग्नेऽथ श्रवणे समस्तजगतीराज्याभिषिक्तो मुदे
लोकस्योद्वहति स पट्टमनघ **श्रीवीरचोडो** नृपः॥

यो दीनकोटिमभिवाञ्छितवस्तुदानैर्भीतानुपाश्रितभयापनुदा भुजेन।
रक्षन्समस्तभुवनाश्रयनामसार्धं धत्ते प्रजाश्च निजधर्मपरिग्रहेण॥

भूलोकादुदिता महोन्नतिमती दिङ्मण्डलव्यापिनी
सक्रान्ताखिलसत्पथा परिगता लोकानथोर्ध्वानपि।
सन्मार्गाच्चलिता भुवीह पतिता पश्चादधोगामिनी
गङ्गा कीर्तिरमङ्गलप्रमथिनी यस्यातिशेतेतराम्॥

त्यक्त्वा भूभारखेदं फणिपतिरचल पाति पाताललोक
सर्वा निर्व्याकुलासीत्परकुपतिपरित्यागिनी मेदिनी च।
लक्ष्मीभाजा द्विजानामपि मखनिवहैर्नन्दित देववृन्दै-
रित्थ त्रैलोक्यमेतद्ध्रुवमतिमुदित यत्र भूभारभाजि॥

अक्षता यो महीं रक्षन्गुरुणा चक्रवर्तिना।
आहुतो यौवनोद्दामदेहालक्ष्मीदिदृक्षया॥

कान्ति नवामनुदिन नयनाभिरामा
पुष्णन्तमिन्दुमिव यं तरुण नृपेन्द्रः।

पश्यन्नतृप्तनयनोऽप्यथ पञ्चमाब्दे
प्रास्थापयत्पुनरुदीच्यजयाय सूनुम् ॥

स सर्वलोकाश्रय श्रीविष्णुवर्धनमहाराजाधिराजो राजपरमेश्वर· परमभट्टारक परमब्रह्मण्य श्रीवीरचोडोदेवः प्रोलुनाण्डुविषयनिवासिनो राष्ट्रकूटप्रमुखान्कुटुम्बिन सर्वान्समाहूय मन्त्रिपुरोहितसेनापतियुवराजदौवारिकसमक्षमित्थमाज्ञापयति । यथा—

वेदाना परिरक्षणे कृतमतिर्देवादिदेवस्तप-
स्तद्ब्रह्म सजनयाबभूव भगवान्　ब्राह्मणान् ।
यैराश्चर्यमहानुभावभवनैरग्नौ यथा चोदित
साय प्रातरिहार्पितेन हविषा जीवन्ति देवा दिवि ॥

दुष्टो जात्या प्रकृत्या कलुषितहृदय क्रूरकर्मापि येषा-
मेक विप्र प्रसाद्य प्रशमितदुरित स्वर्गमाप्तस्त्रिशङ्कु ।
राज्ञा वशे विराजन्बहुसुकृतबलाद्देवराज्येऽभिषिक्तो
येषामेकस्य कोपात्प्रभुरपि नहुष पातितो नाकलोकात् ॥

आज्ञाविधेयानि भवन्ति यस्य जगन्ति सर्वाणि स चन्द्रमौलि ।
विधाय येषा विधिवत्सपर्यां त्रिलोकनाथस्त्रिपुर विजिग्ये ॥

येषा प्रभावेण सहस्रधामा रक्षासि सध्याद्वितये विधूय ।
विभाति निर्विघ्नवियत्प्रचारो जगन्ति रक्षञ्जगदेकचक्षु ॥

वशेषु तेषामृषिपुगवाना विख्यातभूदेवकुलोत्तमेषु ।
प्रशस्तवाक्याः शुभलक्षणाङ्गा ये भान्ति वेदा इव मूर्तिमन्त ॥

ये वाङ्मयाम्भोनिधिसारतत्त्वज्ञानोज्ज्वलत्कौस्तुभरत्नभासा ।
कृतप्रकाश हृदयं दधाना विभान्ति विष्णोरिव मूर्तिवेदा· ॥

ते नामतो गोत्रतश्च निरूप्यन्ते—तत्र तावद्विरामभूर्तिराचारनिधिरस्मत्पुरोहितो भागद्वयवान् चोडभट्ट, श्रीकृष्णभट्ट, श्रीधरभट्टः, आच्चभडारभट्ट·, श्रीकृष्णभट्ट, सर्वदेवभट्टसोमयाजी, केशवभट्ट, तिरुवरङ्गमुडयान्भट्ट·, यज्ञात्मभट्ट·, नारसिंहभट्ट·, तिरुवरङ्गमुडयान्भट्ट·, तिरु-

मलमुडयान्भट्ट', सज्जनभट्ट', श्रीधरभट्ट', माधवभट्टः, श्रीरामभट्ट', कडलुसि····कालभट्ट', केशवभट्ट, नारसिंहभट्ट, केशवभट्ट', वेन्नकूतभट्टः, वामनभट्ट', सर्वदेवभट्ट, श्रीरङ्गशायिभट्टः, गोविन्दभट्ट', वेन्नयषडङ्गवित्, नन्दिकुमारभट्टः, तिरुमलमुडयान्भट्ट, श्रीवासुदेवभट्ट', सोमदेवभट्टः, दामोदरभट्ट., जान्नियत्रिवेदी, नित्यानन्दत्रिवेदी, नारायणषडङ्गवित्, कामियषडङ्गवित्, आरुलालदशपुरिभट्ट, गङ्गाधरभट्ट', आरुलालभट्ट', श्रीकृष्णभट्ट., माधवभट्ट, तिरुमलमुडयान्भट्ट, वामनभट्ट, माधवभट्ट', नारायणषडङ्गवित्, श्रीरङ्गनाथभट्ट', तिल्लनायकभट्ट, विष्णुभट्ट', तिरुवरङ्गसहस्र', विष्णुभट्ट', नारायणभट्ट, पार्थसारथि., नारायणभट्ट', वेन्नकूतभट्ट, कुमारस्वामिभट्ट, नागदत्तभट्ट, कुप्पयभट्ट, नगदोनयभट्ट, अम्बलताडिभट्ट, चेन्दामरकण्णभट्ट, श्रीकृष्णभट्ट., तिरुवेङ्गसहस्रः, नारायणभट्ट, त्रिविक्रमभट्ट, गोविदभट्ट', पोतियभट्ट., जातवेदियभट्ट', श्रीकृष्णभट्ट, श्रीरामसहस्र., सिंहपिरान्सहस्र, कुमारस्वामिभट्ट, गुण्डदेवभट्ट, दोनयभट्ट., श्रीनारसिंहभट्ट, वामनभट्टः, वेन्नकूतसहस्रः, नारायणसहस्र', पोनयसहस्र, श्रीरामभट्टः, केशवभट्टः, कामयसहस्र., दोनयभट्ट, श्रीरामभट्ट', दक्षिणामूर्तिभट्ट, लक्ष्मीधरभट्ट', नारायणभट्टः, सोमदेवभट्ट', नारायणभट्ट, केशवभट्ट', नारायणभट्टः, तिरुवरङ्गनारायणसहस्र', दामोदरभट्ट, मावयभट्ट, वामयभट्टः, तिरुमलमुडयान्भट्ट, गङ्गाधरभट्ट', श्रीगरुडभट्ट, माधवभट्ट, तिरुमलमुडयान्भट्ट', आलसहस्रः, विष्णुभट्ट, नागदेवसहस्र, पोन्नयसहस्र', श्रीधरभट्टः, तणियपेरुमान्सहस्र', श्रीकैलाशमुडयान्सहस्र, आलवन्दान्भट्टः, पिट्टयभट्ट', घृताशिभट्ट', आरामुदुभट्ट, श्रीकृष्णभट्ट, गङ्गाधरभट्ट., गोविन्दसहस्र, नारायणभट्ट, श्रीधरभट्टः, नारायणभट्ट., नारायणभट्ट, इत्येकोनविंशत्युत्तरशतसंख्या भारद्वाजगोत्रजाः। गोविन्दभट्ट', कुमारस्वामिभट्टः, यज्ञात्मभट्टसोमयाजी, ताडिकुमारभट्ट', विष्णुभट्ट, दोनयभट्ट', करियकोसहस्र', नारायणभट्ट', दोनयभट्ट', इति सङ्कृतिगोत्रजा नव। श्रीकृष्णभट्ट, दोड्डियभट्ट., तिरुवरङ्गमुडयान्भट्टः, दोनयभट्ट., त्रिविक्रमभट्ट., वेन्नकूत-

भट्टः, गङ्गाधरभट्टः, दामयषडङ्गवित्, गोविन्दभट्टः, उलहमुण्डान्भट्टः, श्रीरङ्गनाथभट्ट, कुमारस्वामिभट्ट, नारायणभट्ट, माधवभट्टः, तिरुमलमुडयान्भट्ट, विष्णुभट्ट, मावनभट्ट, चोडियषडङ्गवित्, दोनयभट्ट, नारायणभट्ट, कोलवामनभट्ट, अत्ताडिभट्ट, अत्तामभट्ट, दामोदरभट्ट, सीरलङ्गोभट्टः, अडहियमणवालुभट्ट, आदित्यभट्टः, दोनियसहस्रः, कुमारुप्केरुमान्भट्ट, तिरुप्पनङ्गाडभट्ट, शिवदेवभट्ट, भीमनाथभट्ट, गोविन्दभट्ट, यज्ञदोणभट्ट, उत्तरीश्वरषडङ्गवित्, अत्ताडिभट्ट, शकरनारायणभट्ट, विष्णुसहस्र, श्रीरामभट्ट, वासुदेवभट्ट, चेल्वसहस्रः, मधुसूदनभट्ट, नारायणभट्ट, श्रीरामभट्ट, माधवभट्ट, इति पञ्चोत्तरचत्वारिंशत्काश्यपगोत्रजाः। शम्भुभट्ट, कुमारस्वामिभट्ट, विष्णुभट्ट, माधवभट्ट, देवकुमारभट्ट, विद्यषडङ्गवित्, मलहिनियनिण्डान्भट्ट, श्रीकृष्णभट्ट, अरुलारभट्ट, यज्ञमूर्तिभट्ट, दोनियत्रिवेदिभट्ट, रेमनषडङ्गवित्, श्रीधरषडङ्गवित्, माधवभट्ट, कामयत्रिवेदी, कुमारस्वामिभट्ट, श्रीकुमारभट्ट, शकरषडङ्गवित्, अय्यपिरान्सहस्रः, नामयभट्ट, वेण्णकूतभट्टः, ईश्वरभट्ट, दोनयषडङ्गवित्, शकरनारायणभट्ट, तिरुमलमुडयान्भट्टः, हृषीकेशभट्टः, श्रीधरभट्ट, आकोण्डविलभट्ट, केशवभट्ट, अरुलारसहस्रः, तिरुनीलकण्ठभट्ट, तिरुवाकुलमुडयान्सहस्रः, यज्ञदोणभट्ट, सिग्गपिरान्भट्ट, तिण्डयसहस्र, कोलवामनसहस्र, सुन्दरतोलुडयान्सहस्रः, नारायणभट्ट, वेण्णकूतसहस्र, चन्द्रशेखरभट्ट, नम्बियाण्डानुभट्ट, कामयभट्टः, श्रीधरसहस्र, विद्यभट्टः, मावियषडङ्गवित्, दामोदरसहस्रः, सीरलङ्गोभट्ट, चेल्वयभट्ट, कन्दयसहस्र, रुद्रसहस्र, चि··· पाण्डान्भट्टः, सोमयाजी, पेरियाण्डान्भट्टसोमयाजी, श्रीरामभट्ट, पेरियानम्बिभट्ट, इति हरितगोत्रजाः पञ्चोत्तरपञ्चाशत्। नारायणभट्ट, गङ्गाधरभट्ट, नारायणभट्टः, श्रीरामदशपुरिभट्ट, सीरलङ्गोभट्ट, सर्वदेवभट्टः, श्रीवासुदेवभट्टः, मेडयभट्ट, पोतियषडङ्गवित्, मनत्तुक्किनियान्भट्ट, भास्करभट्टः, ए - सेवकभट्ट, मेडयषडङ्गवित्, नीलकण्ठभट्टः, तिरिवलमुडयान्भट्ट, माधवभट्टः, उलहमुण्डान्भट्ट, जन्नयसहस्रः, श्रीहनुमत्सहस्र, अप्पयभट्टः,

वेन्नयभट्टः, तेवडिसहस्रः, शंकरसहस्रः, तिरुमलमुडयान्भट्टः, पेरियाण्डान्भट्टः, श्रीधरभट्टः, श्रीरामभट्टः, शिवदेभट्टः, आदित्यषडङ्गवित्, दामोदरभट्टः, वासुदेवभट्टः, जातवेदिभट्टः, माधवषडङ्गवित्, अत्तियषडङ्गवित्, नन्दिकुमारभट्टः, केशवभट्टः, वीट्टिरिन्दान्भट्टः, आयिरञ्जोतिसहस्रः, भट्टदेवभट्टः, वामनभट्टः, दामोदरभट्टः, पेरियाण्डान्भट्टः, कुमारस्वामिभट्टः, दामंयसहस्रः, अडिहनम्बिचतुर्वेदिभट्टः, श्रीवेदव्यासभट्टः, इति कौशिकगोत्रजा अष्टोत्तरचत्वारिंशत् । श्रीगरुडदशपुरीयभट्टः, वेण्णकूतभट्टः, इति द्वौ गर्गगोत्रजौ । रेमयभट्टः, अरुलारदशपुरीयभट्टः, चन्द्रशेखरभट्टः, भीमनाथभट्टः, आरामदुभट्टः, श्रीकृष्णदशपुरीयभट्टः, तिरुवरङ्गमुडयान्भट्टः, आदित्यभट्टः, इत्यष्टौ वाधूलगोत्रजाः । श्रीकृष्णभट्टः, श्रीकृष्णभट्टः, इति द्वौ कपिगोत्रजौ । यज्ञमूर्तिभट्टः, दारयषडङ्गवित्, दोनयत्रिवेदी, भीमयभट्टः, इति चत्वारः कुत्सगोत्रजाः । श्रीकृष्णभट्टः, नारायणभट्टः, यज्ञकेशवभट्टः, केशवभट्टः, श्रीकुमारभट्टः, सूर्यदेवभट्टः, श्रीकृष्णभट्टः, वासुदेवभट्टः, इत्यष्टौ बादरायणगोत्रजाः । तिरुवरङ्गदेवभट्टः, सर्वदेवभट्टः, श्रीरामभट्टः, सर्वदेवभट्टः, वेण्णकूतभट्टः, श्रीधरभट्टः, श्रीकृष्णसहस्रः, कामियषडङ्गवित् वीट्टीरिन्दान्भट्टः, कोवाण्डान्भट्टः, मनत्तिकिनियान्सहस्रः, इत्येकादश लोहितगोत्रजाः । श्रीकृष्णभट्टः, श्रीकृष्णभट्टः, नारायणभट्टः, इति त्रयः कामकायनगोत्रजाः । श्रीरामभट्टः, श्रीकृष्णभट्टः, परमेश्वरभट्टः, यज्ञस्कन्दभट्टः, देवदेवेशभट्टः, मधुसूदनभट्टः, माधवभट्टः, श्रीरामभट्टः, वासुदेवभट्टः, विष्णुभट्टः, रुद्रभट्टः, दोनयभट्टः, दक्षिणामूर्तिभट्टः, यज्ञात्मभट्टः, कुमारस्वामिभट्टः, श्रीरामभट्टः, श्रीरलङ्गोभट्टः, शंकरनारायणभट्टः, यज्ञमूर्तिभट्टसोमयाजी, दामोदरभट्टः, श्रीवासुदेवभट्टः, नारायणभट्टः, भीमेश्वरभट्टः, दोनयभट्टः, सुब्रह्मण्यभट्टः, अरुलारभट्टः, तिरिमलमुडयान्भट्टः, वासुदेवभट्टः, दामोदरभट्टः, श्रीकृष्णभट्टः, सूर्यदेवभट्टः, वासुदेवभट्टः, माधवभट्टः, सिङ्गपिरान्सहस्रः, वेण्णकूतसहस्रः, अरुलारसहस्रः, पद्मनाभभट्टः, दक्षिणामूर्तिभट्टः, श्रीरामदेवभट्टः, सिङ्गपिरान्भट्टः, श्रीकृष्णसहस्रः, ईश्वरभट्टः, माधवसहस्रः, अरस-

ब्रह्मा, जनार्दनभट्ट', माधवभट्ट, दारयभट्ट, अरुलारसहस्र', तिरवरङ्ग-मुडयान्सहस्र, तिरिवायिक्कुलमुडयान्सहस्र', नारायणभट्ट, पुरुषोत्तम-भट्ट, पोन्नयसहस्र, नारायणभट्ट, नित्यानन्दभट्ट, सोमदेवभट्ट', पार्थ-सारथिभट्टसोमयाजी, विद्यमट्ट, सीरलङ्गोवभट्ट, निरवद्यभट्ट', वाजपे-ययाजी भागद्वयवान्, इति षष्टि कुण्डिनगोत्रजा' । दत्तत्रिवेदिभट्ट, केशवभट्ट, तिरुवेङ्कडभट्ट, रमण्डयभट्ट, ईश्वरभट्ट, वेमनभट्ट, अत्ति-यारालिभट्ट, वेन्नयभट्ट, वेण्णकूतभट्ट, षष्ठिरुद्रभट्ट, केशवभट्ट, मणि-नागभट्ट, श्रीकृष्णभट्ट, विष्णुदोनयभट्ट, कुमारस्वामिसहस्र, दक्षिणा-मूर्तिभट्ट, दामोदरभट्ट, कामकोटसहस्र, तेरुपोलियनिडूान्सहस्र, श्री-वासुदेवसहस्र, श्रीरामभट्ट, माधवभट्ट, शकरनारायणसहस्र, सिङ्गपि-रान्सहस्र, रच्चेनषडङ्गवित्, आरामदुभट्ट, दोनयसहस्रदक्षिणामूर्तिभट्ट, सोमयभट्ट, इत्यात्रेयगोत्रजास्त्रिंशत् । पेरुबु कडलभट्ट सोमयाजी, आरामदुभट्ट, केशवभट्ट., गोविन्दभट्ट, इति चत्वारो रथितरगोत्रजा । श्रीधरभट्ट, शकरनारायणभट्ट, लल्कोण्डवेलिभट्ट, नारायणभट्टसोम-याजी, तिरुकु ' गुडिभट्ट, तिरुवरङ्गनारायणभट्ट, तिरिवायिक्कुलमुडया-न्भट्ट', माधवभट्ट, पलिगोण्डान्भट्ट, यज्ञमूर्तिभट्ट., नारायणभट्टसोम-याजी, शेखरभट्ट, श्रीरामभट्ट., तिरिवाकुलमुडयान्भट्ट, गङ्गाधरभट्ट, श्रीरङ्गनाथभट्ट, रुद्रकुमारभट्ट., श्रीरामभट्ट, पोतयषडङ्गवित्, वेण्णकू-तभट्ट', नारायणभट्टः, वेमयषडङ्गवित्, अप्पयषडङ्गवित्, माधवभट्ट', श्रीरामभट्ट, श्रीरामभट्ट, सुब्रह्मण्यभट्ट, श्रीरामभट्ट, केशवभट्ट, पुरुषो-त्तमभट्ट, नारायणसहस्र', दक्षिणामूर्तिभट्ट., वेण्णकूतभट्ट', सोमनाथ-भट्ट, तिरिवायिक्कुलमुडयान्भट्ट', सिङ्गपिरान्भट्ट, ईश्वरसहस्र', नाराय-णसहस्र', श्रीभरतसहस्रः, श्रीकृष्णभट्ट, दक्षिणामूर्तिभट्टः, केशवसहस्र, तिरुवरङ्गमुडयान्भट्ट, तिरुप्पनङ्गाडुसहस्र., सीरलङ्गोसहस्र., दक्षिणामू-र्तिभट्ट, गोविन्दभट्ट., केशवभट्टः, त्रिविक्रमभट्ट, रा यपोतषडङ्गवित्, श्रीधरभट्ट, शकरनारायणभट्ट, आदित्यदेवभट्ट', नारायणभट्ट., श्रीधरभट्ट., दोनयभट्ट', भीमायभट्ट., केशवभट्ट', पद्मनाभभट्ट', गङ्गाधरभट्ट, इत्ये-

कोत्तरषष्ठिर्वत्सगोत्रजा । मण्डयभट्ट, त्रिविक्रमभट्ट, रुद्रकुमारभट्ट., सिङ्गपिरान्भट्ट, आलिदेवयभट्ट, पद्मनाभभट्ट, नारायणभट्ट, तिरुवरङ्गमुडयान्भट्ट, श्रीधरभट्ट, मणिनागभट्ट, विष्णुभट्ट, श्रीरामभट्टः, नारायणभट्ट, तिरिप्पोरिभट्ट, तिरिमलुडयान्सहस्र, वामनभट्ट, कोण्डयसहस्र, आदित्यदेवसहस्र, इत्यष्टादश गौतमगोत्रजा । अडशियमणवालभट्ट, तिरुपनङ्गडभट्ट, माधवभट्ट, दोनयसहस्र, वामनभट्ट, केशवसहस्र, गोविन्दसहस्र, कुमारस्वामिभट्ट, अरुलारभट्ट, इति वसिष्ठगोत्रजा नव । कुमारस्वामिभट्ट, श्रीधरभट्ट, श्रीभरतभट्ट, दामोदरभट्ट, कुमारस्वामिभट्ट, आण्डमणिभट्ट, दामोदरभट्ट, भागद्वयवान् करिमाक्यभट्ट, इति अष्ट नितुन्दिगोत्रजा. । दोनयषडङ्गवित्, कोण्डयषडङ्गवित्, जन्नयभट्ट, जन्नयषडङ्गवित्, दोनयभट्ट, जनार्दनषडङ्गवित्, इति शालावतगोत्रजा. षट् । यज्ञात्मभट्टसोमयाजी, श्रीकृष्णभट्ट, गोविन्दभट्ट, श्रीभरतभट्ट, इति चत्वारो विश्वामित्रगोत्रजा । सूर्यदेवसहस्र, अप्पयभट्ट, केशवभट्ट, कुलोत्तुङ्गचोडब्रह्ममहाराज., सेनापती राजराजब्रह्मराजो भागचतुष्टयवान्, कुमारनारायणब्रह्मराजो भागद्वयवान्, दिवाकरभट्ट, नडविरुकुङ्कालकालभट्ट, केशवभट्ट, इति मुद्गलगोत्रजा नव, नारायणसहस्र, प्रबोधशिवपण्डितो भागद्वयवान्, इति द्वौ वालखिल्यगोत्रजौ । दामोदरभट्टसोमयाजी, दुग्गयभट्ट, तिरुनाण्डुडयान्भट्ट, आण्डमाणिभट्ट., इति चत्वार. शटगोत्रजा । वासुदेवभट्ट, वेण्णकूतसहस्र., नारायणभट्ट, इति शाण्डिल्यगोत्रजास्त्रयः । निम्बदेवभट्ट, इत्येको विष्णुवृद्ध । नारायणभट्ट, गोविन्दभट्ट, श्रीकृष्णभट्ट, इति त्रय. पाराशर्यगोत्रजा । इति षट्त्रिंशदुत्तरपञ्चशतसङ्ख्येभ्य षट्कर्मनिरतेभ्यो न्यूनाधिकभावेन चतुश्चत्वारिंशदधिकपञ्चशतसङ्ख्यान्भागान्परिकल्प्य भवद्विषये द्वादशपूण्डिसहितमालवेल्लिनामग्राम **पोन्नतो** 'नामग्रामश्च उत्तरवरुसविषये **आलमिनामग्रामश्चेति** ग्रामत्रयमेकीकृत्य **श्रीवीरचोड**चतुर्वेदिमङ्गलनाम्ना सुप्रतिष्ठाग्रहारीकृत्य प्रतिसवत्सरमत्र प्रतिभाग सार्धं निष्क करं परिकल्प्य यदतोऽन्यत्सिद्धाया वेण्डायाभिनवादिकं यच्च कोड-

''शुक्लनामक यच्च वणिग्भ्य' पूर्णोपजीविभ्यश्च राजग्राह्य तत्सर्वं परिहृत्य सर्वकरपरिहारेण धारापूर्वकमस्माभिराचन्द्रार्कमुत्तरायणनिमित्ते दत्तमिति विदितमस्तु व । अस्य ग्रामसीमान —दक्षिणत पोन्नवाड्यु मल्लग्रोलुनु सीमा, पश्चिमत कोल्लिप्रोलुनु चेम्ब्रोलुनु सीमा, उत्तरत पोलकुम्ब नु डङ्कलपूण्डिनि बेण्डपूण्डिनि सीमान क्षेत्रसीमान, पूर्वत समुद्र, आग्नेया दिशि पोन्नवाड पोलमुनीपूरि पोलमु गूडिन चोटि मोवलि तोडि इसुकमेट्टयुदीनि पड्डुमटि रिट्टग्रानि तोडि ताडुनु सीमा । (इत्यग्रे देशभाषा ।) अत्र व्याकरण व्याचक्षाणस्य वृत्त्यर्थं भाग एक, मीमासाव्याख्यात्रे द्वौ, वेदान्त व्याख्यातुरेक, ऋग्वेदमध्यापयितुरेक, यजुर्वेदमध्यापयितुरेक, सामानि गापयितुरेक', रूपावतार व्याचक्षाणस्यैक, पुराण वाचयितुरेक, वैद्यस्यैक, अम्बष्ठस्यैक, विषवादिन एक, ज्योतिर्विद एक, इति गुणवृत्तिभागा द्वादश, ग्राममध्यमधिवसते **विष्णुभट्टारकाय** भागौ द्वौ, पश्चिम दिग्भागमधिवसते च द्वौ, **श्रीकैलासदेवाय** द्वौ, इतराभ्यो **वासुदेवताभ्यः** एक, इति सप्तदेवभागा । अस्योपरि न केनचिद्बाधा कर्तव्या । य करोति स पञ्चभिर्महापातकैर्युक्तो भवति । तथा चोक्त भगवता व्यासेन—

स्वदत्ता परदत्ता वा यो हरेत वसुधराम् ।
षष्टिं वर्षसहस्राणि विष्ठाया जायते कृमि' ॥
गामेका स्वर्णमेक वा भूमेरप्येकमङ्गुलम् ।
हरन्नरकमाप्नोति यावदाभूतसम्प्लवम् ॥
बहुभिर्वसुधा दत्ता बहुभिश्चानुपालिता ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

श्रीविजयराज्यसवत्सरे त्र्युत्तरविंशतिसवत्सरे दत्तस्यास्य शासनस्याज्ञप्ति पञ्चप्रधाना । काव्यकर्ता विद्यभट्ट । लेखक पेन्नाचार्य ।

(एपिग्राफिआ इण्डिका—५ । ७४-९४)

(१५५)

श्रीमज्जायमहाराजानां शिलालेखः[1]।

स्वस्ति श्री ।

जयति हरिवराह प्रेमसंभ्रान्तपृथ्वी-
स्तनभरपरिरम्भारम्भहृष्टस्य यस्य ।
पुलकचुलुकिताम्भःसंचयस्तोयराशि
पुनरविरलनिर्यत्स्वेदपूरैरपूरि ॥

हेरम्बस्य विकल्पदन्तमुकुलं गौरीहरस्योत्सव-
प्रत्यासन्नविलासदीपकलिका गङ्गामृणालाङ्कुर ।
देवस्य त्रिपुरद्रुहो विजयिना पुष्पेषुणा मस्तके
विन्यस्ताङ्कुशविभ्रमा विजयते चूडासुधांशोः कला ॥

पायाद्वः परिवर्तमानलहरीप्राग्भारमास्फालय-
न्सायकालतरगकेलिषु करास्कन्देन मन्दाकिनी ।
देवस्यारभटीपरिभ्रमकलासरम्भसभाविनः
शभोरम्बुमृदङ्गवाद्यरचनारम्भाय लम्बोदर ॥

हसाः पद्मासनारूढा यदन्तः समुपासते ।
परामृतरसस्यन्दि स्रोतः सारस्वतं स्तुम ॥

प्राचीवधूमुखविशेषकपद्मरागः
प्रख्यायते हि भगवानरविन्दबन्धुः ।
यत्र श्रुतिप्रणयधामनि सनिधत्ते
देवो हिरण्मयवपु पुरुषः पुराण ॥

मनुरंशुमतोऽस्य सूनुरासीद्यत एवाभ्युदिताः स्वभावशुद्धाः ।
निगमादिव सर्वधर्मचर्यास्तुहिनाद्रेरिव राजहसवंशाः ॥

---

१ 'अय हि शिलालेख कृष्णापरिगणान्तर्गतबापट्लाताल्लुके चेब्रोलुग्रामीयनागेश्वरमन्दिरगोपुरस्थस्तम्भयोर्दक्षिणस्तम्भस्य परित उत्कीर्णो वर्तते,' इति E Hultzsch Ph D महाशया प्रकाशका अस्य शकसवत् ११३५ (1213 A. D.)

तस्मादिक्ष्वाकुरासीत्तदुपरि **सगरस्तत्परस्तात्ककुत्स्थ-**
स्तस्मादूर्ध्वं **दिलीपस्तमनु दशरथस्तत्सुतो रामचन्द्रः** ।
यद्वीरश्रीविलासा बिससमतुलितोदग्रकैलासजाग्र-
द्दो क्रीडातुङ्गलङ्कासुभटविघटनास्ते दिगन्ते प्रथन्ते ॥
एषा वंशे रघूणा क्षितिपतिरभवद्दुर्जयः शौर्यकेलि-
स्फूर्जद्भूमा ततोऽभूत्प्रतिकरटिघटाशातनो **वेतराजः** ।
चक्रे विक्रान्तबाहुस्तदनु वसुमतीपालन **प्रोल**भूप-
स्तत्पुत्रो **रुद्रदेव**स्तदुपरि च नृपोत्तसरत्न बभूव ॥
ततस्तत्सोदर्य स्वभुजधृतसाम्राज्यमहिमा
महादेवक्षोणीरमण इति गीतस्त्रिभुवने ।
अभूत्सेवानम्रक्षितिपतिशिरोमण्डनमणि-
प्रभाभिर्यत्पादाम्बुरुहमकरन्दव्यतिकर ॥
अथ **गणपतिदेव** प्रादुरासीदमुष्मा-
त्सुरतरुरिव सिन्धो. श्लाघ्यविश्राणनश्री ।
विहरति फणिभर्तु श्वासखेदादपेता
सुरभिमलयजार्द्रे यद्भुजे भूतधात्री ॥
यस्य प्रस्थानभेरीमुखरितहिमवद्गह्वर सैन्यघोष
श्रुत्वा प्रत्यर्थिकान्ता प्रशिथिलकबरीभारबद्धा समन्तात् ।
झञ्झावातावधूतध्वनितजलधरव्यूहसक्षोभरिङ्ग-
न्निर्घाताघातभीतप्रसृमरचमरीविभ्रमा विभ्रमन्ति ॥
मा त्व मर्दय **मद्रनाथ** पुरत **पाञ्चाल** मुञ्चान्तर
मार्गं देहि **विदेहभूप** पदवी **हम्मीर** किं वार्यते ।
हूण क्षीणगतिं जहीहि गमने **काशीन्द्र** का सान्द्रता
यस्य द्वारि विजृम्भते चिरमिति क्ष्मापालकोलाहल. ॥
वर्धते खलु वसुधरापतेस्तस्य सिन्धुरचमूधुरधर ।
जायनः सकलनाट्यवैदिकग्रामणी कविसभाशिखामणि. ॥

यत्कीर्तिगीतचतुरास्त्रिदशेन्द्रकन्या
शुद्धान्तसौधशिखरेषु पुलोमजाया ।
तामिस्रपक्षरजनीष्वपि चन्द्रिकाभि
क्रीडाचकोरमिथुनानि विलोभयन्ते ॥
यत्त्यागाद्भुतनिर्जितैरिव पय सर्वस्वमुन्मुच्य तै-
र्यत्र क्वापि पलायितेऽपि शरदारम्भे महाम्भोधरै ।
यत्सेनाकरिमल्लगल्लफलकश्रेणीषु लब्धास्पदा
वृष्टिर्यत्प्रतिपक्षपक्ष्मलदृशा नेत्रारविन्देषु च ॥
एते पुरा न क्षितिपालपुत्रा सरक्षिता सयति दन्तदष्टै ।
इतीव यद्वैरिविलासहर्म्यैस्तृणप्ररोहा शिरसा ध्रियन्ते ॥
सुतनु वदनकान्ति वाससः पल्लवेन
स्थगय सलिलपूरैर्दुर्गम वर्त्म मा भूत् ।
इति गिरिमधिगच्छन्यस्य शत्रुक्षितीश
कथयति निजकान्ता चन्द्रकान्तस्थलीषु ॥
मन्त्री कार्यनिरूपणे प्रियसुहृद्विश्रम्भसभाषणे
काव्यारम्भविधौ कविः सहचर सगीतसपादने ।
कर्ता शिल्पकलाकलापविषये सप्रेषणे किकरो
युद्धे यश्छलमत्तिगण्डनृपतेरग्रेसरो वर्तते ॥
अथैकदा दक्षिणदिक्क्षितीशान्विजित्य वीरो विनिवर्तमान ।
मध्येपथ **ताम्रपुरी**मयासीच्चञ्चत्पताका **छलमत्तिगण्डः** ॥
पञ्चत्रिंशदुपेतरुद्रशत(११३५)[1]सख्याते शकाब्दे मधौ
मासि श्रीमुखवत्सरे स नृपति' श्रीजायसेनाभृते ।
पूर्व तावकमातृमातुलभुजासरक्षिता षाण्मुखी-
मद्यारभ्य मदाज्ञया पुरमिमा त्व पालयस्वेत्यदात् ॥
अथ स सकलप्रासादाना प्रणष्टशिलेष्टका-[2]
प्रभृति सकलद्रव्य नव्य विधाय समन्तत ।

---

१ A D 1213 २ 'नशे षान्तस्य' (८।४।३६) इति पाणिनिसूत्रेण णत्व निषेधादत्र 'प्रनष्ट' इति बोध्यम्

यश इव सुधालेप तत्र प्रकाश्य ततः पर
कनककलशव्यूह स्वस्य प्रतापमिव न्यधात् ॥
स खलु सकलाङ्गभाज कनकमयीमकृत तारकाराते. ।
प्रतिकृतिमसुररणाङ्गणविहरणयोग्य तनुत्रमिव ॥
सर्वोपचारसिध्यर्थमस्य यत्रापरिच्छदम् ।
सौवर्णं राजत ताम्र कास्य च बहुधा व्यधात् ॥
महाय लोहप्रतिमा महीयसी स तस्य देव्यौ च विधाय तादृशौ ।
प्राकारमुच्च शनिमण्टप[1] महत्त्रिभूमिक गोपुरमप्यकल्पयत् ॥
अथैतस्याकार्षीत्प्रतिमकरसक्रान्तिदिवस
महाखेटक्रीडाश्रमविधुतये मण्डपमसौ ।
यदालेख्ये लेखैरवसरसमेतै सपुलक
विभाव्यन्ते देवासुरसमरसरम्भरचना. ॥
मूलस्थानस्य लिङ्गस्य काडुविट्टेश्वरस्य च ।
नवप्रतिष्ठामकरोद्दस्युभि परिभूतयो ॥
दुर्गं च ताम्रनगरीमभितो व्यधत्त
प्राकारमुन्नतमुदञ्चितगोपुर सः ।
आभाति येन हरसूनुविनिर्जितेन
क्रौञ्चेन सा शिखरिणा परिसेवितेव ॥
गामेका रत्निकामेका भूमेरप्येकमङ्गुलम् ।
हरन्नरकमाप्नोति यावदाभूतसप्लवम् ॥
स्वदत्ता परदत्ता वा यत्नाद्रक्ष युधिष्ठिर ।
महीं महीभृता श्रेष्ठ दानाच्छ्रेयोनुपालनम् ॥
स्वसुकृतपरिपालनात्प्रभूणा परकृतपालनमेव धर्महेतुः ।
हरिरपि कमलासनस्य सृष्टिं सततमवञ्जगतामभूदुपास्यः ॥

---

१ 'मण्टप' इति स्यात्

इद रक्षिष्यता राज्ञा यशश्चन्द्रिकया सह।
चिर जायचमूपस्य धर्मचन्द्र प्रवर्धते॥

(एपिग्राफिआ इण्डिका—५।१४३ १४८)

---

(१५६)

तृतीयकृष्णमहाराजानां दानपत्रम्[1]।

ॐ

स जयति जगदुत्सवप्रवेशप्रथनपर करपल्लवो मुरारे.।
लसदमृतपय कणाङ्कलक्ष्मीस्तनकलशाननलब्धसनिवेश॥
जयति च गिरिजाकपोलबिम्बादधिगतपत्रविचित्रतासभित्ति।
त्रिपुरविजयिन प्रियोपरोधाद्धृतमदनाभयदानशासनेव॥
श्रीमानस्ति नभस्तलैकतिलकस्त्रैलोक्यनेत्रोत्सवो
देवो मन्मथबान्धव· कुमुदिनीनाथः सुधादीधिति।
नि·शेषामरतर्पणार्पिततनुप्रक्षीणतालक्कृते-
र्यस्याश शिरसा गुणप्रियतया नून धृत शभुना॥
तस्माद्विकासनपर. कुमुदावलीना दोषान्धकारदलन. परिपूरिताश.।
ज्योत्स्नाप्रवाह इव दर्शितशुद्धपक्षः प्रावर्तत क्षितितले क्षितिपालवश.॥
अभवदतुलकान्तिस्तत्र मुक्तामणीना
गण इव यदुवशो दुग्धसिन्धूयमाने।
अधिगतहरिनीलप्रोल्लसन्नायकश्री-
रशिथिलगुणसङ्गो भूषण यो भुवोऽभूत्॥
उद्वृत्तदैत्यकुलकन्दलशान्तिहेतु-
स्तत्रावतारमकरोत्पुरुष पुराणः।

---

१ इद दानपत्र नागपुरसमीपवर्ति'वर्धा'नगराद्दशमीलदूरे नैर्ऋत्यकोणीयदेवलीग्रामस्थकूपे समुपलब्धम्, इति R G Bhândârkar, M A, Ph D, C I E महाशयवरा प्रकाशितवन्त शकसवत् ८६२ (A D 940-41)

तद्वंशजा जगति सात्यकिवर्गभाज-
स्तुङ्गा इति क्षितिभुज प्रथिता बभूवु ॥
क्षितितलतिलकस्तदन्वये च क्षतरिपुदन्तिघटोऽजनिष्ट रट्ट ।
तमनु च सुतराष्ट्रकूटनाम्ना भुवि विदितोऽजनि राष्ट्रकूटवश ॥
तस्मादरातिवनिताकुचचारुहार-
नीहारभानुरुदगादिह **दन्तिदुर्गः** ।
एक चकार चतुरब्ध्युपकण्ठसीम-
क्षेत्र य एतदसिलाङ्गलभिन्नदुर्ग ॥
तस्मादपालयदिमा वसुधा पितृव्य
श्रीकृष्णराजनृपति शरदभ्रशुभ्रै ।
यत्कारितेश्वरगृहैर्वसुमत्यनेक-
कैलासशैलनिचितेव चिर विभाति ॥
गोविन्दराज इति तस्य बभूव नाम्ना
सूनु. स भोगभरभङ्गुरराज्यचिन्त
आत्मानुजे निरुपमे विनिवेश्य सम्य-
क्साम्राज्यमीश्वरपद शिथिलीचकार ॥
श्वेतातपत्रत्रितयेन्दुबिम्बलीलोदयाद्रे **कलिवल्लभाख्यात्** ।
तत कृतारातिमदेभभङ्गो जातो **जगत्तुङ्ग**मृगाधिराज ॥
तत्सूनुरानतनृपो **नृपतुङ्गदेवः**
सोऽभूत्स्वसैन्यभरभङ्गुरिताहिराजः ।
यो मान्यखेटममरेन्द्रपुरोपहासि
गीर्वाणगर्वमिव खर्वयितु व्यधत्त ॥
तस्योत्तर्जितगूर्जरो हृतहटल्लासोद्भटश्रीमदो
गौडाना विनयव्रतार्पणगुरु सामुद्रनिद्राहर ।
द्वारस्थाङ्गकलिङ्गगाङ्गमगधैरभ्यर्चिताज्ञश्चिर
सूनुः सूनृतवाग्भुव. परिवृढ. **श्रीकृष्णराजो**ऽभवत् ॥

अभूज्जगत्तुङ्ग इति प्रसिद्धस्तदङ्गज स्त्रीनयनामृतांशुः ।
अलब्धराज्य स दिव विनिन्ये दिव्याङ्गनाप्रार्थनयेव धात्रा ॥

तन्नन्दन क्षितिमपालयदिन्द्रराजो
यद्रूपसभवपराभवभीरुणेव ।
मानात्पुरैव मदनेन पिनाकपाणि-
कोपाग्निना निजतनु क्रियते स्म भस्म ॥

तस्मादमोघवर्षो रौद्रधनुर्भङ्गजनितबलमहिमा ।
राम इव रामणीयकमहानिधिर्दशरथाज्जात ॥

क्षिप्र दिव पितुरिव प्रणयाद्गतस्य
तस्यानुजो मनुजलोकललामभूतः ।
राज्यं दधे मदनसौख्यविलासकन्दो
गोविन्दराज इति विश्रुतनामधेय ॥

सोऽप्यङ्गनानयनपाशनिरुद्धबुद्धि-
रुन्मार्गसङ्गविमुखीकृतसर्वसत्त्वः ।
दोषप्रकोपविषमप्रकृतिश्लथाङ्गः
प्रापत्क्षय सहजतेजसि जातजाड्ये ॥

सामन्तैरथ रट्टराज्यमहिमालम्बार्थमभ्यर्थितो
देवेनापि पिनाकिना हरिकुलोल्लासैषिणा प्रेरित ।
अध्यास्त प्रथमो विवेकिषु जगत्तुङ्गात्मजोऽमोघवा-
क्पेयूषाब्धिरमोघवर्षनृपतिः श्रीवीरसिंहासनम् ॥

श्रीकृष्णराजदेवस्तस्मात्परमेश्वरादजनि सूनुः ।
य शक्तिधर स्वामी कुमारभावेऽप्यभूद्भुवने ॥

श्रीरट्टराज्यपुरवररक्षापरिखा मदेन यस्याज्ञाम् ।
विपुला विलङ्घयन्त स्वयमलपन्द्रोहिणोऽधस्तात् ॥

येन मधुकैटभाविव पुनरुन्मग्नौ जनोपमर्दाय ।
श्रीवल्लभेन निहतौ भुवि दन्तिगवप्पुकौ दुष्टौ ॥

रथ्यामल्लविषद्रुममुदस्य निहतेन योऽकृत सनाथाम्।
भूतार्थपुण्यतरुणा वाटीमिव गाङ्गपाटी च॥
परिमलिताण्णिगपल्लवविपत्तिरासीन्न विस्मयस्थानम्।
विस्फुरति यत्प्रतापे शोषितविद्वेषिगाङ्गौघे॥
यस्य परुषेक्षिताखिलदक्षिणदिग्दुर्गविजयमाकर्ण्य।
गलिता गूर्जरहृदयात्कालजरचित्रकूटाशा॥
अनमन्नापूर्वापरजलनिधिहिमशैलसिंहलद्वीपात्।
य जनकाज्ञावशमपि मण्डलिनश्चण्डदण्डभयात्॥
स्निग्धश्यामरुचा प्रलम्बभुजया पीनायतोरस्कया
मूर्त्या कीर्तिलताहितामृतजलैर्वृत्तैश्च सत्त्वोद्भवै।
ज्ञात्वा य पुरुषोत्तम भरसह विश्वभराभ्युद्धृतौ
शान्ते धाम्नि लय गत प्रशमिनामाद्य कृतार्थः पिता॥
वृत्ते नृत्तसुराङ्गने[1] सरभस दिव्यर्षिदत्ताशिषि
श्रीकान्तस्य नितान्ततोषितहरे राज्याभिषेकोत्सवे।
यस्याबद्धकरग्रहोद्यमभवत्कम्पानुरागोदया-
द्दिक्कन्या स्वसमर्पणार्थमभवल्लमानुकूल्यप्रिया॥

स च परमभट्टारकमहाराजाधिराजपरमेश्वरश्रीमदमोघवर्षदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वरश्रीमदकालवर्षपृथ्वीवल्लभश्रीमद्वल्लभनरेन्द्रदेवः कुशली सर्वानेव स्वजानपदान्समाज्ञापयति—अस्तु व सविदितम्—यथा श्रीमान्यखेटराजधानीस्थितेन शकनृपकालातीतसवत्सरशतेष्वष्टासु द्विषष्ट्यधिकेषु ८६२ शार्वरीसंवत्सरान्तर्गतवैशाखबहुलपञ्चम्या मम प्राणेभ्योऽपि प्रियतमस्य कनीयसो भ्रातु. श्रीमज्जगत्तुङ्गदेवस्य पुण्ययशोभिवृद्धये। अपि च।

ज्येष्ठे भ्रातरि कुर्वता निरुपमा भक्ति जितो लक्ष्मण'
सौन्दर्येण मनोभव' सुचरिते रामस्य धर्मात्मजा।

---

1 'णे' इति भवितव्यम्

कान्त्या शीतिरुचिश्च येन सतत शौर्येण सिंहो जग-
त्तुङ्गस्योस्त्वभिवाञ्छितप्रदमिद तस्येति दान भुव ॥

अनेनाभिसधिना मया नन्दिवर्धनविनिर्गतभारद्वाजसगोत्रवाजिकाण्वशाखासब्रह्मचारि भाइल्लसुतवेदवेदा पारगरिषियप्याय नागपुरनन्दिवर्धनान्तर्गततालपुरुषकनामा ग्राम सोद्रङ्ग सपरिकर सधान्यहिरण्यादेय सदण्डदोषदशापराध सर्वोत्पत्तिसहित पूर्वप्रसिद्धचतु सीमपर्यन्त' ब्रह्मदायन्यायेनाचन्द्रार्क नमस्यो दत्त । यस्य पूर्वत मादाटढिढरनामा ग्राम , दक्षिणतः कह्ननानदी, पश्चिमत मोहमग्राम', उत्तरत वध्रीरग्राम , एव चतुराघाटविशुद्ध तालापुरुषक रिषियपय्यस्य कृषत कर्षयतो भुञ्जतो भोजयतो वा न केनचिद्व्याघात कार्य. । यश्च व्याघात करोति स पञ्चभिरपि महापातकै' सयुक्त स्यात् । अन्यच्च ।

स्वदत्ता परदत्ता वा यो हरेत वसुधराम् ।
स विष्ठाया कृमिर्भूत्वा पितृभि. सह पच्यते ॥
सामान्योऽय धर्मसेतुर्नृपाणा काले काले पालनीयो भवद्धि ।
सर्वानेव भाविन पार्थिवेन्द्रान्भूयो भूयो याचते रामभद्र ॥
चेवानन्वेरस्य भ्रात्रा योग्राष्ठचेन लिखितमिति ॥

(एपिग्राफिआ इण्डिका—५।१९२ १९६)

---

(१५७)

अमरनाथमन्दिरस्तम्भोत्कीर्णशासनद्वयम्[१]।

अस्ति श्रीधान्यकटक पुर सुरपुराद्वरम् ।
यत्रामरेश्वर शम्भुरमरेश्वरपूजितः ॥
बुद्धो देवः सुसान्निध्यो यत्र धात्रा प्रपूजित. ।
चैत्यमत्युन्नत यत्र नानाचित्रसुचित्रितम् ॥

---

१ इद लेखद्वय कृष्णाप्रान्ते सत्तनपल्लीतालुकायाममरावतीनगर्याममरेश्वरमन्दिरमध्यभागस्य दक्षिणद्वारस्थितस्तम्भपार्श्वचतुष्के समुल्लिखित समुपलभ्यते

अस्ति तत्र स्थिरैश्वर्यं राज्ञामाज्ञावता कुलम् ।
अमरेश्वरदेवेन रक्षित रक्षक नृणाम् ॥
जात सुरेन्द्रदैत्येन्द्रमुनीन्द्रगणवन्दितात् ।
श्रेयसा भूयसा दातुर्धातुर्यच्चरणद्वयात् ॥
क्षोणीक्षेमकरा भूपा यत्र शत्रुभयकरा ।
शकरा साधुवृत्ताना शंकरस्य तु किंकरा' ॥
तत्रामरेशसकाशो भीमो नाम नृपोऽभवत् ।
विश्वे•विश्वभराधीशा यत्पादाम्बुजषट्पदा' ॥
उर्वीपतिषु सर्वेषु सदृक्षो यस्य नेक्षितः ।
प्रजाना पालने सम्यग्द्विषामुन्मूलने तथा ॥
चक्रे पवित्रचारित्रो भक्त्या शक्त्या च भव्यया ।
यः सुरेशान्नरेशाश्च वरदान्करदानपि ॥
यो भूरिभक्तिसुप्रीत शर्वे सर्वमनोरथान् ।
कृतवान्मित्रसघस्य कृतवाञ्छत्रुसहतेः ॥
विस्मापितजना यस्य विस्मारितरणान्तरा ।
वीरपूरितजम्भारिपुरा रणपरम्परा ॥
यस्य क्ष्माचक्रशक्रस्य चक्रिचक्रसमौजसा ।
चक्रेण विक्रम्य दिशा चक्र चक्रे भृश वशम् ॥
क्षिप्र विपक्षवक्षासि पाटयन्तोऽतिपाटवात् ।
नृसिंहनखरेभ्योऽपि प्रखरा यच्छरा बभु' ॥
कान्त्या पूर्णा रणे तूर्णं यद्धनु प्रेरितै' शितै ।
अर्धचन्द्रैर्व्यलक्ष्यन्त वक्रचन्द्रा विरोधिनाम् ॥
महामहीध्रानारोहन्यद्रणे विद्रुता द्विषः ।
तीक्ष्णै. क्षुण्णाः पुनः शस्त्रैर्या भयातिशयादिव ॥
यद्भटोद्भटदोर्दण्डचण्डायुधविखण्डिता' ।
अखण्डविक्रमाः शाक्रमाक्रामन्नरयः पुरम् ॥

पांसुव्राते समुद्भूते यद्धयैः समरोद्धतैः ।
व्योमव्यापिनि सक्लेशं सभ्रु सप्ताश्वसप्तय ॥
नमयन्तो भुवं भीमा पदन्यासेन यद्गजाः ।
द्विड्गजानां रणे चक्रुर्दिग्गजानां च पीडनम् ॥
चलयद्भी रणारम्भेष्वचलामचलैः सह ।
यद्बलैः शत्रुशौर्याणां चालनं लीलया कृतम् ॥
प्राकारैः पातितैः सम्यक्परिखाः परिपूर्य यः ।
प्रध्वंसं रिपुदुर्गाणां प्रागभावसमं व्यधात् ॥
दूरस्था अपि वीरस्य यस्य भ्राजिष्णुतेजसः ।
आज्ञां कुर्वन्ति सर्वे स्म भूभृतः प्राभृतप्रदाः ॥
येन धर्मप्रधानेन कारुण्योपेतचेतसा ।
पुत्रा इव परित्राताः शत्रवः शरणागताः ॥
चरित्रेण पवित्रेण विद्यया निरवद्यया ।
भूषितास्तोषिता येन भूसुरा भासुरान्वयाः ॥
विवेकेनारिषड्वर्गमरिवर्गं भुजौजसा ।
जित्वार्जितचतुर्वर्गो नृपवर्गे रराज यः ॥
तस्य प्रशस्यचारित्रख्यातः केतनृपः सुतः ।
पटुर्दीनार्तिहरणे रणे वितरणे च यः ॥
युद्धे यद्धेतिभिन्नारिकिरीटमणिभिः श्रिता ।
घनाहतोत्तप्तलोहस्फुलिङ्गैरिव भूरभात् ॥
बहुशोऽभिमुखप्राप्तः स्फुटाभ्यागमपर्वसु ।
राजमण्डलमग्रासि सम्यग्यद्बाहुराहुणा ॥
सर्वसर्वसहाधीशगर्वपर्वतपाटने ।
पटुः प्रथीयान्प्रथितो यत्प्रतापपविर्भुवि ॥
तस्यासीद्भीमभूमीशस्तनयो विनयोन्नतः ।
यः शोभां शत्रुभूपानां भानां भानुरिवाहरत् ॥

दूरपाता दृढाघाता भीषणा रुक्मभूषणा ।
अमोघा यस्य बाणौघा रेजिरे समराजिरे ॥
विक्रमादक्रियन्तौच्चैर्येन नानाधराधरा ।
त्रस्तशत्रुधरत्रीशकुलाकुलगुहागृहा ॥
कृता पुण्यवता येन सर्वसपत्समन्विता ।
विबुधा भूमिविबुधा विबुधा इव विष्णुना ॥
तद्भार्या सब्बमादेवी ख्याताभूद्भुवि वीरसूः ।
वश्या' शौर्योन्नता यस्या. पित्रो. श्वशुरयोरपि ॥
तस्मात्ताभ्या समुद्भूत केशभूप. प्रतापवान् ।
सद्गुणैरुपमानाना योऽकार्षीदुपमेयताम् ॥
नेता सम्यक्प्रजाना यो जेता युद्धेषु विद्विषाम् ।
दातार्थिभ्योऽर्थितार्थाना त्राता च शरणार्थिनाम् ॥
य प्रह्वीकृतभूपालो भूपालनयपण्डित ।
पण्डितस्तुतसद्वृत्तः सद्वृत्तजनवत्सल ॥
येन ध्वस्तविभूतीनामरातीनामभून्मुखम् ।
अन्तः सतापसपार्चिर्धूमेनेव मलीमसम् ॥
बाणैः किरणदेशीयैर्ध्वान्तदेश्यान्रिपुद्विपान् ।
तिग्माशुकल्पा भिन्दन्ति यद्भटाः समरोद्भटा. ॥
चित्तस्थशिवमौलीन्दुसुधार्द्रा इव यद्गिर' ।
मधुरा नित्यमानन्दममन्द तन्वते सताम् ॥
प्रतिग्रामं प्रतिपुर प्रत्योक प्रतिचत्वरम् ।
प्रतितीर्थं प्रतिसभ यस्यौदार्यं प्रशस्यते ॥
चित्रै सत्रालयैर्यस्य पृथिव्या प्रथित यश. ।
बुभुक्षुभिक्षुसघातप्रभूतप्रीतिहेतुभि ॥
अनन्तप्राणिसुप्रीतिकारिभिर्भूरिवारिभिः ।
•तडागैः सागराभोगैर्यो विभूषितभूतलः ॥

आरामान्योऽतनोत्सारान्सरोभि शोभितान्तरान् ।
उत्फुल्लकञ्जकिञ्जल्कपुञ्जपिञ्जरितान्तरै ॥
देवालयै सुधाशुभ्रै सुवर्णकलशाङ्कितै ।
पताकाचुम्बिताम्भोदैर्येद्धर्मो नीत उन्नतिम् ॥
शाकाब्दे युगखेन्दुरूपगणिते माघे दशम्या तिथौ
शुक्लाया गुरुवासरे गुणनिधि सम्प्राप्तराज्योन्नति ।
श्रीमत्केतनृप समस्तगुरवे ग्रामान्वरेण्यान्बहू-
न्सम्प्रादात्सुगतेश्वराय विपुलश्रीधर्मसंवृद्धये ॥

स्वस्ति चतु समुद्रमुद्रितनिखिलवसुधरापरिपालक श्रीमत्त्रिण(न)यनपल्लव-प्रसादासादितकृष्णवेण्णानदीदक्षिणषट्सहस्रावनीवल्लभ-मयलोभदुर्लभ-चोडचालुक्यसामन्तमदानेकपमृगेन्द्र-विभवामरेन्द्र श्रीमदमरेश्वरदेवदिव्यश्रीपादपद्माराधक-परबलसाधक-श्रीधान्यकटकपुरवराधीश्वर-प्रतापलङ्केश्वर-कलिगळमोगद्कै वेङ्करिगोवकै गण्डरगण्ड गण्डभेरण्डु जगमेच्चुगण्ड नन्निमार्तण्ड नामादिसमस्तप्रशस्तिसहित श्रीमन्महामण्डलेश्वर-कोटकेतुराजलु शकवर्षमुलु ११०४ गुनेंटि माघ शुद्ध १० गुरुवारमुन श्रीमद्बुद्धदेवरकु सुकमुलोनुगा सर्वायमुलतोनाचन्द्रार्क मुगानिच्चिन ऊळ्लु कडूवाडिलोनि मेडुकोण्डूरनु डोकिपनु ॥ ई धर्मम नडपनिवारु पञ्चमहापातकमुलु सेसिनवारु वारणासि ब्रच्चिनवारु तम पेद्द कोडुकु कपालमुन गुडिचिनवारु ॥

स्वदत्ता परदत्ता वा यो हरेत वसुधराम् ।
षष्टिं वर्षसहस्राणि विष्ठाया जायते क्रिमि ॥
वेदाशेन्दुमिते शाके माघे शुक्ले गुरोर्दिने ।
दशम्या केतभूपालो दीपौ बुद्धाय दत्तवान् ॥

स्वस्ति समस्तप्रशस्तिसहित श्रीमन्महामण्डलेश्वरकोटकेतराजलु शकवर्षमुलु ११०४ गुनेंटि माघ शुद्ध १० गुरुवारमुनं दमकु धर्माथमुगा श्रीमद्बुद्धदेवरकुनखण्डवर्त्तिदीपमुलु रेंटिकिनै इच्चिन इन्वण्डलु ११०।

वीनिलोन दामकअमरेवोयुङ्ड रोंभदेनु गोळियल जेकोनि आचन्द्रार्कमुगा दन पुत्रानुपौत्रिकमुननित्य मानेण्डु सेसिनेयि वोयगलवाङ्ड ॥ ऊटुकूरि केतेवोयुङ्ड रोंभदेनु गोळियल जेकोनि आचन्द्रार्कमुगा दन पुत्रानुपौत्रिकमुननित्य मानेण्डु सेसिनेयि वोयगलवाङ्ड ॥ भोगस्त्रीललोन गसविसूरमदेवुलु दनकु धर्मार्थमुगा श्रीमद्बुद्धदेवरकुनखण्डवर्त्तिदीपमुनकिच्चिन इन्पेण्टलु ९९। वीनिं जेकोनि सब्बकमारेवोयुङ्ड आचन्द्रार्कमुगा दन पुत्रानुपौत्रिकमुननित्य मानेण्डु सेसिनेयि वोयगलवाङ्ड ॥ भडार्वु प्रोलमदेवुलु दनकु धर्मार्थमुगा श्रीमद्बुद्धदेवरकुनखण्डवर्त्तिदीपमुनकिच्चिन इन्पेण्टलु ९९। वीनिं जेकोनि चेबळि कोम्मनवोनि कोड्कु माचेनवोयुङ्ड आचन्द्रार्कमुगा दन पुत्रानुपौत्रिकमुननित्य मानेण्डु सेसिनेयि वोयगलवाङ्ड ॥ श्री श्री श्री।

शाकाब्दे वार्धितारापथशशिवसुधासमिते माघमासे
शुक्ले पक्षे दशम्या त्रिदिवपरिवृढाचार्यवारे वरेण्ये।
सोऽय सप्राप्तराज्य सकलगुणनिधि केतविश्वभरेशो
ग्रामान्विज्ञातसीमान्प्रथितपृथुगुणान्प्राददाद्ब्राह्मणेभ्य. ॥

ग्राम कोकल्लुनामान प्रशस्य सस्यसपदा।
विद्वद्भ्यो द्विजवर्येभ्यो जनन्याः श्रेयसेऽददात् ॥
गिञ्जिपाङ्ड चल्लगरा ताडिवाय च शोभनान्।
ग्रामान्द्विजत्रा कृतवान्भूयसे श्रेयसे पितु ॥
सम्यगम्मलपूडि च ग्राम भूमिगुणान्वितम्।
विप्रसात्कृतवान्भ्रातुर्ज्यायसे(स) श्रेयसे मुदा ॥

सत्तेनपल्लि प्रादिशदुप्पुलपाङ्ड च चिन्तपल्लि च तथा।
ओंकदोनकुटिमद्दी धर्मार्थे स्वस्य स द्विजेभ्यो ग्रामान् ॥

व्रीहिव्रातैः सुजातैरलघुफलभरै शालिसस्यै प्रशस्यै-
रुद्गाढैः सुप्ररूढैस्तिलयवचणकैर्मुद्गमाषै सयोषै।
धान्यैश्चान्यै. समृद्धा दिशि दिशि लसिता शोभनै शाकवाटैः
शोभन्ता श्रीसमेता. सकलजनदृशामुत्सवा शश्वदेते ॥

स्वस्ति समस्तप्रशस्तिसहित श्रीमन्महामण्डलेश्वरकोटकेतराजुल्लुतम तल्लि सब्बमदेवुल्कु गोंडनातवाडिलोनिच्चिन यूरु कोकल्लु दीनि पेरु सर्वाम्बिकापुरमु । तम तड्डि भीमराजुनकु धर्मार्थमुगा श्रीमद्ब्राह्मणोत्तमुल्कु गोंडनातवाडिलोनिच्चिन यूरु कोकल्लु दीनि पेरु सब्बाम्बिकापुरमु । तम तड्डि भीम राजुनकु धर्मार्थमुगा श्रीमद्ब्राह्मणोत्तमुलकु गोंडनातवाडिलोनिच्चिन युड्लु गिंजिपाडु चल्लगरा ताडिवाय इवि भीमावुरमुल्लु । तमन्न चोडेराजुनकु धर्मार्थमुगा श्रीमद्ब्राह्मणोत्तमुलकु गोंडुनातवाडिलोनिच्चिन यूरु अम्मलपूडि दीनि पेरु चोडावुरमु । तनकु धर्मार्थम्रगा श्रीमद्ब्राह्मणोत्तमुलकु गोंडनातवाडिलोनिच्चिन यूड्लु कुटिमद्दि उप्पलपाडु कोंडपडुमटिलो सत्तेनपल्लि चित्तपल्ली केतपल्लि ए ౮౮ गुटलु दोड्डिकड्डुवाडि अदु ओंकदोन इवि जगमेच्चुगडपुरमुल्लु ईयग्रहारमुल्लु सर्वकरपरिहारमुगा मुन्नि चितिमि ॥

(एपिग्राफिआ इण्डिका—६ । १४८–१५५)

---

(१५८)

काङ्करोलीग्रामीयराजसागराख्यतडागस्थो लेखः[1] ।

गुञ्जापुञ्जाभरणनिचय चन्द्रकान्तिं किरीटे
गात्रे चक्र करकमलयोर्गुञ्जितं चित्रवस्त्रम् ।
मध्ये पीत वसनमपर किङ्किणीवस्त्रवेणी
नासा मुक्ता विदधति मुदे तेऽस्तु गोवर्धनेन्द्र ॥

आदौ जलमय विश्व तत्र नारायण. स्थितः ।
हिरण्यहारी तन्नाभौ पद्मकोष इहाभवत् ॥

ब्रह्मा चतुर्मुखस्तस्य मरीचिः कश्यपोऽस्य तु ।
सुतो विवस्वास्तस्यासीन्मनुरिक्ष्वाकुरस्य स. ॥

---

१ अय लेखो मेवाडप्रान्ते राजनगरनिटके काङ्करोलीग्रामे राजसागरनामकतडागस्योपर्युत्कीर्णो वर्तते, इति भावनगरप्राचीनशोधसग्रहितार A D 1676 वि० स० १७३२

विकुक्षिः स शशादान्यनामा तस्य पुरजयः।
ककुत्थापरनामा यमस्यानेनास्ततः पृथुः॥
ततोऽभूद्विश्वरन्धिस्तु ततश्चन्द्रस्ततोऽभवत्।
युवनाश्वोऽस्य शावस्तो बृहदश्वोऽस्य चात्मजः॥
ततः कुवलयाश्वोऽभूद्धुधुमारापराभिधः।
दृढाश्वोऽस्यास्य हर्यश्वो निकुम्भस्तस्य वा ततः॥
बर्हणाश्वः कृशाश्वोऽस्य सेनजित्तस्य वा ततः।
युवनाश्वोऽस्य मान्धाता त्रसद्दस्युपराभिधः॥
चक्रवर्त्यस्य तनयः पुरुकुत्सोऽस्य वा सुतः।
त्रसद्दस्युर्द्वितीयोऽस्मादनरण्यस्ततोऽभवत्॥
हर्यश्वोऽस्यारुणस्तस्य त्रिबन्धननृपस्ततः।
सत्यव्रतस्त्रिशङ्कुस्तु तस्य नामान्तरं ततः॥
हरिश्चन्द्रो रोहितोऽस्य तस्य वा हरितस्ततः।
वपस्तस्य सुदेवोऽस्माद्विजयो भरुकोऽस्य वा॥
तस्माद्वृको बाहुकोऽस्य तत्पुत्रः सगरः स च।
चक्रवर्ती सुमत्या तु पत्न्या तस्याभवन्सुताः॥
श्रेष्ठाः षष्टिसहस्रोचसख्याः सागरकारकाः।
सगरस्यान्यपत्न्या तु केशिन्यामसमञ्जसः॥
ततोंऽशुमान्दिलीपोऽस्मात्तस्माज्जातो भगीरथः।
ततः श्रुतस्ततो नाभः सिन्धुद्वीपोऽस्य तत्सुतः॥
अयुतायुस्तस्य जातः ऋतुपर्णस्तु तत्सुतः।
सर्वकामः सुदासोऽस्य तस्मान्मित्रसहः पतिः॥
यदपत्यः सकल्माषपादान्याख्योऽस्य चाश्मकः।
मूलकोऽस्माद्दशरथस्ततः एडविडस्ततः॥
जातो विश्वसहस्तस्मात्खट्वाङ्गश्चक्रवर्त्यतः।
दीर्घबाहुर्दिलीपोऽस्य रघुरस्याज इत्यतः॥

जातो दशरथस्तस्य कौशल्याया सुतोऽभवत् ।
श्रीरामचन्द्र कैकेय्या भरतो रामभक्तिमान् ॥
सुमित्राया लक्ष्मणश्च शत्रुघ्नश्चेति रामत ।
श्रीसीताया कुशो जातो लवश्चेति कुशादभूत् ॥
कुमुद्वत्यामतिथिको निषधोऽस्य ततो नल ।
नभोऽस्य पुण्डरीकोऽस्य क्षेमधन्वा ततोऽभवत् ॥
देवानीकस्ततोऽहीन. पारियात्रोऽस्य तत्सुतः ।
वलस्तस्य स्थलस्तस्माद्वज्रनाभस्ततोऽभवत् ॥
सगणस्तस्य विधृतिः पुत्रस्तस्य सुतोऽभवत् ।
हिरण्यनाभ पुष्योऽस्माद्ध्रुवसिद्धिस्ततोऽभवत् ॥
सुदर्शनोऽस्याग्निवर्णस्तस्य शीघ्रस्ततोऽभवत् ।
ततः प्रसुः श्रुतस्तस्मात्सधिस्तस्मात्तु मर्षण ॥
ततो महास्वास्तस्याभूद्विश्वसाह्व' प्रसेनजित् ।
ततस्ततस्तक्षकोऽस्माद्बृहद्बल इति स्वयम् ॥
महाभारतसग्रामे निहतस्त्वभिमन्युना ।
एते व्यतीता व्यासेन सप्रोक्ता भारते नृपाः ॥
अनागताञ्जगादैव व्यासस्तत्र वदामि तान् ।
बृहद्बलाद्बृहद्रणस्तस्योरुक्रिय इत्यतः ॥
वत्सवृद्ध प्रतिव्योमस्तस्यास्माद्भानुरस्य वा ।
दिवाकस्तस्य पदवी वाहिनीपतिरित्यभूत् ॥
तस्यासीत्सहदेवोऽस्य बृहदश्वस्ततोऽभवत् ।
भानुमान्वा प्रत्यकाश्वोऽस्य तस्मात्सुप्रतीकक‍ः ॥
ततोऽभून्मरुदेवोऽस्मात्सुनक्षत्रोऽस्य पुष्कर. ।
ततोऽन्तरीक्ष' सुतपास्तस्मान्मित्रजिदस्य तु ॥
बृहद्राजस्ततो बर्हिस्तस्मात्तस्य कृतञ्जय' ।
तस्माद्रणजयस्तस्य सजयः शाक्य इत्यत' ॥

शुद्धोदोऽस्माल्लाङ्गलोऽस्य प्रसेनजिदयस्तत' ।
क्षुद्रकस्तस्य रुणकस्तस्यासीत्सुरथस्तत· ॥
सुमित्रस्तु सुमित्रान्त इक्ष्वाकोरन्वयोऽभवत् ।
उक्ता भागवतस्कन्धे नवमे ते मयोदिता ॥
द्वाविंशत्यग्रशतकमेषा सख्या कृता वदे ।
प्रसिद्धात्सूर्यवंशस्थाद्वज्रनाभोऽभवत्तत' ॥
महारथीति राजेन्द्रस्तस्मादतिरथी नृप ।
तस्माद्वचलसेनस्तु सेनास्य त्वप्रहारणे ॥
तस्मात्कनकसेनोऽस्य. महासेनोऽङ्ग इत्यत ।
तस्माद्विजयसेनोऽस्याजयसेनस्ततोऽभवत् ॥
अभङ्गसेनस्तस्मात्तु मदसेनस्ततोऽभवत् ।
भूप· सिंहरथस्त्वेते अयोध्यावासिनो नृपा' ॥
तस्माद्विजयभूपोऽथ मुक्त्वायोध्यां रणागतान् ।
जित्वा नृपान्दक्षिणस्थानवसद्दक्षिणक्षितौ ॥
तत्रास्याकाशवाण्यासीन्मुक्त्वा राजाभिधामपि ।
आदित्याख्या तु धर्तव्या भवता भवदालये ॥
जाता विजयभूपान्ता राजानो मनुपूर्वका ।
वीरा सख्ये जित तेषा पञ्चत्रिंशयुत शतम् ॥

आसीदित्यादि द्वितीय· सर्गः । संवत् १७१८ वर्षे माघमासे कृष्ण-पक्षे सप्तम्या तिथौ रायसमुद्र मुहरत राणे राजसिंह कीधो सवत् १७३२ वर्षे माघमासे शुक्लपक्षे १५ तिथौ राजसमुद्रप्रतिष्ठा कारापिता गजधर-मुख्यः । राम । श्रीकल्याणमस्तु ॥

(भावनगरप्राचीनलेखसग्रह.—१ । ७५–७८)

(१५९)

काङ्करोलीग्रामीयराजसागराख्यतडागस्थो लेखश्चतुर्थः ।

उल्लोलीभवदुन्नताच्छसुरभीपुच्छच्छटाचामर'
सद्गोवर्धनधन्यगोत्रविलसच्छत्रो जितेन्द्रो बली ।
गोपालैः कलितश्च गोपतनयैर्गोपीप्रिय प्रेमवा-
न्पायाद्गोधनभक्तरक्षणपर सच्चक्रवर्ती हरिः ॥
ततो विजयभूपस्य पद्मादित्योऽभवत्सुत ।
शिवादित्योऽस्य पुत्रोऽभूद्धरदत्तोऽस्य वा सुतः ॥
सुजसादित्यनामास्मात्सुसुखादित्यकस्तत ।
सोमदत्तस्तस्य पुत्र शिलादित्योऽस्य चात्मज ॥
केशवादित्य एतस्मान्नागादित्योऽस्य चात्मज ।
भोगादित्योऽस्य पुत्रोऽभूद्देवादित्यस्ततोऽभवत् ॥
आशादित्यः कालभोजादित्योऽस्मात्तनयोऽस्य तु ।
गुहादित्य इहादित्याश्चतुर्दशमितास्तत'॥
गुहादित्यसुता· सर्वे गहिलोताभिधा युता ।
जाता युक्त तेषु पुत्रो ज्येष्ठो बप्पाभिधोऽभवत् ॥
य दृष्ट्वा नन्दिन गौरी दृशो बाष्प पुरासृजत् ।
नन्दीगणोऽसौ ब्राष्पोऽपि प्रियादृग्बाष्पदोऽभवत् ॥
हारीतराशि स मुनिश्चण्डः शभोर्गणोऽभवत् ।
तस्य शिष्योऽभवद्बाष्पस्तस्याज्ञातः प्रसादतः ॥
नागहृदपुरे तिष्ठन्नेकलिङ्गशिवप्रभोः ।
चक्रे बाष्पोऽर्चन चास्मै वरान्रुद्रो ददौ ततः ॥
चित्रकूटपतिस्त्व स्यास्त्वद्वश्यचरणाद्ध्रुवम् ।
मा गच्छताच्चित्रकूट सततिः स्यादखण्डिता ॥
प्राप्येत्यादिवरान्बाष्प एकस्मिन्शतके गते ।
एकाग्रनवतिसृष्टे माघे पक्षवलक्षके ॥

सप्तमीदिवसे बाष्प स पञ्चदशवत्सरः।
एकलिङ्गेशहारीतप्रसादाद्भाग्यवानभूत्॥

नागह्रदाख्ये नगरे विराजी नरेश्वर खड्गधरेषु धन्य।
बलेन देहेन च भोजनेन भीमो रणो भीमसमो रिपूणाम्॥
पञ्चाधिकत्रिंशदमन्दहस्तप्रमाणयुक्पट्टपट दधान.।
बभौ निचोल किल षोडषोद्यत्करप्रमाण विमल वसानः॥
श्री एकलिङ्गेन मुदा प्रदत्त हारीतनाम्ने मुनयेऽथ तेन।
दत्त दधानः कटक च हैम पञ्चाशदुद्यत्पलमानमास्ते॥
द्वात्रिंशदुद्यत्तमढब्बुकाद्यै. प्रस्थाभिधै शेरवरै कृतस्य।
मणस्य चैकस्य भर हि चत्वारिंशन्मितैर्बिभ्रदसिं दधान॥
एकप्रहारान्म षौ महासेर्दुर्गार्चनाया जवतो विनिघ्नन्।
भुञ्जन्महाच्छागचतुष्टय स अगस्त्यशस्त्यः प्रबभूव बाष्पः॥
तत स निर्जित्य नृप तु मोरीजातीयभूप मनुराजसञ्ज्ञम्।
गृहीतवाश्चित्रितचित्रकूटं चक्रेऽत्र राज्य नृपचक्रवर्ती॥
राज्यातिपूर्णत्ववरत्वलक्ष्मीमयत्वशब्दादिमवर्णयुक्ताम्।
ता रावलाख्या पदवीं दधानो बाष्पाभिधान स रराज राजा॥
तत खुमाणाभिधरावलोऽस्माद्गोविन्दनामाथ महेन्द्रनामा।
आलूनृपोऽस्मादथ सिंहवर्मा तस्यात्मज शक्तिकुमारनामा॥
जातस्ततो रावलशालिवाहनस्तस्यात्मजोऽभून्नरवाहनस्तत।
अम्बाप्रसादोऽस्य च कीर्त्तिवर्मकस्तत्पुत्र आसीन्नरवर्मनामक॥
ततो नृपालो नरपत्यभिख्यस्त्वथोत्तमोऽस्मान्नृपभैरवोऽस्मात्।
श्रीपुञ्जराजोऽभवदस्य कर्णादित्यः सुतोऽस्यापि च भावसिंहः॥
श्रीगात्रसिंहोऽथ स हंसराजः सुतोऽस्य सूनु शुभयोगराजः।
सवैरडाख्योऽथ सवैरिसिंहस्ततोऽस्य वा रावलतेजसिंहः॥

ततः समरसिंहाख्य पृथ्वीराजस्य भूपते.।
पृथाख्याया गभिन्यास्तु पतिरित्यतिहार्दत॥

गोरीसाहिबदीनेन गज्जनीशेन सगरम् ।
कुर्वतोऽखर्वगर्वस्य महासामन्तशोभिन ॥
दिल्लीश्वरस्य चोहाननाथस्यास्य सहायकृत् ।
स द्वादशसहस्रै स्ववीराणा सहितो रणे ॥
बद्धा गोरिपतिं दैवात्स्वर्यातः सूर्यबिम्बभित् ।
भीखारासापुस्तकेऽस्य युद्धस्योक्तोऽस्ति विस्तरः ॥
तस्यात्मजोऽभून्नृपकर्णरावलः प्रोक्तास्तु षड्विंशतिरावला इमे ।
कर्णात्मजो माहपरावलोऽभवत्स डूगराद्ये तु पुरे नृपो बभौ ॥
कर्णस्य जातस्तनयो द्वितीय श्रीराहपः कर्णनृपाज्ञयोग्र ।
वाक्येन वा शाकुनिकस्य गत्वा मंडोवरे मोकलसी स जित्वा ॥
तातान्तिके त्वानयति स भद्र कर्णोऽस्य राणाबिरुद गृहीत्वा ।
मुमोच त चारु ददौ तदीय राणाभिधान प्रियराहपाय ॥
भव्याशिषा ब्राह्मणपल्लिवालज्ञातीयविप्रच्छरशल्यनाम्नः ।
श्रीचित्रकूटे वललब्धराज्य चक्र ततो राहप एष वीरः ॥
ततो बभौ चित्रकूटे राहपो वाहपोषकः ।
पूर्वं शिशोदनगरे वासाच्छीशोदिया स्मृत ॥
राणाबिरुदलाभेन राणेत्युक्तोऽखिलैर्बभौ ।
वशेऽस्याग्रे भविष्यन्ति राणाबिरुदिनो नृपाः ॥
राजेन्द्रराजीपूज्योऽय नारायणपरायणः ।
विशेषणादिवर्णाढ्या वीरो राणाभिधा दधौ ॥
आसीद्भास्करतस्तु माधवबुधोऽस्माद्रामचन्द्रस्ततः
सत्सर्वेश्वरक कठोडिकुलजो लक्ष्म्यादिनाचस्ततः ।
तैलङ्गोऽस्य तु रामचन्द्र इति वा कल्पोऽस्य वा माधवः
पुत्रोऽभून्मधुसूदनस्त्रय इमे ब्रह्मेशविष्णूपमाः ॥
यस्याभून्मधुसूदनस्तु जनको वेणी च गोस्वामीजा-
भून्माता रणछोड एष कृतवान्राजप्रशस्त्याह्वयम् ।

काव्य सान्वयराजसिंहसुगुणश्रीवर्णनाद्य मह-
द्वीराङ्क समभूत्तृतीय इह तत्सर्ग सुसर्ग स्फुटम् ॥

इति श्रीतैलङ्गज्ञातीयकठोडीपतिपण्डितोपनाममधुसूदनभट्टपुत्ररणछोडकृते राजप्रशस्त्याह्वये महाकाव्ये तृतीय सर्ग ॥ सवत् १७३२ वर्षे माघशुक्ला १९ रायसमुद्रप्रशस्ति ॥

---

(१६०)

आदिनाथजैनमन्दिरस्थस्तम्भशिलालेखः।

श्रीयशोभद्रसूरिगुरुपादुकाभ्या नम ।

सवत् १९९७ वर्षे वैशाखमासे शुक्लपक्षे षष्ठया तिथौ शुक्रवासरे पुनर्वसुऋक्षप्राप्तचन्द्रयोगे श्रीसण्डेरगच्छे कलिकालगौतमावतार—समस्तभविकजनमनोम्बुजविबोधनैकदिनकर—सकललब्धिविश्रामयुगप्रधान—जितानेकवादीश्वरवृन्द—प्रणतानेकनरनायकमुकुटकोटिघृष्टपादारविन्द—श्रीसूर्य इव महाप्रसाद—चतु षष्टिसुरेन्द्रसगीयमानसाधुवाद—श्रीषण्डेरकीयगणबुधावतंस—सुभद्राकुक्षिसरोवरराजहस—यशोवीरसाधुकुलाम्बरनभोमणिसकलचारित्रिचक्रवर्तिवक्तृचूडामणि भ० प्रभुश्रीयशोभद्रसूरयस्तत्पट्टे श्रीचाहुमानवशशृङ्गार—लब्धसमस्तनिरवद्यविद्याजलधिपार—श्रीबदरादेवीदत्तगुरुपदप्रसाद—स्वविमलकुलप्रबोधनैकप्राप्तपरमयशोवाद भ० श्रीशालिसूरिस्त० श्रीसुमतिसूरिस्त० श्रीशान्तिसूरिस्त० श्रीईश्वरसूरि, एव यथाक्रममनेकगुणमणिगणरोहणगिरीणा महासूरीणा वशे पुन श्रीशालिसूरिस्त० श्रीसुमतिसूरिस्तत्पट्टालकारहार भ० श्रीशान्तिसूरिवराणा सपरिकराणा विजयराज्ये, अथेह श्रीमेदपाटदेशे श्रीसूर्यवशीयमहाराजाधिराजश्रीशिलादित्यवशे श्रीगुहिदत्त—राउलश्रीबप्पाक—श्रीखुमाणादिमहाराजान्वये राणाहमीर—श्रीखेतसिंह—श्रीलखमसिंहपुत्र—श्रीमोकलमृगाङ्कवंशोद्द्योतकारप्रतापमार्तण्डावतार—आसमुद्रमहीमण्डलाखण्डल—अतुलम-

हाबल–राणाश्रीकुम्भकर्णपुत्र–राणाश्रीरायमल्लविजयमानप्राज्यराज्ये त-त्पुत्रमहाकुवरश्रीपृथ्वीराजानुशासनाच्छ्रीउकेशवशे रायजडारीगोत्रे राउलश्रीलाखणपुत्र म० दूदवशे म० मयूरसुत म० सादूलस्तत्पुत्राभ्या म० सीहासमदाभ्या सद्बान्धव म० कर्मसीधारालाखादिसुकुटुम्बयुताभ्या श्रीनन्दकुलवत्यां पुर्यां स० ९६४ श्रीयशोभद्रसूरिमन्त्रशक्तिसमानीताया त० सायरकारितदेवकुलिकाद्युद्धारित–सायरनाम–श्रीजिनवत्या श्रीआदी-श्वरस्य स्थापना कारिता कृता श्रीशान्तिसूरिपट्टे देवसुन्दरेत्यपरशिष्यना-मभि आ० श्रीईश्वरसूरिभिरिति लघुप्रशस्तिरिय लि० आचार्य श्रीईश्व-रसूरिणा उत्कीर्णा सूत्रधार सोमाकेन शुभम् ॥

(भावनगरप्राचीनशोधसग्रह —१। ९४–९६)

---

(१६१)

निकुम्भवंशीयश्रीमल्लोवनमहीपालानां दानपत्रम्[१]।

आधारो धरणी सुधाशुतरणी ह्लादप्रकाशप्रदा-
वाकाशस्त्ववकाशदोऽथ जगत पाकप्रद पावक ।
प्राणो वायुरथायुरम्बु हविषामाप्यायको दायको
यन्मूर्त्यष्टकभावित जगदिद पायात्स व शकर ॥
अस्तु स्वस्ति समस्तभास्करमहावशाय यत्राभव-
द्भूभृच्छ्रेष्ठनिकुम्भनामनृपतिर्यस्यान्वये विश्रुत ।
[मान्धा]ता सगरो भगीरथमुखा किं वर्ण्यमस्मात्पर
यत्र त्रातुमिद जगज्जगदिनो रामोऽवतीर्ण स्वयम् ॥
वशे तत्र निकुम्भनामनृपते श्रीकृष्णराजोऽभव-
द्विख्यातक्षितिपालमौक्तिकमणिश्रेण्या श्रित श्रेष्ठताम् ।

---

१ इद दानपत्र Fleet and Burgess's Pâlî, Sanskrit and old Canarese Inscriptions नामकपुस्तकात्सगृह्य G Buhler महाशयवरै प्राकाश्य नीतम् शकसवत् १०७५ (A D 1153–54)

जातस्तत्तनयोऽवनेरवनतो यो **गोवनः** कीर्त्यते
तत्पुत्रो नृपदर्पसर्पगरुडो **गोविन्दराजो**ऽजनि ॥
गोविन्दादपि गोवनः पुनरभूद्भूपालचूडामणि
पुत्रस्तस्य निकुम्भवंशतिलक **श्रीकृष्णराजो**ऽभवत् ।
यत्सत्कीर्तिसुधा विधूतशिरस साकूणिताक्षा रसा-
द्यापीह पिबन्ति कर्णपुटकैर्दिक्षु क्षितौ क्ष्माभृत. ॥
पूर्वं योऽवततार भारमवनेर्हर्तुं सुराराजित
श्रीकंसो वसुदेवदेवकसुताहर्म्ये सुरम्ये हरि ।
भूयो **गोवनभूपभव्यभवने** भूत्वाथ जित्वा रिपू-
न्कृत्वा पालकमिन्द्रराजमवने स्वर्गं जगाम स्वयम् ॥
उत्कीर्णचन्द्रफलकस्वगुणप्रशस्ते
किं वर्ण्यतेऽत्र भुवि कृष्णनृपस्य तस्य ।
किं स्वामिदेवगुरुभक्तिरुदारकीर्ति-
रत्यन्तसत्यमुत शौर्यमथार्यता वा ॥
कृष्ण ब्रूहि यम त्वया यदनिश दत्त द्विजेभ्यो धन
गृह्णीष्व त्वमिद न देव किमिति प्रत्त कथ गृह्यते ।
क्रीडायामपि यत्तु दत्तमहरन्नाह न मद्वंशजा
इत्यार्यत्वसुतोषितो दिवि चकारास्मै स तुङ्गं पदम् ॥
अहितविहितघात **कृष्णराजात्प्रजात**
प्रचुरसुकृतभाज कीर्तिमानिन्द्रराज ।
परिवृढदृढभक्ति सगरेऽचिन्त्यशक्ति
सुजनकमलभानुर्दुष्टकक्षे कृशानु ॥
दोर्दर्पोद्धुरकन्धरारिसुमहासामन्तसीमन्तिनी-
नेत्रप्रच्युतवारिपूरविलसद्वृशायते यद्यश ।
नासीन्नोऽत भविष्यति क्षितिपतिर्दृष्ट. श्रुतो वा कचि-
त्त्यागे सत्यगुणे रणे सुचरणे य. श्रीन्द्रराजोपम. ॥

शत्रुर्मित्रायते कल्पवृक्षायन्ते च दुर्जनाः ।
राज्ये यस्येन्द्रराजस्य कलिः कृतयुगायते ॥

श्रीदेवी सगरान्वयातिदयिता यत्पट्टराज्ञी सती
या राज्ञी वनिताजनस्य निधिनामौदार्यदीक्षागुरुः ।
किं कीर्तिः किमु सुन्दरत्वमथ किं सौभाग्यभाग्योदयः
किं दानं प्रतिपन्नपालनगुणस्तस्यास्तु किं वर्ण्यते ॥

कृष्णसमो रणेऽर्जुनसमस्त्यागे स नागार्जुनो
देवब्राह्मणसाधुवृन्दकुमुदाह्लादाय चन्द्रोदयः ।
यत्सूनुर्ननु गोवनो रणपटुः खड्गस्तु यस्यासकृ-
द्दृप्तारिद्विपकुम्भपीठलुठनप्रोत्कण्ठकण्ठीरवः ॥

यन्मन्त्री नृपनीतिवित्तविलसल्लक्ष्मीलताकन्दकः
रासु भासुररणे निर्व्याजशूरो द्विजः ।
विद्वान्सज्जनरञ्जनोऽतिचतुरः श्रीचङ्गदेवाह्वयो
येन स्वीयधियेन्द्रराजचरणाक्रान्ताः कृता शत्रवः ॥

राष्ट्रस्य पुष्टिः सुजनस्य तुष्टिर्धर्मस्य वृद्धिः सकलार्थसिद्धिः ।
नन्दन्ति सन्तः प्रसरन्ति लक्ष्म्यः श्रीचङ्गदेवे सति सत्प्रधाने ॥

वाचस्पतिः किमुशना नरवेषपट्टः
किं वा निधिर्नृपतिसद्मनि पद्मनामा ।
चिन्तामणिर्नु सुकृतादवतीर्ण इत्थं
यं तर्कयन्ति सुजनाः प्रचुरप्रभावम् ॥

वर्षाणां पञ्चसप्तत्या सहस्रे(१०७५) स्वधिके गते ।
शकभूपालकालस्य तथा श्रीमुखवत्सरे ॥

अतिसुरसमसारासारसंसारतुङ्ग-
क्षितिरुह फलमवाप्तं पुण्यरूपं तदेदम् ।
मदनदहनहर्म्यं कारयामास तुङ्गं
स गुणगणनिधानश्रीन्द्रराजाभिधानः ॥

हे भूपा भुवि भाविनोऽञ्जलिपुट बद्धेन्द्रराजो भृश
याचे किंचिदिह नृजीवितमरे कल्लोललोल यतः ।
राज्य तन्नलिनीदलाम्बुतरल तस्मात्स्वधर्म ध्रुव
सत्य न त्यजत स्वदत्तमपरैर्दत्त च तत्पाल्यताम् ॥
देवसंगमनामान ग्राम देवाय गोवनः ।
श्रीदेव्यनुमते प्रादात्प्रतिष्ठामकरोद्यदा ॥

(इण्डियन् आण्टिक्वेरी—८ । ३९–४१)

---

(१६२)

प्रशान्तरागापरनामधेयश्रीमद्दद्दमहाराजानां तृतीयं दानपत्रम्[१] ।

(A D 479)

ॐ स्वस्ति विजयविक्षेपाद्भरुकच्छप्रद्वारावासकात्सकलघनपटलविनिर्गतरजनिकरकरावबोधितकुमुदधवलयश.प्रतापस्थगितनभोमण्डलोऽनेकसमरसकटप्रमुखागतनिहतशत्रुसामन्तकुलवधूप्रभातसमयरुदितफलोद्गीयमानविमलनिस्त्रिंशप्रताप, देवद्विजातिगुरुचरणकमलप्रणामोद्धृष्टवज्रमणिकोटिरुचिरदीधितिविराजितमुकुटोद्भासितशिरा, दिनानाथातुराभ्यागतार्थिजनक्लिष्टपरिपूरितविभवमनोरथोपचीयमानत्रिविष्टपैकसहायधर्मसचय, प्रणयपरिकुपितमानिनीजनप्रणामपूर्वमधुरवचनोपपादितप्रसादप्रकाशीकृतविदग्धनागरकस्वभाव, विमलगुणपञ्जरक्षिप्तबहलकलितिमिरनिचयश्रीमद्दद्द, तस्य सूनु समदप्रतिद्वन्द्विगजघटाभेदिनिस्त्रिंशविक्रमप्रकटितमृगपतिकिशोरवीर्यावलेप., पयोनिधीकृतोभयतटप्ररूढवनलेखविहृतनिरङ्कुशदानप्रवाहप्रवृत्तदिग्दन्तिविभ्रमसमूह, स्फटिककर्पूरपिण्डपाण्डुरयशश्चन्दनचर्चिताङ्गसमुन्नतगगनलक्ष्मीपयोधरोत्सङ्ग, श्रीजयभट्टः, तस्यात्मज प्रतिहतसकल-

---

१ इद च दानपत्र Indian Antiquary Vol V P 110त उद्धृत्य G Buhler पण्डितवरेण प्राकाश्य नीतम्

जगद्व्यापिदोषाधिकारविजृम्भितसततनमोवृद्धि', अधिकगुरुस्नेहसपत्कविमल-दिशोद्भासितजीवलोक, परमबोधसमनुगत विपुलगुर्जरनृपान्वयप्रदीपतामुपगत, समधिगतपञ्चमहाशब्दमहाराजाधिराजश्रीमद्दद्दः कुशली सर्वानेव राष्ट्रपतिविषयपतिग्रामकूटायुक्तकनियुक्तकाधिकमहत्तरादीन्समाज्ञापयति—अस्तु वो विदित यथा मया मातापित्रोरात्मनश्चैवामुष्मिकपुण्ययशोभिवृद्धये कान्यकुब्जवास्तव्यतचातुर्विद्यसामान्यवशिष्ठसगोत्रबह्वृचसब्रह्मचारिभट्टमहीधरस्तस्य सूनुर्भट्टमाधवाय बलिचरुवैश्वदेवाग्निहोत्रपञ्चमहायज्ञादिक्रत्वोत्सर्पणार्थं कमनीयषोडशशतमुक्तयन्त'पातिनिगुडग्रामः। अस्याघाटस्थानानि—पूर्वस्या दिशि वघौरिग्राम., दक्षिणस्या दिशि फलहवद्रहग्राम', प्रतीच्या दिशि विह्राणग्राम, उत्तरस्या दिशि दहिथलिग्राम, एवमय स्वचतुराघाटनविशुद्धो ग्राम सोद्रङ्ग सपरिकर' सधान्यहिरण्यादेय सोत्पद्यमानविष्टिकः समस्तराजकीयानामप्रवेश्य आचन्द्रार्णवक्षितिसरित्पर्वतसमकालीन पुत्रपौत्रान्वयक्रमोपभोग्य. पूर्वप्रत्तदेवब्रह्मदायवर्जमाभ्यन्तरसिद्ध्या शकनृपकालातीतसवत्सरशतचतुष्टये (४००=A D 479) वैशाखपौर्णमास्यामुदकातिसर्गेण प्रतिपादित यतोऽस्योचितया ब्रह्मदायस्थित्या कृषत' कर्षयतो भुञ्जतो भोजयत प्रतिदिशतो वा नव्यासेध. प्रवर्तितव्यस्तथागामिभिरपि नृपतिभिरस्मद्वश्यैरन्यैर्वा सामान्यभूमिदानफलमवेत्य बिन्दूल्लोलान्यनित्यान्यैश्वर्याणि तृणाग्रलग्नजलबिन्दुचञ्चल च जीवितमाकलय्य स्वदायनिर्विशेषोऽयमस्मद्दायोऽनुमन्तव्यः पालयितव्यश्च ॥

तथा चोक्तम्—

बहुभिर्वसुधा भुक्ता राजभि' सगरादिभि ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥

यश्चाज्ञानतिमिरवृत्तमतिराच्छिन्द्यादाच्छिद्यमानमनुमोदेत वा स पञ्चभिर्महापातकैश्चोपपातकैश्च सयुक्त स्यादिति । उक्त च भगवता वेदव्यासेन व्यासेन—

षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिद' ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥

यानीह दत्तानि पुरातनानि दानानि धर्मार्थयशस्कराणि ।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधु पुनराददीत ॥
स्वदत्ता परदत्ता वा यत्नाद्रक्ष नराधिप ।
महीं महीमता श्रेष्ठ दानाच्छ्रेयोऽनुपालनम् ॥

लिखित चैतत्पादानुजीविश्रीबलाधिकृतगिलकसूनुना माधवभट्टेन । स्वहस्तोऽय मम श्रीवीतरागसूनो श्रीप्रशान्तरागस्य ॥

(इण्डियन् आण्टिक्केरी—७ । ६३-६४)

(१६३)

वलभीप्रभोर्महाराजगुहसेनस्य दानपत्रम् ।

(A D 559)

प्रसभप्रणतामित्राणा मैत्राणामतुलबलसपन्नमण्डलाभोगससक्तसप्रहारशतलब्धप्रताप: प्रतापोपनतदानमानार्जवोपार्जितानुरागानुरक्तमौलभृतमित्रश्रेणीबलावाप्तराज्यश्री. परममाहेश्वर श्रीसेनापतिभट्टार्कस्तस्य सुतस्तत्पादरजोरुणावनतपवित्रीकृतशिरा शिरोवनतशत्रुचूडामणिप्रभाविच्छुरितपादनखपङ्क्तिदीधितिर्दीनानाथकृपणजनोपजीव्यमानविभवः परममाहेश्वर' श्रीसेनापतिधरसेनस्तस्यानुजस्तत्पादाभिप्रणामप्रशस्ततरविमलमौलिमणिर्मन्वादिप्रणीतविधिविधानधर्मा धर्मराज इव विहितविनयव्यवस्थापद्धतिरखिलभुवनमण्डलाभोगैकस्वामिना परमस्वामिना स्वयमुपहितराज्याभिषेकः परममाहेश्वरः श्रीमहाराजद्रोणसिंहः सिंह इव तस्यानुजस्वभुजबलपराक्रमेण परगजघटानीकानामेकविजयी शरणैषिणामशरणमवबोद्धा शास्त्रार्थतत्त्वाना कल्पतरुरिव सुहृदयप्रणयिना यथाभिलषितकामफलोपभोगद परमभट्टारकपादानुध्यातः परमभागवत. श्रीमहाराजध्रुवसेनस्तत्पादाभिप्रणामप्रभविप्रक्षालिताशेषकृष्णः कृष्ण इव निरस्तारातिसेनासगर सागर इव विशुद्धाद्रणमहार्हरत्नपूरण. पूर्णचन्द्र इव सर्वजनतादर्शनाभिराम. परममाहेश्वर' श्रीमहाराजगुहसेनः । कुशली सर्वानेक' ' '   ...

१ इद च दानपत्रमेकस्मात्पण्डितवरादुपलब्धमिति G Buhler महाशयवरा

" .... 'राजस्थानीयामात्ययुक्तकविनियुक्त-द्राङ्गिकचाटभट' " " .... ।दीनन्याश्च यथा सबध्यमान ' "

....वलभीपुरे पूज्यदुड्डाकारितविहारस्य क ' ....

...प्रत्याय सर्वहिरण्यादेय सदशापराध' सह " र श्च '

.... चरो वर्तेषु चतुर्षु मातापित्रो पुण्याप्यायननिमित्तमात्मन-श्चैहिकामुष्मिकफलावाप्तये ....

तस्य गन्धपुष्पधूपदीपतैलादिक्रियोत्सर्पणार्थं सद्धर्मस्य पुस्तकोपक्र ' " .... ।नादेशसमत्वागताष्टानिकायाभ्यन्तरार्यभिक्षुसङ्घस्य चीविरपि-ण्डपात .... . भ ' जायविहारस्य च खण्डस्फुटितविशीर्णप्रतिस-स्कारणार्थमाचन्द्रार्कार्णवक्षितिस्थितिसरित्पर्वतसमकालीन , भूमिच्छिद्रन्याये-न सोदकेन कमण्डलुना विसृष्टो यतोऽस्योचित . . . " परि-पन्थना वाकार्यागामिनृपतिभिश्चानित्यान्यैश्वर्याण्यस्थिर मानुष्य सामान्य च भूमिदानफलमवगच्छद्भिरयमस्मद्दायोऽनुमन्तव्य' पालयितव्यश्च । यश्चा-च्छिन्द्यादाच्छिद्यमान वानुमोदेत स पञ्चभिर्महापातकै सोपपातकै. सयुक्तः स्यात् । अपि चात्र श्लोका भवन्ति—

यानीह दारिद्र्यभयान्नरेन्द्रैर्धनानि धर्मायतनीकृतानि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधु' पुनराददीत ॥

विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिन ।
कृष्णाहयो हि जायन्ते पूर्वदाय हरन्ति ये ॥
स्वदत्ता परदत्ता वा यो हरेत वसुधराम् ।
गवा शतसहस्रस्य हन्तु प्राप्नोति किल्बिषम् ॥ इति ।

दूतकोऽत्र " पुत्रविष्णुसिहेनेति । स्वहस्तो मम श्रीमहा-राजगुहसेनस्य । [1]सवत् २४० श्रावणशु०' "

(इण्डियन् आण्टिक्वेरी—७ । ६७-६८)

---

१ वलभीसवत्सरोऽयम् २४० अत्र ३१९ मितवर्षेषु योजितेषु ५५९ मित खिस्ताब्दो बोध्य

(१६४)

वलभीप्रभोः श्रीधरसेनमहाराजानां द्वितीयं दानपत्रम् ।

(A D 571)

ॐ स्वस्ति वलभीत प्रसभप्रणतामित्राणा मैत्रकाणामतुलबलसपन्नमण्डलाभोगससक्तसप्रहारशतलब्धप्रताप प्रतापोपनतदानमानार्जवोपवर्जितानुरागानुरक्तमौलिभृतमित्रश्रेणीबलावाप्तराज्यश्री परममाहेश्वर श्रीसेनापतिभट्टार्कस्तस्य सुतस्तत्पादरजोरुणावनतपवित्रीकृतशिरा शिरोवनतशत्रुचूडामणिप्रभाविच्छुरितपादनखपङ्क्तिदीधितिर्दीनानाथकृपणजनोपजीव्यमानविभवपरममाहेश्वर श्रीसेनापतिधरसेनस्तस्यानुजस्तत्पादप्रणामप्रशस्ततरविमलमौलिमणिर्मन्वादिप्रणीतविधिविधानधर्मा धर्मराज इव विहितविजयव्यवस्थापद्धतिरखिलभुवनमण्डलाभोगैकस्वामिना **परमस्वामिना** स्वयमुपहितराज्याभिषेको महाविश्रणनावपूतराजश्रीपरममाहेश्वरमहाराजश्रीद्रोणसिंह सिंह इव तस्यानुज स्वभुजबलपराक्रमेण परगजघटानीकानामेकविजयी शरणैषिणा शरणमवबोद्धा शस्त्रार्थतत्त्वाना कल्पतरुरिव सुहृत्प्रणयिना यथाभिलषितफलोपभोगद परमभागवतो महाराजध्रुवसेनस्तस्यानुजस्तच्चरणारविन्दप्रणतिप्रविधौताशेषकल्मष सुविशुद्धस्वचरितोदकक्षालितसकलकलिकलङ्क॰ प्रसभनिर्जितारातिपक्षप्रथितमहिमा परमादित्यभक्त श्रीमहाराजधरपट्टस्तस्यात्मजस्तत्पादसपर्यावाप्तपुण्योदय॰ शैशवात्प्रभृतिखड्गद्वितीयबाहुरेव समदपरगजघटास्फोटनप्रकाशितसत्त्वनिकषस्तत्प्रभावप्रणताराति चूडारत्नप्रभाससक्तसव्यपादनखरश्मिसहति सकलस्मृतिप्रणीतमार्गसम्यक्परिपालनप्रजाहृदयरञ्जनादन्वर्थराजशब्दो रूपकान्तिस्थैर्यगाम्भीर्यबुद्धिसपद्भि स्मरशशाङ्काद्रिराजोदधित्रिदशगुरुधनेशानतिशयान॰ शरणागताभयप्रदानपरतया तृणवदपास्ताशेषस्वकार्यफल॰

---

१ इद च दानपत्र काठियावाडराष्ट्रान्तर्गतसुराथपुरे Mı Bau'ddın, Dıvan of H H the Navab of Junâgadhत सप्राप्तमिति G Buhleı महाशयवरा

प्रार्थनाधिकार्थप्रदानानन्दितविद्वत्सुहृत्प्रणयिहृदयः पादचारीव सकलभुवनमण्डलाभोगप्रमोदः परममाहेश्वरः श्रीमहाराज**गुहसेन**स्तस्य सुतस्तत्पादनखसतानविसृतजाह्नवीजलौघनिक्षालिताशेषकल्मषः प्रणयिशतसहस्रोपजीव्यमानभोगसपद्रूपलोभादिवाश्रितः सरभसमाभिगामिकैर्गुणैः सहजशक्तिशिक्षाविशेषविस्मापिताखिलधनुर्धरः प्रथमनरपतिसमतिसृष्टानामनुपालयिता धर्मादायादानामपाकर्ता प्रजोपघातकारिणामुपप्लवाना दर्शयिता श्रीसरस्वत्योरेकाधिवासस्य सहताराातिपक्षलक्ष्मीक्षोभदक्षविक्रमो विक्रमोपसंप्राप्तविमलपार्थिवश्रीः परममाहेश्वरो महाराजश्री**धरसेन**ः कुशली सर्वानेवायुक्तकद्राङ्गिकमहत्तरभटचाटभटध्रुवाधिकरणिकदण्डपाशिकभोगाधरणिकशौल्किकवर्त्मपलप्रतिसरकराजस्थानीयकुमारामात्यादीश्चानन्याश्च यथा संबध्यमानकान्समाज्ञापयति—अस्तु वः संविदितम्—यथा मया मातापित्रोः पुण्याप्यायनायात्मनश्चैहिकामुष्मिकयथाभिलषितफलावाप्तये **सूर्य[आर्य]दास**ग्रामे दक्षिणपूर्वसीम्नि पदावर्थशतद्वयवापी च ज्योतिपद्रक्रमे उत्तरपूर्वसीम्नि क्षेत्रपादावर्तशतद्वयविंशोत्तरः, **लेशुदक**ग्रामे खट्टखट्टावर्तितपादावर्ती पञ्चत्रिंशः, एतसोद्रङ्गः सोपरिकरः सवातभूतधानहिरण्यादेयः सोत्पद्यमानविष्टिकः समस्तराजकीयानामहस्तप्रक्षेपणीयः भूमिच्छिद्रन्यायेन **शाण्डिल्यसगोत्रच्छन्दोगकौथुमसब्रह्मचारिब्राह्मणदुशाय** तथा ब्राह्मणषष्ठये बलिचरुवैश्वदेवाग्निहोत्रातिथिपञ्चमहायज्ञिकाना क्रियाणा समुत्सर्पणार्थमाचन्द्रार्कार्णवसरित्क्षितिसमकालीनः पुत्रपौत्रान्वयभोग्यमुदकसर्गेण ब्रह्मदायं निसृष्टः यतोऽस्योचितया ब्रह्मदेयस्थित्या भुञ्जतः कृषतः कर्षयतः प्रदिशतो वा न कैश्चित्प्रतिषेधे वर्तितव्यमागामिभद्रनृपतिभिश्चास्मद्वंशजैरनित्यान्यैश्वर्याण्यस्थिरं मानुष्यं सामान्यं च भूमिदानफलमवगच्छद्भिरयमस्मद्दायोऽनुमन्तव्यः परिपालयितव्यश्च। यश्चैनमाच्छिन्द्यादाच्छिद्यमानं वानुमोदेत स पञ्चभिर्महापातकैः सोपपातकैश्च संयुक्तः स्यादिति। उक्तं च भगवता **वेदव्यासेन** व्यासेन—

षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥

पूर्वदत्ता द्विजातिभ्यो यत्नाद्रक्ष युधिष्ठिर ।
मही महीभृता श्रेष्ठ दानाच्छ्रेयोऽनुपालनम् ॥
यानीह दारिद्र्यभयान्नरेन्द्रैर्धनानि धर्मायतनीकृतानि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधु. पुनराददीत ॥

लिखित सधिविग्रहाधिकृतस्कन्धभट्टेन । स्वहस्तो मम महाराजश्रीधरसेनस्य ॥ दु०चिब्बर स० २५२ वैशाख व० १५ ॥

(इण्डियन् आण्टिक्वेरी—७ । ६८–७०)

(१६५)

वलभीप्रभोः श्रीधरसेनमहाराजानां तृतीयं दानपत्रम् ।

(A D 589)

ॐ स्वस्ति विजयस्कन्धावारात् भर्तृटाटनकवासकात् प्रसभप्रणतामित्राणा मैत्रकाणामतुलबलसपन्नमण्डलाभोगससक्तसप्रहारशतलब्धप्रताप प्रतापोपनतदानमानार्जवोपार्जितानुरागानुरक्तमौलभृतमित्रश्रेणिबलावाप्तराज्यश्री परममाहेश्वर श्रीसेनापतिभट्टार्कस्तस्य सुतस्तत्पादरजोरुणावनतपवित्रीकृतशिरा शिरोवनतशत्रुचूडामणिप्रभाविच्छुरितपादनखपङ्क्तिदीधिति, दीनानाथकृपणजनोपजीव्यमानविभव, परममाहेश्वर श्रीसेनापतिधरसेनस्तस्यानुजस्तत्पादप्रणामप्रशस्ततरविमलमौलिमणिर्मन्वादिप्रणीतविधिविधानधर्मा धर्मराज इव विनयविहितव्यवस्थापद्धतिरखिलभुवनमण्डलाभोगैकस्वामिना **परमस्वामिना** स्वयमुपहितराज्याभिषेकमहाविश्राणनावपूतराज्यश्री' परममाहेश्वरो महाराजश्रीद्रोणसिंह. सिंह इव तस्यानुज स्वभुजबलपराक्रमेण परगजघटानीकानामेकविजयी शरणैषिणा शरणमवबोद्धा शास्त्रार्थतत्वाना कल्पतरुरिव सुहृत्प्रणयिना यथाभिलषितकाम-

१ इद च दानपत्र **काठियावाडराष्ट्रान्तर्गतसुराथपुरे** Mı Bau'ddın, Dıvan of H H the Nıvab of Junâgadhत समुपलब्धमिति G Buhleı महाशया

फलभोगदः परमभागवतो महाराजश्रीध्रुवसेनस्तस्यानुजस्तच्चरणारविन्द-प्रणतिप्रविधौतावशेषकल्मष सुविशुद्धस्वचरितोदकप्रक्षालिताशेषकलिकलङ्कः प्रसभनिर्जितारातिपक्षप्रथितमहिमा परमादित्यभक्तो महाराजश्रीधरपट्टस्तस्य सुतस्तत्पादसपर्यावाप्तपुण्योदय' शैशवात्प्रभृति खड्गद्वितीयबाहुरेव समदपरगजघटास्फोटनप्रकाशितसत्त्वनिकषस्तत्प्रभावप्रणतारातिचूडारत्नप्रभासंसक्तसव्यपादनखरश्मिसहति. सकलस्मृतिप्रणीतमार्गसम्यक्परिपालनप्रजाहृदयरञ्जनादन्वर्थराजशब्दोऽभिरूपकान्ति.स्थैर्यधैर्यगाम्भीर्यसपद्भिः सरशशाङ्काद्रिराजोदधित्रिदशगुरुधनेशानतिशयानः शरणागताभयप्रदानपरतया तृणवदपास्ताशेषस्वकार्यफल. प्रार्थनाधिकार्थप्रदानानन्दितविद्वत्सुहृत्प्रणयिहृदय' पादचारीव सकलभुवनमण्डलाभोगप्रमोद परममाहेश्वरो महाराजश्रीगुहसेनस्तत्पादनखमयूखसतानविसृतजाह्नवीजलौघप्रक्षालिताशेषकल्मष. प्रणयिशतसहस्रोपजीव्यमानभोगसपद्रूपल्लोभादिवाश्रितः सरभसमाभिगामिकैर्गुणैः सहजशक्तिविशेषविस्मापिताखिलधनुर्धरः प्रथमनरपतिसृष्टानामनुपालयिता धर्मादायादानामपाकर्ता प्रजोपघातकारिणामुपप्लवाना दर्शयिता श्रीसरस्वत्योरेकाधिवासस्य सहतारातिपक्षलक्ष्मीपरिभोगदक्षविक्रमोपसप्राप्तविमलपार्थिवश्री परममाहेश्वरो महासामन्तमहाराजश्रीधरसेनः कुशली सर्वानेव स्वानायुक्तकविनियुक्तकद्राङ्गिकवामहत्तरभटचारभटध्रुवाधिकरणिकशौल्किकचोरोद्धरणिकदण्डपाशिककाथेवरिकविषयपतिराजस्थानीयोपरिकुमारामात्यहस्त्यश्वारोहादीनन्याश्च यथा सबध्यमानकान् समनुदर्शयति—अस्तु व. सविदितम्—यथा मया मातापित्रो. पुण्याप्यायनायात्मनश्चैहिकामुष्मिकयथाभिलषितफलावाप्तये आनर्तपुरविनिगर्तखेटकनिवासिसर्कराक्षिसगोत्रबह्वृचसब्रह्मचारिब्राह्मण ...मित्रपुत्रब्राह्मणविष्णुमित्राय खेटकाहारविषये वण्डरिजिद्रिपथकान्तर्गतअशिलापल्लिकाग्राम. सोद्रङ्ग' सपरिकरः सवातभूतप्रत्याय सधान्यभागभोगहिरण्यदेयः सोत्पद्यमानविष्टिकः सदशापराध. समस्तराजकीयानामहस्तप्रक्षेपणीयो भूमिच्छिद्रन्यायेन बलिचरुवैश्वदेवाग्निहोत्रातिथिपञ्चमहायज्ञिकाना क्रियाना

समुत्सर्पणार्थमाचन्द्रार्कार्णवसरित्क्षितिस्थितिपर्वतसमकालीन' पुत्रपौत्रान्वयभोग्यमुदकातिसर्गेण ब्रह्मदायो निसृष्टो यतोऽस्योचितया ब्रह्मदेयस्थित्या भुञ्जतः कृषत कर्षयत' प्रदिशतो वा न कैश्चिद् व्याघाते वर्तितव्यमागामिभद्रनृपतिभिरस्मद्वशजैरन्यैर्वानित्यान्यैश्वर्याण्यस्थिर मानुष्य सामान्य च भूमिदानफलमवगच्छद्भिरयमस्मद्दायोऽनुमन्तव्य परिपालयितव्यश्च । यश्चैनमाच्छिन्द्यादाच्छिद्यमान वानुमोदेत स पञ्चभिर्महापातकै सोपपातकैश्च सयुक्त' स्यादिति । उक्त च भगवता वेदव्यासेन व्यासेन—

षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिद ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
बहुभिर्वसुधा भुक्ता राजभि सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
विन्ध्याटवीष्वतोयासु शुष्ककोटरवासिन ।
कृष्णाहयो हि जायन्ते ब्रह्मदेयापहारका ॥
स्वदत्ता परदत्ता वा यो हरेत वसुधराम् ।
गवा शतसहस्रस्य हन्तु प्राप्नोति किल्बिषम् ॥
पूर्वदत्ता द्विजातिभ्यो यत्नाद्रक्ष युधिष्ठिर ।
मही महीभृता श्रेष्ठ दानाच्छ्रेयोऽनुपालनम् ॥
यानीह दारिद्र्यभयान्नरेन्द्रैर्धनानि धर्मायतनीकृतानि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधु पुनराददीत ॥

इति । स्वहस्तो महाराजश्रीधरसेनस्य । दु०सामन्तशीलादित्य । लिखित सधिविग्रहाधिकरणाधिकृतदिविरपतिस्कन्धभट्टेन ॥ संवत् २७० फाल्गुन व० १० ॥

(इण्डियन् आण्टिक्वेरी—७ । ७१-७३)

(१६६)

वलभीप्रभोः श्रीधरसेनमहाराजानां चतुर्थं दानपत्रम्[1]।

(A D 449)

ॐ स्वस्ति विजयस्कन्धावाराद्भर 'वासकात्प्रसभप्रणतामित्राणा मैत्रकाणामतुलबलसपन्नमण्डलाभोगससक्तसंप्रहारशतलब्धप्रतापात्प्रतापोपनतदानमानार्जवोपार्जितानुरागादनुरक्तमौलभृतश्रेणिबलावाप्तराज्यश्रिय परममाहेश्वरश्रीभट्टार्कादव्यवच्छिन्नराजवशान्मातापितृचरणारविन्दप्रणतिप्रविधौताशेषकल्मषः शैशवात्प्रभृति खड्गद्वितीयबाहुरेव समदपरगजघटास्फोटनप्रकाशितसत्त्वनिकषस्तत्प्रभावप्रणताराातिचूडारत्नप्रभाससक्तपादनखरश्मिसहति. सकलस्मृतिप्रणीतमार्गसम्यक्परिपालनप्रजाहृदयरञ्जनादन्वर्थराजशब्दो रूपकान्तिस्थैर्यगाम्भीर्यबुद्धिसपद्भि स्मरशशाङ्काद्रिराजोदधित्रिदशगुरुधनेशानतिशयान. शरणागताभयप्रदानपरतया तृणवदपास्ताशेषस्वकार्यफल प्रार्थनाधिकार्थप्रदानानन्दितविद्वत्सुहृत्प्रणयिहृदय' पादचारीव सकलभुवनमण्डलाभोगप्रमोद परममाहेश्वर. श्रीगुहसेनस्तस्य सुतस्तत्पादनखमयूखसतानविसृतजाह्नवीजलौघप्रक्षालिताशेषकल्मषः प्रणयिशतसहस्रोपजीव्यमानसंपद्रूपलोभादिवाश्रित. सरभसमाभिगामिकैर्गुणै' सहजशक्तिशिक्षाविशेषविस्मापिताखिलधनुर्धरः प्रथमनरपतिसमतिसृष्टानामनुपालयिता धर्मादायादानामपाकर्ता प्रजोपघातकारिणामुपप्लवाना दर्शयिता श्रीसरस्वत्योरेकाधिवासस्य सहताराातिपक्षलक्ष्मीपरिभोगदक्षविक्रमो विक्रमोपसप्राप्तविमलपार्थिवश्री. परममाहेश्वर श्रीधरसेनस्तस्य सुतस्तत्पादानुध्यात. सकलजगदानन्दनात्यद्भुतगुणसमुदयस्थगितसमग्रदिङ्मण्डल. समरशतविजयशोभासनाथमण्डलाग्रद्युतिभासुरतरान् सपीठो व्यूढगुरुमनोरथमहाभारः सर्वविद्यापरापरविभागाधिगम-

---

१. इद दानपत्रमेकस्माद्वैश्यवरादुपलब्धमिति G. Buhler महाशयर्वरा

विमलमतिरपि सर्वत सुभाषितलवेनापि सुखोपपादनीयपरितोष· समग्र-लोकागाधगाम्भीर्यहृदयोऽपि सुचरितातिशयसुव्यक्तपरमकल्याणस्वभाव खिलीभूतकृतयुगनृपतिपथविशोधनाधिगतोदग्रकीर्तिर्धर्मानुरोधोज्ज्वलतरीकृतार्थसुखसपदुपसेवानिरूढधर्मादित्यद्वितीयनामा परममाहेश्वर· श्रीशीलादित्यस्तस्यानुजस्तत्पादानुध्यात स्वयमुपेन्द्रगुरुणेव गुरुणात्यादरवता समभिलषणीयामपि राजलक्ष्मीं स्कन्धासक्ता परमभद्र इव धुर्यस्तदाज्ञासपादनैकरसतयेवोद्वहन् खेदसुखरतिभ्यामनायासितसत्त्वसपत्ति· प्रभावसपद्वशीकृतनृपतिशतसहस्रोपजीव्यमानसपद्रूपलोभादिवाश्रित सरभसमाभिगामिकैर्गुणै· सहजशक्तिशिक्षाविशेषविस्मापिताखिलधनुर्धर· प्रथमनरपतिसमतिसृष्टानामनुपालयिता धर्मदायानामपाकर्ता प्रजोपघातकारिणामुपप्लवाना दर्शयिता श्रीसरस्वत्योरेकाधिवासस्य सहतारातिपक्षलक्ष्मीपरिभोगदक्षविक्रमो विक्रमोपसप्राप्तविमलपार्थिवश्री परममाहेश्वर श्रीखरग्रहस्तस्य तनयस्तत्पादानुध्यात सकलविद्याधिगमविहितनिखिलद्विजजनमन परितोषातिशय सत्त्वसंपदात्यागौदार्येण च विगतानुसंधानसमाहितारातिपक्षमनोरथाक्षभङ्ग सम्यगुपलक्षितानेकशास्त्रकलालोकचरितगह्वरविभागोऽपि परमभद्रप्रकृतिरकृत्रिमप्रश्रयविनयशोभाविभूषण· समरशतजयपताकाहरणप्रत्यग्रोदग्रबाहुदण्डविध्वसितनिखिलप्रतिपक्षदर्पोदय· स्वधनु·प्रभावपरिभूतास्त्रकौशलाभिमानसकलनृपतिमण्डलाभिनन्दितशासन परममाहेश्वर श्रीधरसेनस्तस्यानुजस्तत्पादानुध्यात· सच्चरितातिशयितसकलपूर्वनरपतिप्रतिदु·साधानामपप्रसाधयिता विषयाणा मूर्तिमानिव पुरुषकार परिवृद्धगुणानुरागनिर्भरचित्तवृत्तिभिर्मनुरिव स्वयमभ्युपपन्न· प्रकृतिभिरधिगतकलाकलापः कान्तिमान् निर्वृतिहेतुरकलङ्ककुमुदनाथः प्राज्यप्रतापास्थगितदिगन्तरालप्रध्वसितध्वान्तराशि सततोदितसविता प्रकृतिभ्य· पर प्रत्ययमर्थवन्तमति बहुतिथिप्रयोजनानुबन्धमागमपरिपूर्णं विदधान· सधिविग्रहसमासनिश्चयनिपुणः स्थानेऽनुरूपमादेश ददद्गुणवृद्धिविधानजनितसंस्कारः साधूना राज्यशा[1]लातुरीयतन्त्रयोरुभयोरपि निष्णात· प्रकृष्टविक्र-

१ शालातुरीय पाणिनि

मोऽपि करुणामृदुहृदय श्रुतवानप्यगर्वित कान्तोऽपि प्रशमी स्थिरसौहृदयोऽपि निरसिता दोषवतामुदयसमयसमुपजनितजनतानुरागपरिपिहितभुवनसमर्थितप्रथित**बालादित्य**द्वितीयनामा परममाहेश्वर **श्रीध्रुवसेन**स्तस्य सुतस्तत्पादकमलप्रणामधरणिकषणजनितकिणलाञ्छनघनललाटचन्द्रशकलः शिशुभाव एव श्रवणनिहितमौक्तिकालंकारविभ्रमामलश्रुतविशेषः प्रदानसलिलक्षालिताग्रहस्तारविन्द' कन्याया इव मृदुकरग्रहणादमन्दीकृतानन्दविधिर्वसुधराया कार्मुकधनुर्वेद इव सभाविताशेषलक्ष्यकलापः प्रणतसामन्तमण्डलोत्तमाङ्गधृतचूडारत्नायमानशासन परममाहेश्वर परमभट्टारकमहाराजाधिराजपरमेश्वरचक्रवर्तिश्री**धरसेन** कुशली सर्वानेव समाज्ञापयति—अस्तु व. सविदितम्—यथा मया मातापित्रोः पुण्याप्यायनाया**नर्तपुर**विनिर्गत**कासरग्राम**निवासस्या**नर्तपुर**चातुर्विद्यसामान्यसर्कराक्षिसगोत्रबह्वृचसब्रह्मचारिब्राह्मण**केशव**मित्रपुत्रब्राह्मण**नारायणा**मित्राय खेटकाहारे सिंहपल्लिकापथके **देसुरक्षितिज**ग्रामः सोद्रङ्ग सोपरिकङ्कसभूतवातप्रत्याय. सधान्यहिरण्यादेयः सदशापराधः सोत्पद्यमानविष्टिक. सर्वराजकीयानामहस्तप्रक्षेपणीय पूर्वप्रत्तदेवब्रह्मदेयब्राह्मणविंशतिरहित भूमिच्छिद्रन्यायेनाचन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीन' पुत्रपौत्रान्वयभोग्य., उदकातिसर्गेण धर्मदायो निसृष्टः, यतोऽस्योचितया ब्रह्मदेयाग्रहारस्थित्या भुञ्जतः कृषतः कर्षयत. प्रदिशतो वा न कैश्चिद्व्यासेधे वर्तितव्यमागामिभद्रनृपतिभिरप्यस्मद्वंशजैरन्यैर्वा, अनित्यान्यैश्वर्याण्यस्थिर मानुष्य सामान्य च भूमिदानफलमवगच्छद्भिरयमस्मद्दायोऽनुमन्तव्य परिपालयितव्यश्चेति । उक्त च—

बहुभिर्वसुधा भुक्ता राजभि सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दारिद्र्यभयान्नरेन्द्रैर्धनानि धर्मायतनीकृतानि ।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधु. पुनराददीत ॥
षष्टिवर्षसहस्राणि स्वर्गे तिष्ठति भूमिद ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥

दूतकोऽत्र राजदुहितृभूपा(?) । लिखितमिद सधिविग्रहाधिकृतदिविरपति-चन्द्रभट्टिपुत्रदिविरपतिश्रीस्कन्दभट्टेनेति । स० ३३० मार्गशिर शु० ३ । स्वहस्तो मम ॥

(इण्डियन् आण्टिक्वेरी—७ । ७३-७५)

---

(१६७)

वलभीप्रभोः श्रीखरग्रहमहाराजानां दानपत्रम्[1] ।

(A D 656)

ॐ स्वस्ति विजयस्कन्धावारात् पूलेण्डकवासकात् प्रसभप्रणतामित्राणा मैत्रकाणामतुलबलसपन्नमण्डिलाभोगससक्तप्रहारशतलब्धप्रतापात् प्रतापोपनतदानमानार्जवोपार्जितानुरागादनुरक्तमौलभृतश्रेणीदलावाप्तराज्यश्रिय परममाहेश्वरश्रीभट्टार्कादव्यवच्छिन्नराजवशत(?)मातापितृचरणारविन्दप्रणतिप्रविधौताशेषकल्मष शैशवात्प्रभृति खड्गद्वितीयबाहुरेव समदपरगजघटास्फोटनप्रकाशितसत्त्वनिकषस्तत्प्रभावप्रणतारातिचूडारत्नप्रभाससक्तपादनखरश्मिसहति सकलस्मृतिप्रणीतमार्गसम्यक्परिपालनप्रजाहृदयरञ्जनान्वर्थराजशब्दो रूपकान्तिस्थैर्यगाम्भीर्यबुद्धिसपद्भि' स्मरशशाङ्काद्रिराजोदधित्रिदशगुरुधनेशानतिशयान शरणागताभयप्रदानपरतया तृणवदपास्ताशेषस्वकार्यफलप्रार्थनाधिकार्थप्रदानानन्दितविद्वत्सुहृत्प्रणयिहृदय पादचारीव सकलभुवनमण्डलाभोगप्रमोद परममाहेश्वर श्रीगुहसेनस्तस्य सुतस्तत्पादनखमयूखसतानविसृतजाह्ववीजलौघप्रक्षालिताशेषकल्मष. प्रणयिशतसहस्रोपजीव्यमानसपद्रूपलोभादिवाश्रितसरभसमाभिगामिकैर्गुणै. सहजशक्तिशिक्षाविशेषविस्मापिताखिलधनुर्धर प्रथमनरपतिसमतिसृष्टानामनुपालयिता धर्मादायानामपाकर्ता प्रजोपघातकारिणामुपप्लवाना दर्शयिता श्रीसरस्वत्योरेकाधिवासस्य सहतारातिपक्षलक्ष्मीपरिभोगदक्षविक्रमो विक्रमोपसप्राप्तविमलपार्थिव श्रीपरममाहेश्वर' श्रीधरसेनस्तस्य सुतस्तत्पादानु-

---

१ इद दानपत्रमेकस्माद्वैश्यवरात्सप्राप्तमिति G Buhler विद्वद्वतसवरा

ध्यातसकलजगदानन्दनात्यद्भुतगुणसमुदयस्थगितसमग्रदिङ्मण्डलः समर-शतविजयशोभासनाथमण्डलाग्रद्युतिभासुरतरांसपीठो व्यूढगुरुमनोरथमहा-भारः सर्वविद्यापरापरविभागधिगाविमलमतिरपि सर्वतः सुभाषितलवेनापि सुखोपपादनीयपरितोषसमग्रलोकागाधगाम्भीर्यहृदयोऽपि सुचरितातिशयसु-व्यक्तपरमकल्याणस्वभावः खिलीभूतकृतकृतयुगनृपतिपथविशोधनाधिगतो-दग्रकीर्तिधर्मानुपरोधोज्ज्वलतरीकृतार्थसुखसंपदुपसेवानिरूढधर्मादित्यद्वि-तीयनामा परममाहेश्वरः श्रीशिलादित्यस्तस्यानुजस्तत्पादानुध्यातः स्वयमु-पेन्द्रगुरुणेव गुरुणात्यादरवता समभिलाषिणीयामपि राजलक्ष्मी स्कन्धसक्ता परमभद्र इव धुर्यस्तदाज्ञासंपादनैकरसतयेवोद्वहन्खेदसुखसंपत्तिभ्यामनाया-सितसत्त्वसंपत्तिप्रभावसंपद्वशीकृतनृपतिशतशिरोरत्नच्छायोपगूढपादपीठो-ऽपरावज्ञाभिमानरसानालिङ्गितमनोवृत्तिप्रणतिमेका परित्यज्य प्रख्यातपौरुषा-भिमानैरप्यरातिभिरनासादितप्रतिक्रियोपायकृतनिखिलभुवनामोदगुणसंह-तिप्रसभविघटितसकलकलिविलसितगतिर्नीचजनाभिरोहिभिरशेषैर्दोषैरनामृ-ष्टात्युन्नतहृदयः प्रख्यातपौरुषास्त्रकौशलातिशयगणतिथिविपक्षक्षितिपतिल-क्ष्मीस्वयंग्राहप्रकाशितप्रवीरपुरुषप्रथमसंख्याधिगमः परममाहेश्वरः श्रीखर-ग्रहस्तस्य तनयस्तत्पादानुध्यातः सकलविद्याधिगमविहितनिखिलविद्वज्जन-मनःपरितोषातिशयः सत्त्वसंपदा त्यागौदार्येण च विगतानुसंधानाशमा-हितारातिपक्षमनोरथाक्षभङ्गः सम्यगुपलक्षितानेकशास्त्रकलालोकचरितगह्व-रविभागोऽपि परमभद्रप्रकृतिरकृत्रिमप्रश्रयविनयशोभाविभूषणः समरशतज-यपताकाहरणप्रत्यलोदग्रबाहुदण्डविध्वंसितनिखिलप्रतिपक्षदर्पोदयः स्वधनुः-प्रभावपरिभूतास्त्रकौशलाभिमानसकलनृपतिमण्डलाभिनन्दितशासनपरम-माहेश्वरः श्रीधरसेनस्तस्यानुजस्तत्पादानुध्यातसच्चरित्रातिशयितसकलपूर्व-नरपतिरतिदुःसाधानामपि प्रसाधयिता विषयाणां मूर्तिमानिव पुरुषकारः परि-वृद्धगुणानुरागनिर्भरचित्तवृत्तिभिर्मनुरिव स्वयमभ्युपपन्नः प्रकृतिभिरधिगत-कलाकलापः कान्तिमान्निर्वृतिहेतुरकलङ्कः कुमुदनाथः प्राज्यप्रतापस्थगित-दिगन्तरालप्रध्वंसितध्वान्तराशिः सततोदितः सविता प्रकृतिभ्यः परं प्रत्ययमर्थवन्तमतिबहुतिथिप्रयोजनानुबन्धमागमपरिपूर्णं विदधानः संधि-

विग्रहसमासनिश्चयनिपुण स्थानेऽनुरूपमादेश ददद्गुणवृद्धिविधानजनितसंस्कार साधूना राज्यशालातुरीयतन्त्रयोरुभयोर्निष्णात प्रकृष्टविक्रमोऽपि करुणामृदुहृदयः श्रुतवानप्यगर्वितकान्तोऽपि प्रशमी स्थिरसौहृदयोऽपि निरसिता दोषवतामुदयसमयसदुपजनितजनतानुरागपरिपिहितभुवनसमर्थितप्रथितबालादित्यद्वितीयनामा परममाहेश्वरः श्रीध्रुवसेनस्तस्य सुतस्तत्पादकमलप्रणामधरणिकषणजनितकिणलाञ्छनललाटचन्द्रशकल· शिशुभाव एव श्रवणनिहितमौक्तिकालङ्कारविभ्रमामलश्रुतविशेषप्रदानसलिलक्षालिताग्रहस्तारविन्दकन्याया इव मृदुकरग्रहणादमन्दीकृतानन्दविधिर्वसुधराया· कार्मुके धनुर्वेद इव सशोधिताशेषलक्ष्यकलापः प्रणतसामन्तमण्डलोत्तमाङ्गधृतचूडारत्नायमानशासन परममाहेश्वरपरमभट्टारकमहाराजाधिराजपरमेश्वरचक्रवर्तिश्रीधरसेनस्तत्पितामहभ्रातृश्रीशीलादित्यस्य शार्ङ्गपाणेरिवाङ्गजन्मनो भक्तिबन्धुरावयवकल्पितप्रणतेरतिधवलतया दूर तत्पादारविन्दप्रवृत्तया नखमणिरुचा मन्दाकिन्येव नित्यममलितोत्तमाङ्गदेशस्यागस्त्यस्येव राजर्षेर्दाक्षिण्यमातन्वानस्य प्रबलधवलिम्ना यशसा वलयेन मण्डितककुभा नभसि यामिनीपतेर्विनिर्मिताखण्डपरिवेषमण्डलस्य पयोदश्यामशिखरचूचुकरुचिरसह्यविन्ध्य स्तनयुगाया· क्षितेः पत्युः श्रीदेरभटस्याङ्गज क्षितिपसहतेरनुरागिण्या· शुचि(?)यशोंऽशुकभृत स्वयवरमालामिव राज्यलक्ष्मीमर्पयन्त्याः कृतपरिग्रह· शौर्यमप्रतिहति व्यापारमानमितप्रचण्डरिपुमण्डलं मण्डलाग्रमिवावलम्बमान· शरदि प्रसभमाकृष्टशिलीमुखबाणासनापादितप्रसाधनाना परभुवा विधिवदाचरितकरग्रहणः पूर्वमेव विविधवर्णोज्ज्वलेन श्रुतातिशयेनोद्भासितश्रवण· पुन·पुनरुक्तचक्रमेव रत्नालङ्कारेणालङ्कृतश्रोत्र· परस्फुरत्कटकविकटकीटपक्षरत्नकिरणविच्छिन्नप्रदानसलिलनिवहावसेकविलसन्नवशैवशैवलालङ्कारमिवाग्रपाणिमुद्वहन् धृतविशालरत्नवलयजलधिवेलतटायमानभुजपरिष्वक्तविश्वभर· परममाहेश्वर· श्रीध्रुवसेनस्तस्याग्रज परमहीपतिस्पर्शदोषनाशनधियेव लक्ष्म्या स्वयमतिस्पष्टचेष्टमाश्लिष्टाङ्गयष्टिमतिरुचिरतरचरितगरिमपरिकलितसकलनरपतिरतिप्रकृष्टानुरागरसरभसवशीकृतप्रणतसामन्तसमन्तचक्रचूडामणिमयूखख-

चितचरणकमलयुगल प्रोद्दामोदारदोर्दण्डदलितद्विषद्वर्गदर्पः प्रसर्पत्पटीय' प्रतापप्लोषिताशेषशत्रुवश प्रणयिपक्षनिक्षिप्तलक्ष्मीक प्रेरितगदोत्क्षिप्तसुदर्शनचक्र परिहृतबालक्रीडोऽनध'कृतद्विजातिरेकविक्रमप्रसाधितधरित्रीतलोऽनङ्गीकृतजलशय्योऽपूर्वपुरुषोत्तम साक्षाद्धर्म इव सम्यगुपस्थापितवर्णाश्रमाचार परममाहेश्वरश्रीखरग्रह' कुशली सर्वानेव समाज्ञापयति—अस्तु व सविदित यथा—मया मातापित्रो पुण्याप्यायनायानन्दपुरविनिर्गतखेटकवास्तव्यनन्दपुरचातुर्विद्यसामान्यशकराक्षिसगोत्रबह्वृचसब्रह्मचारिब्राह्मणकेशवपुत्रब्राह्मणनारायणाय शिवभागपुरविषये घृतालयभूमौ पङ्कुलपल्लिकाग्राम सोद्रङ्ग' सपरिकर' सभूतवातप्रत्याय सधान्यहिरण्यादेय सदशपराध सोत्पद्यमानविष्टिक' सर्वराजकीयानामहस्तप्रक्षेपणीयः पूर्वप्रत्तदेवब्रह्मदेयब्राह्मणविंशतिरहितभूमिच्छिद्रन्यायेनाचन्द्रार्कार्णवक्षितिसरित्पर्वतसमकालीनः पुत्रपौत्रान्वयभोग्य उदकातिसर्गेण धर्मदायो निसृष्टः। यतोऽस्योचितया ब्रह्मदेयस्थित्या भुञ्जत. कृषत' कर्षयत' प्रदिशतो वा न कैश्चिद्व्यासेधे वर्तितव्यम्। आगामिभद्रनृपतिभिरप्यस्मद्वशजैरन्यैर्वा अनित्यान्यैश्वर्याण्यस्थिर मानुष्य सामान्य च भूमिदानफलमवगच्छद्भिरयमस्मद्दायोऽनुमन्तव्यः परिपालयितव्यश्चेति । उक्त च—

बहुभिर्वसुधा भुक्ता राजभि. सगरादिभि. ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
यानीह दारिद्र्यभयान्नरेन्द्रैर्धनानि धर्मायतनीकृतानि ।
निर्भुक्तमाल्यप्रतिमानि तानि को नाम साधुः पुनराददीत ॥
षष्टिं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिद' ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥

दूतकोऽत्र ममातृश्रीना। लिखितमिद सधिविग्रहाधिकृतदिविरपतिश्रीस्कन्धभटपुत्रदिविरपतिश्रीमदनहिलेनेति । स० ३३७ आषाढ वदी ५। स्वहस्तो मम ॥

(इण्डियन् आण्टिक्केरी—७ ।८७६-७९)

(१६८)

गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैन-मन्दिरस्थः प्रथमः शिलालेखः ।

पायान्नेमिजिन. स यस्य कथितः स्वामीकृतागस्थिता-
वग्रे रूपदिदृक्षया स्थितवते प्रीते सुराणा प्रभौ ।
काये भागवते बने वक　द्विपोलावने शसता-
मिदृशा　मपि　वनाजवे　　　॥

स्वस्ति श्रीविक्रमसवत् १२८८ वर्षे फागुण शुदि १० बुधे श्रीमदणहिलपुरवास्तव्यप्राग्वाटान्वयप्रसूत ठ. श्रीचण्डपालात्मज ठ श्रीचण्डप्रसादाङ्गज ठ श्रीसोमतनुज ठ श्रीआशाराजनन्दनस्य ठ श्रीकुमारदेवीकुक्षिसंभूतस्य ठ श्रीलुणिग महं० श्रीमालदेवयोरनुजस्य मह० श्रीतेजःपालाग्रजन्मनो महामात्यश्रीवस्तुपालस्यात्मजे मह० श्रीललितादेवीकुक्षिसरोवरराजहसायमाने मह० श्रीजयन्तसिंहे सं० ७९ वर्षपूर्वं स्तम्भतीर्थमुद्राव्यापारान्व्यापृण्वति सति स० ७७ वर्षे श्रीशत्रुजयोज्जयन्तप्रभृतिमहातीर्थयात्रोत्सवप्रभाविताविर्भूतश्रीमद्देवाधिदेवप्रसादासादितसघाधिपत्येन चौलुक्यकुलनभस्तलप्रकाशनैकमार्तण्डमहाराजाधिराजंश्रीलवणप्रसाददेवसुतमहाराजश्रीवीरधवलदेवप्रीतिप्रतिपन्नराज्यसर्वैश्वर्येण श्रीशारदाप्रतिपन्नापत्येन महाराजश्रीवस्तुपालेन तथानुजेन सं० ७६ वर्षपूर्वं गुर्जरमण्डले धवलक्कप्रमुखनगरेषु मुद्राव्यापारान्व्यापृण्वता मह० श्रीतेजःपालेन च श्रीशत्रुंजयार्बुदाचलप्रभृतिमहातीर्थेषु श्रीमदणहिलपुरभृगुपुरस्तम्भनकपुरस्तम्भतीर्थदर्भवतीधवलक्कप्रमुखनगरेषु तथान्यसमस्तस्थानेष्वपि कोटिशोऽभिनवधर्मस्थानानि प्रभूतजीर्णोद्धाराश्च कारिता. । तथा सचीवेश्वरश्रीवस्तुपालेन इह स्वय निर्मापितश्रीशत्रुंजयमहातीर्थावतार श्रीमदादितीर्थकरश्रीऋषभदेवस्तम्भनकपुरावतार श्रीपार्श्वनाथदेवसत्यपुरावतार श्रीमहावीरदेवप्रशस्तिसहितकश्मीरावतार श्रीसरस्वतिमूर्तिदेवकुलिकाचतुष्टयजिनयुगलाम्बावलोक-

नाशाम्बप्रद्युम्नशिखरेषु श्रीनेमिनाथदेवालंकृतदेवकुलिकाचतुष्टयतुरगा-धिरूढस्वपितामह ठ श्रीसोमनिजपितृ ठ श्रीआशाराजमूर्तिद्वितय-चारुतोरणत्रयश्रीनेमिनाथदेव आत्मीयपूर्वजाग्रजानुजपुत्रादिमूर्तिसमन्वि-तसुखोद्घाटनकस्तम्भश्रीअष्टापदमहातीर्थप्रभृति अनेककीर्तनपरम्पराविरा-जिते श्रीनेमिनाथदेवाधिदेवविभूषितश्रीमदुज्जयन्तमहातीर्थे आत्मनस्तथा स्वसधर्मचारिण्या. प्राग्वाटजातीय ठ श्रीकान्हडपुत्र्या ठ राणुकुक्षिसं-भूताया मह० श्रीललितादेव्याः पुण्याभिवृद्धये श्रीनागेन्द्रगच्छे भट्टारक-श्रीमहेन्द्रसूरिसताने शिष्यश्रीशान्तिसूरिशिष्यश्रीआणन्दसूरिश्रीअमर-सूरिपदे भट्टारकश्रीहरिभद्रसूरिपट्टालकरणप्रभुश्रीविजयसेनसूरिप्रतिष्ठित श्रीअजितनाथदेवादिविंशतितीर्थकरालंकृतोऽयमभिनवः समण्डपः श्रीसमे-द्रमहातीर्थावतारप्रासादः कारित' ।

पीयूषपूरस्य च वस्तुपालमन्त्रीशितुश्चायमियान्विभेदः ।
एकः पुनर्जीवयति प्रमीत प्रमीयमाण तु भुवि द्वितीयः ॥

श्रीदश्रीदयितेश्वरप्रभृतयः सन्तु क्वचित्तेऽपि ये
प्रीणन्ति प्रभविष्णवोऽपि विभवैर्नाकिंचन कचन ।
सोऽय सिञ्चति काञ्चनैः प्रतिदिन दारिद्र्यदावानल-
प्रम्लाना पृथिवीं नवीनजलदः श्रीवस्तुपालः पुनः ॥

भ्रात. पातकिना किमत्र कथया दुर्मन्त्रिणामेतया
येषा चेतसि नास्ति किंचिदपर लोकोपकार विना ।
नन्वस्यैव गुणान्गृणीहि गणशः श्रीवस्तुपालस्य य-
स्तद्विश्वोपकृतिव्रत चरति यत्कर्णेन चीर्ण पुरा ॥

भित्त्वा भानु भोजराजे प्रयाते श्रीमुञ्जेऽपि स्वर्गसाम्राज्यभाजि ।
एक. सप्रत्यर्थिना वस्तुपालस्तिष्ठत्यश्रुस्यन्दनिष्कन्दनाय ॥

चौलुक्यक्षितिपालमौलिसचिवत्वत्कीर्तिकोलाहल-
त्रैलोक्येऽपि विलोक्यमानपुलकानन्दाश्रुभिः श्रूयते ।
किं चैषा कलिदूषितापि भवता प्रासादवापीप्रपा-
कूपारामसरोवरप्रभृतिभिर्धात्री पवित्रीकृता ॥

स श्रीतेजःपालः सचिवश्चिरकालमस्तु तेजस्वी ।
येन वय निश्चिन्ता चिन्तामणिनेव नन्दाम ॥
लवणप्रसादपुत्रश्रीकरणे लवणसिंहजनकोऽसौ ।
मन्त्रित्वमत्र कुरुता कल्पशत तरुकल्प ॥
पुरापातेन दैत्यारेर्भुवनोपरिवर्तिना ।
अधुना वस्तुपालस्य हस्तेनाध. कृतो बलि ॥
दयिता ललिता देवी तनयमवीतनयमाप सचिवेन्द्रात् ।
नाम्ना जयन्तसिंहं जयन्तमिन्द्रात्पुलोमपुत्रीव ॥
एते श्रीगुर्जरेश्वरपुरोहित ठ. श्रीसोमेश्वरदेवस्य ।
स्तम्भतीर्थेऽत्र कायस्थवंशे वाजडनन्दन' ।
प्रशस्तिमेतामलिखज्जैत्रसिंहभुवः सुधी ॥
वाड·····स्य तनूजेन सूत्रधारेण धीमता ।
एषा कुमारसिंहेन समुत्कीर्णा प्रयत्नत. ॥
श्रीनेमेस्त्रिजगद्भर्तुरम्बायाश्च प्रसादतः ।
वस्तुपालान्वयस्यास्तु प्रशस्ति' स्वस्तिशालिनी ॥

(गिरनार इन्स्क्रिप्शन्स् न० २ । २१–२३)

---

(१६९)

गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैन-मन्दिरस्थो द्वितीयः शिलालेखः ।

·　　य पु　तयदुकूलक्षीरार्णवेन्दुर्जिनो
यत्पादाब्जपवित्रमौलिरसभश्रीरुज्जयन्तोऽप्ययम् ।
धत्ते मूर्ध्नि निजप्रभुप्रसृमरोद्दामप्रभामण्डलो
विश्वक्षोणिभृदाधिपत्यपदवीं नीलातपत्रोज्वलाम् ॥
स्वस्ति श्रीविक्रमसवत् १२८८ वर्षे फागुण शुदि १० बुधे श्रीमदणहिलपुर-वास्तव्यप्राग्वाटान्वयप्रसूत ठ श्रीचण्डपालात्मज ठ. श्रीचण्डप्रसादाङ्गज

ठ श्रीसोमतनुज ठ श्रीआशाराजनन्दनस्य ठ श्रीकुमरादेवीकुक्षिसंभूतस्य ठ श्रीलुणिग मह० ठ श्रीमालदेवयोरनुजस्य महं० ठ. श्रीतेजःपालाग्रजन्मनो महामात्यश्रीवस्तुपालस्यात्मजे मह० ठ श्रीललितादेवीकुक्षिसरोवरराजहंसायमाने मह० श्रीजयन्तसिंहे स० ७९ वर्षपूर्वं मुद्राव्यापार व्यापृण्वति सति स० ७७ वर्षे श्रीशत्रुंजयोज्जयन्तप्रभृतिमहातीर्थयात्रोत्सवप्रभाविताविर्भूतश्रीमद्देवाधिदेवप्रसादासादितसंघाधिपत्येन चौलुक्यकुलनभस्तलप्रकाशनैकमार्तण्डमहाराजाधिराजश्रीलवणप्रसाददेवसुतमहाराजश्रीवीरधवलदेवप्रीतिप्रतिपन्नराज्यसर्वैश्वर्येण श्रीशारदाप्रतिपन्नापत्येन महामात्यश्रीवस्तुपालेन तथानुजेन स० ७६ वर्षपूर्वं गुर्जरमण्डले धवलक्कप्रमुखनगरेषु मुद्राव्यापारान्व्यापृण्वता मह० श्रीतेजःपालेन च श्रीशत्रुंजयार्बुदाचलप्रभृतिमहातीर्थेषु श्रीमदणहिलपुरभृगुपुरस्तम्भनकपुरस्तम्भतीर्थदर्भवतीधवलक्कप्रमुखनगरेषु तथान्यसमस्तस्थानेष्वपि कोटिशोऽभिनवधर्मस्थानानि प्रभूतजीर्णोद्धाराश्च कारिता । तथा सचिवेश्वरश्रीवस्तुपालेनेह स्वयं निर्मापितश्रीशत्रुंजयमहातीर्थावतारश्रीमदादितीर्थंकरश्रीऋषभदेवस्तम्भनकपुरावतार श्रीपार्श्वनाथदेवसत्यपुरावतार श्रीमहावीरदेवप्रशस्तिसहितकश्मीरावतार श्रीसरस्वतीमूर्तिदेवकुलिकाचतुष्टयजिनद्वयाम्बावलोकनाशाम्बप्रद्युम्नशिखरेषु श्रीनेमिनाथदेवालङ्कृतदेवकुलिकाचतुष्टयतुरगाधिरूढनिजपितामह ठ श्रीसोमनिजपितृ ठ श्रीआशाराजमूर्तिद्वितयचारुतोरणत्रयश्रीनेमिनाथदेव आत्मीयपूर्वजाग्रजानुजपुत्रादिमूर्तिसमन्वितसुखोद्घाटनकस्तम्भश्रीअष्टापदमहातीर्थप्रभृति अनेककीर्तनपरम्पराविराजिते श्रीनेमिनाथदेवाधिदेवविभूषितश्रीमदुज्जयन्तमहातीर्थे आत्मनस्तथा स्वभार्यायाः प्राग्वाटज्ञातीय ठ श्रीकान्हडपुत्र्याः ठ. राणुकुक्षिसंभूताया मह० श्रीसोखुकाया. पुण्याभिवृद्धये श्रीनागेन्द्रगच्छे भट्टारकश्रीमहेन्द्रसूरिसताने शिष्यश्रीशान्तिसूरिशिष्यश्रीआणन्दसूरिश्रीअमरसूरिपदे भट्टारकश्रीहरिभद्रसूरिपट्टालंकरण श्रीविजयसेनसूरिप्रतिष्ठित श्रीऋषभदेवप्रमुखचतुर्विंशतितीर्थकरालङ्कृतोऽयमभिनव. समण्डपः श्रीसंमेत(द)महातीर्थावतारप्रधानप्रासाद. कारितः ।

चेतः किं कलिकालसालसमहो किं मोहनो हस्यते
तृष्णे कृष्णमुखासि किं कथय कि विघ्नौघमोघो भवान्।
ब्रूमः किंतु सखे न खेलति किमप्यस्माकमुज्जृम्भित
सैन्य यत्किल वस्तुपालकृतिना धर्मस्य सवर्धितम्॥
य विधु वन्धवसिद्धमर्थिनः शत्र ॰॰ ।
॰॰॰ण पश्यन्ति वर्ण्यता किमय मया॥
वैर विभूतिभारत्योः प्रभुत्वप्रणिपातयोः।
तेजस्विताप्रशमयो. शमित येन मन्त्रिणा॥
दीपः स्फूर्जति सज्जकज्जलमलस्नेह मुहु॰ सहर-
न्निन्दुर्मण्डलवृत्तखण्डनपरः प्रद्वेष्टि मित्रोदयम्।
शूर. क्रूरतरः परस्य सहते तेजो न तेजस्विन-
स्तत्केन मतिम ब्रवीमि सचिव श्रीवस्तुपालाभिधम्॥
आयाताः कति नैव यान्ति कति नो यास्यन्ति नो वा कति
स्थाने स्थाननिवासिनो भवपथे पान्थीभवन्तो जनाः।
अस्मिन्विस्मयनीयबुद्धिजलधिर्विध्वस्य दस्यूत्करे
कुर्वन्पुण्यनिधिं धिनोति वसुधा श्रीवस्तुपालः परम्॥
दभ्रेऽस्य वीरधवलक्षितिपस्य राज्यभारे धुरंधरधुरा ॰॰ ॰॰॰॰॰॰॰।
श्रीतेजःपालसचिवे दधति स्वबन्धुभारोद्धृतावविधुरैकधुरीणभावम्॥
इह तेजपालसचिवो विमलितविमलाचलेन्द्रममृतभृतम्।
कृत्वानुपमसरोवरममरगणं प्रीणयाचक्रे॥

कृते श्रीमलधारिश्रीनरचन्द्रसुरीणाम्।

इह वालिगसुतसहजिगपुत्रातकतनुजवाजडतनूजः।
अलिखदिमा कायस्थस्तम्भपुरीयध्रुवो जयन्तसिंहः॥
हरिमण्डपनन्दीश्वरशिल्पीश्वरसोमदेवपौत्रेण।
बकुलस्वामिसुतेनोत्कीर्णा पुरुषोत्तमेनेयम्॥

वस्तुपालस्य प्रशस्तिरियं ६०३ महामात्यवस्तुपालभार्यामहम्(?) श्रीसोखुकाया धर्मस्थानमिदम् ।

(गिरनार इन्स्क्रिप्शन्स् न० २ । २३-२४)

---

(१७०)

गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैनमन्दिरस्थस्तृतीयः शिलालेखः ।

प्रणमदमरप्रेङ्खन्मौलिस्फुरन्मणिधोरणी
तरुणकिरणश्रेणीशोणीकृताखिलविग्रहः ।
सुरपतिकरोन्मुक्तै स्वा(?)त्रोदकैर्घुसृणारुण-
प्लुततनुरिवापायात्पायाज्जगन्ति शिवाङ्गजः ॥

स्वस्ति श्रीविक्रमसंवत् १२८८ वर्षे फागुण शुदि १० बुधे श्रीमदणहिलपुरवास्तव्यप्राग्वाटान्वयप्रसूत ठ श्रीचण्डपालात्मज ठ श्रीचण्डप्रसादाङ्गज ठ. श्रीसोमतनुज ठ. श्रीआशाराजनन्दनस्य ठ. श्रीकुमारदेवीकुक्षिसंभूतस्य ठ श्रीलुणिग मह० श्रीमालदेवयोरनुजस्य मह० श्रीतेजःपालाग्रजन्मनो महामात्यश्रीवस्तुपालस्यात्मजे मह० श्रीललितदेवीकुक्षिसरोवरराजहंसायमाने मह० श्रीजयन्तसिंहे स० ७९ वर्षपूर्वं स्तम्भनकतीर्थमुद्राव्यापार व्यापृण्वति सति स० ७७ वर्षे श्रीशत्रुंजयोज्जयन्तप्रभृति महातीर्थयात्रोत्सवप्रभाविताविर्भूतश्रीमद्देवाधिदेवप्रसादासादितसंघाधिपत्येन चौलुक्यकुलनभस्तलप्रकाशनैकमार्तण्डमहाराजाधिराजश्रीलवणप्रसाददेवसुतमहाराजश्रीवीरधवलदेवप्रीतिप्रतिपन्नराज्यसर्वैश्वर्येण श्रीशारदाप्रतिपन्नापत्येन महामात्यश्रीवस्तुपालेन तथानुजेन सं० ७६ वर्षपूर्वं गुर्जरमण्डले धवलक्कप्रमुखनगरेषु मुद्राव्यापारान्व्यापृण्वता मह० श्रीतेजःपालेन च शत्रुंजयार्बुदाचलप्रभृतिमहातीर्थेषु श्रीमदणहिलपुरभृगुपुरस्तम्भनकपुरस्तम्भतीर्थदर्भवतीधवलक्कप्रमुखनगरेषु तथान्यसमस्तस्थानेष्वपि कोटिशोऽभिनवधर्मस्थानानि प्रभूतजीर्णोद्धाराश्च कारिताः । तश्च सचिवेश्वर-

श्रीवस्तुपालेनेह स्वय निर्मापितश्रीशत्रुंजयमहातीर्थावतारश्रीमदादितीर्थकरश्रीऋषभदेवस्तम्भनकपुरावतारश्रीपार्श्वनाथदेवश्रीसत्यपुरावतार श्रीमहावीरदेवप्रशस्तिसहितकाश्मीरावतार श्रीसरस्वतीमूर्तिदेवकुलिकाचतुष्टयजिनयुगलाम्बावलोकनाशाम्बप्रद्युम्नशिखरेषु श्रीनेमिनाथदेवालकृतदेवकुलिकाचतुष्टयतुरगाधिरूढनिजपितामह ठ श्रीसोमस्वपितृ ठ श्रीआशाराजमूर्तिद्वितयकुजराधिरूढमहामात्यश्रीवस्तुपालानुज मह० श्रीतेजःपालमूर्तिद्वयचारुतोरणत्रयश्रीनेमिनाथदेव आत्मीयपूर्वजाग्रजानुजपुत्रादिमूर्तिसमन्वितसुखोद्घाटनकस्तम्भश्रीसमेत(द)महातीर्थप्रभृति अनेकतीर्थपरम्पराविराजिते श्रीनेमिनाथदेवाधिदेवविभूषितश्रीमदुज्जयन्तमहातीर्थे आत्मनस्तथा स्वभार्यायाश्च प्राग्वाटजातीय ठ श्रीकान्हडपुत्र्या ठ राणुकुक्षिसभूताया मह० श्रीसोखुकाया पुण्याभिवृद्धये श्रीनागेन्द्रगच्छे भट्टारकश्रीमहेन्द्रसूरिसताने शिष्यश्रीशान्तिसूरिशिष्यश्रीआणन्दसूरिश्रीअमरसूरिपदे भट्टारकश्रीहरिभद्रसूरिपट्टालकरण प्रभुश्रीविजयसेनसूरिप्रतिष्ठित ऋषभदेवालकृतोऽयमभिनवः समण्डपः श्रीअष्टापदमहातीर्थावतारनिरुपमप्रधानप्रासाद कारित ।

प्रासादैर्गगनाङ्गणप्रणयिभिः पातालमूलंकषैः
कासारैश्च सितै' सिताम्बरगृहैर्नीलैश्च लीलावनैः ।
येनेय नयनिर्जितेन्द्रसचिवेनालकृताल क्षिति
क्षेमैकायतना चिरायुरुदयी श्रीवस्तुपालोऽस्तु स' ॥

सदिष्ट तव वस्तुपालवलिना विश्वत्रयी यात्रिका-
न्मत्वा नारदतश्चरित्रमिति ते हृष्टोऽस्मि नन्द्याश्चिरम् ।
नार्थिभ्य' क्रुधमर्थित. प्रथयसि स्वल्प न दत्से न च
स्वश्लाघा बहु मन्यसे किमपर न श्रीमदान्मुह्यति ॥

अखिलविदलनश्रीवीरनामायमुर्व्यां
सरपतिरवतीर्णस्तर्कयामास्तदस्य ।
निवसति सुरशाखी वस्तुपालाभिधानः
सुरगुरुरपि तेजःपालसज्ञः समीपे ॥

उदारः शूरो वा रुचिरवचनो वास्ति न हि वा
भवत्तुल्यः कोऽपि क्वचिदिति चुलुक्येन्द्रसचिव।
समुद्भूतभ्रान्तिर्नियतमवगन्तु तव यश-
स्ततिर्गेहे गेहे पुरि पुरि च याता दिशि दिशि॥

सा कुत्रापि युगत्रयी बत गता सृष्टा च सृष्टिः सतां
सीदत्साधुरसचरत्सुचरितः खेलत्खलोऽभूत्कलिः।
तद्विश्वार्तिनिवर्तनैकमनसा प्रत्तोऽधुना शम्भुना
प्रस्तावस्तव वस्तुपाल भवते यद्रोचते तत्कुरु॥

के निधाय वसुधातले वन वस्तुपाल न यमालय गताः।
त्व तु नन्दसि निवेशयन्निदं दिक्षु धावति जने क्षुधावति॥

पौत्रेण धारय वराहपते धरित्री
सूर्य प्रकाशय सदा जलदाभिषिञ्च।
विश्राणितेन परिपालय वस्तुपाल
भार भवत्सु यदिम निदधे विधाता॥

आत्मा त्व जगत' सदागतिरियं कीर्तिर्मुखं पुष्कर
मैत्री मन्त्रिवर स्थिरा घनरसः श्लोकस्तमोघ्न. शमः।
नोक्त. केन करस्तवामृतकरः कायश्च भास्वानिति
स्पष्ट धूर्जटिमूर्तयः कृतपदा श्रीवस्तुपाल त्वयि॥

विद्या यद्यपि वैदिकी न लभते सौभाग्यमेषा क्वचि-
न्न स्वार्थे कुरुते च कश्चन वचः कर्णद्वये यद्यपि।
राजानः कृपणाश्च यद्यपि गृहे यद्यप्यय च व्यय-
श्चिन्ता कापि तथापि तिष्ठति न मे श्रीवस्तुपाले सति॥

कर्णे खलप्रलपितं न करोषि रोष
नाविष्करोषि न करोष्यपदे च लोभम्।
तेनोपरि त्वमकलेऽपि वर्तमानः
श्रीवस्तुपाल कलिकालमधःकरोषि॥

सर्वत्र भ्रान्तिमती सर्वविदस्त्वद्भवत्कथ कीर्ति' ।
श्रीवस्तुपालपितृकमनुहर्त्ते सम्प्रति प्राय ॥
सोऽपि बलेरवलेप' स्वल्पतरोऽभूत्तथैव कल्पतरो ।
श्रीवस्तुपालसचिवे सिञ्चति दानामृतैर्जगतीम् ॥
नियोगिनागेषु नरेश्वराणा भद्रस्वभाव' खलु वस्तुपालः ।
उद्दामदामप्रसरस्य यस्य विभाव्यते क्वापि न मत्तभाव ॥
विबुधै. पयोधिमध्यादेको बहुत. करी दुरुपलब्ध ।
बहवस्तु वस्तुपालप्राप्ता विबुध त्वयैकेन ॥
प्रथम धनप्रवाहैर्वनरथनाथात्मज सचिव ।
अधुना तु सुकृतसिन्धुर 'वृन्दै प्रमोदयति ॥
श्रीवस्तुपाल भवता जलधेर्गम्भीरता किलाकलिता ।
आनीय ततो गजता श्वपतिद्वारे यदाकलिता ॥
एते श्रीमद्गुर्जरेश्वरपुरोहित ठ श्रीसोमेश्वरदेवस्य ।
इह वालिगसुतसहजिगपुत्रानकतनुजवाजडतनूज' ।
अलिखदिम कायस्थः स्तम्भपुरीयो ध्रुवो जयतसिंहः ॥
हरिमण्डपनन्दीश्वर शिल्पीश्वर सोमदेवपौत्रेण ।
बकुलस्वामिसुतेनोत्कीर्णा पुरुषोत्तमेनेयम् ॥
महामात्यश्रीवस्तुपालस्य प्रशस्तिरियं निष्पन्ना ६०३ ।
श्रीनेमेस्त्रिजगद्भर्त्तुरम्बायाश्च प्रसादत. ।
वस्तुपालान्वयस्यास्तु प्रशस्ति स्वस्तिशालिनी ॥
महामात्यवस्तुपालभार्या मह० श्रीसोखुकाया धर्मस्थानमिदम् ॥

(गिरनार इन्स्क्रिप्शन्स् न० २ । २४-२५)

(१७१)

गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैनमन्दिरस्थश्चतुर्थः शिलालेखः।

तीर्थेशा प्रणतेन्द्रसंहतिशिर.कोटीरकोटिस्फुट-
त्तेजोजालजलप्रवाहलहरीप्रक्षालिताङ्घ्रिद्वय.।
ते व केवलमूर्तयो धवलितारिष्टा विशिष्टाममी
तामष्टापदशैलमौलिमणयो विश्राणयन्तु श्रियम् ॥

स्वस्ति श्रीविक्रमसवत् १२८८ वर्षे फागुण सुदि १० बुधे श्रीमदणहिलपुरवास्तव्यप्राग्वाटान्वयप्रसूत ठ श्रीचण्डपालात्मजश्रीचण्डप्रसादाङ्गज ठ श्रीसोमतनुज ठ श्रीआशाराजनन्दनस्य ठ श्रीकुमारदेवीकुक्षिसभूतस्य ठ श्रीलुणिग मह० श्रीमालदेवयोरनुजस्य महं० श्रीतेजःपालाग्रजन्मनो महामात्यश्रीवस्तुपालस्यात्मजे मह० श्रीललितादेवीकुक्षिसरोवरराजहसायमाने मह० श्रीजयन्तसिंहे स० ७ वर्षे पूर्वं स्तम्भतीर्थवेलाकुलमुद्राव्यापार व्यापृण्वति सति स० ७७ श्रीशत्रुंजयोज्जयन्तप्रभृतिमहातीर्थयात्रोत्सवप्रभावाविर्भूतश्रीमद्देवाधिदेवप्रसादासादितसंघाधिपत्येन चौलुक्यकुलनभस्तलप्रकाशनैकमार्तण्डमहाराजाधिराजश्रीलवणप्रसाददेवसुतमहाराजश्रीवीरधवलदेवप्रीतिप्रतिपन्नराज्यसर्वैश्वर्येण श्रीशारदाप्रतिपन्नापत्येन महामात्यश्रीवस्तुपालेन तथानुजेन स० ७६ वर्षे पूर्वं गुर्जरमण्डले धवलक्कप्रमुखनगरेषु मुद्राव्यापार व्यापृण्वता मह० श्रीतेजःपालेन च श्रीशत्रुजयार्बुदाचलमहातीर्थेषु श्रीमदणहिलपुरभृगुपुरस्तम्भनकपुरस्तम्भतीर्थदर्भवतीधवलक्कप्रमुखनगरेषु तथान्यसमस्तस्थानेष्वपि कोटिशो धर्मस्थानानि प्रभूतजीर्णोद्धाराश्च कारिताः। तथा सचिवेश्वरश्रीवस्तुपालेनेह स्वय निर्मापितशत्रुजयमहातीर्थावतारश्रीमदादितीर्थकरश्रीऋषभदेवस्थ(स्त)म्भनकपुरावतारश्रीपार्श्वनाथदेवसत्यपुरावतारश्रीमहावीरदेवप्रशस्तिसहितकश्मीरावतारश्रीसरस्वती-

देवकुलिकाचतुष्टययुगलाम्बावलोकनशाम्बप्रद्युम्नशिखरेषु श्रीनेमिनाथकुलालङ्कृतदेवकुलिकाचतुष्टयतुरगाधिरूढनिजपितामह ठ श्रीसोमपितृ ठ. श्रीआशाराजमूर्त्तिद्वितयतोरणत्रयश्रीनेमिनाथदेव आत्मीयपूर्वजाग्रजानुजपुत्रादिमूर्त्तिसमन्वितसुखोद्घाटनकस्तम्भश्रीसमेतावतारमहातीर्थप्रभृति अनेककीर्त्तनपरम्पराविराजिते श्रीनेमिनाथदेवाधिदेवविभूषितश्रीमदुज्जयन्तमहातीर्थे आत्मनस्तथा स्वभार्याया प्राग्वाटजातीय ठ कान्हडपुत्र्या. ठ राणुकुक्षिसंभूताया मह० श्रीसोखुकाया. पुण्याभिवृद्धये श्रीनागेन्द्रगच्छे भट्टारकश्रीमहेन्द्रसूरिसताने शिष्यश्रीशान्तिसूरिशिष्यश्रीआणन्दसूरिश्रीअमरसूरिपदे भट्टारकश्रीहरिभद्रसूरिपट्टालंकरणश्रीविजयसेनसूरिप्रतिष्ठितश्रीमदादिजिनराजश्रीऋषभदेवप्रमुखचतुर्विंशतितीर्थंकरालङ्कृतोऽयमभिनव समण्डप श्रीअष्टापदमहातीर्थावतारप्रधानप्रासाद' कारित ।

स्वस्ति श्रीवलये नमोऽस्तु नितरा कर्णाय दाने ययो-
रस्पष्टेऽपि दृशा यश कियदिद वन्ध्यास्तदेता' प्रजाः ।
दृष्टे सम्प्रति वस्तुपालसचिवत्यागे करिष्यन्ति ता
कीर्त्ति काचन या पुन. स्फुटमिय विश्वोऽपि नो मास्यति ॥

कोटीरै कटकाङ्गुलीयतिलकै. केयूरहारादिभि.
कौशेयैश्च विभूष्यमाणवपुषो यत्पाणिविश्राणितै ।
विद्वासो गृहमागता. प्रणयिनीरप्रत्यभिज्ञाभृत-
स्तैस्तैः स्वाशपथै कथ कथमिव प्रत्याययाचक्रिरे ॥

व्यास व्यातनुता विरोचनसुतस्त्याग कवित्वश्रिय
भासव्यासपुर सरा पृथुरघुप्रायाश्च वीरव्रतम् ।
प्राज्ञा नाकिपताकिनीगुरुरपि श्रीवस्तुपाल ध्रुव
जानीमो न विवेकमेकमकृतोत्सेकं तु कौतस्कुतम् ॥

वास्तव वस्तुपालस्य वेत्ति कश्चरिताद्भुतम् ।
•यस्य दानमविश्रान्तमर्थिष्वपि रिपुष्वपि ॥

स्तोतव्यं खलु वस्तुपालसचिवः कैर्नाम वाग्वैभवै-
र्यस्य त्यागविधिर्विधूय विविधा दारिद्रमुद्रां हठात् ।
विश्वेऽस्मिन्नखिलेऽप्यसूत्रयदसावर्थातिदानेति च
द्वौ शब्दावभिधेयवस्तुविरहव्याहन्यमानस्थिती ॥
आद्येनाप्यपवर्जनेन जनितार्थित्वप्रमाथान्पुन
स्तोक दत्तमतिक्रमान्तरगतानाह्वाययन्नर्थित' ।
पूर्वस्माद्गुणसख्ययापि गुणित यस्तेष्वनावर्तिषु
द्रव्य दातुमुदस्तहस्तकमलस्तस्थौ चिर दु.स्थितः ॥
विश्वेऽस्मिन्किल पङ्कपङ्किलतले प्रस्थानवीथीर्विना
सीदन्नेष पदे पदेन पुरतो गन्तेति संचिन्तयन् ।
धर्मस्थानशतच्छलेन विदधे धर्मस्य वर्षीयस
सचाराय शिलाकलापपदवीं श्रीवस्तुपाल स्फुटम् ॥
अम्भोजेषु मरालमण्डलरुचो डिण्डीरपिण्डत्विष.
कासारेषु पयोधिरोधसि लुठन्निर्णिक्तमुक्ताश्रिय' ।
ज्योत्स्नाभा' कुमुदाकरेषु सदनोद्यानेषु पुष्पोल्बणा
स्फूर्तिं कामिव वस्तुपाल कृतिन' कुर्वन्ति नो कीर्तयः ॥
देव स्वर्नाथ कष्ट ननु क इव भवान्नन्दनोद्यानपाल.
खेदस्तत्कोऽद्य केनाप्यहह हतहतः काननात्कल्पवृक्षः ।
हुं मा वादीस्तदेतत्किमपि करुणया मानवाना मयैव
प्रीत्यादिष्टोऽयमूर्व्यास्तिलकयति तल वस्तुपालच्छलेन ॥
श्रीमन्त्रीश्वरवस्तुपालयशसामुच्चावचैर्वीचिभिः
सर्वस्मिन्नपि लम्भिते धवलता कल्लोलिनीमण्डले ।
गङ्गेवेयमिति प्रतीतिविकलास्ताम्यन्ति कामं भुवि
भ्राम्यन्तस्तदनुसादमन्दितमुदो मन्दाकिनीयात्रिकाः ॥
वक्त्र निर्वासनाज्ञाश्रयनपथगत यस्य दारिद्र्यदस्यो-
र्दृष्टिः पीयूषवृष्टिः प्रणयिषु परितः पेतुषी सप्रसादम् ।

प्रेमालापस्तु कोऽपि स्फुरदसमपरब्रह्मसवादवेदी
नेदीयान्वस्तुपालः स खलु यदि तदा को न भाग्यैकभूतिः ॥
साक्षाद्ब्रह्मपर धरागतमिव श्रेयो विवर्त्तं सता
तेजःपाल इति प्रसिद्धमहिमा तस्यानुजन्मा जयी।
यो धत्ते न दशा कदापि कलितावद्यामविद्यामयीं
य चोपास्य परिस्पृशन्ति कृतिन सद्य परा निर्वृतिम् ॥
आकृष्टे कमलाकुलस्य कुदशारम्भस्य सस्तम्भन
वश्यत्व जगदाशयस्य यशसा मासान्तनिर्वासनम्।
मोह' शत्रुपराक्रमस्य मृतिरप्यन्याय दस्योरिति
स्वैर षड्विधकर्मनिर्मितमया मन्त्रोऽस्य मन्त्रीशितु' ॥
एते मलधारिनरेन्द्रसूरिणाम्।
स्तम्भतीर्थेऽत्र कायस्थवशे वाजडनन्दन'।
प्रशस्तिमेतामलिखज्जैत्रसिंहभ्रुवः सुधी ॥
हरिमण्डप न० नेय २ श्रीवस्तुपालप्रभोः प्रशस्तिरिय निष्पन्ना ॥
मङ्गल महाश्री' ॥
(गिरनार इन्स्क्रिप्शन्स् न० २। २६-२७)

(१७२)

गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैन-मन्दिरस्थः पञ्चमः शिलालेखः।

ये दुज्जयन्त ... . जयाभूप्रजाकल्याणा।

स्वस्ति श्रीविक्रमसवत् १२८८ वर्षे फागुण शुदि १० बुधे श्रीमदणहिलपुरवास्तव्यप्राग्वाटान्वयप्रसूत ठ श्रीचण्डपालात्मज ठ श्रीचण्डप्रसादाङ्गज ठ श्रीसोमतनुज ठ श्रीआशाराजनन्दनस्य ठ श्रीकुमारदेवीकुक्षिसभूतस्य ठ. श्रीलुणिग मह० श्रीमालदेवयोरनुजस्य मह० श्रीतेजःपालाग्रजन्मनो महामात्यश्रीवस्तुपालस्यात्मजे मह० श्रीललितादेवीकुक्षिसरोवरराजहंसायमाने मह० श्रीजयन्तसिंहे सं० ७८ वर्षपूर्वं स्तम्भतीर्थे

मुद्राव्यापारान्व्यापृण्वति सति स० ७७ वर्षे शत्रुंजयोज्जयन्तप्रभृतिमहातीर्थयात्रोत्सवप्रसादाविर्भूतश्रीमद्देवाधिदेवप्रसादासादितसघाधिपत्येन चौलुक्यकुलनभस्तलप्रकाशनैकमार्त्तण्डमहाराजाधिराजश्रीलवणप्रसाददेवसुतमहाराजश्रीवीरधवलदेवप्रीतिप्रतिपन्नापत्येन महामात्यश्रीवस्तुपालेन तथानुजेन स० ७६ वर्षपूर्वं गुर्जरमण्डले धवलक्कप्रमुखनगरेषु मुद्राव्यापार व्यापृण्वता मह० श्रीतेजःपालेन च श्रीशत्रुंजयार्बुदाचलप्रभृतिमहातीर्थेषु श्रीमदणहिलपुरभृगुपुरस्तम्भनकपुरस्तम्भतीर्थदर्भवतीधवलक्कप्रमुखनगरेषु तथान्यसमस्तस्थानेष्वपि कोटिशोऽभिनवधर्मस्थानानि प्रभूतजीर्णोद्धाराश्च कारिता.। तथा सचिवेश्वरश्रीवस्तुपालेनेह स्वय निर्मापितश्रीशत्रुंजयमहातीर्थावतारश्रीमदातीर्थकरश्रीऋषभदेवस्तम्भनकपुरावतारश्रीपार्श्वनाथदेवसत्यपुरावतारश्रीमहावीरदेवप्रशस्तिसहितकश्मीरावतारश्रीसरस्वतीमूर्तिकुलिकाचतुष्टयजिनयुगलाम्बावलोकनाशाम्बप्रद्युम्नशिखरेषु श्रीनेमिनाथदेवालकृतदेवकुलिकाचतुष्टयतुरगाधिरूढस्वपिता मह० श्रीसोमनिजपितृ ठ श्रीआशाराजमूर्तिद्वयचारुतोरणत्रयश्रीनेमिनाथदेव आत्मीयपूर्वजाग्रजानुजपुत्रादिमूर्तिसमन्वितसुखोद्घाटनकस्तम्भश्रीअष्टापदमहातीर्थप्रभृति अनेककीर्तनपरम्पराविराजिते श्रीनेमिनाथदेवाधिदेवविभूषितश्रीमदुज्जयन्तमहातीर्थे आत्मनस्तथा स्वधर्मचारिण्या' प्राग्वाटजातीय ठ श्रीकन्हडपुत्र्या. ठ राणुकुक्षिसंभूताया मह०-श्रीललितादेव्याः पुण्याभिवृद्धये श्रीनागेन्द्रगच्छे भट्टारकश्रीमहेन्द्रसूरिसताने शिष्यश्रीशान्तिसूरिशिष्यश्रीआणन्दसूरिश्रीअमरसूरिपदे भट्टारकश्रीहरिभद्रसूरिपट्टालकारप्रभुश्रीविजयसेनसूरिप्रतिष्ठितश्रीअजितनाथदेवादिविंशतितीर्थकरालकृतोऽयमभिनव. समण्डपः श्रीसमेतमहातीर्थावतारप्रासाद. कारित ।

स श्रीजिनाधिपतिधर्मधुराधुरीणः
श्लाघास्पद कथमिवास्तु न वस्तुपालः ।
श्रीशारदासुकृतकीर्तिनयादिवेण्या
पुण्यः परिस्फुरति जङ्गमसगमो यः ॥

विभुता विक्रमविद्या विदग्धता वित्तवितरणविवेकैः।
यः सप्तभिर्विकारैः कलितोऽपि बभार न विकारम्॥
यस्य भूः किमसावस्तु वस्तुपालसुतः सदा।
नावर्णनीयावप्येतौ धर्मकर्मकृतौ कृतौ॥
कस्यापि कविता नास्ति विनास्य हृदये सुखम्।
वास्तवं वस्तुपालस्य पश्यामस्तद्वयं च यम्॥
दुर्गं स्वर्गगिरिं सकल्पतरुभिर्भेजे न चक्षुःपथे
तस्थौ कामगवी जगाम जलधेरन्तं स चिन्तामणिः।
कालेऽस्मिन्नवलोक्य यस्य करुणं तिष्ठेत कोऽन्यः स्वतः
पुण्यः सोऽस्तु न वस्तुपालसुकृती दानैकवीरः कथम्॥
सोऽयं मन्त्री गुरुरतितरामुद्धरन्धर्मभारं
श्लाघाभूमिं नयति न कथं वस्तुपालः सहेलम्।
तेजःपालः स्वबलधवलः सर्वकर्मीणबुद्धि-
र्द्वैतीयीकं कलयतितरां यस्य धौरेयकत्वम्॥
एतस्मिन्वसुधासुधाजलधरे श्रीवस्तुपाले जग-
ज्जीवातौ सितयोच्चयैर्नवनवैर्नक्तं दिवं वर्षति।
आस्वातन्यजनाघनोज्झितशशीज्योत्स्नाच्छवल्गद्गुणो-
द्भूतैरद्य .. .. ॥
लक्ष्मीर्मन्थाचलेन्द्रभ्रमणपरिचयादेव पारिप्लवेयं
भ्रूभङ्गस्यैव भङ्गाच्चकितमृगदृशा प्रेमनस्थेतरस्य।
आयुर्निश्वासवायुप्रणयपरतयैवेवमस्थैर्यदुःस्थ
स्थास्नुर्धर्मोऽयमेकः परमितिहृदये वस्तुपालेन मेने॥
तेजःपालस्य विष्णोश्च कः स्वरूपं निरूपयेत्।
स्थितं जगत्रयीं पातु यदा यो वरकन्धरे॥
ललितादेवीनाम्ना सधर्मिणी वस्तुपालस्य।
अस्यामनिरस्तनयस्तनयोऽयं जयन्तसिंहाख्यः॥

दृष्ट्वा वपुश्च बृ'' 'च परस्परविरोधिनी ।
विवादा 'जैत्रसिंहस्तारुण्यवाद्रि(?)कः ॥
कृतिरियं मलधारिश्रीसरचन्द्रसूरीणाम् ॥
स्तम्भतीर्थेऽत्र कायस्थवंशे वाजडनन्दनः ।
प्रशस्तिमेतामलिखज्जैत्रसिंहभ्रुवः सुधीः ॥
वाडहस्य तनूजेन सूत्रधारेण धीमता ।
एषा कुमारसिंहेन समुत्कीर्णा प्रयत्नत' ॥
श्रीनेमेस्त्रिजगद्भर्तुरम्बायाश्च प्रसादतः ।
वस्तुपालान्वयस्यास्तु प्रशस्ति' स्वस्तिशालिनी ॥

(गिरनार इन्स्क्रिप्शन्स् न० २ । २७–२९)

---

(१७३)

,गिरनारपर्वतस्थवस्तुपालतेजःपालजीर्णोद्धृतजैन-मन्दिरस्थः षष्ठः शिलालेखः ।

समेताद्रिशिर.किरीटमणय' सेरसराहकृति-
ध्वंसोल्लासितकीर्तय शिवपुरप्राकारतारश्रिय' ।
आनत्यश्रितसविदादिविलसद्रत्नौघरत्नाकरा
कल्याणावलिहेतव' प्रतिकल ते सन्तु वस्तीर्थपाः ॥

स्वस्ति श्रीविक्रमसंवत् १२८८ वर्षे फागुण सुदी १० बुधे श्रीमदणहिलपुरवास्तव्यप्राग्वाटकुलालकरणश्रीचण्डपालात्मज ठ. श्रीचण्डप्रसादाङ्गज ठ श्रीसोमतनूज ठ श्रीआशाराजनन्दनस्य ठ श्रीकुमारदेवीकुक्षिसभूतस्य ठ श्रीलुणिग मह० श्रीमालदेवयोरनुजस्य मह० श्रीललितादेवीकुक्षिसरोवरराजहसायमाने मह० श्रीजयन्तसिंहे स० ७९ वर्षपूर्वं स्तम्भतीर्थमुद्राव्यापारान् व्यापृण्वति सति सं० ७७ वर्षे श्रीशत्रुंजयोज्जयन्तप्रभृतिमहातीर्थयात्रोत्सवप्रभाविताविर्भूतश्रीमद्देवाधिदेवप्रसादासादितसङ्घाधिपत्येन चौलुक्यकुलनभस्तलप्रकाशनैकमार्तण्डमहाराजाधि-

राजश्रीलवणप्रसाददेवसुतमहाराजश्रीवीरधवलदेवप्रीतिप्रतिपन्नराज्यस-र्वैश्वर्येण श्रीशारदाप्रतिपन्नापत्येन महामात्यश्रीवस्तुपालेन तथानुजेन सं० ७६ वर्षपूर्वं गुर्जरमण्डले धवलक्कप्रमुखनगरेषु मुद्राव्यापारान् व्यापृण्वता मह० श्रीतेजःपालेन च श्रीशत्रुंजयार्बुदाचलप्रभृतिमहातीर्थेषु श्रीमदणहिलपुरभृगुपुरस्तम्भनकपुरस्तम्भतीर्थदर्भवतीधवलक्कप्रमुखनगरेषु तथा अन्यसमस्तस्थानेष्वपि कोटिशोऽभिनवधर्मस्थानानि प्रभूतजीर्णोद्धाराश्च कारिता। तथा श्रीशारदाप्रतिपन्नपुत्रसचीवेश्वरश्रीवस्तुपालेन स्वसधर्मचारिण्या प्राग्वाटजातीय ठ श्रीकान्हडपुत्र्या ठ राणुकुक्षिसभूताया मह० श्रीललितादेव्यास्तथा आत्मन पुण्याभिवृद्धये इह स्वय निर्मापितश्रीशत्रुंजयमहातीर्थावतार श्रीमदादितीर्थंकर श्रीऋषभदेवस्तम्भनकपुरावतार श्रीपार्श्वदेवसत्यपुरावतार श्रीमहावीरदेवप्रशस्तिसहित काश्मीरावतारश्रीसरस्वतीमूर्तिदेवकुलिकाचतुष्टयजिनयुगल अम्बावलोकनाशाम्ब प्रद्युम्नशिखरेषु श्रीनेमिनाथदेवालकृत देवकुलिकाचतुष्टयतुरगाधिरूढ निजपितामह ठ श्रीसोमस्वपितृ ठ आशाराजमूर्तिद्वितीयचारुतोरणत्रय श्रीनेमिनाथदेव आत्मीयपूर्वजाग्रजानुजपुत्रादिमूर्तिसमन्वितसुखोद्घाटनकस्तम्भ श्रीअष्टापदमहातीर्थप्रभृति अनेककीर्तनपरम्पराविराजिते श्रीनेमिनाथदेवाधिदेवविभूषितश्रीमदुज्जयन्तमहातीर्थे श्रीनागेन्द्रगच्छे भट्टारकश्रीमहेन्द्रसूरिसताने शिष्यश्रीशान्तिसूरिशिष्य श्रीआनन्दसूरि श्रीअमरसूरिपदे भट्टारकश्रीहरिभद्रसूरिपट्टालकरणप्रभु श्रीविजयसेनसूरिप्रतिष्ठित श्रीमदजितनाथदेवप्रमुखविंशतितीर्थंकरालकृतोऽयमभिनव. समण्डप श्रीसंमेतावतारमहातीर्थे प्रासाद. कारित.।

मुष्णाति प्रसभं वसु द्विजपतेर्गौरीगुरु लङ्घय-
न्नो धत्ते परलोकतो भयमहो हसापलापे कृती।
उच्चैरास्तिकचक्रवालमुकुटश्रीवस्तुपाल स्फुट
भेजे नास्तिकतामय तव यश पूर कुतस्त्यामिति ॥

चक्रेपाटोपपरै. परैश्चलचमूरङ्गत्तुरङ्गक्षत-

क्षोणीक्षोदवशादशेषजलधिं श्रीस्तम्भतीर्थे पुरे ।
स्वेदाम्भस्तटिनीघटाघटनया श्रीवस्तुपाले स्फुर-
त्तेजस्तिग्मगभस्तितप्ततनुभिस्तैरेव सपूरितः ॥
दिग्यात्रोत्सववीरवीरधवलक्षोणीधवाध्यासित
प्राज्य राज्यरथस्य भारमभित. स्कन्धे दधल्लीलया ।
भाति भ्रातरि दक्षिणे समगुणे श्रीवस्तुपालः कथ
न श्लाघ्य. स्वयमश्वराजतनुज काम स वामस्थितिः ॥
लावण्याङ्ग इति द्युतिव्यतिकरै. सत्याभिधानोऽभव-
द्भ्राता यस्य निशानिशान्तविकसच्चन्द्रप्रकाशानन. ।
शङ्के शकरकोपसभ्रमभरादासीदनङ्गस्मर.
साक्षादङ्गमयोऽयमित्यपह्नुतः स्वर्गाङ्गनाभिर्लघु ॥
रक्तः सद्रतिभावभाजि चरणे श्रीमल्लदेवोऽपरो
यद्भ्राता परमेष्ठिवाहनतया प्राप्त प्रतिष्ठा पराम् ।
खेलन्निर्मलमानसे न समय क्वापि श्रयन्पङ्किलं
विश्वे राजति राजहस इव यः सशुद्धपक्षद्वय' ॥
सोऽय तस्य सुधारहस्यकवितानिष्ठ. कनिष्ठ. कृती
बन्धुर्बन्धुरबुद्धिबोधमधुर. श्रीवस्तुपालाभिधः ।
ज्ञानाम्भोरुहकोटरे भ्रमरता सारङ्गसाम्य यशः
सोमे सौरितुला च यस्य महिमक्षीरोदधौ स्व दधौ ॥
इन्दुर्बिन्दुरपा सुरेश्वरसरिड्डिण्डीरपिण्ड' पति-
र्भासा विद्रुमकन्दलः किल विभु श्रीवत्सलक्ष्मा नभः ।
कैलाशत्रिदशेभशभुहिमवत्प्रायास्तु मुक्ताफल-
स्तोम कोमलवालुकास्य च यश क्षीरोदधौ कौमुदी ॥
हस्ताभ्यस्तसारस्वतरसरसनप्राप्तमाहात्म्यलक्ष्मी-
स्तेजःपालस्ततोऽसौ जयति वसुभरै. पूरयन्दक्षिणाशाम् ॥
यद्बुद्धिः कलिभ ·· (?)द्विपगहनपरक्षोणिभृद्बुद्धिसप-
ल्लोपामुद्राधिपस्य स्फुरति लसदिनस्फारसचारहेतुः ॥

पुण्यश्रीर्भुवि मल्लदेवतनयोऽभूत्पुण्यसिंहो यशो-
वर्यं स्फूर्जति जैत्रसिंह इति तु श्रीवस्तुपालात्मज. ।
तेजःपालसुतस्त्वसौ विजयते लावण्यसिंहः स्वयं
यैर्विश्वे भवदेकपादपि कलौ धर्मश्चतुष्पादयम् ॥
एते श्रीनागेन्द्रगच्छे भट्टारकश्रीउदयप्रभसूरीणाम् ।
स्तम्भतीर्थेऽत्र कायस्थवंशे वाजडनन्दनः ।
प्रशस्तिमेतामलिखज्जैत्रसिंहध्रुव सुधी. ॥
वाहडस्य तनूजेन सूत्रधारेण धीमता ।
एषा कुमारसिंहेन समुत्कीर्णा प्रयत्नत ॥
श्रीनेमेस्त्रिजगद्भर्तुरम्बायाश्च प्रसादत ।
वस्तुपालान्वयस्यास्ति प्रशस्ति स्वस्तिशालिनी ॥
श्रीवस्तुपालप्रभोः प्रशस्तिरियं निष्पन्ना । शुभ भवतु ॥

(गिरनार इन्स्क्रिप्शन्स्-न० २। २९-३०)